1.5

महामहोपाध्यायश्रीभवनाथमिश्रविरचितो

मीमांसानयविवेकः

(तृतीयाध्यायः)

[द्वितीयो भागः]

तर्कपादस्य विवेकतत्त्वव्याख्यया, तदुपरितनस्य महामहोपाध्यायश्रीवरदराजविरचितया दीपिकाख्यव्याख्यया च संवलितः

पण्डितराजेत्यादिविरुदाङ्कितेन, एम.-ए.-पदभाजा
एस्.-सुब्रह्मण्यशास्त्रिणा संशोध्य प्रकाशं नीतः

राष्ट्रियसंस्कृतसंस्थानम्
नव-दिल्ली
१९९१

प्रकाशको
निदेशकः
[राष्ट्रिय संस्कृत संस्थान
ए-40 विशाल एन्क्लेव
दिल्ली
110027]

मूल्यम् रू०

प्रथमं संस्करणम्

मुद्रकः
अमर प्रिंटिंग प्रेस
8/25, विजय नगर, दिल्ली-110009

MĪMĀṀSĀNAYAVIVEKA

(Chapter III)

VOLUME II

OF

MAHĀMAHOPĀDHYĀYA BHAVANĀTHA

with Dīpikā Commentary

By

MAHĀMAHOPĀDHYĀYA VARADARĀJA

Edited by

Panditaraja

S. SUBRAHMANYA SHASTRI, M. A.

RASHTRIYA SANSKRIT SANSTHAN

NEW DELHI

1991

Publishsed by
Director
Rashtriya Sanskrit Sansthan
A-10 Vishal Enclave
New Delhi
110027

First Edition

Price Rs.

Printed by
Amar Printing Press,
8/25, Vijay Nagar, Delhi, 110009

विषयानुक्रमणिका

तृतीयाऽध्यायस्य प्रथमः पादः

द्वितीयः पादः

॥ श्री ॥

मीमांसानयविवेकः

महामहोपाध्याय-

श्रीभवनाथमिश्रप्रणीतः

★

तृतीयाध्यायस्य प्रथमः पादः

पञ्चिकाद्वयतत्त्वार्थसंमोहविनिवृत्तये ।
उद्ग्राहिणी भवेनैषा वक्ष्यते शेषलक्षणे ॥

नयविवेकदीपिका

तृतीयाध्यायस्य प्रथमः पादः

अथातः शेष लक्षणम्

शुद्धस्फटिक सङ्काशं जाह्नवीजन्मभूपदम् ।
अज्ञान नाशकं विष्णुं नमामि तुरगाननम् ॥
यस्याशु स्मृतिमात्रेण नष्टाः प्रत्यूह हेतवः ।
नमामि प्रणताभीष्टदायिनं द्विरदाननम् ॥
नमो गुरुभ्यस्तदनु भाष्यकार प्रभाकरौ ।
नाथं भवं निबन्द्धृंश्च चन्द्रादीन् समुपास्महे ॥
सुदर्शनगुरुं वन्दे गम्भीरगुरुदर्शनम् ।
यत्प्रसादेन शिष्याणां करस्थामलकायते ॥
आत्रेयकुलसम्भूतो वरदार्यो बहुश्रुतः ।
विवेकहृदयज्ञाने दीपिकां निर्ममे सुधीः ॥

स्वकीयग्रन्थे श्रोतृजनाविलम्बितप्रवृत्त्यर्थं प्रकृतविषये स्वकृति-वैयर्थ्यपरिहारार्थं च विवरणनिबन्धनपञ्चिकाद्वयसम्यगर्थाज्ञानविनिवृत्तये युक्तीनामुक्तिप्रत्युक्तिरूप परम्परात्मकव्याख्या शेषलक्षणे क्रियत इति कर्तृ नामग्रहणपूर्वकमाह—पञ्चिकाद्वयेति। उद्ग्राह्यते उद्घाटच ज्ञाप्यते सम्यक् अर्थस्वरूपमनयेति उद्ग्राहिणी व्याख्या। उत्पूर्वो ग्रहिःण्यन्तो व्याख्यायां

अथातः शेषलक्षणम् ।।१।।

अत्रभाष्यम्—नानाकर्मलक्षणं वृत्तमिति । शास्त्रभेदलक्षणं वृत्तमित्यर्थः । क्रियाकारकाद्यन्वितानुबन्धभूतकर्मभेदकथनमुखेन हि शास्त्रेभेद एवोक्तः क्रियाकारकाद्यन्वितांशेन साध्यभेदाधीनः अनुबन्धभूतकर्मांशेन अनुबन्धभेदाधीनः । एवं द्विविधशास्त्रभेदहेतु-

---

वर्तते। अत्र भाष्यटीकाव्याख्याक्रमेण तदुभयार्थकथनपरस्य पञ्चिका-ग्रन्थस्य सम्यगर्थं बोधयितुं प्रथमं वृत्तकीर्तनपरं भाष्यमनुभाषते—अत्र भाष्यमिति। नन्वेतत् कर्मभेदवृत्तकथनपरं भाष्यं गुरुमतेऽनुपपन्नं, तन्मते द्वितीये शास्त्रभेदस्यैव व्युत्पाद्यत्वेन वृत्तत्वादित्याशङ्क्य तद्व्याख्यानपरां टीकामर्थतोऽनुभाषते—शास्त्रभेदेति।

ननु कथमन्याभिधानेऽन्यदभिहितं भवति इत्याशङ्क्य तदर्थकथन-परां पञ्चिकामनुभाषते—क्रियाकारकादीति। आदिशब्देन गुणगुण्यादयो गृह्यन्ते। अत्र यद्यपि भाष्यस्य कर्मशब्देन क्रियामात्रं प्रतीयते तथापि क्रियास्वभावेन कारकान्विताद्यवगम्यते । तथा स्वतः साध्यत्वेन नियोग-विषयत्वं च तथाविधस्यैव द्वितीये वृत्तत्वात् । वृत्तकथनपरत्वादस्य शब्दस्य। नानाकर्मपदेन यद्यपि क्रियाकारकाद्यन्वितानुबन्धभूत कर्मभेद एवाभिधीयते तथापि तदभिधानमुखेन शास्त्र[भेद ए]वाभिहितो भवति। द्रव्यादिविधिपरशास्त्रेष्वपि तदनुरक्तकर्मविधानात् कर्मभेदेनैव शास्त्रभेदः। एवं तद्गुणादिशृङ्खलादिधीष्वपि परम्परया गुणानुरागादनुरक्तकर्मविधेः कर्म भेदत एव शास्त्र भेदः। नन्वेवमनुबन्धभेदनिबन्धनः शास्त्रभेद उक्तः न साध्यभेदनिबन्धनः, उभयनिबन्धनश्च शास्त्रभेदो द्वितीये वृत्तः तदु-भयहेतुकोऽभिधातव्यः इत्याशङ्क्याह—क्रियाकारकेति। पञ्चिकोक्तक्रिया-कारकाद्यन्वित कर्मभेदांशेन साध्यभेदाधीन शास्त्रभेद उक्तः अनुबन्धभूत-कर्मभेदांशेनानुबन्धभेदाधीनः। एवं च पूर्वग्रन्थे कर्मपदं क्रियाकारकाद्यन्वित-कर्म, अनुबन्धभूतकर्मेत्युभयत्र सम्बध्यत इत्युपगन्तव्यम्।

नन्वेवं कथं कर्मभेदे नानाकर्मपदेनाभिहिते शास्त्रभेदोऽभिहितो भव-तीति चोद्यं न परिहृतमित्यत्राह—एवं द्विविधेति। अस्यार्थः शास्त्रभेदहेतुभूत-कर्मभेदकथन मुखेन तत्फलभूताशास्त्रभेदस्यापि शब्देन बोधोत्पादनं कृतम्। हेत्वर्थ कथनस्य तत्फलभूतार्थकथन[पर्यवसायित्वात्] अतो विवक्षितशास्त्रभेद एव वृत्तकथनपरस्य नानाकर्मपदस्य तात्पर्यम्। यथा स्वर्गकामपदस्य कक्ष्या-न्तरितनियोज्यपरत्वम् । ननुनानाकर्मपदेन कथं शास्त्रभेदबोधोत्पादनं,

कथनमुखेन फलभूतशास्त्रभेदबोधोत्पादनं धूमकथनमुखेनेवाग्नि-बोधोत्पादनमिति । न च लक्षणावृत्त्या शास्त्रभेद उक्तः । हेतु-युक्तस्वरूपस्यैव शेषत्वहेतुत्वात् तन्मुखमेव कीर्तनं युक्तमिति स्फोरयिष्यति ।

न तावन्मुख्यया वृत्त्या, शक्तिरहितत्वात् । नापि लक्षणया, अनुपपत्त्यभावात् कर्मभेदस्य वाक्यार्थरूपवृत्तत्वान्वययोग्यत्वात्, नापि गौण्या, गुणयोगा-भावात्। नापि तात्पर्यं नाम वृत्तिः। मुख्यादि वृत्तित्रयानुस्यूतस्य वृत्त्यन्तरत्वा-नर्हत्वात् वृत्तित्रयेण क्लृप्ते सर्वव्यवहारोपपत्तौ बाह्येन्द्रिय सहकारिणोऽपि मनस इन्द्रियान्तरत्वकल्पनावत् तात्पर्याख्यवृत्तिकल्पनमयुक्तम् । अतः कथं नानाकर्मपदेन शास्त्रभेदबोधोत्पाद इत्याशङ्क्य लौकिकनिदर्शनेनोपपादयति —यथाधूमेति। यथा अग्न्यर्थं प्रवृत्तं प्रति तत्र धूम इति धूमशब्दोच्चारणे धूमशब्दस्य धूमकथनमुखेनानलबोधोत्पादकत्वम्। एवं च वृत्तिमन्तरेणापि जातिशब्दात् गवादेर्व्यक्तिप्रतीतिवत् नानाकर्मपदाच्छास्त्रभेद प्रतीत्युत्पत्तेर्न वृत्त्यपेक्षा ।

यद्वा मुख्यमभिदधतः शब्दस्य यावत्यर्थे तात्पर्यं तत्र सर्वत्र मुख्यैव वृत्तिरिति। एवं च मुख्यवृत्त्यैव नानाकर्मपदोपपत्तौ न प्रकाशोक्तलक्षणा-वृत्त्यङ्गीकारो युक्त इत्याह न च लक्षणेति । एतेनेदमपि निरस्तं यदाहुः क्रियत इति व्युत्पत्त्या कर्मशब्देन कर्म च कर्म च कर्मणी साध्यानुबन्धावुच्येते । नाना च ते कर्मणी इति नानाकर्मणी । ते लक्षणे हेतू यस्येति नानाकर्मलक्षण-पदेन शास्त्रभेद एवोक्त इति। एवं बहुव्रीहिसमासाङ्गीकारे सर्वलक्षणापत्तेः विशेष्यानुपादानाच्च न बहुव्रीहिः । प्रकृतत्वात्प्रतीतौ किं तत्कीर्तनेनेति चेत् द्विबहुवचनगर्भसमासस्य शास्त्रे स्वतोऽनङ्गीकारात् लक्षणपदान्तरस्य प्रयोगा-पत्तेः, पुल्लिङ्गापत्तेश्च। ननु स्वायत्ते प्रयोगे किमिति भाष्यकारेण वक्रोक्तिः कृता यावताशास्त्रभेदलक्षणं वृत्तमित्येव किमिति नोक्तमित्य-त्राह—हेतुयुक्तेति। क्रियाकारकाद्यन्वितानुबन्धभूतकर्मभेदरूपहेतु युक्तस्यैव शास्त्रभेदस्य हेतुत्वात् हेतुमुखेनैव तत्कीर्तनं युक्तम्। यथा स्वहेतुयुक्तस्यैव शेषताहेतुता तथोत्तरत्र हेतुहेतुमद्भावसमर्थनवेलायां स्फोरयिष्यते। एतेनेदं परास्तं यदाहुः क्रियत इति व्युत्पत्त्या कर्मशब्देन शास्त्रार्थी भूतो नियोगो-ऽभिधीयते । अतोनानाकर्मपदेन शास्त्रभेदफलभूतशास्त्रार्थीभूतनियोगभेद-प्रतिपादनसमर्थेन कारणे कार्योपचार[रात्]शास्त्रभेदोऽभिधीयत इति । औपचारिकोऽयं प्रयोग इति ग्रन्थविरोधाच्च ।

ननु शास्त्रभेदः न शेषत्वे हेतुः द्रव्यगुणसंस्कारणां स्वशेष्यनपेक्षसाध्यभेदाभाव एव हि शेषता प्रकरणविनियोज्यानामस्तु नाम स्वशेषिभ्योऽनुबन्धभेदः स तु न द्वैतीयः, अचिन्तितसिद्धत्वात्। मैवं, परमापूर्वानुबन्धशास्त्रं हि मूलभूतम् तद्गतमवान्तर साध्यानुबन्धशास्त्रं, भेदलक्षणे च परमावांतर शास्त्रेयत्तया भेद उक्ते स्वपरमशास्त्रान्तर्गते निरूढकार्ये शेषिण्यनिरूढकार्यस्य शेषता

एवं वृत्तकीर्तनमुपपाद्य वृत्तवर्तिष्यमाणाध्याययोः हेतुहेतुमद्भावलक्षणसम्बन्धमाक्षिपति—नन्विति। अस्यार्थः यस्मिन् सति यद्भवति असति च न भवति तत् तत्प्रीतिहेतुः नहि शास्त्रभेदे सत्येव विशेषत्वं सोमेष्ट्यपूर्वयोरभावात्। अतो न शास्त्रभेदः शेषत्वे हेतुः प्रत्युत शास्त्रभेदाभाव एव शेषशेषितेत्याह—द्रव्यगुणेति। यद्यपि द्रव्यशास्त्रस्य च गुणशास्त्रस्य च संस्कारशास्त्रस्य च स्वशेषिशास्त्रेण सह परस्परविलक्षण साध्यभेदः तथापि शेषशेषिणोरन्योन्यनिरपेक्षसाध्यभेदाभावात् शास्त्रभेदाभाव एव शेषशेषिता। तदुक्तम्—अन्योन्यनिरपेक्षं यत्तत्राद्यं शास्त्रभेदकमिति। तथा एकवाक्यप्रमेययोरपि क्रयैकहायन्योः शेषशेषिभावोऽवगम्यत इति दूरे शास्त्रभेदस्य हेतुता। ननु प्रकरणविनियोगे शास्त्रभेदोहेतुरेव आरादुपकारिणां करणशास्त्रापेक्षया अनुबन्धभेदे शास्त्रभेदस्य सत्त्वादित्यत्राह—प्रकरणेति। प्रकरणविनियोज्यानां स्वशेषेभ्योऽनुबन्धभेदेऽपि तस्याचिन्तितसिद्धत्वेन द्वैतीयत्वाभावान्न शेषत्वहेतुत्वम्। अचिन्तितसिद्धत्वं चोत्तरत्र श्रीकरमतनिराकरणावसरे निपुणतरमुपपादयिष्यामः।

समाधत्ते—मैवमिति। शास्त्रभेदस्य शेषत्वहेतुत्वं नास्तीत्येवं मा मंस्थाः किन्तु अस्त्येवेति भावः। हेतुत्वं समर्थयितुं पातनिकामाह—परमापूर्वेति। दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादि परमापूर्वानुबन्धबोधकमेवैकवाक्यं मूलभूतं शास्त्रं अन्य निरपेक्षतया अलौकिकार्थ प्रतिपादकत्वात् सविषयनियोज्यत्वेन सम्पूर्णसामग्रीकत्वात्। कथं तर्हि निरधिकाराणामवान्तरवाक्यानां शास्त्रत्वमित्यत्राह—तद्गतमिति। तद्गतमिति हेतुगर्भविशेषणं तद्गतत्वेन परमापूर्वान्वितार्थ प्रतिपादकत्वेन अवान्तरसाध्यबोधकं अवान्तरानुबन्धवोधकं च वाक्यं शास्त्रं न स्वतन्त्रतयेत्यर्थः। एवं पातनिकामुक्त्वा समर्थयति हेतुत्वं—भेदलक्षणेति। द्वितीयाध्याये परमशास्त्राणामवान्तरशास्त्राणां च इदमेकं परमशास्त्रं इयदेकमवान्तरशास्त्रमिति इयत्तया भेदे कथिते यत्परमापूर्वार्थो यदन्तरार्थः तत्परमापूर्वान्तर्गतशेषिणि तस्य शेषता न परपरमशास्त्रान्तर्गततया। तथा निरूढकार्यं प्रत्यनिरूढकार्यस्य

न परमशास्त्रान्तर्गततयेतियुक्ता शास्त्रभेदहेतुकता । अन्तर्गत-श्रुत्याद्यधीन क्रियाकारकाद्यन्वयापेक्षया च तद्धेतुकता । श्रुत्यादेर्हि द्वैतीयविनियोगप्रमाणताद्वारिकैव शेषत्वहेतुता, तदुक्तं—"विनियोगतः कर्मभेद उक्त" इति । व्याख्यातं च क्रियाकारकादिविनियोगानुरक्तानुबंध भूतकर्मभेदतः शास्त्रभेदे सत्यपि सिद्ध्यत्येव शेषशेषितेति । अयमर्थः—शास्त्रभेदे शास्त्रार्थयोः शेषशेषितेत्येवं

शेषतेहसाध्यते। निरूढानिरूढता शेषशेषिशास्त्रयोर्भेदे सत्येव सिद्ध्यति नान्यथा। अतो युक्ता शास्त्रभेदहेतुकता शेषत्वस्य । तथाहि—

बृहद्रथन्तरशास्त्रयोर्भेदे सत्येव तद्धर्माणां व्यवस्थया शेषत्वोपपत्तिः। तथा हन्तिप्रोक्षणयोरपि तद्धर्माणाम् । तथा व्रीहियवादि द्रव्यशास्त्राणामपि भेदे तद्धर्मणाम्। एवं सर्वत्रशास्त्रभेदस्य व्यवस्थितशेषत्वहेतुत्वमूहनीयम् । एवं च मिश्रोक्तदूषणं व्यवस्थायाः सप्तमाद्यसिद्धत्वात् न व्युत्पाद्यमवशिष्यत इति तत्प्रत्युक्तम्। यतः सप्तमाद्ये ग्राहकव्युत्पत्तिमात्रं तत्पूर्वं व्यवस्थितं वैनियोगिकं शेषत्वमत्रैव व्युत्पाद्यमिति। किञ्च शास्त्रभेदहेतुत्वेनान्तर्गतश्रुत्यादिप्रमाणाधीन क्रियाकारकाद्यन्वयसव्यपेक्षत्वात् शेषत्वस्य स्वहेतुमुखेनापि शास्त्रभेदस्य शेषत्वं प्रति हेतुत्वं तदाह—अन्तर्गतेति । नन्वेवं समानहेतुकत्वमेवाध्यायार्थयोर्न हेतुहेतुमद्भाव इत्यत्राह—श्रुत्यादिहीति । द्वैतीयक्रियाकारकादिविनियोगप्रामाण्यान्येव श्रुत्यादीनि शेषत्वहेतवो भवन्ति न साक्षात्। द्वैतीयधीविनियोगे तु साक्षादिति हेतुत्वप्रकारभेदान्न समान हेतुत्व[मिति भा]वः।

यत्पुनरिदं स्वहेतुद्वारा हेतुत्वं स्वेनोक्तं तत्र साक्षित्वेन टीकां दर्शयति—तदुक्तमिति। ननु विनियोगो नामैदमर्थ्यं तदिहैव तृतीये चिन्त्यत इति कथं ततः कर्मभेद इत्याशङ्क्य तद्व्याख्यानपरां पञ्चिकामनुभाषते—व्याख्यातं चेति। नन्वस्मिन् ग्रन्थे द्रव्यगुणसंस्कारविषये क्रियाकारकादिविनियोगानुरक्तानुबन्धभूतकर्मभेदतः शेषशेषिशास्त्रयोर्भेदे सत्यपि तयोः शेषशेषिता सिद्ध्यतीत्ययमर्थः प्रतिभाति। सचायुक्तः निरपेक्षसाध्यभेदाभावस्योक्तत्वात्। तथा अपिशब्देन किं न समुच्चीयत इति न जानीम इत्याशङ्क्य ग्रन्थकृदभिप्रेतार्थमाह—अयमर्थ इति । यद्यपि निरपेक्षसाध्यभेदाभावेन सर्वशास्त्राभेदे शास्त्रार्थयोः शेषशेषितेत्येवं न सिद्ध्यति तथाप्युक्तनीत्या व्यवस्थितशेषत्वहेतुताविधया शास्त्रभेदहेतुभूतविनियोगसव्यपेक्षतया शेषत्वस्य हेतुद्वारा हेतुताविधया वा शास्त्रभेदे सत्यपि शेषतासिद्ध्यति। अपि

न सिध्यति। उक्तनीत्या तु शास्त्रभेदे सत्यपि सिध्यतीति।

ननु शेषलक्षण एव क्रियाकारकान्वयोऽस्तु; मैवं शेषतयान्वय-पदे अन्वयान्तरनिवेशो न युक्तः अन्वयान्तररहिते भेदलक्षण एव युक्तः। ननु क्रियाकारकाद्यन्वयासंयुक्तं प्रकरणविनियोज्यं न द्वैतीयापेक्षम् तन्न उपकार्योपकारकान्वयोऽपि द्वैतीय एव अनपेक्ष-साध्यभेदात्करणेतिकर्तव्यता शास्त्रभेदस्यापि तत्रोक्तेः।

श्रीकरस्तु—प्राकरणिक शेषत्वमात्रेद्वैतीयस्यापूर्वबोधकशास्त्र भेदस्यापेक्षेति हेतुतामाह—तन्न, प्राकरणिकशेषता संभूयोपकुर्व-

---

शब्दस्त्वाक्षेप समयोक्तवैपरीत्यसमाधानार्थः। शास्त्रभेदाभाव एव शेषतेत्येवं न नियमः उक्तनीत्या शास्त्रभेदे सत्यपि सिद्धचतीति।

ननु द्वैतीय क्रियाकारकान्वयोऽपि शेषत्वापेक्षितत्वात् तदर्थमत्रैव व्युत्पाद्योऽस्तु किमिति भेदलक्षणे व्युत्पाद्यत इति चोदयति—नन्विति। मैव-मिति। शेषत्वान्वयव्युत्पादनपरे तृतीये अन्वयान्तरस्य क्रियाकारकादिरूपस्य व्युत्पाद्यतया निवेशो न युक्तः, अध्यायभेदापत्तेः। ननु प्राधान्येन व्युत्पाद्यत्वे स्यादयं दोषः अन्यार्थतया तु नाध्यायभेदकतेत्यत्राह—अन्वयान्तरेति। भेद लक्षणसिद्धेनैव क्रियाकारकाद्यन्वयेन शेषत्वोपपत्तौ नान्वयान्तरोपसर्जनतया तृतीयेनिवेशो युक्त इति द्वितीये व्युत्पादनम्। नन्वस्योपसर्जनत्वं शास्त्र-भेदोपयोगितया भेदलक्षणेपि तुल्यमित्यत्राह—भेदलक्षण ऐवेति। यद्यप्यन्यो-पसर्जनत्वं तत्रापि तुल्यं तथापि प्रथमभाविना भेदलक्षणेनैव व्युत्पत्त्याक्षेपो युक्त इति भावः।

नन्वसंयुक्तं प्रकरणादिति क्रियाकारकाद्यन्वयासंयुक्तमेव प्रकरण-विनियोज्यं तत्कथं द्वैतीयविनियोगमपेक्षत इति चोदयति—नन्विति। तन्नेति। पौर्णमास्यधिकरणे अनपेक्षशास्त्रभेदात् करणेतिकर्तव्यता शास्त्र-भेदस्य व्युत्पादनात् तदर्थमुपकार्योपकारक भावस्यापि तत्र व्युत्पादनात् तद-पेक्षं प्रकरण शेषत्वं द्वैतीयविनियोगापेक्षमेव।

तत्र श्रीकरोक्तमेकदेशद्वारा शास्त्रभेदस्य हेतुत्वं दूषयितुमाह—श्रीकरस्त्विति। तन्नेति। अस्यार्थः आरादुपकारिणामाग्नेयादीन् प्रति प्रथमं प्रकरणप्रमाणेन शेषता। सा च तेषां सम्भूयोपकुर्वतामित्येवं चातुर्थन्यायेना-पूर्व चोदकता न तु द्वैतीयभावार्थनयसिद्धेति। अयमाशयः साधिकारविधि-सन्निधिसमाम्नातानां निरधिकाराणां प्रयाजादीनां प्रथमं परमापूर्वानुवादा-

तामित्येवमपूर्वबोधकता, मत्वपूर्वबोधकता द्वितीयसिद्धेति एकदेशापेक्षयापिहेतुता न समर्थिता ।

यदपरं स एवाह लिङ्गविनियोज्यमन्त्रे न शास्त्रभेदापेक्षा, मन्त्रस्याशास्त्रार्थत्वादिति । तन्न, विनियोज्यस्य हि शास्त्रार्थता-वाच्या, साचोक्तनीत्या द्रव्यादीनामिव मन्त्रस्याप्यस्तीति ।

विवरणे तु नानपेक्षसाध्यभेदाच्छास्त्रभेदोऽनुज्ञातः । किंतु प्रातिस्विकसाध्यभेदमात्रात् । अतस्तन्मतेऽवघातव्रीहिविषये शास्त्रभेदेसत्येव शेषशेषितेति । तदुक्तं स्थिते शास्त्र भेदे भिन्नानां शास्त्रार्थानां शेषशेषितेति ।

शङ्काकुण्ठितशक्तित्वेनापूर्वबोधकत्वं नावसीयते किन्तु प्रयाजादि स्वरूपोपस्थापकत्वमेव। अनन्तरमुपस्थित स्वरूपाणां तेषां ग्राहकगृहीतानां निर्वाहार्थं प्रकरणेनैदमर्थ्यमवसीयते यतः किञ्चित्कुर्वत एव शेषतेति तज्जन्य उपकारोऽपि प्रकरणेनैव गम्यते उपकारजनकत्वं च तेषां सर्वैरेक उपकार इत्यङ्गाधिकरणन्यायेन सम्भूयैव, ततश्च प्राच्योदीच्याङ्गसाहित्यार्थं उपादानेन करणोत्पत्त्यपूर्वाणि अङ्गोत्पत्त्यपूर्वाणि च तत्तद्वाक्यस्थलिङ्गादिशब्दाभिधेयतया कल्प्यन्त इत्येवं चातुर्थनयेनैव तेषामपूर्वबोधकता न पुनर्द्वितीय सिद्धेति एकदेशापेक्षयापि हेतुता न समर्थिता ।

यदपि श्रीकरेणैकदेशद्वारेणैव हेतुत्वं नान्यथेत्येतत्समर्थनायोक्तं तदपि दूषयितुमनुभाषते यदपरमिति । लिङ्गविनियोज्यमन्त्रे लिङ्गस्याशब्दरूपत्वेन तद्व्यतिरिक्तमन्त्रोपस्थापकाभावात् मन्त्रस्याशास्त्रार्थत्वात् तद्विनियोगे न शास्त्रभेदापेक्षेत्यर्थः—तन्नेति । अस्यार्थः यस्य हि पदार्थस्य विनियोगोऽभ्युपगम्यते तस्यावश्यं शास्त्रार्थता वाच्या अशास्त्रार्थीभूतस्य विनियोगानुपपत्तेः । सा च द्रव्यादीनामिव मन्त्रस्याप्युक्तनीत्या परमापूर्वान्वितत्वेन विद्यत एव । यथा च नियोगान्वितत्वेनोपस्थितिर्मन्त्रस्य तथा मन्त्राधिकरणे निपुणतरमुपपादितम्—

विवरणे त्विति । तन्मते वस्तु बलात् प्रातिस्विक साध्यभेदमात्रात् शास्त्रभेदानुज्ञानात्व्रीह्यवघातविषयेपि भिन्नयोः शास्त्रार्थयोः शेषशेषितेति । एवं मतद्वये साधितं हेतुहेतुमद्भावमसाङ्कर्येण दर्शयति—तदेवमिति । नन्वेवं निबन्धन मते शास्त्रान्तरविहितं शेषीति नोपपद्यते व्रीह्यवघातविषये शेषशेषिणोरनपेक्षसाध्यभेदाभावेन शास्त्रभेदाभावादित्याशङ्क्याह—निबन्धन

तदेवं निबन्धने स्वपरमशास्त्रान्तर्भूतनिरूढकार्यरूपशेष्यपेक्षा भिन्नशास्त्रता हेतु (कसाध्य) श्रुत्याद्यपेक्षा च । विवरणेतुभिन्न-शास्त्रार्थ भेदापेक्षेति तत्वार्थः । निबन्धने तु शास्त्रान्तरविहितं-शेषीति यदुक्तं तच्छेषिणः शेषानपेक्षसाध्यभेदात् । शेषसाध्यं तु शेषि साध्यापेक्षमेव । अतएवोक्तं "नियमेन तदपेक्ष्यते" "न तेन नियम" इति । ये त्वेतमेव प्रकारमाश्रित्य हेतुतामाहुः । तैर्भिन्नयोः शास्त्रार्थयोः शेषशेषिता न समर्थिता । येतु शेषशास्त्रमप्यनपेक्ष्यैव व्रीहिसाध्यं यवसाध्यमात्रापेक्षमस्त्वित्याहुः । तैरपि न सर्व-

---

इति । यद्यपि शेषशेषिणोरुभयोरपि अनपेक्षत्वं नास्ति तथापि शेषे साध्यं शेषसाध्यानपेक्षमेव तावता शास्त्रान्तरत्वव्यवहारः शेषसाध्यं तु शेषि-साध्यापेक्षमेव । अतः स्थलान्तरे टीकाकारेणोक्तं नियमेन तदपेक्ष्यते न तेन नियम इति नियमेन शेषसाध्येन तत् शेषिसाध्यम् ।

अत्रकेचित् यत्र शेषिशेषभावः तत्रैव शास्त्रभेद सद्भावे हेतुहेतु-मद्भाव स्वारस्यम् । साध्यहेत्वोः समानाधिकरणत्वनियमात् इत्येतमेवा-न्यतरानपेक्षत्वनिबन्धनान्यतरभेदमाश्रित्य हेतुत्वं समर्थयन्ते तदुपन्यस्य निर-स्यति—एतमेवेति । एवमपि भिन्नयोः शास्त्रार्थयोश्शेषशेषिभावो न समर्थितो भवति द्वयोरपि भेदाभावात् इदमत्राकूतम्—यद्यपि ययोश्शेषशेषिभावः तत्रैव शास्त्रभेदे हेतुत्वस्वारस्यं तथापि तादृशस्य शेषि मात्रभेदस्य द्वितीये व्यु-त्पादनाभावात् न हेतुत्वम् । अथ यच्छास्त्रं यत्साध्यानपेक्षं स्वसाध्यप्रतिपादकं तत् ततोभिन्नमिति निरपेक्षसाध्यप्रतिपादकस्य शेषिशास्त्रमात्रस्य तन्मूल-क्रियाकारक भावव्युत्पत्तिमुखेन भेदो व्युत्पादित एव तन्न । एवमप्यन्योन्य-नैरपेक्ष्याभावेन अन्योन्यभेदाभावात् भिन्नयोः शास्त्रार्थयोः शेषशेषिता समर्थिता । किञ्च यद्यन्यतरभेदमाश्रित्य हेतुत्वं तर्हि अन्यतराभेदमाश्रित्या-हेतुत्वं किं न स्यात् । किञ्च यदि शेषिलक्षणमिदं स्यात् तदाशेषिशास्त्रमात्रे भेदोहेतुः स्वारस्येन भवतु । इदं तु शेषलक्षणम् । अतो न शेषिशास्त्र भेदस्य हेतुत्वस्वारस्यम् । अतो न स्वारस्यार्थं क्लिष्ट कल्पना ।

अपरे च पुनर्वैकल्पिकशेषविषये शेषशास्त्रस्य शेषिसाध्यानपेक्षत्वं समर्थयन्ते यवसाध्यमनपेक्ष्यैव व्रीहि साध्यमात्रापेक्षत्वात् । तथा व्रीहि-साध्यमनपेक्ष्यैव यवसाध्यमात्रापेक्षत्वादिति । तदप्यनुपपन्नम् । सर्वव्यापि-त्वाभावात् । तदाह—ये त्विति । ननु प्रोक्षणस्य शास्त्रार्थीभूतस्येति ग्रन्थे शेषस्यापि निरपेक्षशास्त्रार्थत्वमुक्तम् । तदयुक्तम् । निरपेक्षसाध्यबोधकत्वा-

स्यापि शेषशास्त्रस्यानपेक्षत्वं समर्थितम् । शेषस्यापि यच्छास्त्रार्थत्वमुक्तं न तत्साध्यशास्त्रार्थत्वं, किन्त्वन्विताभिधायिवाक्यार्थरूपशास्त्रार्थत्वम् । अत एव वाक्यार्थव्यवहारः ।

अधिकरणमेवं न तावत्क्रियाकारकादिव्यतिरिक्तं शेषशेषितयाऽन्विताभिधानं व्युत्पन्नम् । न च कार्यतयाऽयमन्वयः, तदन्वितस्यापि नियोज्यादेरशेषत्वात् । अतः शेषलक्षणमनारभ्यमिति पूर्वपक्षः ।

राद्धान्तस्तु, गुणप्रधानभावेन हि सर्वत्र शब्दान्वयः गुणत्व-

भावादित्याशङ्क्याह—शेषस्यापीति । ग्रन्थे शास्त्रार्थत्वोक्तिः वाक्यार्थत्वाभिप्राया न निरपेक्ष शास्त्रार्थत्वाभिप्राया । अत एव हि भिन्नानां वाक्यार्थानां शेषशेषि चिन्तेति वाक्यार्थ व्यवहारः ।

अधिकरणशरीरं प्रदर्शयितुमाह—अधिकरणशरीरमेवमिति । अत्रेयं चिन्ता—किं शेषलक्षणमनारम्भणीयमुतारम्भणीयमिति । तदर्थमिदं चिन्त्यते किमचोदनालक्षण शेषशेषितयान्वयः उत चोदनालक्षण इति । तदर्थमिदं चिन्त्यते—किं क्रियाकारकाद्यन्वयातिरिक्तशेषशेषितयान्वयो लोके न व्युत्पन्नः उत व्युत्पन्न इति । तत्र पूर्वपक्षमाह—न तावदिति । अस्यार्थः—आस्तां तावत् शेषत्वस्वरूपस्य दुर्लक्षता लोकव्युत्पत्तिवैधुर्येण वाक्यतात्पर्यविषयत्वं तावच्छेषत्वस्य वक्तुं न शक्यते । तथाहि—देवदत्त गामानय शुक्लां दण्डेनेति वाक्य श्रवणसमनन्तरं प्रयोज्यवृद्धस्य क्रियाकारकाद्यन्वितार्थे प्रवृत्तिदर्शनात् तद्विषया धीरनुमीयते । तस्याश्च वाक्यानन्तर्यात् वाक्यकारणकत्वेन वाक्यस्य तत्र तात्पर्यमवसीयते । अत्र क्रियाकारकमात्रव्युत्पत्तिर्नशेषशेषिभावो व्युत्पन्नः तस्य प्रवृत्त्यनुपयोगात् । कार्यसाधनताज्ञानात्प्रवृत्तिः न क्रियाशेषताज्ञानात् अतः शेषशेषित्वव्युत्पत्त्यभावेन वाक्यतात्पर्य विषयत्वाभावान्न चोदनालक्षणत्वम् । ननु पदानां द्वैतीयाभिधानेनान्विताभिधाने वृत्तिः । पश्चात् कार्यतः शेषशेषितयाऽन्वयोऽस्तु तत्राह—न चेति । तत्र हेतुः—तदन्वितस्यापीति । आदिशब्दात् विषयस्य गृहदाहादेः निमित्तस्य च ग्रहणम् । यत एव शेषत्वस्य न चोदनालक्षणता अतोऽचोदनार्थविचारात्मकं शेषशेषित्वमस्मिन् शास्त्रेऽनारम्भणीयमिति पूर्वः पक्षः ।

राद्धान्तस्त्विति । अवगतैकवाक्यत्वाबाधाय शेषत्वान्वयोऽप्यङ्गीकार्यः अन्यथा कार्याकार्यपदयोरेकवाक्यतानुपपत्तेः ननु शेषत्वाभावे किमित्येकवाक्यत्वं न भवतीत्यत्राह—गुण प्रधानेति । यस्माल्लोके वेदे च सर्वत्र शब्द-

मेवचात्यन्तिकं शेषत्वम्। कार्यं च प्रधानमिति तत्प्रतियोगिनो गुणत्वेनैवान्वयः नान्यथा। नियोज्यविषयादेरपि प्रतीत्यनुबन्धस्य प्रतीतिदशायां गुणतैव। यस्य तु सिद्धचनुबंधता प्रधानाङ्गादेः, तस्योपादेयतयैव गुणता। सा चेह शेषता व्युत्पाद्यते। ननु क्रियाकारकान्वयेऽपि गुणता नान्यथान्वयः शाब्दः। मैवं, कारकावच्छिन्नक्रियाप्रतीत्यवस्थायामस्त्येवावच्छेदकानां गुणता, सिद्धचपेक्षया तु यथा कार्यं कार्यत एव गुणता, सा च शेषतेह

बोध्यान्वयो गुणप्रधानतयैव अतः शेषत्वमङ्गीकार्यमित्यर्थः। नन्वेवं गुणत्वमेवास्तु किमायातं शेषत्वस्येत्यत्राह—गुणत्वमेवेति। ननु गुणत्वमात्रेणापि प्रतीतैकवाक्यतोपपत्तौ कुत इदमत्यन्तत्वं लभ्यत इत्यत्राह—कार्यं चेति। अन्वीयमानयोरन्यतरस्य कार्यत्वात् तस्य च प्रधानत्वात् तत्प्रतियोगिनो गुणत्वेनैवान्वयः नान्यथा। अतः कार्यान्वियादत्यन्तत्वं लभ्यत इत्यर्थः। ननु कार्यान्वितस्यापिनियोज्यादेः अशेषत्वात् कथं कार्यतः शेषतेत्यत्राह – नियोज्येति। यद्यपि प्रतीत्यनुवन्धिनां विषयनियोज्यनिवन्धानां वास्तवो गुणभावो नास्ति, तदपि तेषां प्रतीतिदशायां गुणतैव तदवच्छिन्नत्वेन कार्यप्रतीतेः। अतः कार्यान्वियो न विरुद्ध इत्यर्थः। नन्वेवं प्रधानाङ्गादेरपि प्रतीतैक [प्रातीतिक] गुणतैवास्तु, किं वास्तवगुणभावरूप शेषत्वेनेत्याशङ्कामात्रमपनुदति—यस्य त्विति। प्रधानाङ्गादेः सिद्धचनुवन्धिनो न प्रातीतिकोऽ(व)त्रगुणता, किन्तु उपादेयतया वास्तवीगुणता। तादृशी च शेषतेह व्युत्पाद्यते। ननु लोके क्रियाकारकमात्रे व्युत्पत्तेः तत्र कारकावच्छिन्नक्रियाप्रतीतेः अवच्छेदकानां प्रातीतिकगुणभावः अन्यथाशाब्दान्वयानुपपत्तेः। तादृशगुणभावेनापि लोके यथा एकवाक्यत्वमुपपद्यते तथा वेदेप्यवधार्यताम्। किं वास्तवगुणत्वस्य वाक्यतात्पर्याङ्गीकारेणेति चोदयति—नन्विति।

मैवमिति। अस्यार्थः सत्यं वेदेपि कारकावच्छिन्न क्रियाप्रतीत्यवस्थायां अस्त्येवावच्छेदकानां गुणत्वं तथापि तावतानैकवाक्यता निर्वाहः, किन्तु किं प्राधान्याहानादेव वोधकं राजपुरुष इत्यत्र राजशब्दवत् उत गुणभावेन गोपदवत् इत्यनवधारणादवोधकत्वेन एकवाक्यत्वानिर्वाहात्। लोके तु विवक्षाधीनत्वात् गुणप्रधानभावनिर्धारणस्यैकवाक्यत्वं सुवचम्। अत्र विवक्षातीतकार्यपर्यालोचनया क्रियाकारकान्वये वृत्ते पश्चात् सिद्धचवस्थापेक्षया कार्यप्रतियोगिनो गुणत्वेनैवान्वय इति तात्पर्यावधारणात् एकवाक्यत्वं घटते। अतः कार्यवलेन येयं वास्तवगुणरूपशेषता सा चेह चिन्त्यते। ननु

चिन्त्यते । तदर्थं लक्षणमारभ्यम् । नन्वेवं कार्यत एव शेषत्वे किमुक्तं कार्यत एव शेषत्वमुत्पद्यते, श्रुत्यादि सचिवेन तु ज्ञायत इति तत्त्वार्थ इति ।

अयं भावः—शेषत्वं नाम न पदार्थभेदः, किंत्वन्वय समये पदार्थानामवस्थाभेदः । स च कार्यानुरागाधीन इति कार्यतस्तदुत्पत्तिरुक्ताः । श्रुत्यादियोजितं कार्यं प्रतियोगीति श्रुत्यादि सचिवेन

अन्विताभिधायिपदानामेकान्वयप्रतिपादकत्वमेव युक्तम्, नान्वयद्वयप्रतिपादकतेत्यत्राह—तदर्थमिति । यावता विना एकवाक्यत्वं न सिद्धयति तत्सर्वं प्रतिपाद्यम् । इह क्रियाकारकान्वयमात्रेणैकवाक्यत्वानिर्वाहात् । शेषशेषितान्वयितापि प्रतिपाद्यम् । अतः तद्व्यु त्पत्त्यर्थं लक्षणमारभ्यम् । एतेनेदमुक्तं अस्याधिकरणस्याध्यायारम्भसिद्धयर्थत्वादुपोद्घाततया सङ्गतिरिति ।

अत्रेदं बोद्धव्यम्—वाक्ये पदार्थानां गुणप्रधानभावेन पदनिमित्तकः सम्बन्धो द्वैतीयः वाक्यार्थयोः कार्यनिमित्तकः तार्तीय इति । एवमुक्तेन प्रकारेण कार्यप्रमाणके शेषत्वे किमिदमुक्तं ग्रन्थे कार्यतः शेषत्वमुत्पद्यते श्रुत्यादिना (नच्च) न तु ज्ञायत इति तदाह—नन्विति । अयमत्र चोद्यवादिनो भावः—यदि कार्यप्रमाणकं शेषत्वं न तर्हि तच्छेषत्वस्योत्पादकं न हि लोके प्रमाणं प्रमेयस्योत्पादकं दृष्टम्, किञ्च यद्युत्पाद्यता शेषत्वस्य तर्हि पदार्थान्तरमेव तत्स्यात् । ततश्च तस्यापि कार्यत्येन कार्यान्वियार्थं शेषान्तरेण भाव्यम् तदाऽनवस्था स्यात् । भवतु यया कयाचन विधया कार्यस्योत्पादकत्वं प्रमाणकत्वमपि तस्यैवास्तु किं श्रुत्यादि साचिव्येनेति ।

परिहरति—अयं भाव इति । अस्यार्थः शेषत्वं नाम न पदार्थभेदः पदार्थान्तरसंयोगादिवत् कार्येणोत्पाद्यते । किन्तु पदार्थानामन्वयसमये अवस्थाभेदः करणत्वादिवत् अतः पदार्थान्तरोत्पत्तिनिबन्धना या अनवस्था सा प्रत्युक्ता । नन्वेवं यदि पदार्थान्तरं नोत्पद्यते कथं तर्हि कार्यतस्तदुत्पत्तिरुच्यते तत्राह—स चेति । स च पदार्थावस्थाभेदः कार्यसम्बन्धाधीन इति तदधीनत्वमात्रेण कार्यतस्तदुत्पत्तिरुक्ता न पदार्थान्तरत्वाभिप्रायेणेति । नन्वेवं कार्यत एव तदुत्पत्तौ तत्प्रमितिरपि तत एवास्तु किं श्रुत्यादिसाचिव्येनेति तत्राह—श्रुत्येति । सत्यं कार्यत एव शेषत्व प्रतीतिः तथापि यस्यकस्यचित् कार्यत्वात् यस्य कस्यचिच्छेषभावो न भवति । किन्तु श्रुत्यादिभिर्यदन्वयित्वेन यत्कार्यं प्रतिपाद्यते तत् तत्प्रति शेषभूतमिति श्रुत्यादेः कार्योपस्थितिकरत्वात् श्रुत्यादिसहितेन कार्येण शेषत्वबुद्ध्युत्पत्तेः तत्साचिव्येन ज्ञायत इत्युक्तिः । एतेन शेषत्वज्ञाने श्रुत्यादीनां प्रतियोगिकार्योपस्थितिरूपा-

तद्व्युत्पत्तेरिति तत्सचिवेन तु ज्ञायत इत्युक्तम् । कार्यं च निरूढं सच्छेषत्वोपपादकं, निरूढिश्च वाक्यान्तरात्स्वरसादिति शास्त्रान्तरविहितं शेषीत्युक्तम् । अगत्या शेषवाक्यस्थोऽपि शेषी निरूढि प्रतिसन्धानाद्युक्त इत्यरुणादेः क्रयशेषतोक्ता अगत्या च भाविग्राहकान्वयद्वारानिरूढिप्रतिसन्धानादेवाधानादीनामग्न्यङ्गता ।

वान्तरव्यापारोऽपि कथितो वेदितव्यः ।

ननु यदि श्रुत्याद्युपस्थितकार्यप्रतियोगिकं शेषत्वं तर्हि सक्तून् जुहोतीति श्रुत्युपस्थितसक्तु प्रतियोगिनो होमस्यापि शेषत्वं स्यादिति तत्राह—कार्यं चेति। वाक्यान्तरतो निरूढस्य कार्यस्य शेषत्वे प्रमाणत्वात् सक्तूनां वाक्यान्तरतो निरूढेरभावादित्यर्थः, ननु वाक्यान्तरविहितं शेषीति त्वयोच्यते । ग्रन्थे तु शास्त्रान्तरविहितं शेषीत्युक्तम् । अतो ग्रन्थविरोध इत्यत्राह—शास्त्रान्तरेति । वाक्यान्तरत्वाभिप्रायात् शास्त्रान्तरत्वोक्तिरित्यर्थः ।

इदं त्विह वक्तव्यम्—किमिदं निरूढत्वं कार्यस्य ग्राहकान्वयित्वमिति चेत्, न, शेषशेषिभूतानां सर्वेषां पदार्थानां युगपत् खलेकपोतवत् ग्राहकग्रहणात्। किञ्चिन्निरूढं किञ्चिन्निरूढं नेति विभागायोगात् अथ यस्य ग्राहकसम्बन्धः पूर्वं निर्वाहितः तन्निरूढमिति चेत् कोऽयं निर्वाहो नाम । अनुष्ठानपर्यन्तत्वमिति चेन्न, तस्य विनियोगोत्तरकालमौपादानिकत्वेन विनियोगदशायां निरूढ्यनिरूढि व्यवस्थापकत्वाभावात् । उच्यते । ग्राहकैदमर्थ्यस्य द्वारैदमर्थ्यनिर्वाह्यत्वात् यस्य कार्यार्थत्वं यन्निरपेक्षतया द्वारैदमर्थ्यं निर्वाहितं तत् तत्प्रति निरूढं यथा व्रीह्यवघातयोः । तत्रापि व्रीहिभिर्यजेतेत्यर्थः न वाक्येनावधातनिरपेक्षेणैव व्रीहीणां यागरूप द्वारैदमर्थ्यनिर्वाहिते ग्राहकैदमर्थ्ये तेषां निरूढता । अतो द्वारैदमर्थ्येन यस्य पूर्वं ग्राहकैदमर्थ्यं निर्वाहितं तन्निरूढं इतरदनिरूढमिति निरूढानिरूढ व्यवस्था । द्वारान्तर रहिते तु प्रधाने यागे[द्वार] निरपेक्षतया साक्षादेव ग्राहकान्वयान्निरूढिः ।

अथवा अधिकारविधिसन्निधिसमाम्नातानां साधनानां विधिविधेयभावेन सम्बन्धान्तरमस्ति । स च क्रमेण भवति विधिकृतोपादानरूपत्वात् । ततश्च यस्य यस्मात्पूर्वं विधिना आसन्नविधिविधेयतया संवादः तत्तत्प्रति वाक्यान्तरविहितमेव शेषि भवतीति । अरुणया क्रीणातीत्यादौ तु गत्यन्तराभावात् शेषवाक्यस्थोऽपि निरूढिप्रतिसन्धानात् शेषी युक्तः । यत्र च वाक्यान्तरमप्यस्ति निरूढिश्च नास्ति आधानादौ तत्र कथं शेषशेषिभाव इत्यत आह—अगत्या चेति। युक्तं चैतदित्याह—अत एवेति । नन्वेवं यदि

अतएव ग्राहकव्युत्पत्तिः शेषत्वे शेषित्वे वा अनुपयोगिनीत्युक्तम् । शेषिणिग्राहकप्रतिसंधानपूर्वकत्वाद्ग्राहकपूर्वकता परमार्थतो नेष्यत इत्युक्तं । शेषविधिपरत्वात्सर्ववाक्यानां तद्विषयतयैव शेषिणोऽन्तर्भावात्तात्पर्यतः शेषस्यैव चोदनार्थता तच्चिन्ता चात्र शास्त्र इति शेषलक्षणप्रतिज्ञा, तद्व्युत्पत्त्यर्था चापेक्षा ।

कः पुनश्शेषः उपयुक्तेतरोवा, परार्थोवा अवयवो वा-तत्रोत्तरम्–

शेषः परार्थत्वादिति ।।२।।

कार्यरूपपरान्वयादिति वाच्ये फलेनोक्तम् । यस्य हि कार्यरूपपरान्वयः सपरार्थ एव हेतुयोग्यतया परार्थरूपः शेष इति स्वरूपेप्युत्तरता केन हेतुना शेष इत्यस्य श्रौतमेवोत्तरं पर-

---

प्रतिसन्धानेपि शेषित्वदर्शनात् शेषेशेषिणि च ग्राहकव्युत्पत्तिरनुपयोगिनी तर्हि ग्राहकपूर्वो विनियोग इति कथं तत्राह—शेषिणीति । नन्वेवं यदि वाक्यार्थभूतयोर्व्रीह्यवघातयोः कार्यनिमित्ता शेषशेषिता तर्हि इदं शेषिलक्षणमपि किं न स्यात् । प्रत्युत प्राधान्यात् शेषिलक्षणमेवेदं युक्तं तत्राह—शेषेति । सत्यं प्रधानमत्र शेषि तथापि न तद्विधिपरं वाक्यं शेषविधिपरत्वात् सर्ववाक्यानाम् । सोमेन यजेतेत्यपि शेषविधिपरमेव । अतो यद्विधिपरं वाक्यं तत् प्रत्यासन्नम् । एवं तद्वाक्यतात्पर्यमपि शेषत्व एव वाक्यतात्पर्यगोचरस्यैव चोदनार्थता स्यादित्यत्राह—तात्पर्यत इति । यद्यप्यर्थाच्छेषिप्रतिपत्तिः तथापि तस्य प्रतिपाद्यत्वाभावेन वाक्यतात्पर्यविषयत्वाभावात् तत्तात्पर्यविषयः शेषत्वमेव चोदनार्थं इति भावः । ननु अचोदनार्थत्वेपि तच्चिन्ता किमिति न भवतीत्यत्राह—तच्चिन्तेति । अत्र कः शेषः केन हेतुना शेष इति यत्प्रश्नद्वयं तस्यायं च यदुत्तरं शेषः परार्थत्वादिति तत् पञ्चिकाकारेण व्याख्यातम् । तस्याभिप्रायंवक्तुमाह—तद्व्युत्पत्त्यर्था चेति । अत्र कः शेष इत्यनेन केन हेतुना शेष इत्यपि सङ्गृहीतो द्रष्टव्यः । ननु कार्यरूपपरान्वयादिति हेतुवाक्ये किमिति परार्थत्वादित्युक्तं इत्यत्राह—कार्यरूपेति । फलत्वमेव दर्शयति—यस्य हीति । ननु सकृदुच्चरितस्य परार्थत्वादित्यस्य कथमुभयोत्तरतेत्याशङ्क्य श्रुत्यर्थाभ्यां समर्थयते—हेतुयोग्यतया चेति । यत एवमुक्तेन प्रकारेण च परार्थरूपः शेषः साध्यः कार्यरूपपरान्वयो हेतुः अतः परोक्ते प्रकारे साध्यहेत्वोरभेदापत्तेः न युक्त इत्याह—एतेनेति ।

रूपकार्यान्वयादिति । एतेनपरोक्तंनिरस्तम् । न शेषोऽन्यः परार्थत्वान्न च हेत्वन्तरेण सः, अन्योन्यनियमेनैव पक्षहेत्वोः परिग्रह इति साध्यहेत्वोरभेदापत्तेः ।

ननु तानि द्वैधमित्यत्रापि शेषोक्तिरित्यविशेषेण प्रतिज्ञा न युक्ता । मैवं नियोगविषयता तत्रापनीता, शेषता तु सर्वेषामत्रैवोच्यते श्रुत्यादिगम्या ।

ननु यत्र पुरुषस्य प्रेरणा नियुक्तिः, स नियोगस्य विषयः । अस्ति तु गुणकर्मस्वपि प्रेरणेति कथमविषयता । मैवं यद्यप्यधिकारविध्यधीना लिङ्गाद्यनुवाद्या गुणभूतेषु प्रेरणा पुंसोऽस्ति । तथापि न नियोगसिद्धिरेव कार्यं गुणभूतस्येति न विषयता ।

अयं भावः—अधिकारविधिर्हि कृतिसाध्यः । स चैवं यदि तत्साधनं व्याप्य कृतेः प्रवृत्तिः । कृतिप्रवृत्त्यापादनमेव प्रेरणेति साधने गुणकर्मणि कृतिव्याप्यतापादनात् कृतिसाध्ये नियोग-

---

ननु तानि द्वैधमित्यत्रापि शेषत्वमुक्तं अतः अथातः शेषलक्षणमित्यविशेषेण प्रतिज्ञा न युक्तेति चोदयति—नन्विति मैवमिति। तानि द्वैधमित्यत्र गुणकर्मणां नियोगपरत्वं निराकृतं न पुनः शेषत्वं प्रतिपादितं तत्पुनः सर्वेषां श्रुत्यादिगम्यमत्रैवोच्यत इति ग्रन्थकारेण अथ तत्र किं वृत्तं इति चोद्यभाष्यं अनियोगार्थतेति परिहारभाष्यं च व्याख्यातमित्यर्थः। अत्र ग्रन्थोक्तं चोद्यमनुभाषते—नन्विति। यत्र पुरुषः प्रेर्यते नियुज्यते स नियोगस्य विषयः गुणकर्मस्वपि प्रेरणमस्तीति तेषां विषयता युक्तैव। तथा परिहारग्रन्थमनुभाषते—उच्यत इति। यद्यप्यधिकारविध्यधीनं लिङाद्यनुवाद्यं गुणकर्मसु पुंसः प्रेरणमस्ति तथापि न तेषां नियोगविषयताऽस्ति नियोगैकसाध्यत्वाभावादिति । नन्विमौ चोद्यपरिहारावनुपपन्नौ। तथाहि—अधिकारविधेरेव स्वतः कृतिसाध्यत्वेन पुरुषार्थत्वात् तत्रैव पुरुषनियुक्तेः नापुरुषार्थभूतेषु गुणकर्मसु । अतः कृति प्रवृत्त्यभावेन कृतिसाध्यत्वाभावात् कथं नियोगविषयत्वम् । तथा परिहारोऽपि नोपपन्नः कृतिगोचरत्वाङ्गीकारे कथमविषयता। कृत्यवच्छेदद्वारा कार्यावच्छेदकत्वं हि विषयत्वं तच्च गुणकर्मसु कृतिगोचरेषु विद्यत एवेत्यत्राह—अयं भाव इति।

सत्यमधिकारविधेरेव स्वतः प्रयोजनत्वेन कृतिसाध्यता । सा चैवं सति भवति । यद्यधिकारविधि साधनवर्गमपि व्याप्यकृतेः प्रवृत्तिः। कृति-

विशेष्यताभ्रमः, स निरस्यते । यद्यपि कृतिगोचरता भवति, तथापि तत् कृत्यवच्छिन्नतया । स तु नियोगावगम इति न विषयता । यस्य तु नियोगसिद्धिरेव कार्यं तदवच्छेदकं न कार्यान्तरनिष्ठम् । साध्यद्वयपरत्वे वाक्यभेदापत्तेः । नियोज्यविशेषणतयापि न साध्यान्तरनिवेशः क्रियाफलस्यातथात्वात् । अत उक्तमनभिज्ञो भवान्विषयनियोज्यानामिति । एवं चाधिकारविध्यधीना साधनभूतगुणकर्मसु प्रेरणाऽस्तीति सूक्तम् । कृतिसाध्यतयैव विधेः प्रेरणा । कृतिसाध्यतया च लिङ्गाद्यर्थतेति लिङ्गाद्यनुवाद्यतापि सूक्ता ।

विवरणेतु—अथ तत्र किंवृत्तमित्यादिनेदं चोदितं आप्त्यादिदर्शनादाप्त्यादेस्तत्र गुणतोक्ता । आप्त्यादिरूपैव शेषता नापरा

प्रवृत्त्यापादनमेव साधनवर्गे पुरुषस्य प्रेरणेति साधनभूत गुणकर्मस्वपि कृतिप्रवृत्त्यापादनात् कृतिसाध्यत्वनिर्वाहे कृत्यवच्छेदद्वारा कार्यावच्छेदकत्वं नाम विषयत्वमस्तीति चोद्यवादिनो भ्रमः । नन्वेवं कृतिव्याप्यत्वे गुणानामङ्गीक्रियमाणे कथं विषयत्वनिरास इत्यत्राह— स निरस्यत इति । सत्यं कृतिगोचरता विद्यते तथापि तत्कृत्यवच्छिन्नतया नियोगो नावगम्यत इति न गुणकर्मणां विषयता । ननु किमिति कृत्यवच्छिन्नतया नियोगो नावगम्यत इत्यत्राह—यस्यहीति । नियोग सिद्धिरेव यस्य कार्यं तदेव तदवछेदकतया तस्य विषयः न कार्यान्तरनिष्ठम् साध्यद्वयपरत्वे वाक्यभेदापत्तेः । ननु स्वर्गकामो यजेतेति नियोगे साध्ये कथं स्वर्गस्य साध्यत्वं ? नियोज्यविशेषणत्वेनेति चेत् अत्रापि तथाऽस्त्वित्याशङ्क्याह—नियोज्येति । तत्र हेतुः—क्रियाफलस्येति । यदेव हि नैयोगिकं फलं तदेव हि नियोगाक्षेप्यत्वेन नियोज्यविशेषणं नतु क्रियाफलं गुणकर्मसु तु व्रीह्यादीनां क्रियाफलतैवेति नानुगुणसाध्यता एतदेवाभिप्रेत्य ग्रन्थकारेणोक्तमित्याह—अत उक्तमिति । यद्येवं गुणकर्मसु नियोगविषयता नास्ति कथं तर्हि कृत्यापादनरूपविधेः प्रेरणविषयता तेषामित्याशङ्कामात्रमुपसंहारव्याजेनापनुदति—एवं चेति । ननु गुणकर्मणां नियोगविषयत्वाभावे कथमनुवादकता तद्विधीनामुक्ता । न हि विषयशून्यो लिङादिशब्दो नियोगाभिधानक्षम इति तत्राह —कृतिसाध्यतयैवेति ।

अत्र विवरणमते अथ तत्र किं वृत्तमिति चोद्यभाष्यमन्यथा व्याख्यातं तदुपपादयितुमाह—विवरणे त्विति । कथमित्याह—आप्त्यादिदर्शनादिति । तानिद्वैधमित्यत्र सन्निपातिपु आप्त्युत्पत्तिविकृति संस्कृतीनां दर्शनात् आप्त्यादेः

परार्थत्वरूपा इति शंकितं निरस्तं च । अपूर्वाविषयार्थमाप्त्यादि तत्रोक्तं—गुणतारूपपरार्थतया इहत्यया तत्र व्यवहारः ।

तन्मते वस्तुबलादधिकरणमेवं शेषत्ववस्त्वेव दुर्निरूपं, अतस्तल्लक्षणमनारभ्यम् । तथाहि—गर्भदासादिदर्शनाल्लौकिकं शेषत्वमभिमतमत्यन्तगुणत्वरूपम् । कार्ये चात्यंतगुणता । तदुपकारजननपरता, नचोपकारजननमात्रात् तत्परता स्वामिनोऽपि गर्भदासोपकारे तत्परत्वापत्तेः ।

तत्र गुणता ज्ञाता । आप्त्यादिहेतुनैव तत्र शेषतोक्ता । अतः किमिति परार्थत्वस्यात्र वृथाहेतुत्वकथनमित्यभिप्रायः । ननु तत्राप्त्यादिहेतुकशेषत्वमुक्तं अत्र तु अन्यहेतुकमिति चेत् तत्राह—आप्त्यादिरूपैवेति । रूप्यतेऽनेनेति रूपं हेतुः आप्त्यादिर्हेतुः यस्याः सा तथोक्ता । आप्त्यादिहेतुकैव शेषता नापरा परार्थत्वहेतुकेति चोद्यभाष्येण शङ्किते परिहारभाष्येणैवं तन्निरस्तमित्यर्थः । एतच्च दीपशिखाग्रन्थाञ्जस्येन व्याख्यातम् । स्यादेवं व्याख्या, ततः कथं तन्निरास इत्यत्राह—अपूर्वेति । अपूर्वाविषयत्वरूपार्थान्तरहेतुत्वेन आप्त्यादीनां तत्रोक्तिः न शेषत्वहेतुत्वेन । शेषत्वं तु कार्यरूपपरान्वयहेतुकमत्रैव व्युत्पाद्यमिति अत्रत्येनैव शेषत्वे [न] तत्रत्यव्यवहारः वृथा परार्थत्वरूप हेत्वभिधानमिति भावः ।—तन्मत इति । तत्रैवं चिन्ता—किं शेषलक्षणमनारम्भणीयमुतारम्भणीयमिति । तदर्थमिदं चिन्त्यते किं शेषत्वं वस्तु दुर्निरूपं आहोस्वित् सुनिरूपमिति ।

तत्र पूर्वपक्षमाह—शेषत्ववस्त्वेवेति । शेषत्वस्वरूपमिदमिति वक्तुमशक्यमेव । अथ परार्थत्वं शेषत्वमिति चेत् किमिदं पारार्थ्यं अन्यसम्बन्धितयोत्पाद्यमानत्वं वा परेण प्रयुज्यमानत्वं वा परार्थं व्याप्रियमाणत्वं वा? नाद्यः । द्रव्यादीनामशेषत्वप्रसङ्गात् । यत एवं शेषत्वं वस्तु दुर्निरूपं अतस्तल्लक्षणमनारभ्यम् । ननु वेदादिवा [देवा] लौकिकमत्यन्तगुणत्वरूपं शेषत्वमङ्गीक्रियतां यूपाहवनीयादिवदित्याशङ्क्य दुर्निरूपत्वमुपपादयति—तथाहीति । लौकिकमेवेदमत्यन्तगुणत्वं शेषत्वं भवतु ततः किं तत्राह—कार्ये चेति । कार्यप्रतियोग्यत्यन्तगुणत्वं नाम कार्योपकारजननपरतैव । तथा चोपकारजनकत्वमेव शेषत्वमित्युक्तं भवति । न तदतिरिक्तं किञ्चित् । ततः किमित्यत्राह—न चेति । स्वामिनोऽपि गर्भदासोपकारजननात् तच्छेषत्वापत्तेः नोपकारजनकत्वं शेषत्वं सुखादेरशेषत्व प्रसङ्गाच्च ।

राद्धान्तस्तु—-उत्पत्त्युपादानव्यापाराः परोपकारपरा एव फलभृत्यव्रीहीणामवगम्यन्ते लोके । गर्भदासवृषादेरवगतिबलेनैव वस्तूपगमः । न चातिप्रसङ्गः, आत्मपरतयैव स्वामिना गर्भदासोपकाराचरणात् । गर्भदासस्य तु स्वाम्युद्देशेनैव व्यापारात्। एतत्परे नानुमन्यन्ते । गर्भदासोऽपि स्वार्थोद्देशेनैव स्वामिन उपकरोति, प्रेक्षावत्वादिति वदन्तः। तन्न। स्वामिहितमेवासाविच्छतीति स्वेष्टोद्देशेन स्वामिन एवोपकारकरणात् प्रेक्षावत्त्वसिद्धेः । यस्तु स्वार्थोद्देशेन स्वामिहितमाचरति, सोऽपि स्वाम्यर्थ एव वस्तुतः तदर्थवासनाविरहात् तदुद्देशेन प्रवृत्तिरूपं फलं तस्मिन्न जातम् । नच

राद्धान्तस्त्विति। अस्यार्थः—फलस्य स्वर्गादेः भृत्यानां ऋत्विजां च व्रीह्यादीनां द्रव्याणां च उत्पत्त्युपादानव्यापाराः परोपकारा एव गम्यन्ते। तत्र फलं तावत् फलिगततयैवाक्षेपात् तदुपकारतयैवावगम्यते। स्वर्गस्य च सुखरूपस्य तद्गततयोत्पत्तिरेव तदुपकारपरता। ऋत्विजां चोपादानं क्रयात् स्वीकरणं यजमानरूपपरोपकारपरतयैवावगम्यते। तथा व्रीह्यादीनां व्यापारोऽपि श्रुत्यादिना कार्यरूपपरोपकारपरतयैवावगम्यते। एवं सर्वत्र परोपकारपरतयैव यदवगम्यते तच्छेष इति शेषत्वं सुनिरूपितमिति भावः। नन्वेवं लोके परोपकारपरताप्रमाणस्य उपादानादेरभावात् कथं शेषत्ववस्तूपगमस्तत्राह—लोके चेति। लोकेऽपि गर्भदासवृषादौ वयमत्र शेषभूता इति धीप्रयोगयो दर्शनात् अवगतिबलेनैव शेषत्ववस्तूपगमः।

नन्वेवं परोपकारपरत्वे शेषत्वे स्वामिनोऽपि गर्भदासोपकारजननात् तत्परतापत्तेरतिप्रसङ्गः स्यादित्यत्राह—न चेति। तर्हि दासस्याप्यात्मपरतयैव स्वाम्युपकारा[दव्याप्तिः] स्यादित्याशङ्क्य वैषम्यमाह—गर्भदासस्येति। अत्र स्वामिगर्भदासयोर्यदेतद्वैषम्यमुक्तं तत् परे नानुमन्यन्ते। गर्भदासस्यापि रक्षणपोषणादि स्वार्थोद्देशेनैव स्वाम्युपकारजनकत्वं प्रेक्षापूर्वत्वात् स्वतन्त्रप्रवृत्तेः अन्यथा प्रेक्षावत्वासिद्धेरिति तदाह—एतत्पर इति। तन्नेति। अङ्गीकृतदासत्वादसौ गर्भदासः स्वामिहितमेव कार्यतयेच्छतीति स्वामिहितमपि स्वेष्टमेव। अतः स्वेष्टोद्देशेनैव स्वामिहिताचरणात् प्रेक्षावत्त्वसिद्धिः। न चैतावता परोपकारताहानिः, परमार्थतः तस्यैव परोपकारत्वात् तत्सम्बन्धिनश्चोपकारान्तरस्याभावात्। ननु यो दासः स्वरक्षणपोषणमेवोद्दिश्य तदर्थं स्वामि हितमाचरति तस्य कथं शेषत्वमित्यत्राह—यः स्वार्थेति। स्वाम्यर्थत्वस्य फलं तद्धितोद्देशेन प्रवृत्तिः तस्यां दोषवशेन तदर्थवासना-

तदुद्देशेन प्रवृत्तिरूपमेव शेषत्वम्, किंत्वत्यन्तगुणत्वं तच्च तत्फलाभावेऽपि नापैति ।

ननु फलाभावे कुतस्तत्सिद्धिः। उक्तं च कार्यतः। ननु स्वामी न कार्यः सत्यं न स्वरूपतः। उपकार्यतया तु कार्य एव ननूपकार्योऽपि स्वामी न निरूढः, मैवं निरूढताहि पुरुषार्थतया। उपकारभागिता च स्वामिभूतपुरुषार्थत्वेन। नन्वेवं दासगतोऽप्युपकारो दासभूतपुरुषार्थः स्यात्। मैवं अर्जनाद्धि दासो निरुद्धस्वपुरुषार्थवृत्तिः स्वाम्युपकारपरो जातः। लोकसिद्धप्रकारं चैवंरूपं, अर्जनमूल्यार्पणादिना स्वामी स्वोपकारपरतां परस्या-

---

विरहादजातायामपि वस्तुतः स्वाम्यर्थ एव दासः। ननु स्वाम्युद्देशप्रवृत्तिरूपमेव शेषत्वमिति केचन शेषत्वलक्षणं वदन्ति। अतस्तदभावेन स्वार्थोद्देशेन प्रवृत्तस्य दासस्य कथं शेषतेत्यत्राह—न चेति। किं तर्हि शेषत्वरूपमित्यत्राह—किन्त्विति। ततः किमित्यत्राह—तच्चेति। तच्चात्यन्तगुणरूपं शेषत्वं तदुद्देशप्रवृत्तिरूपफलाभावेपि नापैति। तयोर्भिन्नत्वादित्यर्थः।

ननु उद्देशप्रवृत्तिरूपफलदर्शनादेव तच्छेषत्वज्ञानं अतस्तदभावे कुतस्तद्धीरिति चोदयति—ननु फलेति। परिहरति—उक्तमिति। स्वामिरूपकार्यान्वयादित्यर्थः। ननु स्वामिनः सिद्धरूपत्वेन कार्यत्वाभावात् कथं तदन्वयाभावात् स्वामिनं प्रति गर्भदासस्य शेषत्वमिति चोदयति- ननु स्वामीति। सत्यमिति। स्वरूपतः सिद्धस्यापि उपकारभागित्वरूपेण कार्यत्वात् स्वामिनः तदन्वयात् दासस्य शेषता युक्तेत्यर्थः। ननु न कार्यमात्रं शेषत्वहेतुः किन्तु निरूढं स्वामिनस्तु वाक्यान्तरविधानाभावे कथं निरूढिरिति चोदयति—ननूपकार्योऽपीति परिहरति—निरूढता हीति। न हि वाक्यान्तरविधानं निरूढौ तन्त्रं किन्तु पुरुषार्थतैव वाक्यान्तर विधि सद्भावेपि सैव प्रयोजिका। सा च स्वामिन्यपि विद्यत इत्याह—उपकारेति। ननु दासगतोपकारस्यापि दासरूपपुरुषार्थत्वात् तद्भागितया दासस्यापि पुरुषार्थत्वेन निरूढकार्यत्वान्न स्वामिशेषता स्यादिति चोदयति—नन्वेवमिति।

मैवमिति। अस्यार्थः—स्वामिकृत उपकारो न दासरूपपुरुषार्थः तस्य क्रयादिभिरुपार्जनात् निरुद्धस्वपुरुषार्थवृत्तित्वेन स्वाम्युपकारपरत्वेन जातत्वात्। किन्तु स्वामिरूपपुरुषार्थः। तत्राश्रयमात्रं दासः अतो दासगत स्वामिकृत उपकारः स्वामिरूपपुरुषार्थ एवेति न दासस्य पुरुषार्थतया निरूढता। ननु कथमर्जनान्निरुद्धं स्वपुरुषार्थवृत्तित्वं

पादयति । इदमेव परस्य रूपं दासत्वम् एवं च प्रेक्षावत्त्वात् स्वतन्त्रप्रवृत्तेर्दासत्वाङ्गीकारः ।

अतः परं त्वचेतनसमतैवात्मनः स्वसन्ततेश्चांगीकृतः । ननु यो नोपकारको दासः तस्योपकार्योऽपि न स्वामी, तन्न, उपकारार्हतैव शेषता, सा उपकाराभावेऽपि नापैति । मनागुपकारिता च सर्वत्रास्त्येव तत्परिकरत्वेन गम्यमानतया उपकारकत्वात् । नन्वपकार्येऽपि धूमादेर्मशकादौ शेषता दृष्टा तन्न, पुरुषार्थता हि धूमादेर्निवर्त्यरूपकार्ये मशकादौ द्वारभूते भवति न मशकस्वरूपस्योपकार्यतयेति स्वरूपे अपकारकस्यापि निवर्त्यरूपोपकार्ये धूमादेः शेषता । यथा व्रीहित्वापकारिणोऽप्यवघातस्य नियोगीयरूपोपकारितया शेषता ।

एवंच तदुद्देशेन प्रवृत्ततया फलेन ग्रन्थे शेषतोक्ता तद्धिताचरणं दासदौ स्वतः परप्रेरणयावा, वृषादौ परप्रेरणयैव । अवघातादावपि तथैव । नन्वाभिधानिकमपि शेषत्वं, तादर्थ्ये चतुर्थी स्मृतेः, तन्न, कार्यतस्तत्सिद्धौ चतुर्थ्याऽनुवादः शेषादिपदान्य-

---

इत्यत्राह—लोकसिद्धमिति । शस्त्रादौ तथा दर्शनादित्यर्थः । भवत्वेवमर्जनमेव रूपं तथापि किमित्यत आह—मूल्येति । ननु मूल्यार्पणादिना परस्य न दासत्वमापद्यते, किन्तु स्वोपकारपरतेत्यत्राह—इदमेव हीति । ननु यद्यर्जनान्निरुद्धस्वपुरुषार्थवृत्तिः तर्हि दासत्वाङ्गीकारोऽपि न स्यात् । अस्वतन्त्रप्रवृत्तित्वादित्यत्राह—एवं चेति । दासत्वाङ्गीकारसमये प्रेक्षावत्त्वेन स्वतन्त्रप्रवृत्तेः मूल्यादानात् दासत्वमङ्गीकृतम् । तदुत्तरकालं तु स्वस्य स्वसन्ततेश्चाचेतनसमतैव शस्त्रादिवत् परतन्त्रस्वभावतैवाङ्गीकृता, नैतावता प्रेक्षावत्त्वहानिः अनुज्ञात स्वपरतन्त्रतानुपालनात् ।

ननु यो दासः स्वामिनो नोपकरोति दुष्टत्वात् मन्दत्वाद्वा, तत्र नोपकार्योऽपि स्वामीति कथं तत्र शेषतेति चोदयति—नन्विति । तन्नेति । अनेन कृष्णलावघातेपि शेषत्वं व्याख्यातम् । अथवा सर्वस्यापि तत्परिकरत्वेन ज्ञायमानत्वादीषदुपकारित्वमस्तीत्याह—मनागिति । ननूपकारार्हतया शेषत्वे कथमपकारकस्य धूमादेः अपकार्यमशकादौ शेषता उपकारभागित्वाभावेनापुरुषार्थत्वादिति चोदयति—नन्विति । तन्नेति । सत्यं मशकस्वरूपस्यापकार्यता, धूमादेर्मशकस्वरूपनाशकत्वात् तथापि मशकानां

प्येवम् । एवं किंचिद्विवेकादेव मीमांसाप्रचारसिद्धेः नातीव विवेकः कृतः । इदमेवैकं शेषलक्षणम् लक्षणान्तराणि तु शेषगतधर्मविशेषपराणि। एतेन परोक्तं निरस्तम् ।

द्विलक्षण्याः परं शिष्टं यावत्किच न लक्षणं ।
तत्सर्वं वक्तुमारब्धमथातश्शेषलक्षणम् ।।
प्रयोजकाः प्रयोक्तारः शेषाणामेव शेषिणः ।
क्रमोऽपि शेष एवैक प्रयोग वचनाश्रयः ।।
अधिकारोऽपि यज्ञेषु कर्तुश्शेषस्य चिन्त्यते ।
भाव्यानां भावकः कर्ता द्रव्यं को नामकर्मणाम् ।।
सप्तमेनातिदेशेन धर्माः सन्तीति साधिते ।
ततोऽष्टमे नये यस्य यतश्चेति निरूपणा ।।
नवमेऽर्थप्रधानत्वात्तदधीनानन्यरूपता ।
इयत्ता दशमे शेषबाधाभ्युच्चयचिन्तया ।।

निवर्त्यरूपेण पुरुषेण काम्यत्वात् तद्रूपे धूमादेरुपकारकतैव । अत्र दृष्टान्तव्याजेन व्रीह्यवघातविषयेप्येवमेवेत्याह—यथेति । नन्वेवं कार्योद्देशेनैव प्रवृत्तत्वं शेषत्वमिति वदता ग्रन्थेन विरोधः स्यादित्यत्राह—एवं चेति । नन्वेवमचेतनसमे दासे प्रवृत्तिशून्यवृषादौ अचेतने अवघातादौ च कथं परहिताचरणमित्यत्राह—तद्धिताचरणं त्विति । ननु तादर्थ्ये चतुर्थी ऋतेः शेषादिपदानामपि दर्शनादाभिधानिकमपि तादर्थ्यं न कार्यत एवेति चोदयति—नन्विति । तन्नेति । कार्यतस्तत्सिद्धौ चतुर्थ्यादीनामनुवादकत्वमेवेत्यर्थः । ननु किमिदं शेषत्वं स्वत्वरूपमेव वा तत्त्वान्तरं वा ? किं लौकिकमेव शेषत्वं किं वा अलौकिकमेवेत्यादि विवेकोऽपि किमिति न क्रियत इत्यत्राह—एवं किञ्चिदिति । परमार्थतस्तु लौकिकमेव शेषत्वं प्रतियोगिनोऽप्यलौकिकत्वात् अलौकिकमपि तथा स्वत्त्वात् तत्त्वान्तरमेव शेषत्वं स्वरूपभेदात् कारणभेदाच्च । स्वत्त्वस्य स्वरूपं यथेष्टविनियोगार्हत्वं कारणं त्वर्जनादि । शेषत्वस्य स्वरूपं तु परोपकारार्हत्वं कार्यान्वयः कारणमित्यवधेयम् । ननु अथातः शेषलक्षणमिति तृतीयस्यैकस्यैव शेषलक्षणत्वप्रतिज्ञा न युक्ता, लक्षणान्तराणामपि शेषत्वव्युत्पत्तिपरत्वात् इत्यत्राह—इदमेवैकमिति । तृतीयमेवैकं शेषत्वलक्षणं लक्षणान्तराणि तु शेषभूतपदार्थगत धर्मविशेषव्युत्पत्तिपराणि न पुनः शेषत्वव्युत्पत्तिपराणीत्यर्थः ।

प्रयोग परिमाणं च तत्तन्त्रावाप लक्षणम् ।
एतदेवप्रसङ्गेन परार्थाङ्गोपजीवनात् ॥
अन्यार्थानुष्ठितैरङ्गैरुपकारेऽल्पकल्पनम् ।
प्रसङ्गे तदभावे तु स्याद्भूयिष्ठप्रकल्पनेति ॥

नैवं शेषस्वरूपलक्षणता नवानां समर्थिता तद्वरं यदथवेत्युक्तं तदेवास्तु ।

अथवाऽस्त्विदमेवैकं तृतीयं शेष लक्षणम् ।
तदेव सूत्रितं यस्मादथातः शेषलक्षणम् ॥
अन्यानि पृथगारम्भैर्लक्षणानि करिष्यति ।
इदं सपरिवाराणां शेषाणामेव लक्षणमिति ॥

शेषं टीकयोः सुगमम् ।

अत्राचार्योक्तं चतुर्थाध्यायनवकस्यापि शेषत्वपरत्वं निरस्तमित्याह—एतेन परोक्तमित्यादिना । 'स्याद्भूयिष्ठ प्रकल्पना' इत्यन्तेन । प्रयोजका, प्रयोक्तारः, प्रयोजकाश्च अप्रयोजकाश्च । क्रमस्यतु विधेयत्वाच्छेषतैव, श्रुत्यादिभिः शेषभूतक्रमविशेषनिरूपणात् तल्लक्षणं स्फुटमेव शेषलक्षणं तथा कर्तुः स्वतोऽधिकारचिन्तनात् कर्तुः कर्मशेषतैव। अन्यार्थानुष्ठितैरङ्गैः उपकारेऽल्पकल्पना कल्पनालाघवं स्यादित्यर्थः । कथं निरसनमित्यत्राह—नैवमिति । एवमस्य प्रकारस्य दूषणमुक्त्वा आचार्योक्तं प्रकारान्तरमेवास्थेयमित्याह—तद्वरमिति । पृथगारम्भैः पृथग्यत्नैरित्यर्थः । कथं च विनियुज्यतामिति भाष्यं किमिति न विव्रियत इत्यत्राह—शेषं टीकयोरिति ।

इह स्वर्गकामो यजेतेत्यादि काम्यकर्माण्युदाहरणम् । तेषु सन्देहः किं द्रव्यगुण संस्कारेष्वेव शेषत्वं उत फलयागपुरुषेष्विति। ननु शेषत्व प्रतिज्ञानन्तरं प्रतिज्ञातशेषत्वमेव चिन्तनीयम् । न पुनरवधारणनिरासः। अतः कथमस्य सङ्गतिरित्यत्राह—स्वाभिमतमिति । श्रुत्याद्युपस्थितकार्यप्रमाणके शेषत्वे प्रतिज्ञाते तत्प्रसङ्गात् परस्याज्ञानं वक्तुं बादर्यवधारणनिरासोऽत्रसङ्गच्छते। ननु शेषत्वे प्रतिज्ञाते कथं पराज्ञानस्यात्र प्रसङ्ग इत्यत्राह—शेषत्वस्येति। न हि यत्र क्वचनाज्ञानं वक्तुं, परस्यावधारणनिरासः, किन्तु शेषत्वविषये यदज्ञानं तद्वक्तुं, अतः प्रतिज्ञानन्तरं तत्प्रसङ्गो युक्तः। एवं तर्हि अवधारणनिरसनमेव चिन्त्यं, न पुनर्यागादेरपि नैयोगिकं शेषत्वमित्यत्राह—तन्निरसनं चेति। अवधारणनिरसनमपि यागादेरपि नैयोगिकं

।।३।। द्रव्यगुण संस्कारेषु बादरिः ।।३।।

स्वाभिमतं शेषत्वं सपरिकरं प्रतिज्ञाय परस्याज्ञानं वक्तुं शेषत्वस्य विषयं प्रति बादरेवधारणमुपन्यस्य निरस्यति । तन्निरसनं च यागादेरपि नैयोगिकं शेषत्वं प्रसाध्य भवति । यद्यपि नैयोगिकतया चातुर्थता, अवधारणनिराकरणहेतुतया तु न चातुर्थता येन च रूपेणेयं चिन्ता तदनुरूपा सङ्गतिरिहैव । नैयोगिकशेषत्वव्युत्पत्तिपरा हि सती चतुर्थे भवेत् । न चेयं तथा । अतः 'साक्षाद्युक्तं न प्रसज्यत इत्यस्यायमविषयः । यथेयं चिन्ता न तथा क्वचित्साक्षात्संगता यतः ।

अथवा विषयनियतात्रप्रतिज्ञा न कृतेत्याक्षेपसमाधानरूपमिदं अधिकरणमप्याद्यपरिसमाप्तिरूपत्वान्न पृथक्संगत्यपेक्षम् ।

शेषत्वं प्रसाध्यैव सुकरम्, नान्यथा, अतस्तदर्थं नैयोगिकं यागादिशेषत्वं व्युत्पाद्यमित्यर्थः। ननु नैयोगिकं शेषत्वं चतुर्थे सङ्गतं न तृतीय इत्यत्राह—यद्यपीति। यागादिशेषत्वस्योभयरूपता। तत्र नैयोगिकत्वमेकं रूपं अवधारणनिराकरणहेतुत्वं चापरम्। तत्र यद्यपि नैयोगिकत्वरूपेण चातुर्थता तथापि अवधारणनिराकरणहेतुत्वेन तु न चातुर्थता। तथापि किमित्यत्राह—येन चेति। येनावधारणनिराकरणहेतुत्वरूपेणेयं चिन्ता प्रवृत्ता तदनुरूपा प्रासङ्गिकी सङ्गतिरिहैव तृतीये।

नन्वस्मिन्नधिकरणे उभयमपि रूपं सिद्धमिति कथं निराकरणहेतुत्वरूपेणैवेयं चिन्ता प्रवृत्ता। (न) नैयोगिकत्वरूपेणेत्यत्राह—नैयोगिकेति। सत्यमत्र रूपद्वयं सिद्ध्यति। तथापि नैयोगिकत्वरूपव्युत्पत्तौ तात्पर्याभावादधिकरणस्य न चतुर्थे सङ्गतिः किन्तु अवधारणनिराकरणमेव तात्पर्यतोव्युत्पाद्यम् तदर्थत्वेनैव शेषत्वव्युत्पत्तिरिति न तेन रूपेणेयं चिन्तेति तृतीये प्रसङ्गसङ्गतिरेव युक्तेत्यर्थः। ननु साक्षाद्युक्तं न प्रसज्यत इति न्यायात् कथं प्रसङ्गसङ्गत्यङ्गीकारः इत्याशङ्कामुपसंहारव्याजेनापनुदति—अत इति। कुत इति तत्राह—यथेयमिति। अवधारणनिराकरणकारकत्वरूपेण प्रवर्तमानाया न क्वचित् साक्षात्सङ्गतिरिति प्रसङ्ग एवात्र युक्त इति भावः। अथवा पूर्वाधिकरणसमाप्तिरूपत्वादस्याधिकरणस्य न पृथक् सङ्गत्यपेक्षेति तत्सङ्गतिरेवास्यापि सङ्गतिरित्याह—अथवेति। ननु कथं पूर्वाधिकरण समाप्तिरूपत्वमस्येत्यत्राह—आक्षेपेति। नन्वेवं तत्र चोद्यपरिहाररूपेणायमर्थो

ननु नैयोगिकरूपेण साक्षात्संगत्या कृतापि स्मारिता बादरेर-ज्ञानं ज्ञापयत्येव वृथा स्वस्थानातिक्रमः । मैवं । बादरिनिरासप्रयोजन गौरवाकर्षात्स्वस्थानातिक्रमो युक्तः । न केवलं शेषत्वविषये बादरेरज्ञता, अवधारयतः । किंतु वाक्यार्थाज्ञतापि, स हि कामिनो नियोगे ममेदं कार्यमिति धीर्यागस्यापि काम्यसाधनतामापादयतीत्यबुध्वा क्रियां वाक्यार्थं मत्वा क्रियायाः द्रव्यादिरेव शेष इत्याह ततो भ्रमपरं परानिरसनप्रयोजनगौरवाकर्षादिहाभ्यर्हितेति । प्रयोजनतः प्रसङ्ग एव बलवान् । यदीयोपोद्धातात्सप्तमाद्यमुत्तरषट्के तदपि हि संबन्धकथनगौरवाकर्षात् स्वस्थाने कृतम् । स्तुत शस्त्रादि चिन्तानानां तु स्वप्रयोजनमात्रपर्यवसितानां युक्ता स्वस्थानता । चिन्तान्तरसिद्धिप्रयोजनगौरवानाकर्षादित्यवधेयम् ।

वाच्यः नाधिकरणान्तरतयेत्यत्राह—अधिकरणमपीति । विषयसंशयाद्यङ्गपञ्चकस्य विद्यमानत्वादित्यर्थः। आक्षेपस्वरूपं समर्थयते—विषयेति । द्रव्यगुणसंस्कारेष्वेव शेषलक्षणमिति नियतैव प्रतिज्ञा कार्या। न पुनः अथातः शेषलक्षणमिति सामान्येनेति। समाधिस्तु अत्र फलयाग पुरुषाणां शेषत्वे साधिते तत्सामान्यन्यायेन प्रकरणविनियोज्यप्रयाजादिकर्मणामपि शेषत्वं सिद्धयतीति युक्तं सामान्येन प्रतिज्ञानमिति ।

यत्पुनरवधारणनिराकरण हेतुत्वरूपेण चिन्तोत्पत्तेः प्रासङ्गिक्येव सङ्गतिरिति पूर्वमुक्तं तदाक्षिपति—नन्विति । यद्यवधारणनिराकरणमेव तात्पर्यतो व्युत्पाद्यं स्यात् स्यात् प्रसङ्गसङ्गतिः । अत्र तु नैयोगिक शेषत्वमेव तात्पर्यतो व्युत्पाद्यम् । ततश्च साक्षात्सङ्गत्या चतुर्थे कृतेयं चिन्ताऽत्र स्मारिता बादरेरज्ञानं शेषत्वविषयं ज्ञापयत्येव। ततः स्वस्थानातिक्रमो न युज्यत इत्यर्थः। समाधत्ते—मैवमिति। वादरिमतनिरासरूप प्रयोजनवशादिहाकृष्टेयं चिन्तेति स्वस्थानातिक्रमो युक्त इत्यर्थः। ननु चतुर्थस्थयाप्यनया बादरिमतनिरासप्रयोजनं सिद्धयत्येव वृथा स्वस्थानातिक्रम इत्याशङ्क्य न केवलं शेषत्वविषयमात्रे तस्याज्ञता किन्तु वाक्यार्थाज्ञतापीति भ्रम परम्परा निरासप्रयोजनगौरवा[प]कर्षात् प्रसङ्गसङ्गतिरेव ब(लीयसीत्याह)लवतीत्याह—न केवलमिति ।

बादरिचिन्ता साक्षात्संगतेत्ययुक्तम् नैयोगिकस्य प्रतिज्ञानन्तर्भावात्। श्रुत्यादितो यागादिशेषत्वस्याननुज्ञानात् केवलोपादानगम्यं यागादिशेषत्वमित्येवं क्रत्वर्थ पुरुषार्थविवेकात् । अत एव चतुर्थेऽतिक्रान्तस्तृतीयविषय इति भाष्यव्याख्यानावसरे पञ्चिकायामुक्तं-बादर्यधिकरणं चतुर्थसंगतमपि बादरेरवधारणं निराकर्तुं तृतीये कृतमिति ।

उपोद्घाताद्वा बादरिचिन्ता अवधारण निरसनाद्धि प्रतिज्ञात प्रकरणप्रमाणशेषत्वसंभव इति प्रकृतसिद्ध्यर्थता प्रतिज्ञातोत्तरता च। यद्विना तु प्रतिज्ञाप्यशक्या तच्चिन्ता पूर्वमेव यथासप्तमा-

---

इदमत्राकूतम्--नैयोगिकशेषत्वस्यैव तात्पर्यतो व्युत्पाद्यत्वमङ्गीकृत्य साक्षात्सङ्गतिलोभात् यदि चतुर्थ एवेयं चिन्ता क्रियेत तदा बादरेरज्ञानज्ञापनार्थं अत्रापि तत्करणं कर्तव्यम्। ततश्च तत्र तद्व्युत्पादनं अत्र स्मरणं चेति यत्न गौरवं प्रसज्येत अतस्तत्परिहारार्थमत्रैवावधारण निराकरणहेतुत्वरूपेण नैयोगिकं शेषत्वं व्युत्पाद्यम्। अथात्र व्युत्पादितेऽपि पुनर्लिप्सामा[सू]त्रे पुरुषार्थत्वार्थं स्मरणमिति तुल्यमिति चेत्। तर्हि इहैव प्रथमं बुभुत्सितमिति साक्षात्सङ्गतेः प्रसङ्गसङ्गतिरेव बलवती। एतदभिप्रेत्योक्तं—इहाभ्यर्हितेति । साक्षात्सङ्गतिमुल्लङ्घ्य प्रयोजनवशात् सङ्गत्यन्तरस्वीकरणे दृष्टान्तमाह—यथेति। केन प्रयोजनेन तत् सप्तमाद्यं स्वस्थाने न कृतमित्यत्राह—तदपि हीति । ननु यदि प्रयोजनवशादाकर्षः तर्हि स्तुतशस्त्रादिचिन्तानामपि स्वस्थानातिक्रमः स्यादित्यत्राह—स्तुतशस्त्रादीति। ननु यदि चिन्तान्तरसिद्धिप्रयोजनगौरवादाकर्षः न तर्हि बादरिचिन्तायाः स्वस्थानातिक्रमो युक्तः चिन्तान्तरसिद्धेरभावादित्यत्राह—इत्यनुसन्धेयमिति।

अयं भावः—सर्वत्र प्रयोजनगौरवमेव स्वस्थानातिक्रमे हेतुः। तत् क्वचित् चिन्तान्तरसिद्धिरूपम्। यथा सप्तमाद्ये। क्वचिदन्यदेव यथा भ्रमपरम्परानिरसनरूपमिति। अत्र केचित् अथातः शेषलक्षणमिति सामान्येन शेषत्वमात्रस्यैव तृतीये व्युत्पाद्यत्वेन प्रतिज्ञानात् नैयोगिकशेषत्वस्यापि अत्र शेषत्वाविशेषात् साक्षात्सङ्गतिरित्यूचुः। तदयुक्तमित्याह—बादरिचिन्तेति। कुतो न युक्तमित्यत्राह—नैयोगिकस्येति । वैनियोगिक शेषत्वमध्यायार्थः यागादिशेषत्वं तु नैयोगिकम् । अतस्तस्य प्रतिज्ञानन्तर्भावात् न साक्षात्सङ्गतिः। ननु यागादिशेषत्वमपि श्रुत्यादिगम्यमेव स्वर्गकाम श्रुतिबलादेव यागस्य फलं प्रति शेषत्वं तथा कामना सामर्थ्यरूपलिङ्गात्

द्यादिका । कार्यतः शेषत्वप्रतिज्ञातु (न) बादरिमतनिर्वाहेप्या (ना) क्षिप्तैवेति न तत्समाधिरुपोद्धाते मूलयुक्तिः ।

श्रीकरेण तु व्युत्पाद्यादर्शनासंगतिभिया च चतुस्सूत्रीयं षष्ठाद्यलिप्सासूत्रव्युत्पन्ननयस्मरणार्था । द्रव्यादिष्वेव शेषत्वंबादर्युक्तमयुक्तं वक्तुमित्युक्तम् तन्न, इह हि स्वर्गयागयोः साध्यसाधनभावो व्युत्पाद्यः । षष्ठाद्ये तु नियोज्यत्वेनाप्यन्वयोऽस्तीति व्युत्पाद्यम् । लिप्सासूत्रं तु लक्षणपरं सत्तदनुगुणकेवलनियोगाधीनैदमर्थ्यभाक्त्वं यागादेराहेति न चतुस्सूत्री मन्दप्रयोजना युक्ता ।

फलस्य पुरुषं प्रति शेषत्वं तथा वाक्यादेव यागे सम्माने च पुरुषस्य शेषतेति यागफलपुरुषाणां शेषत्वं वैनियोगिकमेवेत्यत्राह—श्रुत्यादिनेति । अस्यार्थः स्वर्गकामपदस्य नियोज्यान्वय एव तात्पर्यम् न यागशेषत्व इति न श्रौतं यागशेषत्वं किन्तु नियोग एव यागस्य फलजनकत्वमाक्षिप्य तस्य फलं प्रति शेषत्वमापादयतीति नैयोगिकमेत्र यागशेषत्वं, तथा कामना सामर्थ्यरूप लिङ्गमपि फलस्य पुरुषमात्रसम्वन्धित्वमापादयति न त्वधिकारिपुरुषसम्बन्धित्वं तत्तु नियोगादेवेति तदपि नैयोगिकमेव । तथा फलिनः कर्तुः सम्मानं प्रति अधिकारिपुरुषतया शेषत्वं नियोगादेवेति सर्वत्र श्रुत्यादिना यागशेषत्वमननुमतमेव ।

ननु नियोगसहकृतश्रुतिलिङ्गवाक्यानि यागादि शेषत्वं बोधयन्तीत्यत्राह—केवलेति । चतुर्थ दीपशिखा ग्रन्थ विरोधोऽपि साक्षात्सङ्गतिवादिनामित्याह—अत एवेति । प्रकारान्तरेणापि सङ्गतिमाह—उपोद्घाताद्वेति । प्रकृतसिद्ध्यर्थतामाह—अवधारणेति । श्रुत्यादिप्रमाणकशेषत्वप्रतिज्ञानात् प्रतिज्ञातैकदेशप्रकरणशेषत्वमवधारणनिरासादेवेति प्रकृतसिद्ध्यर्थता ।

नन्वेवमुपोद्घातत्वे सप्तमाद्यादिवत् प्रतिज्ञातः पूर्वमेवेयं चिन्ता स्यादित्यत्राह—प्रतिज्ञेति । तदेवोपपादयति—यद्विनेति । ननूपकारदर्शनाच्छेषत्वमिति वादरिमतं तदनिरासे कार्यतः शेषत्वमिति प्रतिज्ञा न शक्येति प्रतिज्ञापूर्वत्वं स्यादित्यत्राह—कार्यत इति । उपकारदर्शनाच्छेषत्वमिति न वादरिमतं किन्तु तन्मतेपि कार्यत एव शेषत्वं अतस्तन्मतनिर्वाहेपि कार्यतः शेषत्वप्रतिज्ञाऽऽक्षिप्तैव । एवं सति ये कार्यतः शेषत्वप्रतिज्ञा समाधानमस्योपोद्घातत्वे मूलयुक्तिरित्याचक्षते तन्निरस्तमित्याह—न तत्समाधिरिति ।

विवरणे तु यदुक्तं असति यागसाध्यत्वे स्वर्गस्य कामिनोऽधिकारो न सिध्यतीति षष्ठाद्य एवोक्तमिति । तदिह व्युत्पाद्यमेवाधिकारार्थं तत्रोक्तमित्यविरोधः ।

अत्र पूर्वपक्षी बादरिः लोकव्युत्पत्त्या क्रिया कार्या। न च कार्यमन्यार्थमिति न यागः कस्यचिच्छेषः तन्निर्वर्तकता च द्रव्यगुणसंस्काराणामेवेति त एव कार्यरूपयागान्वयाच्छेषाः । ननु कमियोगादीप्सितः स्वर्गः । अतः समभिव्याहृतेन यागेनेप्सितः । तच्चैवं युक्तं यदि कमिपदं नियोज्यार्पकम् । कामित्वरूपेण हि स्वेप्सितसाधनमेव बोधार्हं कार्यम् । अतः कमि पदयोगावगतेप्सितत्वनिर्वाहानुगुणकार्य बोध्दृभूतनियोज्यत्वविधयाप्यन्वयोऽस्तीत्युक्तं

श्रीकरेणेति। षष्ठाद्य लिप्सासूत्रव्युत्पाद्यातिरिक्तस्य व्युत्पाद्यस्यादर्शनात् कथञ्चिद्दर्शने चासङ्गतिदोष प्रसङ्गात् चतुस्सूत्रीयं बाधकमुक्तं द्रव्यादीन्येव शेषत्वमयुक्तमिति वक्तुं षष्ठाद्यलिप्सासूत्रव्युत्पाद्य नयस्मरणार्थेत्युक्तमित्यर्थः ।

तन्नेति। यस्मादिह बादर्यधिकरणे यागस्वर्गयोः साध्यसाधनभावो व्युत्पाद्यः तथा षष्ठाद्ये नियोज्यत्वेनाप्यन्वयोऽस्तीति यस्माद्व्युत्पाद्यं लिप्सासूत्रेपि क्रत्वर्थ पुरुषार्थयोर्लक्षणमेव तात्पर्यतो यस्मात् कथ्यते तदर्थत्वेन यागादेः केवलोपादानेनैदमर्थ्यभाक्त्वमिह सिद्धमेव। तत्र व्यवह्रियते परम्।तस्मादधिकरणत्रयस्यापि पृथक् व्युत्पाद्यस्य विद्यमानत्वादुक्तप्रकारेण सङ्गतेरपि व्युत्पाद्यमानत्वात् न सूत्र चतुष्टयमिदं स्मरणार्थत्वेन मन्द प्रयोजनमित्यर्थः। नैयोगिकयागादि शेषत्वमिहैव व्युत्पाद्यमित्यस्य विवरणग्रन्थविरोधोऽपि नास्तीत्याह—विवरणे यदुक्तमिति। तत्र सूत्रस्थ बादरिग्रहणं न पूज्यत्वेन किन्तु पूर्वपक्षित्वेनेत्याह—अत्र पूर्वपक्षीति । ननु कथमत्र पूर्वपक्षः यावता स्वर्गकामो यजेतेति नियोग एव कार्यतया लिङाऽवगम्यते कार्यं च प्रयोजनमिति प्रयोजनभूतनियोगान्वयात् यागादेरपि शेषत्वं युक्तम् न द्रव्यगुणसंस्काराणामेवेत्यत्राह—लोकव्युत्पत्त्येति । अस्यार्थः स्वर्गकामो यजेतेति न नियोगः कार्यतया लिङोच्यते लोकव्युत्पत्त्यनुसारित्वाच्छब्दार्थावबोधस्य। लोके च ग्रामं गच्छेदित्यादौ ग्रामगमनरूपक्रियाकार्ये व्युत्पत्तेर्वेदेपि क्रियाकार्यमेव लिङाद्यर्थः। अतो लोकव्युत्पत्त्या यागादिक्रियैव कारणम्। भवत्वेवं तथापि किमित्यत्राह—न चेति। ननु यागः कस्यचिच्छे-

षष्ठाद्ये। देहान्तरभोग्ये चेप्सिते अव्यवहितसाधनता देहान्तर-कालान्तर स्थायिकार्यस्येति क्रियातिरिक्तेऽव्युत्पत्तिरुक्ता। तदन्तर्भावादेव च यागस्येप्सितसाधनत्वं कार्यत्वं चेति न क्रिया-कार्यत्वानुसारात् द्रव्यादिष्वेव।

मैवं यदि कमियोगाद्यागेनेप्सिततदधीनं नियोज्यपरत्वं न तर्हि तत्परत्वं, यागस्यस्वर्गसाधनत्वासंभवात्। समभिव्याहृत-यागसाधनतया कमियुक्तस्य साध्यता तद्वाढर्यान्निनोज्यपरता। तदसंभवे क्रियान्वयः कर्तृतयेति न नियोज्यपरत्वम्। नाप्यपूर्वं वाक्यार्थः। यागस्य स्वर्गसाधनत्वासंभवे चेयं युक्तिः। क्रियायाः कारकावस्थासमवायिफलजनकत्वनियमात् स्वर्गादिरकारकावस्था-

---

षोमास्तु द्रव्यगुणसंस्काराणामपि कथं तच्छेषतेत्यत्राह—तन्निर्वर्तकतेति। राद्धान्त्याशयेन चोदयति—नन्विति। स्वर्गकाम इति। कमियोगबलात् स्वर्गस्येप्सितत्वं ईप्सितत्वं चाप्तुमिष्टत्वं तदेव हि साध्यत्वं ततः किमित्यत्राह—अत इति। केनेप्सित इत्यपेक्षायां स्वर्गकामो यजेतेति समभिव्याहृतयागेनेप्सित इत्यवगम्यते। ततः किमित्यत आह—तच्चैवमिति। भवत्वेवं नियोज्यार्पकत्वं किमायातं स्वर्गं प्रति यागस्य साधनत्व इत्यत आह—कामित्वेति। ननु कथमप्रसिद्धो नियोज्यान्वयः स्यात् यावता कर्तृतयैवान्वयः स्यादित्यत्राह—अतः कामीति। ननु देहान्तरकालान्तर भाविनि फले कथं क्षणिककर्मणः साधनत्वं अयोग्यत्वादित्याशङ्क्य अपूर्वाधिकरणव्युत्पादित क्रियातिरिक्तकार्यान्तर्भावात् क्रियायाः साधनत्वनिर्वाह इत्याह—देहान्तरेति।

परिहरति—मैवमिति। कमियोगाद्यागेनेप्सितत्वनिबन्धनं स्वर्गकामपदस्य नियोज्यपरत्वं वक्तुं न शक्यते यागस्य स्वर्गसाधनत्वासम्भवात्। ननु यद्यपि यागस्य साधनत्वं न सम्भवति तथापि कमिश्रुत्यवगतसाध्यत्वधीवलादन्यस्य यस्य कस्यचित्साधनत्वमङ्गीकृत्य कमियुक्तसाध्यतानिर्वाहोऽस्त्वित्याशङ्क्याह—समभिव्याहृतेति। यागादन्यस्य कस्यचिदप्यश्रवणात् तस्य च यागस्यायोग्यतया साधकत्वासम्भवात् तन्निबन्धननियोज्यपरत्वमपि न सम्भवति; तदसंभवे तु स्वर्गकामपदस्य कर्तृत्वेनैव क्रियान्वय इति न नियोज्यत्वम्। नाप्यपूर्वं वाक्यार्थं इति। ननु कथं यागस्य स्वर्गसाधनत्वं न सम्भवतीत्याशङ्क्य तत्र यथा ग्रन्थं युक्तिमाह—यागस्येति। ननु प्रीतिरूपत्वात् स्वर्गस्यात्माश्रितता आत्मनश्च यागे कर्तृ कारकत्व-

श्रितत्वात् । प्रीतिरूपतयाऽऽत्माश्रितत्वेऽपि न कारकदशाश्रितता न च पूर्वं कारकता पश्चात्फलभागितेत्येव कारकावस्थाश्रितता वाच्या । यतः क्रियायोगि कारकमुच्यते । स्वफलजन्मकाले क्रियाऽस्तीति तद्योगिनी कारकावस्थापि सती । उत्पन्नेन हि फलेनैकार्थसमवायिना क्रिया विरोत्स्यत इत्याद्ये फलक्षणे क्रिया च कारकं च फलं चेति कारकावस्थायामेव क्रियाफलोत्पत्तिरिति न स्वर्गस्य क्रियाफलत्वसंभवः ।

ननु कारकं निमित्तं हेतुरिति शाब्दाः । न तु क्रियायोगीति । मैवं निमित्तनैमित्तिक भाव एव क्रियायोगोऽभिमतः । अयं च योगः

मिति कथमकारकाश्रिततेत्यत्राह—प्रीतिरूपेति । सत्यं स्वर्गस्यात्माश्रितत्वं सत्यं चात्मनो यागे कर्तृत्वं तथापि स्वर्गोत्पत्तिसमये तस्य न कारकावस्थितिः न कारकदशाश्रिततेत्यर्थः । ननु क्रियाफलस्य सर्वत्र न कारकदशाश्रितता किन्तु यस्य पूर्वं कारकत्वं तत्पश्चात् क्रियाफलाश्रय इति कारकदिष्टा[दशा]नाश्रितत्वमेव । तथा स्वर्गस्याप्यस्त्वित्यत आह—न चेति । तत्र हेतुः—यत इति । ननु भवतु क्रियायोगि कारकं क्रियायास्तु क्षणभङ्गित्वात् तद्योगिनी कारकावस्थापि क्षणभङ्गिनीति न कारकाश्रितता क्रियाफलस्येत्यत्राह—स्वफलेति । क्रियायाः फलविनाश्यत्वात् फलोत्पत्तिकाले विद्यमानतया तद्योगिनी कारकावस्थापि सती अतस्तदवस्थाश्रितता युक्तेत्यर्थः । ननु विरोधे सति फलं क्रियाविनाशकं कथं विरोध इत्यत्राह—उत्पन्नेन हीति ।

ननु यद्युत्पन्नेन फलेन क्रियापगमस्तर्हि कारकत्वमप्यपगतमेवेति सर्वत्र क्रियाफलानामकारकदशाश्रितत्वात् अकारकावस्थाश्रितस्य स्वर्गस्यापि क्रियाफलत्वमविरुद्धमित्याह—इत्याद्य इति । सत्यमुत्पन्नेन फलेन क्रियापगमः तथापि फलोत्पत्तिक्षणे क्रियासतीति तद्योगित्वं कारकत्वमपि सदेव । अत आद्ये फलक्षणे फलोत्पत्तिक्षणे क्रिया च कारकं च फलं च त्रितयमप्यस्तीति कारकावस्थायामेव सर्वत्र क्रियाफलोत्पत्तिरिति अतथाविधस्य स्वर्गस्य न क्रियाफलत्वसम्भवः । चोदयति—नन्विति । कारकज्ञाः शाब्दाः क्रियानिमित्तमेव क्रियाहेतुमेव कारकमाचक्षते न पुनः क्रियायोगि । निमित्तत्वं च क्रियोत्पत्तिक्षणात् पूर्वक्षणे नियतवर्तित्वमिति कथं फलोत्पत्तिक्षणे कारकावस्थासद्भाव इत्यर्थः । —मैवमिति । निमित्तनैमित्तिकभाव एव ग्रन्थे

क्रियाद्यक्षणात् पूर्वं नियतस्थितेः क्रियान्त्यक्षणानुवृत्त्या च भवति। पूर्वक्षणस्थितिगर्भो हि परक्षणवर्तिनोरेवंविधो योगः अन्यतरयोगिविरहेपि योगापगमः। भूतपूर्वयोगात्तु पाचकादिव्यपदेशानुवृत्तिः। अतः क्रियास्थितिक्षण एव कारकावस्थेत्यन्यतरभाव्येव क्रियाफलं नान्यत्। शक्तिमति च क्रियायोगार्हतया कारकव्यवहारः। अत एव निमित्तत्वाविशेषात् असमवायिनिमित्तकारणयोरपि कारकतेति। कर्मकरणाधिकरणसंप्रदाना-

---

क्रियायोगोऽभिमतः न शाब्दमतविरोध इत्यर्थः। नन्वेवं कथं तर्हि फलोत्पत्तिक्षणे कारकदशा सतीत्यत्राह—अयं चेति। निमित्तनैमित्तिकभावलक्षणयोगः क्रियाद्यक्षणात्पूर्वक्षण नियतस्थितेः यावत्क्रियान्त्यक्षणमनुवृत्त्या च भवति। अतो नियत क्रियापूर्वक्षणवर्तित्वे सति अन्त्यक्रियाक्षणवर्तिनः कारकत्वं नान्यकार्यसाधारणादृष्टादेः कारकता। एतदुक्तं भवति—इष्टफलसाधनसजातीय विजातीयक्षणनिचयस्य तन्त्राक्षेपाभ्यां धातूपात्तस्य एकफलावच्छेदेन आख्यातेन साध्यतया प्रतिपाद्यस्य कारकापेक्षानान्यस्य परिस्पन्दमात्रस्य। अतः क्रियायाः क्रियात्वं फलोत्पादकत्वावस्थिति क्रियान्त्यक्षणानुवृत्त्या कारकत्वं भवत् यावत्फलाद्यक्षणमनुवर्त्यैव भवति। ततः फलाद्यक्षणेपि कारकावस्था सती।

नन्वेवं फलोत्पत्तिक्षणे क्रियासहभावेनैव कारकत्वमस्तु किं क्रियापूर्वक्षणस्थित्येत्यत्राह—पूर्वक्षणेति। पूर्वं सत एव लोके निमित्तत्वप्रसिद्धेरित्यर्थः। नन्वेवं क्रियाफलवत् कारकत्वमपि क्रियोत्तरकालमनुवर्ततामित्यत्राह—अन्यतरेति। युक्तं फलस्योत्तरकालमनुवर्तनं असम्बन्धरूपत्वात्। कारकत्वं तु सम्बन्धरूपम् तच्च सम्बन्धिद्वयस्थित्यवधिकमिति अन्यतरक्रियारूपयोगिविरहेपि कारकत्वं नाम योगोऽपगत एव। नन्वेवं पचिक्रियानाशे पश्चात् पाचकादिव्यपदेशो नोपपद्यत इत्यत्राह—भूतपूर्वेति। उपसंहरति—अत इति। अन्यत् व्यवहितफलं स्वर्गादि। नन्वेवं छिदिक्रियायोगाभावेपि छेदकः कुठार इति कथं व्यवहार इत्यत्राह—शक्तिमते चेति। गौणोऽयं व्यवहार इत्यर्थः। क्रियानिमित्तत्वमेव क्रियायोगित्वं ग्रन्थेऽभिमतम्। न तु क्रियासमवायित्वमेवेति यदुक्तं युक्तं चैतदित्याह- अत एवेति। हेतुत्वाविशेषादसमवायिकारण निमित्तकारणरूपाणां कर्मकरणादीनां धात्वनुपात्तव्यापाराणामपि क्रियायां कारकत्वं युक्तम्। इतरथा को दोषइत्यत्राह—धातूपात्तेति। तथा सति क्रियासमवायित्वं कर्तुरेवेति कर्तुरेव कारकत्वं

पादानानां धात्वनुपात्तव्यापाराणामपि कारकता । [इतरथा] धातूपात्तव्यापारः कर्तैव क्रियासमवायीकारकं [स्यात्]। विवक्षया तु कारकावान्तरव्यापारे धातोर्वृत्तेः तेषामपि क्रियासमवायात् कर्तृता। अपादानस्यावान्तर व्यापाराभावेपि कर्तृव्यापारनिमित्त-तयैव कर्तृविवक्षा । यथा परिस्पन्दे कर्तृता आत्मनः परस्थेऽपि । यथावा आत्मस्थेऽपि ज्ञाने शरीरस्य । यदि क्रियातः पूर्वक्षण-स्थित्या कारकता न तर्हि निर्वर्त्यकर्मणः कारकता ओदनादेः ।

मैवम् । तन्निर्वर्त्यपाकं प्रति विकार्यकर्मता हि पूर्वस्थिततया तण्डुलानाम् । त एव भाव्यवस्थावाचिना ओदनशब्देन निर्दिश्य

स्यान्नेतरेषामित्यभिप्रायः। ननु यदि धातूपात्तव्यापारस्यैव क्रियासमवायात् कर्तृता स्थाली पचति काष्ठानि पचन्तीति कथं तत्राह—विवक्षयेति ।

नन्वेवं सावान्तरव्यापाराणां करणादिकारकाणां विवक्षया कर्तृत्वं युक्तम्। अवान्तरव्यापारशून्यस्य त्वापादनस्य वृक्षः पर्णं त्यजतीत्यादौ कथं कर्तृनिर्देश इत्यत्राह—अपादानस्येति । अन्यनिष्ठेऽपि व्यापारे निर्व्या-पारस्य निमित्तत्वमात्रेणैव विवक्षया कर्तृनिर्देश इत्यत्र दृष्टान्तमाह—यथा परिस्पन्द इति। ननु युक्तमात्मनः परस्थेपि व्यापारे निमित्तत्वं अचे-तनस्य चेतन व्यतिरेकेणापरिस्पन्दात् वृक्षस्य त्व चेतनस्य व्यापारे कथं निमित्त-त्वमित्याशङ्क्य दृष्टान्तान्तरमाह—यथाऽऽत्मसंस्थेऽपीति। अत्र चोदयति—यदीति। यदि क्रियातः पूर्वक्षणस्थित्या कारकता तर्हि निर्वर्त्य कर्मणः ओदनादेः कारकत्वं न स्यात् पूर्वक्षणस्थित्यभावादित्यर्थः । अत्रौदनं पचतीत्यस्य विकार्यकर्मत्वमास्थाय प्रौढवादेन परिहारो ग्रन्थकारेणोक्तः तमाह—मैवमिति। एवं तर्हि तण्डुलान् पचतीति प्रयोगः स्यात् नत्वोदनं पचतीति तत्राह—त एवेति। तमिमं परिहारं चोद्यवादी दूषयति—न तर्हीति। घटं करोतीत्यादावपि पूर्वावस्थमृदादेरेव स्वघटादिशब्देन निर्देश्यतया विकार्यकर्मत्वापातात् निर्वर्त्यं नाम चतुर्थं कर्म न स्यादित्यभिप्रायः। इदानीं सम्यक् परिहारमाह—मैवमिति। ननूत्पत्तिरूपक्रिया फलवतो वस्तुनः क्रियो-त्तरकालीनत्वान्न क्रियापूर्वक्षण स्थितिरिति कथं कारकत्वकर्मत्वयोरेका-श्रयतेत्यत्राह—पूर्वापरेति। निर्वर्त्य वस्तुन एव क्रियाफलत्वात् तदाधार-भूतान् क्रियापूर्वोत्तरक्षणानुगतान् अवयवविशेषानपेक्ष्यैव कारकत्वकर्मत्व-योरेकाश्रयता।

द्वितीयया उक्ताः। न तर्हि निर्वर्त्यं चतुर्थं कर्म। मैवम्। यस्य क्रियाफलवतः पूर्वबुद्धिव्यपदेशाभ्यामन्यता तन्निर्वर्त्यं पूर्वापरावस्थानुगतवस्त्वपेक्षया कारकत्वकर्मत्वयोरेकाश्रयता। नौदनशब्देऽर्थानुगतिः। न तण्डुलशाब्दार्थानुगतिः। न चानुगतवाची शब्दो-व्यवहाराङ्गतया रूढ इति भाव्यवस्थावाचिना भूतावस्थावाचिना वा निर्देशो युक्त इति सिद्धं कारकावस्थाश्रितं (आ) क्रियाफलमिति। आत्मनेपदमपि यत्क्रियाफलं तस्य कर्तृगामितायां प्रयुज्यते, न स्वर्गस्य यागक्रियासाध्यतायाँ प्रमाणम्। यदि स्वर्गो द्वितीयया निर्दिश्येत, तथापि न क्रियाफलं शक्येत कर्तृगतमपि विवक्षया कर्म शक्यं, क्रियाफलं तु न विवक्षाधीनम्। न

ननु किं तेऽवयवविशेषास्तण्डुलशब्दार्थाः किमोदनशब्दार्थाः, नाद्यः उत्तरक्षणाननुगतेः। न द्वितीयः पूर्वक्षणस्थित्यभावात्। अतः कथं तदपेक्षया एकाश्रयत्वमुच्यत इत्यत्राह—न तण्डुलेति। न तण्डुलशब्दार्थस्य पूर्वापरावगतिः नाप्योदन शब्दार्थस्य। किन्तु तदाधारभूतावयवविशेषाणामनुगतिः। तदपेक्षयैकाश्रयत्वमुपपद्यते। ततः य(द्य)दवयवविशेषाश्रितपूर्वंस्थितद्रव्यविनाशे तदवयवविशेषाश्रितं कार्यद्रव्यान्तरमुत्पद्यते तन्निर्वर्त्यमिति न कश्चिद्विरोधः। ननु अवयवविशेषवाचकशब्देनैव निर्देशो युक्तः न पुनः कार्यकारणद्रव्यवाचकेन पदेनेत्यत्राह—न चेति। उपसंहरति—इति सिद्धमिति। ननु आत्मनेपदात् क्रियाफलत्वं गम्यत इत्यत्राह—आत्मनेपदमपीति। तस्य फलस्य कर्तृगामितया विधानं, न क्रियाफलत्वे प्रामाण्यम् उक्तेन प्रकारेण क्रियाफलत्वस्यायोग्यत्वादित्यर्थः। अत्र पञ्चिकायां कर्तृविशेषणत्वं स्वर्गस्येति टीकाव्याख्यानावसरे यदि स्वर्गो द्वितीययानिर्दिष्टः स्यात् ततः क्रियाफलं गम्येतापीत्युक्तम्। तत् प्रौढवादेन। परमार्थतस्तु द्वितीयानिर्देशेपि न क्रियाफलत्वं शक्यत इत्याह—यदीति। अनन्तरभावित्वाभावेन क्रियाफलत्वासम्भवादित्यर्थः।

ननु यथा कर्तृगतस्यापि विवक्षया कर्मत्वमाश्रित्य द्वितीयानिर्देशः तथा क्रियाफलत्वमपि वैवक्षिकमस्त्वित्यत्राह—कर्तृगतमपीति। विवक्षातः कारकाणि भवन्तीति कारकविशेषः कर्मत्वं वैवक्षिकं युक्तम् क्रियाफलत्वं तु लोके न विवक्षाधीनं दृष्टमित्यर्थः। नन्वनन्तरभावित्वाभावात् क्रियाफलता प्रमाणान्तरानवगतापि वेदादाहवनीयादिकारकत्ववत् अवगम्यता-

चाकारकावस्थायाँ जातं वेदात् क्रियाफलं गम्यते मानान्तरविरोधे वेदस्याप्रामाण्यात् । आहवनीयशब्दार्थतया मानान्तरानवगतेऽपि द्रव्यतया प्राक्सतः कारकत्वं वेदगम्यं न मानान्तरहतम् ।

भाष्यमपि यागे कृते स्वयमेव फलं भवतीत्यभ्युपेत्याह । यागस्य तत्फलमशक्यमिति तात्पर्यम् न तु स्वयं भवतीत्यत्र । ननु द्वितीययाऽपि स्वर्गः क्वचिद्भाष्ये निर्दिष्टः स्वर्गकामपद संबन्धात्स्वर्गं भावयेदिति । मैवं गौणो द्वितीया प्रयोगः यागस्य स्वर्गनिमित्तता कथनार्थ इति जैमिनिसिद्धेनैव क्रिया (आश्रया)- फलत्वेन बादरिर्यागस्य स्वर्गसाधनतामसतीं मत्वा नापूर्वार्थत्वं न फलार्थत्वं न पुरुषार्थत्वं यागस्य मेने । फलार्थत्वस्यैवापूर्वार्थत्व पुरुषार्थत्वे फलं अतो न राद्धान्ते पृथक् सूत्रिते । फलस्य त्वधिकारिपुरुषार्थत्वं, फलतया अधिकारिपुरुषतयाकर्मार्थत्वं, न द्रव्यतयेति द्वयमपि यागफलार्थत्वफलं पृथक्सूत्रितम् । अन्याश्रितमपि शेषत्वद्वयं यागाश्रितद्वयमिव फलमिति स्पष्टार्थम् ।

मित्याशङ्क्य स्वर्गस्याहवनीयादिभ्यो वैषम्यमाह—न चेति। एवं पूर्वपक्षं परिसमाप्य ग्रन्थकारोभूत्वा सूत्र भाष्योपपादनाय यतते—भाष्यमपीति। ननु स्वर्गं भावयेदिति ब्रूयुरिति क्वचिद्भाष्ये स्वर्गो द्वितीययानिर्दिश्यते। तत्र कथं निर्वाहः यदि स्वर्गस्य कारकत्वं नोपपद्यत इति चोद्यपूर्वकं गौणोऽयं वाद इत्याह—ननु द्वितीययेति। ननु राद्धान्तिनोऽपि क्रियाफलत्वं नानुमतमेव को विशेषः पूर्वपक्षिण इत्यत्राह—इति जैमिनीति। यद्यपि न क्रियाफलत्वं सिद्धान्तिनोऽपि सम्मतं—तथापि प्रयोजनफलविधया यागस्य स्वर्गसाधनत्वं तेनाङ्गीकृतम्। पूर्वपक्षे तु प्रयोजनफलविधयापि यागस्य साधनत्वं नानुमन्यत इति भेदः । अतोऽपूर्वफलपुरुषे च न यागस्य शेषतेति मन्यते ।

ननु फलार्थत्ववत् परमापूर्वार्थत्वपुरुषार्थत्वे अपीति किमिति राद्धान्ते न पृथक् सूत्रिते इत्यत्राह –फलेति। नन्वेवं फलस्य पुरुषार्थत्वं पुरुषस्य कर्मार्थत्वं च यागस्य फलार्थत्वं फलं किमिति पृथक् सूत्रितमित्यत्राह— फलस्यत्विति। मन्दधियामेकाश्रितशेषत्वे फलं स्फुटं अन्याश्रयं त्वस्फुटमिति शङ्का स्यात् तन्निराकरणेन स्फुटीकरणार्थं पृथक् सूत्रितमित्यर्थः। अत्रैकदेशिमतं दूषयितुं पूर्वपक्षिणश्चैकदेशिनश्चमतेभेदेन दर्शयति—इदं बादरिमत-

इदं बादरिमतम्। विभक्तितो द्रव्यादिशेषत्वम् उपकारदर्शनाद्वेति तु तदेकदेशिमतम्। विनापि विभक्तिं कृत्तद्धितसमासैर्द्रव्यादिशेषत्वोपगमात्।

अथ कारकावगमात् द्रव्यादेश्शेषता। तन्न। उपपदविभक्तितोऽपि शेषतादर्शनात्। उपकारोऽपि शेषत्वाभिमताश्रितो दृश्यते। प्रयोजनवत्युपकाराद्व्यवस्थेतिचेत्। तर्हि कार्यत एवात्रापि मते शेषतेति पूर्वोक्त एव पूर्वः पक्षः।

राद्धान्तस्तु—यदि यागस्यास्वर्गसाधनत्वसमुत्थं बादरिमतम्, तर्ह्यक्रियाफले स्वर्गे यागः साधनमस्तु, क्रियाफलमपूर्वमन्तर्भाव्य, यथा ओदनमन्तर्भाव्य पाकं नोपकारस्य ग्रासं साधयति। ननु परमापूर्वमपि न क्रियानन्तरम्, उत्पत्त्यपूर्वैरन्तरितत्वात्। मैवं, उत्पत्त्यपूर्वोत्तरमपि ब्राह्मणतर्पणादि यागान्तर्ग-

---

मिति। दूषयति—विनापीति। यस्य पर्णमयी जुहूर्भवतीति तद्धितेन, शरैः स्तरितव्यमिति कृता, यजमानसम्मितौदुम्बरीति समासेन। अथ विभक्तिभिः तादर्थ्यमित्यत्र कारकावगमकत्वमेव प्रयोजकं विवक्षितम्। कृत्तद्धित समासेष्वपि कारकावगमात् तैरपि शेषत्वं नानुपपन्नम् तदाह – अथेति। तस्येति। अतिहायेडोबर्हिः प्रति समानयतीति उपपदविभक्तितोऽपि समानयनस्योपरितन प्रयाजद्रव्यार्थत्वं दृश्यत इति तदपि न प्रयोजकमित्यर्थः। तर्हि उपकारदर्शनाच्छेषत्वमित्यत्राह—उपकारोऽपीति। शेषत्वेनाभिमतप्रोक्षणाद्याश्रितो(अ)पि शेषिभूत द्रव्यादिजन्य उत्पत्ति रूप उपकारो दृश्यते। अत उपकारदर्शनाच्छेषत्वे विपरीतं शेषशेषित्वं स्यात् इत्यभिप्रायः। अथ कार्यभूते य उपकारो दृश्यते स शेषहेतुरिति चोदयति—प्रयोजनवतीति। दूषयति—तर्हीति।

राद्धान्तस्त्विति। यदि यागस्य स्वर्गसाधनत्वाभावनिबन्धनं बादरिमतं तर्हि अक्रियाफले स्वर्गेसाधनमस्तु अपूर्वान्तिर्भावेण, तत्र दृष्टान्तमाह—यदीति। ननु परमापूर्वमपि न क्रियाफलं उत्पत्त्यपूर्वैरन्तरितत्वेन क्रियानन्तरभावित्वाभावात् तदाह—नन्विति। मैवमिति। उत्पत्त्यपूर्वानन्तरमप्यनुष्ठेयस्य ब्राह्मणतर्पणादेः मूलयागान्तर्गतत्वात् तदनन्तरभाविनः परमापूर्वस्य यागानन्तर्यमस्त्येव अन्त्येष्टेस्तु संस्कारकत्वात् सुतरां यागान्तर्भाव

तमेव । प्रतिपाद्यजुह्वादिसत्वे त्वन्त्येष्टिरपि द्रव्यसंस्कारत्वान्मूलयागान्तर्गतेति न परमापूर्वमन्तरितम् । अत उक्तमपूर्वसिद्धिः कुतः—क्रियात इति, ब्रूम इति । तदपूर्वं स्थायिन्यात्मनीति स्वीकृतेऽपि नात्मनो यागसंस्कार्यत्वं, मानाभावात् ।

नन्वेवमपूर्वद्वारा क्रिया साधनसाधनं स्वर्गस्य स्यात्, सत्यम् । अतएव साधनं कामितया कार्यमध्यवस्यन्नपूर्वमवैति, अतोऽपूर्वमेव वाक्यार्थः । नन्वेवं साधनसाधनत्वं न कामिकार्यत्वानुगुणं, मैवं, कामिकार्यैव क्रिया साधनभूतकार्यान्तर्भावं विना साधनसाधनतां स्वीयामनासादयती न स्यादिति कामिकार्यत्वानुगुणता ।

इत्याह—प्रतिपाद्येति। अन्त्येष्टेस्तु प्रतिपाद्यपात्रसद्भावापेक्षत्वेन पाक्षिकत्वादन्तर्भावः पूर्वं परिहारत्वेन नोक्तः द्रव्यसंस्कारताद्वारा तस्य मूलयागान्तर्भावस्य वक्तुं सुकरत्वात् पश्चादुक्त इत्यनुसन्धेयम्। ननु यजेतेतिदेवतोद्देशेन द्रव्यत्यागात्मकयागस्यैवाभिधानात् कथं ब्राह्मणतर्पणादेरन्तर्भावः, सत्यं, तथापि शास्त्रार्थीभूते यागेऽन्तर्भावोऽस्त्येव। तथाहि—सङ्कल्पप्रभृतिब्राह्मणतर्पणपर्यन्ते परमापूर्वेष्टफलसाधने सजातीये विजातीये च व्यापारक्षणनिचये यजेर्वृत्तिः। तत्र सजातीये धातुः तन्त्रेण वर्तते। विजातीये त्वाक्षेपतः। तत्र सर्वत्र परमापूर्वोद्देशप्रवृत्तकृतिव्याप्यतया शास्त्रार्थीभूते यजेर्वृत्तेः ब्राह्मणतर्पणादेः शास्त्रार्थीभूतयागान्तर्भावोऽस्त्येव। न चैवं सर्वस्यापि विषयत्वप्रसङ्गः, आक्षेपत एव विजातीये धातोर्वृत्तेः शब्दस्य तदन्वयपरत्वाभावात् । एततसर्वमभिप्रेत्योक्तं—मूलयागेति ।

ननु ब्राह्मणतर्पणादिजन्याङ्गोत्पत्त्यपूर्वव्यवधानात् परमापूर्वस्य कथं तदानन्तर्यमित्यत्राह—इति न परमापूर्वेति । अयं भावः—प्राच्योदीच्याङ्गसाहित्यार्थं हि उत्पत्त्यपूर्वकल्पनम्, सर्वैरेक उपकार इति नियमात्। ततश्च सर्वान्तो ब्राह्मणतर्पणादिः पूर्वपूर्वसर्वाङ्गजन्योत्पत्त्यपूर्वसहितः करणोपकारं जनयतीति न तस्याप्यवान्तरापूर्वं कल्पनमिति न तेन व्यवधानम्। उपकारोऽपि न व्यवधायकः किञ्चित्कारकरूपत्वात्। न चैवं परमापूर्वेऽपि यजेर्वृत्तिमङ्गीकृत्य स्वर्गस्यापि क्रियाफलता वाच्या। अपूर्वस्य प्रत्ययार्थत्वेन तत्र धातोर्वृत्त्यभावात् इष्टफलसाधने धातोर्वृत्तिर्नेष्टफले। इष्टफलं त्वपूर्वं न स्वर्गः। स्वर्गो नियोज्यविशेषणतया साध्योऽपि न फलमिति तत्र तत्रातिक्षुण्णोऽयमर्थः युक्तं चैतदित्याह—अत उक्तमिति । ननु

करणतातु कर्तृव्यापारगोचरस्य यागस्यैव फलापूर्वप्रतीत्य-पूर्वाधीनमेव करणत्वं, ततएवापूर्वे फले पुरुषे च यागस्य शेषता कामिकार्यान्वयमूलत्वात् पदद्वयमात्रनिमित्तमित्युक्तम् षष्ठाद्ये ।

अत एवात्राधिकारापेक्षिणी श्रुतिरित्युक्तम् । नियोज्यत्वे-नान्वयं श्रुतिर्बोधयन्ती नैयोगिके मूलमित्यर्थः । एवं चापूर्वभावनैव स्वर्गभावनापर्यन्तेति, स्वर्गो यागफलं, न तु क्रियाफलविधया । एवमपूर्वफलैकलोकीभावेनस्वर्गस्य कामि कर्तृगामितां प्रमितां नियोगादात्मनेपदं द्योतयति, इति लिङ्गंतत् । यत्फलं प्रमितं-तत्कर्तृगामीत्यात्मनेपदं न प्रापकम् । न च काम्यसाधनतानि-योगान्न कामिगामितापीति वाच्यम्[यतः]यथाकाम्यता तथा-

---

तत्क्रियाफलमपूर्वं किं कारकमाश्रित्योत्पद्यत इत्यत्राह—तदपूर्वमिति । नन्वेव-मात्मगतादृष्टजनकत्वेन यागादेरात्मसंस्कारकत्वं स्यादित्यत्राह—इति स्वी-कृतेऽपीति। आत्मनो यागसंस्कार्यत्वे प्रमाणाभावात्। यथा चैतत्तथा कर्मा-रम्भनये व्यक्तीकरिष्यामः ।

नन्वेवमपि क्रिया स्वर्गप्रत्यपूर्वद्वारा साधनसाधनमेव स्यात् न साधनमिति गूढाभिसन्धिश्चोदयति—नन्विति। अभिप्रायमबुद्ध्वा परि-हरति—सत्यमिति। इदानीं चोद्यवादी स्वाभिप्रायं विवृणोति—नन्वेवमिति। कामी स्वकाम्यसाधनमेव कार्यतयाऽवैति न साधनसाधनमिति न साधन-साधनत्वं कार्यत्वानुगुणमित्यर्थः। नैवमिति। स्वर्गकामो यजेतेति तावत् स्वर्गकामस्य यागः कार्यतयाऽवगम्यते। स च कालान्तरभाविनि फले साक्षात्साधन भूतकार्यान्तिर्भावं विना साधनसाधनत्वं स्वीयमनासादयन् कामिकार्य एव न भवतीति साधनसाधनत्वं कामिकार्यत्वानुगुणमेव। नन्वेवं कारणत्वमपि यागस्य न स्यात् अपूर्वव्यवधानादित्यत्राह—करणता त्विति। साधनत्वमेव व्यवहितं न करणत्वं कृतिव्याप्यत्वादित्यपूर्वाधिकरणे प्रतिपादितम्। नन्वेवमपि फलकरणत्वं केनावगम्यते न तावत् स्वर्गकाम-पदेन । तस्यनियोज्यान्वयोपक्षीणत्वात् नापि यजेतेत्यनेन. तस्य विषयान्वय परत्वात्। नापि पदद्वयान्वयरूपवाक्येन, तस्य विषयनियोज्यान्वित कार्य-प्रतीति परत्वात् तत्राह—इत्यपूर्वेति।

अयं भावः—स्वर्गकामो यजेतेति कृतिसाध्यतयाऽपूर्वं लिङाऽभि-धीयते। कृतिसाध्यत्वं चापूर्वस्याव्यापाररूपस्य व्यापारभूतयागान्तर्भावे-

ऽऽक्षेपः। प्रीतिर्हि स्वगततयैव काम्या कमिश्रुतिमात्रादिति स्वगतैवाक्षिप्यत इति फलमधिकार्यर्थं फलितयैव यजमानादेः कर्तृतेति सिद्धं सूत्रत्रयम्। अर्थात्प्राकरणिकमपि शेषत्वं (सेत्स्यतीति)।

वृत्तिकृता बादरिमतव्याख्या दुष्टेति वक्तुं तद्व्याख्यैवोक्ता भाष्ये। सहि द्रव्यादिषु स्वशेषान्तरानपेक्षशेषत्वं, यागादेस्तु स्वशेषान्तरापेक्षमिति विवेको बादरेरिति व्याचष्टे, तन्न। स्वशेषान्तरानपेक्षशेषत्वं उभयत्र स्वसामग्री तूभयत्रापेक्षितेति

नेति कृत्यपूर्वसंसर्गं घटयन् यागो विषयतयाऽन्वेति। सा च कृतिः स्वर्गकाम (पद)समभिव्याहारात् स्वर्गकामस्येति स्वर्गकामकृत्यपूर्व संसर्गवटनं स्वर्गसाधनभूतस्यैव योग्यं नान्यस्येति स्वर्गकामकृतिसाध्यतयाऽभिधीयमानमपूर्वं स्वाभिधानसिद्ध्यर्थं यागस्य स्वर्गं प्रतिकरणत्वमाक्षिपति इति फलकरणीभूतस्यैव विषयत्वम्। ततश्च विषयतयासन्निहितस्यैव स्वर्गं प्रत्यपि कारणत्वमाक्षिपतीति फलापूर्वे प्रति यागस्य करणत्वमपूर्वाधीनमेव। ततश्च लिप्सासूत्रे निपुणतरं वक्ष्यति। एवं च यागस्याप्यपूर्वफलपुरुषेषु शेषत्वमौपादानिकमेवेत्याह—तत एवेति। नन्वेवं फलंप्रति यागस्य शेषत्वस्यौपादानिकत्वे कथं षष्ठाद्ये पदनिमित्तकत्वमुक्तमित्यत्राह—कामिकार्येति। यद्येवं कथमस्मिन्नधिकरणे अधिकारापेक्षिणो श्रुतिरिति श्रौतत्वं शेषत्वस्योक्तमित्यत्राह—अत एवेति। नियोज्यान्वयमूलत्वान्नैयोगिकस्य नियोज्यान्वयं बोधयन्ती श्रुतिः नैयोगिकशेषत्वे मूलमित्यर्थः।

नन्वेवमपूर्वस्यैव यागफलत्वं न स्वर्गस्य अपूर्वव्यवधानादिति शङ्कामात्रमुपसंहारव्याजेनापनुदति—एवं चेति। अत्र भाष्यकारेण फलं च पुरुषार्थत्वादित्यत्र कथं फलस्य पुरुषं प्रतिशेषत्वमित्याशङ्क्य आत्मनेपदश्रुतिबलादित्युक्तम्। तन्नियोगावगतस्य द्योतकत्वेनोक्तम् न प्रापकतयेत्याह—एवमिति। यागस्य स्वर्गं प्रति साधनत्वमात्रं नियोगादाक्षिप्यते न तु काम्यस्य कामिगततापीति न च वाच्यमित्याह—न चेति। कुतो न वाच्यमित्यत्राह—यत इति। तथापि किमित्यत्राह—इति प्रीतिर्हीति। नन्वात्मशब्दप्रयोगाभावे कथं स्वगततया काम्यतेत्यत्राह—कमिश्रुतिमात्रादिति। परशब्दप्रयोगाभावे कमिश्रुतिमात्रात् आत्मशब्दप्रयोगाभावेपि स्वगततयैव काम्यतेति तथैवापूर्वेणाक्षिप्यत इति फलमधिकार्यर्थं पुरुषस्यापि कर्मार्थत्वमाह—फलितयैवेति। यदुपोद्घातत्वमस्याधिकरणस्य तत्प्रामाणिकं शेषत्वं फलयाग पुरुष-

विभागाभिप्रायं बादरिमतं मन्दम्। अतोवृत्तिकारस्याज्ञानमेव मन्दताचेयं स्फुटेति नोद्घाटिता भाष्ये। विवरणोक्तं यथा-निबन्धनं नेयम्।

।। तेषामर्थेन सम्बन्धः ।।७।।

परस्य बादरेरज्ञत्वप्रसाधनमुखेन प्रतिज्ञासम्यक्त्वमुक्त्वा। श्रुत्यादि सचिवकार्यगम्यशेषविशेषा वाच्या इति ज्येष्ठश्रुति-शेषत्वमवान्तरसङ्गतमिति तदुच्यते। ऋजु विमलायां पूर्व-पक्षसंक्षेपः। तुषकणविमुक्तेरधिकारनिरपेक्षाया अपि साध्य-

---

शेषत्वप्रतिपादनेन तुल्यन्यायतयाऽर्थात् सेत्स्यतीत्याह—अर्थादिति।

अत्र भाष्यकारो वृत्तिकारकृतां बादरिव्याख्यामुपन्यस्यति स्म। तत्र कोऽभिप्रायः ? न तावद्दूष्यत्वेन, दूषणानुपादानात् नापि व्याख्यान्तरतया स्वीकार्यत्वेन, अयुक्तत्वेनास्वीकारार्हत्वादित्याशङ्क्य तदुपन्यासे युक्तिमाह—वृत्तिकारकृतात्विति। तद्व्याख्यास्वरूपंदर्शयति—स हीति। दूषणमाह—स्वशेषान-पेक्षमिति। द्रव्यादिषु यागादिषु चोभयत्र स्वशेषानपेक्षशेषता समाना, शेषशेषि किञ्चिदंशरूपस्वसामग्र्ययेक्षापि उभयत्र समानेति विभागाभिप्रायं बादरिमतं मन्दमित्यर्थः। नन्वेवंविधमन्दता भाष्यकारेण किमिति नोक्तेत्यत्राह—मन्दता चेयमिति। नन्वत्र विवरणग्रन्थे बादर्यवधारणमत्र निराक्रियते इति तस्यैवात्रव्युत्पाद्यत्वमित्युक्तम्। तत्कथमित्याशङ्क्य तदपि निबन्धनवन्नेय-मत्याह—विवरणोक्तमपीति।

तेषामर्थेन संबन्धः।

दर्शपूर्णमासाधिकारविधिसन्निधिसमाम्नातानि व्रीहीनवहन्ति व्रीहीन् प्रोक्षतीत्यादीनि-द्रव्यगतातिशयजनकानि द्रव्ययुक्तानि कर्माण्युदाहरणम्। तेषु सन्देहः—किं तान्याग्नेयादि सर्वकरणार्थानि उतकरणविशेषार्थानीति। तदर्थं सन्दिह्यते—किं तानि प्रयाजवदारादुपकारकाणि उत सन्निपत्योपकार-काणीति। अस्याधिकरणस्यावान्तर सङ्गतिमाह—परस्येति। यद्यपि श्रुत्यादि-गम्य शेषत्वप्रतिज्ञानन्तरं तदेव वक्तव्यं तथापि सम्यक् प्रतिज्ञातार्थस्यैव विचार्यत्वात् प्रतिज्ञासम्यक्त्वार्थं परस्य बादरे [रज्ञत्वं] प्रसाध्य श्रुत्यादि गम्यशेषत्वं वक्तव्यम्। तत्रापि लिङ्गादिभ्यः शीघ्रं प्रमापकत्वाच्छ्रुतेः तद्गम्यमेव शेषत्वं पूर्वं चिन्त्यमिति तदेव पूर्वमुच्यते। श्रुतेः शीघ्रप्रमापकत्वं

त्वसंभवात् तादर्थ्ये सत्यवघातादीनां अधिकारानुप्रवेशासंभवात् तदनु प्रवेशसिद्ध्यर्थं वरंप्रयाजादि तुल्यतैवाश्रीयताम्। प्रयाजाद्यवान्तरकार्यं ह्यधिकारापेक्षमेव कार्यमिति तादर्थ्ये सति युक्त एवाधिकारानुप्रवेश इति।

अयं भावः—साधिकारकार्यसहितमनधिकारमवघातादि तत्कार्यान्वयपरं, तद्यदि व्रीहीनिति द्वितीयाश्रुत्या अवघातस्य पदार्थान्वयाधीनतुषविमुक्तिः कार्यं स्यात् तदा व्रीहिस्वरूपगतं तच्छ्रुतमिति नापूर्वसाधनरूपान्वयीति नापूर्वानुगुणमवान्तरकार्यं तत्स्यात्। न च लक्षणया साधनपरो व्रीहिशब्द-अन्वयानुपपत्तेरभावात् श्रुत हानस्यायुक्तत्वात्। न च ग्राहकान्विततया व्रीहिस्वरूपान्वयानुपपत्तिः। अनीप्सितकर्माश्रयणादवघातगुणतया व्रीहिस्वरूपान्वयोपपत्तेः न चेप्सितत्वं मुख्यं, कर्ममात्रार्थत्वात्। लक्षणायामपि सा जघन्यसापेक्ष-

---

च श्रुतिलिङ्गाधिकरणे वक्ष्यते। एतेन प्राकरणिकशेषत्वोपोद्घातानन्तरं प्राकरणिकमेव शेषत्वं व्युत्पाद्यमिति यत्तन्निरस्तम्। तस्य श्रौताज्जघन्यतमत्वात्। एतेन श्रौतशेषत्वमाद्यपादार्थ इति सूचितम्। अत्र ग्रन्थोक्तं पूर्वपक्षमाह—ऋजुविमलायामिति। ननु व्रीहीनवहन्ति इति द्रव्यगततुषविमुक्तिसाध्यनिष्ठत्वेनावघातादीनां प्रतीतेः कथं प्रयाजादि तुल्यतया पूर्वपक्ष इत्यत्राह—तुषकणेति। अधिकारविधिगृहीतानां हन्त्यादीनामधिकारानुप्रवेशसिद्ध्यर्थं प्रयाजादि तुल्यत्वमेवाश्रयणीयम्। ननु व्रीहीनवहन्ति द्रव्य गतसाध्यार्थत्वे तद्द्वाराऽधिकारानुप्रवेशोऽस्त्वित्यत्राह—तादर्थ्ये सतीति। किमित्यधिकारानुप्रवेशो नास्तीत्यत आह—तुषकणेति। तुषकणविमुक्तेरधिकारनिरपेक्षाया अपि साध्यत्वं सम्भवति। लोके तथादर्शनात्। अतो नियोगानुप्रवेशसिद्ध्यर्थं प्रयाजादितुल्यत्वमेवाश्रयणीयमित्यर्थः।

ननु प्रयाजादितुल्यत्वेपि कथमधिकारानुप्रवेशः सिद्ध्यति? तदवान्तरकार्यस्यापि निरपेक्षसाध्यत्वादित्यत्राह—प्रयाजादीति। अधिकारापेक्षमेव प्रयाजाद्यवान्तरकार्यं साध्यं न स्वातन्त्र्येण, निरपेक्षतया प्रतीत्यभावात्। अतोऽवान्तरकार्यार्थत्वेपि नाधिकारानुप्रवेशहानिरिति प्रयाजादितुल्यतै-

प्रत्ययस्यैव पाशप्रयाजशेषादौ दृष्टा । अतो नियोगैक्याधीनं प्रकरणविनियोज्यत्वमास्थेयम् । उक्तयुक्तेः । श्रुतिशेषत्वानर्हमसंयुक्तं प्रकरणविनियोज्यमेवेत्याज्यौषधसान्नाय्यद्रव्यकसर्वयागार्थता । वार्तिककृता तु भाष्यार्जवादाज्यादि सर्वद्रव्यार्थतोक्ता । तत्रैवं पूर्वोत्तरपक्षरचना-अविचारितसिद्धे श्रौतेऽवघातादेर्व्रीह्यादिशेषत्वे, हन्तिपिष्यादिषु अपूर्वार्थत्वे च सिद्धे,

---

वेत्यर्थः । ननु हिरण्यं भार्यमितिवत् स्वतन्त्रपुरुषार्थ एवावघातादिः नाधिकारापूर्वान्वयीति कथं तदनुप्रवेशसिद्ध्यर्थं प्रयाजादितुल्यत्वमाश्रीयत इत्यत्राह—अयं भाव इति । युक्तं सुवर्ण भरणादेः स्वतन्त्रपुरुषार्थत्वं कस्यचिदप्यधिकार विधेः प्रकरणे पाठाभावात् । अवघातादेस्तु दर्शपूर्णमासाधिकारविधिसन्निधिसमाम्नानात् तत्कार्यान्वयपरत्वमवगम्यत इति युक्तं तत्सिद्ध्यर्थं प्रयाजादितुल्यताश्रयणमित्यर्थः । नन्वत्र पदसन्दर्भात् क्रियाकारकसम्बन्धः प्रतीयत इति व्रीहीनवहन्तीति श्रुत्याऽवघातस्य पदार्थान्वयादिना तुषविमुक्तिरेव कार्यं युक्तमिति तद्द्वारा अधिकारापूर्वान्वयोऽस्तु इत्याशङ्कामपनुदति—यदीति । अस्यार्थः—सत्यमवघातादेः पदार्थान्वयवशात् तुषविमुक्तिः कार्यमवगम्यते तथापि न तद्द्वारा नियोगान्वयनिर्वाहः तस्या व्रीहिस्वरूपात्रयित्वेन श्रवणान्न परमापूर्वानुगुण्यमिति नावघातादेः तदर्थत्वं युक्तम् ।

ननु यद्यपि श्रुत्या व्रीहिशब्दो व्रीहिस्वरूपमेवाह तथापि लक्षणया अपूर्वसाधनपरोऽस्त्वित्यत्राह—न चेति । तत्र हेतुः—अन्वयेति । वाक्यार्थभूतावघातेन व्रीहिस्वरूपस्यान्वयानुपपत्त्यभावेन श्रुतार्थहानायोगात् अवघातस्य ग्राहकान्विततया व्रीहिस्वरूपेणान्वयोऽनुपपन्न इति न शङ्कनीयमित्याह—न चेति । कुत इत्यत्राह—अनीप्सितेति । अवघातं प्रति गुणत्वेन व्रीहिस्वरूपस्यान्वयो नानुपपन्नः । नन्ववघातगुणत्वमेवानुपपन्नं व्रीहीनितिद्वितीयया साध्यत्वावगतेरित्यत्राह—अनीप्सितेति । नन्वेवमपि श्रुतहानमेव ईप्सित द्वितीयाया मुख्यत्वादित्यत्राह—न चेप्सितमिति । क्रियाजन्यफलभागित्वरूपकर्मत्वमात्रस्यैव द्वितीयार्थत्वात् नेप्सिते द्वितीयाया मुख्यार्थत्वं किन्तुस्वतः प्रथमावगतत्व मात्रं तस्य न त्वनीप्सिते लक्षणेत्यर्थः । अङ्गीकृत्यापिलक्षणां प्रातिपदिक लक्षणातः प्रत्ययलक्षणैव ज्यायसी पाश प्रयाजशेषादौ दृष्टत्वादित्याह—लक्षणायामपीति ।

अत्र पाशोक्तिरनास्थया प्रयोगसाधुत्वस्य तत्र तत्रोक्तेः प्रत्ययार्थस्य चरमप्रतीतत्वात् प्रातिपदिकार्थसापेक्षत्वाच्च प्रातिपदिकार्थस्य प्रथमप्रतीत-

साक्षात्फलवदपूर्वार्थत्वलोभात् तन्निष्पादकद्रव्यपरा व्रीहिश्रुतिरित्याज्यौषधसान्नाय्येष्वप्यवघातः । तुषविमुक्तिरव्यापिनीत्यदृष्टार्थता । सिद्धान्ते तु अन्तरङ्गलक्षणयाऽवान्तरापूर्वनिष्पादकपरा व्रीहिश्रुतिरिति तदौषध एवावघातः तद्द्वाराचावान्तरापूर्वार्थता । तदाह—

वाक्यभेदतदेकत्वसन्देहान्नात्र संशयः ।
परमावान्तरापूर्वप्रयुक्तत्वकृतो ह्यसौ ॥

त्वादन्यनिरपेक्षतया च प्रातिपदिकलक्षणातः प्रत्ययलक्षणैव ज्यायसीत्यर्थः । ननु प्रयाजादि तुल्यत्वे व्रीहीनवहन्तीति नावघातमात्र विधिः गुणस्यापि श्रवणात् नापि दध्नाजुहोतीतिवत् गुणानुरक्तकर्मविधिः कर्मस्वरूपस्यान्यतोऽप्राप्तेः । किन्तु व्रीहिविशिष्टावघातविधिः ततश्च गौरवं स्यादित्याशङ्क्याह—अत इति । अवगतनियोगान्वयोपपत्त्यर्थं अवघातादीनामाराद्दुपकारकतया प्रकरणविनियोज्यत्वमेव युक्तम् अन्यतोऽप्राप्तविषये गौरवमपि न दोषायेत्यर्थः नन्वसंयुक्तस्य प्रकरणविनियोज्यत्वात् श्रुत्यादिसंयुक्तस्यावघातादेः कथं प्रकरणविनियोज्यत्वमित्यत्राह—उक्तयुक्तेरिति । अत्र श्रुतिग्रहणमुपलक्षणम् लिङ्गादिविनियोज्यादावप्युक्तयुक्तेः समत्वात् । अतः श्रुत्यादिविनियोज्यत्वानर्हतया तदसंयुक्तत्वात् प्रकरणविनियोज्यत्वमेवेत्यर्थः । नन्वत्रभाष्ये व्रीह्यादिद्रव्यार्थत्वमेवावघातादेः पूर्वपक्षतयोच्यते तत्कथमित्यत्राह—इत्याज्यौषधेति । भाष्यस्थाज्यादि शब्दैः तत्तद्द्रव्यकयागा उच्यन्ते इति आज्यादिद्रव्यक सर्वयागार्थतैव भाष्यकारस्याभिप्रेतेत्यर्थः । आचार्योक्तौपूर्वोत्तरपक्षावनुभाषते—वार्तिककृतात्विति ।

अत्र भाष्यकारेण संशयोपन्यासवेलायां औषधे सान्नाय्ये आज्ये चेत्युक्तम् । तदा पूर्वपक्षवेलायां सर्वेषां तावत् आज्यौषधसान्नाय्यादीनां अपूर्वेण सहेत्युक्तम् । राद्धान्त वेलायामपि प्रथनादयो नाज्यसान्नाय्ययोः औषध एवेत्युक्तम् । अतो भाष्ये पूर्वापरपर्यालोचनया सर्वद्रव्यार्थतैव पूर्वपक्षे आर्जवेन प्रतिभातीत्यर्थः । ननु द्रव्यशेषत्वे सिद्धे तद्विशेषचिन्तोपपद्यते नान्यथा । अतः प्रकरणविनियोज्यत्वनिराकरणेन द्रव्यविशेषतैव साध्येति कथं तन्मते पूर्वोत्तरपक्षावित्याशङ्क्याह—अत्रैवमिति । व्रीहीनवहन्तीति द्वितीया श्रुतिबलात् व्रीह्यादिशेषत्वं हन्त्यादीनामविचारितसिद्धमेव बाधकाभावात् नियोगविषयत्वं च हन्त्यादीनां तानि द्वैधमित्यधिकरण एव निरस्तम् । अतः प्रकरणविनियोज्यत्वगन्धोऽपि नास्तीत्यविचारितसिद्धमेव

गुरुरिदं न मन्यते। परमापूर्वप्रयुक्तत्वेऽपि करणावान्तरव्यापारभूतोत्पत्त्यपूर्वभेदेनान्यथाकरणत्वादाग्नेयादीनां दृष्टानुगुण्याच्च प्रतिकरणं धर्माणां व्यवस्थोपपत्तेः। न चैवं उत्पत्त्यपूर्वप्रयुक्ततैवान्तरङ्गलक्षणया दीक्षणीयावाङ्नियमवदिति वाच्यम्। यत एव स्वापूर्वसाधनत्वापन्नदीक्षणीयानिविष्टोधर्मो न परमापूर्वकरणद्वाराऽन्वयीति न परमापूर्वस्येतिकर्तव्यतेति न तदपूर्वप्रयुक्तस्तद्धर्मः। अवघातादेस्तु परमा-

---

श्रौतं हन्त्यादेः द्रव्यशेषत्वम्। ननु द्रव्यमात्रशेषत्वेऽविचारितसिद्धेऽपि नियोगीय शेषतया द्रव्यसम्बन्धो व्युत्पाद्य एवेत्यत्राह—हन्ति पिंष्यादिष्विति। हन्तिपिंषि द्रव्यसङ्ख्यानयाभ्यामेव सन्निपातिनामप्यपूर्वार्थत्वं अपूर्वीय द्रव्यार्थत्वं सिद्धमेव द्रव्यस्वरूपमात्रान्वये अप्रयुक्त्यप्रामाण्यापत्तेः। अतो नात्र तदपि व्युत्पाद्यमित्यर्थः। नन्वेवं व्रीहीनित्यादिश्रुत्या व्रीह्यादिद्रव्य सम्बन्धएवावगम्यते कथं सर्वद्रव्यार्थतया पूर्वपक्ष इत्यत्राह—साक्षात्फलवदिति। अपूर्वार्थत्वाद्धर्माणां तदन्वयनिर्वाहायापूर्वीय द्रव्यपरा व्रीहि श्रुतिरिति आज्यादिष्ववघातः अन्यथा यवेष्ववघातो न स्यादित्यर्थः। ननु अवान्तरापूर्वार्थत्वेपि धर्माणामपूर्वार्थत्वमेव अतस्तदीयद्रव्यपरा व्रीहिश्रुतिरित्याशङ्क्याह—फलवदिति। फलवन्न्यायेन धर्माणां परमापूर्वार्थत्वमेव युक्तं नावान्तरापूर्वार्थत्वमित्यर्थः।

नन्ववान्तरापूर्वद्वारा परमापूर्वान्वयोऽस्त्वित्यत्राह—साक्षादिति। साक्षात्सम्बन्धसम्भवे परम्पराश्रयणमन्याय्यमित्यर्थः। ननु परमापूर्वीयत्वं स्रुगादि द्रव्याणामप्यविशिष्टमिति व्रीहिश्रुतिस्तत्परापि स्यादित्यत्राह—तन्निष्पादकद्रव्यपरेति। हविः प्रकृतिद्रव्यवाचिव्रीहिशब्दस्य हवीरूपनिष्पादकद्रव्यपरत्वमेव युक्तमित्यर्थः। ननु नाकिञ्चित्कुर्वतः शेषत्वमिति किञ्चित्कारतुषविमुक्तेराज्यादिष्वभावात् कथं तच्छेषता हन्तेरित्यत्राह—तुषविमुक्तिरिति। यदि दृष्टकिञ्चित्कारो नास्ति तर्ह्यदृष्टोऽस्त्वित्यर्थः। सिद्धान्तेत्विति। व्रीह्यादीनामाग्नेयाद्यवान्तरापूर्वनिष्पत्तिद्वारैव परमापूर्वनिष्पादकत्वम्। अतो व्यवहितं बहिरङ्गं परमापूर्वीयत्वं विहाय अन्तरङ्गमव्यवहितमवान्तरापूर्वीयत्वं स्वीकार्यमिति अन्तरङ्गलक्षणया अवान्तरापूर्वनिष्पादकपरा व्रीहिश्रुतिरित्यर्थः। नन्ववान्तरापूर्वीयत्वं आज्यादिष्वपि समानमिति चेत्तत्राह—इति तदौषध एवेति।

पूर्वकरणान्वयादाग्नेयादेरेव स्वोत्पत्त्यपूर्वद्वारेण परमापूर्व-करणत्वात् युक्तं परमापूर्वेतिकर्तव्यतात्वमिति फलतो न कोऽपि धर्मः आग्नेयाद्यपूर्वप्रयुक्त इति दर्शनरहस्यम् । अतः प्रयाजादि-तुल्यतयैव पूर्वपक्षरचना । यावच्छ्रुतिशेषत्वाक्षेपश्चायं लक्षणा-हेत्वभावस्य व्यापित्वात् । इह सिद्धे श्रुतिशेषत्वे "यैस्तुद्रव्यं चिकीर्ष्यते" इत्यत्र नापूर्वं हन्त्यादिष्वित्युक्तम् ।

अयमाशयः आग्नेयाद्यवान्तरापूर्वाणि तावद्भेदेन कर्तव्यतयाऽव-गम्यन्ते। तानि च तथा कर्तव्यानिभेदेनेतिकर्तव्यनामाकाङ्क्षन्ति। ततश्च-तत्तदवान्तरापूर्वसन्निधिश्रुतानि व्रीह्यादीनि तत्तदवान्तरापूर्वेण सम्बध्यन्त इति प्रकृतिकरणमवान्तरापूर्वधर्माणां व्यवस्थितत्वादाग्नेयावान्तरापूर्व-निष्पादकहविःप्रकृतिद्रव्यपरा व्रीहिश्रुतिः नान्यावान्तरापूर्वनिष्पादकाज्य-परेति तदौषध एवावघातः। ननु फलवदफलन्यायेन परमापूर्वार्थतावघातादेः। अतो बहिरङ्गत्वेपि परमापूर्वनिष्पादकद्रव्यपरैव व्रीहिश्रुतिरित्यत्राह—तद्द्वारा चेति। अन्तरङ्गलक्षणयाऽवान्तरापूर्वनिष्पादकद्रव्यपरत्वे व्रीहिशब्दस्य स्थिते तद्द्वाराऽवघातादेः अवान्तरापूर्वार्थतैव न परमापूर्वार्थता। फलवद-फलन्यायोहि श्रुतिवाक्योपनेयधर्मजात व्यतिरिक्तधर्म विषयः। किञ्च परमापूर्वीयद्रव्यपरत्वे आज्यादिष्वप्यवघातादृष्ट उपकारः कल्प्यः। अवान्तरापूर्वीयौषधद्रव्यपरत्वे दृष्टातुषविमुक्तिरेव कार्यम्। न हि दृष्टे सम्भवत्यदृष्टकल्पनं न्याय्यम्। आचार्योक्तं श्लोकमाह—तदाहेति। अत्र व्रीहीनित्याद्येकं वाक्यम् हन्तीत्याद्यपरमिति किं वाक्यभेदः किमैक्य-मित्त्याद्येवं प्राग्भिरुक्तसंशयो न सम्भवति मन्दत्वात् किन्तु परमावान्तरा-पूर्वप्रयुक्तत्व निवन्धनः। अथवा अत्र वाक्यशब्देन वाक्यस्यास्वारस्यमुच्यते। तदेकत्वशब्देन स्वारस्यं तत्रानीप्सितकर्मत्वाद्याश्रयणे अस्वारस्यं, ईप्सित-कर्मत्वे तु स्वारस्यम्। तथासति अयमर्थः—व्रीहीनित्यनीप्सितकर्मत्वाश्रयणेन प्रयाजादि तुल्यत्वं, किंवा ईप्सितकर्मत्वाश्रयणेन द्रव्यचिकीर्षया द्रव्यशेष-त्वमित्येवं सन्देहान्नात्र संशयः किन्तु द्रव्यशेषत्वे अविचारितसिद्ध एव। किं हन्त्यादि परमापूर्वप्रयुक्तं उतावान्तरापूर्वप्रयुक्तं इत्येवं परमवान्तरा-पूर्वप्रयुक्तत्वनिवन्धन एवात्र संशय इति।

गुरुरिदं नानुमन्यत इति। परमापूर्वप्रयुक्तत्वेपि धर्माणां प्रतिकरणं व्यवस्थोपपद्यत एव आग्नेयादीनां परस्परं विलक्षणकरणत्वात्। करण-वैलक्षण्यं च तत्तत्कारणावान्तरव्यापारभूतोत्पत्तिनियोगभेदात्। तद्भेदश्च द्रव्यदेवतारूपभेदभिन्न यज्यर्थभेदादिति यत्करणासंबद्धं यद्द्रव्यादि तत्

यदुक्तं 'ज्योतिष्टोमेन यजेत' इति शास्त्रेण यावद्याग-स्याधिकारसंबन्धो नावगम्यते तावत् विनियोगो न सिद्ध्यतीति सर्वत्र शास्त्रान्तरविहितं शेषीति साधयितुं, तत्कथं ? निबन्धने हि अनपेक्षसाधनद्वये शास्त्रभेदः । न च द्रव्ययागयोरनपेक्ष-साध्यद्वयम् ।

मैवम् । शास्त्रभेदान्तर्गतः क्रियाकारकाद्यन्वयो यस्य कार्ये निरूढः तं प्रति शेषित्वम् । अतो निरूढ्यर्थं पूर्वं कार्यनिवेशक-शास्त्रं वाच्यम् । एवं निविष्टानिविष्टतोपाधेः शास्त्रान्तर-व्यापार इत्यनुसन्धेयम् ।

राद्धान्तस्तु द्रव्यं तावदवघातादिषु द्वितीयासंयोगेन साध्य-

तत्करणनिष्पत्तिद्वारा परमापूर्वनिष्पादकं नान्यकरणनिष्पत्तिद्वारा । द्रव्य-संबद्धं च यदवघातादि द्रव्यसंस्कारकं तदपि यत्करणीयद्रव्यसम्बद्धं तत्करणीयद्रव्यसंस्कारद्वारा तत्करणं निष्पादयत् परमापूर्वं निष्पादयति। परमापूर्वप्रयुक्तत्वेपि प्रतिकरणं धर्माणां व्यवस्थोपपत्तेः न सर्वकरण द्रव्यार्थ-तारूप पूर्वपक्षसिद्धिरित्यर्थः । नन्वेवमाग्नेयाद्यवान्तरापूर्वप्रयुक्तताऽवघाता-दीनामन्तरङ्गलक्षणयास्यात् यथा मन्द्रं दीक्षणीयायामनुब्रूयादिति वाङ्निय-मस्य दीक्षिणीयापूर्वप्रयुक्ततेति शङ्का न कार्येत्याह—न चैवमिति । तत्र हेतुः यत इति। युक्तं वाङ्नियमस्य न परमापूर्वप्रयुक्तत्वं तदितिकर्तव्यतात्वा-भावात् । कथमितिकर्तव्यतात्वाभाव इत्यत आह—न परमेति । यत्करणद्वारा-ऽन्वयो यस्य पदार्थस्य न तत्रेतिकर्तव्यता । वाङ्नियमस्तु परमापूर्वकरणद्वारा-ऽन्वयो । वाक्येन दीक्षणीयासम्बन्धावगमात् दीक्षणीयायाश्च परमापूर्वं प्रति इतिकर्तव्यतात्वमेव न करणत्वं सोमयागस्यैव करणत्वात् करणत्वमस्या-वान्तरापूर्वं प्रत्येव । अतः करणत्वमव्यवहितस्वभावमिति तस्या अवा-न्तरापूर्वसम्बन्धित्वमन्तरङ्गम् । इतिकर्तव्यतात्वं तु करणव्यवहितमिति तस्याः परमापूर्वसम्बन्धीति कर्तव्यतात्वं बहिरङ्गम् । अतोऽन्तरङ्गलक्षणया मन्द्रं दीक्षणीयायामनुब्रूयादिति दीक्षणीयादिपदेनावान्तरापूर्वसम्बन्धित्व-स्यैव लक्षितत्वात् (द्वा)वङ्नियमोऽवान्तरापूर्वप्रयुक्त एव न परमापूर्वप्रयुक्त-इत्यर्थः ।

नन्वेवमवघातादेरप्याग्नेयाद्यवान्तरापूर्वप्रयुक्ततैव स्यादित्याशङ्क्य वैषम्यमाह—अवघातादेस्त्विति । साधिकारविधिसन्निधिसमाम्नातानां अव-

तया प्रतीयते। न च यस्यान्यत् साध्यं तस्यापूर्वविषयता। अन्योन्याननुगुणसाध्यद्वये वाक्यभेदापत्तेः। न च नियोज्यविशेषणतया आनुगुण्यम्। अकारकं हि नियोज्यविशेषणम्। तत्रेयं युक्तिः सत्तया न कारकं विशेषणम्।

नियोज्यान्वयाधीनानुष्ठानाद्धि क्रियायोगात् कारकतया सत्ता नान्वयकाले। न च साध्यतया विशेषणम्। क्रियाकाले हि कारकं, न तन्नियोगसाध्यत्वार्हं, कर्मकारकं तु क्रिया-

---

घातादीनां स्वतः प्राप्त परमापूर्वेतिकर्तव्यतात्वमेव युक्तम्। तदीयकरणान्वयात् आग्नेदिरेव स्वोत्पत्त्यपूर्वं परमापूर्वं च प्रत्यपि करणत्वात्। अतः परमापूर्वेवा[पूर्व एव]आग्नेयादेः करणत्वमव्यवहितमिति नान्तरङ्गत्व बहिरङ्गत्वकृतो भेद इति स्वतः प्राप्तपरमापूर्वसम्बन्धित्वमेव व्रीह्यादि पदैः लक्षयित्वा परमापूर्वप्रयुक्ततैवावघातादेर्युक्तेत्यर्थः। ननु साधिकार विधिसन्निधिसमाम्नातत्वेपि यथा वाङ्नियमस्य दीक्षणीयापदश्रुतेरवान्तरापूर्वप्रयुक्तत्वं तथा व्रीहीनवहन्तीति व्रीह्यादिश्रुतेरवघातादेरपि व्रीह्यादिद्रव्यकरणावान्तरापूर्वप्रयुक्तत्वं किमिति न भवतीत्यत्राह— इति न फलत इति। इत्युक्तेन प्रकारेण आरादुपकारकाङ्गसङ्गि व्यतिरिक्तसर्वधर्माणां परमापूर्वप्रयुक्ततैवेत्यनयोक्त्या फलत इदमुक्तं भवति न कोऽपि द्रव्यदेवतारूपोधर्मः आग्नेयाद्यपूर्वप्रयुक्त इति। अतोऽवघातादेः व्रीह्यादिसम्बन्धेऽपि नावान्तरापूर्वनिवेशः तस्यापि परमापूर्वार्थत्वादित्यर्थः। ननु आरादुपकारकाङ्गसङ्गिनो वाङ्नियमादेः परमापूर्वेतिकर्तव्यतासम्बन्धित्वेऽपि न यथा परमापूर्वप्रयुक्तत्वं तथा व्रीह्यादिरूपसन्निपात्यङ्गसङ्गिनोऽवघातादेः परमापूर्वेतिकर्तव्यतासम्बन्धित्वाविशेषात् कथं परमापूर्वप्रयुक्तत्वं? किञ्च परमापूर्वं प्रत्याग्नेयादेः करणत्वमवान्तरापूर्वव्यवहितं अवान्तरापूर्वं प्रति तु अव्यवहितमिति कथमन्तरङ्गत्वरूपो भेदो नास्तीत्याशङ्क्याह—इति दर्शन रहस्यमिति।

इदमत्राकूतम्—नवमाद्याद्यधिकरणपञ्चकेन सर्वधर्माणामपूर्वप्रयुक्तत्वस्य स्थापितत्वात् व्रीह्यादिसङ्गिनोप्यवघातादेः न तन्मात्रनिष्ठत्वमिति युक्तं तेषां परमापर्वप्रयुक्तत्वं आरादुपकारकाङ्गसङ्गिनो नियमादेः तदवान्तरापूर्वप्रयुक्तत्वेन अपूर्वप्रयुक्तत्वस्याविरोधाद्युक्तं परमापूर्वप्रयुक्तत्वम्। परमापूर्वसन्निधिपाठस्तु परम्परया सम्बन्धेनापि (अ)सङ्ग्राह्य इत्यवधेयम्। तथा आग्नेयादेः परमापूर्वं प्रति साधनत्वमवान्तरापूर्वव्यवहितं न

फलतयैव नापूर्वसाध्यमिति नानुगुण्येन द्वितीयोक्ते साध्येपि अवघातादेर्विषयता । विषयत्वसंभवे हि स्ववाक्यस्थनियोग-लाभान्नियोगान्वयार्थं नियोगीयावस्थां व्रीहिशब्देन लक्षयित्वा नियोगापेक्षित स्वीयद्रव्यसंस्काराद्वाक्यान्तरस्थनियोगनिवेशो नापेक्ष्यते । असति तु स्ववाक्यलाभे ग्राहकान्वयनिर्वाहाय तदीयद्रव्यसंस्कारद्वारता युक्ता ।

एवं च ग्राहकीयावस्थस्य व्रीहिरूपेणान्वयायोग्यता । स्वरूपान्वयेहि स्वतो द्वितीयावगतभीप्सितत्वं भाव्युपयोगिनः संभवदपि हेयम् । ग्राहकान्वयनिर्वाहानुगुणं लब्धद्वारं च हेयम् । अत्यन्तादृष्टमन्यत् कल्प्यम् । अन्यनिष्ठस्य विषयत्वं

करणत्वं अपूर्वभावनायामेव करणत्वात् । भावनाकरणत्वं चाव्यवहितमि-त्यपूर्वाधिकरणे निपुणतरमुपपादितम् । न च साधनत्वव्यवधिस्तन्त्रं करणद्वारत्वादितिकर्तव्यतासम्वन्धस्येति ।

अत्र पूर्वाचार्यश्लोकौ भवतः—

परमावान्तरापूर्वकरणत्वं न भिद्यते ।
आग्नेयेनेव हन्त्यादेः परमापूर्वशेषता ॥
दीक्षणीयाङ्गकार्यस्य करणत्वमपीयुषः ।
इतिसाधनताभेदात् अन्तरङ्गस्य लक्षणा ॥
ज्यायसीत्यङ्गकार्येण प्रयुक्तो वाग्यमो मतः ॥

ननु भाष्याक्षरविरोधात् प्रयाजादितुल्यतया कथं पूर्वपक्ष इत्यत्राह—अत इति । भाष्याक्षरविरोधस्तु ग्रन्थ एव परिहृत इति भावः । ननु यथा ग्रहं सम्मार्ष्टीत्यादौ सम्मार्गादेर्ग्रहादि शेषत्वं तथा व्रीहीनवहन्तीति व्रीह्यादि शेषत्वमवघातादेरस्तु कथं प्रयाजादितुल्यतेत्यत्राह—यावच्छ्रुतीति । तत्र हेतुः—लक्षणेति । एवं च निबन्धनमतेपि विवरणमतवन्न केवलं दृष्टार्था-वहन्त्यादिमात्रमत्रोदाहरणं किन्त्वदृष्टार्थप्रोक्षणादिकमपीत्यवगन्तव्यम् । ननु तानि द्वैधमित्यत्रावहन्त्यादीनामपूर्वाविषयत्वमुखेन द्रव्यशेषत्वं साधितमित्यत्राह—इह सिद्ध इति । इह श्रुत्याऽवघातादीनां द्रव्यशेषत्वे सिद्धेपि तानि द्वैधमित्यत्र द्वितीयाश्रुतिमतन्त्रीकृत्यापूर्वविषयत्वमाशङ्क्य तन्निरा-करणं कृतमित्यपुनरुक्तमित्यर्थः ।

अत्र ग्रन्थकारेण सोमेन यजेतेति द्रव्यविशिष्टविधावपि यागः शास्त्रा-

स्वविरुद्धं कल्प्यमिति न्यायसंपादनाल्लक्षितं योग्यं, न श्रौतं स्वरूपमित्यनुपपत्तिर्लक्षणाबीजमिति सिद्धं ग्राहकानुगुणप्रत्ययात् तु प्रातिपदिकेलक्षणेतीह पाशवैषम्यम् ।

विवरणे तु मानान्तरवेद्यतण्डुलादिकार्ये अवघातादिविनियोगे विधिरनर्थक इति व्रीह्यादेरेव अवघातादिषु विनियोगः अवघातादेः प्रयाजादिवद्विनियोगः । एवं च दृष्टकार्येषु पूर्वः पक्षः । पदार्थान्वयमात्राद्व्रीहिशेषतावघातस्येतिपूर्वं राद्धा-

---

न्तरविहित एव शेषः [षो] ज्योतिष्टोमेन यजेतेति शास्त्रान्तरेण यागस्य (टीका) [फल] सम्बन्धितयाऽवगतत्वादित्युक्तम् । तदनुभाष्य तदनुपपन्नमित्याक्षिपति—यदुक्तमिति मैवमिति । शास्त्रभेदान्तर्गत क्रियाकारकान्वयो यस्य कार्ये निरूढः तं प्रत्यनिरूढस्य शेषत्वम् । अतः शेषिणो निरूढयर्थं पूर्वं कार्यनिवेशक शास्त्रं प्रेरणादिविषयतया कार्यान्वयापादकशास्त्रं वाच्यम् । तदर्थं ज्योतिष्टोमेन यजेतेति शास्त्रान्तरत्वेनोक्तम् । ननु परस्परनैरपेक्ष्याभावात् कथं शास्त्रान्तरत्वमित्यत्राह—एवमिति । सत्यं परमार्थतः शास्त्रभेदो नास्ति तथाप्यौपाधिकं शास्त्रान्तरत्वमित्यर्थः । एवं तर्हि शास्त्रभेदस्य कथं शेषत्वहेतुत्वं तत्राह—इत्यवधेयमिति । स्वहेतुद्वारा व्यवस्थितशेषत्वहेतुत्वविधया शास्त्रभेदस्य हेतुत्वं ग्रन्थोक्तमित्यर्थः ।

राद्धान्तस्त्विति । अवघातादीनां प्राकरणिकत्वं नोपपद्यते आरादुपकारितया हि तद्भवति । न च [स च] स्ववावयेऽपूर्वसद्भावे न [स]चावहन्त्यादीनां विषयत्वे सति । इह विषयशून्येन लिङ्शब्देनानभिधानात् विषयत्वं चावघातादीनां नोपपद्यते यस्मात्तेषु द्वितीया संयोगेन द्रव्यं साध्यतया स्वतः प्रतीयते । तावच्छब्देन स्वतस्त्वमुच्यते । ततः किमित्यत्राह—न चेति । कुत इत्यत्राह—अन्योन्येति । यथा स्वर्गस्य नियोज्यविशेषणतयाऽऽनुगुण्यं तथाऽत्रापि स्यादिति न च वाच्यमित्याह—न च नियोज्येति । कुतो न वाच्यमित्यत्राह—अकारकं हीति । कारकव्यतिरिक्तं हि नियोज्यविशेषणं न कारकमित्यर्थः । ननु कारकस्य नियोज्यविशेषणत्वासम्भवे कायुक्तिरित्यत्राह—अत्रेयमिति । किं कारकं सत्तया नियोज्यविशेषणं जीवनादिवत्, किं वा साध्यतया स्वर्गादिवत् । न तावदाद्य इत्याह—सत्तयेति । कुत इत्यत्राह—नियोज्येति । यस्मान्नियोज्यान्वयाधीनतदुत्तरकालभाव्यनुष्ठानात् क्रियायोगात् कारकतया सत्ता न नियोज्यान्वयकाले, तस्मान्न सत्तयाकारकं नियोज्यविशेषणमित्यर्थः । नापि द्वितीय इत्याह—न च साध्यतयेति । कुत

न्तोपक्रमे युक्तिः । राद्धान्तस्तु अपूर्वं साधनताऽवघातोत्पादिततण्डुलानामिति विधेरर्थवत्वे दृष्टद्वारतया विनियोगोनियोगापेक्षितः। नियमः प्रयोजनम् विधेश्शेषं मतद्वयेभाष्यव्याख्यादि च सुगमम् ।

॥ द्रव्यम् चोत्पत्तिसंयोगात् तदर्थमेव चोद्यते ॥११॥

अपरं वाचनिकं शेषत्वमुच्यते । पूर्वत्रएकपदश्रुतित एव

इत्यत आह - क्रियाकाले हीति । किं करणादिकारकस्य साध्यतयानियोज्य विशेषणत्वं किं वा कर्मकारकस्य ? नाद्यः हि स यस्मात् क्रियाकाले करणादिकारकं (तत्करणादिकारकं) न क्रिया साध्यनियोगसाध्यमिति न नियोज्यविशेषणार्हम् कर्मकारकस्य तु क्रियाफलतयैव न नियोज्यसाध्यतेति न नियोज्यविशेषणार्हतेत्यर्थः।

ननु माभूत् क्रियाफलतया कर्मकारकस्य नियोज्यविशेषणत्वं अधिकारिविशेषणत्वं तु द्वितीयावगतसाध्यत्वबलात् भवतु अध्ययनविधाविवार्थज्ञानस्याधिकारिविशेषणत्वमित्यत्राह—इति नेति । युक्तमध्ययनविधावर्थज्ञानस्याधिकारिविशेषणत्वं अनारभ्याधीतत्वादध्ययनविधेः अधिकारिव्यतिरेकेण विधिपर्यवसानाभावात् विधेर्विधित्वसिद्ध्यर्थमधिकारोऽङ्गीकरणीयः । तत्सिद्ध्यर्थं चाधिकारिविशेषणतया यथाजातमर्थज्ञानं विधिना स्वीक्रियते । नियोज्यविशेषणत्वं त्वन्यत एवानुष्ठानसिद्धेर्नाङ्गीकृतमिति प्रथमसूत्रे निपुणतरमुपपादितम् । अवघातादौ त्वारभ्याधीते अङ्गत्वादेवाधिकारपर्यवसानसिद्धेः नाधिकारापेक्षेति द्वितीयावगतत्वेपि साध्यत्वेनाधिकारिविशेषणतेति न कर्मकारकस्यानुगुण्येन साध्यतयाऽवघातादेर्विषयता। एतेन विवरणमतेन आधानसाम्यं निरस्तमित्यवगन्तव्यम्। ननु स्ववाक्यस्थनियोगेनान्वये सम्भवति परवाक्यस्थनियोगान्वयो व्रीह्यादि शब्देषु लक्षणावृत्त्यङ्गीकारेणायुक्त इत्याशङ्क्य विषयासम्भवेन स्ववाक्यस्थनियोगालाभे अवगत परवाक्यस्थग्राहकान्वयनिर्वाहाय द्रव्यसंस्कारकतैव युक्तेत्याह—विषयत्वेति । ननु व्रीहिस्वरूपस्यावघातान्वयोपपत्तौ कथं लक्षणेत्यत्राह—एवं चेति। ननु लक्षणैव दोषः अतस्तत्परिहाराय यथा स्वरूपान्वयोपपत्तिस्तथा वर्णनीयमित्याशङ्क्य स्वरूपान्वये दोषबाहुल्य दर्शनमुखेन न्यायसम्पादनात् लक्षितग्राहकीयस्यैवान्वय योग्यत्वं न स्वरूपस्येति मुख्याल्लक्षणैव ज्यायसीत्याह—स्वरूपान्वये हीति। अत्र यदुक्तं पूर्व-

अस्यकार्यमिदमितिधीः द्वितीया हि क्रिया फलभागित्वमेवाह । इदमस्य कार्यमित्येवं कार्यतश्शेषतोक्तेति द्वितीयान्तादेवेति निष्कर्षः । द्वितीया(त)एव शेषतेति श्रुतिर्द्वितीयात्मिकेति गीयते । तृतीयान्तादिपदेभ्यस्तु नेदमस्य कार्यमितिधीः । न च क्रियादिपदादपि तद्धीरिति पदद्वयश्रुतिरूपाद्वाक्यात् । अत एवारुणाधिकरणे पञ्चिकायामुक्तं "वाक्येन द्रव्याणां विनियोग-उक्त" इति । अत एवेदं पश्चादित्यवान्तरसंगतिः ।

पूर्वपक्षस्तु ग्राहकसन्निधिश्रुत स्फयादि द्रव्यं तद्विधि विधेयं द्वाररहितं तदर्थं द्वारापेक्षायां शक्यं दृष्टं द्वारं तदीयं ग्राहकोऽनुमन्यते न तु दृष्टविशेषनियमं, तदननुमतश्च न शास्त्रार्थं इति शक्तित एव व्यवस्था । ननु स्फ्येनोद्धन्तीति वाक्यानुरोधान्नियोगस्य दृष्टविशेषएवानुमतिर्युक्ता ।

पक्षे पाशानित्यादौ प्रातिपदिकलक्षणातः प्रत्ययस्यैवान्यथावर्णनं कृतं तदिहाप्यस्त्विति तत्परिहारमुपसंहारव्याजेनाह—इति ग्राहकानुगुणेति । विवरणेत्विति । तत्र पूर्वपक्षमाह—मानान्तरेति । तण्डुलादि दृष्टकार्यार्थतयाऽवघातादिविनियोगेऽवघातविधिरनर्थक एव । अवघातात् तण्डुलनिष्पत्तेः मानान्तरवेद्यत्वादत्रावघातविधेरर्थवत्त्वाय व्रीह्यादेरवघातादिषु विनियोगः। कथं तर्ह्यवघातादीनां अवगतनियोगैदमर्थ्यनिर्वाह इत्यत्राह—अवघातादेरिति । कथं तर्हि व्रीहीन् प्रोक्षतीत्यत्र पूर्वः पक्षः प्रोक्षणादिकार्यस्य मानान्तावेद्यत्वादित्यत्राह—एवं च दृष्टेति । अत्र सूत्रकारभाष्यकाराभ्यां राद्धान्तोपक्रममधिकरणं कृतम् । तत्र युक्तिमाह—पदार्थस्वरूपमात्रादिति । अविलम्बितप्रतीतेरिति भावः ।

राद्धान्तमाह—अपूर्वसाधनेति ।

यदि तण्डुलनिष्पत्तिद्वारा अवघातादेर्व्रीह्यादिशेषत्वे व्रीहीनवहन्तीति विधिरनर्थकः स्यात् प्रयाजादितुल्यतयाऽवघातादिविनियोगः । न चानर्थक्यं, अवघातोत्पादिततण्डुलानामेवापूर्वसाधनतेत्येवमपूर्वसम्बन्धितयाऽवघातविधेरर्थवत्त्वेन दृष्टद्वारतया विनियोगोपपत्तौ नादृष्टद्वारा विनियोगं नियोगोऽनुमन्यते दृष्टपक्षपातित्वान्नियोगस्येति । ननु लोकसिद्धमेवावघातस्य तण्डुलनिर्वर्तकत्वमादाय नियोगस्तण्डुलैरात्मसिद्धिमाक्षिपति । प्रयोजनाभावादित्यत्राह—नियम इति । नखविदलनादेरपि लोके तण्डुलनिर्वर्तकत्व

मैवं स्फ्यादेरुद्धननान्वयो वाक्यावगतोऽनुरुद्ध एव। अर्थवत्तानुरोधस्तु नियोगस्वरसानुरोधाद्युक्त एव। पक्षान्तरेऽपि द्रव्यश्रुतिर्व्यर्थेति तुल्यम् । एवं च साक्षाद्यज्ञेऽपि दृष्टसाधनत्वाद्यज्ञायुधानीत्यनुवादस्वारस्यम्। उत्पत्त्यपेक्षश्च वाक्यद्वाराऽन्वयः। उत्पत्तौ तु निरपेक्ष एव युक्तः।

दर्शनात् तन्निवृत्तिः नियोगस्यात्मसम्बन्धितयाऽवघातस्य तण्डुलनिर्वर्तकत्वाक्षेपप्रयोजनमित्यर्थः भाष्यव्याख्यादिग्रन्थ एव व्यक्तमित्याह शेषमिति।

दर्शपूर्णमासाधिकारविधिसन्निधौ स्फ्यादिद्रव्यमाम्नातम्। स्फ्यश्च कपालानि—यज्ञायुधानीति। तथा स्फ्येनोद्धन्ति कपालेषु श्रपयतीत्यादीनि द्वारविशेषान्वयपराणि वाक्यानि तत्रैवश्रुतानि। तत्र संशयः। किं स्फ्यादयः शक्यदृष्टमात्रार्थाः उतोद्धननादिवाक्यावगतदृष्टविशेषार्था इति। ननु श्रुतिशेषत्वानन्तरं ततोऽपिजघन्यलिङ्गशेषत्वं युक्तं वक्तुं, न तु लिङ्गतोऽपिजघन्यवाक्यशेषत्वं इत्याशङ्क्यार्थान्तरसङ्गतिमाह--अपरमिति। पूर्वत्र एकपदश्रुतिगम्यशेषत्वमुक्तं अधुना पदद्वयश्रुतिरूपवचनगम्यशेषत्वमुच्यते। तत्र श्रुतिप्रभेदत्वाल्लिङ्गतो बलवत्त्वम्। अतएवापरमित्युक्तम्। लिङ्गतोदुर्बलं वाक्यम् विनियोज्यमन्त्रगतसमभिव्याहारात्मकं लिङ्गतः पश्चादेवोच्यत इत्यर्थः। नन्वस्य वाक्यस्य श्रुतिप्रभेदत्वे कथं द्वितीयाश्रुतितो जघन्यता तत्राह—पूर्वत्रेति। अस्यार्थः-कार्यतो हि शेषत्वमवगम्यते श्रुत्यादीनि तु शेषत्व प्रतियोगितावस्थामुपस्थापयन्ति शेषत्वप्रमितौ कार्यसाचिव्यं भजन्ते। ततश्च पूर्वत्र व्रीहीनिति पदश्रुतित एव पदान्तरनिरपेक्षमेव इदमस्य कार्यमिति धीः। अतः कार्योपस्थापने पदान्तरनिरपेक्षत्वात् द्वितीयान्तपदश्रुतिः शीघ्रभाविनीति तद्गम्यशेषत्वं पूर्वमित्यर्थः। ननु कारकाणां कारकत्व- [न केवलमु] मुपाधिरेव लडादेरिव वर्तमानतातीततादि। अतो द्वितीयया क्रियाजन्यफलभागित्वे ज्ञाते शेषरूपा क्रिया किञ्चित्कार रूपं तज्जन्यफलं तद्भावि च शेषिरूपं कार्यं त्रितयं शेषत्वसामर्थ्यं पदान्तरं विना प्रतीयत एव।

नन्वेवं द्वितीयैव श्रुतिः स्यात् न (तु) द्वितीयान्तं पदं तस्या एव क्रियाजन्यफलभागित्ववाचित्वात् तत्राह—इदमस्येति। सत्यं क्रियाफलभागित्वं द्वितीयार्थः तथापि विभक्तीनां प्रातिपदिकार्थगत स्वार्थाभिधायित्वनियमात् प्रातिपदिकार्थ-

राद्धान्तस्तु द्रव्यश्रुतिषु द्वारान्वयो नाभिधानिकः । अभिधानलभ्यं च द्वारं नियोगानुमतिलभ्यम् । इह त्वभिधानलभ्यमपेक्षितं चोद्धननादि वाक्यस्थमेवानुमतम् । दृष्टान्तरं चार्थप्राप्तेनापि सेत्स्यति ।

द्रव्यश्रुतयस्तूत्पत्त्यर्थतयोपक्षीणा नाहत्यान्वयपरा इत्युभय्योऽपिश्रुतयोऽर्थवत्य एव । यत्रह्युत्पत्तिर्न पृथक् तत्र द्वारान्वय

स्यैव क्रियाफलभागित्वं द्वितीयाऽऽहेति तस्यैव कार्यत्वं न तु कार्यमात्रं शेषत्वे हेतुः, किन्तु निरूढम् इदमस्य कार्यमित्येवं कार्यतः शेषतोक्तेति निरूढकार्योपस्थापनार्थं द्वितीयान्तमेव पदं श्रुतिः न द्वितीयामात्रमित्यर्थः । नन्वेवं श्रुतिः द्वितीयात्मिकेति कथं प्रसिद्धिरित्यत्राह—इति निष्कर्ष इति । द्वितीयामूलत्वात् क्रियाफलभागित्व ज्ञानस्य तन्मूलत्वात्कार्यत्व श्रुति द्वितीयात्मिकेति प्रसिद्धिरित्यर्थः । ननु तृतीयान्तादि पदादपि क्रियानिर्वर्तकत्वेनाभिधानात् निर्वर्त्यक्रियारूप कार्य निर्वर्तकापेक्षैव शेष शेषितेति सर्वं समानमन्यत्राभिनिवेशादित्याशङ्क्याह—तृतीयान्तेति । आदिशब्दात् कपालेषु श्रपयतीत्यादि सप्तम्यन्तादिपदं गृह्यते । सत्यं तृतीयान्तादिपदेभ्यः क्रियानिर्वर्तकत्वे [धीः] तथापि तेभ्यो नेदमस्य कार्यमिति धीः किन्तु क्रियानिर्वर्त्यमेतदिति शेषप्रकारकप्रतीतिजननात् शेषपरमेवेदम् । द्वितीयान्तपदं तु क्रियाजन्यफलभागि कार्यमाहेति कार्यपरम् । कार्यसमर्पकतया च श्रुत्यादीनां प्रामाण्यमित्यसकृदुक्तम् । अतो द्वितीयान्तमेव श्रुतिः न तृतीयान्तादि ।

नन्वेवं उद्धन्ति इत्याख्यातात् कारकसाध्यतया प्रतीतेः कार्यरूपक्रियोपस्थापनात् आख्यातपदं श्रुतिः स्यादित्यत्राह—न च क्रियेति । सत्यं आख्यातात् साध्यावस्थक्रियाधीः तथापि नेदमस्य कार्यमिति धीः । इष्टफलसाधनतोपहित क्रियाक्षणनिचये धातोर्वृत्तेः फलसाधनतयैव क्रियाप्रतीतिः । ततः साधनत्वेऽवगते असाधितस्य साधनत्वानुपपत्तेः साधनत्ववशेन समभिव्याहृत कारकसाध्यतया पश्चात् प्रतीयत इति न कार्यत्व पुरस्कारेणाख्यातात् क्रियाप्रतीतिरिति नाख्यातपदं श्रुतिरित्यवधेयम् । यद्येवं कथं तर्हि स्फ्येनोद्धन्तीत्यत्र इदमस्य कार्यमितिधीरित्यत्राह—पदद्वयेति । पदद्वयश्रुतिरूपवाक्यतः तत्प्रतिपत्तिः नैकपदादित्यर्थः । युक्तं चैतदित्याह—अत इति । यत एवं पदद्वयश्रुतिरूपवाक्यगम्यमेव स्फ्येनोद्धन्ती-

श्रुतिरेव द्विपरेति । अयमिहातिभारो न स्यादिति लाभः । यज्ञायुधानीत्यनुवाद इति चातुर्थस्फ्याधिकरणे वक्ष्यते । तेनापुनरुक्तिः । अनुवादेचास्वारस्यमदोषः । उत्पत्तिद्वारान्वयश्रुतेः सापेक्षतापि तुल्या । विवरणे तु निरपेक्षतयैव द्रव्यश्रुतितो द्वारान्वयमुक्त्वा उत्पत्तिद्वारान्वयश्रुत्योर्मिथः सापेक्षतया राद्धान्तितम् ।

त्यत्र शेषत्वं अत एवैकश्रुतिगम्यशेषत्वादस्य जघन्यतेत्याह अत इदमिति । ननु स्फ्येनोद्धन्तीत्यादि वाक्येन स्फ्यादीनामुद्धननादिशेषत्वप्रतीतेः कथं शक्यदृष्टमात्रार्थतया पूर्वपक्ष इत्यत्राह—पूर्वपक्षस्त्विति । ग्राहकसन्निधौ द्वाररहितं स्फ्यादिद्रव्यं ग्राहकविधिविधेयमेव स्ववाक्ये विधेरश्रवणात् । ततश्च स्ववाक्ये विधिद्वाराश्रवणात् किं द्वारा ग्राहकान्वयीत्यपेक्षायां दृष्टद्वारं तदीयं ग्राहकोऽनुमन्यते दृष्टपक्षपातित्वात् । न पुनः दृष्टविशेष नियममपि । दृष्टान्तरार्थं साधनान्तरप्रयुक्तिकल्पनापत्तेः । ननु मा भूदनुमतिः श्रुतत्वादेवदृष्टविशेषार्थतास्त्वित्यत्राह – तदिति । ननु ग्राहकीयसर्वदृष्टार्थत्वे यदशक्यसम्पादनं स्फ्यादिना तत्रापि शेषत्वाङ्गीकारे अप्रवर्तकं शास्त्रं स्यादित्यत्राह—इति शक्तित एवेति । न हि दृष्टमात्रार्थत्वं, किन्तु शक्यदृष्टार्थत्वमित्यर्थः । ननु यथाविनियोगं नियोग इति विनियोजकवाक्यानुरोधेन नियोगस्य दृष्टविशेष एवानुमतिर्युक्तेति चोदयति—नन्विति ।

मैवमिति । प्राकरणिक सर्वं दृष्टार्थत्वमाह । (देवता) विधिना स्फ्यादेरुद्धननाद्यन्वयोऽपि आपादित एवेति उद्धननवाक्यानुरोधित्वं न भग्नमित्यर्थः । ननु दृष्टान्तरान्वये उद्धननादिवाक्यवैयर्थ्यं स्यादित्यत्राह—अर्थवत्तेति । ननु वाक्यवैयर्थ्यं परिहाराय नियोगानुमतिसङ्कोचो युक्त इत्याशङ्क्य सिद्धान्तेपि वाक्यवैयर्थ्यसाम्यमापादयति—पक्षान्तरेऽपीति । सर्वदृष्टार्थत्वे कदाचित् यज्ञरूपदृष्टं प्रति स्फ्यादेः साक्षात्साधनत्वात् । यज्ञायुधानीत्यनुवादस्वारस्यमपि पूर्वपक्ष इत्याह—एवं चेति । सापेक्षनिरपेक्षतया उत्पत्तिवाक्यावगतद्वाराऽन्वयो युक्तो न विनियोगवाक्यावगत इत्याह—उत्पत्त्यपेक्षश्चेति । नियोगापेक्षोभयत्र समानेति भावः ।

राद्धान्तस्त्विति । यथाद्रव्यश्रुतिषु शब्देन द्वाराऽन्वयोऽवगम्यते स्फ्य एवगृह्यते । न च द्रव्यश्रुतिषु द्वारान्वय आभिधानिकः । ननुमाभूदाभिधानिकः नियोगानुमतिबलात्तु लभ्यत इत्यत्राह—अभिधानालभ्यं चेति । यदि वाक्यान्तरेण द्वारविशेष-

अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात् ॥१२॥

श्रुत्या संस्कारशेषत्वानन्तरं पदद्वयश्रुतिरूपवाक्येन द्रव्यशेषतोक्ता गुणशेषता च वाक्याद्द्रव्यनिर्वाह्या चेति इदानीमेव चिन्त्यत इत्यवान्तर संगतिः। ननु गुणस्य वाक्याच्छेषता न क्रये। क्रयस्यास्मिन्नेव वाक्ये सोमशेषत्वप्रतीतेर्वाक्यभेदापत्तेः न च गुणस्य वाक्यात्सोमशेषता, करणत्वेन क्रियान्वयात्। मैवं, पदनिमित्तको ह्यन्वयो विरुद्धत्रिकद्वयापत्त्या वाक्यभेदहेतुः। शेषत्वं तु कार्यभेद-

---

सम्बन्धो नावगम्यते तदा नियोगो द्वारान्वयं कल्पयति। इह तूद्धननादि वाक्येन द्वारविशेषसम्बन्धावगमादपेक्षितत्वाच्च तदेव द्वारं नियोगानुमतं विनियोगानुसारित्वान्नियोगस्येत्यर्थः। ननु दृष्टान्तरार्थं साधनान्तर प्रयुक्तिकल्पना स्यादित्यत्राह-द्रव्यश्रुतयस्त्विति। ननु यत्र पृथगुत्पत्तिर्नास्ति व्रीहीनवहन्तीत्यादौ तत्र कथमुत्पत्त्यभावे विनियोग इत्यत्राह-यत्रहीति। नन्वेवं स्फयेनोद्धन्तीत्यादेरुभयपरत्वात् द्रव्यश्रुतेर्वैयर्थ्यं स्यादित्यत्राह—इत्ययमिति। इत्युभयश्रुतिसद्भावे अयंबाधो न स्यादिति लाभ इत्यर्थः। ननु चातुर्थस्फ्याधिकरणेनास्य पौनरुक्त्यं स्यादित्याशङ्क्य व्युत्पाद्य भेदप्रदर्शनेन परिहरति—यज्ञायुधेति। एतेन किं यज्ञायुधवाक्यं विनियोजकं किं वा उद्धननादिवाक्यमिति विनियोजकवाक्यविशेषचिन्तेयमिति यत्परैरुक्तं तत्प्रत्युक्तम्। अनुवादेचास्वारस्यं न दोषायेत्याह—अनुवादे चेति। पूर्वपक्षे उत्पत्तिद्वारान्वयश्रुत्योः निरपेक्षसापेक्षतया यद्वैषम्यमुक्तं तदपि नास्तीत्याह—उत्पत्तिद्वारतयेति। विवरणे निरपेक्षतया पूर्वपक्षमुक्त्वा उभयत्रापि सापेक्षत्वं समानमिति राद्धान्तितमित्याह—विवरणेत्विति।

अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात् ॥ १२ ॥

ज्योतिष्टोमे श्रूयते-'अरुणया एकहायन्या पिङ्गाक्ष्या सोमं क्रीणाति' इति। तत्र चिन्ता-किमारुण्यं कृत्स्नप्राकरणिकद्रव्यशेषः। उत क्रय एव शेषभूतं, अर्थादेकहायन्याश्रितं इति। ननु द्रव्यशेषत्वात् पूर्वं किमिति गुणशेषत्वं न चिन्तितम्। पदद्वयश्रुतिरूपवाक्यगम्यत्वाविशेषात्। अथ द्रव्यनिर्वाह्यत्वाद्गुणशेषत्वस्य निर्वाहकरूपद्रव्य शेषत्वमेव पूर्वं चिन्तयितुं युक्तमिति चेन्न, संस्कारविनियोगस्यापि द्रव्यविनियोगपूर्वकत्वनियमात् द्रव्यशेषत्वात्पूर्वं संस्कारशेषत्वं न

निमित्तकमेकस्मिन्नपि वाक्येऽनेकं युक्तं पदनिमित्तकस्त्वत्रान्वयः एक एव। तदुक्तम्—इह तु क्रय एक एव कर्मकरणावच्छिन्नः प्रतीयत इति। न चैवं सोमर्मिति निमित्तकर्मणोऽवच्छेदकत्वे क्रय-गुणता, न प्रणयनं गोदोह गुणः, नापि गोदोहनं तस्य, नहि राजपुरुष इत्यत्र राज्ञो गुणता प्राधान्याहानादेव विशेष्यधीरंजना-दिति कार्यतः कर्मार्थतैव क्रयस्य, क्रयार्थताऽरुणादेः। वाजपेय-

---

स्यादित्याशङ्क्य तेषामर्थाद्यधिकरणत्रयस्य यथाक्रममानन्तर्यं समर्थयन् अरुणा-धिकरणस्य सर्वजघन्यतयाऽवान्तरसङ्गतिमाह—श्रुत्येति। एकपदश्रुत्या शीघ्रतया संस्कारशेषत्वमभिधाय ततो जघन्येन पदद्वयश्रुतिरूपवाक्येन तदनन्तरं द्रव्यशेषत्व-मुक्त्वा वाक्यगम्यत्वात् द्रव्यनिर्वाह्यत्वाच्च गुणशेषता तदनन्तरमिदानीं चिन्त्यत इत्यवान्तरसङ्गतिरित्यर्थः। नन्वेकस्मिन् वाक्ये क्रयं प्रत्यारुण्यस्य शेषत्वं क्रयस्यापि सोमं प्रति शेषत्वं प्रमातुं न शक्यते प्रतियोगिरूपकार्यभेदेन शेषत्वरूपान्वयभेदात् विरम्यान्वयप्रतिपादने वाक्यभेदापत्तेः। न च गुणस्य वाक्यात् प्रयोजनभूते सोम एव शेषत्वं नाप्रयोजनक्रये। अतः प्रतियोगिकार्यभेदाभावात् नान्वयभेद इति न विरम्यान्वयप्रतिपादनमिति वाच्यम्। यतस्तृतीयाविभक्त्या आरुण्यस्य करणता-प्रतीतेः क्रयान्वय एव तस्य न सोमान्वय इति चोदयति—नन्विति। मैवमिति। अन्वितपदात्मकत्वाद्वाक्यस्य पदनिमित्तक एव द्वितीयान्वयो भिद्यमानः विरुद्धत्रिक द्वयापत्त्या वाक्यभेदमावहति न कार्यनिमित्तकः।

ननु तार्त्तीयशेषत्वमपि पदद्वयश्रुतिरूपवाक्यगम्यत्वेन पदनिमित्तकमेवेत्या-शङ्क्याह—शेषत्वंचेति। न हि पदद्वयश्रुत्या शेषत्वं गम्यते किन्तु कार्योपस्थितिः तया क्रियते उपस्थितं तु कार्यं शेषत्वमवगमयति अतः कार्यनिमित्तकमेव शेषत्वम्। तच्चैकस्मिन् वाक्ये कार्यभेदे अनेकं युक्तं, कार्योपस्थापकतयैव श्रुत्यादीनां शेषत्व-हेतुतेत्यसकृदुक्तम्। भवत्वेवं, अरुणया सोमं क्रीणातीत्यत्र किमायातमित्यत्राह—पदनिमित्तक इति। कथमैक्यमित्याशङ्क्य पञ्चिकोक्तं शाब्दान्वयैक्य प्रकारमाह—तदुक्तमिति। नन्वेवं कर्मणोऽवच्छेदकत्वे सोमस्य गुणभावोऽपि स्यादिति नाशङ्क-नीयमित्याह—न चैवमिति। कुतोनाशङ्कनीयमित्यत्राह—न प्रणयनमिति। न हि अवच्छेदकत्वमात्रेण गुणत्वं प्रणयनगोदोहनयोरन्योन्यावच्छेदकत्वेपि परस्परं गुण प्रधानभावाभावात्। ननु यत्र गुणप्रधानता नास्ति तत्रोभयावच्छेदकत्वं यस्य

वाक्यं त्वपूर्वपरम् न क्रयवाक्यवत्क्रियाकार्यपरं, अतो नापूर्ववाजपेयावच्छिन्नयागपरम् । किंतु स्वाराज्यकामापूर्वावच्छेदको यागः यागावच्छेदकं वाजपेयमिति विरुद्धत्रिकद्वयापत्तिस्तत्रयुक्तेति युक्तं स्थानान्तरोक्तम् । अरुणादीनां हि क्रय एव क्रियाकारकभावेनैदमर्थ्येन चान्वय इति ।

इहाप्युक्तं प्रयोजनवता सोमेन संबन्धार्थं क्रियाप्राधान्यमरुणैक-

---

तु प्रधानत्वमेव कर्मकारकस्य तस्य कथमवच्छेदकतेत्याशङ्क्य लौकिकदृष्टान्तेनोपपादयति—न हीति । एतदुक्तं भवति-प्रधानस्यापि विशेष्यधीरञ्जनेन प्रातीतिको गुणभावोऽस्त्येव । वास्तवगुणता तु प्राधान्य विरोधान्नास्तीति । तर्हि वास्तवी गुणता कस्य किं प्रतीत्याशङ्क्य उपसंहारव्याजेनाह—कार्यंत इति ।

ननु यद्यत्र कर्मकरणावच्छिन्नक्रयपरत्वेन वाक्यभेदपरिहारस्तर्हि वाजपेयेन यजेत स्वाराज्यकाम इत्यत्रापि न विरुद्धत्रिकद्वयापत्त्यावाक्यभेदः स्यात् । । तत्रापूर्ववाजपेयाधिकरणपूर्वपक्षोक्त विरोधः स्यादित्याशङ्क्य वैषम्यमाह—वाजपेयेति । यथाज्योतिष्टोमाधिकारविधिसन्निधिश्रुतं क्रयवाक्यं द्रव्यनिष्ठत्वात् क्रयस्य नापूर्वपरम्, किन्तु अङ्गभूत क्रियापरम् । न तथा वाजपेयवाक्यं क्रियापरम् अनन्यनिष्ठत्वाद्यागस्य अन्याधिकारानुप्रवेशाभावाच्च यागविषयकापूर्वपरमेव । अतोऽपूर्ववाजपेयोभयावच्छिन्नयागपरत्वं नास्तीत्यर्थः । ननु भवत्वपूर्वपरत्वं तथापि वाजपेययागोभयावाच्छिन्नमपूर्वं प्रतीयताम् । ततश्च पदनिमित्तकान्वये भेदोनास्तीत्याह—किन्त्विति । भावार्थभूतयागस्यैवापूर्वावच्छेदकत्वं न वाजपेयद्रव्यस्य तस्य तु यागावच्छेदकत्वमेव नादूर्वावच्छेदकत्वं, ततश्चापूर्वावच्छेदको यागो यागावच्छेदकं वाजपेयमितिपदनिमित्तकान्वयो भिद्यत एव । ननु क्रियाकारकान्वयवशेन वाजपेयविशिष्टस्य यागस्यापूर्वावच्छेदकत्वात् नान्वय भेद इत्यत्राह—स्वाराज्यकामापूर्वेति । फलशिरस्कापूर्वसाधनत्वाद्यागस्य नोत्पत्तिवाक्यवत् क्रियाकारकान्वयवशेन विशिष्टप्रतीतिरित्यर्थः । ननु वाजपेयाधिकरण पूर्वपक्षे फलं प्रति साधनत्वं यागस्य वाजपेयं प्रति साध्यत्वमिति फलसाधनत्वापेक्षया विरुद्धत्रिकद्वयमुक्तम् नापूर्वावच्छेदकतयेति शङ्कामपनुदति—इति विरुद्धेति । इत्येवं फलशिरस्कापूर्वावच्छेदकत्वं यागस्य यागावच्छेदकत्वं वाजपेयस्येति

हायन्यपेक्षं युक्तम् । अतो न प्रत्येकं वाक्यपरिसमाप्तिः । (अने) नहि गुणं प्रति प्रधानं क्रय इति उपदिश्यत इति । अन्यत्रतु यदुक्तमरुणादीनां क्रयसहितानां सोमे विनियोगमिच्छन्तीति तत्परम्परया सोमार्थत्वं टीकयोक्तम् । एवं चैकवाक्य प्रमेये शेषे शेषिणि च नियोगादेव साधनावस्था शेषिणो लक्षणीया तत्परपदाभावात् । सोमेन यजेतेत्यादावपि यागस्य साधनावस्था नियोगादेव लक्ष्या । नहि ज्योतिष्टोमचोदनया-

---

विरुद्धत्रिकद्वयापत्तिस्तत्र वक्तुं युक्ता । नान्यथा अवच्छेदकतयाऽन्वयस्यैव पदनिमित्तकत्वात् । फलसाधनत्वोक्तिस्तु कामाधिकारिफलं प्रति करणीभूतस्यैवापूर्वविषयत्वादित्यनुसन्धेयम् । एवं चारुणादीनां क्रय एव शेषत्वं न सोम इति यदुक्तं तद्ग्रन्थकारेणापि स्थलान्तर उक्तमित्याह—इति युक्तमिति । अत्र ग्रन्थे क्रय एवेत्येवकारेण आरुण्यस्य क्रय एव शेषत्वं नैकहायन्यां न सोमे एकहायन्यास्तु क्रय एव न सोमे ।

नन्वारुण्यस्य करण विभक्त्या क्रियाकारकभावेनैव क्रियान्वयोऽस्तु ऐदमर्थ्यं च एकहायन्यामस्त्वित्यत्राह– ऐदमर्थ्येन चेति । पदद्वय श्रुतिरूपवाक्ये कार्यरूपक्रियान्वयावगमादारुण्यस्य क्रय एव शेषत्वं प्रतीयते । तावताच ग्राहकपदार्थाम्नानयोश्चरितार्थत्वान्न विलम्बितं लिङ्गात् द्रव्यशेषत्वमपि कल्पयितुं युक्तम् । अवगत क्रयशेषत्वनिर्वाहस्तु द्रव्यगुणयोरन्योन्याकाङ्क्षाबलात् पार्ष्ठिकसम्बन्धाङ्गीकारेणैव सन्निहितक्रयार्थैकहायन्यवच्छेदद्वाराऽस्तु प्राप्तसोमोद्देशेन अप्राप्तद्रव्यगुणविशिष्ट क्रयविधौ गौरवमपि न दोषायेत्यनुसन्धेयम् । अरुणादीनां क्रय एव शेषत्वं न सोम इत्येतदत्रत्यटीकाग्रन्थेनावगम्यत इत्याह—इहापीति । आरुण्यादिकं प्रति क्रयस्यैव प्राधान्योक्तेरित्यर्थः । ननु सोमं प्रत्यपि क्रयस्य प्राधान्यँ स्यात् क्रयावच्छेदत्वात् सोमस्येत्याशङ्क्याह—प्रयोजनवतेति । सोमेन यजेतेति सोमस्य कार्यसम्बन्धित्वेन प्रयोजन परत्वात् तं प्रति क्रयस्य गुणत्वमेव न प्राधान्यम् । सोमस्य क्रयावच्छेदकत्वेपि प्रतीतिकरणत्वमेव । राजपुरुष इत्यत्र राज्ञ इव न वास्तवमित्यर्थः । यत एव क्रयं प्रति सोमस्य न गुणत्वमत एव क्रयोद्देशेन सोमोऽपि विधेयः आरुण्यमपीति न वाक्यभेद इत्याह—अत इति । तदेव प्रतिपादयति—न हीति । प्रतीति । गुणभूतं सोमं प्रति वस्तुतः प्रधानं क्रयो नोपदिश्यत इत्यर्थः । नन्वेवं तृतीयाद्योक्तेनारुण्यादीनां सोमे विनियोगमिच्छन्तीति विवरणटीकाग्रन्थेन विरोधः

धिकारान्वये ज्ञातेऽपि यागोत्पत्तिपरता सोमेन यजेतेत्यस्य त्यक्तेति नान्यलक्षणापरता। वाक्याधीनांशसाधनादेवमादिशेषत्वपरमिह संगतम्। नियोगीयांशस्तु पश्वेकत्वादिनयसिद्ध एव॥

श्रीकरस्तु श्रुतितः सोमार्थक्रयान्वये तन्मुखेन सोमशेषत्वादारुण्यस्य पदार्थान्तरान्तर्भावाद्वाक्यत इदमिति सङ्गतिमाह। तन्न; यथोक्तप्रकारे सति विस्तरभिया दोषान्तरं नोक्तम्। अत्र पूर्वपक्ष ऋजुविम-

---

स्यादित्याशङ्क्य परम्परया सोमसम्बन्धाभिप्रायोऽत्रच ग्रन्थे इति परिहरति—अन्यत्रेति।

नन्वेवमप्यारुण्यस्य क्रयशेषत्वमपि नोपपद्यते नियोगसाधनावस्थापक पदाभावात्। क्रीणातिपदं तु विधेय क्रयोपस्थापकमेवेत्यत्राह—एवं चेति। न केवलमत्रैवशेषिणः साधनावस्था नियोगाल्लक्ष्या। किन्तु विशिष्टविधौ सर्वत्रैवमित्याह—सोमेनेति। ननु तत्र किमिति नियोगः साधनावस्थावस्थापकः, ज्योतिष्टोमवाक्येनैव यागस्याधिकारसम्बन्धितया विधानात् उत्पत्तिवाक्यस्थ यजेतेत्यनेन लक्षणया नियोगसाधनावस्थायोग्योपस्थापनादित्यत्राह—न हीति। ज्योतिष्टोमचोदनायां सोमयागस्याधिकारान्वये ज्ञातेऽपि सोमेन यजेतेत्युत्पत्तिवाक्यस्य यागोत्पत्तिपरत्वं न त्यक्तम्। उत्पत्तिवाक्यसंभवे च उभयपरत्वेन तात्पर्यगौरवाङ्गीकारायोगात्। यत्र हि उत्पत्तिः न पृथक् सौर्यादौ तत्रागत्या उभयपरत्वमप्याश्रितम् तेन नोत्पत्ति वाक्यस्थ यजेतेत्यस्य साधनावस्थालक्षणपरता। अतो नियोगादेवात्रापि साधनावस्थोपस्थापनमित्यर्थः।

श्रीकरस्त्विति। द्वितीयाश्रुत्या प्रयोजनवत्सोमशेषभूतक्रयान्वय एवारुण्यस्य करणविभक्त्या प्रतीयते। ततश्च तन्मुखेन प्रयोजनवत्सोमशेषभूतत्वमेवारुण्यस्य न क्रयशेषत्वं, आरुण्यादिविशिष्टस्यैव क्रयस्य द्वितीयाश्रुत्या सोमशेषत्वात्। कथं तर्हि अरुणादीनां शेषत्वस्य वाक्यगम्यत्वोक्तिरित्यत्राह—पदार्थान्तरेति। स्वव्यतिरिक्तक्रयरूपपदार्थसापेक्षत्वेन वाक्यत इत्युच्यत इति। तन्नेति। आञ्जस्येनोपपन्ने यथोक्तप्रकारे अनाञ्जस्येनोपपादनं न युक्तमित्यर्थः। एतदुक्तं भवति-पदद्वयश्रुतिरूपवाक्येनारुणादीनां क्रयशेषत्वे वाक्यगम्यत्वोक्तिरञ्जसा घटते। सोममिति श्रुत्या सोमशेषत्वे तु तस्य द्वारभूत पदार्थान्तर सापेक्षत्वमात्रेण वाक्य

लायामुक्तः—युक्तमाकृतेरमूर्ताया अप्यध्यवसायहेतुतया क्रियां प्रति साधनत्वम्। गुणस्य तु न कथंचित्साधनत्वं घटते। ननु द्रव्योपादाने गुणस्योपयोगः न ह्यनवच्छिन्नमुपादातुं शक्यं, न च गुणं विनाऽवच्छेदः। तन्न; यथा गुणाश्रुतौ यत्किंचिद्द्रव्यमुपादाय प्रयोगः तथा गुणश्रुतावपि किं न सिध्यतीति न गुणः साधनमिति। अयं भावः अरुणादिशब्दा गुणवचना नारुणत्वादिजाति वचना इत्याकृति-

---

गम्यत्वमनाञ्जसमिति। ननु तृतीयाद्योक्तसोमशेषत्वपरग्रन्थानाञ्जस्यं भवतोऽपि समानमिति चेत् तत्राह—विस्तरभयादिति। तृतीयाद्यग्रन्थानाञ्जस्यमेकमेवास्मन्मते। भवन्मते त्वरुणादीनां क्रय एवैदमर्थ्यभावेन चान्वय इति ग्रन्थानाञ्जस्यं क्रियाप्राधान्यमरुणैकहायन्यपेक्षमित्यस्य ग्रन्थस्याप्यनाञ्जस्यम् विनियोजकवाक्यानाञ्जस्यं च। न केवलमेतावदेव दूषणान्तरमप्यस्ति। तदेतत्सर्वं ग्रन्थविस्तरभयान्नोक्तमित्यर्थः।

ननु किं तद्दोषान्तरं यद्विस्तरभयान्नोक्तं अत्र ब्रूमः। अरुणया क्रीणातीति तृतीयाविभक्त्या क्रयसम्बन्ध एवावगम्यते न कारकान्तररूपसोमसम्बन्धः यथा सोममिति द्वितीययापि क्रियामात्रान्वय एवावगम्यते न पुन र्विशिष्टक्रियान्वयः क्रियाजन्यफलभागित्वनियमात्तस्याः। अतोऽवगत सम्बन्धक्रयशेषत्वेनैवारुण्यादेर्नियोगार्थत्वोपपत्तौ नानवगत सोमसम्बन्धशेषत्वकल्पनायां प्रमाणमस्तीति। ऐन्द्र्या गार्हपत्यमुपतिष्ठत इत्यत्र तु उपस्थानस्याभिधानार्थत्वात् नाभिधाने मन्त्रस्य नियोगो ज्ञाप्यते। लोकव्युत्पत्तित एव सिद्धत्वात् अतोऽन्यथासिद्धाभिधानक्रियार्हं गार्हपत्य सम्बन्ध एव ज्ञाप्यः अभिधानं त्वत्र किञ्चित्कारः। अतः किञ्चित्काररूपाभिधान क्रियार्हकारकद्वयसम्बन्ध एवागत्या तत्र ज्ञाप्यत इति न किञ्चिदपि सङ्करमित्यलमतिकथया।

ग्रन्थोक्तं पूर्वपक्षमुपपादयितुमनुभाषते—अत्र पूर्वपक्ष इति। ननु कथमत्र पूर्वपक्षः यतः यथा गवा यजेतेत्यमूर्ताया अपि जातेः क्रिया साधनत्वं तथा गुणस्यापि स्यादित्यत्राह—युक्तमिति। अमूर्ताया अपि जातेः द्रव्याद्यध्यवसायकतया यागसाधनत्वं युक्तम्। गुणस्य तु कथञ्चिदपि साधनत्वं न घटते। एकहायन्यादि-

ग्रन्थे सिद्धम् । एकसंविद्वेद्यतया च द्रव्यान्तर्भावः । न हि रूपिशून्या काचिद्रूपधीरित्याकृत्यधिकरणसिद्धम् । यदा च द्रव्यपरोऽरुणादि शब्दः तदा द्रव्यलिङ्गक इति च वृद्धव्यवहारसिद्धम् । जातिशब्दस्तु गवादिः सदा स्वलिंगक एवेति भेदः । अनुपात्तद्रव्यके वाक्ये गुणवद्द्रव्यान्वयः । अनुपात्तद्रव्यकेऽपि जातिपदे जातेरेवान्वयः । जातिमतस्त्वार्थिकीद्वारतेत्यपि भेदो वृद्धव्यवहारसिद्धः । तदिहैकहायनी

पदैः द्रव्यस्याध्यवसितरूपत्वात् । न च साक्षात्साधनत्वं अमूर्तत्वात् । ननु माभूत् साक्षादध्यवसायद्वारा च साधनत्वं, तथाप्युपादानावच्छेदकतयाऽस्त्येव गुणस्योपयोगः अनवच्छिन्नस्यद्रव्यस्योपादानायोगात् । न च गुणं विनाऽवच्छेद इति चोदयति—नन्विति । तन्नेति । यथागुणश्रुत्यभावेपि यत्किञ्चिद्द्रव्योपादानेन क्रिया सिद्धिः तथा गुणश्रुतावप्यस्तु । गुणस्य साधनत्वाभावादित्यर्थः । ननु अरुणादि शब्दानामपि अरुणत्वादिजातिपरत्वान्न गुणवचनत्वं, ततश्चारुण्यादेर्जातित्वेनाध्यवसायहेतुतया क्रियासाधनत्वमुपपन्नमेव गोत्वादिवत् । भवतु वा गुणवचनत्वं तथापि श्वेतमालभेतेतिवत् द्रव्यपरत्वमेवास्तु । ततश्च द्रव्यान्तर्भावात् क्रियासाधनत्वमप्युपपन्नमिति कथमरुणादिषु पूर्वपक्ष इत्याशङ्क्य आह—अयं भाव इति । अरुणादिशब्दा गुणपरा एव नारुणत्वादि जातिपराः अरुणत्वजातेरभावात् । कथमभाव इत्यत्राह—इत्याकृतिग्रन्थ इति ।

अयं भावः आमपाकनिक्षिप्त कुम्भादौ सत्यामेव व्यक्तौ अरुणत्वादिसमवायस्य दर्शनात् नारुणत्वादेर्जातिता । गवादौ सत्यां गविव्यक्तौ जातिसमवायस्यादर्शनात् व्यक्तिसद्भावस्य स एवायं कुम्भोऽरुणो जात इति स्थूलप्रत्यभिज्ञाया बाधकाभावात् । अतो नारुणत्वादिजाति सम्भव इति प्रथमपादे आकृति ग्रन्थे सिद्धम् । नन्वरुणादिशब्दानां जातिवचनत्वाभावे कथं श्वेतमालभेतेत्यादि द्रव्यान्तर्भाव इत्यत्राह—एकेति । आकृत्यधिकरणे सोमारुणादि शब्दानामपि उदाहरणत्वात् । न हि रूपिशून्या रूपबुद्धिरिति न्यायेन अरुणादिशब्देष्वपि रूपिपरतन्त्रस्वभावरूपबुद्धेः द्रव्यान्तर्भावो युक्तः । न तु शुक्लत्वेत्यादि शब्दानामिति न द्रव्यान्तर्भावः परतन्त्रबुद्धिभावात् गोऽरुणादि शब्दानां परतन्त्रस्वभावार्थ परत्वं न

पदोपात्ते द्रव्ये गुणपरतयैवान्वयः नतु गुणवद्द्रव्यपरतया, व्युत्पत्तिविरहात् । न चामूर्तस्यारुणादेः क्रियासाधनत्वार्हता । मूर्तद्रव्याश्रिता हि क्रिया । तस्या मूर्तमेव कारकम् अमूर्तं तु मूर्तान्तर्भावान्नान्यथा न च यथा जाति शब्दोऽपि जातिपर एव सन्नेकसंविद्वेद्यस्वार्थद्वारतामाश्रित्यामूर्तार्थोऽप्यन्वयार्हः तथा गुणशब्द इति वाच्यम् । उक्तं हि गुणशब्दस्याश्रयद्रव्यद्वारान्तर्भावो द्रव्यपरतयैव व्युत्पन्नः

गोत्वारुणत्वादिशब्दानामिति शब्दवृत्ति वैचित्र्यं शब्दस्वभावकृतमिति भावः। जातिवचनगवादिशब्दानां गुणवचनारुणादिशब्दानां च स्वभाववैलक्षण्य दर्शनादपि नारुणादिशब्दानां जातिवचनत्वमित्याह—यथाचेति । यथा एकसंविद्वेद्यतया द्रव्यपरोऽरुणादिशब्दः तथा तस्य नियतमेव द्रव्यलिङ्गकत्वं गुणिलिङ्गास्तु तद्वतीति वृद्धव्यवहारसिद्धम् । जातिशब्दानां तु उद्देशे द्रव्यपरत्वेपि सदा स्वलिङ्गकत्वमेव नियत लिङ्गत्वम् । न तु द्रव्यलिङ्गानुसारित्वनियम इत्यर्थः । एतच्च प्रायिकमिति मत्वा वैलक्षण्यान्तरमाह—अनुपात्तेति । वायव्यं श्वेतमालभेतेत्यनुपात्तद्रव्यकवाक्यस्थगुणशब्देन गुणवद्द्रव्यान्वयः । गुणविशिष्ट द्रव्यस्यैव क्रियान्वयगुणकर्मत्व परत्वेनैव गुणशब्दस्य परतन्त्रस्वभावगुणवचनत्वात् । यद्यपि वायव्यपदेन वायुदेवताकद्रव्यप्रतीतिः तथापि द्रव्यदेवता सम्बन्धस्याप्राप्तस्य विधाने तद्धितान्तपदस्य तात्पर्यान्न सम्बन्धाश्रयतया सामान्येन प्रतीत द्रव्यपरत्वम् । अतो न वायव्यपदेन द्रव्यविशेषप्रतीतिः। अतो द्रव्यविशेषे तद्धितपर्यवसानाय श्वेतपदस्यापि गुणवद्द्रव्यपरत्वं, तत्परत्वं च लक्षणा वृत्त्या । मुख्यवृत्यावा । जातिशब्दे तु गवादावनुपात्तद्रव्यकेपि वाक्ये जातेरेवान्वयः । तत्रैव शब्दस्य वृत्तेः ।

कथं तर्हि तस्याः क्रियान्वय इत्यत्राह—जातिमतस्त्विति । जातिसंवित्तौव्यक्तेरन्तर्भावात् आसन्नतया जातिमतो द्रव्यस्यार्थे क्रियान्वये द्वारता न पुनः तत्रापि वृत्तिरित्यर्थः । नन्वेवमेकसंविद्वेद्यत्वाविशेषे अयं भेदः कुतोऽवसीयत इत्यत्राह—इत्ययं भेद इति । तथैव व्युत्पत्तेरित्यर्थः । यद्येवमनुपात्तद्रव्यके गुणवद्द्रव्यपरत्वं तर्हि अरुणयैकहायन्या सोमं क्रीणातीत्यत्रापि एकहायनीपदस्य यौगिकत्वेन सन्निहितद्रव्यवृत्तितया न स्वयं द्रव्यविशेषोपस्थापकत्वम् । अतो द्रव्यविशेष-

द्रव्यपरत्वादेव द्रव्यलिङ्गानुकारिता। उपात्तद्रव्यके तु न द्रव्यपरता-व्युत्पत्तिः।

अतो न जातिवद्द्रव्यद्वाराध्यवसायादारुण्यस्य क्रियान्वयार्हता न च श्वेतमालभेतेतिवद्द्रव्यपरतया द्रव्यद्वाराध्यवसानादन्वयार्हते-त्याकृत्यधिकरणोक्तं जातेः क्रियान्वयित्वमनाक्षिप्तम्। न चैवं जाते-रध्यवसायहेतुत्वं जातितो हि सास्नाद्यवयवयुक्तं नियतं द्रव्यमध्यव-

---

सन्निश्चयार्थं अरुणापदस्य गुणवद्द्रव्यपरत्वं वाच्यं ततश्च द्रव्याद्यवसानद्वारेणास्य क्रियान्वयोपपत्तेः कथमस्योदाहरणतेत्यत्राह—तदिहेति। सत्यमेकहायनीपदस्य यौगिकत्वं तथापि धेनुशब्दवत् गोरूपार्थपरत्वमेव यथा पङ्कजशब्दः क्लृप्तावयव-शक्तिरेव तामरसादौ प्रतिबध्यते तथा एकहायनीशब्दोऽपि क्लृप्तावयवशक्ति-र्गोजातौ प्रतिबध्यते ततश्चैकहायनीपदेन गोरूपद्रव्ये उपात्ते अरुणयेति गुणशब्दस्य गुणपरतयैवान्वयो न गुणवद्द्रव्य परतया व्युत्पत्तिविरहात्। तथा च सति तस्यो-दाहरणत्वं युक्तमित्यर्थः। ननु भवतु गुणपरत्वं तथापि स एव गुणः एकहायनीवत् क्रियासाधनत्वेनान्वीयतामित्यत्राह—न चामूर्तस्येति। कुत इत्यत्राह—मूर्तेति। यतः क्रिययोः स्वभावतो मूर्तमेव द्रव्यमाश्रयः तस्याश्च मूर्तमेव कारकं नान्यत् व्यापा-राश्रयस्यैव कारकत्वात्। कथं तर्ह्यमूर्तस्यात्मादेः कारकता तत्राह—अमूर्तं त्विति। आत्मादेरपि मूर्तशरीरान्तर्भावेन कर्तृत्वं नान्यथेत्यर्थः। ननु यथाजातिशब्दोऽमूर्त जातिपर एव सन् एकसंविद्वेद्यां व्यक्ति चार्थी द्वारमाश्रित्यामूर्तोऽर्थोऽप्यन्वय-योग्यः। तथागुण शब्दोऽपि गुणमात्रपर एव सन् एकसंविद्वेद्यद्रव्य द्वारा क्रियान्वय-योग्योर्थोऽस्त्विति न च वाच्यमित्याह—न च यथेति। कुतो न वाच्यमित्यत्राह—उक्तं हीति। गुणशब्दस्य गुणवद्द्रव्यपरतयैवाश्रयद्रव्यरूपद्वारान्तर्भावो न गुणमात्र-परतया तथैव व्युत्पत्तेरित्युक्तोत्तरत्वादित्यर्थः। युक्तं चैतदित्याह—द्रव्येति। नन्वेवं श्वेतमालभेतेतिवत् द्रव्यपरतास्त्वित्यत्राह—उपात्तेति। उपात्त द्रव्यकवाक्ये गुणपर-तैव, न गुणवद्द्रव्यपरता तथैव व्युत्पत्तेरिति पूर्वमेवोक्तेः यथैवं व्युत्पत्तिः तथैवोत्त-रत्र प्रकटयिष्यति। नन्वेवममूर्ततया क्रियानन्वये जाति सामगुणादीनामपि अमूर्त-त्वेनाकृत्यधिकरणोक्तं क्रियान्वितत्वं भज्येतेत्याशङ्कामुपसंहारव्याजेनापनुदति—

सीयते, न गुणतस्तथेति । यतो गुणवद्द्रव्यान्वयेऽपि तर्हि गुण्यन्तर्भावाद् गुणान्वयो न स्यात् । अतस्तद्गुणक द्रव्योपादानाभावाच्छ्वेतमालभेतेत्यस्यापि गुणस्यान्वयाक्षेपादुदाहरणतास्यात् संख्योदरपि जातिवदवयवविशेषानियामकत्वादुदाहरणता वृद्धाननुमता स्यात् । अभिमतप्रकारे तु सङ्ख्यादेरनुदाहरणता युक्ता । नामोपात्ताहि अन्तर्भावितसङ्ख्येया । विभक्त्युपात्ता तु सङ्ख्येयनिष्ठा । एवं मूर्तान्तरेऽपि ज्ञेयम् ।

अत इति । गुणवद्द्रव्यपरस्य गुणशब्दस्यामूर्तार्थस्यापि गवादेः द्रव्याद्यवसानद्वारेण क्रियान्वयोपपत्तेरित्यर्थः । अत्र जातेरध्यवसायहेतुत्वं प्रकारान्तरेणान्येनोक्तं तन्न युक्तमित्याह—न चैवं जातेरिति । किं तत् प्रकारान्तरमित्यत्राह—जातितो हीति । कुतो न युक्तमित्यत्राह—यतो न गुणवदिति । यदि जातेः सास्नाद्यवयवसंस्थानविशेषवद्द्रव्यान्तर्भावात् अन्वयान्तर्भावः तर्हि श्वेतमालभेतेत्यत्र गुणवद्द्रव्यान्वये [पि] क्रियान्वयो गुण्यन्तर्भावान्न स्यात् अवयवविशेषयुक्तद्रव्याप्रतीतेः । यद्यपि गुणान्तरव्यावृत्तश्वेतगुणयुक्तद्रव्यप्रतीतिः तथाप्यध्यवसाय हेत्ववयवविशेषयुक्तद्रव्याप्रतीतेः द्रव्याध्यवसानाभावात् श्वेतमालभेतेत्यस्य गुणस्यान्वयाक्षेपात् तस्याप्युदाहरणत्वं पञ्चिकाननुमतं स्यादित्यर्थः तथा जातिवत् सङ्ख्यादेरवयव विशेषानियामकतया द्रव्याध्यवसायकत्वाभावात् तस्याप्युदाहरणत्वं वृद्धाननुमतं स्यादित्याह—सङ्ख्यादेरपीति । त्वदुक्तप्रकारेण सङ्ख्यादेः कथमनुदाहरणत्वमित्यत्राह—अभिमतेति । द्विधा हि सङ्ख्या, नामोपात्ता विभक्त्युपात्ताचेति । तत्र नामोपात्ता अन्तर्गतसङ्ख्ययैत्र व्युत्पन्नेति तस्याः सङ्ख्येयद्वारा क्रियान्वयोपपपत्तिः सङ्ख्येयान्तर्भावश्च घटस्यैक इति वैयधिकरण्येन प्रयोगाभावात् । एकेन पशुनेत्युपात्तद्रव्यकेपि वाक्ये सङ्ख्याऽन्तर्भावितसङ्ख्येय एव तथैव व्युत्पत्तेः । अत्र ग्रन्थे सङ्ख्याग्रहणेन विंशतिसंङ्ख्याया अर्वाक् सङ्ख्या विवक्षिता । तस्या एवानुदाहरणत्वम् । विंशत्यादिसङ्ख्यायास्तु विंशतिर्गवां विंशतिगाव इति वैयधिकरण्येन सामानाधिकरण्येन च प्रयोगदर्शनात् सङ्ख्यापरत्वं सङ्ख्येयपरत्वं चेति विंशत्या निष्कैः क्रीतमित्युपात्त सङ्ख्येयकवाक्ये सङ्ख्यायाः क्रियान्वय एतत्सिद्धान्तसिद्ध एवेति ध्येयम् ।

व्युत्पत्तियुक्तिरेवं ग्रन्थस्था—पटस्य शुक्ल इत्यत्रोपात्ते द्रव्ये शुक्लशब्दो गुणपर इति। यत्तूपात्त द्रव्यकेऽपि गुणवद्द्रव्यपरत्वं पटस्य शुक्लो भाग इति तत् भागसामानाधिकरण्यादपोद्यते। यथा नीलमुत्पलमित्यत्रकारकविभक्त्यन्ते। कारकविभक्त्यन्ते हि एतद्रा-द्धान्तनयसिद्धा द्रव्यपरता। न चेहापि स्त्रीलिङ्गमपवादकं, स्त्री-

---

विभक्त्युपात्तातु सङ्ख्येयनिष्ठैव प्रातिपदिकार्थगतत्वेनैव विभक्तिभिः सङ्ख्याभिधानात् अमूर्तान्तरे परिमाणादावप्येवमेवेत्याह—एवमेवेति। ननु अनुपात्तद्रव्यके गुणवत्परता, उपात्त द्रव्यके तु गुणमात्रपरतेति व्युत्पत्तिनियमे का-युक्तिरित्यत्राह—व्युत्पत्तियुक्तिरिति। पटस्य शुक्ल इति पटपदेन उपात्ते द्रव्ये शुक्ल शब्दो गुणपर एव न द्रव्यपरः। द्रव्यपरत्वेपि किं द्रव्यान्तरपरत्वं किं वा उपात्तपट-द्रव्यपरत्वमेव। नाद्यः, तद्विवक्षया प्रयोगाभावात्। न द्वितीयः। पटशब्देनैव तदभिधाने शुक्लशब्देनापि तदभिधानायोगात् अन्यायश्चानेकशब्दत्वमिति न्यायात्। उपात्त द्रव्यके गुणपरत्वमेव न द्रव्यपरत्वम्।

ननु युक्तं पटस्य शुक्ल इत्यत्र गुणपरत्वं सम्बन्धबोधक षष्ठीश्रवणात्। अरुणयेत्यत्र षष्ठ्यभावे कथं गुणपरत्वं। अत्र ब्रूमः। न हि गुणपरत्वे षष्ठी प्रयोजिका द्रव्य परत्वेपि षष्ठ्युपपत्तेः। किन्तु पदान्तरेण द्रव्योपादानरूपं उपात्त-द्रव्यकत्वम्। न च देवदत्तायश्वेतमित्यत्र कर्मभूतस्य श्वेतस्य सम्प्रदानमाश्रय-योग्यम्। अरुणयेत्यत्र तु करणभूतस्यारुण्यस्य करणभूतैकहायनी आश्रययोग्यैव। यत्रैकहायनी करणं तत्रैवारुण्यमपि करणमिति युक्तमुपात्तद्रव्यकत्वं गुणमात्रपरत्व प्रयोजकमिति। ननूपात्तद्रव्यकत्वमपि गुणमात्रपरत्वे न प्रयोजकं पटस्य शुक्लो भाग इति उपात्तद्रव्यकत्वेपि गुणवद्द्रव्यपरत्वादित्यत्राह—यत्त्विति। सत्यं गुणवद्-द्रव्यपरत्वं तत्तत्रैव यत्र द्रव्यवाचकपदेन सामानाधिकरण्यं अतः पटस्य शुक्लो भाग इत्यत्र यदुपात्तद्रव्यकत्वमस्य गुणपरत्वे प्रयोजकत्वं तद्भागसामानाधिकरण्याद-पोद्यते। यत्र सामानाधिकरण्यं नास्ति अरुणयेत्यादिकारकविभक्त्यन्ते तत्र पदान्त-रेण द्रव्योपादाने गुणशब्दस्यौत्सर्गिकगुणमात्रपरत्वं लाघवाद्युक्तम्। गुणवद्द्रव्य-परत्वे तस्य द्रव्यान्तरैकहायन्यवरुद्धे क्रयेऽनुप्रवेशाभावात्। न चैकहायनी

द्रव्यपरे हि स्त्रीलिङ्गं शुक्लादिषु व्युत्पन्नमिति। यतो न लिङ्गमेवंविधविषयेऽर्थसाधनम् (साधु) अरुणा शाटीति। नही शाटी स्त्री। प्रयोगसाधोस्त्वर्थसाधुत्वे निरूपिते प्रयोगे तदनुसारिता। इह तु गुणपरत्वेनानर्थसाधौ स्थिते स्त्रीलिङ्गं करुणावद्युक्तमिति न स्त्रीलिङ्गापवादः। भागसामानाधिकरण्यं तु अर्थसाधुतयाऽपवादकमितिव्युत्पत्तियुक्तिः।

तद्द्रव्योभयविशिष्टक्रय विधिनानुप्रवेशो वाच्यः। तं वै दशभिः क्रीणातीति दशभिः क्रयानुवादास्वारस्य प्रसंगात्। अतो यत्र सामानाधिकरण्यं तत्र तद्बलेन गुणपरत्वमपोदितमिति भावः। तत्र दृष्टान्तमाह—यथेति।

ननु श्वेतेनाश्वेन यातीति कारकविभक्त्यन्तेऽपि सामानाधिकरण्याद्गुणवद्द्रव्यपरतेत्यत्राह—कारकेति। कारकविभक्त्यन्ते सर्वत्रैतदधिकरणसिद्धैव द्रव्यपरता। द्रव्यगुणयोरन्योन्याकांक्षाबलात्पार्ष्ठीकोऽन्यान्वय इत्यर्थः। कारकविभक्त्यन्तविषये सर्वत्रैव विभक्तियोगात् द्रव्यगुणयोः सामानाधिकरण्यभ्रम एवेति मन्तव्यम्। परमार्थसामानाधिकरण्य [ण्या] विषयेऽपि विभक्त्यानुकू (ल्य) स्यापेक्षितत्वेनैकविभक्तियोगात्॥

ननु सामानाधिकरण्यं नाम भिन्नप्रवृत्तिनिमित्तयोर्द्रव्यगुणशब्दयोरेकस्मिन्नर्थे वृत्तिः। गुणवद्द्रव्यपरत्वात् एकार्थ वृत्तित्वम् तस्माच्च गुणवद्द्रव्यपरत्वमित्यन्योन्याश्रयः स्यात्। अतः कथं सामानाधिकरण्याद्गुणवद्द्रव्यपरत्वं, उच्यते। पटस्य शुक्लो भाग इत्यत्र एकवाक्यत्वप्रतीतिबलादेकार्थतेत्यर्थः॥ एकार्थतात्पर्यज्ञानं ततः केवलगुणपरत्वापवादेन गुणवद्द्रव्यपरत्वम्। तेनैकार्थतासिद्धिरिति नान्योन्याश्रयदोषः। न चैवमेकवाक्यत्वप्रतीतिबलेन ऐकार्थ्यतात्पर्यनिश्चयात् अरुणयैकहायन्येत्यत्रापि सामानाधिकरण्यं स्यादिति वाच्यम्। ततः करणबोधिकया तृतीया श्रुत्या अरुणैकहायन्योरुभयोरपि क्रियासम्बन्धावगतेरन्योन्यसम्बन्धानवगमात्। न च प्रातिपदिकार्थस्य गुणस्य द्रव्याकांक्षित्वाद्वस्तुसामर्थ्येन द्रव्यसम्बद्धस्यैव गुणस्य क्रियान्वयोऽस्त्विति वाच्यम्। यतस्तस्यैव प्रातिपदिकार्थस्य करणत्वबोधिकया विभक्तिश्रुत्या साक्षात्करणत्वेन क्रियान्वयबोधान्न वस्तुसामर्थ्यं

ननु वाक्यभेदे तर्हि न गुणपरता। उपात्तद्रव्यकवाक्यबहिर्भावात्। मैवम्। उपात्त द्रव्यकवाक्ये हि द्रव्यस्यातिसन्निधिः। स च विमर्शोत्थवाक्यभेदेऽपि नापेत इति न गुणपरत्वे व्युत्पत्तिहानिः। यथा सामान्यशब्दो वाक्यान्तरसन्निहिते विशेषे तदितरविशेषपर इति गोबलीवर्दनयः सामान्यविशेष नयाद्भिन्नो वर्णितः।

द्रव्यसम्बन्धबोधाय प्रभवति। कृष्णस्य देवदत्तस्य गाव इत्यत्र तु गवान्वयविधिपरे वाक्ये प्रतीतैकवाक्यताबलात्कृष्णगुणयुक्तस्य देवदत्तस्य गाव इति मिथोऽन्वयपूर्वकार्थान्तरान्वयः। न प्रत्येकं वाक्यभेदापत्तेः। अरुणयेत्यत्र तु अनेकगुणयुक्तक्रयविधेः श्रुतिबलात्प्रत्येकमन्वयेपि न वाक्यभेदः। किञ्च—कृष्णस्य देवदत्तस्य गाव इति स्वस्वामिलक्षणे सम्बन्धे षष्ठी। न च गुणस्य तदर्हतेति व्यतिरिक्तार्थविभक्त्यन्तत्वेपि बलात्सामानाधिकरण्येन गुणान्वितदेवदत्तस्य स्वामितया गवान्वयः। अरुणयेति तूपादेयकारकावच्छेदकतया क्रयान्वयार्हता। न चेह तथान्वयः। देवदत्तस्यानुपादेयत्वात् कृष्णस्येति षष्ठी परम्परासम्बन्धानुवादिकेति ध्येयम्। न चाभिषुत्य हुत्वा भक्षयन्तीति क्रियासम्बन्धबोधिकायां क्त्वाश्रुतौ सत्यामपि यथा होमाभिषवयोरन्योन्यान्वितयोरेव निमित्तत्वेन भक्षयत्यन्वयः तथारुणैकहायन्योरपि स्यादिति वाच्यम्। यतः समानकर्तृकतार्थकक्त्वाप्रत्ययवशेन क्रियान्तरान्वयित्वमात्रमेव गम्यते। तच्च होमाभिषवयोरन्योन्यान्वयेऽपि नापैतीति युक्तम्। तत्र मिलितयोर्निमित्तत्वम्। इह त्वरुणैकहायन्योरन्योन्यान्वये विभक्त्यवगतक्रियान्वयित्वभङ्गः। यद्यपि विधेयभक्षणगुणयोरक्त्वान्तयोर्मिथोन्वयानर्हता। तथापि प्रतीतैकवाक्यताबलादन्योन्यान्वितौ होमाभिषवौ भक्षणे निमित्तम्। किञ्च—होमाभिषवयोर्भक्षणे निमित्तत्वं कल्प्यम्। कल्पनालाघवान्मिलितयोरेकमेव कल्प्यमित्यलमतिप्रसङ्गेन। प्रकृतमनुसरामः—तस्मात्पटस्य शुक्लोभाग इत्यत्र भागसामानाधिकरण्यात्केवलगुणपरत्वमपोद्यते।

नन्वरुणयेत्यत्रापि सामानाधिकरण्यवत्स्त्रीलिंगमपवादकमस्तु। स्त्रीद्रव्यपरत्वेपि हि स्त्रीलिङ्गं शुक्लादिषु व्युत्पन्नम्। गुणपरत्वे तु पुल्लिङ्गतैवेति नाशङ्कनीयमित्याह—न चेति। यत इति। एवंविधविषये लिङ्गान्वयायोग्यगुण-

ननुगुणपरत्वेऽपि सन्निहितैकहायनीगुणपरतास्तु, माभूद्विप्रकृष्टप्राकरणिकद्रव्यान्वयः। मैवं यदि गुणशब्दोऽन्विताभिधानायैकहायनीमपेक्षते, तदशक्यंतृतीयायोगात्। अथ नियोगार्थतया नियोगीयद्वार द्रव्यापेक्षा तदा प्रकरणिना यावत्प्राकरणिकं द्रव्यं द्वारमुपनेयम्। स्पयादिपूर्वपक्षवत्। तदा च द्वारभूतद्रव्यद्वारा करणत्वं तृतीयानुवाद्यम्।

वाचकशुक्लादिशब्दविषये। लिङ्गमर्थसाधनं भवत्येव गुणपरत्वे द्रव्यपरत्वे च लिङ्गयोग्यार्थव्याप्तेः, कथमित्यत्राह—अरुणेति। अरुणाशाटीति सामानाधिकरण्यप्रयोगे अरुणाशब्दस्य द्रव्यपरत्वे न लिङ्गमर्थसाधु, शाठ्यास्स्त्रीरूपार्थत्वाभावात्। तथा—एकस्यैवशब्दस्य लिङ्गत्रयानुशासनमपि प्रयोगसाधु। एवंविधविषये लिङ्गमिति घोषयति। अतो लिङ्गस्य प्रयोगसाधुत्वमेव। शुक्ला धेनुः कृष्णामहिषीत्यादिप्रयोगे यथा स्त्रीरूपार्थपरत्वेन लिङ्गस्यार्थसाधुत्वानुसारिता। यथारुणयैकहायन्येत्यत्रापि स्यात्। किमित्यकरुणावत् लिङ्गं भविष्यतीत्युक्तमित्याशंक्य वैषम्यमाह=प्रयोगसाधोरिति। शुक्लाधेनुरित्यादौ प्रयोगे लिङ्गस्यार्थसाधुत्वानुसारिता। स्वतः प्रयोगसाधोरपि लिङ्गस्य स्त्रीरूपार्थपरत्वेन अर्थसाधुत्व निरूपणात्। इह तु—करुणयेत्यत्र कारकविभक्त्यन्ततया सामानाधिकरण्याभावेन गुणपरत्वे लिङ्गे साधौस्थिते स्त्रीलिङ्गं करुणावद्युक्तम्। स्वतः प्रयोगसाधोर्लिङ्गस्य गुणपरत्वापवादकत्वाभावात् तदाह—इति न स्त्रीलिङ्गेति। केचित्तु—प्रयोगसाधोस्त्वर्थसाधुतः निरूपिते प्रयोगे तदनुसारिता। इह गुणपरत्वेऽर्थसाधौ स्थित इति पठन्ति, तत्रेयं ग्रन्थस्य व्यावर्त्यशंका॥

ननु सति संभवेऽर्थ साधुत्वं लिङ्गस्य युक्तमिति तदर्थं प्रातिपदिकस्य द्रव्यपरत्वमेवेति। गन्थार्थस्त्वर्थसाधुत इति ल्यब्लोपे पञ्चमी। अर्थसाधुशब्देन प्रातिपदिकमुच्यते। अनर्थकस्य प्रातिपदिकत्वायोगात्। ततः प्रयोगसाधोर्लिङ्गस्यार्थसाधुप्रातिपदिकंपर्यालोच्य निरूपिते प्रयोगे तत्वतो निर्धारिते तदनुसारिता प्रातिपदिकानुसारितैव युक्ता। न स्वातन्त्र्येणापवादकता। लिङ्गस्य प्रयोगसाधुतयापि संभाव्यमानत्वात्। प्रातिपदिकस्य तु कथंचिदप्यन्यथा संभावनायोगात्।

ननु वाक्यभेदपरिहारार्थं कथंचिद्‌गुणस्यावच्छेदकतया क्रयकरणतास्तु तन्न गुणावच्छेदं विनापि द्रव्योपादानसिद्धेर्नाहत्यसाधनता गुणस्य गुणवद्‌द्रव्यपरे तु गुणशब्दे गुणविशिष्टस्य द्रव्यस्य साधनतायां विशेषणस्यान्तर्भावः। जातिशब्देऽन्तर्गत विशेषणपरे सति विशेषणत्वेनान्तर्गतायाः जातेः करणत्वेन तृतीयान्तान्वयान्न वाक्यभेद इति ध्येयम्।

एवं सामान्येनाभिधाय प्रकृतेऽपि योजयति—इहेति। अर्थसाधोः प्रातिपदिकस्य प्रबलकारणेन गुणपरत्वे स्थिते इत्यर्थः। एवं तर्हि भागसामानाधिकरण्यमपि प्रयोगसाधुत्वान्नापवादकमित्यत्राह—भागेति। सामानाधिकरण्यस्य मानान्तरविरुद्धे मेये प्रयोगसाधुत्वस्यादर्शनादिति भावः। साधितमर्थं निगमयति—इतीति। नन्विति। अरुणयैकहायन्येत्यत्र उपात्तद्रव्यकत्वात्केवलगुणवचनत्वमरुणयेत्यस्य। ततश्चामूर्तस्यारुण्यस्य क्रियान्वयायोगादेकहायन्या क्रिणातीत्यतो भिन्नमरुणयेत्येतावदेकं वाक्यम्। ततश्च वाक्यभेदे उपात्तद्रव्यकवाक्यबहिर्भावाद्‌गुणवचनता न स्यादित्यर्थः॥

मैवमिति। उपात्तद्रव्यके हि द्रव्यस्यातिसन्निधिः। स च विमर्शोत्थवाक्यभेदेपि नापेत इति उपात्तद्रव्यकत्वनिबन्धनद्रव्यातिसन्निध्यनुसन्धानपूर्वकगुणमात्रवचनत्वानुसन्धानसमुत्थवाक्यभेदेपि द्रव्यातिसन्निध्यनुरञ्जितबुद्ध्यनुवृत्तेर्न द्रव्यसन्निध्यपाय इत्यर्थः।

एवं तर्हि सन्निधिमात्रस्य गुणपरत्वप्रयोजकत्वे प्राकरणिक सन्निहितद्रव्यसंभवात् श्वेतमालभेतेत्यत्रापि गुणमात्रपरत्वं स्यादित्यत्राह—न गुणेति। एवमतिसन्निध्यनुरञ्जितबुध्यनुवृत्तेरत्र न गुणपरत्वव्युत्पत्तिहानिः। श्वेतमित्यत्र तु नेदृशसन्निध्यनुरञ्जितबुद्ध्यनुवृत्तेर्गुणपरत्वमिति ध्येयम्। वाक्यान्तरेप्यतिसन्निधिशब्दवृत्तिप्रकारभेदं दृष्टान्तमुखेन प्रकटयति—यथेति।

नन्वेवं वाक्यभेदेऽप्यतिसन्निहितैकहायनीद्रव्यशेषत्वमस्तु। किमिति विप्रकृष्टप्राकरणिक सर्वद्रव्यशेषतेति चोदयति—नन्विति। मैवमिति। अरुणयेत्येतावत्किमन्विताभिधानायैकहायनीमपेक्षते। किं वा नियोगार्थत्वेन नियोगीयद्वारा-

राद्धान्तोऽपि ऋजुविमलायामेवम् क्रयान्वयादारुण्यस्य तत्रैव विनियोगः। क्रय साधनता च द्रव्यविशेषणत्वेन आरुण्यविनियोगेन ह्येवं प्रतीयते यत्रारुण्यं समवेतं तेनैव क्रय इति। न च द्रव्यस्योपादानमारुण्येनाविशिष्टस्य संभवति। नचानुपात्तेन करणेन क्रियासिद्धिरित्यस्ति साधनताऽऽरुण्यस्येति । अयं भावः-गुणस्यापि चेद्द्रव्यद्वारा प्राकरणिक द्रव्यावच्छेदात्करणता, करणतानुवादार्थं क्रियान्वयोऽनुज्ञातः। तद्द्वारमेकवाक्यतानुरोधात्क्रय एव अतिसन्निहितैकहायनीद्वाराऽऽन्वयोऽस्तु नहि नियोगोऽपि पदान्वयं बाधित्वा याव-

---

पेक्षया ? तत्र प्रथमं पक्षमाह—यदि गुणशब्द इति। दूषयति—तदशक्यमिति। द्वितीयं पक्षमनुभाषते—अथेति । दूषयति—तदाप्रकरणिनेति । आनन्तर्यमचोदनेति न्यायेन एकस्य सन्निधेरवैशेषिकत्वादित्यर्थः। अत्र प्रकरणिना यावत्प्राकरणिकं द्रव्यं द्वारमुपनेयमिति तदा पूर्वपक्षे नियोगसहकृतलिङ्गेनारुण्यस्य सर्वद्रव्यशेषत्वमुक्तमिति मन्तव्यम् ॥

ननु प्राकरणिकद्रव्यान्वये कथं करणविभक्तिरित्याह—तथा चेति। द्वारभूतद्रव्यद्वारा आरुण्यस्य क्रियान्वयादार्थं करणत्वं तृतीयानुवाद्यमित्यर्थः। नन्विति। यद्यप्यत्राध्यवसायहेतुतया द्रव्यविनियोगवेलायां नगुणस्योपयोगस्तथापि वाक्यभेददोषपरिहाराय कथञ्चिदुपादानवेलायामवच्छेदकतया गुणस्य क्रयकरणतास्तु। तन्नेति। यदि गुणावच्छेदं विना द्रव्योपादानं न सिद्ध्येत्। तदा स्याद्गुणस्य साधनत्वम्। नैतदस्ति। गुणाश्रुतौ गुणावच्छेदं विनापि द्रव्योपादानान्नाहत्यसाधनता॥

नन्वेवं श्वेतमालभेतेत्यत्रापि श्वेतगुणावच्छेदं विनापि पशूपादानसंभवात् श्वैत्यस्यापि साधानतान्तर्भावो न स्यादित्यत्राह—गुणवदिति। सत्यं यदि श्वेतगुणेन विना द्रव्यस्याध्यवसायहेतुरस्ति । श्वेतगुणविशिष्ट द्रव्यप्रतीतेस्तेनैव रूपेण साधनत्वाद्विशेषणभूतस्य श्वेतस्यापि साधनान्तर्भाव इत्यर्थः॥

नन्वेवं गवा यजेतेत्यत्रापि विशेषणभूतजातिमात्रपरत्वाद्गोशब्दस्य तस्यैव च तृतीयया करणत्वोक्तेस्तस्य च यागकरणत्वानर्हत्वात्कथं न वाक्यभेद

त्प्राकरणिकान्वयाय प्रभवतीति स्पष्याधिकरण राद्धान्तसिद्धम् । यदुक्तं गुणावच्छेदं विनापि यत्किंचिद्द्रव्योपादानसिद्धिरिति, तन्न-यत्किंचिदवच्छेदं विना तावद् द्रव्योपादानमशक्यमित्यनुज्ञाते व्यक्ति विशेषं विना भावो नावच्छेदक सजातीयस्य साधनतां विहन्ति ।

अन्यथा व्रीहि व्यक्ति विशेषं विना भावाद्द्रव्यमप्यसाधनं स्यादिति छत्रच्छाया टीकायां स्फुटम् । एवं द्रव्यादिभ्यो गुणस्य विलक्षणं साधनत्वं, गुणपरत्वे द्रव्यपरत्वे च स्वानुरूपं सिद्धं भिन्न द्वारतया च न द्रव्येण सह विकल्पः समुच्चयेऽपि न वाक्यान्तरस्थ-

इत्यत्राह—जातिशब्दे त्विति । जातिशब्दे तु विशेषणीभूतजातिमात्रपरत्वात् शब्दस्य तस्यैव यागंप्रति तृतीयाबोध्यं करणत्वम् । तच्च जातिबुध्यन्तर्गतायाः व्यक्तेर्जात्यासन्नतया तद्द्वारा निर्वहतीति करणत्वेन तृतीयान्तान्वयान्न वाक्यभेदः ॥

नन्वेवमरुणया क्रीणातीत्यत्रापि तृतीयावगतमारुण्यस्य करणत्वंसन्निहितैक-हायनीद्वारा निर्वहतीति तत्रापि न वाक्यभेद इत्यत्राह—इतिध्येयमिति । अयं भावः—युक्तं जातिकरणत्वस्य जात्यासन्नव्यक्तिनिर्वाह्यत्वं रूपरूपितया तदेकसंवित्संवेद्य-त्वेन व्यक्त्यन्विततयैव जातिप्रतीतेः । आरुण्यादौ तु गुणवद्द्रव्यपरतां विना न गुणधीः । साचोपात्तद्रव्यकत्वाद्वाक्यस्यात्र नास्तीति तत्करणत्वस्य नैक बुद्धिद्रव्य-निर्वाह्यता । करणविभक्त्यन्ततया तेनान्वयाभावाद्युक्तस्तत्र वाक्यभेद इति । राध्दान्तोपीति कथमित्यत्राह—क्रयान्वयादिति । अरुणया क्रीणातीति तावत्तृतीया-बलादारुणस्य क्रयान्वयावगतेः । पदद्वयश्रुतिरूपवाक्यात्तत्रैव विनियोगः । कथममूर्तस्य आरुण्यस्य क्रयसाधनतेति चेत्तत्राह—क्रयेति ॥

ननु द्रव्यसम्बन्धानवगतेः कथं द्रव्यविशेषणत्वेन आरुण्यस्य साधनतेत्य-त्राह—न चेति । सत्यमुपात्तेन द्रव्येण क्रिया निर्वर्त्यते । न च द्रव्यस्योपादानमारुण्ये-नाविशिष्टस्य संभवतीति युक्ता साधनताऽऽरुण्यस्येत्यर्थः ॥

नन्वमूर्तस्यायोग्यं क्रियासाधनत्वं कथमिव शब्दः शक्नोति वदितुम् । अतः क्रियासाधनत्वाभावात् तस्य कथं क्रये विनियोगः । अतो द्रव्यसम्बन्धयोग्यत्वात्

द्रव्यद्वारता। अतिसन्निहित स्ववाक्यस्थद्रव्यद्वारा चरितार्थस्य न वाक्यान्तरस्थद्रव्य संकोचतेति द्रव्यगुणयोरेककर्म्यात् एक क्रयान्वयादिति एकधाऽन्वयादिति तात्पर्यार्थः। भाष्यव्याख्या तु गुरोः पंचिकयोरेव सुगमा। विवरणे तु प्रकारान्तरेणावान्तरसङ्गतिः। स्फुटदृष्ट कारकभावद्रव्य शेषत्वे साधिते पदनिमित्तान्वयबलादस्फुटकारकभावयोर्गुणकर्मणोः शेषत्वचिन्तां गुणचिन्तां सापवादां

आरुण्यस्य वाक्यं भित्वा प्राकरणिकसर्वद्रव्यार्थतेत्यत्राह—अयं भाव इति। अरुणयैकहायन्या सोमं क्रीणातीति श्रूयमाणं पदजातं विभागे साकांक्षत्वादेक वाक्यतयाऽवगम्यते। तत्र च तृतीयाश्रुत्यारुण्यस्य क्रयसाधनत्वेनावगतिः। न चायोग्यता द्रव्यद्वारा योग्यत्वात्। यस्य हि यादृशं साधनत्वं लोके दृष्टं तस्य क्रियां प्रति तादृशं साधनत्वं शब्दः प्रतिपादयति। गुणस्य द्रव्यपरिच्छेदकत्वमेव क्रियां प्रति साधनत्वम्। अतो द्रव्यपरिच्छेदसमर्थत्वात्क्रियासाधनत्वेन शब्देनाभिधानयोग्यम्। न चारुणापदेन द्रव्यद्वारपरत्वमनवगतमिति वास्तवयोग्यत्वमेवेति। यथा काष्ठैः पचतीति काष्ठानां ज्वालाद्वारा साधनत्वे पदेनावगतेपिवास्तवयोग्यतयाऽन्विताभिधानसिद्धिः। तथेहाप्यन्विताभिधानं योग्यमेव। साधनत्वस्य एकाहायनीद्वारा निर्वाहात्। वाक्यभेदपक्षेऽपि तृतीयावगत करणत्वानुवादार्थं द्रव्यावच्छेदद्वारा आरुण्यस्य करणताऽनुज्ञेया। करणतार्थं क्रियान्वयोऽपि द्रव्यद्वारा। तत्परं प्रमितैकवाक्यताऽपरित्यागेन क्रियमाण एव एकहायनीद्वारा करणतास्त्वित्यर्थः॥

नन्वेकहायन्यन्वयो नान्विताभिधानाय तृतीयाश्रुतेः क्रयान्वयात्। किन्तु—ग्राहक्रीयद्वारान्वयाय। स च नियोगेन सर्वनियोगीय द्वारान्विततयाऽवगत इति नैकहायनीमात्रद्वारतेत्यत्राह—नहीति। वाक्याद्द्वारविशेषावगतौ न प्राकरणिकपदार्थमात्रसम्बन्ध इति स्फ्यादिनयसिद्धेरित्यर्थः। तत्र पूर्वपक्षे गुणावच्छेदं विनापि यत्किंचिद्द्रव्योपादानसिद्धेर्द्रव्योपादाने गुणस्यावच्छेदकत्वेन नान्वयव्यतिरेकानुविधानमिति कथं गुणस्य साधनतेति यदुक्तं तदनुभाषते— यदुक्तमिति। तन्नेति। द्रव्योपादनं हि यत्किञ्चिदवच्छेदकं विना नोपपद्यते। तत्र जात्या गुणेन क्रियया वा सामान्येनावच्छेदो द्रव्योपादानेऽवश्यमङ्गीकार्यः। तदनुज्ञाने अवच्छेदकजातीय-

सविशेषां चतुरधिकरण्यां समाप्याभिक्रमणकर्मचिन्ता । संख्यापि गुणविधैवेति ग्रहैकत्वसप्तदशत्वयोश्चतुरधिकरणी निवेशः । अश्रुत-द्वारस्य कर्मणः कर्मणि शेषता जघन्येति पश्चाच्चिन्तिता । स्फुटमिद-मभिक्रमणाधिकरणे दीपशिखायाम् । इहेयं दीपशिखा "आक्षिप्त-द्रव्ये गुणजाती" इति । तद्गुणशब्दस्य गुणवद्द्रव्यपरतया जातौ जातिमात्रपरतयेति भेदे सत्येव । शेषं निबन्धनवत् ।

गुणरूपव्यक्तिविशेषं विना द्रव्योपादानस्यावच्छेदकान्तरेण भावो नावच्छेदक सजातीयस्य गुणस्य साधनतां विहन्ति । विपक्षे बाधकमाह—अन्यथेति । छत्रछाया-टीका नाम चतुर्थे द्रव्यसंस्कारकर्मस्वित्यत्र विवरणटीका । नहि छत्रादयो निमित्तं छायायाः । किन्तु—अन्तर्धाननिमित्तद्रव्यमिति ॥

ननु युक्तं क्रियाश्रयस्य द्रव्यस्य क्रियासाधनत्वम् । क्रियानाश्रयस्य तु गुणस्य कथं साधनत्वमित्यत्राह—द्रव्यादिभ्य इति । नन्वेकक्रियार्थत्वेन द्रव्यगुणयोः विकल्पः स्यादित्यत्राह—भिन्नद्वारेति ॥

ननु भिन्नद्वारतया द्रव्यगुणयोः क्रये समुच्चयेपि क्रयसाधनद्रव्यत्वं वासः प्रभृतिष्वपि समानमिति किमिति तत्सम्बन्ध आरुण्यस्य न भवतीत्यत्राह—समुच्चये इति । अत्र सूत्रे द्रव्यगुणयोरैकर्म्यादित्युक्ते एकसोमाख्यकर्मकारकान्वया-दिति कश्चिद्भ्राम्येत् तं प्रत्याह—इतीति । भाष्यव्याख्या तु ग्रन्थ एव सुगमेत्याह—भाष्येति । विवरणेस्विति । कथमित्यत्राह—स्फुटदृष्टेति । साक्षात्क्रियानिर्वर्तकत्वं द्रव्यस्य दृश्यत इति स्फुटदृष्टकारकभावस्य द्रव्यस्य पदद्वयश्रुतिरूपवाक्यात् शेषत्वे साधिते तत एव वाक्यात् द्रव्यद्वारा कर्मणि साधनभूतयोर्गुणकर्मणोरस्फुट-कारकभावतया पश्चाच्छेषत्वचिन्ता ॥

ननु गुणशेषत्वचिन्तानन्तरं कर्मशेषत्वचिन्तैवोचितेति किमिति ग्रहचमस-वाजपेयानां मध्ये अनुप्रवेश इत्यत्राह—गुणचिन्तामिति ॥

ननु संख्याया गुणत्वाभावे कथं गुणचिन्ताप्रघट्टकनिवेश इत्यत्राह—संख्यापीति । द्रव्यावच्छेदकतया गुणकोटित्वमित्यर्थः । नन्वस्फुटकारकभावे समानेपि किमिति गुणचिन्तानन्तर्यं कर्मचिन्ताया इत्यत्राह—अश्रुतेति । एतच्चाभिक्रमण-

एकत्वयुक्तमेकस्य श्रुतिसंयोगात् ।। ७ ।।

द्रव्यगुणसंस्काराणां शेषत्वे उक्ते किं विवक्षित सङ्ख्ये शेषिणि शेषता उताविवक्षित सङ्ख्ये इत्येवमुक्तशेषतैव विशेषतश्चिन्त्यत इति सङ्गतिद्वयम् । प्रकरणविनियोज्येतराङ्गानां प्रायेण द्रव्यगुण-संस्कारविधौ निवेशात् तत्रैव प्रायेण शेषिणि संख्यान्वयात् तदनन्तर-मेवेदृशी चिन्ता । नारादुपकारकशेषचिन्तापेक्षा । पश्वेकत्व नयसिद्ध नियोगाधीनविवक्षाशङ्कानिरासोऽत्रनये प्रसाध्यः न विवक्षेति न चतुर्थसङ्गतिः ।

टीकायां स्फुटमित्याह—स्फुटमिति । अत्र दीपशिखायामाक्षिप्तद्रव्यके गुणजाती इत्युक्तम् । तदयुक्तम् । जातिशब्दस्य जातिमात्रपरत्वेनैव व्युत्पत्तेः । गुणशब्दस्य त्वनुपात्तद्रव्यकत्वे गुणवद्द्रव्यपरतयैव व्युत्पत्तिरिति भेदादित्यत्राह—इहेयमिति । ननु विवरणमते कथं पूर्वोत्तरपक्षावित्यत्राह—शेषमिति ।।

एकत्वयुक्तमेकस्य श्रुतिसंयोगात् ।। ७ ।।

सोमे ऐन्द्रवायवादिग्रहसन्निधौ ग्रहं संमार्ष्टीति श्रुतम् । तत्र चिन्ता । किमेकग्रहशेषः संमार्ग उत कृत्स्नग्रहशेष इति । तदर्थमपरा चिन्ता । किमेकत्वं विवक्षितमुताविवक्षितमिति ।।

ननु श्रुतिवाक्यादिगम्यशेषताव्युत्पत्त्यभावे कथमध्याये अवान्तरे च सङ्गतिरित्याशंक्य वृत्तकथनपूर्वकं संगतिद्वयमाह—द्रव्येति ।।

ननु प्रतिज्ञात श्रुत्यादिसर्वप्रमाणकशेषत्वचिन्तानन्तरं विशेषचिन्तोचितेति प्राकरणिकानंतरमेवेयं स्यादित्यत्राह—प्रकरणेति । प्राकरणिकाङ्गेतराङ्गानां प्रायेण द्रव्यादिवि(धाव)[धौ] निवेशात् तत्रैव प्रायेण शेषिसंख्यान्वयात् द्रव्यादि शेषानन्तरमेव ईदृशी चिन्ता नारादुपकारिशेषतापेक्षा । तत्र शेषे संख्यानन्वयात् । द्रव्यादिविधिशेषत्वं च सामान्येन श्रुतिवाक्याभ्यामुक्तमेव । उपरि तद्विशेषमात्र-चिन्तेति नोपरितनापेक्षाऽस्य । यद्यपि मन्त्रविनियोगे क्वचिदैन्द्र्या गार्हपत्यमिति शेषिसंख्या तत्र तु विवक्षाविवक्षाफलं नेति न तदानन्तर्यमिति भावः ।।

ननु ग्रहैकत्वविवक्षोपादानाधीनेति चतुर्थ एव स्यादित्यत्राह—पश्वेकत्वेति । न च त्रिवक्षापवादकतया तत्रैव सङ्गतिरिति वाच्यम् । यत उपादेये तत्र विवक्षो-

पूर्वपक्षस्तु-यद्यपि स्वकार्यशेषतया निर्ज्ञातोपादाना एव ग्रहादयः शेषिण इत्युपादेयावच्छेदकैकत्वादि सङ्ख्यानपेक्षा, तथापि इह श्रुतमेकत्वादि विवक्षितम्। विवक्षाचाङ्गत्वादिलिङ्गम्। अङ्गता चापेक्षयेत्यपेक्षितमित्याद्रियते।

पञ्चिकानुरोधाद्विवक्षादि क्रमः उक्तः। श्रुतेरेव हि पश्वेकत्वादेरादरः अवच्छेदकापेक्षामात्राद्धि द्वित्वादेरादरोऽपि स्यात्। क्वचित् द्वित्वादेरादरोऽपि श्रुतित एव। उपादेये श्रुतेरादर इति चेत् न,

क्ता उपात्तेत्यत्राविवक्षेति नापवादकता। इहतु—यथोपादेये विवक्षा तथोपात्तेपीति शङ्का। अतो नेहासङ्गतिरित्यर्थः॥

ननूपात्तोपादानाभावादवच्छेदकसंख्यापेक्षाभावे कथमेकत्वविवक्षया पूर्वपक्ष इत्यत्राह—पूर्वपक्षस्त्विति। नन्वपेक्षाभावे कथं विवक्षेत्यत्राह—विवक्षा चेति। श्रुतत्वादेवापेक्षितत्वम्। अपेक्षितत्वादिवाङ्गत्वं विवक्षितत्वे अपि सिद्धं इत्यर्थः॥

ननु श्रुतत्वमेवैकत्वादेः तन्त्रं नाङ्गत्वापेक्षे तत्किमिति तदुक्तिरित्यत्राह—पञ्चिकानुरोधादिति। परमार्थतः श्रुतत्वादेवैकत्वादरः नापेक्षया नाप्यङ्गत्वेनेति भावः। उपादेयेप्येकत्वादरे श्रुतत्वमेव तन्त्रं नापेक्षेत्याह—श्रुतेरिति। विपक्षे बाधमाह—अवच्छेदेति॥

ननु उपादानलाघवाद्द्वित्वाद्यनादर इत्यत्राह—क्वचिदिति। उपादेयगतत्वं श्रुतत्वं चोभयमपि प्रयोजकमिति शङ्कते। उपादेये इति। दूषयति—नेति। अत्रापि श्रुतिबलादेव। उत्पन्नस्याग्न्यादेर्विनियोगादुत्पत्तेः प्रागनुपात्तत्वादुत्पत्तौ उपादेयतयाऽवच्छेदापेक्षेति शङ्कते—तत्रापीति। दूषयति—नेति। अत्रापि श्रुतिबलादेव रक्तपटवदपेक्षोत्थाप्यतामित्यर्थः। युक्तं तत्राज्ञातावच्छेदादिहेतुः। ज्ञातावच्छेदे कथमपेक्षोत्थापनमिति शङ्कते—ज्ञातावच्छेदस्येति। तन्नेति। तत्रापि फलत्वेन ज्ञातावच्छेदस्य कथमपेक्षोत्थापनं श्रुतेरिति चेत् शक्यमत्रापि तत एव स्वकार्यान्वये ज्ञातावच्छेदस्य स्वशेषान्वयापेक्षोत्थापनमित्यर्थः।

ननु कार्यान्तरयोग्यताकरणरूपः संस्कारः तस्य, यस्य कार्यान्तरविनियोगः। सच ग्रहादेरेव क्रियासाधनत्वयोग्यत्वात्, नैकत्वादेरिति कथमपेक्षोत्थितिरिति

यूपं छिनत्ति, अग्नीनादधीतेत्येकत्वबहुत्वादरात्। तत्राप्यनुपात्ततयाऽवच्छेदापेक्षेतिचेत् न श्रुतितो ह्यत्रोत्थाप्याकांक्षा रक्तपटवत् ज्ञातावच्छेदस्यावच्छेदापेक्षोत्थापनमशक्यमितिचेन्न। स्वकार्यान्वये ज्ञातावच्छेदस्य स्वशेषान्वये शक्यैवापेक्षा। ग्रहादिः संमार्गादिना संस्क्रियतेकार्यान्तरयोग्यः क्रियते। कार्यान्तरयोग्यत्वं च ग्रहमात्रस्य, नसंख्यादेः। अतो न संस्कारार्ह-

---

शङ्कते—ग्रहादिरिति। न। उपादानपर्यन्तत्वादैन्द्रवायवादिशास्त्रस्य तच्छेषसंख्या युक्ता एव ग्रहाः कार्यान्तरयोगिन इति सैकत्वस्यैव ग्रहस्य संस्कारार्हत्वाच्छ्रुत्यधीनापेक्षोत्थितिः शक्येत्यर्थः॥

ननु ग्रहैर्यजेतेति वाक्ये मिलितानां ग्रहाणां कार्यविनियोगात् तथैव संस्कारान्वयः स्यादित्यत्राह—एकैकस्येति। ऐन्द्रवायवादिवाक्यादेकैकस्य ग्रहस्य कार्यान्वयः। न ग्रहवाक्यान्मिलितानाम्। तस्य पञ्चप्रयाजवाक्यवदनुवादकत्वात्। ग्रहोत्पत्तिवाक्य एव द्रव्यदेवतान्वयाद्यागरूपकार्यान्वयावगतेः शीघ्रत्वादित्यर्थः॥ ननु उपादानेऽवच्छेद्यतया प्रधानं ग्रहा इति तेषामेव संस्कारान्वयः। नावच्छेदकतया गुणभूतस्यैकत्वादेरिति शङ्कते। संस्कारेति। नेति। किमेकत्वादि विशेषणमुपलक्षणं वा आद्ये विशेषणस्य कार्ययोगित्वमित्यर्थः। द्वितीयं शङ्कते—संस्कार्येति। नेति। यद्युपलक्षणमेकत्वं तर्हि तच्छ्रुतिवैयर्थ्यम्। अव्यावर्तकत्वादित्यर्थः। कथमव्यावर्तकमित्यत्राह—नहीति। तत्र हेतुः—एकत्वेति। राजश्रुतेर्वैषम्यमाह—राजयोगस्त्विति॥

ननु तर्हि एकत्वविवक्षायामपि कथं ग्रहान्तरनिवृत्तिरित्यत्राह—अत इति। श्रुतिवलेनैकत्वविशिष्टस्य ग्रहस्य संमार्गान्वये कार्यान्वयादेकत्वस्य विशेषणतेति युक्तं द्वित्वादिनिवर्तकत्वं उपलक्षणत्वे तु नैवमित्यर्थः। श्रुतिहाने बाधमाह—श्रुतीति। तत्र शङ्कते—विभक्त्येति। कर्मैकत्वयोर्विभक्त्या द्रव्यगतयोर्युगपदभिधानान्नैकत्वं कर्म अतस्तस्य न संमार्गान्वये श्रुतिः। एवं तर्हि पश्वेकत्वमपि करणैकत्वयोर्युगपदभिधानान्न क्रियान्वितावस्थद्रव्यान्वयीत्यत्राह—पश्वेकत्वेति। तस्योपादेयावस्थागतत्वादित्यर्थः॥

मेकत्वादीति नापेक्षोत्थितिरिति चेन्न उपादानशेषसंख्यादि-युक्ता ग्रहा एव ऐन्द्रवायवादिवाक्येषु कार्यान्तर योगिन इति नै [सै] कत्वस्य ग्रहस्य संस्कारार्हतयाऽपेक्षा शक्या। एकैकस्यैव तत्र विनियोगान्न मिलितानां ग्रहाणां कार्यान्तरयोगः।

संस्कारान्वये प्रधानं ग्रहा इति न संख्यादेः संमार्गान्वय-इति चेन्न, गुणभूतसंख्याद्यहानेन यथा शेषता तथा शेषितापि-

---

ननु उपादेयगतैकत्ववदनुपादेयगतग्रहैकत्वमपि संमार्गान्वितावस्थे नियोगे नापाद्यतामित्याह—अनुपादेयेति। युक्तमुपादेये क्रियान्वितावस्थान्वयो नियोग.देकत्वादेरुपादानेऽपेक्षितत्वात्। इह तु—अनुपादेये अपेक्षाविरहान्नि-योगान्न स्वरूपावस्थातिक्रम इति संस्कारे नैकत्वादर इत्यर्थः। अस्तुतावदिति श्रुतानुरोधिना योगेन संमार्गान्वितावस्थेङ्गीक्रियते एवं संख्येति परिहारे सत्यपि नामोपात्तविषयेपि पूर्वपक्षं वक्तुमस्तु तावदित्यङ्गीकरोति। त-द्विषये कथं संख्याविवक्षेत्यत्राह—नामेति। विभक्त्येव नाम्ना संख्या क्रिया-न्वितावगतेति न तदनादरहेतुरित्यर्थः॥

ननु नामोपात्तमपि संख्याजात्यदि उद्देश्य विषये क्रियायोगि—संस्कार्यंद्रव्योपलक्षणार्थमेव, न संस्कार्यम्। द्रव्य एव क्रियापर्यवसानादिति शङ्कते—द्रव्येति। विधेयविषये जात्यादि न प्रतीतद्रव्योपलक्षणम्। ततः पूर्वं द्रव्यस्य कार्यपर्यवसानाप्रतीतेः। कथं तर्हि द्रव्यान्तर्भाव इत्यत्राह—जात्या-दीति। जात्यादेरेवाङ्गतया विनियोगात्तदर्थमेकधीवेद्यस्यासन्नत्वेन द्वारतया कार्यान्तिर्भावः। एवं तर्हि यदेवाङ्गं तदेव संस्कार्यमिति जात्याद्युद्देश्यमेव नोपलक्षकमित्यत्राह—उद्देश्येत्विति। उद्देश्ये तु कार्यवदुद्देश्यं कार्यत्वं च जातेर्द्रव्यद्वारैवेति साक्षात्कार्ययोगी द्रव्यमुद्देश्यम्। जात्यादि तूप-लक्षणम्। नोद्देश्यम्। जात्याद्याकारतयैव द्रव्यप्रतीतेरुपलक्षणवैलक्षण्यान्न जात्यादेरुपलक्षणतेत्यत्राह— उपात्तद्रव्यमात्रमिति। उपात्तत्वेनाकारान्तरेण प्रतीतेरित्यर्थः।

ननु जात्यादिविशिष्टस्य कार्ययोगाद्विशेषणानां जात्यादीनां संस्कार-योगेप्यादरः स्यादित्यत्राह—विशेषणानीति। प्रमित विशेषणयोगे द्रव्ये पुनः

युक्ता। संस्कार्योपलक्षणा हि संख्या राजपुरुषमानयेत्यत्र राजपदवत्। अतो न संस्कारार्हतेति चेन्न, उपलक्षणत्वे ह्येकत्व श्रुतिर्व्यर्था। न ह्येकत्वेनोपलक्ष्यो विलक्षणः। एकत्व-योगस्य सर्वग्रहगामित्वात्। राजयोगस्तु न सर्वपुरुषगामीति तत्रार्थवत्ता राजश्रुतेः। अतोऽत्रैकत्वस्य संमार्गान्वयो युक्तः। श्रुतिहाने हि ग्रहश्रुतेरपि हानं स्यात्। विभक्त्या कर्मैकत्वयोः

प्रमितत्साभावादनादर इत्यर्थः। एवं तावन्नामोपात्तस्यानादरहेतुमुक्त्वा विभक्त्युपात्तस्याप्युपादानापेक्षोपनेयस्य दूरत एवानादर इत्यत्राह—विभ-क्त्यभिधेयं त्विति। उक्तामपि यूपाग्न्योरेकत्वाद्यनादरापत्तिमुपात्तत्वोद्देश्य-त्वयोर्भेदं वक्तुं पुनराह—एवमिति। अथ यूपाद्यनुपात्तोद्देश्यम्। अतोऽप्रमित-त्वेन विशेषणापेक्षं विधेयवदिति चेत्तदाह—अनुपात्तोद्देश्येति नेति। यद्यनुपा-त्तत्वेनाप्रमितं तर्हि तद्विधेयमेव नोद्देश्यम्। पुनः शङ्कते—अलौकिकतयेति। यदुद्दिश्य यद्विधीयते तत्तत्प्रत्युद्देश्यं कार्ययोगिचोद्देश्यं नोपात्तम्। ततश्च यद्यप्यलौकिकतया यूपादिपूर्वमप्रमितमनुपात्तं तथापि भाविकार्योपयोग-प्रतिसन्धानतो लब्धकार्यत्वं संस्कारविधिपरे वाक्ये उद्देश्यतामर्हतीत्यर्थः। अस्तु तावदिति। आस्तां तावदनुपात्तमनुद्देश्यमिति। उपात्तमपि नोद्देश्यतार्हं कुत इत्यत्राह—द्वितीययेति। कारकत्वार्थया द्वितीयया कारकभावेनान्वयात्सं-मार्गे ग्रहस्य विधेयतयोपादानात्॥

नन्वेवं विधानेपि प्रमितविशेषणत्वाद्ग्रहस्य न संख्याद्यपेक्षेत्यत्राह—प्रमितेति। यागार्थतया ज्ञातावच्छेदस्यापि क्रियान्तरार्थमुपादानेऽवच्छेदापेक्षा अस्त्येव। कथं तर्हि ग्रहादिशेषता, संस्कारस्य पशुपुरोडाशादिवत्कार्य-विमर्शादिति न दोषः। न च ग्रहादि प्रयोजकता संस्काराणामन्यप्रयुक्त ग्रहादेरेव संस्कारार्थमप्युपादानात्। तत्र शङ्कते—अथेति। द्वितीयायाः कारकविभक्तित्वं कारकस्थफलभागित्वांशाभिधानात्। न तु साक्षात्कार-कत्वाभिधानात्।

ननु फलभागित्वावस्थायां कारकत्वाभावात्कथं तदंशमात्रवाचिका द्वितीया कारकविभक्तिरित्यत्राह—कारकताहीति। ततः किमित्यत्राह—

प्रातिपदिकार्थगतयोः युगपदभिधानान्नैकत्वस्य संमार्गान्वये श्रुतिः। पश्वैकत्वादि तु नियोगेन क्रियान्वितावस्थ इति प्राति-पदिकार्थेऽङ्गीकृतं, इह तु अनुपादेयस्वरूपावस्थातिक्रमो न नियोगात् अतः संमार्गा [र्गे नै] न्नैकत्वादर इति चेत्।

अस्तु तावद्विभवत्यभिधेयस्येयंगतिः। नामाभिधेयस्य तु क्रियान्वयिन एवोपात्तोद्देश्यगत संख्यादेरनादरे को हेतुः। उद्देश्ये नामाभिधेयमपि संख्याजात्यादि कार्ययोगिसंस्कार्य

क्रियाया इति। क्रियायाः फलांशहेतोरपि ग्रामादेस्तस्यामपि हेतुतैव, अन्यथा तत्स्वभाव क्रियानुत्पत्तेः। फलांशाभिधानेपि द्वितीयायाः कारकविभक्तिता-प्रतीतिरित्यर्थः। तच्च फलभागित्वरूपं कर्मत्वमुत्पाद्यविकार्यसंस्कार्यतया चतुर्विधंम्। न तु शाब्दोक्तवत्संस्कार्याभावेन त्रिविधमित्याह— फलभागिता त्विति। न चेति। श्रीकरेणोत्पत्त्याद्यदर्शनेपि केवलादृष्टभागि संस्कार्यमित्यु-क्तम्। तदयुक्तम्। यतो लोके दृष्टेऽप्यलङ्कारादौ संस्कारधीप्रयोगयो-र्दर्शनाददृष्टो दृष्टो वा केवलातिशयो यत्र तत्संस्कार्यं नादृष्टमात्रभागित्यर्थः। इदमभिसंहितम्। यत्रासतो द्रव्यस्य निर्वृत्तिस्तदुत्पाद्यं, यत्र तु सत एव व्यवहारयोग्यतापत्तिः, तदाप्युभयत्र तु व्यवहारयोग्यस्यैव पूर्वावस्थापरि-हारेणावस्थान्तर परिग्रहादवयवसंस्थानविकारः तद्विकार्यं, यत्र तु पूर्वाव-स्थासद्भाव एव केवलातिशयोदयः तत्संस्कार्यमिति॥

नन्वाज्यं विलापयतीति विकार्यकर्मेत्युक्तं ग्रन्थे। तन्न युक्तम्। लोके तथाऽनुक्तेरित्याशंक्यानुक्तौ हेतुमाह—विलयनमिति। स्वभाविकघन-त्वानिश्चयस्तत्र हेतुरित्यर्थः। केन तर्हि तत्स्वभावत्वनिश्चय इत्यत्राह— गंधवत्वादिति। गन्धवत्त्वात्पार्थिवत्वं ततो घनस्वभावत्वनिश्चय इत्यर्थः॥

नन्वाद्यमाज्यं द्रवत्वस्वभावं (त्वात्)। तच्चोत्पत्तौ द्रवत्वात्। अतः कथमस्य पार्थिवत्वमिति न वाच्यमित्याह—न चेति। कुत इत्यत्राह— नोत्पत्ताविति। न ह्युत्पत्तौ दर्शनमात्रात्तत्स्वभावता। उत्पत्तौ कठिनाया

द्रव्योपलक्षणार्थं न संस्कार्यं, द्रव्ये कार्यपर्यवसानादितिचेन्न उपादेयेऽपि द्रव्य एव कार्यपर्यवसानाज्जात्यादेरुपलक्षणतापत्ते-र्जात्यादेरङ्गता न स्यात् । विधेये जात्यादि नोपलक्षणं द्रव्यस्य, पूर्वं कार्यपर्यवसानाप्रतीतेः । जात्याद्यंशेनैव द्रव्यस्य कार्यान्तर्भा-वः । उद्देश्ये तु प्रमितकार्ययोगं द्रव्यं जात्याद्युपलक्षणम् । उपात्त-मात्रमुद्देश्यम् । विशेषणानि पूर्वप्रमितानि । अप्रमितसया नाद्रि-

---

अपि करकायाः द्रवत्वस्वभाव(त्स)त्वोपगमात् । अन्यथा ! तस्या अपि पार्थिवत्वं स्यादिति भावः ।।

ननु जलादावपि गन्धोपलंभात्कथं ततः पार्थिवत्वमित्यत्राह—न च गन्धेति । जलादौ संयुक्तसमवायादेव गन्धोपलंभः ।।

ननु जलादाविवाज्येपि गन्धधीरस्त्वित्यत्राह—न च संयुक्तेति । कुत इत्यत्राह – न हीति । न चाज्यसमानगन्धं द्रव्यान्तरं प्रतीयते । यत्संयोगादा-ज्येन संयुक्तसमवायाद्गन्धप्रतीतिरिति ब्रूमः इत्यर्थः । जलादौ वैषम्य-माह—जलादौत्विति ।। नन्वाज्योत्पत्तौ द्रवत्वदर्शनात् ततः पूर्वं घनत्वावस्था-भानात् कथं विलयनस्य विकारत्वमित्यत्राह—इत्यग्निसंयोगादिति । उक्तेन प्रकारेण घनस्वभावत्वे निश्चिते उत्पत्तिकालेऽप्यग्निसंयोगादुदिताद्रवता विकार एव ।।

नन्विदं द्रवत्वं नाग्निसंयोगजं पाकजगुणानां पाकान्तरापेक्षनिवृत्ति-कत्वात् । अस्य तु द्रवत्वस्यानपेक्षितपाकान्तरतया निवृत्तेः पाकजवैधर्म्या-दिति न वाच्यमित्याह—न चेति । कुत इत्यत्राह – रूपरसेति । ततः किमित्य-त्राह—न चद्रवतेति । युक्तं चैतदित्यत्राह—अत इति । गन्धे अग्निसंयोगादित्यु-चितपदोपन्यासः । केनचित्तु पाकजोगुणः पाकान्तरेण निवर्तत इत्यत्र द्रवत्व-व्यतिरिक्तत्वे सतीति व्याप्तिमभ्युपगम्य समाधिरुक्तः, तमनुभाषते—केनचिदिति । दूषयति—स चेति । समाध्यन्तरं दूषयति—न चेति । रूपादी-नामपि पाकान्तरेण निवृत्तिदर्शनादिति भावः । प्रकृतमनुसन्धत्ते—

यंते। विभक्त्यभिधेयं तु संख्यादि उपादेयापेक्षोपनेयमिति दूरत एव तदनादर इति चेन्न, एवं तर्हि 'यूपंछिनत्ति' 'अग्गीनादधीते'त्युद्देश्यैकत्वबहुत्वे दूरतोऽनादृते स्याताम्। अनुपात्तोद्देश्य द्वयमिदं अप्रमितंविशेषणापेक्षं विधेयवदितिचेन्न, अप्रमितं यूपादि विधेयमेव नोद्देश्यं स्यात्।

अलौकिकतयोत्पत्तेःपूर्वमप्रमितं भाव्युपयोगप्रतिसन्धिलब्धकार्यभावं तत्संस्कारविधिपरेवाक्ये उद्देश्यतार्हमितिचेत्।

प्रकृतमिति। यदि कर्मावस्थैव द्वितीया वाच्या, तर्हिकथं कारकावस्थाप्रतीतिरित्यत्राह—कारकावस्था त्विति। यद्यर्थलभ्या कारकता किमिति तर्हि कारकाधिकारे कर्मसंज्ञा शब्दानां तत्राह—स्वर्गादिति। यदि कारकत्वं नार्थः उपाधिरेव तर्हि ईप्सिताद्यनेकार्थत्वेन एकशक्तिकल्पनं स्यादित्यत्राह—क्रियाफलेति। यद्यनुस्यूतं क्रियाफलभागित्वमात्रमर्थः, तर्हि क्रियाफलभागिकर्म। कर्मणि द्वितीयेत्येत्र सिद्धमिति किमिति—इप्सितानीप्सितादिभेदेन पृथक्सूत्रणमित्यत्राह—कर्मणीति। अयमर्थः—ईप्सितानीप्सिताकथितेषु-सर्वत्रानुगतं क्रियाफलभागित्वमेव द्वितीयाया मुख्योऽर्थ इत्यौत्सर्गिकं, तत्र न्यायबलात्कार्यान्तरोपयोगिग्रामादिरूपेप्सिते प्रथमधीः। तदसंभवादन्यदनीप्सितादिकमपि द्वितीयार्थ इति भेदं वक्तुं पृथक्सूत्रणमित्यर्थः। न्यायमाह—न्यायश्चेति। क्रियायाः क्लेशात्मकत्वात्प्रयोजनाकांक्षतया प्रयोजनं वक्तव्यम्। तच्च स्वजन्यमेव लाघवाद्युक्तम्। तदसंभवे अन्यदनीप्सितादिकमपि प्रयोजनम्। असंभवश्च फलयोगिन उपयोगान्तराभावादित्यर्थः। युक्तंचैतदित्याह—अत एवेति॥

ननु मैत्रावरुणाय दण्डं प्रयच्छतीत्यत्र क्रियाजन्यफलभागिनो दण्डस्य दण्डी प्रैषानन्वाहेत्यादौ उपयोगान्तरे सत्यपि अनीप्सितत्वं कथमित्यत्राह—उपयोगान्तरेपीति। सत्यं तथापि मैत्रावरुणसंप्रदानके वाक्ये संप्रदानस्य प्रधानत्वात् प्रधानान्तरे सति वाक्यभेदापत्तेरनीप्सिततयापि द्वितीयोपपत्तौ संप्रदानस्यानन्यगतिकतया द्वितीयानीप्सितार्थेति भावः॥

अस्तुतावदनुपात्तम् । उपात्तमपि नोद्देश्यं द्वितीयया कारकविभक्त्या क्रियायां विधानात् । प्रमितविशेषणमपि क्रियान्तरार्थमुपादानेऽवच्छेदापेक्षमेव । अथ कारकस्थ फलभागित्वांशाभिधायितयाकारकविभक्तिः, नतु साक्षात्कारकत्वाभिधानात् । कारकता हि क्रियाहेतुता, क्रियायाः फलान्तत्वात् फलांशप्रतिष्ठितोऽपि ग्रामादिर्गतौ हेतुरेव । अन्यथा फलांतस्वभावक्रिया-

---

ननु क्रियाफलभागित्वमेव कर्मत्वं न कारकत्वमिति कुत इत्यत्राह— कारकावस्थेति । नहिकारकत्वं कर्मत्वं तस्याधिकार(क)त्वात् । किन्तु-क्रियाफलभागित्वमेव । तस्य प्रतिपदोक्तत्वादीप्सितत्वमेव क्रियाफलभागित्वम् । ततश्च कर्मणि विहिता द्वितीया प्रतिपदोक्तकर्मार्थैव । नाधिकारिककारकत्वार्थेत्यर्थः । श्रीकरस्त्विति । कारकत्वे वाच्ये करणादिनिवृत्त्यर्थं क्रियाफलभागितोपाधिरनुज्ञेयः । तथा च वाच्योपाधिद्वितीयाङ्गीकाराद्गौरवं, क्रियाफलभागितेति गुरुतरोपाधिश्चेति भावः । तन्नेति । क्रियाफलभागित्वे वाच्ये विशिष्टरूपमेतदिति—दूर्वारम् । न कारकतादि विशिष्टं रूपम् । अतः कारकत्वं वाच्यम् । न क्रियाफलभागित्वम् । तत्तूपाधिरेव । वाच्यगौरवात् उपाधिगौरवं वरम् । यद्यपि क्रियानिर्वर्तकत्वं विशिष्टं रूपम् । तथापि कारकत्वरूपेणाविशिष्टरूपता । क्रियाफलभागित्वे तु न तादृग्रूपान्तरमिति गौरवमेवेति भावः ।

ननु कारकत्वे वाच्ये फलभागित्वोपाधौ सत्यपिकर्त्रपादाननिवृत्त्यर्थमुपाध्यन्तरमपि स्वीकार्यमित्यत्राह—कर्त्रपादानेति । किं तदित्यत्राह— कर्त्रीति । शङ्कते—यद्येकेति । आकडारादेका संज्ञेत्यधिकारात्कर्त्रपादानसंज्ञाविषये न कर्मसंज्ञाप्राप्तिरिति नोपाध्यपेक्ष्या । उत्तरं—तुल्येति । कारकार्थत्वपक्षेपि तत एव कर्त्रपादाननिवृत्तेस्ततो गौरवभीत्या क्रियाफलभागितार्थोक्तिरयुक्तेत्यर्थः । एवमीप्सितानीप्सिताकथितेषु सर्वत्रानुगतं क्रियाफलभागित्वमेव द्वितीयाया मुख्योऽर्थ इति यदुक्तं एतेन परोक्तं निरस्तमित्याह— एतेनेति । परोक्तस्वरूपमाह—प्राधान्यमेवेति । अस्यार्थः सर्वत्र द्वितीयायाः

नुत्पत्तेः । फलयोगिता तूत्पाद्यता प्राप्यता विकार्यता संस्कार्यतात्मिका क्रियाजन्या । एवं चतुर्विधकर्माभिहितं न शाब्दोक्तं त्रिविधम् । न च श्रीकरोक्त विधया चतुर्विधमुत्पत्याप्तिविकृत्यदर्शनेप्यदृष्टसंस्कारात्संस्कारविधेति । यतो दृष्टमदृष्टं च केवलातिशयतया विकाराद्विभक्तं संस्कारमाहुः इत्युक्तं तत्रैव । लोकेऽलङ्कारादौ संस्कारधीप्रयोगयोर्दर्शनात् । विलयनभाज्य-

---

प्राधान्यमीप्सितत्वमेवार्थः । गां ददातीत्यादौ तु विरोधादीप्सितत्वान्वयानुपपत्तेः तेन प्राधान्येन प्रतियोगितया सम्बन्धिगुणभावो लक्ष्यत इति । कथं निरस्तमित्यत्राह—एकार्थत्वेनेति । सर्वत्र मुख्यार्थत्वे सति न लक्षणा युक्तेतिभावः । भवत्वेवं कर्मत्वमेव द्वितीयार्थः । किमायातं संख्याया अनपेक्षायां इत्यत्राह—एवं चेति । न परमार्थमिति । सत्यमीप्सितत्वम् द्वितीयार्थः, तथाप्यार्थिककारकतामाश्रित्य विभक्तिश्रुतैकत्वादरो युक्तः । अत्र दृष्टान्तमाह—यथेति । यथा नियोज्यपदे श्रुता संख्या आर्थकर्तृतावस्थान्वयिनी कथञ्चित्प्रातिपदिकार्थगता अङ्गीकृता । तथेयमप्यार्थकारकावस्थान्वयिनीति भावः । अत्र शङ्कते—अथ विभक्तेरिति । युक्तं नियोज्यपदे श्रुतसंख्यायाः प्रातिपदिकाभिहितनियोज्यस्यार्थकर्तृत्वावस्थान्वयितया प्रातिपदिकार्थगतत्वम् । अनन्यार्थत्वात्प्रथमायाः । लिङ्गं तु प्रातिपदिकार्थः, इहतु विभक्तेर्न वचनमेवैकम् प्रयोजनम् । किन्तु कर्मत्वमपि तदर्थः । तदत्र कर्मत्वमेवार्थ इत्यर्थः ।

न युगपत्कर्मेति । उभयार्थत्वेन व्युत्पत्तेर्नैकदेशहानं युक्तमिति भावः । पाशानित्यत्र तु कथमित्यत्राह—प्रयोगसाधुतेति । ननु ब्राह्मणं न हन्यादिति कर्ममात्रार्थतयापि द्वितीया दृष्टेति शङ्कते—अथ कर्मान्वयेति । न, यद्यपीति । सत्यं रागप्राप्तवधनिषेधे यावत् ब्राह्मणवधो रागाप्राप्तस्तावद्वधनिषेध इत्यनुपादेये वधे ब्राह्मणोऽप्यनुपादेय इति नावच्छेदापेक्षा स्वतोऽस्ति । तथापि यथाश्रुतं निषेद्धुमेकत्वादरस्तत्रापि युक्त इति पूर्वपक्षिणो भावः, उक्तवक्ष्यमाणयोरसंङ्कलनायाह—सर्वमिदमिति ॥

विकार इति लोके यन्नोच्यते तत्स्वाभाविक घनत्वानिश्चयात्। गन्धवत्त्वात्पार्थिवत्वेन तन्निश्चयः। न चोत्पत्तौ द्रवत्वाद्द्रवस्वभावमाज्यं, नोत्पत्तौ दर्शनात् तत्स्वभावता, करकायाः उत्पत्तौ कठिनायाः अपि द्रवस्वभावादाप्यत्वावगमात्। न च गन्धसमवायोऽप्यपार्थिवत्वे, भूम्यामेव गन्ध इत्यनुज्ञानात्। न च संयुक्तसमवायादाज्ये गन्धधीः। नहि द्रव्यान्तरमीदृग्गन्धवत् क्लृप्तम्।

ननु निर्ज्ञातविशेषणमविवक्षितमित्यार्तिनय एव सिद्धम्। किमत्र व्युत्पाद्यमित्यत्राह—अत्रोद्देश्येति। निमित्तविशेषणमविवक्षितमिति तत्र व्युत्पाद्यम्। इह तु उद्देश्य विशेषणमविवक्षितमिति भेदः। न च तत्रान्तरीयकतया एतत्सिद्धिरित्याशङ्कनीयम्। आर्थकारकतामाश्रित्य उद्देश्ये श्रुतविवक्षाऽस्त्विति उत्थानात्। निमित्तस्य त्वार्थकारकत्वमपि नास्तीति न तद्विशेषणविवक्षेति भावः।

ननु किमिदमुद्देश्यमित्यत्राह—विधेयप्रमितीति। अस्यार्थः। यद्द्वारमुद्दिश्यशब्देन निर्दिश्य विधिर्विधेयं विधत्ते तदुद्देयं तेनाग्नेयं द्वारमपि प्रयाजादेर्नोद्देश्यम्। अशब्दनिर्दिष्टत्वात्॥

नन्वेवं दध्ना जूहोतीति दध्नो होम उद्देश्यः स्यात्। तत्राह—स्वसिद्ध्यनुगुणमिति। होमस्य विधेयदधिसिद्ध्यानुगुण्याभावान्नोद्देश्यत्वम्। अतोऽनुरक्तविधिस्तत्र, प्राप्ताप्राप्तविवेकादर्थादुद्देश्यत्वम्।

नन्वेवमुद्देशकशब्दस्याविधेयार्थत्वे विधिस्पृष्टार्थता न स्यादित्यत्राह—विधेयप्रमितिपरइति। विधित्वं नाम विधेर्विधेयप्रमितिपरत्वम्। तच्चोद्देश्याधीनमिति विधेयद्वारा विधिस्पृष्टत्वात् तस्य। अथवा स्वसिद्ध्यनुगुणमिति विधिसिद्ध्यनुगुणमित्यर्थः, तदननुगुणस्य उद्देश्यत्वायोगात्॥

ननु उद्देश्यस्यापि विधिस्पृष्टार्थत्वे तत्प्रमितिपरत्वमपि विधेयं स्यादित्यत्राह—तत्प्रमितमेव नान्यदिति। विध्यन्तरेण तत्प्रमितमेव। नाप्रमितमेव। अतो न तत्प्रमितिपरत्वमिति यावत्।

जलादौ तु कुसुमादिसौरभावमर्शाद्युक्तः संयुक्तसमवायाद्गन्ध इत्यग्नियोगादद्रवता विकार एव । न चानपेक्षितपाकान्तरश्याम-निवृत्त्या पाकजवैधर्म्यान्नाग्निसंयोगजता; रूपरसगन्धपरावृत्ति फलकपाकजो गुणः पाकान्तरेण निवर्तते । न च द्रवता गन्ध-रसादि परावृत्ति फलकाग्निसंयोगापेक्षेति । अतोऽग्निसंयोगा-दित्युचितः पदोपन्यासः । केनचिद्द्रवत्वविरहे सतीति व्याप्तितः

ननु तर्ह्यप्रमितयूपाद्युद्देश्ये प्रमितिपरता विधेः स्यादित्यत्राह— यदपीति । नन्वेवं प्रमितस्योद्देश्यत्वेन ससंख्याकस्यैव ग्रहादेः प्रमितत्वात्स-संख्याकस्यैव उद्देश्यत्वमित्यत्राह—उद्देश्येति । कार्यपर्यवसायिनः प्रमितस्यै-वोद्देश्यत्वात् तदधिकं संख्यादि विशेषणमेव । तत्स्वरूपं दर्शयति—उद्देश्य-स्वरूप इति ॥

ननु (विभक्तितो) विधेयान्वयं नामोक्तं संख्यादि कथं विशेषण-मित्यत्राह—विधेयान्वितमपीति । संख्यादेर्द्रव्यनिरपेक्षस्य क्रियान्वयानर्हत्वात् द्रव्यधर्मताऽवश्यं वाच्येति नामोक्तमपि द्रव्यविशेषणार्हत्वाद्विशेषणमुच्यत इति । एतच्चान्तर्भावितसंख्येयत्वाभावे वेदितव्यम् । समासान्तर्गतत्वे त्वन्तर्भावितसंख्येयतया उद्देश्यद्रव्यपरत्वमेवेति विशेषणत्वं स्फुटमेवेत्याह— समासान्तर्गतं त्विति ॥

ननु वेदे वक्तुरभावात्थं विवक्षितत्वमविवक्षितत्वं वेत्याशंक्य गौणो वाद इत्याह—विशेषणस्येति । ननु नामोपात्तविभक्त्युक्तयोः संख्ययोस्तद-तत्परत्वं कीदृशमित्यत्राह—अतत्परत्वञ्चेति । विभक्तिवाच्यस्यार्थान्तरस्य (परत्वाय) कर्मत्वस्य भावात् तदर्थान्तरस्य संख्यायाः अनपेक्षिताया अन्विताभिधानाभावात् तत्रान्विताभिधान बाह्यत्वापादकमतत्परत्वम् । नामोपात्ते तु संख्याव्यतिरेकेणार्थान्तरस्याभावात् प्रमितानुवादमात्रेणा-न्वितत्वाद्वाक्यमेवान्तर्निवेशकरम् । इतरथा तद्वाचकशब्दस्य वाक्येऽनन्व-यापत्तेः । विभक्त्युक्ते तु वाक्यप्रमेयान्तर्निवेशयोग्यार्थान्तरसंभवेनवैरूप्या-त्तद्युक्तमिति भावः ।

समाधिरुक्तः । स विमतबोधनायायुक्तः । नचात्र पाकजो हि स्पर्श इति पाठावगमात् समाधिः ।

प्रकृतमुच्यते—चतुर्विधकर्मावस्था हि द्वितीया वाच्या । कारकावस्था तु क्रियाफलानां तदवस्थाश्रितानामेवोत्पत्तेरर्थलभ्या । स्वर्गादिफलमपूर्वव्यवहितमकारकावस्थास्थं यत्तद्भागिता द्वितीयार्थो माभूदिति कारकाधिकारे कर्मसंज्ञाशब्दानां

नन्वेवमनेकव्युत्पाद्याविवक्षाप्रकारभेदेनाधिकरणभेदः स्यादित्यत्राह --एवं विधेति । पूर्वपक्षैक्यादधिकरणमेकमिति भावः । नन्वेवं नामोक्तविभक्त्युक्त्योरुदाहरणे किमिति भाष्ये विभक्त्युक्तमेवोदाहृतमित्यत्राह—इयं चेति । एवं स्थिते पूर्वपक्षसंक्षेपमाह --एवं चेति । निगदव्याख्यानमेतत् । राद्धान्तस्त्विति । स्वत स्तावत्प्रमितविशेषणे प्रमित्सा नास्त्येव । उद्देश्यं च प्रमितमेवेति न तद्विशेषणापेक्षेति तदेकत्वमविवक्षितमेव । यूपाहवनीयादौ तु उत्तरभाविप्रमितताप्रतिसन्धानतो लब्धेष्युद्देश्यत्वे प्रमिततास्त्येवेति विशेषणविवक्षा । यत एवं प्रमितविषये प्रमित्सा नास्ति अतएव सत्रादुदवसाय पृष्ठशमनीयेन यजेरन्निति विधेयत्वेनोपादेयस्यापि कर्त्तुः पूर्वं निरूपितत्वात् यजेरन्निति बहुत्वमविवक्षितम् । अत उद्देश्यगतत्वमतन्त्रं विशेषणाविवक्षायाम् । किन्तु प्रमितगतत्वमेव । तदाह—अत एवेति । कथं तर्ह्युद्देश्यगतविशेषणमविवक्षितमिति तान्त्रिकप्रसिद्धिरित्यत्राह—प्रायिकमिति ।

नन्वत्र श्रुतिबलाद्रक्तपटवत् प्रमित्सोत्थाप्यतामित्यत्राह—रक्तपटवदिति । यस्मिन् कल्पितेविवक्षितपदार्थस्वरूपस्यान्यथात्वं भवति न तत्कल्प्यम् । इह तु संस्कारयोगिनो ग्रहादेः प्रमितत्वमेवापेक्षितमिति तद्रूपभङ्गप्रसङ्गात्प्रमित्सोत्थापनमयुक्तम् । अत उपात्तद्रव्यमेवोद्देश्यम् । विशेषणं तु संख्याद्युपलक्षणमिति भावः ।

नन्वेवं जातिवाचिना शब्देन उद्देशो जातेरेव युक्तः । न द्रव्यस्येत्यत्राह—अत एवेति । सत्यं जातिवाचित्वं शब्दस्य उद्देशस्तु न तस्याः । द्रव्यो-

क्रियाफलभागितामात्रशक्तितया नानेकशक्तिः । कर्मणि द्वितीयेत्येव सिद्धे यदीप्सितानीप्सिताकथितादिभेदतः कर्मसंज्ञासूत्रणं, तदीप्सिते न्यायतः प्रथमं पूर्वधर्मासंभवे त्वन्यदिति भेदार्थं । न्यायश्च क्रिया क्लेशतया प्रयोजनापेक्षिणी । तस्याः स्वजन्यमेव लाघवात्प्रयोजनं, असंभवेऽन्यत् । असंभवस्तु फलयोगिन उपयोगान्तराभावात् । अत एव गां ददातीत्यनी-

---

पादानेऽवच्छेदोपयोगित्वादुपात्तद्रव्यस्यैव संस्कारयोग्यत्वात् द्रव्ये चोद्देश्ये जातिशब्दो लक्षणया वर्तते । संस्कारानुपपत्तिर्लक्षणाबीजम् । सम्बन्धश्चापादानेऽवच्छेद्यतया । उपादेये तु यथाभिधानं विधेयतेति जातेरेव विधानाज्जातिमतः स्वार्थं कारकत्वम् । उद्देशे तु नैवमुपात्तपरत्वात् द्रव्यलक्षणैव ।

नन्वाद्ये उपादानरूपे निर्वापादिसंस्कारः, कथमुपात्तपरता जातिशब्दस्य, पूर्वमुपादानान्तराभावादित्यत्राह—आद्ये त्विति । आद्ये तूपादाने उपादानान्तराभावादगत्या कथंचिज्जातिपरेणैवोद्देशः । अवघातादौ तु उपात्तसद्भावादगतिर्नास्तीति भावः । कथं तर्हि संस्कारे सर्वत्र द्रव्यपरो जातिशब्द इत्युक्तमित्यत्राह—सम्मार्गेति । रक्तपटवैषम्यमाह—रक्तपटस्य त्विति ।

ननु संख्यादेर्विशेषणत्वं माभूत् । द्रव्यवत्पृथगुद्देश्यतास्त्विति शङ्कामात्रमनूद्य वाक्यभेदापत्तेः परिहृति—यदिति । (यदि) विभक्त्युक्ते विशेषं वक्तुमर्थमनुवदति—नामविभक्तीति । विशेषमाह—विभक्त्युक्त इति । क्रियानन्वयमुपपादयति—नामार्थगतेति । तथा हि—नैकत्वविशिष्टग्रहस्य कर्मतया क्रियान्वयः । नापि ग्रहविशिष्टस्य एकत्वस्य । नापि क्रियाविशिष्टस्य एकत्वस्य ग्रहान्वयः, नापि क्रियाविशिष्टेन ग्रहेणैकत्वस्य । न च क्रियामात्रेणैकत्वस्यान्वयः । नामार्थगततया कर्मत्वैकत्वयोर्युगपदभिधानात् ।

नन्वार्थकारकत्वेन उपादेयद्रव्यगततास्त्वित्यत्राह-- नयार्थमिति । तत्र हेतुः—यथाकर्मत्वमिति । ननु ग्रहोद्देशेनैकत्वं विधीयताम् । एकत्वोद्देशेन वा ग्रहत्वं, माभूत् क्रियान्वय इत्यत्राह—नानाविधेति ।

प्सितता गोः । उपयोगान्तराभावात् । उपयोगान्तरेपि दण्डस्य मैत्रावरुणसंप्रदानके वाक्ये प्रधानान्तरेसति वाक्यभेदापत्तेः अनीप्सितेऽपि द्वितीया मुख्येत्यनीप्सितता कारकावस्था न कर्मेति कारकाधिकारात् । ईप्सितादि कर्मेति प्रतिपदोक्तम् ।

अतः कर्माणि द्वितीया न कारकार्था ।

श्रोकरस्तु—कारकावस्थाभिधाने करणादिभ्यो निवर्तयितुं क्रियाफलभागितोपाधिरनुज्ञेयः । तदा गौरवमित्याह-तन्न,

---

ननु विवक्षितेप्येकत्वे प्रतिप्रधानावृत्तिनयात्सर्वग्रहेषु संमार्गानुष्ठानादप्रयोजना चिन्ता स्यादिति नाशङ्कनीयमित्याह—न चेति । कुत इत्यत्राह—यत इति । यतोऽधिकारावृत्तावधिकारविधिसिध्यर्थं प्रयोगावृत्तावावृत्तिः सम्मार्गस्य, नैकस्मिन् प्रयोगे । अत एक एवग्रहः संमार्ष्टव्यः । अन्यथावगतैकत्वबाधापत्तिरिति यावत् ।

ननु भाष्य उद्देश्यगतमविवक्षितमुपादेयगतं विवक्षितमित्युक्तम् । तदयुक्तम् । विवक्षाया अत्राप्युत्पाद्यत्वादित्यत्राह—अविवक्षितमिति । सत्यमुद्देश्यगतमविवक्षितमित्येव व्युत्पाद्यम् । तथापि तदर्थवैषम्यकथनाय विवक्षिताविवक्षितमुभयमुक्तम् । लक्षणहेत्वोरिति शतृप्रत्ययः । अतस्तद्वदितुं ब्रूत इति यावत् । अत्र—श्लोके अनुष्टुब्लक्षणवैधुर्यदोषः प्रतिविधेयः । अधिकरणार्थं श्लोकेन संगृह्णाति—एकत्वस्येति । सम्मार्गेण सम्यङ्मार्गेण ग्रहसंग्रहः ग्रहसमूहः । एकत्वश्रुतिनिबन्धनस्य एकग्रहस्य विग्रहं कृत्वा सम्मार्गेण सम्यक्सिद्धान्तमार्गेण ग्रहसमूहं ग्राहितः प्रापितः संमार्गः संस्कार इत्यर्थः ।

ग्रहं संमार्ष्टीत्यत्रैव चिन्ता । किं संमार्गस्य चमसेष्वपि शेषत्वमुत ग्रहेष्वेवेति । ननु ग्रहमिति श्रुतेर्ग्रहशेषतैव संमार्गस्य न चमसशेषतेति कथमियं चिन्तोत्थितेत्याशंक्य पूर्वपक्षोपस्थानमवान्तरसङ्गतिं चाह—यदि कार्यवदिति । यदि कार्ययोगादुद्देश्यत्वं तर्हि यागार्थसोमधारणरूपकार्ययोगि-

क्रियाफलभागितैव तावद्विशिष्टरूपं गौरवापादकं न कारकतादि विशिष्टरूपं कर्त्रपादान निर्वृत्त्यर्थं फलभागित्वेऽप्युपाध्यन्तरं तुल्यं कर्त्रपादानेतरत्वं तेनैवोक्तम् । यद्येका संज्ञेत्यधिकारादुपाध्यनपेक्षा सा तुल्या कारकार्थत्वेऽपि ।

एतेनैतन्निरस्तम् यदाहुः प्राधान्यमेव सर्वत्र द्वितीयावदिति स्वतः ।

त्वं ग्रहचमसयोरविशिष्टमित्युभयमप्युद्देश्यम् ग्रहश्रुतिरप्युभयोपलक्षणार्थेत्युभयशेषत्वमस्तु संमार्गस्योत्थानादवान्तरसङ्गतिरित्यर्थः ।

नन्वेवमप्यभ्यासापूर्वभेदाद्ग्रहचमसानां साधनत्वं विलक्षणमिति ग्रहसाधनत्वमेवान्तरङ्गं ग्रहश्रुतिरुत्थापयति नेतरदिति कथं पूर्वपक्ष इत्यत्राह—पूर्वपक्षिस्त्विति । सत्यं साधनत्वम् । तथापि ग्राहकापेक्षायाः प्राबल्यं; ग्राहकेण च सोमसेकापनयरूपदृष्टकार्यं किञ्चित्काररूपमपेक्षितं तत्सामर्थ्यं च सम्मार्गस्य । तच्च सर्वसोमाधारपात्रवर्त्तीति तदेव सर्वसोमाधारपात्रसाधनत्वं लक्षणीयम् । न ग्रहमात्रसाधनत्वमित्यर्थः । हन्त्यादिकार्यं तु वितुषत्वादि नाज्यसान्नाय्ययोर्विध्यपेक्षितमित्याह— अवधातादिति ।

नन्वेवं क्रियानिर्वृत्तिरूपमुद्धननादिवत्स्फ्यादिकार्यं सर्वक्रियास्वविशिष्टम् । अन्यक्रियासिद्धेरपि विध्यपेक्षितत्वात् । तदपेक्षायाश्च प्राबल्यात्सर्वदृष्टक्रियानिर्वृत्तौ स्फ्यादिविनियोगः स्यादित्यत्राह— स्फयादिकार्यमिति । स्फ्येनोद्धन्तीत्युद्धननादिविनियोगानुरोधात् विध्यपेक्षितमपि स्फ्यादिकार्यं संकुचितम् । विनियोगानुसारित्वाद्विधेः । अन्यथा—विनियोगवाक्यमनर्थकमेव स्यात् । ग्रहविनियोगस्तु न कार्यसंकोचायालम् । विध्याकांक्षायाः पदमात्रसौरस्याभावेपि युक्तत्वाद्वाक्यानर्थक्यं नास्त्येव । संमार्गविधिपरत्वात् वाक्यस्य ।स्फ्यादिद्रव्यन्तु उत्पत्तित एव प्राप्तिमिति तत्र वाक्यानर्थक्यमेवेति भावः । अभ्युच्चयमाह—एवं चेति ।

नन्वविवक्षितग्रहसम्बन्ध सम्मार्गमात्रविधौ कथं द्वारविशेषलाभ इत्यत्राह—लिङ्गादेवेति । अत्र दृष्टान्तमाह—प्रकरण इति, राद्धान्तस्त्विति

विरोधात्तेन संबन्धिगुणभावस्तु लक्ष्यत इति । एकार्थत्वेन सर्वत्र मुख्यार्थत्वे सति न लक्षणाश्रयणम् । एवं च कार्यान्तरोपयोगिनो ग्रहादेरीप्सितत्वान्न कारकतयोपादानावच्छेदापेक्षेति चेन्न परमार्थिकं कारकतामाश्रित्य विभक्तिश्रुतमेकत्वाद्याश्रीयताम् । यथा नियोज्यपदे विभक्त्युक्ता संख्या, कर्तृत्वावस्थानन्वयिनी कथंचित्प्रातिपदिकार्थगताऽङ्गीकृता ।

यत्र श्रुतिरस्तितत्र श्रुतिमूलमेव शेषिभूतं द्वारकार्यमिति श्रुतानां ग्रहव्यक्तीनामेव शेषिता ।

ननु विधिविधेयपदार्थयोः सोमसेकापनय यत्किंचित्कार्यापेक्षि(त) त्वाद्विध्यपेक्षायां च [याश्च] प्राबल्यात्कार्यस्य च सर्वाधारपात्रवर्तित्वात्सर्वशेषता संमार्गस्य युक्तेत्याशंक्याह—ग्राहकोऽपीति । विधिरपि कल्पनालसश्रुतानुरोधात्तद्गतमेव किञ्चित्कारमपेक्षितं गृह्णाति, न श्रुतं विहाय द्वारान्तरं परिकल्प्य तद्गतग्राही अन्यत्र विध्यपेक्षितकार्यस्यान्येनापि सिद्धेः, श्रुतिमूलं कल्प्यम् किंचित्कार्यम् । न तु श्रुतिबाधायालमित्यर्थः ।।

ननु ग्रहश्रुतिश्चमसानुगतस्यापि साधनत्वस्य लक्षकत्वात् व्रीहिश्रुतिवन्न बाधिकेत्यत्राह —ग्रहश्रुतिरिति यज्यभ्यासापूर्वभेदेन ग्रहाणां चमसानां च विलक्षणसाधनत्वाद्ग्रहश्रुतिः मुख्यसम्बन्धिग्रहसाधारणसाधनत्वं लक्षयतीति चमसव्यावर्तिका ।

ननु तर्हि व्रीहिश्रुतिरप्येवं स्यादित्यत्राह—व्रीहिश्रुतिस्त्विति । तत्र हेतुरेकेति । व्रीहियवयोरेकावान्तरापूर्वद्वारत्वान्न साधनत्वभेद इति न व्रीहिश्रुतेर्यवनिवृत्तिः । अत्रेदं तत्त्वम्—यद्यपि व्रीहिप्रयोगे अन्यदवान्तरापूर्वं यवप्रयोगेप्यन्यत्, तथापि शास्त्रार्थीभूतमवान्तरापूर्वद्वारा [पूर्वं] एकमेव प्रत्यधिकारं प्रयोगावृत्तौ प्रति[प्र]योगमवान्तरापूर्वव्यक्तिभेदमात्रं तत्र व्रीहिभिर्यजेत यवैर्यजेतेति शास्त्रार्थीभूतावान्तरापूर्वद्वारा साधनत्वम्, नावृत्तिभेदभिन्नव्यक्ति भेदद्वारा अन्यथा विकल्पायोगादिति युक्तमुभयोरपिसंस्कारान्वयित्वम्, ग्रहचमसयोस्त्वावृत्ति भेदभिन्नावान्तरापूर्वद्वा[रै]व

अथ विभक्तेर्न संख्यावचनमेवैकं प्रयोजनमिति कर्मत्वमात्रमत्रार्थ इत्येकत्वश्रुतिरेव नास्ति । प्रथमा तु अकारकविभक्तित्वात्संख्यार्थैवेति नियोज्येश्रुताभिहितकर्त्रवस्थान्वयिनी दृष्टेति चेन्न, युगपत्कर्मसंख्याभिधानव्युत्पत्तेः प्रयोगसाधुत्वाश्रयणं च सर्वथाऽनन्वयात्पाशानित्यादौ । अथ कर्मान्वयमात्रेऽपि ब्राह्मणं न हन्यादिति द्वितीया दृष्टेति चेन्न, यद्यपि रागप्रवृत्तवध-

---

साधनत्वम्, ग्रहपात्राणामल्पपरिमाणत्वात् ग्रहसंस्कार्यस्य च सोमरसस्य विपुलत्वादन्य एव सोमरसभागो ग्रहसंस्कार्यः । अन्यश्चमससंस्कार्यः, अत एकस्मिन्नपि प्रयोगे ग्रहसंस्कार्यसोमरसभागसाध्यावान्तरापूर्वद्वारा ग्रहसाधनत्वम्, न चमससंस्कार्यसोमरसभागसाध्यावान्तरापूर्वद्वारा । एवं चमसेऽपीति ग्रहश्रुतिश्चमसव्यावर्तिका युक्तेति ।

ननु ग्रहश्रुत्यनुरोधे वाक्यार्थविधिः स्यादित्यत्राह—ग्रहेति । ग्रहाणां वाक्यान्तरप्राप्तत्वात्तदुद्देशेन संमार्गविधेर्लिङ्पद श्रुतविधिरेव न पदान्तरोपात्तस्य विधिरित्यर्थः ॥

नन्वेवं प्रकरणोपनिर्विष्टमन्त्रेऽपि न लिङ्गात् द्वारविशेषलाभ इत्यत्राह—श्रुत्यभावे त्विति । अत्रविवरणपञ्चिकायां ग्रहशब्दश्रवणात् संमार्गस्य तदपूर्वग्रहणमस्त्वित्यभ्यासापूर्वगृहीतः संमार्ग इत्युक्तम् । तदयुक्तम्, अधिकारविधेरेव ग्राहकत्वादित्याशंक्य तदभिप्रायमाह—विवरणेत्विति ॥

वाजपेये सप्तदशारत्निर्वाजपेयस्य यूप इतिश्रुतम् । तत्र चिन्ता, किं सप्तदशारत्निता वाजपेयशेषश्रुता सती तदीयोर्ध्वपात्रेषु निविशते उत यूपशेषभूतेति ॥

ननु चमसनयानन्तरमस्य कः प्रसङ्ग इत्याशंक्य गतचिन्ताद्वयमाह—पूर्वपक्षस्त्विति विशेषणमिति ॥

ननु सप्तदशारत्निर्यूप इति यूपसामानाधिकरण्यबलात् यूपोद्देशप्रतीतेः कथं वाजपेयोद्देशेन पूर्वपक्ष इत्यत्राह—पूर्वपक्षस्त्विति । कुत इत्य-

निषेधे वध्योऽनुपादेय इत्यवच्छेदापेक्षा स्वतो नास्ति तथापि यथाश्रुतं निषेद्धुं युक्तमिति एकत्वादरणं युक्तं, सर्वमिदं पूर्वपक्षप्रपञ्चरूपम् ।

संक्षेपस्तु पूर्वोत्तरपक्षयोरुच्यते । अत्रोद्देश्यविशेषणमविवक्षितमिति व्युत्पाद्यते । विधेयप्रमितिपरो हि विधिर्विधेयं स्वसिद्ध्यनुगुणं द्वारं, यदुद्दिश्य विधत्ते तदुद्देश्यमित्युच्यते । तत्प्रमितमेव नान्यत् । यदपि यूपाहवनीयाद्युद्देश्यं तदपि विधेयान्वयादु-

---

त्राह—यूपे हीति, यूप उद्देश्ये वाजपेयपदस्यानन्वयः स्यात् । षष्ठ्यन्तत्वात् षष्ठ्याश्च सम्बन्धवाचकत्वात् ॥ यूपस्य च पशुयागार्थतया बाजपेयासम्बन्धितेति न षष्ठ्या विशेषण विशेष्यतान्वयः, साक्षात्सम्बन्ध एव लोके विशेषणविशेष्यता दर्शनादिति भावः ॥

ननु वाजपेयोद्देशेन सप्तदशारत्निता विधातुमशक्या मूर्तद्रव्याश्रितत्वात् तस्याः, तस्य त्वमूर्तत्वात् । अतो वाजपेयसंबन्धेप्यनन्वितत्वं तदवस्थमेवेत्यत्राह—वाजपेयेति । वाजपेयान्वयार्थमाश्रयापेक्षायां यूपपदेनोर्ध्वतादिगुणयोगाद्वाजयेयार्थोर्ध्वपात्रार्पणात्तदाश्रयणेन तदन्वयोपपत्तिरित्यनन्वयाद्वरं गौणीवृत्तिरित्यर्थः । एवं च वाजपेयपदं तावद्दुद्देशकतया कार्यान्वितार्थं यूपपदस्याप्युद्देश्यपूरकतया उद्देश्यकोटित्वात् तथेति पदद्वयमपि कार्यान्वितार्थं पूर्वपक्षे । तदाह—एवमिति ॥

ननु युपोद्देशपक्षे तस्यारत्निप्राप्तेः सप्तदशत्वमात्रविधेर्लाघवमिति नाशङ्कनीयमित्याह—नचेति । यथाभिधानं विधानस्य युक्तत्वात्समासेन च विशिष्टाभिधानाब्दिशिष्टं विधेयं युक्तम्, न समासान्तर्गतविशेषणमात्रम्, पदार्थैकदेशविनियोगविरोधात् । युक्तं चैतदित्याह—अत एवेति । किञ्चप्रकरणानुग्रहादपि वाजपेयस्यैव युक्तमुद्देश्यत्वम्, इत्यत्राह—प्रधानेति, राद्धान्तस्त्विति । यूपपदमेवोद्देशकम्, न तु वाजपेयपदम्, यूपपदमुख्यार्थत्वार्थं, सप्तदशारत्निर्यूप इति सामानाधिकरण्यबलाच्च ॥

ननु यदि यूप उद्देश्यस्तर्हि वाजपेयस्येति षष्ठ्यन्तस्यानन्वय इत्यत्राह—न चेति । कुतः पुनः संबम्धाभावे विशेषणषष्ठीत्यत्राह—सम्बन्धीति,

त्तरभाविप्रमितत्वप्रतिसंधानादेव नान्यथा। उद्देश्यविशेषणं चोद्देश्ये लब्धे यदधिकं उद्देश्यस्वरूपे विभक्त्युक्तं नामोक्तं च विशेषणम्। विधेयान्वितमपि नामोक्तमुद्देश्यधर्मतया तद्विशेषणत्वार्हमित्येवं विशेषणमुच्यते। समासान्तर्गतं तूद्देश्यपरमेव। विशेषणस्याविवक्षितत्वं च वाक्यस्यातत्परत्वं वक्तुमनिष्टमपि तथेति गौणो वादः। अतत्परत्वं च विभक्त्युक्तस्यान्विताभिधानबाह्यत्वापादकम्। नामोक्तस्य वाक्यप्रमेयानन्तर्निवेशकरं

उक्तार्थसाक्षित्वेन पञ्चिकामवतारयति—तदुक्तमिति ।।

ननु यथा चैत्रस्य पुत्र इत्यत्र पितृपुत्रसम्बन्धः एवं चैत्रस्य नप्तेत्यत्रापि नप्तृप्रपितामहसम्बन्धोऽस्ति तत्कथं सम्बन्धाभावः। अभावे वा कथं सम्बन्धधीः, कथं वा षष्ठीप्रयोग इत्यत्राह—अयं भावइति। जन्यजनकभावादयः सम्बन्धाः क्रियानिमित्तका इत्यर्थः।

ननु यथा चैत्रक्रियया तस्य पुत्रेण सम्बन्धः क्रियते, तथा नप्त्रापि सम्बन्धः क्रियतामित्यत्राह—क्रियाहीति। उत्पादनरूपा क्रिया हि कर्त्तुरुत्पादयितुश्चैत्रस्य स्वफलेन स्वोत्पाद्येन स्वोत्पत्त्यैव स्वोत्पत्तिक्षण एवसम्बन्धकरी नान्येन व्यवहितेनान्यस्य स्वकर्तृव्यतिरिक्तस्यान्यदा कालान्तरे। एतेन मध्यस्थपुत्रक्रिययापि नप्तृप्रपितामहसम्बन्धो नास्तीत्युक्तम् भवति।

नन्वेवं कर्तृफलबहिर्भूतस्य सम्वन्धाभावे कथं सम्बन्धव्यपदेशः? कथं वा षष्ठीप्रयोग इत्यत्राह—तदुभयेति। तथा च चैत्रस्य नप्तेत्यादि प्रयोगसिद्धिरितिभावः।।

ननु यदि नप्तुश्चैत्रेण सह साक्षात्सम्बन्धः तर्हि यस्य येन सम्बन्धस्तस्यैव षष्ठ्या सम्बन्धोऽभिधातुं युक्तः। नासम्बन्धिन इत्यत्राह—पुत्रपौत्र इति, पुत्रपुत्रत्वस्य साक्षादसम्वन्धिनोऽपि पितामहस्य निर्देश एवाभिव्यक्तिः, तदपेक्षत्वान्नप्तृत्वस्य पौत्रपुत्रत्वस्यैव नप्तृशब्दार्थत्वात्। अत्र दृष्टान्तः—यथेति।।

प्रमितानुवादमान्त्रेणान्विततापादकं। एवंविधोद्देश्यविशेषणस्याविवक्षितत्वप्रतिपक्षरूपेणात्रैक एव पूर्वः पक्षः। इयं च विभक्त्युक्तमुदाहृत्य चिन्ता तत्र ह्यविवक्षायामनन्वयः। स च व्युत्पत्त्यपेक्षित इति। एवं च श्रुतित एव विवक्षापेक्षोत्थानाच्छ्रुत्यनुगुणतयैव द्वितीयायाः कर्मत्वहानात् कारकवाचित्वनिर्णयाच्छ्रुतिबलेनैव प्रमितविशेषणस्यापि संस्कार्यरूपेणापेक्षोत्थापनात् नामोक्तमपि वाक्यप्रमेयान्तर्गतम् सतिसंभवे व्युत्प-

---

ननु यदि समवायसमवायिनोर्न सम्बन्धः कथं तर्हि सम्बन्धव्यपदेशः षष्ठी चेत्यत्राह—औदासीन्येति। मातृभ्रात्रादावपि औपचारिकसम्बन्धनिबन्धन एव दृष्टादृष्टव्यवहारः न साक्षात्सम्बन्धनिबन्धन इत्याह—एवं चेति। दृष्टान्तसिद्धमर्थं दार्ष्टान्तिके दर्शयति—तदेवमिति। अत्र केचित् अस्य नप्तेत्यादिप्रतीतिप्रयोगाभ्यां नप्तृपितामहसम्बन्धो नाम सम्बन्धान्तरमुपेयमित्यूचुः। तदयुक्तमित्याह—एवञ्चेति। एवमुक्तेन प्रकारेण सम्बन्धान्तरोत्पत्तौ कारणाभावादौपचारिकसम्बन्धे विधिप्रयोगयोरुपपत्तेर्न सम्बन्धान्तरकल्पनायां प्रमाणमस्ति। इदमत्राभिसंहितम्—चैत्रक्रिया चैत्र तत्पुत्रयोरेव सम्बन्धकरी, चैत्रपुत्रसंबन्धोऽपि न चैत्रनप्तृसम्बन्धकरः, सम्बन्धस्य सम्बन्धान्तरोत्पादकत्वे संयोगस्यैव प्रयोजकत्वात्। न च यथा पितुः प्रतिग्रहक्रियाकर्तृ बहिर्भूतेनापि पुत्रेण स्वफलस्य द्रव्यस्य स्वस्वामिलक्षण सम्बन्धकरी, तथात्रापि चैत्रक्रियैव सम्बन्धकरीति वाच्यम्। यतस्तत्रापि न प्रतिग्रहक्रिया पुत्रद्रव्ययोः सम्बन्धकरी। किन्तु जनिक्रियैव, अथवा न तत्रापि वास्तवः सम्बन्धः। किन्तु औपचारिक एवेत्यलमतिविस्तरेण।

श्रीकरस्त्विति। यूपवाजपेययोरुपकार्योपकारकभावेन साक्षात्सम्बन्धात् षष्ठीत्याहेत्यर्थः। तन्नेति। अङ्गाङ्गत्वाद्यूपस्य न वाजपेये साक्षादुपकारकत्वम्, किन्तु - वाजपेयोपकारकं प्रत्युपकारकत्वम्, अत उपकारोपकारकतैव यूपस्य, न साक्षादुपकारकता। अथ परम्परया उपकारकत्वात्

न्नम् । अतस्तदपि स्वरसात् तथाश्रुतमित्यपेक्षोत्थापनात् युक्तं । श्रुतितः सर्वं परिकल्प्यत इति ।

राद्धान्तस्तु स्वरसात्तावत्प्रमितविशेषणे प्रमित्सा नास्ति । उद्देश्यं प्रमितमेव स्वरसात् । यत्तुविधेयान्वयपूर्वकं भाविप्रमितताप्रतिसंधानादुद्देश्यं तत्र प्रमित्सास्त्येव । अत एवोद्देश्यत्वमतन्त्रम् । विधेयस्यापि पूर्वं निरूपितस्यापि कर्तुः सत्रादुदवसाय पृष्ठशमनीयेन यजेरन्नित्यविवक्षितं बहुत्वम् प्रमित्साभावादेव प्राप्ति-

---

तस्य सम्बन्ध इति चेत्तत्राह—इति रहस्यमिति । अयमाशयः—यदि साक्षादुपकारकत्वाभावेन परम्परया सम्बन्ध इष्टस्तर्हि औपचारिकसंबन्ध एवेति मत्पक्ष एवाश्रितः स्यादिति पूर्वोक्तैव सङ्गतिः, पदद्वयस्यापि कार्यान्वितार्थत्वं पूर्वपक्ष इति पूर्वोक्तमनूद्य पञ्चिकायामेव तत्पदद्वयस्यानर्थक्यापादनेन निरस्तमित्याह—यदुक्तमिति । राद्धान्तिपक्षे लाभमाह—अस्मिन्निति । विवरणे त्विति ।।

नन्वरत्न्युपदेशेनात्र सप्तदशसंख्याविधिः यूपवाजपेयौ प्राप्तानुवादौ । तत्र यूपगतानामरत्नीनां सप्तदशताविधेर्यूपोऽरत्निविशेषणम् । वाजपेयशब्दस्तु यदि न मुख्यतया यूपविशेषणं, न तर्हि पशुयागलक्षणया विशेषणमस्तु कथं पूर्वपक्ष इत्यत्राह—सप्तदशतेति । सत्यं यूपवाजपेयपदे प्राप्तानुवादौ । किन्तु-अनुवादे मुख्यार्थतयाऽनुवादो युक्तः, तत्रोभयोरपि मुख्यार्थत्वमशक्यम् । तत्र किंपदं मुख्यमित्यपेक्षायां वाजपेयपदं मुख्यम्, यूपपदं तु पात्रे गौणं-युक्तमौपदेशिकत्वाद्वाजपेयस्य, यूपस्य त्वातिदेशिकत्वादित्यर्थः ।।

नन्वेवमरत्न्यर्थस्याप्राप्तौ तस्यापि विधौ वाक्यभेदः स्यादित्यत्राह—तदेति । तत्र हेतुः—समानेति । अप्राप्तौ तु विशिष्टविधिगौरवं न दोषायेति भावः । अत्र दृष्टान्तमाह—अत एवेति । पक्षान्तरे दोषमाह यदिति । एवं स्थिते पूर्वपक्षे राद्धान्त उच्यते । यूप इति । अरत्न्यर्थस्य प्राप्तेः संख्यामात्रविधाने गौरवदोषो नास्तीत्यर्थः ।।

ननु समासार्थस्यैकस्य विशिष्टतया विधेयत्वेन प्रतीतेर्नावयवविधिरित्युक्तमित्यत्राह—न चेति । नन्वेवं त्र्यङ्गैरित्यत्रापि संख्यामात्रविधिः

कमुद्देश्ये प्रमितत्वं न विधेये इत्युद्देश्ये तान्त्रिकप्रसिद्धिः। रक्तपटवत्प्रमितत्सोत्थापनमशक्यं प्रमितकार्ययोगिरूपादन्यथात्वे संस्कार्यत्वानर्हत्वप्रसङ्गात्। अत एवोद्देशोऽपि जातिवाचिनापि न जातेः तस्या उपादाने अवच्छेदोपयोगित्वात्। तदुपात्तस्यावघातादिसंस्कार्यत्वात्। आद्ये तूपादानरूपे संस्कारे उद्देशोपि जातिपरेणैव संमार्गादिभिः संस्कार्यमभिप्रेत्योक्तम्। संस्कार्यद्रव्यपरो जातिशब्द इति। रक्तपटस्य तूपादेयकर्तृविशेषणस्यापेक्षोत्थापनं

स्यादित्यत्राह—त्र्यङ्गैरित्यत्रेति। सप्तदशारत्निर्वाजपेयस्य यूप इत्यत्र तु यूपवाजपेयपदमुख्यार्थतानुरोधात्संख्यामात्रविधिर्लाघवार्थो युक्त इत्याह—इहत्विति। अनेनौपदेशिकत्वातिदेशिकत्वाभ्यां यो भेद उक्तस्सोऽपि परिहृतः उभयोरपि मुख्यत्वात्।

नन्वेवं त्र्यङ्गैरित्यत्र लाघवार्थं संख्यामात्रविधिरस्तु तत्राह—त्र्यङ्गेत्विति। समासरूपविनियोगस्य एकरूपतयाऽनुग्रहो विधिलाघवाद्बलीयानिति भावः। नन्वत्राप्येकरूपतया समासरूपविनियोगानुग्रहायकृत्स्न समासार्थविधिः स्यादित्यत्राह—इति भेद इति। समासरूपविनियोगात् पदद्वयमुख्यार्थत्वरूपविनियोगो बलवानिति भावः।

ननु वाजपेयस्येति षष्ठ्यन्तस्य यूपे मुख्यार्थे न मुख्यार्थता, यूपसम्बन्धाभावादित्यत्राह—सम्बन्धीति।

कर्तृगुणे तु कर्मसमवायाद्वाक्यभेदः स्यात्।

दर्शपूर्णमासयोः प्रयाजवाक्ये श्रुतम्। अभिक्रामं जुहोत्यभिजित्या इति। तत्र चिन्ता-किमभिक्रमणस्य कृत्स्नप्राकरणिककर्तृशेषत्वं किं वा सन्निहिते प्रयाजजुहोतौ कर्तृद्वारा शेषत्वमिति। तदर्थं चेयं चिन्ता। किमभिक्रमणं कर्मानन्वयि उतान्वयीति, तत्र गुणशेषत्वचिन्तानन्तरं कर्मशेषत्वमुच्यत इत्यस्यावान्तरसङ्गतिमाह—वस्त्वन्तरेति॥

ननु कर्मशेषत्वचिन्ता ततः किमिति न पूर्वं कृता पुनरुक्ता च तथेत्यत्राह—द्वारस्येति। न (किं) चाश्रुतद्वारकेऽपि कर्मशेषत्वे श्रौतद्वारक गुणशेषत्वप्रकारसापेक्षत्वाद (त्) कर्मशेषत्वचिन्तायाः पेटिकाद्वयाग्रिम-

शक्यम् । यदि तु विशेषणतां विहायोद्देश्यान्तरस्वीकारः तदा वाक्यभेदः प्रत्युद्देश्यं वाक्यपरिसमाप्तेः । नामविभक्त्युक्तविशेषणाविवक्षायुक्तिरुक्ता । विभक्त्युक्ते अयं विशेषः-क्रियान्वय एव तस्य दुष्करः दूरे विवक्षा नामार्थगततया युगपत्कर्मैकत्वयोरभिधानान्नैकत्वविशिष्टस्य संमार्गान्वयो न ग्रहाविशिष्टस्य संमार्गान्वयः नापि क्रिया विशिष्टस्यैकत्वस्य ग्रहेणान्वयः । नापि संमार्ग-

---

पश्चिमाश्रितयो र्नययोस्तदन्तर्गतनयानां बह्वक्रमतया आनन्तर्यं सुगमम् । अस्य पदद्वयश्रुतिशेषत्वव्युत्पत्तेः पादे अध्याये च सङ्गतिः ।।

नन्वभिक्रामं जुहोतीति णमुलन्ततया कर्मणोरेकवाक्यत्वप्रतीतेः सन्निहितहोमशेषतैवाभिक्रमणस्य तत्कथं प्राकरणिककर्त्रन्वयेन पूर्वपक्ष इत्यत्राह—पूर्वपक्षस्त्विवति । न तावदरुणावदवच्छेदकतया क्रियान्वयः द्रव्यानुपादानात् । नापि साक्षात्, कर्मणि कर्मणोऽसमवायात् । न कर्म कर्मसाध्यमिति काश्यपोक्तेः ।

ननु कर्तृद्वारा तयोरन्वयोऽस्त्वित्यत्राह—न च कर्तृद्वारेति । ननु कर्तृवाचि जुहोतिपदात् कर्तृद्वारतेत्यत्राह—न च जुहोतीति । तिङः कर्तृसंख्यावाचित्वेन न कर्त्रुपस्थापकता । ननु कर्तृसंख्यावाचित्वेप्यपेक्षितकर्तृपरमस्त्वित्यत्राह—विधिपरत्वादिदि । युक्तं चैतदित्याह—अत एवेति ।

ननु विधिपरत्वेऽप्याक्षेपात्कर्तृप्रतीतेस्तद्द्वारा समभिव्याहृत जुहोतिनाऽन्वयोऽस्त्वित्यत्राह—अत इति । न तावत्कर्तृसंख्यावाच्याख्यातेन प्रयाजकर्त्राक्षेपः, तस्याधिकारिकर्तृसंख्यानुवादकत्वेन तत्कर्त्राक्षेपकत्वात्, तस्य च प्रकरणे सर्वत्राविशेषात् । नापि धात्वर्थे, तस्य कर्तृसन्निधापकत्वाभावात् । अतः केनापि प्रकारेण समभिव्याहृतजुहोत्यनन्वयादभिक्राममिति ग्राहकसन्निधानादभिक्रमणमात्रं विधत्ते । ततश्च प्रकरणिना गृहीतमभिक्रमणं द्वाराकांक्षायामुद्देश्यत्वयोग्यतया उपस्थापितं कर्तारमुद्दिश्य विधीयते ।

ननु तथा वा कथं कृत्स्नप्रकरणनिवेश इत्यत्राह—प्रयोगाङ्गेति । ननु वाक्यभेदे जुहोतीत्यनेन किं क्रियत इत्यत्राह—जुहोतीति । अनास्थया पक्षा-

विशिष्टेन ग्रहेणान्वयः। नव संमार्गमात्रेणान्वयः। न चार्थी कारकतामाश्रित्यान्वयादुपादेयगतता यथाकर्मतथं ग्रार्थकारकत्वस्य प्रमितत्वात्। नानाविधवचनव्यक्तितो विधेयस्वीकारे च वाक्यभेदो दुस्तर इत्याहुः।

यां यां च वचनव्यक्तिं विधेये रचयिष्यति।
वाक्यभेदेन तां तां तु सिद्धान्ती दूषयिष्यति॥

न्तरमुक्तम्। पौर्णमासीति। राद्धान्तस्त्वित्ति। एकवाक्यत्वे संभवति वाक्यभेदो न युक्तः। तत्र च णमुलन्तत्वेन क्रियायाः क्रियान्तरान्वय एवाभिधानिकः। ननु णमुलन्तत्वेपि कथं क्रियान्तरावगतिरित्यत्राह—समानेति। समानकर्तृकत्वं च क्रियान्तरान्तर्भावादेवेति समभिव्याहृत जूहोत्यन्वयादेव णमुलन्तपदस्याभिधानपर्यवसानम्। एवं तावत् (एतावता) समानार्थतया णमुलः समानकर्तृकत्वमेवार्थः। अधिकारावगतधातुसंबन्धस्तु उपाधिरित्युक्तम्। अधुना धातुसम्बन्धाधिकारबलात् क्रियार्था क्रिया णमुलर्थः। समानकर्तृकत्वं तु वर्तमानत्वादिवदुपाधिरित्याह—समानेति।

ननु णमुलन्ततया क्रियान्वयावगमेऽप्ययोग्यतया परावर्तत इत्यत्राह—संभवति चेति। यद्यपि द्वाररूपकर्तुः पदेनोपादानं नास्ति। तथापि क्रियास्वभावादवगम्यमानकर्तृद्वारापि शब्दावगतक्रियान्वयनिर्वाहो युक्त इति भावः। नन्वेवमभिक्रमणस्य होमशेषत्वे कः किञ्चित्कार इत्यत्राह—दृष्टमिति। उपायद्वयसद्भावे नियमफलो विधिरिति।

ननु कर्तरि कृदिति कर्त्रर्थणमुलन्ततया अभिक्राममित्यनेनैवाहृत्य कर्त्रन्तर्भाव इत्यत्राह—न च णमुलेति। तत्र हेतुः—अव्ययकृत इति। कृदतिङ्-कृन्मेजन्त इति कृदव्ययानि भावे स्वार्थे क्रियायां भवन्तीति हि शब्दः। अत्र यथोक्तेति। जूहोतिनिवेशेपि प्रयाजेष्वेव निवेशो गुरुमते न युक्तः। प्रकरणात्प्रधानजुहोतौ निवेशः स्यात्। सन्निधानात्प्रयाजान्वयेपि सन्निहितैकप्रयाजनिवेशः स्यादिति भावः। भवन्मते वा कथं प्रयाजादिषु निवेशोक्तिरुपपन्नेत्यत्राह—ये त्विति। साक्षित्वेनाचार्योक्तं श्लोकमाह—यदाहुरिति। दूषयति—भङ्गोऽयमिति। कथमित्यत्राह—जूहोतीति। सर्वहोमान्वये पूर्वोत्तरपक्षयोः

इति (तन्त्र वा ३-१-७) । न च विवक्षितेप्येकत्वे प्रति-प्रदानावृत्तिनयात् सर्वग्रह संमार्गानुष्ठानादप्रयोजना चिन्ता यतोऽधिकारविधिसिद्ध्यर्थं अधिकारावृत्तावेवावर्तते, अन्यथैकत्व-बाधात् अविवक्षितमुद्देश्यगतं यद्विशेषणं भाष्यं शिष्यहितं ब्रूते-विवक्षिताविवक्षितम् ।

एकत्वस्य श्रुतेरेकग्रहविनिग्रहात् ।
संमार्गेणेह संमार्गो ग्राहितो ग्रह संग्रहः ॥

प्रयोजनाभावाद्भङ्गः तदवस्थ एवेत्यत्राह—न चेति । अङ्गप्रधानहोमनिवेशेपि होमेतरकर्तृत्वे अभिक्रमणाभावात्प्रयोजनालाभः । तदेवोपपादयति—पूर्वपक्षे हीति ।

नन्वेवं पञ्चिकाकारः किमिति भङ्गोपन्यासनिरासमप्युपेक्षितवानित्यत्राह—उक्तदोषोऽयमिति । ननु एवमपि सन्निहितप्रयाजेष्वेव निवेश इति भाष्यमसमाहितमेवेति पक्षान्तरमाह—अथवेति । कथमित्यत्राह—यदाहेति । यद्यभिक्रामं प्रयाजं जुहोतीत्येवमेकं वाक्यं भवेत्ततः प्रयाजवाक्ये श्रूयत इत्युक्तिर्घटते, नान्यथा । अत एव एतादृशं वाक्यं वेदेऽस्तीति भाष्यकारवचनादवगम्यत इत्यर्थः ।

ननु यदि सर्वशाखास्वेतादृशं वाक्यं नास्तीति निश्चेतुं शक्यम् । तदा मध्वशनादौ यथा दीक्षितो ब्रह्मचारीति श्रुतिर्द्वाशाहेऽस्तीति चिन्तितम् । तद्वत् कृत्वाचिन्तास्त्वित्याह—यदेवमिति । प्रकारान्तरेणापि प्रयाजनिवेशोक्ति समर्थयति—अथवेति । अभिजित्या इति । स्तुतिपदस्यानतिपरोक्षत्वार्थमभिक्रमणस्य प्रयाजानूयाजेषु निवेशः । प्रयाजनिवेशोक्तिस्तु प्रदर्शनार्था ।

ननु (कथं) प्रयाजानूयाजनिवेशे स्तुतिपदस्यानतिपरोक्षार्थता । तत्राह—अनतिपरोक्षार्थतेति । अभिजयहेतुवर्मधर्मतयाऽभिभूत्या इत्येवं प्रयाजानूयाजयोः स्तुतिः । अभिक्राममभिजित्या इत्यभिक्रमणस्य स्तुतिः । एवंरूपस्तुतिद्वयस्यापि परस्परानुगुण्यं स्यात् । यद्यभिक्रमणं प्रयाजानूयाजधर्मः । तयोरभिजयार्थवर्मधर्मत्वेन स्तुतेः ।

संस्काराद्वा गुणानामव्यवस्था स्यात् ॥ १६ ॥

यदि कार्यवदुद्देश्यं तर्हि यागार्थ सोमधारणैककार्यवद् ग्रहचमसोपलक्षणार्था ग्रहश्रुतिरिति चमसेष्वपि संमार्गो युक्त इत्येवमुत्थानादवान्तरसंगतिः। पूर्वपक्षस्तु—यद्यप्यभ्यासापूर्वभेदात्साधनता चमसानामन्यथा तथापि ग्राहकापेक्षितं सोमसेकापनयनरूपं कार्यं सर्वसोमाधारपात्रवर्तीति तदेवसाधनत्वमुपलक्षणीयम्। अवघातादिकार्यं तु वितुषत्वादि नाज्यसान्नाय्ययोर्विध्यपेक्षितम्।

नन्वभिभूत्या इति प्रयाजानूयाजयोः स्तुतिः। अभिजित्या इत्यभिक्रमणस्य स्तुतिः। ततः कथमभिजित्या इति स्तुतिपदस्यानुगुण्येनान्वय इत्यत्राह—अभिजित्या (भ्रातृव्या) भिभूत्योरेकार्थत्वाच्चेति। तयोरतीव भेदो नास्तीति भावः। अथवा एकस्यां शाखायां (अभीषू) इषुधी वा एते यज्ञस्य यदाधारावित्यभिजयार्थेषुधि धर्मतया स्तुताधारार्थता अभिक्रमणस्य किमिति न भवतीत्यत्राह—अभिजित्या अभिभूत्योरेकार्थत्वान्नेषुधिस्तुत्यन्वय इति। अत्र उंबेकादयः स्तुतिपदानतिपरोक्षार्थतया प्रयाजानूयाजान्वयावगमेपि प्रयाजमात्रनिवेशमभिक्रमणस्य तेषां सन्निधिविशेषकल्पनेनाभिक्रमणस्य वाक्यविहित प्रयाजधर्मद्वयमध्यताकल्पनेन वा वदन्ति। तत्कल्पनाद्वयमपि प्रमाणशून्यं कथञ्चित्कल्पनायामतिसन्निहितैकप्रयाजनिवेशापत्तिरित्याह—अस्मिन्नेवेति, अथेति। नैकप्रयाजनिवेशापत्तिः, प्रयाजशब्दसंयोगविहित धर्ममध्यतया सर्वप्रयाजानामविशेषसन्निधेरित्यर्थः। उत्तरं—सापीति। प्रयाजशब्दसन्निहितधर्ममध्यतायामभिक्रमणस्य प्रमाणाभावादेव व्यवहितकर्तृत्वात्प्रयाजानां प्रत्यासत्तिफलाभिक्रमणस्य तत्रैवापेक्षितस्य विधिरिति विधापि भाष्यादप्युन्नेतुमशक्येत्याह—व्यवहितेति।

श्रीकरस्त्वित्ति। स्तुतिबलं विहायाभिक्रामं जुहोतीति जुहोतिपदमुद्देशव्यक्तिपरम्। सन्निहितहोमव्यक्तिपरम्। सन्निधिश्च प्रयाजहोमानामेव। अतस्तत्रैवाभिक्रमणं कथमित्यत्राह—पर्णतेति।

नन्वेवं गृहं संमार्ष्टीत्यस्यापि प्रातःसवनिकग्रहसन्निधिश्रुतत्वात् संमार्गस्य तन्मात्रशेषत्वं स्यात्। न तु सर्वग्रहशेषतेत्याशंक्याह—प्रातः-

स्फ्यादिकार्यमुद्धननाद्यन्वयानुरोधात्संकुचितम् । एवं च विधिपद-श्रुतसंमार्गमात्रविधिलिङ्गादेव सोमाधारद्वारलाभः । प्रकरणे मन्त्रोपदेशवत् ।

राद्धान्तस्तु—श्रुतिमूलं द्वारकार्यमिति ग्रहव्यक्तय एव द्वारम् । ग्राहकोऽपि श्रुतानुरोधादपेक्षितग्राहीति ग्रहश्रुतिः ग्रहयज्यभ्यासापूर्वसाधनं सोमाधारमन्तरङ्गं लक्षयति । व्रीहिश्रुति-स्तु न यवव्यावर्तिका एकावान्तरापूर्वद्वारत्वाद् व्रीहियवयोः ।

सवनिकेति । प्रकृते तद्वैषम्यमाह—इहत्विति । जुहोतिधर्मोऽभिक्रमणमवान्तरा-पूर्वार्थं न संमार्गवदधिकारापूर्वार्थमिति जुहोतिपदं सन्निहितव्यक्तावेव । अत्र दृष्टान्तमाह—वाक्यादिति । वाक्यात्पशुयागावान्तरापूर्वार्थः पशुधर्मो-ऽपि स्थानरूपसन्निधानादग्नीषोमीयार्थः । न प्राकरणिकसर्वपशुयागार्थः । दूषयति—अस्तु तावदिति । अस्तु तावदित्युक्ते ग्रहवैषम्यमपि परमार्थतो नास्तीति भावः । तथा हि—युक्ता पशुधर्माणामङ्गापूर्वार्थता । परमविधौ पशोरभावात् । जुहोतिधर्मस्य तु प्रकरणात्परमविध्यर्थतैव । तत्र जुहोत्यर्थस्य सत्त्वात्परमापूर्वोपकारकतयाऽङ्गप्रधानोभयजुहोत्यन्वयोस्तु । अस्तु वा ग्रहवैषम्यम् । तथापि प्रयाजसन्निधिर्वक्तुमशक्यः, तथा हि—समिदादि-वाक्यानि पञ्चानां प्रयाजानां नियोगान्वयार्थानि । ततोऽनुवादकत्वं पञ्चप्रयाजवाक्यस्यास्तु । ततः किमित्यत्राह—न चेति ।

ननु माभूदनुवादसन्निधेः सम्बन्धः । उत्पत्तिसन्निधित एव सर्वप्रयाज-सम्बन्धोऽस्त्वित्यत्राह—न चेति । अथेति । नानुवादमात्रं पञ्चप्रयाजवाक्यं, किन्तु समिदादिवाक्योत्पन्नानां प्रयाजानां नियोगान्वयार्थम् । अतो नियोगान्वयार्थसन्निहित प्रयाजनिवेशोऽभिक्रमणस्येत्यर्थः ।

ननु उत्पन्नानां प्रयाजानां प्रकरणादेव नियोगान्वयसिद्धेर्नियोगान्व-यार्थं वाक्यं व्यर्थमित्यत्राह—उभयेति । स्फ्येनोद्धन्तीतिवदिति भावः । दूषयति - अस्तुतावदिति । अस्त्वेवमुभयश्रुतिव्यवस्था । तथापि नियोगान्व-यपरे न प्रयाजसन्निधिः । उत्पन्नानुवादेन नियोगान्वयपरत्वात् । न चानु-

ग्रहश्रुत्यनुरोधेऽपि पदश्रुतिविधिरेव । श्रुत्यभावे तु लिङ्गाद्विनियोगो मन्त्रस्थ युक्तः । विवरणे त्वभ्यासापूर्वश्रुतेः (गृहीतः) संमार्ग इत्युक्तिर्द्वाराभिप्राया न तत्प्रयुक्ततैवाभिप्रेता ।।

।। आनर्थक्यात्तदङ्गेषु ।।

विशेषणमविवक्षितं उद्देश्यं विवक्षितमिति स्थिते किं वाजपेये उद्देश्यो यूपो विशेषणं उत विपरीतमिति गतचिन्ताद्वयविशेषचिन्तेयमिति संगतिद्वयम् । पूर्वपक्षस्तु वाजपेयस्येत्युद्दिश्य

वादेऽनुवाद्यस्य सन्निधानमित्युक्तमेव । उत्पत्तिसन्निधौ त्वेकानन्तर्ये अन्यदन्तरितमेव । अस्तु तावदिति वचनात्पञ्चप्रयाजवाक्यस्य प्रयोजनान्वयपरत्वमेव नास्तीत्युक्तं भवति । अधिकारविध्यन्वयो ग्राहकलक्षणप्रकरणात् । प्रकरणरूपशेष्यन्वयोपि प्रकरणप्रमाणेनैव । अतः तदनुवाद एवेति । नन्वतिसन्निहितप्रयाजान्वयेपि प्रयाजनिवेशोक्तिः समर्थितैवेत्यत्राह—अत इति । एवं संभावितसमस्तविपक्षनिरासे प्रयाजेषु निवेशोक्तेः का गतिरित्यत्राह—अतः प्रयाजेति ।

सन्दिग्धेतु व्यवायाद्वाक्यभेदः स्यात् ।

दर्शपूर्णमासयोः सप्तमाष्टमानुवाकयोः सामिधेन्य उक्ताः । नवमेऽनुवाके निवित् । दशमे काम्याः सामिधेनीकल्पाः । 'एकविंशतिमनुब्रूयात्प्रतिष्ठाकामस्ये'त्यादयः, एकादशे उपव्यानमाम्नातम् । उपव्ययते देवलक्ष्ममेव तत्कुरुत इति । तत्र चिन्ता किमुपव्यानस्य सामिधेन्यनुवचनकर्तरि शेषता । उत सर्वप्राकरणिककर्तरीति । तदर्थमियं चिन्ता । किमनुवादेऽनुवाद्यसन्निधिः उत नेति ।

ननु कथमस्य पूर्वनयानन्तर्यमित्याशंक्यावान्तरसङ्गतिमाह—अनिर्दिष्टोऽपीति । अस्यार्थः—यद्यप्यभिक्रामभितिवन्न क्रियान्तरान्वय उपव्यानस्येति न तन्निर्वाहाय कर्त्रपेक्षा, तथापि यथा पूर्वत्र प्रतीत क्रियान्वयोपपत्त्यर्थं कर्त्रपेक्षा, पदान्तरानुपात्तेनापि गम्यमानेन सन्निहितकर्त्रा पूर्णा, तथेहाप्युपव्ययते इत्युपव्यानस्य कर्त्रपेक्षा सन्निहितानुवचनकर्त्रापूर्यत इत्युत्थानादवान्तरसङ्गतिरिति । अत्र ग्रन्थोक्तं पूर्वपक्षमुपपादयति—

सप्तदशारत्निताविधिः। यूपे ह्युद्देश्ये वाजपेयस्येत्यनन्वितं स्यात्। षष्ठ्यन्तत्वात्। षष्ठ्याः संबन्धवाचित्वात्। यूपस्य पशुयागार्थतया वाजपेयसंबन्धि संबन्धितेति न षष्ठ्या विशेषण-विशेष्यतानुवादः। वाजपेयाश्रितोऽयं न साक्षाद्धर्म इत्याश्रया-पेक्षायां यूपशब्दो गौणो वाजपेयार्थोर्ध्वपात्रार्पकः।

एवमुद्देश्यपूरकमुद्देश्यकोटितया पदद्वयं कार्य एवान्विता-र्थम्। न च यूप उद्देश्येऽरत्निप्राप्तेः सप्तदशतामात्रविधेः लाघवं

पूर्वपक्षऋजुविमलायामिति। उपव्ययत इत्येकमिदं पदं सन्निहितकर्त्रैकवाक्यतां याति, अन्विताभिधानाय कर्त्रपेक्षित्वात्। नन्वन्विताभिधानं सन्निहित-कर्त्राऽस्तु। शेषिरूपकार्याकांक्षा तु प्राकरणिककर्त्रा पूर्यतामित्यत्राह—स चेति। क्रियाकारकान्वयपूर्वकत्वाच्छेषत्वस्य तदन्वितस्यैव संस्कार्यत्वं नान्य-स्येति भावः।

नन्वेवमानन्तर्यमचोदनेत्यत्रापि सन्निहितकर्त्रैवान्विताभिधानमस्त्वि-त्यत्राह—आनन्तर्यमिति। यद्येवं पदद्वयश्रुतेः वैषम्यं तर्हि अभिक्रमणनयात्-पूर्वपक्षेऽपि वाक्यभेदेऽप्यभिक्राममित्येकं पदं सन्निहितकर्त्रन्वितमभिधत्तामि-त्यत्राह—अभिक्राममित्यत्रेति। सिद्धवत्प्रतीतमभिक्रमणं तु नान्विताभिधानाय कर्त्रपेक्षम्। किन्तु-प्रकरणनिवेशाय शेष्यपेक्षम्। शेषिणा प्राकरणिककर्त्र-न्वितमभिधेयमिति कृत्स्नप्रकरणनिविष्टम्।

ननु उपव्ययत इत्येकपदद्वयेपि प्रकृतिप्रत्यययोरन्योन्यान्वितयोरभि-धानमस्तु। अथवा—तदर्थमन्यापेक्षायामपि स्तुतिपदैरेव तच्छान्तिरस्तु। अथ क्रियायाः कारकापेक्षत्वात् स्ववाक्यस्थैरपि स्तुतिपदैर्न तच्छान्तिरिति कर्त्रपेक्षेति चेत्तर्हि कारकान्तरमप्यपेक्षताम्। किं कर्त्रपेक्षानियमेनेत्या-शंक्याह—अयं भाव इति। उपव्ययत इत्यस्य प्रथमं कर्त्रपेक्षैव कारकान्तरा-पेक्षा। तस्य व्येञ् संवरण इत्यस्माद्धातोः कर्तरि विहितत्वाद्धातुविशेषो-पादानेन अकर्मकतयापि कर्त्रपेक्षैव स्वत इत्युक्तं भवति। स्तुतिपदान्वय-

वाच्यं; समासान्तर्गतविशेषणविधेरयुक्तत्वात् । अत एव त्र्यङ्गै-रित्यत्र न त्रित्वविधिः अपूर्वं त्र्यङ्गविधिरेवेत्युक्तम् । प्रधानान्वये च प्रकरणानुग्रहः ।

राद्धान्तस्तु — यूपसामानाधिकरण्यात् तावदुद्देश्यताभानं यूपशब्दस्य मुख्यार्थताभानं च । तदेवं घटते यदि यूप एवोद्देश्यः न च तद्विशेषणस्य षष्ठ्यन्तस्यानन्वयः । संबन्धिसंबन्धिन्यपि-षष्ठीदर्शनात् । चैत्रस्य नप्तेतिवत्, तदुक्तं पञ्चिकायाम्—

योग्यता च विधेयस्यैवेति विधेयार्थाख्यातपदमेव न चतुर्थ्यन्तं नामपदमिति भावः ।

ननु भवत्त्वाख्यातपदम् । तथापि प्रकृतिप्रत्ययान्वयेनैव अन्विताभि-धानपर्यवसानं स्यादित्यत्राह—तिङन्तं चेति । आख्यातात्साध्यावस्थतयैव क्रियाप्रतीतेः कारकान्वयेनैवान्विताभिधानपर्यवसानमिति युक्तं कर्तृरूप-कारकापेक्षा । इतोऽपि कर्त्रपेक्षा युक्तेत्याह—उपव्यानं चेति ।

ननु कर्त्रपेक्षापि सन्निहितस्तुतिपदैरेव पूर्वतामिति मन्दधियः शङ्का-मपनुदति—नचेति । नन्वेव"मवनेनिक्ते" इत्यत्रापि कर्तृविहितरूपतया स्वतः कर्त्रपेक्षत्वात् सन्निहितकर्त्रऽभिधानपर्यवसानं स्यादित्यत्राह—क्रियाकारकेति । सत्यं कर्तरि रूपं स्वतः कर्त्रपेक्षम् । तथापि अवनेजनस्य सकर्मतया कर्माकांक्षा उत्कटा । ततश्च हस्तावनेनिक्ते इति क्रियाकारक पदद्वये श्रुतं कर्माद्यन्विताभिधानकरम् । स्वरसापेक्षितोऽपि सन्निहितः कर्ता मृग्यः । स्ववाक्ये सन्निहितकर्मणैवाभिधानपर्यवसानात् ।

नन्वेवं पूर्वनयपूर्वपक्षे अभिक्रमणं सिद्धवत्प्रतीतमपि क्रियास्वभावा-त्कारकापेक्षं सन्निहितकर्त्रन्वितं स्यादित्यत्राह—अभिक्राममिति । सिद्धार्थमिति । न हि क्रियात्वात्कारकापेक्षा । किन्तु—साध्यावस्थाप्रतीतेः । सा चाख्याता-न्तान्न णमुलन्तसुबन्तादिति न कारकापेक्षा । किन्तु—सिद्धार्थस्य साध्यभूत-ग्राहकेणैवान्विताभिधानम् । ततश्च नियोगान्वये किं द्वारमिति द्वारापेक्षायां ग्राहकसन्निधापितकर्त्रन्वय इति कृत्स्नप्रकरणीय कर्त्रन्वयइति भेदः ।

यद्यपि संबन्धिसंबन्धिना संबन्धो नास्ति, अस्ति तु तत्रापि षष्ठीप्रयोग इति। अयं भावः। संबन्धा हि जन्यजनकभावादयः क्रियागर्भाः। क्रिया हि स्वकर्तुः स्वफलत्वेन स्वोत्पत्त्यैव संबन्धकारी, नान्येनान्यस्यान्यदा। तदुभयबहिर्भूते व्यवहारार्थः संबन्धव्यपदेशः। उपचारतोऽपि संबन्धनिर्देशे संबन्धवाचिनी षष्ठी युक्तेति चैत्रस्य नप्तेत्यादिसिद्धिः। पुत्र पौत्र एव हि नप्तृशब्दार्थः। स च यदपेक्षया स्यात्तत्संबन्धिनिर्देश एवाभिव्यक्तो

नन्वेवमुपव्यानस्य कर्त्रपेक्षायामिति सन्निहित कर्त्रभावात्कथमभिधानपर्यवसानमित्यत्राह—इति स्थित इति। उपव्ययत इत्यस्य सन्निधौ श्रुतमेवंकामस्यैतावतीरनुब्रूयादिति गुणफलसम्बन्धार्थे सामिधेन्यनुवचनं स्वकर्तारं सन्निधापयतीति तदेकवाक्यतया वाक्यात् तदनुवचनकर्त्रन्वितमुपव्यानं तच्छेप इत्यर्थः।

राद्धान्तस्त्विति। गुणफलसम्बन्धार्थे वाक्ये अनुपादानान्नानुवाद्यस्य सन्निधिरित्यर्थः। ननु किमित्यनुवादे अनुवाद्यसन्निधिर्नास्तीत्यत्राह—ज्ञानान्तरेति। पुरोवादेन यद्देशकालस्थं वस्तु उपस्थापितं तद्देशकालस्य तथैव पुनर्वदत्यनुवादः। नत्वयं वस्तूपस्थापयति अन्योपस्थितविषयत्वादनुवादानाम्। ननुकथं पुरोवादविधावपि वस्तूपस्थितिरित्यत्राह—अत इति। तत्रेति। अज्ञातज्ञानरूपतया विधेस्तत्रोपस्थितिरिति भेदः।

नन्वनुवचनासन्निधानेऽप्यनुवाद्यस्वरूपानुवचने धीस्थे तत्कर्तृसन्निधेस्तदन्वयोऽस्त्वित्यत्राह—अत इति। विधेयत्वेनासन्निहितमनुवचनं न स्वकर्तारं सन्निधापयतोति प्राकरणिकमात्रस्थितमुपव्यानम्। विवरणे त्विति। अकर्तव्यस्य फलसम्बन्धिगुणाश्रयतानुपपत्तेः। कर्तव्यतायामनुष्ठानपर्यन्तायां कर्ता सन्निहित एवेति तदर्थं तदुपव्यानमिति पूर्वपक्ष इत्यर्थः। राद्धान्तमाह—कथानुवृत्ताविति। यद्यप्यनुवचनकथानुवृत्तिः। तथाप्यनुष्ठेयावस्थासन्निधिर्नास्ति। अनुवाद्यानुवर्तित्वादनुवादस्य।

भवति । यथा समवायिनः समवायो निर्दिश्यते न तेन तस्यापरः संबन्ध इष्यते, औदासीन्यप्रच्युतिगुणात्संबन्धशब्दः (व्यपदेशः) षष्ठी च तत एव । एवं च सर्वत्र कर्तृफलबर्हिर्भूतमातुलभ्रात्रादौ संबन्धनिर्देशाधीन दृष्टादृष्ट व्यवहारसिद्धिः ।

तदेवं वाजपेयसंबन्धिपशुयागसंबन्धियूपस्य वाजपेयासंबन्धेऽपि षष्ठ्यन्तविशेषणान्वयः । एवं चास्य नप्तेतिनिर्देशबलात्संबन्धान्तरोपगमो न युक्तः ।

नन्वनुवादबलादनुवाद्यस्यापि सन्निधावनुष्ठेयावस्थापि सन्निहितेत्यत्राह—अस्मिन्निति । ननु विधिदेशस्थानुवचनकर्त्रैवोपव्यानस्यान्वयोऽस्त्वित्यत्राह—सप्तमेति । सामिधेन्यसम्बन्धैर्नवमानुवाकस्थैरग्न्यर्थैर्निवित्पदैः व्यवधानात् । व्यवहितेन च लोके सम्बन्धादर्शनादिति भावः ।

ननु तर्ह्युपव्यानस्या (नन्व) नुवादबलादनुवाद्यस्यापि निवित्पदकर्त्रर्थतैवास्त्वित्यत्राह—निविदोऽपीति । ता अपि व्यवहिता एव । दशमानुवाकोक्त गुणफलतया निविदः सम्बन्धानुवचनकथया अन्तरितत्वात् ।

ननु बुद्धिसन्निधिरेव सन्निधिः । अनुवादकशब्देन वाच्यस्यानुवचनस्य बुद्धिस्थत्वात्तदन्वयः किमित्युपव्यानस्य न भवति । उच्यते । तात्पर्यतः सन्निधिरेव ह्यन्वयहेतुः । न च गुणफलसम्बन्धार्थपरानुवादस्य उपव्यानान्वये तात्पर्यम् । न ह्यन्यार्थमनूदितस्यान्येन सम्बन्धो दृष्टचरः । तर्हि गुणफलसम्बन्धविधिनैव उपव्यानस्य सम्बन्धोस्त्विति चेन्न । अनित्यत्वाद्गुणफलविधेरुपव्यानस्य नित्यवदाम्नानात् ।

नन्वेवं मतद्वयेपि पुनरुक्तमेवेदमधिकरणं आनन्तर्यमचोदनेत्यनेनेत्याशंक्य व्युत्पाद्यभेदं दर्शयति—एवं चेति । अत्र भाष्य इति । "तथापि त्वासामावान्तरं प्रकरणमि" त्यादिभाष्ये प्रकरणशब्दनिर्देशात् मीमांसातन्त्रे च विनियोजके प्रकरणशब्दस्य प्रसिद्धेर्वार्तिककारीयैर्विनियोजकं प्रकरणं गृहीत्वाऽधिकरणं कृतम् ।

श्रीकरस्तु वाजपेयेन यूपस्योपकार्योपकारकसंबन्धात् षष्ठीत्याह—तन्न, उपकार्योपकारकभावो ह्यङ्गाङ्गिनोरेव। उपकारकोपकारित्वं चाङ्गाङ्गस्येति रहस्यम्। यदुक्तं पदद्वयं कार्यान्वितार्थमिति, तत्प्रकरणाद्वाजपेयान्वये योग्यत्वादूर्ध्वपात्रान्वये च नैकमपि कार्यान्वितार्थमित्येव निरस्तम्। अस्मिंस्तु पक्षे यूपशब्दस्तावत्कार्यान्वयीति लाभः।

ननु फलवदपूर्वार्थस्याङ्गापूर्वस्येतिकर्तव्यताकांक्षाभावात्कथमितिकर्तव्यताकांक्षालक्षणं विनियोजकं प्रकरणमित्यत्राह—फलवदिति। सत्यं फलवदपूर्वस्यैव स्वतः कर्तव्यत्वमितिकर्तव्यताकांक्षित्वं च। तथापि तदर्थतयाऽङ्गापूर्वस्यापि कर्तव्यत्वात् तन्निवन्धनमितिकर्तव्यताकांक्षितं प्रकरणमस्त्येव।

ननु फलवदपूर्वविषयेण महाप्रकरणेनाङ्गविधेरवान्तरप्रकरणस्य प्रतिवन्धत्वान्महाप्रकरणेन सन्निधिसमाम्नातानां विनियोगादङ्गापूर्वस्यावान्तरं प्रकरणमेव नास्तीत्यत्राह--श्रुतिवाक्येति। श्रुतिवाक्याभ्यामङ्गापूर्वस्य सम्बन्धितयोक्तधर्मसमूहकथानुवृत्तौ तन्मध्यगतो धर्मोऽङ्गापूर्वाकांक्षयैवान्वेतीति, तस्याप्यवान्तरं प्रकरणमस्त्येव।

नन्वङ्गविधीनां सावान्तरापूर्वाणां युक्तमवान्तरं प्रकरणम्। सन्निपातिनस्त्वनुवचनस्य कथं तदित्यत्राह—तदिति। नापूर्वत्वं धर्माकांक्षायां हेतुः। किन्तु-कर्तव्यतैव। लोके तथा दर्शनात्। अनुवचनस्यापि कर्तव्यतया विनियोजकलक्षणं प्रकरणमस्ति। तदर्थमेव उपव्यानमित्युक्ते पूर्वपक्षे राद्धान्त उच्यते। व्यवहितमित्यत्राचार्योक्तौ श्लोकावाह—तदुक्तमिति। कथं भावः। इति कर्तव्यताकांक्षत्वलक्षणं प्रकरणं भावानां साध्यानां प्रकरणम्। दूषयति—नेदमिति। कथमित्यत्राह—तदुक्तमिति। अधिकारविधेरेव हि त्रिविधं प्रकरणम्। ग्राहकत्वं विनियोजकत्वं प्रयोजकत्वं च। तत्र हेतुः—तस्यैवेति। एवं सामान्यतोऽभिधाय एकं दर्शयति—अनुष्ठेयेति। अधिकारविधेरेव ग्राहकत्वे विनियोजकत्वोक्तौ प्रयोजकत्वमपि तस्यैवेत्यर्थात्फलित-

विवरणेतु—सप्तदशता अरत्न्युद्देशेनैव विधीयते। यूपवाजपेयपदयोरनुवादमात्रता। किंत्वनुवादेपि मुख्यार्थतयाऽनुवादार्थं (सुबोधार्थं) औपदेशिकवाजपेयपदमुख्यार्थानुवादानुरोधाद्यूपपदमूर्ध्वपात्रे गौणं युक्तं, तदाऽरत्न्यर्थोऽपि विधेय इत्ययं न दोषः समासार्थस्यैकस्यैव विधेः। अत एव त्र्यङ्ग विधिरुक्तः। यदि यूपो मुख्यस्तदा वाजपेयस्येति पशुयागलक्षणा। मुख्यस्य यूपासंबन्धादिति पूर्वपक्षिते राद्धान्तितं—

मिति न निबन्धने कण्ठोक्तम्। विवरणे तदपि कण्ठोक्तम्। अधिकारविधेर्हि त्रैरूप्यमित्यनेन।

नन्वधिकारविधित्वमङ्गाकांक्षायां न तन्त्रम्। किन्तु कर्तव्यतैव। सा चाङ्गविधीनामप्यस्ति। अन्यथा श्रुतिवाक्योक्तधर्माकांक्षापि न स्यादित्यत्राह—अयं भाव इति। साधिकारविधिरेव हि - पुरुषेणानुष्ठेयः। तस्यैव स्वतः प्रयोजनत्वात्, स्वतः प्रयोजनसन्निधौ न परतः प्रयोजनाङ्गापूर्वान्वयो धर्माणां मध्यस्थामध्यस्थविषयतया उद्भूताकांक्षत्वादधिकारविधेः, अङ्गापूर्वस्य तु मध्यस्थधर्म एव संदंशदृष्टार्थत्वायाकांक्षोत्थाप्यते। तत्रोत्थाप्याकांक्षाया उद्भूताकांक्षा प्रबलेत्युद्भूताकांक्षोऽधिकारविधिरेव मध्यस्थधर्माणामपि ग्राहकः श्रुतिवाक्योक्तं त्वङ्गविधिगृहीतमेव प्रकरणस्य ताभ्यां दुर्बलत्वादिति सिद्धम्। साधिकारनिरधिकारविध्योराकांक्षाया अतुल्यत्वाद्वैषम्यम् परस्यापि मतमित्याह—परस्यापीति।

नन्वधिकारविधेराकांक्षाधिक्येपि सन्निध्याधिक्यान्मध्यस्थधर्मेष्वङ्गविधेरेवेति तेनैव मध्यस्थधर्मान्वय इति शङ्कते—मध्यस्थ इति। न तुल्येति। आकांक्षासाम्येहि सन्निध्याधिक्यं विशेषान्वयहेतुर्भवेत्। न चाकांक्षासाम्यं परस्यापि मतम्। अङ्गाधिकारविध्योराकांक्षाया अतुल्यत्वात्। यदि तुल्यता मता मध्यस्थामध्यस्थसर्वग्रहणमङ्गविधेः स्यात्। न तु मध्यस्थमात्रग्रहणमित्यर्थः।

नन्वन्वयहेतुत्वे समानेपि कुत इदं सन्निधेराकांक्षायाः प्राबल्यमित्यत्राह—आकांक्षैव हीति। आकांक्षैवान्वये प्रधानं कारणम्। सन्निधिस्त्वनु-

यूपे मुख्यार्थेऽरत्न्यर्थस्य प्राप्तेः विधिगौरवहानम् । न च समासेनापि विधौ प्राप्ताप्राप्तविवेको नास्ति इति त्र्यङ्गैरित्यत्र न पदद्वयमुख्यार्थात्मकविनियोगानुरोधः । इह तु यूपवाजपेय पदद्वयमुख्यार्थतानुरोधात्समासान्तर्गतावयवपरो विधिर्लाघवार्थो युक्तः । त्र्यङ्गे तु कृत्स्नसमासार्थविधेरेकरूपतया हि समासरूपविनियोगानुग्रहो न्याय्य इति (न हेय) भेदः । संबन्धिसंबन्धिन्यपि षष्ठी मुख्येत्युक्तम् ।

ग्राहक एव । तत्र हेतुः—आकांक्षैवेति । आकांक्षाबलादसन्निहितमपि सन्निधाप्यते । अध्याहारादतिदेशाद्वा सन्निहितमप्यनाकांक्षितं त्यज्यते । भार्या राज्ञः पुरुषो देवदत्तस्येत्यादौ । अत आकांक्षाबलान्मध्यस्थ धर्माणामप्यधिकारविधिरेव ग्राहक इत्यर्थः । अथेति । तंत्रमङ्गकलापः, तत्तन्त्रमध्यस्थतया अधिकारविधितन्त्रमध्यस्थतया अङ्गविधेस्तत्प्रयुक्तिः अधिकारविधिप्रयुक्तिस्तेनोपजीव्यते । आकांक्षाप्रावल्यादधिकारविध्यङ्गस्यापि मध्यधर्मस्य प्रसङ्गोपजीवित्वेन अङ्गविध्यङ्गत्वमप्यस्तु । अतएव तत्र मध्यविधानात् प्रसङ्गः निशीष्टिपशुपुरोडाशयोरिष्यते । दूषयति—न तन्मध्यपातादिति । न ह्यन्यतन्त्रमध्यपातमात्रादन्यप्रयुक्त्युपजीविता । किन्तु तन्त्र[न्त्रि] प्रसङ्गिनोः समशक्तित्वे संभवति । इह त्वङ्गविधिप्रधानविध्योर्न प्रयुक्तिः समा । सर्वव्यापितयाऽधिकारविधिप्रयुक्तिशक्तेरुत्कटत्वात् । भवतु वा प्रयुक्त्युपजीवित्वम् । तथापि प्रसङ्गोपजीवित्वमात्रेण नाङ्गतेत्यत्राह—न त्वङ्गतेति । अत्र हेतुः—न हीति । यस्मात्तत्र पशुपुरोडाशविषये अङ्गानां प्रयाजादीनां न प्रासङ्गिकाङ्गता । अङ्गता न प्रासङ्गिकी, किन्तु अतिदेशादित्यर्थः । प्रासङ्गिकाङ्गतेति । विशेषणसमासः । तन्त्र्यङ्गानामिति वा पाठः । अयमर्थः—तन्त्रिणः पशुयागादेरङ्गानां न प्रासङ्गिकाङ्गता । न प्रसङ्गोपजीविपुरोडाशादि प्रत्यङ्गता । अन्यदीयैरेवाङ्गैः प्रसङ्गादुपकारसिद्धेः अङ्गापूर्वाणामवान्तरापूर्वप्रकरणोपगमेऽपि गुणकर्मण्यनुवचने तदभावात्तदर्थताशङ्कोपव्यानस्य न युक्तेत्याह—अङ्गापूर्वाणामिति ।

॥ १० ॥ कर्तृगुणे तु कर्मासमवायाद्वाक्यभेदः स्यात् ।१६।

वस्त्वन्तरद्वारकं क्रियान्वयिनो गुणस्य शेषत्वमुक्तम् । गुणकोटितया संख्याया अप्युक्तम् । तथाभूतकर्मणः शेषत्वमधुनोच्यते । द्वारस्याश्रुतेरस्य जघन्यतया पश्चात्त्वं, अपुनरुक्तिश्च गुणशेषत्वव्युत्पत्त्या ।

पूर्वपक्षस्तु-न कर्म कर्मसाध्यमिति काश्यपमतम् । न च कर्तृद्वारापि साधनता कर्तृपरशब्दाभावात् । न च जुहोतीति

ननु श्रतिवाक्याद्युपनेयधर्मविषये गुणकर्मणोऽप्यवान्तरप्रकरणमङ्गीकार्यमित्यत्राह—गुणकर्मणीति । नन्वेवमवान्तरप्रकरणाभावे कथं भाष्येऽवान्तरप्रकरणोक्तिरित्यत्राह—अत इति । भाष्यपूर्वापरपरामर्शात् व्यवधानसन्निधिवाक्यभेदोक्तिभिरवान्तरपरकरणशब्दो निरन्तरतारूपसन्निधिपर एव न ग्राहकविनियोजकपरम् । तयोर्व्यवधानाभावात् द्वादशोपसत्ताया ग्राहकाव्यवधेः स्वाहाकारस्य चेतरप्रयाजैर्विनियोजकाव्यवधेरिति भावः । अवान्तरविधीनामितिकर्तव्यताकांक्षालक्षणप्रकरणाङ्गीकारे आत्माश्रयान्योन्याश्रयादिबलेनाबोधकत्वं सप्तमाद्यपूर्वपक्षभङ्ग इत्यादयोऽप्यपरे दोषाः सन्ति । ते तु ग्रन्थविस्तरभयान्नोक्ता इत्याह—विस्तरादिति ।

आधानप्रकरणे "वारणो यज्ञावचर" इति वारणादिपात्रमाम्नतम् । यज्ञावचर यज्ञसाधनम् । तत्र चिन्ता किं पवमानेष्टिषु शेषत्वं पात्रस्य उत उत्तरक्रतुष्विति । तदर्थं चिन्ता । किमाधानाङ्गत्वं पवमानेष्टीनामुत तत्समप्राधान्यमिति ।

ननु उपव्याननयानन्तरमस्याः कः प्रसङ्गः । प्रकरणविशेषाविशेषनिवेशानात्मकत्वादित्याशंक्यावान्तरसङ्गतिमाह—उपव्यानस्येति । उपव्यानस्य वाक्यविरोधाभावादविशेषेण प्रकरणनिवेशो युक्तः । वारणादि तु पात्रमाधाने श्रुतमप्याधानाङ्गयज्ञमात्रे विशेषेण निवेष्टुं युक्तम् । यज्ञसाधनतया वाक्यावगतत्वादित्युत्थानादवान्तरसङ्गतिः । पदद्वयश्रुतिरूपवाक्यगम्यशेषत्वचिन्तया अध्याये पादे च सङ्गतिरिति ध्येयम् ।

कर्तृसंख्यावाचीति तिङन्तं कर्तृपरं, विधिपरत्वात्। अत एव नानृतं वदेदित्यकर्तृपरत्वमुक्तं, अतः समभिव्याहृतजुहोत्यनन्वयादभिक्राममिति प्रकरणिना गृहीतमेकं योग्योद्देश्यं कर्तारमुद्दिश्य विधीयते। प्रयोगाङ्गकर्तृनिवेशात्कृत्स्नप्रकरणनिवेशी। जुहोतीति तु भिन्नमभ्यासनयात्कर्मान्तरम्। पौर्णमासीनयाद्वाऽनुवादः।

नन्वाधानसाध्याग्निसन्निधिश्रुतस्य पात्रस्याग्निसाधनाधारद्वारा अग्न्यर्थत्वं युक्तम्। नेष्ट्यर्थत्वमिति कथं पूर्वपक्ष इत्यत्राह—पूर्वपक्षस्त्विति। वाक्याद्यज्ञसाधनतया श्रुतम्। न साक्षादाधानार्थं युक्तम्।

ननु यद्याधानान्वयायोग्यता तर्हि वाक्यादुत्कृष्योत्तरक्रत्वन्वये नेयेत्याशंक्याह—यदीति। यज्ञरूपपवनाष्टेर्य्याधानाङ्गता तदा आनर्थक्यतदङ्गन्यायेन आधानाङ्गेष्टिनिवेशे तत्प्रकरणमपि परंपरयाऽनुगृहीतमेवेति नोत्कर्षो युक्त इत्यर्थः।

नन्विष्टीनां विश्वजिदादिवदधिकारान्तरकल्पनैव युक्ता। कस्यचिदप्यधिकारविधेरसन्निधेः। अतः कथमाधानाङ्गतेत्यत्राह—आधानेति। भाव्युपयोगानामग्नीनामाधानसाध्यत्वनिर्वाहात्प्रयोजनत्वे स्थिते तत्सन्निधाविष्टीनामाम्नानात्तत्प्रयोजनपरतैव न विश्वजिदादिवदधिकारान्तरपरतेत्यनवगतोपयोगेष्टेरग्नौ प्रयोजनत्वेनान्वयः।

नन्वेवमाधानवत्करणतैवास्तु। किमिति तदङ्गतेत्यत्राह—आधानेति। आग्नीनादधीतेत्युत्पत्तिवाक्ये आधानसाध्यतयैवाग्निप्रतीतेस्तदवरोधान्नकरणतेष्टीनाम्। किन्तु—करणतैव। नन्वग्नेरधिकारविधित्वाभावान्न धर्मग्राहकता युक्तेति चोदयति—नन्विति। मैवमिति। नतु साधिकारविधित्वं ग्राहकत्वे तन्त्रम्। किन्तु—प्रयोजनत्वमेव। लोके तथाव्युत्पत्तेः।

नन्वेवं कथमधिकारविधौ ग्राहकत्वमित्यत्राह—अधिकारविधिरपि इति। अधिकारविधिरपि निरपेक्षप्रयोजनरूपत्वात्सापेक्षप्रयोजनरूपस्य सन्निहितस्य ग्राहको युक्तः। स्वर्गादि तु नियोज्य विशेषणतयैव साध्यम्।

राद्धान्तस्तु सत्यां गतौ वाक्यभेदो न युक्तः। अत्र च क्रियायाः क्रियान्तरान्वय एवाभिधानिकः। णमुलन्तत्वादभिक्राममित्यस्य। समानकर्तृके हि णमुलनुशासनात्। क्रियान्तरान्तर्भावात्समानकर्तृकतेति समभिव्याहृतजुहोत्यन्वयादभिधानपर्यवसानम्। समानकर्तृकता च धातुसंबन्धाधिकारात्क्रियायां क्रियार्थायां णमुल्विधेः। संभवति च जुहोत्यन्वयोऽवगम्यमानकर्तृद्वारक इति न प्राकरणिककर्त्रन्वयो वाक्यभेदं कृत्वा युक्तः। दृष्ट-

---

न प्रयोजनतयेति तत्रतत्रोक्तम्। यागादि तु नियोगान्वयितयैव प्रयोजनम्। न निरपेक्षतयेति न ग्राहकम्।

नन्वेवमग्नीनामपि ग्राहकता न स्यात्। निरपेक्षप्रयोजनत्वाभावादित्यत्राह—इह त्विति। नन्वेवमिष्ट्यग्न्योः सापेक्षप्रयोजनत्वे समानेपि कथमग्नेर्ग्राहकता नेष्टेरित्यत्राह—प्रमितेति। नन्विति। क्रिया हि स्वफलोत्पादने न क्रियान्तरमपेक्षत इति न ग्राहकस्तदङ्गतापादक इति क्रियान्तरमपि कारककोटिरेव। आधानक्रियाफलत्वादग्नेः क्रियानिर्वर्तकं सन्निपात्येव अत्राधानेऽङ्गं युक्तम्। नारादुपकारकेष्टिः। मैवमिति। आधानेनाहवनीयमुत्पादयेदित्याधानवाक्यार्थः; तत्राधानजन्यक्रियाफलरूपसंस्कारेसिद्धेऽप्याहवनीयपदवाच्यतासिद्धिः इष्ट्यधीना, इष्टिजन्योपकारसहित एव आधानजन्यसंस्कारः आहवनीयपदवाच्यतां साधयतीति इष्टिरङ्गमेव।

नन्वाहवनीयमादधातीति द्वितीयया आहवनीयस्यापि क्रियाफलत्वप्रतीतेस्तस्य च क्रियानन्तरभावित्वनियमादाधानं कथं तदुत्पादने कालान्तरभावीष्टिजन्योपकामरपेक्षते। अतो नाहवनीयत्वसिध्यर्थत्वमिष्टेरित्याशंक्य पक्षान्तरमाह—सन्निपातिनावेति। कृतेष्टिराधानकर्त्रेति कर्तृसंस्कारद्वारा सन्निपातितेष्टेरुपेया। अपूर्वद्वारा पुरुषसंस्कारजनकत्वमन्वारंभणीयादौ दृष्टम्। इयान् विशेषः, तत्र पुरुषश्रुतेः कर्तृसंस्कारकत्वप्रतीतिः।

नन्वेवमिष्टेरङ्गत्वेपि न तत्र यज्ञसम्बन्धितया श्रुतपात्रान्वयः प्रधानवाची यज्ञशब्द इत्यग्नियोगाधिकरणे उक्तत्वादितिशङ्कते—नन्विति।

मेव कर्तृद्वारा होमः कार्यम् । होमो हि दूराद्बाहुं प्रसार्य वा क्रियते । अभिक्रमणेन प्रत्यासीदता वेत्युक्तम् भाष्ये । न च णमुला आहत्य कर्त्रन्तर्भावः; अव्ययकृतो भावे भवन्तीति शाब्दाः । अत्र यथोक्ते प्रयोजनभङ्गमाहुः—जुहोतिनिवेशेऽपि न प्रयाजेष्वेव निवेशोक्तिर्युक्ता । ये तु संदंशनयादवान्तरप्रकरणं प्रयाजानामाहुः । तन्मतेऽस्तु प्रयाजेष्वेव निवेशः । यदाहुः-

---

मेवमिति । परमप्रधानसन्निधौ युक्तोऽङ्गयागत्याग इति । इहतु निरपेक्ष-प्रधानासन्निधौ स्वाङ्गयागापेक्षया सापेक्षप्रधानेपि यज्ञशब्दाद्विधिर्युक्त इति युक्तस्तत्र पात्रान्वयः । ननु स्वाङ्गयागसत्त्वे स्यादेवम् । तदेव कुत इत्यत्राह—अङ्गेष्टेरपीति ।

नन्वङ्गयागस्येतिकर्तव्यतापेक्षाभावात्कथमतिदेशतः प्रयाजाद्यङ्ग-लाभाद्यज्ञतेत्यत्राह—गौरवेति । सत्यमङ्गेष्टेः स्वत इतिकर्तव्यताकांक्षा नास्ति । तथाप्याकांक्षोत्थापनादतिदेशः । तदुत्थापनं चाष्टाकपालं निर्वपे-दिति निर्वपत्यादेः प्राप्तार्थतौपगमात् तदुपगमश्च तद्विशिष्टयागविधौ गौरवादिति युक्तोऽतिदेशतोऽङ्गयागलाभः । राद्धान्तस्त्विति । न हीष्टिषु पात्रं निवेष्टुमर्हम् । आनर्थक्यतदङ्गनयाद्धि तत्र निवेशः । स च तासामा-धानाङ्गत्वे सति, तच्चेष्टीनां साक्षादग्न्यर्थतया आधानसमप्रधानत्वादनुप-पन्नमित्यर्थः ।

नन्विष्टेः साक्षादग्न्यर्थत्वमेव कुतो, न तावदुपदेशतः । उपदेशतोऽग्नि-सन्निधेस्तत्साध्यत्वमात्रमग्नेः प्रतीतम् । तत्र चाधानावरोधात्साक्षादन्वया-योग्यतया तदङ्गतैवेष्टेरवगता । नाप्यतिदेशात्, गुणत्वेनैव ततोऽग्न्यन्वय-प्रतीतेरित्यत्राह—अयं भाव इति । उपदेशातिदेशाभ्यामिष्टेरग्निः साक्षात्साध्य इति धीः कथमित्यत्राह—अग्निसन्निधेरिति । तत्र तावदुपदेशाद-ग्निसन्निधेरग्निः साध्य इत्यन्वयधीरुभयवादिसंमता । अतिदेशतस्तु गुणत्वे-नैवाग्नेरित्यन्वयधीः । तर्हि कथमुपदेशातिदेशाभ्यां साक्षात्साध्यत्वधीरित्य-त्राह—तत्रेति । उपदेशावगतसाध्यत्वविरोधिन्यतिदेशावगते गुणत्वे बाधिते ताभ्यामिष्टिभिः साक्षात्साध्य इति धीः ।

येनाभिक्रमणादूर्ध्वं पुरस्ताच्च गुणोऽपरः।
विधास्यते प्रयाजानां तस्मात्प्रकरणास्तिता ॥

भङ्गोऽयं न गुरुराद्धान्ते। जुहोतिमात्रनिवेशो राद्धान्तो यतः। न च प्रयोजनभङ्गः। अङ्गप्रधानजुहोतिनिवेशोऽस्तु जुह्वा जुहोतीतिवत्। तथाहि—होमेतरकर्तृत्वे नाभिक्रमणमिति प्रयोजनलाभः। पूर्वपक्षे हि कृत्स्नप्रयोगकर्त्रन्वयाद्धोमाहोमेष्वभिक्रमणं प्राप्नोति। उक्तदोषोऽयं प्रयाजेष्वेव निवेश इति भाष्येणाधि-

---

ननु साक्षात्वं गुणत्वरूपान्वयप्रकारः। सच प्रकरणिगुणत्वे बाधिते तदाश्रितः प्रकारोऽपि बाधित एवेत्यत्राह—बाधितेपीति। अन्वयरूपे गुणत्वे प्रकरिणिसाध्यत्वाननुगुणे बाधितेपि कारकत्वरूपान्वयाश्रितं प्रकाररूपसाक्षात्वं साध्यत्वानुगुणमबाधितमेव। कारकत्वरूपान्वयस्यातिदेशतोऽवगतेः।

ननु साक्षात्वस्य कथं साध्यतानुगुण्यमित्यत्राह—साक्षात्वं चेति। साक्षात्त्वं नामाधानाव्यवहितत्वमेव साधनान्तरानपेक्षसापेक्षत्वरूपत्वात्साक्षात्त्वपारम्पर्ययोः तच्च कारकान्वयाश्रितं तदधिकरणकारकत्वमेव। तच्चाग्नेरुपदेशतोऽनवधारितप्रकारविशेषतयाऽवगतसाध्यत्वस्यानुगुणमेवेति तदबाधितमेव।

ननु साक्षात्त्वमधिकरणकारकत्वम्। तदग्नेः साध्यत्वविरोध्येव। गुणत्वनियतत्वात्कारकत्वस्येत्यत्राह—कारकस्य हीति। कर्मकारके साक्षात्साध्यत्वदर्शनादधिकरणे कारकेप्यगारे गावो वास्यन्तामितिवत्साक्षात्साध्यत्वं युक्तमेवेत्यर्थः।

नन्वेकविधिविधेययोरेकपरावृत्तौ नेतरानुग्रहो युक्त इति चोदयति—नन्विति। मैवमिति। एकविधिविधेयत्वेऽपि संभवतोऽनुगुणस्य विधेयैकदेशस्याप्यनुग्रहो युक्त एव। यथाग्निहोत्रहवण्या हवींषि निर्वपतीत्यत्र अग्निहोत्रहवणीबाधेपि निर्वापानुग्रहः।

करणस्य पञ्चाङ्गस्येति पञ्चिकाकारस्योपेक्षा। अथवा भाष्यमेव स्वभाषाशोधकम्, यदाह प्रयाजवाक्ये श्रूयते अभिक्रामं जुहोत्यभिजित्या इति। प्रयाजवाक्ये ह्येवं श्रुतिः। यद्येकमेव वाक्यमभिक्रामं प्रयाजान् जुहोतीति। यद्येवमाम्नातं सर्वशाखासु नास्तीत्यवधारयितुं शक्यते, तदा कृत्वाचिन्ता मध्वशनादिवत्।

अथवा भाष्यमभिजित्या इत्यस्यैव स्तुतिपदस्यानतिपरोक्षार्थतया प्रयाजानूयाजनिवेशं मत्वापि प्रदर्शनार्थं प्रयाजेषु निवेशमाह।

नन्विष्टिष्वाहवनीयस्यानाधारता। तदनुष्ठानकाले तस्याभावात्। तासामपि तदुपायत्वादिति चोदयति—नन्विति। मैवमिति। आधानजन्यांशवतोऽग्नेराहवनीयस्य एकदेशद्वाराऽऽधारत्वं संभवत्येव। आधानपवमानहविरादिजन्यादृष्टनिचयात्मकत्वादाहवनीयस्य [तस्य] चैकदेशद्वाराऽधारत्वम् [नवे] वनेकोकिल इत्यादौ दृष्टम्।

ननु तर्हि तेनैवांशेन गुणत्वमप्यस्त्विति तत्राह—अनुगुणं चेति। यथा साक्षात्साध्यत्वस्याधारत्वमनुगुणं न तथा गुणत्वम्। उपदेशावगतप्राधान्येन विरोधात्। न ह्येकस्यैवांशभेदतः प्राधान्यगुणत्वे दृष्टचरे, कारकत्वं तु न प्राधान्यविरोधि प्रधानस्यापि ग्रहादेः संमार्गादौ कारकत्वदर्शनात्। न च सर्वसमूहिसत्व एव समूहस्यैकदेशद्वारेण आधारत्वमिति नियमः। कदाचित्कस्यचिद्वनाधारकोकिलानुभवे जाते कतिपयदिनेष्वतीतेषु पूर्वतरेषु केषुचिन्नष्टेषु नतनेषु परेषूत्पन्नेष्वपि तस्यैव तत्रैव कोकिल इति कोकिलादावनादिप्रत्यभिज्ञानात्। अत आधारस्यैकदेशद्वारा संभवतोऽनुगुणस्यानुग्रहो युक्तः।

ननु उत्पत्तिशिष्टाधानावरुद्धेऽग्नौ कथमिष्टेः साक्षादन्वय इत्यत्राह—साक्षादिति। सत्यं विध्यपेक्षितं विरोधात्तु नाङ्गीकार्यमित्यत आह—स इहेति। प्रमाणभेदान्मुखान्तरादागते नावरोधदोषः, फलचमसवदिति भावः।

नन्वाधानजन्यांशद्वाराऽऽहवनीयस्याधारत्वे तस्मिन्नतिशये अतिशयान्तरस्यानुत्पत्तेः इष्टिजन्यस्यातिशयस्याकारकाश्रितत्वात् क्रियास्व-

अनतिपरोक्षार्थता चैवम् । अभिजयार्थं वर्मधर्मकतया अभिभूत्या इत्येवं प्रयाजानूयाजस्तुतिः । अभिजित्या इत्यभिक्रमणस्तुतिरिति स्तुतिद्वयानुरोधः । अभिजित्याभिभूत्योरेकार्थत्वादिहाभिजित्या इति स्तुत्यन्वयः । अस्मिन्नेव प्रकारे उंबेकादीनामास्था । इयान्भेदः । ते हि प्रयाजमात्रनिवेशं वदन्ति, तदर्थं प्रयाजानां सन्निधिं कल्पयन्ति । वाक्यविहितप्रयाजधर्मद्वयमध्यस्थताम-भिक्रमणस्य वा कल्पयन्ति ।

भावदृष्टकारकाश्रितफलजनकत्वमिष्टेर्न स्यादित्यत्राह—आधारतामिति । आधानजन्यांशवतोऽग्निद्रव्यस्य तदंशद्वाराप्याधारतामादाय तस्तिन्नेव द्रव्ये इष्टिजन्यातिशयजननादाधारभूताग्न्याश्रितफलजनकतया कारकाश्रित-फलजनकत्वमिष्टीनां सिद्धम् । अतोऽधिकरणकारकत्वं साक्षात्साध्यत्व-निर्वाहकमनुज्ञातमित्यर्थः ।

नन्वपूर्वकर्मण इष्टेः कथं कारकगतफलजनकत्वमित्यत्राह—स्वभावत इति । स्वभावतः प्रधानकर्मणोपीष्टेरुत्पाद्येन द्रव्येण साक्षात्संयोगे तस्य द्रव्यस्य पूर्वावस्थायां आधानजन्यांशावस्थया कारकत्वात् तद्गतफलजनकतया कारकगतफलजनकत्वं यूपाहुत्यादिवदविरुद्धमेव तत्फलजनकत्वम् । साक्षादपूर्वद्वारा वेत्युत्तरत्र स्थापयिष्यते । अत्र केचित्—उपदेशमात्रादेव साक्षादग्न्यर्थता इष्टेः अवरोधदोषस्त्वदृष्टकार्यत्वान्नास्ति । एक कार्यत्व-निरूपणाशक्तेरित्यूचुः । तदेवं न वाच्यमित्याह—न चेति । कुत इत्यत्राह—यतोऽदृष्टेति । अदृष्टकार्यमपि निरपेक्षतया श्रुतं पूर्वावगतमवरोधकमेव । अत एवाग्नेयाद्यवरुद्धे प्रयाजादि न करणम् । अन्यथा तत्रापि समप्राधान्यं स्यादिति भावः ।

नन्वेवमाधानावरोधे कथमतिदेशात्साक्षात्साध्यत्वमित्यत्राह—अत इति । प्रमाणान्तरादतिदेशान्मुखान्तरेण साक्षादग्न्वये नावरोधदोष इति भावः ।

नन्विष्टीनां अग्न्यर्थत्वे सिद्धे आकांक्षायां पश्चादतिदेशः । अतिदेशाद-ग्न्यर्थत्वमित्यन्योन्याश्रयादिति चोदयति—नन्विति । मैवमिति । उपदेशावगत-

तत्कल्पनाद्वयं मानशून्यम्। अतिसन्निहितैकप्रयाज एव निवेशापत्तिश्च। अथ प्रयाजशब्दसंयोगविहितधर्ममध्यस्थता, सापि मानशून्यैव। व्यवहितकर्तृकेषु प्रयाजेषु चापेक्षितविधिरिति विधा भाष्यादुन्नेतुमशक्या।

श्रीकरस्तु स्तुतिबलं (पदं) विहायोद्देशे व्यक्तिपरतया सन्निहितहोमेषु जुहोति इति पदम् पर्णताप्रकृत्यर्थचिन्ताकाले च 'पञ्चप्रयाजान्यजति' इत्यप्याम्नानमित्युक्तं, तत्सन्निधावभि-

---

मिष्टीनामग्न्यर्थत्वं साक्षात्परम्परया वेति प्रकरणविशेषानिरूपणेऽप्यग्न्यर्थतामात्रादतिदेशेन धर्मान्वयः। ततो वाक्यशेषस्थानीयादतिदेशात्साक्षादग्न्यर्थतेति। प्रकारविशेषनिश्चयः। यथा अधिकारवत्तामात्रादङ्गविनियोगः। ततोऽङ्गविनियोगादेवानङ्गादिभावेनाधिकारविशेषधीः।

नन्विति। इष्टिविध्यन्तग्रहादाहवनीयलाभेपि द्वारलोपादाहवनीय एव बाधितः। (न) गुणतामात्रम् कल्प्यम्। तन्मात्रेण तदुपपत्तेर्न प्रक्षेपाधिकता। अधिककल्पनायां मानाभावात्। मैवमिति। इष्टेरपि होमत्वमस्त्येव। यद्यपि प्रकृतौ प्रक्षेपश्चतुरवत्तं जुहोत्यनुवादबलादाक्षिप्तः। अनङ्गभूतश्च विधानाभावात्। तथापि प्रकृतावनगत इति विकृताविष्टावप्यादीयते।

नन्वतिदिष्टपदार्थसम्बन्धिक्रमः प्रकृतिधर्मो विकृतावादीयते। इह तु प्रक्षेपः प्रधानावयवः। प्रधानानतिदेशात्तदनर्ह इत्यत्राह—प्रधानेति। सत्यं प्रधानस्यानतिदेशः। तथापि तदवयवः प्रक्षेपः प्रकृतावनगत इत्यादरार्हः। संभवतोऽनुगुणस्यादरः क्रमवदिति होमत्वमिष्टेरित्यर्थः। या पुनरत्र दीपशिखा आतिदेशिक्यसावासेचनाधिकतेति सापि प्रकृतिप्रतीतत्वात्स्वीकारः क्रमवदित्येतदभिप्राया न पुनरातिदेशिकत्वपरा। अतिदेशमूलत्वादत्र प्रकृतितः स्वीकृतेरतिदेशोक्तिः। नन्वतिदेशाद्गुणत्वेनैवान्वयः। तद्बाधे निराधारतयाऽतिदेश एव बाधितः स्यादिति चोदयति—नन्विति। मैवमिति। क्रियाकारकाद्यन्वयपूर्विका आत्यन्तिकगुणतारूपशेषता क्रियाकारकाद्यन्वय-

क्रमणविधेः प्रयाजेष्वेवैतदित्याह—प्रातस्सवनिकग्रहसन्निधिश्रुतेरपि ग्रहं संमार्ष्टीत्यस्मिन् अधिकारापूर्वसाधनग्रहव्यक्तिपरता। नतु प्रातस्सवनिकग्रहपरता, अधिकारापूर्वार्थत्वाद्धर्मस्य। इह तु जुहोतिधर्मोऽवान्तरापूर्वार्थो न तथेतिसन्निहितव्यक्तावेव। वाक्यात्पशुधर्मोऽपि पशुयागावान्तरापूर्वार्थः, स्थानरूप सन्निधानादग्नीषोमीयार्थो न प्राकरणिकपशुयागमात्रार्थः। अस्तु तावदेवं ग्रहधर्मवैषम्यम् पञ्चप्रयाजानिति वाक्यमनु-

---

गता। तद्बाधेऽपि तदाश्रयक्रियाकारकान्वयानुवृत्तेर्न निराधारतातिदेश्यस्येत्यर्थः। नन्विति। यदि क्रियाकारकान्वयाधारतयाऽतिदेशस्तर्हि अप्राप्तबाध एव गुणत्वे कुत इत्यत आह—न हीति। अनङ्गत्वाद्गुणत्वस्य नातिदेश इत्यर्थः। कथं तर्हि विकृत्यपूर्वान्वय इत्यत्राह—किन्तु स्वरूपमात्रान्वय इति। अतिदेशोपस्थापितस्य पदार्थस्वरूपस्य विकृत्यपूर्वेण सह प्रयोजनितयाऽन्वयः।

ननु उपकारकत्वेन गुणत्वेन चातिदेशतोऽप्रोप्तौ कथं प्राकृतोपकारजनकत्वम् पदार्थानां, कथं वा प्रकृतिक्लृप्तद्वारता चेत्यत्राह—ततोऽपेक्षयेति। विकृत्यपूर्वान्वयेसामान्येनावगते किं द्वारा किमुपकारजनकतयान्वय इत्यपेक्षायां कल्प्यप्रतिपक्षत्वात्प्रकृतिक्लृप्तोपकारजनकतया प्रकृतिद्वारगुणतया चान्वय इति गुणत्वमुपकारकत्वं च अपेक्षया कल्प्यम्।

नन्वेवमिहापि तथैव कल्प्यतामित्यत्राह—तदिहेति। नन्वाहवनीयस्वरूपप्राप्ताविष्टिषु कथं गुणत्वव्यतिरेकेणान्वय इत्यत्राह—किन्तु उपदेशेति। मैवमिति। दशमाद्यनयेन विकृतावुपकारप्राप्तिपूर्विका पदार्थप्राप्तिः, उपकारान्वितनियोगस्य तज्जनकाकांक्षायामुपकारजनकतयैव पदार्थातिदेश इति प्रकरणपञ्चिकायामुक्तम्। अतः अङ्गत्वविशिष्टतया पदार्थप्राप्तौ नागृहीतविशषणनयादङ्गत्वस्यापि प्राप्तेस्तद्बाधः प्राप्तबाधो व्युत्पादितः। नचैवमतिदेशप्राप्तगुणत्वबाधे अतिदेशप्रमाणस्य मिथ्यात्वापातः। जनकाखण्डवर्गसामान्यबिषयत्वात्तस्य। नहि सामान्यबिषयप्रमाणं क्वचिद्विशेषबाधेन मिथ्या भवति। न चातिदेश एव विशेषविषयः,

वादकम् । न चानुवाद्यमनुवादे सन्निहितमित्यनन्तरं वक्ष्यति । न चोत्पत्तिभेदात्सर्व एव सन्निहिता भवन्ति । एकानन्तर्येऽन्यस्यान्तरितत्वात् । अथ समिदादिवाक्यान्युत्पत्त्यर्थानि नियोगान्वयार्थं प्रयाजवाक्यं उभयश्रुतावपीयमेव व्यवस्थेति ।

अस्तु तावत्तथाप्युत्पत्तिष्वेव सन्निधिः । न प्रयोजनान्वयपरे । अतः प्रयाजेष्वेवेति बहुवचनं [न] समर्थितम्, अतः प्रयाजवाक्यैकवाक्यतैव भाष्योक्ता गतिरित्युपेक्षा पञ्चिकायां युक्ता ।

प्रातिस्विकधर्मस्वरूपप्रापकत्वाभावात् । अतः प्राप्तबाधेपि न प्रमाणस्य मिथ्यात्वम् । श्रुतिलिङ्गादौ तु न सामान्येनापि प्राप्तिरित्यप्राप्तबाध एव, न चैवं कृष्णले अवघाताङ्गत्वबाधः, उपदेशविरोधाभावात् । अतिदेशतो धर्मस्वरूपान्वयापेक्षया गुणत्वकल्पनेत्यस्मिन् पक्षे बाधकमाह—यदि चेति ।

नन्विष्टीनां साक्षादग्न्यन्वये आधानेन समुच्चयो न स्यात् । एककार्यत्वादित्यत्राह—साक्षादिति । नन्विष्टीनामन्योन्यं किमिति न विकल्प इत्यत्राह—इष्टीनां चेति । यद्यपि पृथगतिदेशस्तथापि अग्निग्राहकेण युगपद्ग्रहणात्समुच्चय एव ॥

नन्वेवं समुच्चये क्रियाफलमाधानानन्तरं न स्यात् अन्योन्यापेक्षत्वात् द्वयोरित्यत्राह—क्रियाफलमिति । आधानेन यत्क्रियाफलं संस्कारो जन्यते स आधानानन्तरमेव । इष्टिजन्यश्च संस्कार इष्ट्यनन्तरमेव ।

नन्वेवमुत्पाद्यभेदे कथं समुच्चय इत्यत्राह—आहवनीयेति । अवान्तरव्यापारतया उत्पाद्यसंस्कारभेदेपि आहवनीयपदवाच्यतया उत्पत्तिरूपं कार्यमेकमिति समुच्चयः । नन्वेवमग्नीनां क्रियाफलत्वे अपूर्वाभावाल्लिङः कथं निर्वाह इत्यत्राह—लिङ्त्विति ॥

ननु युक्तमाधाने प्रयोजकापूर्वानुवादित्वं स्ववाक्ये द्वितीयया द्रव्यस्य साध्यत्वप्रतीतेः इष्टिषु तदप्रतीतेः कथमपूर्वान्तरप्रतीतिबाध इत्यत्राह—अपूर्वद्वारेति । प्रकरणावगताग्निप्रयोजनवत्त्वबलान्नाधिकारान्तरम्, किन्तु साध्यत्वेन प्रतीताहवनीयादिपदार्थसिद्धये अपूर्वद्वारा संस्कारजनक-

संदिग्धे तु व्यवायाद्वाक्यभेदः स्यात् ।२७।

अनिर्दिष्टोऽपि कर्ता अपेक्षापूरक इति चेत् इहाप्युपव्ययत इति कर्त्रपेक्षा सन्निहितकर्त्रा पूर्यतां इत्युत्थानादवान्तर सङ्गतिः । पूर्वपक्षः ऋजुविमलायाम् । उपव्ययत इत्येकमिदं पदमन्विताभिधानाय कर्त्रपेक्षं सन्निहितेन कर्त्रैकवाक्यतां याति । स च कर्ताऽनेन संस्क्रियत इत्यस्य कार्याकांक्षापि पूर्यते । आनन्तर्यमचोदनेत्यत्र

त्वमिष्टीनामस्तु, अपूर्वद्वारा संस्कारकत्वं च अन्वारम्भणीयादिवदविरुद्धम् । राद्धान्तं निगमयति—एवमिति ।

अत्र पूर्वैर्भाष्यापातप्रतीतिमात्रात्पवमानेष्टिष्वपि आहवनीये जुहोतीत्यपरं वाक्यमस्तीति कृत्वा अन्यथा चिन्तितं तदाह—पूर्वेषामिति । नन्वेवं सति कथं पूर्वपक्षः आहवनीयवाक्येनेष्टीनां साक्षादग्न्यन्वयप्रतीतेरित्यत्राह—पूर्वपक्ष इति । आहवनीये जुहोतीत्यारभ्याधीतवाक्येन नाग्नेरिष्ट्युत्पाद्यता सप्तम्या गुणतयैवान्वयात् । अतो नारभ्याधीतप्राप्तानुवाद एवायम् । ननु माभूत्साक्षादग्न्यर्थत्वम् । आधानाङ्गतापि कथमिष्टेरित्यत्राह—आधानाङ्गतेति, ततश्चानर्थक्य तदङ्गनयात्तत्रैव पात्रनिवेश इति भावः । राद्धान्तस्त्ववति इष्टेर्निरधिकारतया प्रयोजनाकांक्षायां विभक्तिव्यत्ययेनापि परमग्निरुत्पाद्योऽस्तु, इतरथा—अनुवादकत्वे वाक्यवैय्यर्थ्यप्रसङ्गात् । कुतो वाक्यवैय्यर्थ्यमित्यत्राह—गुणत्वमिति । आधानसाध्यभूतस्याग्नेराधानाङ्गे इष्टौ गुणत्वायोगात्, न गुणत्वेनानारभ्याधीतप्राप्ताहवनीयानुवादकतया सार्थकता वाक्यस्येत्यर्थः, तन्नेति । न तावदारभ्याधीतवाक्यं क्वचिदपि देशे शाखायां दृश्यते । भाष्यकारोक्तेस्तत्कल्पनायामपि न तत इष्टयुत्पाद्यताऽग्नेः, कुत इत्यत्राह—अतिदेशाधीने हीति । आहवनीये जूहोतीति वाक्यव्यत्ययाश्रयणेन आहवनीये जुहोतीति होमरूपेष्ट्युत्पाद्यता वाच्या । तच्च होमरूपत्वमतिदेशाधीनम्, अतिदेशपूर्वकावगतस्वीकारात् । ततः किमित्यत्राह—तथा चेति । ततश्च तत एवतिदेशादग्निरपि गुणत्वेनावगत इति तदनुवादकतैव आरभ्यवाक्यस्य । अतः पूर्वविमृष्ट गुणत्वाविरोधान्न व्यत्ययाश्रयणम् ॥

तु पदद्वयप्रयोगादन्विताभिधानपरिसमाप्तेराकांक्षापूर्तिः। अभि-क्राममित्यत्र पूर्वाधिकरणपूर्वपक्षेऽपि सिद्धवत्प्रतीतमभिक्रमणं न कर्त्रपेक्षम्। किंतु प्रकरणनिवेशाय शेष्यपेक्षं शेषिभूतेन कर्त्रा-ऽन्वितमभिधीयत इति।

अयं भावः—उपव्ययत इति व्येञ् संवरण इत्यस्य धातोः कर्तरि रूपं, तिङन्तं च पदं कारकमभिधेयपर्यवसानायापेक्षते। उपव्यानं च वासोविन्यासः। कर्तुरनाकुलताकरस्वभावतया कर्तृ-

---

नन्विष्टीनां प्रयोजनापेक्षतया व्यत्ययोऽस्त्वित्यत्राह—इष्टेरिति। ननु तर्हि भाष्योक्तवाक्यस्य का गतिरित्यत्राह—इत्येवमिति, अत्र गुरूक्तमप्य-धिकरणं पूर्वोत्तरपक्षाभावाभिधानेन भाष्यभङ्गमुखेन वार्तिककृता भग्नं तदाह—गुरूक्तमपीति। राद्धान्तार्थं च भाष्यकृता यदाहवनीये जूहोतीति वाक्यमुक्तं तदपि भ्रान्तिरेवेत्याह—तथेति। कथं भान्तिरित्याशंक्य आह—तत्किमारभ्याधीतमुत अनारभ्याधीतमिति विकल्प्य नाद्य इत्याह—तन्न तावदिति। न द्वितीय इत्याह—अनारभ्याधीतं त्विति। इष्ट्यादा [वाति] देशिकत्वेपि न तदाहवनीयस्येष्टिसाध्यत्वमाह। सप्तम्या गुणत्वप्रतीते-रित्याह—न चेति। भङ्गं निरस्यति—सर्वमिदमिति। कथमित्यत्राह—आधानाङ्गत्वे हीति। येनाभिप्रायेण भङ्गवादिना पूर्वपक्षाभाव उक्तस्तेना-भिप्रायेण चोदयति—नन्विति, सप्तदशारत्निताया वाजपेयान्वयो यूपा-न्वयश्च वाक्यादेवावगत इति वाजपेये साक्षाद्यूपाभावात्तदङ्गपशोर्यूपे निवेशो युक्तः, इहतु यज्ञान्वये वाक्यादवगते प्रकरणादाधानान्वयो बाधित एव, जघन्यत्वात्प्रकरणस्य। ततश्च स कथमङ्गद्वारा स्थाप्यते। मैवमिति। आधानाङ्गयज्ञमात्रान्वयेऽपि वाक्यादवगतयज्ञान्वयस्यानपायात्॥

नन्वङ्गयज्ञमात्रान्वये अविशेषेण सर्वयज्ञान्वयश्रुतेर्बाध एवेत्याह—संकोचेति। अबाधेनोपपत्तौ सत्यां बाधायोगात् जघन्यस्य सर्वथाबाध-हानाय कांस्यभोजिन्यायात्संकोच इष्ट एवेत्यर्थः।

ननु प्रधानस्य प्रकरणं तदङ्गान्वयेऽपि बाधितमेव, साक्षात्प्रधानान-न्वयादिति चोदयति—नन्विति, मैवमिति। यद्यपि साक्षादन्वयो नास्ति,

धर्म इति कर्तृविशेषकारकापेक्षम्। न च देवलक्ष्ममेव तत्कुरुते इति स्तुतिपदैरपेक्षापूर्तिः। स्तुतिपदेभ्यः कर्तृविशेषाप्रतीतेः। क्रियाकारक पदद्वये तु 'हस्ताववनेनिक्त' इत्यादौ कर्माप्यन्विताभिधानकरं न स्वरसापेक्षितोऽपि कर्त्ता सन्निहितो मृग्यः। अभिक्रामिमिति सिद्धार्थं (त्व) साध्यभूतग्राहकपदार्थान्वितमभिधेयम्। तदन्वितं च तदर्थं सत्द्वारापेक्षया कर्त्रन्वितमिति भेद इति स्थिते

तथापि सन्निध्याम्नानाद्यत्तदन्वयभानं तत्तदीयान्वयेपि परम्परयानुगृहीतमेवेति न जघन्यस्य सर्वथा बाधः, अत्र दृष्टान्तमाह—अत एवेति। सोम प्रकरणे वाक्यात्पश्वन्विततयाऽवगताः पशुधर्माः प्रकरणस्य सर्वथा अबाधाय तदङ्गपशावेव। तत्रापि स्थानरूपसन्निध्यबाधाय दैक्षपशावेव निवेशिताः। तथा नवप्रयाजानिति च विकृतौ चातुर्मास्ये निवेशितम्, अन्यथा जघन्यस्य वैकृतप्रकरणस्य सर्वथा बाधे प्राकृतनिरपेक्षावगतप्रयाजेष्वेव नवसंख्याविधिः स्यात्॥

नन्वेवं प्रकरणादुत्कर्षः कस्यापि न स्यादित्यत्राह—यत्र त्विति। ननु यदि वाक्येनापि प्रकरणमनुरोध्यम्। तर्हि दीक्षणीया वाङ्नियमस्यापि प्रकरणानुरोधेन परमापूर्वार्थतैव स्यादित्यत्राह—दीक्षणीयेति। नन्वेवमुच्चैर्ऋचा क्रियत इत्यत्र उच्चैस्त्वादेर्वेदधर्मत्वपक्षे प्रकरणानुरोधेन वाक्यसंकोचे प्रकरणिनि निवेशः स्यादित्यत्राह—वेदधर्मत्वेति। तत्रापि न वाक्यविरोधात् प्रकरणानन्वयः, किन्तु—तदन्वयानर्हत्वादेव। अङ्गान्वितो हि धर्मः प्रकरणिना गृह्यते, न वाक्यात्साक्षादधिकारापूर्वान्वयीति वक्ष्यमाणत्वादित्यर्थः। अत्र कश्चित्पूर्वपक्षभङ्गमुपेक्ष्य राद्धान्तभङ्ग एवावतिष्ठते तदयुक्तमित्याह—यत्त्विति। कुद इत्यत्राह—उक्तो हीति। उपदेशातिदेशाभ्यां साक्षादग्न्यर्थत्वमिष्टीनामाधानाङ्गत्वाभावान्न तत्र पात्रनिवेश इति सर्वयज्ञार्थं पात्रमिति राद्धान्तोक्तेरित्यर्थः॥

नन्वतिदेशावगताग्नेः साध्यत्वाद्यग्निः प्रयोजनमिष्टीनां तर्हि विश्वजिदादावपि तथाग्निप्रयोजनता स्यादिति चोदयति—नन्विति मैवमिति। विश्वजिदादावुपदेशतोऽग्निसाध्यत्वाप्रतीतेरिति भावः॥

उपव्ययत इत्यस्य सन्निधौ श्रुतं गुणफलसंबन्धार्थं सामिधेन्यनुवचनं स्वकर्तारं सन्निधापयति, तदनुवचनार्थमुपव्यानं वाक्यात् ।

राद्धान्तस्तु अनुवादोऽयमनुवचनस्य । न चानुवादेऽनुवाद्यसन्निधिः । ज्ञानान्तरोपस्थापितकालदेशं वस्तु पुनर्वदत्यनुवादः । न स्वयं वस्तु उपस्थापयतीत्यनुवाद्यं स्वदेशवर्त्येव तत्र विधानाद्वस्तूपस्थितेः सन्निधिः । अतोऽसन्निहितमनुवचनं न स्वकर्तारं

नन्वतिदेशावगतस्य गुणत्वबाधेन यदि साध्यत्वम्, तर्हि अग्निहोत्रहवण्या अपि गुणत्वबाधेन निर्वापसाध्यता स्यात् । तथा च न बाध इति चोदयति—नन्विति तन्नेति । अग्निहोत्रहवण्यादेः साध्यता नोपदेशात्प्रतीतेति भावः ॥

नन्विष्टेरेकैकत्र निरपेक्षतयाऽतिदेशप्रवृत्तेरेकैकत्र भेदेनाग्निप्राप्तेस्तथैव साध्यत्वान्नान्योन्यमाधानेन समुच्चयः स्यादिति चोदयति—नन्विति । तन्नेति । अग्निप्रकरणाम्नानादाधानेष्टीनां सर्वासां अग्निः साध्य इत्युपदेशात्समुच्चितसाध्यत्वं ज्ञातम् । अतिदेशागतसाक्षात्वेन स्थापितमिति बहुश उक्तमिति नासमुच्चयइत्यर्थः । राद्धान्तार्थं चाहवनीयेऽतिदेशप्रवृत्तेरेकैकत्र भेदेनाग्निप्राप्तेस्तथैव साध्यत्वाज्जुहोतीति यद्भाष्यकारेणोक्तं तदनारभ्याधीतमेवोक्तमिति न युक्तमित्याह—भाष्येत्विति, कथमारभ्याधीतं नोक्तमित्यवगतमित्यत्राह —आरभ्येति । न तावदारभ्येति आरभ्याधीतं दृश्यते । भाष्योक्तेस्तत्कल्पनापि राद्धान्ताननुगुणेति व्यर्था । कथं व्यर्थतेत्यत्राह—द्वितीयेति । अग्नीनादधीतेति क्रियाफलभागित्वं द्वितीयाश्रुत्याऽऽधानसाध्यतयाऽग्नेः शीघ्रावगम इत्यादौ [ते] नान्वयः शीघ्रम् । इष्ट्यन्वयस्तु आहवनीये जुहोतीति सप्तम्यन्ततां होमतां चानुसन्धाय विलम्बितः, आधानावरोधान्न साक्षाद्युक्त इति व्यर्थतेत्यर्थः ॥

ननु प्रसिद्धत्वादनारभ्याधीतस्योक्तिः किमर्थेत्यत्राह—प्रसिद्धमपीति, नन्वतिदेशमूलतयोक्तमिति किमित्यङ्गीक्रियते, न तु उपदेशत एवेष्टिष्विति वक्तुमित्यत्राह—नन्विति । तत्र हेतुः—नहि स्वयमिति । अत्र जरत्प्रभाकरोक्तं राद्धान्तप्रयोजनभङ्गमाह—यस्त्विति । कथं भङ्ग इत्यत्राह—न सर्वेति ।

सन्निधापयतीति प्रकरणसन्निहितकर्त्रन्वयात्कृत्स्नप्राकरणिकेषूपव्यानम् ।

विवरणे तु—कर्तव्यानुवचनकथनानुवृत्तिर्गुणफलसंबन्धेऽप्यस्तीति(धस्यस्थिति)कर्तव्यतायामनुष्ठानपर्यन्तायां कर्ता सन्निहित इति तन्निवेशः । कथानुवृत्तावप्यनुवादे नानुष्ठेयावस्थासन्निधिः, अनुवाद्यानुवर्तित्वादनुवादस्येति । अस्मिन् प्रकारेऽनुवाद्यानुवर्तितान्युत्पत्तिस्तुल्या । सप्तमाष्टमानुवाकानुवचनविधिस्तु नवमस्थ निवित्पदैरग्न्यर्थैः व्यवहितः । निविदोऽपि तदसंबद्धानुवचनकथान्तरिताः । एवं च मतद्वयेऽपि सन्निधेर्हेतुत्वमुपेत्यात्रानुवादे सन्निधिर्नास्तीति नयव्युत्पत्तिः । आनन्तर्यमचोदनेत्यत्राधिकार(विधि) सन्निधिरेव । अभिधानापेक्षयापीति व्युत्पाद्यम् ।

अत्र भाष्ये अवान्तरप्रकरणं सामिधेन्यनुवचनस्येति दर्शनान्मीमांसातन्त्रे च विनियोजके प्रकरणशब्दप्रयोगात् वार्तिककृताऽवान्तरप्रकरणं विनियोजकं गृहीत्वाधिकरणं कृतम् । फलवदपूर्वार्थस्याप्यङ्गापूर्वस्य श्रुतिवाक्योक्त धर्मजातकथानुवृत्तौ मध्य-

---

आधानप्रकरणे पात्राणामाम्नानात्तस्मिन्नेव साक्षादेवेष्टीनां सन्निधेः प्रकरणात्तत्रैव पात्राणां निवेशोऽस्तु, नोत्कर्ष इत्यर्थः । सोऽपि अयुक्त इति । अयमर्थः—इष्टिपात्रयोः समत्वान्नान्वयः, कथं समत्वम् ? यथा ह्यतिदेशमुखेनेष्टेः प्रयोजनवत्त्वं तथा यज्ञान्वयमुखेन पात्रस्यापि समतेति ।।

नन्वेवमाधानतुल्यतापि पात्रस्य स्यात् । ततश्च आधानप्रयोजनोत्तरक्रत्वन्वयो न स्यादिति चोदयति नन्विति, तन्नेति । साध्यावस्थाग्न्यन्वितत्वादाधानस्य शीघ्रं प्रयोजनवत्त्वधीः, पात्रं तु सिद्धावस्थयज्ञान्वितम् । अतस्तत्प्रयोजनवत्त्वं विलंबिधीस्थमिति न तुल्यता ।

नन्वेवमिष्टीनामपि प्रकरणात् साधनावस्थाग्न्यन्वयात् प्रयोजनवत्ताधीः शीघ्रेत्यतुल्यत्वं समानमित्याशंक्य पक्षान्तरमाह—किञ्चेति ।

गतो धर्मोऽङ्गाकाङ्क्षयैवान्वित इत्यवान्तरप्रकरणं तदनुवचनस्यापीति तदर्थमेवोपव्यानमित्युक्ते सिद्धान्तः व्यवहितन्तु तत्प्रकरणमिति । तदुक्तं—

कथंभावो हि भावानां यावदाख्यातमिष्यते ।
न तस्य प्रतिबन्धोऽस्ति महाप्रकरणादिभिः ।।तथापि—
विच्छिन्ना सामिधेनीनां निविद्भिः प्रक्रिया यतः
न हि काम्यैः पुनः कल्पैः सन्धातुँ साहि शक्यते ।।

नेदं गुरोर्मतं तत्प्रकरणमिति । तदुक्तं पञ्चिकायां प्रकरणं हि तन्त्रे ग्राहकत्वं विनियोजकत्वं प्रयोजकत्वं चाधिकारविधेरेव । तस्यैव पुरुषेणानुष्ठेयतया प्रतीतेः अनुष्ठेयसन्निधाव (न) नुष्ठेयं तदर्थमिति इदं ग्राहकत्वम् । तस्यैवेतिकर्तव्यताकाङ्क्षत्वं विनियोजकत्वं, प्रयोजकत्वं च । प्रकरणं च तस्यैवेति । अयं भावः-परस्यापि मतं श्रुतिवाक्योक्तमध्यस्थाङ्गापूर्वस्याकांक्षा नाधिकारापूर्वस्येवामध्यस्थेऽपि । मध्यस्थेऽङ्गापूर्वसन्निधिरधिकः परमापूर्वस्य न इति चेत् न । तुल्याकांक्षया ह्यन्यतरान्वयः सन्निधे-

---

युक्तं चैतदित्याह—अत एवेति ।

ननु प्रयोजनभूतः उत्तरक्रतुरग्निव्यवहितः, अनित्यश्च काम्यतयेति न तदन्वयो युक्तः, अङ्गं त्वव्यवहितं नित्यं चेति तदन्वय एव युक्त इत्यत्राह—यद्यपीति । तथापि अङ्गान्वयाभावे प्रयोजनतोऽप्यनुग्रहो युक्त इत्यर्थः । अत्र वार्तिककृता स्वोक्तं भङ्गं दुष्परिहरं मत्वा गुणानामित्यस्य सूत्रस्य पूर्वाधिकरणशेषत्वमुक्तम्, तद्भङ्गस्यादार्ढ्यादेव कृतमित्याह—एवमिति ।

दर्शपूर्णमासयोः वार्त्रघ्नी पौर्णमास्यामनूच्येते वृधन्वती अमावास्यायामिति श्रुतम् । तत्र चिन्ता । किमनुवादवाक्यद्वयं प्रधानशेषः, उताज्यभागशेष इति । वारणनयानन्तरं वार्त्रघ्नीनयस्य कः प्रसङ्ग इति शङ्किते अवान्तरसङ्गतिमाह—पूर्वत्रेति ।।

राधिक्यात् । न चानयोस्तुल्याकांक्षा परस्यापि मता । यदि मता अमध्यस्थधर्माणां सन्निध्याकांक्षासाम्ये तदुभयार्थता दुर्वारा । आकांक्षैव ह्यन्वये प्रभवति, सन्निधिस्तु तदनुग्राहकः । आकांक्षयैवासन्निहितं सन्निधाप्यते । सन्निहितमप्यनाकांक्षितमुपेक्ष्यते ।

अथ तन्त्रमध्यस्थतया तत्प्रयुक्तिः । अत एव तन्त्रमध्यविधानात्प्रसङ्ग इष्यते इति चेत् न । मध्यपातात् प्रयुक्त्युपजीविता । सा तु समशक्तित्वेन त्वङ्गता, न हि प्रासङ्गिकाङ्गता तन्त्र्यङ्गानाम् । अङ्गापूर्वाणां प्रकरणोपगमेऽपि नानुवचने गुणकर्मणि तदर्थताशङ्का । गुणकर्मणि श्रुतिवाक्याद्युपनेयमधिकारविधेरेवेति नानानयसिद्धम् । अतो यथैव टीकयोर्भाष्यपूर्वापरावमर्शादवान्तरप्रकरणशब्दो निरन्तरतारूपसन्निधिपरो व्याख्यातस्तथाऽऽस्थेयम् । विस्तराद्बिभ्यता अपरे दोषाः नोक्ताः ॥

।१२ गुणानाम् च परार्थत्वादसंबन्धः समत्वात् स्यात् ।२२।

उपव्यानस्य कृत्स्नप्रकरणनिवेशो वाक्याविरोधाद्युक्तः । वारणादि तु यज्ञावचरतया वाक्यावगतमाधानप्रकरणे श्रुतमपि

ननु वार्त्रघ्नीत्येकवचनमनूच्येते इति द्विवचनान्तम्, ततः कथं तयोरन्योन्यान्वययोग्यतेत्यत्राह—वार्त्रघ्नीवृधन्वती इतीति । अस्यापि द्विवचनान्तत्वादन्वययोग्यतेति भावः ॥

ननु द्विवचनान्तत्वे वार्त्रघ्न्याविति स्यात्, न तु वार्त्रघ्नी इति । तत्राह—पूर्वसवर्णेति । लुग्वेति प्रौढोक्तिः, परमार्थतस्तु पूर्वसवर्ण ईकारान्ततैव । अन्यथा प्रगृह्यता न स्यात्, ईदंतद्विवचनाभावात् ।

ननु द्वित्वानन्वितानुवाक्यान्वययोग्यता न प्रधानस्येति सप्तदशारत्निवदानर्थक्यादङ्गभूताज्यभागनिवेशोऽस्तु, कथं पूर्वपक्ष इत्यत्राह—पूर्वपक्षस्त्विति । युक्तं तत्र यूपपदश्रुतेः सम्बन्धिसम्बन्धिनि विधानं इह तु पौर्णमास्यामिति प्रधानपदमेव श्रुतम्, नाज्यभागपदं, कालस्य च विधेयानु-

तदङ्गयज्ञमात्रे युक्तमित्युत्थानादवान्तरसङ्गतिः । पूर्वपक्षस्तु आधानसाध्याग्निसन्निध्यधीतमपि वारणादिपात्रं यज्ञसाधनतया श्रुतत्वान्न साक्षादाधानद्वाराऽग्न्यर्थम् । यद्याधानाङ्गता पवमानेष्टियज्ञस्य तदा आनर्थक्यतदङ्गनयात्परंपरया प्रकरणे निवेशः । आधानाङ्गत्वे चेयं युक्तिः, भाव्युपयोगादग्नीनामाधानसाध्यतानिर्वाहात्प्रयोजनत्वे स्थितेऽनवगतोपयोगेष्टेः प्रयोजनत्वेनान्वयात् आधानावष्टब्धे चाकरणत्वादङ्गतैव । नन्वग्नेरनधिकारविधित्वान्न ग्राहकता मैवं प्रयोजनभूतं हि लोके ग्राहकतया व्युत्पन्नम् । अधिकारविधिरपि निरपेक्षं प्रयोजनमित्येवं स्वसन्निहितस्य सापेक्षप्रयोजनस्य ग्राहकः । इह तु निरपेक्षसन्निधौ सापेक्षमपि प्रमितप्रयोजनमप्रमितप्रयोजनस्य ग्राहकं युक्तम् । नन्वाधानक्रियाफलत्वादग्नीनां क्रियानिर्वर्तकमेवात्राङ्गं युक्तं नारादुपकारकेष्टिः मैवं, सिद्धेऽपि क्रियाफले आहवनीयपदवाच्यत्वसिद्ध्यर्थेष्टिरित्यङ्गमेव सन्निपातिता वा कृतेष्टेराधानमित्युपेयम् । नन्विष्टेरङ्गत्वेऽपि न वाक्यात् पात्रान्वयः । उक्तं हि प्रधानवाची यज्ञशब्द इत्यग्नि-

---

वाक्याशेषिता न युक्ता, अतः सप्तम्यन्त (तस्त) स्यापि पौर्णमास्यादिपदस्य निरूढलक्षणया कालयुक्तकर्मोपस्थापकत्वेऽप्युत्पत्तिकालयोगिप्रधान कर्मोपस्थापकत्वमेव । नाङ्गकर्मोपस्थापकत्वम्, तथा च प्रकरणानुग्रहोऽपीत्यर्थः । नन्विति । प्रधानानामेकैकशः करणत्वादितिकर्तव्यतान्वयोऽपि तथैव, ततः किमित्यत्राह—पुरोनुवाक्यामिति । पुरोनुवाक्यामन्वाहेत्युपादेयगतत्वेनैकत्वस्य विवक्षितत्वादेकैकस्य प्रधानस्य एकैकानुवाक्या प्रत्येकम् । ततश्च एकस्मिन् प्रधाने अनूच्येते इति द्वित्वानुवादानन्वयः ।

ननु प्रधानान्तरापेक्षया द्वित्वानुवाद इत्यत्राह—कुतश्चिदिति । द्वित्वं नामैकसंख्या सा केनचिदुपाधिना वस्तुद्वयमेकीकृत्य प्रवर्तते । स उपाधिः प्रधानयोर्नास्ति । आज्यभागयोस्त्वितरेतरयोगार्थैकशेषोत्पन्नयोः सहो-

योगाधिकरणे । मैवम् । परमप्रधानयागसन्निधौ तत्रैव प्रधाने धीरित्यङ्गयागत्यागः तत्र । इह तु तदसन्निधेरङ्गयाग एव स्वाङ्गापेक्षया प्रधाने धीः । अङ्गेष्टेरप्यतिदेशाद्यागान्तरमङ्गम् । मैवम् । गौरवभयाद्धि प्राप्तार्थनिर्वपत्याद्युपगमादपेक्षोत्थापनात् चोदकतः प्रयाजाद्यङ्गालाभात् यज्ञतेति ।

राद्धान्तस्तु इहेस्टेरपि साक्षादग्न्यर्थत्वात् नेष्टौ पात्रम् ।

अयं भावः—अग्निसन्धिेरिष्टिरग्निसाध्य इत्येवमन्वय धीः । अतिदेशतस्त्वग्नेर्गुणत्वेनान्वय धीः । अत्र गुणत्वे साध्यत्वविरोधिनि बाधितेऽपि साक्षात्वमन्वयाश्रितमवबाधितम् ।

साक्षात्त्वं चाधानाव्यवहितत्वं अधिकरणकारकत्वंचाग्नेः साक्षात्साध्यत्वानुगुणमेव । कारकस्य हि साध्यत्वं साक्षादेव कर्मणो दृष्टमित्यत्रापि कारकस्य साध्यत्वं साक्षाद्युक्तम् । ननु साक्षात्वगुणत्वयोः न पृथग्विधिविधेयता, येनैकहानेऽपि विधेयान्तरानुग्रहः मैवं, संभवतो गुणस्य विधेयैकदेशस्याप्यनुग्रहो युक्त एव नत्वतिदेशादाधारताऽऽहवनीयस्य । न चेष्ट्यनुष्ठानकाले सोऽस्ति,

---

त्पत्तिरूप उपाधिरस्ति ।

ननु सहोत्पन्नयोरपि तयोः प्रत्येकमेव स्वापूर्वमेव स्वीकरणीयत्वात्स्वीयेतिकर्तव्यतान्वयोऽपि तथेति प्रत्येकमेकैकस्मिन् एकानुवाक्येति कथमनूच्येते इति द्वित्वानुवाद इत्यत्राह—प्रत्येकमिति । सत्यमेकैकस्मिन् एकैकानुवाक्या तथापि द्वित्वोत्पत्त्युपहिताज्यभागान्वितत्वोपाधेरनुवाक्याद्वय स्याप्येकीकरणसंभव इति द्वित्वानुवादो युक्त इति तयोरेव वार्त्रघ्नीनिवेश इत्यर्थः । सत्यमिति । सत्यमाज्यभागयोर्द्वित्वानुवादोपपत्तिः । तथापि वाक्यावगतप्रधानान्वयानुरोधात् द्वित्वविशिष्टमन्त्रविशेषविधिरस्तु । प्रधानान्वयानुरोधात् द्वित्वानुवादानुपपतिमङ्गीकृत्य किमिति द्वित्वविशिष्टमन्त्रविधिरुच्यते । यावता प्रधानान्वयेऽप्याग्नेयाग्नीषोमयोः पुरोड़ाशद्रव्यकत्वोपाधेर्द्वित्वं दधिपयसोश्च एकदेवताकत्वोपाधेरिति द्वित्वा-

इष्टेरपि तदुपायत्वात्। आधानजन्यांशवतोऽग्नेराधारत्वं संभवेत्। अनुगुणं च साक्षात्साध्यत्वस्येति तदनुग्रहो युक्तः। साक्षादन्वयो हि सर्वस्यापेक्षितः। स इहोत्पत्तिशिष्टाधानावष्ठम्भाद्बाध्यमानोऽतिदेशलब्धसाक्षात्त्वमुखान्तरादागतो न हेयः। आधारतामाधानजन्यांशवतोऽग्नेरप्यादाय कारकाश्रितफलजनकत्वं क्रियास्वभावदृष्टमनुगुणं साक्षात्साध्यत्वनिर्वाहकमनुज्ञातम् स्वभावतः प्रधानस्यापि कर्मण उत्पाद्यद्रव्येण साक्षात्संयोगात्पूर्वावस्थायां कारकगतफलजनकत्वं यूपाहुत्यादेर्दृष्टम्। न चोदपदेशमात्रादेवेष्टेः साक्षादग्न्यर्थता आधानावरोधदोषस्त्वदृष्टकार्याणामेककार्यत्वानिरूपणान्निरस्त इति वाच्यम्। यतोऽदृष्टकार्यमपि निरपेक्षतया श्रुतमवरोधकमेव। अत एवाग्नेयादि करणावरुद्धे प्रयाजादि न करणम् अत उपदेशातिदेशाभ्यां साक्षादग्न्यर्थतेष्टेः—

नन्वग्न्यर्थत्वे सत्यतिदेशः अतिदेशापेक्षं च तदर्थत्वमित्यन्योन्याश्रयः, मैवं, अग्न्यर्थत्वं साक्षादाधानाङ्गत्वद्वारावेत्यनि-

---

नुवादोपपत्तिरित्याशंक्य अनुवादपूर्वकमाह—यद्यपीति। सत्यमेवं तथापि पृथगुत्पत्तेर्न शाब्दं द्वित्वम् तत्र।

ननु यद्यपि शाब्दं नास्ति। तथाप्येकद्रव्यत्वाद्युपाधेः पुमभिप्रायाधीनं द्वित्वमस्त्वित्यत्राह—पुंप्रभवे त्विति। यद्येकद्रव्यत्वेन न द्वित्वम्। तर्हि अनेकदेवतात्वादनेकत्वमपीति न नियतद्वित्वानुवाद इत्यर्थः। एवं तर्हि द्वित्वानुवादायोगान्न प्रधानान्वय इत्यत्राह—तथापीति। प्रधानान्वयस्य मुख्यत्वात् प्रकरणानुग्रहाच्च द्वित्वानुवादायोग्यत्वेपि द्वित्वविशिष्टविधिरेव वरमित्यर्थः।

ननु विशिष्टविधौ गौरवं स्यादित्यत्राह—एवमिति। ननु वार्त्रघ्न्योरेका आग्नेयी अपरा सौमी, वृधन्वत्योरप्येवम्। तत्राग्नेय्याग्नेये समवेतार्था,

रूपितेपि अग्न्यर्थत्वमात्रादतिदेशेन धर्मान्वयः। यथाधिकारवत्तामात्राद्विनियोगः अङ्गविनियोगादेवाधिकारविशेषधीः।

नन्विष्टिविध्यन्तग्रहादाहवनीयलाभेऽपि अहोमेऽस्मिन् होमद्वारकाहवनीय एव बाधितः। न प्रधानातिदेशेऽपि तदवयवः प्रक्षेप आक्षिप्तोऽप्यनङ्गभूतोऽपि विकृतावावृत्तः, यथा क्रम इति होमत्वमिष्टेः। ननु गुणत्वेनैवान्वये गुणत्वबाधादतिदेश एव बाधितः। मैवं क्रियाकारकाद्यन्वयपूर्विका ह्यात्यन्तिकगुणतारूपशेषता। तद्बाधेऽप्यन्वयानुवृत्तिः। ननु गुणत्वे। तर्ह्यप्राप्तबाध एव। न हि गुणत्वमप्यतिदेशात् किंतु स्वरूपमात्रान्वयः, ततोऽपेक्षया गुणत्वमुपकारकत्वं वा कल्प्यम्। तदिहासंभवान्न कल्पितम्, किंतूपदेशावगतमग्निसाध्यत्वमतिदेशावगतस्वरूपस्य साक्षात्त्वेनोपसंहृतम्।

मैवं पदार्थातिदेशः पदार्थानां ह्यङ्गतयैवेति प्रकरणपञ्चिकायां व्यक्तम्। तादर्थ्यप्राप्तेस्तद्बाधात्प्राप्तबाध एव व्युत्पादितः। यदि चापेक्षया गुणत्वं तर्हि कृष्णलचरावववघातादेरङ्गत्वं

वार्त्रघ्न्याः अग्नीषोमीये कथंचित्समवेतार्थत्वेपि वृधन्वत्याः सौम्याः दर्शे कथंचिदपि न समवेतार्थतेति शङ्कते नन्विति। तन्नेति।

ननु पूर्वावगतप्रधानसम्बन्ध्यनुवाक्यैकताया बाधः स्यादित्यत्राह—अनुवाक्यैकतेति। नन्वेवं सप्तदशारत्निताया अपि तद्विशिष्टयूपविधेर्वाजपेये निवेशः स्यादित्यत्राह—न चेति। कुत इत्यत्राह—तत्र हीति। तत्र पदान्तरोपात्तत्वात् यूपस्य समासार्थस्यैव नैकपदार्थतया विधिः इह तु प्रत्ययार्थद्वित्वविशिष्टप्रातिपदिकार्थस्य एकपदार्थत्वमिति न वाक्यभेद इत्यर्थः।

ननु गौरवं दुष्परिहरमित्यत्राह—गौरवमपीति। राद्धान्तस्त्विति। द्वित्वान्वितविधेययोग्यतया आज्यभागयोरुद्देश्यत्वप्रतीतेस्तदन्वयेनैव सर्वोपपत्तौ विधिगौरवायथार्थत्वैकत्वबाधा न युक्ता इत्यर्थः।

न स्यात् साक्षादनन्यन्वयो मुखान्तरादित्याधानेन समुच्चयः। इष्टीनां च युगपद्ग्रहणात्समुच्चयः। क्रियाफलमाधनानन्तरमेव; इष्ट्यनन्तरं च आहवनीयशब्दवाच्यतोत्पत्तिस्तु सर्वाधीना। लिङ् तु प्रयोजकापूर्वानुवादिन्यस्तु अपूर्वद्वारा वा इष्टीनां स्वांशजननमाहवनीयपदार्थसिद्ध्येऽस्तु। एवमाधानानङ्गत्वादिष्टेर्न तत्र पात्रमिति गुरोरधिकरणम्। पूर्वेषां भाष्यापातभानादन्यथा पवमानेष्टिष्वप्यपरमाहवनीये जुहोतीत्यस्तीतिपूर्वःपक्षः। न तेन वाक्येनाहवनीयस्येष्ट्युत्पाद्यता सप्तम्या गुणतयाऽन्वयात्। अतोऽनारभ्याधीतस्यातिदेशप्राप्तस्यानुवादोऽयम्। आधानाङ्गता प्रकरणादिष्टेः प्रयोजनापेक्षायाम्।

राद्धान्तस्तु अनुवादोऽयमनर्थकः, तद्वरमिष्टेः प्रयोजनाकांक्षायां विभक्तिव्यत्ययेनाग्निरुत्पाद्योऽस्तु। गुणत्वमाधानसाध्याग्नेराधानाङ्गेष्टावप्यशक्यं यतः।

तन्न। आरभ्याधीतादर्शनात् तत्कल्पनायामपि नेष्ट्युत्पाद्यताऽग्नेः। अतिदेशाधीने हि होमत्वे होमरूपेष्ट्युत्पाद्यता। तदा

ननु प्रधानान्वयोपपत्त्यर्थमयथार्थत्वादि स्वीकार्यमित्यत्राह—व्यवधानादिति। अत्र चोद्यपरिहारव्याजेन विवरणपूर्वोत्तरपक्षावाह—न च विवरणोक्तमिति। अस्यार्थः—व्यवधानेपि षष्ठ्या मुख्यत्वात् षष्ठ्यन्तव्यवधानादप्यन्वयेऽप्यदोषो वाजपेयवाक्ये। इह पौर्णमास्यामिति सप्तम्यन्तादव्यवधानादन्वय इति विवरणपूर्वपक्षोक्तमयुक्तम्। कस्माद्विवरणराद्धान्त एवोक्तः कालवाचित्वात्सप्तम्यन्ततास्त्विति।

ननु कालयुक्तकर्मपरता पौर्णमास्यामिति पदस्येत्यत्राह—कर्मत इति। कालवाचितया सप्तम्यन्ततेति यदुक्तम् तदुपोद्बलनायाचार्योक्तं श्लोकमाह—अन्येनेति। अत्र पौर्णमास्यामिति विशेषणं विवक्षितं नवेति समाप्ते अधिकरणे सुहृद्भावेन चिन्त्यत इत्याह—एवमिति। पूर्वपक्षमाह—तत्रेति।

चाग्निरपि गुणत्वेनावगत इति तदनुवाद एव भातीति न व्यत्ययाश्रयणम् । इष्टेस्तु प्रयोजनापेक्षाऽऽधानाङ्गत्वादेव शान्तेति यथोक्तएवाधिकरणे भाष्यं मूलतयाऽनारभ्याधीतमाह । गुरूक्तमपि वार्तिककृता भग्नं, पूर्वोत्तरपक्षाभावाभिधानेन । आधानाङ्गत्वेऽपीष्टेर्न तत्र पात्रनिवेशात्मकः पूर्वः पक्षः ।

नचेष्टेः साक्षादग्न्यन्वयात्मको राद्धान्तः । राद्धान्तार्थं च यदाहवनीयादिवाक्यमुक्तम् । तदपि भ्रान्त्या, तन्न तावदारभ्याधीतं, अदर्शनात् । अनारभ्याधीतं तु प्रत्यक्षहोमरूपास्वेव विकृतिषूपदेशकम्, नेष्टिषु । न चैतदग्नेः साध्यत्वोपदेशकमिति भ्रान्तिरेव भाष्यकृतः ।

सर्वमिदं गुरुणा निरासानर्हमित्यवधीरितम् । आधानार्थत्वे हीष्टेरानर्थक्यतदङ्गनयात्पूर्वपक्षस्तावद्युक्तः । ननु तत्र वाक्यादेव वाजपेयान्वयो यूपान्वयश्च सप्तदशतायाः वाजपेयस्य साक्षाद्यूपाभावात्तदङ्गस्य पशोः यूपे निवेशः । इह तु वाक्याद्यज्ञान्वये प्रकरणादाधानान्वयो बाधित एव स कथमङ्गद्वारा स्थापितः, मैवं,

---

पौर्णमास्यामिति किमाज्यभागविशेषणतया विवक्षितं किं वाऽनूच्यमानविशेषणतया ? न तावदाद्यः । आज्यभागविशेषणत्वे ह्युद्देश्यविशेषणत्वादेवाविवक्षा । नापि द्वितीय इत्याह—ये इति । तथाप्युद्देश्यविशेषणत्वादेवाविवक्षेति भावः ।

ननु ये अनूच्येते ते पौर्णमास्यां वार्त्रघ्नी इति विधेयविशेषणत्वात् विवक्षास्त्वित्यत्राह—पौर्णमास्यामिति । विधेयविशेषणता अनर्हैव । न हि पौर्णमासीविशेषिते वार्त्रघ्न्यौ स्तः । राद्धान्तमाह—तन्नेति । नहि पौर्णमास्यामित्यविवक्षितम् । वाक्यवैयर्थ्यापत्तेः । तथा हि—विधेयलब्धाज्यभागसम्बन्ध्यनुवचनं यदि पौर्णमासीरूपाधारेण स्वस्याधेयतयोद्देश्यं (त्वं) न स्यात् वचनमेवेदमनर्थकं स्यात् । विधेयान्तराभावात् । यद्यपि सापेक्ष-

वाक्याद्धि यज्ञार्थता सा आधानाङ्गयज्ञान्वयेऽपि नापैति । संकोचमात्रं तु कांस्यभोजनयादिष्टमेव । अन्यथा हि जघन्यस्य सर्वथा बाधः स्यात् ।

नन्वाधानाङ्गान्वयेऽप्याधानानन्वयात्प्रकरणस्य सर्वथा बाधः । मैवं सन्निध्याम्नानाद्धि यत्तदन्वयभानं, तत्तदीयान्वयेऽपि परम्परयाऽनुगृहीतमेवेति न सर्वथा बाधः । अत एव प्रधानप्रकरणे वाक्यात्पशुधर्मा स्तदङ्गपशावेव निवेशिताः । नव प्रयाजानिति चविकृतौ निवेशितम् । अन्यथा हि प्रकृतौ निरपेक्षावगत प्रयाजेषु संख्याविधिः स्यात् । यत्र त्वङ्गतोऽ[ता]पि वाक्यगम्याः न संभवति, तत्र सर्वथा प्रकरणबाधः, द्वादशोपसत्तापूषानुमन्त्रद्वियजमान-प्रतिपदादौ । दीक्षणीयावाङ्नियमस्यापि साक्षात्परमापूर्वार्थता नेष्टा, परम्परयेष्यत एव । वेदधर्मतत्रपक्षे तु यद्रुचचैष्टवादि न प्रकरणनिविष्टं, तन्न वाक्यविरोधात् । किंतु वाक्यादधिकारापूर्वान्वयात् । साधनान्वितो हि धर्मः प्रकरणान्वयीत्यत्रैवाध्याये वक्ष्यते । अतः स एवायमानर्थक्यतङ्गनयः ।

तया उद्देशानर्हता पौर्णमास्यास्तथापि वाक्यवैय्यर्थ्य परिहारार्थमुद्देश्यत्वमास्थेयम् । इतरथा आज्यभागोद्देशेन वार्त्रघ्न्यादिविधौ वाक्यं व्यर्थम् । अनुवाक्याचतुष्कस्यापि क्रमादेवाज्यभागान्वयसिद्धेः क्रमाद्वाक्यस्य बलीयस्त्वेपीति कालाप्राप्तिनयाद्वाक्यवैय्यर्थ्यं दुष्परिहरम् । अतस्तत्परिहारायायोग्याया अप्युद्देश्यत्वं पौर्णमास्याः ।

नन्वेवं वैय्यर्थ्यपरिहाराय नामोपात्तसंख्याया अपि एकं ग्रहमित्यत्वत्र उद्देश्यता स्यादित्यत्राह—पदेति । न पदानर्थक्यमात्रादयोग्यस्योद्देश्यत्वम् । किंत्वनन्वयात् । न चात्र ग्रहैकत्वस्य नामोपात्तस्यानन्वयः ।

ननु पदानर्थक्यपरिहारायापि पदोपस्थापितस्यायोग्यस्याप्युद्देश्यत्वमस्त्वित्यत्राह—यथास्थित इति । यथास्थितस्य निरपेक्षस्य योग्यस्योद्देश्यत्वे

यत्तु कस्यचित्पूर्वपक्षभङ्गे अनास्थया राद्धान्तभङ्ग एवावस्थानम्। तदप्ययुक्तम् उक्तो हि राद्धान्तः, चोदकसचिवादुपदेशात्साक्षादग्न्यर्थत्वमिष्टीनां नाधानाङ्गतेति सर्वयज्ञार्थं पात्रम्। ननु-अतिदेशावगतस्य साध्यत्वे विश्वजिदादिष्वग्निप्रयोजनकता स्यात् तन्न उपदेशावगतसाध्यत्वस्य साक्षात्वमतिदेशादुक्तमिति नातिप्रसङ्गः।

ननु गुणत्वबाधात्साध्यत्वे अग्निहोत्रहवण्यपि निर्वापस्य, अवधातादिः कृष्णलादेः साध्यः स्यात् तन्न। साध्यस्यैव गुणत्वबाधात् साक्षादेव साध्यतेति नेयमतिप्रसक्तिः। नन्वेकैक (त्र) कर्तृनिरपेक्षतयाऽतिदेशप्रवृत्तेस्तयैवसाध्यत्वान्न परस्परमाधानेन च समुच्चयः स्यात्। तन्न। समुच्चितसाध्यत्वमुपदेशावगतं साक्षात्वेनातिदेशतः स्थापितमित्यसकृदुक्तम्। अतो नासमुच्चयोऽपि। भाष्ये त्वनारभ्याधीतमेवोक्तं आरभ्याधीतकल्पनापि न राद्धान्तानुगुणेति व्यर्था द्वितीया श्रुत्या हि द्रुतमाधानेनान्वयो जघन्य इष्ट्यन्वयः, सप्तम्या होमतां चानुसंधायाधानावरोधान्न

स्वतः प्राप्ते स्वीकृते यदि पतान्तरं न प्रवृत्तिविशेषं अस्तु कुत इत्यत्राह—न पदान्तरेति। तर्हि वाक्यानर्थक्यमपि सापेक्षस्यायोग्यस्य उद्देश्यतापादकमित्यत्राह—वाक्यार्थेति।

नन्वेवं पौर्णमास्यामित्युद्देश्यत्वे विधेयतो लब्धाज्यभागयोः कथमन्वय इत्यत्राह—अत इति। कालस्य स्वत उद्देशानर्हतया पौर्णमास्यां किमित्यपेक्षायामाधेयविशेषं विना तदपर्यवसानादाधेयविशेषपूरकत्वेनाज्यभागयोरन्वयः। अत्र दृष्टान्तमाह—अत एवेति। द्वयोर्यजमानयोः प्रतिपदं कुर्वीतेत्यत्र द्वयोरित्युद्दिश्य प्रतिपद्विधिः। ततश्च कयोर्द्वयोरित्यपेक्षायां यजमानयोरित्यपेक्षापूरकत्वेनान्वयः। ततश्च द्वियजमानके क्रतौ प्रतिपद्विधानस्योत्कर्षः। अन्यथा यजमानपदस्योद्देश्यत्वे प्रकृतावेकयजमानत्वात्

साक्षाद्युक्त इति व्यर्थता । प्रसिद्धमपि यदनारभ्याधीतमेवोक्तम् । तत्तन्मूलो ह्यतिदेशः साक्षात्त्वे हेतु; मुखान्तरान्नावरोधदोष इति च वक्तुं, न त्वनारभ्याधीतमुपदेशत एवेष्टिष्विति वक्तुम् । नहि स्वयं प्रत्यक्षहोमरूपविकृतिषु इति वक्ष्यन् भ्रान्त्योपदेशमिष्टिषु वक्तीति संभवतीत्यलमवधीरितभङ्गनिरासायासेन ।

यस्तु जरत्प्राभाकरोक्तः, स्थितेऽपि राद्धान्तनये तत्फलभङ्गो न सर्वयज्ञेषु पात्रं साक्षादग्न्यर्थेष्टीनामेव प्रकरणात्पात्रमस्तु न तूत्कर्ष इति सोऽप्ययुक्तः । यथा ह्यतिदेशमुखेनेष्टेः प्रयोजनवत्वं तथा यज्ञान्वयमुखेन पात्रस्यापीति समत्वादनन्वयः ।

नन्वेवमाधानतुल्यतापि पात्रस्य स्यात् तन्न । आधानं हि साध्यावस्थाग्न्यन्वितमुत्पन्नं, पात्रं तु सिद्धावस्थयज्ञान्वितम् । अतो न तुल्यता । किं च भाष्ये यदाधानप्रकरणे पात्रमुक्तं तेनेदं लक्ष्यते, तथा पात्राम्नानं यथाऽऽधानव्यवहिताः पात्रापेक्षयेष्टय एकस्यां शाखायाम् । अथवैकस्यां शाखायां सह पात्रमाधानं, अन्यस्यां च सेष्टीति । अत एवाङ्गतोऽप्यनन्वये आधान-

---

द्वयोरित्येतत्सर्वथानन्वयः स्यात् । अतोऽनन्वयपरिहाराय द्वयोरित्यस्य सापेक्षस्याप्युद्देश्यत्वम् ।

ननु कथं प्रकृतो द्वित्वस्यानन्वयः । जायापेक्षयाप्युपपत्तेरित्यत्राह—इति रहस्यमिति ।। अयं भावः । न हि पत्न्यपेक्षया द्वित्वमुपपन्नम् । तस्याः सहत्वेन निवेशात् । साहित्ये हि द्विबहुवचनमिति क्षौमाधिकरण उक्तम् । न च स्तुत्यान्वयः । निरालंबनतया स्तुत्ययोगात् । ततश्च द्वयोरित्यस्य सर्वथानन्वितत्वे तद्विना वाक्यस्य बोधकत्वायोगात् । द्वयोरित्यस्य सापेक्षस्यापि उद्देश्यत्वमिति । अत्र केचित्—पौर्णमासीमित्यस्य विधेयोद्देश्यान्यतरविशेषणत्वाभावेपि अनूच्येते इत्यस्य तत्कालविशिष्टताप्रतीतिः समभिव्याहारमात्रद्युक्ता । यथा राजा राजसूयेनेत्यत्र राजपदस्येत्यूचुः ।

प्रयोजन यज्ञे निवेशात्सन्निध्याम्नानमनुगृहीतम् । अत उक्तं भाष्ये आधानस्य प्रयोजनभूतेषु यज्ञेषु निवेश इति । यद्यपि प्रयोजनमग्निव्यवहितमनित्यमङ्गाः तु अव्यवहितं नित्यंच, तथाप्यङ्गानन्वये प्रयोजनतोऽनुग्रहः [युक्तः] । एवञ्च यद्भङ्गभयात् पूर्वाधिकरणशेषता सूत्रस्य उक्ता । सामिधेन्यङ्गाः निविदो न व्यवधायका इति शङ्कित्वोत्तरं गुणानामसंबन्ध इति सूत्रम् । तदाहुः ।

वदन्ति सामिधेनीवन्निविदोऽग्निर्समिन्धनम् ।
संयुक्तत्वादतस्तासां नाङ्ग प्रकरणेन ताः ॥

इति तत् भङ्गहानादेव हतम् ।

। १३ । मिथश्चानर्थसंबन्धः ॥ २३ ॥

पूर्वत्रानर्थक्यतदङ्गनयोऽनङ्गत्वात्यक्तः । अत्र प्रधान एवार्थवत्त्वान्न स नय इत्येवं तस्यैव प्रकारान्तरादाक्षेपोत्थानादवान्तर सङ्गतिः । वार्त्रघ्नीवृधन्वती इत्यनुवाक्ये द्विवचनेन निर्दिष्टे पूर्वसवर्णतायां ईकारान्तता "सुपांसुलुक्पूर्वसवर्ण" इत्यादिना लुग्वा ।

अपरे पुनः—वार्त्रघ्नीवृधन्वतीरूपानुवाक्याचतुष्कमिदं क्रमादेवाज्यभागयोः प्राप्तं तत्कथं प्रयोज्यमित्यपेक्षायामपेक्षितविधेः पौर्णमास्यामेते अमावास्यायामेते इति कालतो व्यवस्थेत्यूचुः । तदुभयमप्ययुक्तमित्याह—कालेति । तत्र प्रथमपक्षदूषणहेतुः —सन्निधिमात्रादिति । राजा राजसूयेनेत्यादावगत्या तदाश्रयणम् । इह तु उद्देश्यसमर्पकतयाऽस्ति गतिः । यदि समभिव्याहारमात्रात् व्यवस्थापकत्वं तर्हि—प्रयोज्यवाचकपदस्य प्रयोगावस्थालक्षकत्वं स्यात् । तद्वरं कालस्यैवोद्देश्यतेति भावः ।

॥ आनन्तर्यमचोदना ॥

ज्योतिष्टोमे श्रूयते । "मुष्टीकरोति" "वाचं यच्छति" "दीक्षितमावेदयती"ति । तथा दर्शपूर्णमासयोर्हस्तावनेनिक्ते उपलराजींस्तृणाति

पूर्वपक्षस्तु युक्तं यूपपदश्रुतेः संबन्धिसंबन्धिनि विधानं, इह तु प्रधानपदमेव पौर्णमास्यामिति श्रुतं नाज्यभागपदम् । ननु प्रधानानामेकैकशः करणत्वादितिकर्तव्यतान्वयोऽपि तथा पुरोनुवाक्यामन्वाहेति चैकवचनादेकानुवाक्या प्रत्येकं, अतोऽनूच्येते इति द्वित्वानन्वयः । कुतश्चिदुपाधेर्हि द्वित्वं, तदा आज्यभागयोरितरेतरयोगार्थैकशेषोत्पन्नयोः प्रत्येकमेकैकानुवाक्यान्वयेऽपि द्वित्वोत्पत्त्युपहिताज्यभागान्वयोपाधेरनुवाक्याद्वित्वादनूच्येते इत्यनुवादो युक्तः सत्यं, किन्तु वाक्यात्प्रधानान्वयानुरोधाद् द्वित्वविशिष्टमन्त्रविशेषविधिरस्तु । यद्यप्याग्नेयाग्नीषोमीययोः पुरोडाशद्रव्यकत्वोपाधेर्द्वित्वम् । एवमैन्द्रदधिपयसोश्च देवतोपाधेः । तथापि भेदादुत्पत्तेर्नशाब्दत्वम् । तत्र पुंप्रभवेऽपि न नियम इति न द्वित्वानुवादः । तथापि वरं द्वित्वविशिष्टविधिः । एवं वरं वाक्यप्रकरणानुग्रहाय गौरवम् ।

ननु वार्त्रघ्न्योः एका आग्नेयी, अपरा सौमी । एवं वृधन्वत्योरपि । आग्नेयीचाग्नेये समवेतार्था । सौम्यप्यग्नीषोमीये कथ-

---

इति । तत्र चिन्ता किं हस्तावनेजनादि सन्निहितकर्त्रर्थमुत प्राकरणिकसर्वकर्त्रर्थमिति ।

ननु पूर्वाधिकरणानन्तरमस्याः कः प्रसङ्गः, अङ्ग प्रधानान्वयरूपत्वाभावादित्याशंक्यावान्तरसङ्गतिमाह पूर्वमिति ।

नन्वाख्यातयोरेकवाक्यत्वायोगात् कथं सन्निहितकर्त्रर्थतया पूर्वपक्ष इत्यत्राह—पूर्वपक्षस्त्विति । सत्यं, तथापि हस्तावनेजनादेः स्वभावतो नरसंस्कारतया कार्यार्थत्वेन कार्यापेक्षायां योग्येन सन्निहितेन कार्येण एकवाक्यतयाऽन्वयः । अन्वयहेतूनामाकांक्षादीनां सत्त्वात् ॥

ननु समाख्यादेर्वाङ् नियमादिसंस्कारो याजमानः आवेदनं चाध्वर्यवं कथमनयोरेकवाक्यत्वमित्यत्राह—एकेति । समाख्यातो वाक्यस्य प्रबलत्वात् तत्प्रधानकर्मानुरोधित्वादङ्गस्येत्यर्थः ।

ञ्चिदेकदेशद्वारा । वृधन्वती सौमी न दर्शे समवेतार्था कथञ्चिदपीति । तन्न । अस्त्वयथार्था ऐन्द्रीवद्वचनात् । अनुवाक्यैकता च सामान्यतः ; विशेषतोऽनुवाक्याद्वित्वं तद्बाधकमस्तु । न च सप्तदशारत्निताविशिष्ट यूपविध्यवगमात् तत्रापि वाजपेयनिवेशो वाच्यः । तत्र हि यूपस्य पदान्तरोपात्तत्वात् नैकपदार्थतया समासार्थवद्विधिः । इह तु द्वित्वेन प्रत्ययार्थेन विशिष्टस्यैकपदार्थत्वमिति न वाक्यभेदः । गौरवमपि नैकपदार्थे गर्हितम् इति त्र्यङ्गैरित्यत्रोक्तम् ।

राद्धान्तस्तु द्वित्वान्वितविधेययोग्यतयैव आज्यभागान्वयान्न विधेययोग्यत्वार्थं अयथार्थत्वं द्वित्वविधिगौरवं एकत्वबाधश्च युक्तम् । व्यवधानादपि प्रधानान्वयोपपत्तेः । न च विवरणोक्तं युक्तं षष्ठ्यन्ताद्व्यवधानाददोषः । इह तु सप्तम्यन्तादव्यवधानादन्वय इति । यतः विवरणराद्धान्त एवोक्तः कालवाचित्वात् सप्तम्यन्ततास्त्विति । कर्मतोऽपिहि काले मुख्यता । अन्येनाप्युक्तम्—

ननु उदाहरणान्तरे हस्तावनेजनकर्तुरपि न बाध्यता, अवनेनिक्ते इत्यात्मनेपदादित्यत्राह—अवनेनिक्त इति । न्यायमात्रे अस्माकमास्था । अनुष्ठानं तु यथा तथा वाऽस्त्विति भावः । राद्धान्तस्त्विति । स्वतस्तावत्क्त्वा णमुलोरभावे आख्यातयोरेकवाक्यत्वं नाभिधानिकम् । किन्तु संस्कार्यस्य कार्याकांक्षया कल्प्यम् । तच्चायुक्तम् । ग्राहकस्य संस्कारापेक्षितकर्त्रुन्मुखत्वात् । उपस्थितस्य च कर्तुः कृत्स्नप्रयोगान्वयात् प्राकरणिकसर्वार्थिताऽवनेजनादेः । एवं च समाख्यावगतार्थबाधश्चेत्यर्थः । अन्यैरपीति । अचोदना न कारणमित्यर्थः । नन्वेवं सामिधेन्यधिकरणेन पौनरुक्त्यं स्यादित्यत्राह—सामिधेनीति । अत्र सन्निधेर्हेतुत्वमन्वये नास्तीति व्युत्पाद्यम् । तत्र हेतुत्वमुपेत्य सन्निधिरेव नास्तीति भेद इत्यर्थः ।

तस्मात्कालार्थ एवायं संयोगाङ्गाङ्गिकल्पनात् ।
न्याय्यः पूर्वप्रतीतत्वात् कालोहि दुरतिक्रमः ।।

एवं समाप्तेऽधिकरणे सुहृद्भावेन चिन्त्यते पौर्णमास्यामिति विशेषणं अविवक्षितं न वेति। तत्राज्यभागविशेषणत्वे उद्देश्य-विशेषणत्वादविवक्षया ये इह अनूच्यते, पौर्णमास्यां ते वार्त्रघ्नो इति विधावप्युद्देश्यविशेषणतैव । पौर्णमास्यां वार्त्रघ्नी इत्येवं विधेयविशेषणत्वमनर्हम् । न हि पौर्णमास्या विशेषिते वार्त्रघ्न्यौ स्तः तन्न । यदि पौर्णमास्याधारेण स्वाधेयतयोद्देश्यं न स्यात् वचनमेवेदमनर्थकं पदानर्थक्यं हि नोद्देश्यतापादकम् । यथास्थिते उद्देश्ये यद्यप्रवृत्तिविशेषकरं अस्तु । न पदान्तरार्थवत्वाय पदान्तरस्वरसहानिः समत्वात् वाक्यार्थपरत्वात्तु पदानां स्वरस-हानं युक्तम्, अतो विधेय [शेष] तो लब्धाज्यभागयोराधेय-विशेषापेक्षापूरकत्वम् । अत एव द्वयोरित्युद्दिश्य प्रतिपद्विधेर-पेक्षया यजमानविवक्षेति रहस्यम् । न कालसन्निधिमात्रात्तत्काल-विशिष्टता । अनूच्येते इत्यस्य आज्यभागक्रमे अनुवाक्याचतुष्क-

---

शेषस्तु गुणसंयुक्तासाधारणः प्रतीयेत मिथस्तेषा-
मसंबन्धात् ।।

दर्शपूर्णमासयोराग्नेयं चतुर्धाकरोतीति श्रुतम्, तत्र चिन्ता किं चतुर्धाकरणं सर्वपुरोडाशशेष उताग्नेयमात्रशेष इति । तत्रावान्तर सङ्गति-माह—यदीति ।।

नन्वाग्नेयं चतुर्धाकरोतीति विशेषोक्तेः कथं सर्वशेषपूर्वपक्ष इत्यत्राह—पूर्वपक्षस्त्विति । आग्नेयपदमग्निसम्बन्धितामात्रमुपलक्षयतीति न विशेषपर्यन्ततेत्यर्थः । नन्वग्निसंबन्धिता नोभयदेवताके । उभयसम्बन्धि-त्वात्तस्येत्यत्राह—अस्ति चेति । यद्यपि मिलितयोरेव देवतात्वम् । तथापि

मिदं कथं प्रयोज्यमित्यपेक्षितविधेः कालतो व्यवस्थेति च न युक्तं सन्निधिमात्रात्तथात्वे सर्वत्रैव विशेषणत्वेऽप्युपयोगापत्तिः । अपेक्षा त्वनुष्ठाने सा विकल्पादपैति ॥

। १४ । आनन्तर्यमचोदना । २४ ।

पूर्वं योग्यतयोद्देश्यान्वय उक्तः अत्रापि योग्यतया सन्निर्दिष्टार्थतास्त्वित्यवान्तरसङ्गतिः । पूर्वपक्षस्तु हस्तावनेजनादिस्वभावतो नरसंस्कारः कार्यान्तरार्थ इति कार्यापेक्षायां योग्यसन्निहितकार्यान्वयः उपाधित्रयलाभात् । एवमेकवाक्यताबलादावेदनस्य चाध्वर्यवत्वानुरोधात्संस्कारस्याप्याध्वर्यवत्वं । समाख्यादेर्याजमानताबाध एव । अवनेनिक्त इत्यात्मनेपदं यदि कर्त्रभिप्राय इत्येव याजमानत्वमबाध्यं तदा तदनुरोधात्समाख्याधीनमार्त्विज्यं स्तरणस्य बाध्यमिति युक्तिमात्रे आस्था । राद्धान्तस्तु ख्यातयोश्च नैकवाक्यत्वयोग्यता स्वरसतः । संस्कार्यापेक्षया कल्पना-

---

तदन्तर्गताग्नि सम्बन्धादग्नि सम्बन्धितारूपमस्त्येवेति तदुद्देशात् द्विदेवत्येपि चतुर्धाकरणं युक्तम् ॥

नन्वाग्नेयमित्यग्निरस्य देवतेत्यग्नेर्ढगिति ढगन्तं रूपम् । द्विदैवत्ये चोभयदेवतात्वं नैकस्याग्नेरिति कथमग्निसंबन्धितामात्रेणोपलक्षणतेत्यत्राह — सम्बन्धेति । सर्वत्राग्निकलिभ्यां ढग्वक्तव्य इति सम्बन्धे ढगित्यर्थः ॥

ननु लक्षण प्रतिपदोक्तयोः प्रतिपदोक्तस्य बलवत्त्वात्कथं संबन्धमात्रे तद्धित इत्याशंक्य पक्षान्तरमाह—अथवेति । सत्यमाग्नेयमिति प्रतिपदोक्तदेवतातद्धितान्तपदात् अग्नेर्देवतात्वेन धीः, तथापि सम्बन्धितामात्रमग्नेर्विवक्षितम् । न देवतात्वेन विशेषसम्बन्धितापि वाक्यभेदापत्तेः, तच्च सम्बन्धितामात्रमग्नीषोमयोरपि प्रत्येकमित्येवमव्यवस्थार्थं डित्थेत्यादि निदर्शनं भाष्य इत्यर्थः ॥

नन्वेवं प्रधानविधिवाक्येप्याग्नेय इत्यग्नीषोमीययोरुभयोरपि सम्बन्धिता स्यादित्यत्राह—विधेये त्विति । अत्र दृष्टान्तमाह—अतएवेति । अत्र

प्ययुक्ता । ग्राहकस्यैव तत्रोन्मुखत्वात् कर्तुश्च स्वतः कृत्स्न-प्रयोगाऽन्वयात् ।

अन्यैरप्युक्तं —प्रसिद्धान्वयतात्पर्यमानन्तर्यमचोदना ।

वाक्यानां च समाप्तत्वान्निर्निमित्तो मिथोऽन्वयः ।।

सामिधेन्यधिकरणव्युत्पाद्यंतु तत्रैवोक्तम् ।

(१५) शेषस्तु गुण संयुक्तः साधारणः प्रतीयेत
मिथस्तेषामसंबन्धात् ।२६।

यदि ग्राहकानुरोधादुद्देश्यं श्रुतमप्यनुद्देश्यं तर्हि तदनुरोधात्त-दीयबहुपरमित्यवान्तरसङ्गतिः । पूर्वपक्षस्तु कार्यवत उद्देश्यत्वा-न्नातीव विशेषपर्यन्ततेति आग्नेयपदमग्निसंबन्धितामात्रेणोप-लक्षणमस्तु । अस्ति च मिलिततया देवतात्वेऽपि तदन्तर्गताग्नि-संबन्धमात्रात् तदुद्देशाद् द्विदेवत्येऽपि चतुर्धाकरणम् । संबन्धमात्रेण तद्धितोऽस्ति । अथवा प्रतिपदोक्तदेवतातद्धित एवायं तद्धीरेव तद्धितात् । किंतु तत्संबन्धसामान्यमनपायात् धीस्थमुपलक्षणं

साक्षित्वेन परोक्तं श्लोकमाह—अन्यैरपीति । राद्धान्तस्त्विति । यथा कार्ययो-गित्वं तथैवोपलक्षणत्वम् । अग्नेर्देवतात्वेन कार्ययोगीत्युपलक्षणत्वमपि तस्य देवतात्वेनान्वयितयैव ।

ननु देवतात्वेनान्वयेपि सम्बन्धितामात्रमस्तीति किमिति न तेनाका-रेणोपलक्षणमित्यत्राह—नाप्रसिद्धेति । शब्देन यः प्रसिद्धोऽन्वयस्तेनोपलक्ष-णत्व सम्भवे नाप्रसिद्धसम्बन्धितामात्रादुपलक्षणत्वं युक्तम् । आग्नेयशब्देन केवलाग्निदेवताकत्वप्रतीतेस्तदुद्देशेन चतुर्धाकरणविधेर्वाक्यभेदोऽपि नास्ती-त्यर्थः । मनोतावैषम्यमाह—मनोतायां त्विति । डित्थादेस्तु प्रत्येकं मात्रा-न्वयसिद्धेरेकैकमातृताव्यपदेशो युक्त इत्याह—डित्थेति ।

नन्वाग्नेयस्य मस्तकं विरुज्य प्राशित्रमवद्यतीति प्राशित्रावदानमप्या-ग्नेयपुरोडाश एव स्यात्, नाग्नीषोमीयैन्द्राग्नयोरपीत्यत्राह—मस्तकेति । प्राशित्रमवद्यतीत्येकं वाक्यमाग्नेयस्य मस्तकं विरुज्येत्यपरम्, तत्र प्राशित्र-

विशेषणांशो न विवक्षितः संबन्धितामात्रं प्रत्येकमित्येवं डित्थ कपित्थनिदर्शनं भाष्ये । विधेये तु यथाऽभिधानादेव व्यवस्थेत्येकदेवत्ये विधिः, अत एव मनोतामन्त्रोऽग्निमात्राभिधानेऽपि सोमसहिताग्नौ समवेतार्थः ।

अन्यैरप्युक्तम्—शक्यतेहि द्विदेवत्यः संलक्षयितुमेकया ।
अग्नीषोमहविर्योगो मनोतायामिवाग्निना ।।

राद्धान्तस्तु-अग्निर्देवतात्वेनैव कार्ययोगीत्युपलक्षणमपि तदन्वयितयैव । माप्रसिद्धान्वयादुपलक्षणं प्रसिद्धान्वय संभवे युक्तम् मनोतायां त्वसंभवात् । तथा डित्थादेस्तु प्रत्येकान्वयप्रसिद्धिरेव मस्तकविभागगुणविधिपरे वाक्ये न प्राप्तावदानैन्द्राग्नादि निवृत्तिः, पुरोडाशं चतुर्धा करोतीति यद्यपि वाक्यं, तदुपसंहृत-

---

वाक्येन सर्वपुरोडाशेष्ववदानप्राप्तावाग्नेयस्य मस्तकं विरुज्येति मस्तकविभागगुणविधिपरे वाक्ये आग्नेयपदश्रवणेपि न प्राप्तावद्यतेत्यैन्द्राग्नादौ निवृत्तिः । आग्नेयपुरोडाशे अवदानोद्देशगुणविशेषविधिपरत्वात् तस्य ।।

नन्वेवं पुरोडाशं चतुर्धाकरोतीति प्राप्तचतुर्धाकरणयोरितरपुरोडाशयोराग्नेयचतुर्धाकरणवाक्येन निवृत्तिरित्यत्राह—पुरोडाशमिति । सामान्यवाक्यं विशेषगुणान्तरविधानाभावादुपसंहृतमित्यर्थः ।।

ननु गोबलीवर्दनयात्पुरोडाशवाक्यमाग्नेयवाक्यसन्निधौ तदितर पुरोडाशपरमिति कथं विशेषोपसंहार इत्याशंक्य पक्षान्तरमाह – अथवेति । आग्नेयवाक्यमेव पुरोडाशवाक्यं नास्तीति कृत्वा चिन्तेत्यर्थः । एतच्च न्यायनिष्ठत्वेनोक्तम् । वस्तुतस्तु—उपसंहारपक्ष एव श्रेयान् ! तत्र हि गोबलीवर्दनयः । यत्र हि सामान्यान्वये विधेयसहित वाक्यार्थे पर्यवसिते सति तदपेक्षैव विशेषवाक्यार्थप्रतीतिः । इह तु न तथा । ननु सामान्य-

मनेन । अथवाग्नेयवाक्यमात्रान्नयव्युत्पत्तिः । सामान्यतद्धित शङ्कापि विशेषणतयैव कार्ययोगिलाभे प्रत्युक्ता ।

इति महोपाध्याय भवनाथमिश्र

विरचिते मीमांसानयविवेके

तृतीयाध्यायस्य

प्रथमः पादः

तद्धिताश्रयणेनाग्नेय इत्यग्नि सम्बन्धितामात्रेणोलक्षणत्वं किमिति क भवतीत्यत्राह—सामान्येति ।

इत्यात्रेयगोत्रस्य श्री सुदर्शनाचार्यशिष्यस्य

श्री रङ्गनाथसूनोर्वरदराजस्य कृतौ

नयविवेकदीपिकायां

तृतीयाध्यायस्य प्रथमः पादः समाप्तः ।

अथ तृतीयाध्यायस्य द्वितीयः पादः।

अर्थाभिदानसंयोगात्

अर्थाभिदानसंयोगात् पादभेदतः सम्प्रदायादध्याये कार्येऽवान्तरार्थभेदोपाधेः पाद-विभागेपि कार्ये, श्रुतिहेतुतोपहितशेषत्वात् पादं कृत्वा ततो जघन्याल्लिङ्गतः शेषत्वोपाधेः पादान्तरम्। अनन्तरं च तदन्तर्भूता क्वचित् श्रौतशेषत्वस्यापि चिन्ताऽपवादादेः। प्रायेण तु मन्त्राणां लिङ्गतः शेषतेति सैव सामान्यत-उपक्रान्ता—किं मुख्य एव लिङ्गतो मन्त्रशेषता, उत गौणेऽपीति।

अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः स्यात्। तस्मादुत्पत्ति-सम्बन्धोऽर्थेन नित्यसंयोगात्।

इह बर्हिर्देवसदनं दामीत्यादिमन्त्रा उदाहरणम्। तत्र चिन्ता किं तेषां मुख्ये गौणे चार्थे विनियोगः? किंवा मुख्य एवेति। तद्विषयशुद्धि-चिन्ता किं गौणमुख्ययोर्विवेको नास्तीति। ननु शेषत्वप्रतिज्ञानात्तत्परा-ध्यायः केवलः कर्तव्यः किं पादभेदेन। केन चोपाधिना तद्भेद इत्यत्राह पादभेदत इति। नानापादतयाऽध्यायकृतिरिति संप्रदायः, चतुर्भिरष्टभिर्वा पादैरिति च। तद्भेदश्च व्युत्पाद्यार्थभेदोपाधेः। नन्वर्थभेदेऽध्यायभेदः स्यादित्यत्राह—अवान्तरेति। तर्हि केनार्थविशेषेण पूर्वपादकृतिरित्यत्राह—श्रुतिरिति। श्रुतिगम्यशेषत्वेन पूर्वपादो वृत्त इत्यर्थः॥

तद्विषयशुद्धि चिन्ता च को मुख्यः को वा गौण इति । तदन्तर्गतैव पूर्वतन्त्र पूर्वः पक्षः ।

शक्तित एव पदस्यार्थ इति गौणी पदवृत्तिरेवायुक्ता । वाक्येनापि व्यवहारे पदपदार्थविभागतो व्युत्पत्तेः प्रतिपदं स्वार्थधीत एवान्वितार्थधीरिति स्वार्थे शब्दस्यैव वृत्तिरुपेया गौणे तु न शब्दस्य वृत्तिः शब्दस्वार्थगुणादेवावगतत्वात् गौणस्य अतश्शब्दार्थतामिच्छता गुणादागततैव हेया । धीरपि हि तुल्यतया । तदुक्तम्—अग्निर्माणवक इत्युक्तेऽपि पिङ्गलता माणवकश्च पदार्थतयैव भातः । एवञ्च परैरुक्तमयुक्तम् ।

ननु श्रुतिगम्यानि शेषत्वानि बहुविधानीति कथमेकार्थतया एकपादतेत्यत्राह—श्रुतिहेतुतेति । एतत्पादप्रवृत्तिहेत्वर्थविशेषमाह—लिङ्गत इति । कथमेतत्पादस्य पूर्वपादानन्तर्यमित्यत्राह—तत इति । श्रुतेरेतदुक्तं भवति । श्रुतिगम्यशेषत्वं पूर्वपादार्थः, लिङ्गगम्यशेषत्वमेतत्पादार्थ इति पादविभागादित्यनेन शास्त्रे कथञ्चिदवश्यं भेदहेतुः वक्तव्यः सर्वत्रेति ।

नन्वत्रैव पादे श्रौतशेषत्वस्याप्यैन्द्रीनयादौ व्युत्पाद्यस्य कथं सङ्गतिरित्यत्राह—तदन्तर्भूतेति । ननु लैङ्गिकशेषत्वे पादव्युत्पाद्येऽपि किमिति मन्त्रशेषतोपक्रमः प्रथममित्यत्राह—प्रायेणेति । अत्र भाष्ये किं मुख्य एव मन्त्राणां शेषता उत गौणेऽपीति चिन्तामुक्त्वा कः पुनर्मुख्यः को वा गौण इत्युक्तम् । तच्चायुक्तम्, लोकत एव गौणमुख्ययोः प्रसिद्धत्वात् तावादाय विचारोपपत्तेः प्रश्नायोगादित्यत्राह—तद्विषयशुद्धीति । न हि प्रश्नमात्रं तत् किन्तु विषयशुद्ध्यर्थचिन्तान्तरमेव, तत्र कः पुनर्मुख्यः को वा गौण इति पूर्वपक्षवचनव्यक्तिः । तथाचायमर्थः—को मुख्यः, को वा गौणः, न कोऽपि सर्वत्र मुख्यत्वादिति । राद्धान्तवचनव्यक्तिस्तु अनयोर्विवेके विद्यत इति । यत एवं विषयशुद्ध्यर्थेयं चिन्ता, अतस्तदन्तर्गतैव । ततः पूर्वा च मूलचिन्तान्तर्गतत्वान्न पृथगस्याः सङ्गतिरित्यर्थः ।।

शब्दार्थस्यैत्र मुख्यत्वं मुखवत्प्रथमोद्गतेः ।
अर्थगम्यस्य गौणत्वं गुणागमनहेतुकम् ।।

असिद्धेरेव अथानेकशक्तितता सत्यां गतावयुक्तेत्यग्निशब्दात् स्वार्थधीः स्वार्थस्य एव । स्वगुणेऽपि पिङ्गलत्वे धीः हेतुरित्येवं परंपरया शाब्दता । इत्थमेव लौकिकीधीरिति भाष्येप्युक्तम् । प्रतीत्यैव हि ज्वलनं माणवकमग्निशब्दात् प्रतियन्तीति । तन्न, अग्न्यर्थधीरेव ह्यत्र नास्ति । अनन्वितस्यानभिधेयत्वात् । कथं ततस्तद्गुणे धीः ? न च लक्षणायामिव वाक्यार्थान्वितधीद्वारा प्रतीत्यन्वयिता अग्न्यर्थस्य । माणवकवर्तितया हि पिङ्गलताधीः । न च तद्वर्तितया अग्न्यर्थगुणता । लक्षणायान्तु स्वार्थवर्तितयैव

नन्वेकशक्तिकल्पनाहानाय गौणवृत्तिरपि युक्तेति कथं पूर्वपक्ष इत्यत्राह—तत्रेति। न हि गौणी वृत्तिः शक्याऽवगन्तुम् । यस्माच्छक्तित एव पदार्थः । ननु सर्वत्र न पदस्य शक्तिः, किन्तु—वाक्यस्य, तेनैव वृद्धव्यवहारात्, व्यवहारनिबन्धनत्वाच्च शक्तिकल्पनाया इत्यत्राह—वाक्येनापीति। सत्यं वाक्येन व्यवहारः, तथाप्यावापोद्धाराभ्यां पदपदार्थविभाग एव व्युत्पत्तेः, प्रतिपदं स्वार्थधीत एवान्वितपदार्थरूपवाक्यार्थधीरिति च स्वार्थे शब्दस्यैव वृत्तिः न तु वाक्यस्य । यद्येवं गौणेऽप्यर्थे शब्दस्यैव वृत्तिरस्त्वित्यत्राह—गौणे त्विति। शब्दस्य स्वोपनेये ह्यर्थे वृत्तिः स्वार्थे वृत्तिः । गौणाभिमतार्थस्य तु शब्दार्थगुणादागतत्वान्न तत्र शब्दस्य वृत्तिः । यत एवं स्वोपनेय एव शब्दस्यार्थ अत एव शब्दार्थतामिच्छता गुणादागततैव हेया । अतोऽग्निशब्दस्य पैङ्गल्ये मुख्यैव वृत्तिरित्यर्थः ।।

नन्वग्निर्माणवक इत्यग्निशब्दात्स्वार्थे तद्गुणसाम्यात्तत्सदृशतत्सामान्यधीरिति माणवकपैङ्गल्यं परम्परया प्रतीतमिति कथं शब्दार्थत्वमित्यत्राह—धीरपीति । अग्निर्माणवक इति पिङ्गलता माणवकश्च पदार्थतयैवावगत इति नानयोः प्रतीतौ भेद इति पञ्चिकायामुक्तमित्यर्थः । अत्र वार्तिककारोक्तगौणमुख्यविवेकमनुभाष्य दूषयति—एवं

धीः। अतो न गौणाभिमते स्वार्थान्विततयाऽनन्वयात् प्रतीत्यन्वयिता । स्वार्थस्यानन्वयिनश्चाशाब्दत्वात् अशाब्दतैव स्यात् । एवञ्च लक्षणानाक्षेपेणेयं चिन्ता । एवञ्च तत्सिद्ध्यधिकरणोक्तेनापुनरुक्तिः । तत्र हि परशब्दः परत्र वर्तते स्वार्थगुणद्वारेत्युक्तम् तदाक्षिप्तं यतः । ननु यद्यग्निशब्दः पिङ्गलतामप्याह किमिति सोपपदस्तत्र, किमित्यल्पप्रयोगः, किमिति मनाक् प्रसिद्धिः । तन्न । प्रयोगोऽनिदंप्रथम इति न तत्रानुयोगः निरुपपदोऽपि स दृश्यते, प्रयोगाल्पत्वादेव मनाक्प्रसिद्धिः । उक्तं हि न शब्दात् धीः स्वार्थत्वादृते युक्तेति ।

परैरपीति । तत्र हेतुरसिद्धेरेवेति । अग्निशब्दात् ज्वलनवत्पैङ्गल्यस्यापि वाचकवृत्त्यैव तुल्यवत्प्रतीतेरर्थगम्यत्वस्यासिद्धेरित्यर्थः । अथेति । ज्वलने क्लृप्ततया शक्त्यैवाग्निशब्दस्याग्निः माणवक इत्यत्रापि प्रयोगोपपत्तौ नानेकशक्तिता युक्ता । कथमित्यत्राह— अग्निशब्दादिति । यद्यपि साक्षाच्छब्दगम्यता नास्ति, तथाप्यग्निशब्दात्स्वार्थे ज्वलने धीः, ततस्तत एव स्वार्थात्स्वगुणे पिङ्गलत्वे धीरिति परम्परया पैङ्गल्यस्य शब्दार्थता, अग्निर्माणवक इत्यत्र लौकिकधीरप्येवमेवेति भाष्ये प्रकटीकृतमित्याह—इत्थमेवेति । तन्नेति । स्यादेवं यदि अग्न्यर्थधीः स्यात् । सा तु नास्ति । वाक्यार्थेऽनन्वितस्यानभिधेयत्वात् । ततश्च स्वयमप्रतीतोऽग्न्यर्थः कथं स्वगुणे धियं जनयति ॥

ननु लक्षणायामिव वाक्यार्थान्वितधीद्वारा अग्न्यर्थस्य प्रतीत्यन्वयितास्तु । ततश्च शब्दात्स्वार्थधीर्युक्तेत्यत्राह—न चेति । माणवकवर्तिपिङ्गलताहि वाक्यार्थान्वयिनी । न च तस्या अग्न्यर्थता—गुणता माणवकवर्तित्वात् । तत्कथं वाक्यार्थान्वितधीहेतुत्वमग्न्यर्थस्य । लक्षणायां तु वाक्यार्थान्वितस्य स्वार्थसम्बन्धितैवेति भेद इत्यर्थः ॥

ननु पैङ्गल्यस्वरूपस्यैव माणवकवर्तित्वं अग्निवर्तित्वं च, तत्कथं वाक्यार्थान्वितस्य न स्वार्थसम्बन्धितेत्याशङ्कां निगमनव्याजेन निराकरोति – अत इति । सत्यमेवं तथाप्यग्निर्माणवक इति गौणत्वेनाभिमत-

नन्वेवमग्निशब्दस्यैव तैक्ष्ण्यादिष्वपि प्रयोगात् भूयसां गुणानां स वाचकः स्यात् । तद्वरं स्वार्थमादृश्याद्वर्ततताम् । मैवम् । उक्तं हि 'असत्यां गतावनन्तशक्तितापि न दोषः ।' सादृश्यमपि न स्वार्थवर्त्यग्निशब्दगम्यम् । किन्तु माणवकवर्तीति न शक्तितो मुक्तिः । इवादि द्योत्यं, तदप्रयोगेऽपि युक्तिसिद्धमित्युक्तम् । अविनाभावमात्रात् सादृश्यधीरस्तु न तत् तदन्वयि । न हि लक्षणायामप्यविनाभावबुद्धिमात्रात् समोपान्वयः ।

विषये पैङ्गल्यस्य न स्वार्थान्विततया वाक्यार्थान्वयः, किन्तु माणवकवर्तितयैवेति न स्वार्थस्य प्रतीत्यन्वयिता । ततश्चानन्वितस्वार्थस्याशब्दोपनीतत्वादशाब्दतैवेति भावः । एवं च अस्मिन् पूर्वपक्षे लक्षणाया अनाक्षेप इत्याह--एवं चेति ।

ननु तत्सिद्ध्यधिकरणेऽपि यत्र परशब्दस्य परत्र वृत्तिः स गौण इति गौणमुख्यविवेकोक्तेः पुनरुक्तिः स्यादित्यत्राह—एवं चति । एकदेशिमतेन चोदयति—नन्विति । यद्यग्निशब्दो ज्वलनमिव पिङ्गलतामप्याह, किमिति तर्हि तत्र सोपपदता ? किमिति वाऽल्पः प्रयोगः । किमिति वा मनाक् प्रसिद्धिः । मुख्यत्वे हि प्रचुरप्रयोगनिरुपपदत्वसुष्ठुप्रसिद्धिभिर्भाव्यमिति भावः । तन्नेति । अनिदं प्रथमत्वात्प्रयोगस्य तत्र तावन्नानुयोगः । निरुपपदप्रयोगोऽपि क्वचिद्दृश्यते । अग्निरधीते अग्निर्गच्छतीत्यादौ । तथा मनाक् प्रसिद्धिरिति प्रयोगाल्पत्वादेव ।।

ननु गौणवृत्त्यङ्गीकारेणाप्यल्पप्रयोगोपपत्तौ किमिति तेषामन्यथा वर्णनमित्यत्राह—उक्तमिति । नन्वग्निर्माणवक इति तैक्ष्ण्यादिगुणेष्वपि प्रयोगाद् भूयसां गुणानां स वाचकः स्यात्, ततश्च शक्तिकल्पनागौरवं तद्वरं ज्वलने क्लृप्तशक्त्यैव स्वार्थसादृश्यादन्यत्र वर्ततामिति चोदयति—नन्विति । मैवमिति । सत्यं गत्यन्तराभावेऽनन्तशक्तितापि न दोष इत्यक्षादिषूक्तमित्यर्थः ।।

ननु स्वार्थसादृश्यादन्यत्र वृत्तिसत्त्वात्कथमगतिरित्यत्राह—सादृश्यमपीति । न स्वार्थसादृश्यादप्यत्र वृत्तिः । अग्निर्माणवक इत्यग्निशब्दात्स्वार्थ-

किन्तु वसतीत्यस्यान्वयार्थम् । इह तु अविनाभावावबुद्धं सादृश्यं विनापि पिङ्गलतार्थाग्निशब्दसमानाधिकरणतया माणवकान्वयसिद्धिः । पिङ्गलतार्थाग्निशब्दात् ज्वलने या धीः सा वह्नावुद्भूतं पिङ्गलत्वं दृष्टमित्येवं स्मृतिः ।

राद्धान्तस्तु-अग्निशब्दात्तावज्ज्वलने धीः । अतः तत्सदृशार्थान्तरे धीरित्येवं प्रतीत्यन्वितमुख्यान्तर्भावात् गौणोऽपि पदस्य स्वार्थ इति गतौ सत्यां नानेकशक्तितता युक्ता । तत्सदृश इत्येवं

सादृश्याप्रतीतेः, किन्तु—माणवकस्यैव सादृश्यमवगतम्, माणवकसामानाधिकरण्यादर्थोह्यर्थान्तरसम्बन्धादवगमयति । न च माणवकसादृश्यस्याग्न्यर्थस्य च सम्बन्ध इत्यग्न्यर्थवर्तिसादृश्यानवगमे अग्निशब्दस्य न शक्तितामुक्तिरिति वृत्यन्तराङ्गोकारेपि शक्तिकल्पनागौरवं समानमेवेति भावः । एतेन यदाहुः—युक्तमग्निरिव माणवक इत्यत्रेवशब्दप्रयोगात्सादृश्यधीः, अग्निर्माणवक इत्यत्र इवशब्दाप्रयोगात्कथं सादृश्यधीरित्याशंक्य चादिवन्निपातत्वेन इवशब्दस्य सादृश्यद्योतकत्वमेव, न वाचकत्वम् । अतस्तदप्रयोगेऽपि न्यायसिद्धमग्निशब्दस्य सादृश्यपरत्वमिति । तदप्ययुक्तमित्याह—इवादीति । इवादेः सादृश्यंप्रति वाचकत्वमेव, न द्योतकत्वम्, सति संभवे शब्दमुख्यार्थत्वस्य हानायोगात् । तेनाग्निर्माणवक इति इवशब्दाभावे सादृश्यशून्यो वाक्यार्थ इति पूर्वपक्षिणोऽभिप्रायः । अथ सादृश्ये शक्तौ स्वार्थे सादृश्ये च उभे शक्ती पिङ्गलादिगुणे तु बह्वयः शक्त्य इति चेन्न । सादृश्यार्थमपि पिङ्गलादिगुणे (च) शक्तिर्युक्तेति नानेकशक्तिकल्पनादोष इति भावः ॥

ननु यदि सादृश्यशून्यो वाक्यार्थः कथं तर्ह्यग्निर्माणवक इति सादृश्यधीरित्यत्राह—अविनाभावेति । ननु प्रतीतं सादृश्यमन्वयेऽप्यस्तीत्यत्राह—न तु तदिति । पूर्वादपरप्रत्ययेऽन्वयादर्शनात् । नन्वविनाभावधीस्थमपि लक्षणायामिवान्वय्यस्तु, इत्यत्राह—नहीति ।

ननु यथा वसतीत्यन्वयार्थमविनाभावधीस्थसमीपान्वयः, तथेहापि माणवकान्वयार्थमविनाभावधीस्थ सादृश्यान्वयोऽस्त्वित्यत्राह—इह त्विति ।

परस्थमपि सादृश्यं तत्प्रतियोगितया तदन्विततयोपस्थापितं लक्षणायामिव । सादृश्यं च यथासंभवं गुणादिनेतोहापि पिङ्गलतया तद्धीः, पिङ्गलतापि ज्वलनवर्तितां विनापि स्वरूपमात्रादुभयान्वितेति स्वार्थसम्बन्धिस्वरूपद्वारा स्वार्थ एव तावानिति शब्दवृत्तिरेव गौणेप्यर्थे । तात्पर्ये हि वृत्तिः शब्दस्य । तात्पर्यतश्च पदानां स्वार्थे वर्तमानानां कार्यान्वयिता । तात्पर्ये ह्यसति मुख्यो-

---

सादृश्यं विनापि पिङ्गलतादि गुणार्थाग्निपदेन शुक्लपटवत्समानाधिकरणतया माणवकान्वयसिद्धेरित्यर्थः ।। नन्वग्निर्माणवक इत्यत्राग्न्यर्थस्य यद्यनन्वितत्वान्न शाब्दता तर्ह्यग्न्यर्थधीः कथमित्यत्राह—पिङ्गलेनेति ।

राद्धान्तस्त्विति । गृहीतसम्बन्धादग्निशब्दात् तावज्ज्वलने धीः, ततस्तस्य वाक्यार्थान्वयानुपपत्तेः, ततोऽग्न्यर्थात्, तत्सदृशे अग्न्यर्थसदृशे अर्थान्तरे माणवके धीरिति वाक्यार्थान्वयिसादृश्यप्रतीत्यन्वितमुख्यार्थस्यापि वाक्यार्थेऽन्तर्भावात् गौणोऽपि परम्परया शब्दस्यार्थ इति मुख्यार्थ क्लृप्त्यैव शक्त्या सदृशे प्रयोगोपपत्तौ नानेकशक्तिकल्पना युक्तेत्यर्थः ।।

ननु माणवकवर्तिसादृश्यमग्न्यर्थानन्वयीति कथं मुख्यार्थस्य प्रतीत्यन्तर्भाव इत्यत्राह—तत्सदृश इति । यद्यपि साक्षादन्वयो नास्ति तथापि सादृश्यस्य प्रतियोगिसव्यपेक्षत्वात् तत्सदृश इत्येवं परस्थमपि सादृश्यं तत्प्रतियोगितया अन्वयितोपस्थितमिति लक्षणायामिव मुख्यार्थान्तिर्भावोऽस्तीत्यर्थः ।।

नन्वेवमग्निमाणवकमानयेत्युक्ते न पिङ्गलं माणवकमानयेयुः, अग्निसदृशस्य तस्यैव माणवकस्य धीस्थत्वादित्यत्राह—सादृश्यंचेति । गुणादिनिबन्धनत्वात् सादृश्यस्य यथासंभवं गुणादिना तदिति प्रकरणादिना इहापि लिङ्गतया तद्धीरिति पिङ्गलमाणवकानयनमित्यर्थः ।।

नन्वग्निवर्त्तिपैङ्गल्यस्य न माणवकवर्त्तितेति कथं गुणैक्यनिबन्धनं सादृश्यमित्यत्राह—पिङ्गलापीति । न हि तद्वर्तित्वेन तत्संबन्धो गुणानां तत्सम्बन्धात्पूर्वं तद्वर्तित्वासिद्धेः । किन्तु—स्वरूपत एव उभयथा-सम्बन्धितेति गुणैक्यात्तत्सादृश्यं युक्तमित्यर्थः ।।

ऽपि हेय एवेति 'विषं भुङ्क्ष्वेत्यादौ दर्शितम् । गुणादागतता चैवं गुणाद्धर्मात् तत्सदृशतया आगतत्वात् । गुणादेवाहत्येत्ययुक्तम् । नाना गुणाद्युपाधि गौरवापत्तेः शब्दाद्धीरप्येवमेव ज्वलन-सदृशतया धीर्न माणवकःसदृशो ज्वलन इति । न चोद्भूतितः उपमानान्वयाद्धीः मानाभावात् । अतो विपरीतधीरत्र पक्षे न कार्या, अनुमतप्रतिपक्षधीविरोधादेव । अतो ज्वलनसदृशोऽय-मितिधीरेव ज्वलनान्तर्भावमाह । तत्सादृश्यविगमे प्रयोगविग-मोऽपि तदन्तर्भावमाह गुणान्तरादपि प्रयोगः तदन्तर्भावमाह ।

नन्वेवं गुणस्वरूपैक्यनिबन्धनत्वे सादृश्यस्य न शब्दार्थता शब्द-स्पर्शाभावादित्यत्राह—इति स्वार्थेति । गुणस्वरूपस्य स्वार्थाग्न्यर्थसम्बन्धि-त्वात् तत्स्वरूपद्वारा तावान् सदृशपर्यन्तोऽर्थः शब्दस्य स्वार्थ एव तत्पर-त्वादिति गौणेप्यर्थे शब्दस्य वृत्तिरेव ।।

नन्वेवं सकृदुच्चरिताग्निशब्दस्य मुख्यया वृत्या ज्वलनधीः, गौण्या वृत्या सादृश्यधीरिति वृत्तिद्वयं स्यात्, ज्वलनधीव्यतिरेकेण सदृशबुद्ध्य-नुत्पत्तेरित्यत्राह—तात्पर्ये हीति । यत्र तात्पर्यं तत्रैव पदस्य वृत्तिः, अग्नि-र्माणवक इत्यादौ तु सादृश्य एव तात्पर्यम् पदस्य, स्वार्थस्य तु सदृशोप-स्थित्यर्थतयाऽन्यपरत्वात् । अतः सादृश्य एव पदस्य वृत्तिः, न तु स्वार्थे । नन्वेवं कार्यपरत्वात्सर्वस्य तत्रैव वृत्तिः स्यादित्यत्राह—तात्पर्यतश्चेति । ननु तात्पर्याभावेऽपि प्रथमं धीस्थत्वात् मुख्य एव वृत्तिरस्त्वित्यत्राह—तात्पर्येति । विषं भुङ्क्ष्वेत्यादौ तु मुख्यस्य लिङर्थस्य सत्वादन्विताभिधानसिद्धि-रिति भावः ।।

ननु गुणादागतो गौण पिङ्गलादिगुणादेव गौणी वृत्तिर्न सदृशतयेत्यत्राह—गुणादिति । गुणात्सादृश्योपस्थितिरित्येवं गुणादागतता, न तु गुणादेवाहत्य साक्षाद्गौणोपस्थितिरिति । तत्र हेतुः—नानेति । ननु उपाधिगौरवे गुणस्य सादृश्यापेक्षणीयतया प्रथमप्रतीततया च गुणादेव गौणता युक्ता, न तु पश्चात्प्रतीतसादृश्यादित्यत्राह—शब्दाद्धीरपीति । प्रथमप्रतीतत्वे सादृश्य-

नन्वेवं यत्र गौण एव मुख्याभिमानात् आभिमानिक मुख्यान्तर्भावाद्धीः तत्र विपरीतो गौणमुख्यविभागो भवेत्। मैवम्। इयमेव धीः मौलिकविवेककरी। सा तु यत्र प्रयोगमात्रान्न सिद्धा तत्र शक्तिलाघवाद्वा शाब्दस्मृतितो वा वाक्यशेषादेव वा मुख्यतां बुद्ध्वा तद्धीपूर्विकैवार्थान्तराद्धीः। मूलप्रयोगानवगमात् तथाऽभिमान इति रहस्यम्।

प्रतीतौ विशेषाभावान्माणवकसदृशो ज्वलन इत्यपि धीः स्यात्, न च सा तथेति सादृश्यपरतैवाग्निशब्दस्य।

ननु गुणपरत्वेऽप्युद्भूतगुणत एव उपमानतेत्युद्भूतगुणत्वादग्नेरग्निसदृश इत्येव धीर्लोके तथा दर्शनादित्यत्राह—न चेति। तत्र हेतुः—मानाभावादिति। प्रथमप्रतीतत्वमेव उपमानत्वे कारणं नोद्भूतगुणत्वमात्रमप्रतीतस्य उपमानत्वायोगात्। अत्र चाग्निर्माणवक इति पिङ्गलमाणवकेऽवगते पश्चात् तद्गुणतयाऽग्निप्रतीतेः। प्रथमप्रतीतमाणवके युक्तमुपमानत्वमिति माणवकसदृशोऽग्निरित्यपि धीः स्यादिति भावः॥

ननु यदि शक्तिकल्पनाभयात् ज्वलन एव मुख्यता। अग्निशब्दस्य तत्सदृशतया माणवके गौणीवृत्तिस्तर्हि माणवके मुख्यता। तत्सदृशतया ज्वलने गौणतेति किं न स्यादित्यत्राह—अत इति। अग्निसदृशो माणवक इति प्रतिपक्षधीविरोधादेव विपरीतशङ्का न कार्येत्यर्थः। एतेनेदमप्युक्तम्। माणवकसदृशोऽग्निरिति धीरस्तु। गुणपरत्वेनैवाविनाभावात्सादृश्यधीरस्तु। किं सादृश्यपरतयेति विपरीतशङ्कापि न कार्येति। प्रतिपक्षधीविरोधादेव नात्र प्रतिपक्षेभिभवसंभवः। इहत्वग्निसदृशो माणवक इति सुप्रसिद्धप्रतिपक्षधी विरोधादिति विपरीतशङ्का न कार्येति॥

नन्वग्निर्माणवक इति सदृशतया माणवकस्यैव वाक्यार्थान्वयात् स्वार्थस्याग्नेर्न प्रतीत्यन्वयितया वाक्यार्थान्तर्भाव इत्याशंक्य उपसंहारव्याजेन तदन्तर्भावं बहुधा द्रढयति—अत इति।

नन्वज्ञातमुख्यस्य गौण एव व्युत्पत्तेर्गौण एवाभिमानिकं मुख्यत्वमिति तदन्तर्भावाद्विपरीतो गौणमुख्यविवेको भवेदिति चोदयति—नन्विति।

श्रोकराद्युक्तस्त्वत्रैवं गौणमुख्यविभागः शक्तिलाघवाद्भेदे कुतो न विपरीतमित्याशङ्क्योक्तं पिङ्गलमाणवकवाचित्वे अग्नि-शब्दस्य गुणान्तरान्माणवकसदृशे वृषले ज्वलनासदृशेऽपि अग्नि-शब्दप्रयोगप्रसंगः स्यात् । माणवकेऽपि तीव्रतादिमति प्रयोगे शक्त्यन्तरं स्यात् । ज्वलनसादृश्यात्तु प्रयोगे प्रतिगुणं न शक्ति-रिति लाघवाद्विवेकः । तन्न । लक्षणामनाक्षिप्यायं गौणाक्षेपः समाधिसमतया तदाक्षेपोऽपि स्यात् । तत्रापि सम्बन्धिभेदात्

मेवमिति । मुख्यार्थप्रतियोगिकसादृश्यविशिष्टतया अर्थान्तरधीरेव मौलिकी मूलभूता गौणमुख्यविवेककरी ॥

नन्वज्ञातमुख्यस्य सदृशतया प्रतीत्यभावात्कथं गौणत्वमित्यत्राह— सात्विति । पिङ्गलमाणवक [वत्] तीक्ष्णमाणवकेपि शक्त्यन्तरे गौरवम् । तद्वाने शक्तिलाघवे राजान इत्यादि शाब्दस्मृतिः ? वराहं गावोऽनुधावन्ती-त्यादौ वाक्यशेषः । तैर्मुख्यतां बुद्ध्वा तद्धीपूर्विकैव अर्थान्तरधीः ॥

नन्वेवं सति गौणे कथं मुख्यताभिमान इत्यत्राह—मूलप्रयोगेति ॥ ननु मुख्यापरिज्ञाने कथं गौणार्थधीरित्यत्राह—इति रहस्यमिति । न गौणार्थधी-र्मुख्यार्थधीपूर्विका । किन्तु—गौणत्वधीर्मुख्यत्वधीपूर्विकेति गौणत्वज्ञानमेव मुख्यत्वज्ञानसव्यपेक्षमिति भावः । श्रीकराद्युक्तस्त्विति । शक्तिलाघवादग्नि-शब्दप्रयोगभेदेऽपि पिङ्गलमाणवके मुख्यत्वं ज्वलने गौणत्वमिति विपरीतं कुतो न स्यादित्याशंक्य उत्तरमुक्तम् । तथा सति गुणान्तरान्माणवकसदृशे ज्वलनासदृशेपि वृषलेऽग्निशब्दस्य प्रयोगः । तीव्रत्वादिमति माणवके शक्त्य-न्तरं प्रसज्येत । ज्वलनसादृश्यात्तु माणवके प्रयोगे न तदनिष्टद्वयमिति लाघवाद् गौणमुख्ययोर्विवेक इति । तन्नेति । अस्मिन्नधिकरणे लक्षणाना-क्षेपेण गौणाक्षेपो गुरोरभिमतः । परोक्तप्रकारे तु समाधिसमतया तदाक्षेपो-ऽपि स्यात् । कथमित्यत्राह—तत्रापि हीति । स्वोक्तप्रकारे कथं तदनाक्षेप इत्यत्राह—यथा त्विति । विपरीतशङ्कानिरासे प्रसिद्धप्रतिपक्षधीविरोधएव हेतुत्वेनोक्तः । तत्र लक्षणाक्षेपानवकाश इत्यर्थः ॥

प्रयोगभेदे शक्तिभेदः स्यात् इति । तथा समीपवाचित्वेऽन्यसमीपे गङ्गाशब्दप्रयोगप्रसङ्ग इति लक्षणाविवेकोऽप्ययं स्यात् । यथा तु स्वाभिमते प्रकारे न तथात्वं तथा दर्शितमेव । लक्षणातो गौणस्यैवं भेदः गौणे हि परपदप्रयोगादेव गुणापेते पदतात्पर्यम् । लक्षणायान्तु पदार्थतो लब्धे सम्बन्धिनि पदतात्पर्यत् । अयं भावः —स्वार्थात्तत्सदृशे स्मृतिः सादृश्यस्मृतिश्चास्त्येव सादृश्योपेत सदृशधीस्तु पदप्रयोगबलादेव । लक्षणायान्तु सम्बन्ध स्मृतिः

ननु भवत्वेवं गौणमुख्ययोर्विवेकः । गौणलक्षणयोः को भेदः । अन्वयानुपपत्त्या परत्र परशब्दप्रयोगस्य तुल्यत्वादिति कथं वृत्तित्रयसिद्धिरित्याशंक्य विवरणपञ्चिकोक्तं गौणलक्षणाभेदमाह—लक्षणात इति ।।

नन्वयमेव भेदो नोपपद्यते । यथा लक्षणायां सम्बन्धिसम्बन्धयोः स्मृतयोरपि सम्बन्धिमात्रान्वितार्थवाक्यतात्पर्यमवधार्य संभूयकारित्वात्पदस्यापि तात्पर्यमवगम्यते । तथा गौणेपि मुख्यस्यानन्वयात् सदृशसादृश्ययोः स्मृतयोरपि सदृशमात्र एव तात्पर्यमवगम्यताम् । किञ्च—गुणोपेत इत्ययुक्तम् । गुणस्यार्थान्तरोपस्थापकत्वानुपगमादित्यत्राह—अयं भाव इति । अग्निशब्दात्स्वार्थे स्मृतिः । ततस्तस्यान्वयोपपत्तिविमर्शनात्तस्मात् स्वार्थात्सदृशे अर्थान्तरे स्मृतिः । सदृशस्मृतिश्च सादृश्यव्यतिरेकेण नास्तीति सादृश्यस्मृतिश्चास्त्येव ।

ननु भवत्वेवम् । तथापि अपेक्षावशेन किं सदृशमात्रे वाक्यतात्पर्यम् । किं वा प्रतीतिवशेन सादृश्यमात्रे उताहो सादृश्योपेते विशिष्टे इति शङ्किता [त्वा] प्रथमद्वितीययोरयुक्तत्वात् तृतीयं पक्षमाश्रयति—सादृश्योपेतेति । न तावत्सदृशमात्रे तात्पर्यम् । पदान्तरेणोपात्ततया पौनरुक्त्यापत्तेः । नापि सादृश्यमात्रपरता । समानाधिकरणप्रयोगानुपपत्तेः । अतः सादृश्योपेतसदृशस्मृत्या तत्रैव वाक्यतात्पर्यम् । सादृश्योपेतसदृशधीस्तु (सादृश्यविशिष्टसदृशस्मृतिस्तु) समानाधिकरणपदप्रयोगबलादेव । अतो गौणे सादृश्यविशिष्टान्वितार्थे वाक्यतात्पर्यज्ञानसमय एव पदस्योपयोगः ।

स्वार्थात् सम्बन्धिस्मृतिरपि। तत्र सम्बन्धि मात्रे पदतात्पर्यं न सम्बन्धोपेततामप्यन्तर्भाव्य इति न पदप्रयोगापेक्षा। तात्पर्यादेव पदप्रयोगधीः। अत एव विलम्बेन पदप्रवृत्तेर्लक्षणा गौणात् जघन्या। वृत्तित्रयञ्च सिद्धम्।

यत्तु श्रीकराद्युक्तम्। वाक्यार्थान्वयार्थं लक्षणापदमर्थान्तर-परं गौणं तु स्वयमेव गुणोपेतपरमिति तन्न, नह्यन्वयानुपपत्तिं विना मुख्यहानं, अनुपपत्तिरपि नाना विधा। अतो यदुक्तं

नन्वेवं लक्षणायामप्येवमेवास्त्वित्याशंक्य वैषम्यं वक्तुमुभयसिद्धार्थ-मनुवदति—लक्षणायां त्विति। वैषम्यमाह—तत्रेति। अपेक्षावशेन सम्बन्धि-मात्रान्वितेऽर्थे वाक्यतात्पर्यात्सम्बन्धिमात्रे पदतात्पर्यं न सम्बन्धोपेते। प्रतिवसतीत्यनेनान्वयायोगोऽपि सम्बन्धविशिष्टे सम्बन्धिप्रतीत्यर्थस्य वाक्यतात्पर्यपूर्वकपदतात्पर्यान्तर्भावे प्रमाणाभावादिति न पदप्रयोगापेक्षा तत्र। यत्रापि गौणे पदप्रयोगो नास्ति अग्निरधीते अग्निर्गच्छतीति तत्रापि सादृश्योपेत एव पदतात्पर्यं पदप्रयोगसहितविषये तथैव तात्पर्यविधारणात् यथा काम्ये कामिनियोज्यान्वयबलादपूर्वे लिङादेस्तात्पर्यमिति नित्येपि तथा।

ननु यदि लक्षणायां वाक्यतात्पर्यज्ञानसमये न पदप्रयोगापेक्षा कथं तर्हि पदप्रयोगधीरित्यत्राह—तात्पर्यादेवेति। वाक्यतात्पर्यं प्रतीत्यैव पश्चात् तत्र पदप्रयोगधीः, संभूयकारिताव्युत्पत्तेरित्यर्थः। यत एवं गौणे पदप्रयोग-तात्पर्यनिरूपणपूर्वकमेव विशिष्टेऽर्थे वाक्यतात्पर्याद्विशिष्टान्वयपरत्वम् पदस्य, लक्षणायां तु पदप्रयोगनिरपेक्षमेव वाक्यतात्पर्ये ज्ञाते पश्चात्तत्र पदप्रयोगधीः। अत एव जघन्यत्वं गौणाल्लक्षणायास्तदाह—अत एवेति। एवं च वृत्तित्रयसिद्धिरपीत्याह - वृत्तित्रयं चेति। यत्तु श्रीकराद्युक्तमिति। लक्षणापदं हि मुख्यार्थस्य वाक्यार्थान्वयानुपपत्या तदन्वयार्थं सम्बन्ध्यर्था-न्तरपरं, गौणपदं त्वन्वयानुपपत्तिं विनापि स्वत एव गुणोपेतपरमिति। तन्नेति। वाक्यार्थान्वयानुपपत्तिं विनापि स्वत एव मुख्यार्थहानस्यायोगात्।

लक्षणायां योग्यताबलाल्लब्धेऽन्वये पदस्य तदन्वयानुवादात् वृत्तिरिति तत्प्रत्युक्तम् । योग्यताबलाद्धि पदार्थताज्ञानं नान्वय एव । असति हि पदे योग्यतासन्निधापितमनन्वयीति ध्येयम् । एवं स्थिते पूर्वपक्षः मुख्यामुख्यद्वारशेषतापि लिङ्गान्मन्त्राणाम् । ग्राहकार्थस्य ग्राहकीयं शक्यं द्वारमिति न्यायसिद्धम् । विशेषे तु मानान्तरापेक्षेति यावन्मन्त्रावगम्यमेव द्वारम् । एवं

अग्निरधीते अग्निर्गच्छतीत्यत्रानुपपत्तः [?]स्फुटत्वादग्निर्माणवकस्तिष्ठति । अग्निर्माणवकमानयेत्यत्र यद्यपि आनयतिस्थितिरूपक्रियान्वयोऽनुपपन्नो-मुख्यस्य । तथापि सम्भूयकारित्वव्युत्पत्तेर्माणवकान्वितमुख्यस्यानन्वयः । अन्वयानुपपत्तेरेव नानाविधत्वात् । अन्यथा प्रतिवसतीत्यन्वयोऽपि घोषपदान्वयाभावे नानुपपन्न इति लक्षणापदेपि नानुपपत्तिः । यत एवमनुपपत्तिपूर्वमर्थान्तरे पदतात्पर्यात् पदमेव वाक्यार्थान्वयहेतुः । अत एव परोक्तमप्ययुक्तमित्याह—अत एवेति । कुतो न युक्तमित्यत्राह—योग्यतेति । योग्यताबलाद्धि पदार्थता [ताज्ञानं] (ज्ञानस्य) नान्वय एव । तदनुवादात्तस्य वृत्तिः स्यात् । अतो लक्षणायामपि पदाधीनसन्निधिरेवान्वये हेतुः । असति तु पदे योग्यतासन्निधापितमप्यनन्वयि यतः । अत एवानन्तर्यमचोदनेत्यत्र योग्यतासन्निधापितोऽपि सन्निहितः कर्ता स्ववाक्ये पदाधीनसन्निध्यभावात् नान्वयि ।

ननु तर्हि द्वारं द्वारमित्यत्र कथमन्वय इत्यत्राह—इति ध्येयमिति । अयं भावः—अभिधानाभिधेयापर्यवसानमूलकाध्याहारोपस्थापितोऽप्यर्थः पदाधीनसन्निधेरेवेति युक्तस्तत्रान्वयः । आनन्तर्यमचोदनेत्यत्र त्वभिधानस्य पर्यवसितत्वात् नान्वय इति । एवं विषयशुद्ध्य[ा]धिकरणे गौणमुख्यविवेके स्थिते प्रकृतचिन्ता । पूर्वपक्षमाह—एवं स्थित इति । मन्त्राणां लिङ्गान्मुख्यामुख्यसर्वद्वारशेषता युक्ता ।

ननु मुख्येनैव द्वारेण ग्राहकान्वयोपपत्तौ कुतः सर्वशेषतेत्यत्राह—ग्राहकेति । मन्त्राणां ग्राहकगृहीतानां सामान्येन करणैदमर्थ्ये विध्यापादिते

पूषानुमन्त्रणमन्त्रादेः अनुत्कर्षः । राद्धान्तस्तु—

मुख्ये पूर्वावगम्ये द्वारे लब्धे ग्राहकमन्त्राम्नानयोश्चरितार्थत्वान्न जघन्येऽपि तात्पर्यम् । यत्र तु जघन्यमेव परं तत्र तद्द्वारं अचरितार्थत्वात्तयोः

नन्वेवं पूषानुमन्त्रणमन्त्रादेः जघन्यद्वारतास्तु प्रकरणे मुख्यद्वाराभावात् । तन्न । मन्त्रलिङ्गस्वरसान्मुख्यद्वारलाभात् तदनुरोधात् प्रकरणबाधोऽस्तु न दोषः । अनुमन्त्रणमन्त्र इति

किं द्वारा तन्निर्वाह इत्यपेक्षायां विनियोज्यशक्तिनिरूपणात् ग्राहकीयं शक्यं द्वारमिति न्यायसिद्धमित्यर्थः । शक्यविशेषनियमस्तु मानान्तरादिति मानान्तरसापेक्षता स्यात् ।

ननु अवघातवदत्रापि विशेषनियम एव किमिति न भवतीत्यत्राह—इति यावदिति । युक्तं तत्र श्रुतेरेव विशेषनियमावगतेः । अत्र तु श्रुत्यभावात् लिङ्गाद्विशेषानवगतेर्यावन्मन्त्रावगम्यमेव द्वारं युक्तम् । अभ्युच्चयमाह—विशेषेति । राद्धान्तस्त्विति । यदि विशेषनियमे मानान्तरापेक्षा स्यात् स्यादेवम् । अत्र तु मन्त्रलिङ्गादेव विशेषावगमः मुख्यस्य पूर्वावगम्यत्वात् ।

ननु मुख्यवज्जघन्यमपि किमिति न द्वारमित्यत्राह—द्वारेति । ग्राहकमन्त्राम्नानाचरितार्थत्वसहकृतं लिङ्गं विनियोजकं तत्र मुख्यद्वारे लब्धे तयोश्चरितार्थत्वान्न जघन्येऽपि तात्पर्यम् ।

नन्वेवं न कुत्रापि गौणे मन्त्रविनियोग इत्यत्राह—द्वारेति । यत्र त्विति । नन्वेवं प्रकरणे मुख्याभावात्पूषानुमन्त्रणादेर्जघन्यद्वारतास्त्विति चोदयति—नन्विति । तन्नेति । यदि वेदे क्वापि पूषा देवता न स्यात । स्यात्तदा जघन्यद्वारता, न त्वेतदस्तीत्यर्थः ।

ननु प्रकरणादुत्कृष्टस्यानुमन्त्रणमन्त्रस्य सामान्यसंबन्धाभावात्कथं लिङ्गाद्विनियोग इत्यत्राह—अनुमन्त्रणेति । नन्वनुष्ठेयप्रकाशकत्वात् मन्त्रणामनुष्ठेयस्यच मन्त्रप्रकाश्यत्वान्मुख्यद्वारे लब्धेपि अमन्त्रकजघन्ये मन्त्रप्रकाश्यत्वार्थं मन्त्रो युक्त इत्यत्राह—प्रकरणे मुख्येति । तत्र हेतुः—न हीति ।

समाख्यया सामान्यसम्बन्धे लिङ्गान्मुख्यद्वारता । प्रकरणे मुख्यलाभेपि मन्त्रप्रकाश्यतार्थं अमन्त्रके जघन्येऽपि कर्तुं मन्त्र इत्ययुक्तम् । न हि मन्त्रेणैव सर्वं प्रकाश्यमिति मानमस्ति । यद्यपि द्वयोश्चरितार्थत्वात् श्रुतिलिङ्गाधिकरणेऽपि राद्धान्तः तथापि न पुनरुक्तिः । इह मन्त्रलिङ्गस्यैव साम्यशङ्का तत्र श्रुति लिङ्गयोः । अतः प्रकरणान्तरता । भाष्यव्याख्यादि च सुगमम् ।

वचनात्वयथार्थमैन्द्री स्यात् । (३.२.२)

स्वतो लिङ्गादेव मन्त्रशेषता वचनात्तु श्रुतितोपीत्युच्यते । अतः सङ्गतिद्वयम् । श्रुत्या यत्र शेषता न तत्र लिङ्गादपीति श्रुतिलिङ्गाधिकरणे । अतो न पुनरुक्तिः ।

अनुष्ठेयस्मृतिरेवापेक्षिता । अनपेक्षिता न स्मृतिहेतुविशेषोपीति भावः ।

नन्वेवं श्रुतिलिङ्गाधिकरणेऽपि ग्राहकमन्त्राम्नानयोर्द्वयोश्चरितार्थत्वादेव राद्धान्त इति तेन पौनरुक्त्यं स्यादित्यत्राह--यद्यपीति । राद्धान्तयुक्तिसाम्येपि पूर्वपक्षप्रकारभेदान्न पौनरुक्त्यमिति भावः । अपि च गौणस्य प्रत्यायने वहवोऽभ्युपाया इत्यादि भाष्यस्य कोऽर्थं इत्यत्राह—भाष्यव्याख्यानादिति । टीकयोरिति शेषः ।

वचनात्वयथार्थमैन्द्री स्यात् ।

अग्नौ श्रुत"मैन्द्र्या गार्हपत्यमुपतिष्ठत" इति ।

तत्रेयं चिन्ता किमैन्द्र्याः इन्द्राभिधानद्वारेण इन्द्रशेषता उत गार्हपत्ये तदभिधानद्वारेणेति ।

ननु मन्त्राणां लिङ्गत एव शेषता । यत्रापि तदर्थशास्त्रम् । तत्रापि लैङ्गिक्येव शेषता तदनुवादिकैव श्रुतिः । तत्कथं मन्त्रस्येह श्रुतितः शेषता । कथं वा लिङ्गशेषतापादे सङ्गतिस्तत्राह—स्वत इति । सत्यम् । स्वतो लिङ्गादेव मन्त्रशेषता, तथापि वचनादनन्यार्थवचनं पर्यालोच्य श्रुतितोऽपीत्युच्यते । अतो युक्ता अवान्तरसङ्गतिरिति । पादे चापवादकतयेत्यर्थः ।

पूर्वपक्षस्तु —मुख्यासम्भवे जघन्येऽपि लिङ्गाच्छेषतेत्युक्तम् । तदत्रापोद्यते यद्यत्राशक्तं तत्तत्र न कारकतया विनियोगार्हम्, अग्निरिव सेके। अतोऽनोप्सितार्थात् द्वितीया । गौणार्थतया तदर्हताप्युक्ता । न हि गुणोऽस्तीत्येवं गौणता । किन्तु गौणार्थपरं पदं इति निश्चयात् । न चेह तथास्ति । वचनं हि मन्त्रेणाभिधानं कार्यमित्येव शक्तं न त्विन्द्रपदं गार्हपत्ये प्रयुक्तमिति ! अत ऐन्द्र्या इन्द्राभिधानं गार्हपत्येनेत्यन्वयः । अनीप्सितत्वे हि क्रियान्वयः कारकतयैवेप्सितत्वादौत्सर्गिकः कारकतान्वयः

नन्वत्रैव विषये श्रुतितः शेषत्वं श्रुतिलिङ्गनयेप्युक्तमिति पुनरुक्तमित्यत्राह—यत्रेति। इह सिद्धे श्रुतितः शेषत्वे यत्र श्रुत्या शेषता न तत्र लिङ्गादपीति श्रुतिलिङ्गनये व्युत्पाद्यमित्यपौनरुक्तमिति भावः ।

ननु गौणमुख्यनये मुख्यलिङ्गाभावे जघन्यलिङ्गादपि शेषतेत्युक्तम् । तत्र चैन्द्र्या गार्हपत्यमुपतिष्ठत इत्यैन्द्र्या गार्हपत्यार्थता श्रुत्या अवगता । उपान्मन्त्रकरण इत्यात्मनेपदादुपपूर्वात्तिष्ठतेरभिधानार्थता। ततश्चाभिधानद्वारा गार्हपत्यशेषतैव ऐन्द्र्या युक्तेति कथं पूर्वपक्ष इत्यत्राह—पूर्वपक्षस्त्विति । सत्यमुक्तम् । तदत्राक्षिप्यते । कथमित्यत्राह—यद्यत्रेति । श्रुत्यादि विनियोगो हि विनियोज्यशक्त्यनतिक्रमेणैव । ततश्च यद्यत्राशक्तं न तत्तत्र विनियोगार्हम् । यथाग्निरवसेके । अतो नेन्द्रपदेन गार्हपत्याभिधानं शक्यमिति द्वितोयाऽनीप्सितार्थैव ।

ननु गौणार्थतया विनियोगार्थताऽस्त्वित्यत्राह—गौणेति । तत्र हेतुः—नहीति । गौणार्थपरं पदमिति तात्पर्यनिश्चयादेव तदर्थता । न तु गुणोऽस्तीत्येतावता । तात्पर्यनिश्चयश्चेह नास्ति ।

नन्वैन्द्र्या गार्हपत्यमिति वचनबलादेव इन्द्रपदस्य गार्हपत्ये तात्पर्यं ज्ञातमित्यत्राह—वचनं हीति । नन्वनीप्सितार्थत्वे द्वितीयाया वचनस्य कथमन्वय इत्यत्राह—अत इति । नन्वनोप्सितत्वेपि कर्मत्वाहानात्कथं गार्हपत्येनेत्यन्वय इत्यत्राह—अनीप्सितत्वेपीति । मन्त्रानभिधेयतया गार्हपत्य-

अपोदितः नानीप्सिततयापि । कारकता च दृष्टेनादृष्टेनवाऽस्तु । अथानीप्सितता नेष्टा तर्ह्युपेत्येत्यध्याहारः ।

राद्धान्तस्तु-अनीप्सितेऽपि क्रियाफलभागिकारकमित्यभिधेयतैव । अध्याहारे तूपात्तक्रियापेक्षं न कर्मत्वं, अतो यथोपदेशं कार्यमाप्त्यादिकं युक्तमिति गार्हपत्याभिधानं कार्यं मन्त्रस्येति । अत एवेन्द्रपदस्य गौणत्वनिश्चयः, अन्यथा तदसिद्धेः । इत्थमपि वेदात् पदार्थधीः । इन्दतेर्वा रूपं । तदाऽत्र गौणशब्दो गुणयोगाभिप्रायः । तदाह—

स्यानीप्सितत्वे प्राधान्याभावादौत्सर्गिककारकतयैव क्रियान्वयः । नन्विन्द्राभिधाने कथं गार्हपत्यस्य कारकतेत्यत्राह—कारकता चेति ।

ननु द्वितीयायाः स्वतः प्राप्तमीप्सितत्वं न परित्याज्यमिति शङ्कते—अथेति । समाधत्ते—तर्हीति । सर्वथा गार्हपत्यस्याभिधेयतानर्हेति अनर्हतेति भावः । राद्धान्तस्त्विति । अनीप्सितकारकमपि क्रियाफलभाग्येवेति गार्हपत्यस्यानीप्सितत्वेपि अभिधानक्रियाफलभागितया अभिधेयतैव । तद्वरं स्वतः प्राप्तेप्सितकर्मतया अभिधेयत्वमेवेत्यर्थः ।

नन्वनीप्सितत्वे उपेत्यध्याहार एव युक्त इत्यत्राह—अध्याहारे त्विति । नन्वभिधानकार्यकरणत्वात् मन्त्रस्य गार्हपत्ये च तदसिद्धेः । यथाकार्यं शेषत्वं युक्तमिति कर्मत्वाविवक्षाकारकत्वेनैव तदन्वयोऽस्त्वित्यत्राह—अत इति । अतिदेशस्य हि कार्याधीनत्वं नोपदेशस्येति यथोपदेशं कार्यं युक्तम् । 'यथाकार्यमुपदेशत' इति सप्तमाद्योक्तेनाविरोधं परिहरति—आप्त्यादिकमिति । तत्र कार्यशब्दो नियोगाभिप्राय इति यावत् ।

ननु गार्हपत्याभिधानशक्तेर्मन्त्रस्य कथं यथोपदेशं कार्यमित्यत्राह—इति गार्हपत्येति । गौण्या वृत्त्या तदभिधानं कार्यमित्यर्थः । नन्वेवमिन्द्रपदस्य गार्हपत्ये तात्पर्ये अनवधृते कथं गुणोऽस्तीत्येतावता गौणीवृत्तिरित्यत्राह—अत एवेति । गार्हपत्याभिधाने मन्त्रविनियोगान्यथानुपपत्त्या गार्हपत्ये गौणत्वमिन्द्रपदस्यावधृतमित्यर्थः ।

स्यादग्ने गौणमिन्द्रत्वं यज्ञसम्बन्धकारितम् ।
इन्दत्यर्थानुसाराद्वा स्वकार्ये सोऽपि हीश्वरः ।।

ऐन्द्रीति तद्धितः इन्द्रपदयोगादपि घटत इति ।

विवरणे तु पूर्वः पक्षः—उपतिष्ठत इत्यभिधानप्रयोजनकं समीपावस्थानमाह । मन्त्रकरणेऽर्थे आत्मनेपदस्मृतिः । धातूपात्त व्यापारापेक्षया ऐन्द्र्याः करणतयाऽन्वयः । द्वयमेवं घटते । प्रयोजनांशद्वारापि धात्वर्थं प्रति करणत्वात् । साक्षात् धात्वर्थकरणतानुज्ञाने सत्यां गतौ धातोः, प्रायिकोपस्थानार्थताहानात् अभि-

---

ननु यववराहादिवद्वाक्यशेषाभावे कथं गौणार्थधीरित्यत्राह—इत्थमपीति । विनियोगाधीनत्वान्मन्त्राभिधानस्य वाक्यशेषस्थानीयाद्वेदाद्विनियोजकब्राह्मणवाक्यात्पदार्थधीर्युक्तेत्यर्थः । एवं तावद्गौणीवृत्त्यङ्गीकारेणोक्तम् । इदानीं योगात्तदभिधानमित्याह—इन्दतेर्वेति । ननु योगपक्षे सूत्रस्थगुणपदानन्वय इत्यत्राह—गुणशब्द इति । उपलक्षणतया गुणशब्दो गुणयोगाभिधानपर इत्यर्थः । स्वोक्तार्थसंवादतया आचार्योक्तं श्लोकमाह—तदाहेति ।

ननु देवतातद्धितान्तैन्द्रीपदयोगाद्वचनमिदं तत्सव्यपेक्षं कथं तद्विपरीते गार्हपत्याभिधाने विनियोजकमिति तत्राह—ऐन्द्रीति । वार्त्रघ्नादिवत्पदयोगादपि तद्धितो मत्वर्थे अण् प्रत्ययो वक्तव्यः, न हि तत्र गौणे इन्द्रो देवता गौणार्थे तात्पर्यावधारणाशक्तेरिति भावः । विवरणे त्विति । तत्रेयं चिन्ता, किमैन्द्र्या इन्द्रशेषता उत गार्हपत्य इति, तदर्थमियं चिन्ता किमुपतिष्ठत इत्यभिधानप्रयोजकं समीपस्थानमाह उताभिधानमिति । तत्र पूर्वपक्षमाह—पूर्वपक्षस्त्विति ।।

नन्वभिधानमात्रं वा समीपस्थानमात्रं वाऽर्थोऽस्त्विति चेन्न, ऐन्द्र्या उपतिष्ठत इति धातूपात्तव्यापारे तस्याः करणता अवगता, सा समीपस्थानमात्रवाचित्वे न घटते, मन्त्रस्य तत्राकरणत्वादुपान्मन्त्रकरण इत्यात्मनेपदस्यैव मन्त्रकरणाभिधानार्थत्वं स्मृतम् । तच्चाभिधानमात्रवाचित्वेन घटते । उत उभयोपपत्त्यर्थमभिधानप्रयोजनकसमीपस्थानमर्थ इत्यर्थः ।।

धानार्थता कल्प्या। अनेकार्थता धातोरिवाख्यातस्यापि। मन्त्रकरणेऽर्थे वर्तमानाद्धातोः इत्यपि शाब्दानां व्याख्यानुज्ञातैव। आख्यातागमे चायमर्थ इत्याख्यातार्थ एव प्रयोजनांशः। स च मन्त्रलिङ्गादेव प्राप्तः इत्यप्राप्तांशगार्हपत्यसमीपस्थान विधिः। तत्समीपस्थानं कर्तृगुणाऽभिक्रमणवदङ्गम्। गार्हपत्य शब्दो देश विशेषलक्षणार्थो विशेषणतया समीपस्य। उपशब्दः समीपार्थः। तदर्थस्यापि कर्मप्रवचनीयसंज्ञामुपसङ्ख्यायाप्यगत्या तद्योगे द्वितीयेयम्। उपस्थानवाचित्वे चाकर्मकत्वान्न कारकविभक्ति-

---

नन्वेवमपि नोभयोपपत्तिः। अभिधानांशस्यात्मनेपदार्थतया न धातूपात्तता। समीपस्थानांशे तु धातूपात्ते न मन्त्रः करणमिति धातूपात्ते न करणता समर्थिता इत्यत्राह—इत्यभिधान प्रयोजनकेति। अभिधानप्रयोजनकसमीपस्थानार्थतया प्रयोजनांशद्वारापि धात्वर्थं प्रति करणता युक्ता, यथा विष्णुं यजतीत्युद्देशांशद्वारा यागे कर्मता। नन्वभिधानार्थतां धातोरङ्गीकृत्य किमिति तत्र साक्षादेव करणता नानुज्ञातेत्यत्राह—साक्षादिति। धातौ प्रचुरप्रसिद्धसमीपस्थानार्थताहानिः सत्यांगतौ न युक्तेत्यर्थः॥

नन्वनेकार्थत्वाद्धातोरभिधानार्थतानुज्ञा युक्ता। आख्यातस्य त्वनेकार्थता न युक्ता, शाब्दाननुमतत्वादित्यत्राह—अनेकेति। शाब्दानुमतेति शेषः। ननु मन्त्रकरणेऽर्थे वर्तमानाद्धातोरिति सूत्रव्याख्या शाब्दानां विरुद्धेत्यत्राह—मन्त्रकरण इति। धातोरभिधानप्रयोजकसमीपस्थानार्थतोक्तेः शाब्दानां व्याख्या अनुमतेत्यर्थः। सूत्रस्य मूलभूतात् यदागमन्यायादपि आख्यातार्थ एवाभिधानांश इत्याह—आख्यातेति। नन्वमिधानप्रयोजनसमीपस्थानार्थत्वे तस्यैव विधेयत्वमिति विधेयगौरवं स्यादित्याशंक्य विधेयं निष्कर्षति सचेति।

नन्वेकपदार्थे अभिधानप्रयोजनसमीपस्थाने अभिधानांशस्य प्राप्तत्वेन अभिधाने अंशांतरमपि न विधेयम्। वैरूप्यापत्तेरित्यत्राह—इत्यप्राप्तेति एकपदार्थेपि प्राप्ताप्राप्तविवेकेन प्राप्तांशानुवादेन अप्राप्तांशविधिर्युक्तः, यथा सप्तदशारत्निरित्यत्र। अतोऽप्राप्तांशगार्हपत्यसमीपस्थानविधिः॥

रियम् । सर्वमिदं विनियोज्यलिङ्गस्वरसानुरोधाद्वर्णितम् । तथा उपान्मन्त्रकरणे इत्यनेनैवात्मनेपदम् एतदेकविषयत्वात् तस्य अकर्मकाच्चेति विषयान्तरलाभान्न तेनेति तन्नोक्तम् । राद्धान्तस्तु—उपपदविभक्तिरयुक्ता, कारकविभक्तिरुपपदनिरपेक्षैव भाति । उपपूर्वात्तिष्ठतेः मन्त्रकरणेऽर्थे वर्तमानात् इति च शास्त्रस्मृतिः न त्वभिधानप्रयोजनकेऽर्थे इति स्मृतिः । न च समीपार्थोपशब्दस्य कर्मप्रवचनीयसंज्ञोपसंख्यानम् । एतत्सर्वानुरोधात् ऐन्द्र्या गार्हपत्यमभिदध्यात् इति वचनार्थः । गौणता वा यौगिकता वा

ननु तत्समोपस्थानं कथमभिधानाङ्गम्, तन्निर्वर्तकत्वाभावादित्यत्राह—तदिति । यथाभिक्रमणं प्रत्यासत्तिरूपं कर्तृगुणो होमाङ्गम्, तथा गार्हपत्यसमोपस्थानमपि कर्तृगुणोऽभिधानाङ्गम्, इयान् भेदः । तत्र दृष्टार्थत्वम् । इह तु अदृष्टार्थत्वमिति । गुणकर्मणोप्यभिधानस्य अदृष्टमङ्गं प्रोक्षिताभ्यामवहन्तीत्यत्र प्रोक्षणवदित्यर्थः ।

नन्वग्निविशेषत्वाद्गार्हपत्ये [स्य] कथं तत्र स्थितिः शक्या गार्हपत्यमित्युक्ते अत्यन्तसमीपस्यैव धीस्थत्वादित्यत्राह—गार्हपत्येति । समीपविशेषणतया देशं शास्त्रीयं गार्हपत्यशब्दो लक्षयतीत्यर्थः ।।

ननु समीपदेशस्यान्येनानभिहितस्य कथं लक्षितदेशो विशेषणमित्यत्राह—उपशब्द इति । देशलक्षकत्वे गार्हपत्यशब्दस्य कथं द्वितीयेत्यत्राह—तदर्थस्यापीति । यद्यप्युपशब्दस्याधिकहीनार्थयोरेव कर्मप्रवचनीयसंज्ञा । तत्राप्यधिकार्थयोगे सप्तमी विहिता, तथापि तदर्थस्यापि समीपार्थस्योपशब्दस्य कर्मप्रवचनीयसंज्ञामुपसंख्यायाप्यगतितया तद्योगे द्वितीयेयमधिकार्थत्वे सप्तमीविधिरित्यर्थः ।।

ननु किमित्युपपदविभक्तिराश्रिता, कर्मणि द्वितीयेति कारकविभक्तिः किमिति नाश्रितेत्यत्राह—उपस्थान इति । ननु उपपदविभक्तित्वं कर्मप्रवनीय संज्ञोपसंख्यानं गार्हपत्यपदेन देशलक्षणा, आख्यातस्यानेकार्थत्वं चेति बहुदोषाश्रयणं न युक्तमित्यत्राह—सर्वमिदमिति ।

इन्द्रपदस्य । योगोऽप्यत्रैव कल्प्यते इत्यनास्था । रूढ्यनुसारद्वारा गौणं न यौगिकमिति तु न वाच्यम् । इन्द्रेऽपि रूढ्यसिद्धेः । पृष्ठैरुपतिष्ठते इत्यत्र यदभिधानप्रयोजनकसमोपस्थानवचनत्वमनुज्ञायैव राद्धान्तितम् । तथापि तत्राविरोधान्नतु तथैव तत्त्वम् ।

श्रीकरस्तु—उपस्थानेऽपि कर्मतामादाय गार्हपत्यलक्षितदेशस्य पूर्वपक्षनिर्वाहमाह । उपस्थीयमान देशस्योपस्थातृनरप्राप्यत्वात् । तन्न । शाब्दैरकर्मकताऽनुज्ञानात् । अधिकरणमेव

ननु यद्युपस्थानस्याकर्मकतया गार्हपत्यमिति न कारकविभक्तिः, तर्हि अकर्मकाच्चेत्यनेन आत्मनेपदं वक्तव्यम्, किमुपान्मन्त्रकरण इत्यात्मनेपदेनेत्यत्राह—उपान्मन्त्रेति । तत्र हेतुः—एतदेकेति । उपान्मन्त्रकरण इत्यस्याभिधानप्रयोजनकसमीपस्थानैकविषयत्वात्, यद्यत्राकर्मकाच्चेति स्यात्, निर्विषयमनर्थकमेवेदं स्यात् । अकर्मकाच्चेत्यस्य त्वयमत्रोपतिष्ठत इत्यादि केवलसमीपस्थानरूपविषयान्तरलाभान्नानर्थकतेति तन्नोक्तं ग्रन्थ इत्यर्थः ।

राद्धान्तस्त्विति । उपतिष्ठत इति धातोरभिधानमर्थः, न तत्प्रयोजनकं समोपस्थानम्, तदा हि गार्हपत्यमित्युपपदविभक्तिः स्यात्, सा च कारकविभक्तित्वे संभवति अयुक्ता, तस्या उपपदनिरपेक्षतया शीघ्रभावित्वात्, अतः कारकविभक्तित्वाय उपपूर्वतिष्ठतेरभिधानमेवार्थ इत्यर्थः ।।

ननु तदागमन्यायेनाख्यातार्थ एवाभिधानम्, न धात्वर्थ इत्याशंक्य शाब्दस्मृत्यनुरोधादपि धात्वर्थ एवाभिधानमित्याह—उपपूर्वादिति । किञ्च—समोपार्थोपशब्दस्य कर्मप्रवचनीयसंज्ञा नास्तीत्याह—न चेति ।

ननु प्रायिकसमीपस्थानार्थत्वहानमेतत्पक्षे स्यादित्यत्राह—एतदिति । कारकविभक्तित्वं कर्मप्रवचनोयसंज्ञाऽभावः, धातूपात्ते च मन्त्रस्य साक्षात्करणता शाब्देष्टा धातोरुपसर्गवशादनेकार्थत्वप्रसिद्धिरित्येतत्सर्वानुरोधादैन्द्र्या गार्हपत्यमभिदध्यादित्येव वचनार्थः । न तु गार्हपत्यसमोपे तिष्ठेदिति । तथा सति समोपस्थानस्यादृष्टार्थत्वं देशलक्षणा च स्यादित्यर्थः ।।

देशः न विवक्षया कर्म शक्यम्। इह च गार्हपत्यमिति श्रुत्या शेषता। मन्त्रस्याभिधानक्रियायां शब्द [शेषत्व] स्याज्ञाप्यत्रात् व्युत्पत्तित एव तत्सिद्धेः। अभिधेयविशेषे व्युत्पत्त्यनुज्ञानात् वाक्यतात्पर्यात् मन्त्रोऽभिधेयान्तरेपि [न] वार्यते। अरुणादिकं तु क्रियाविशेषान्वयित्वेनैवाज्ञातं बोध्यत इति तच्छेष एव।

तथाह्वानमपीति चेत्।

गुणाद्योगाद्वा हविष्कृच्छब्दोऽवघातेऽस्त्वित्येवं पूर्वपक्षोत्थानादवान्तरसङ्गतिः

ननु गार्हपत्याभिधाने मन्त्रस्याशक्तेः कथं तत्र शेषतेत्यत्राह—गौणतेति। ननु योगपक्षे मुख्यता तत्कथमुभयोरनास्था वा इत्यत्राह—योगोऽपीति। सत्यं मुख्ये शीघ्रपतिपत्तिः, तथापि योगोऽप्यत्रैव कल्प्यत इत्यनास्थावादः, परमार्थतस्तु योगपक्ष एव श्रेयानिति भावः॥

नन्विन्द्रशब्दस्य पाकशासने रूढतया तत्पूर्विका गौणतैव युक्ता इति कथमनास्थावाद इति शङ्कामनूद्य दूषयति—रूढ्यनुसारादिति। तत्र हेतुः इन्द्रेऽपीति। क्लृप्तावयवशक्तयैव इन्द्रे प्रवृत्तिर्न समुदायशक्त्येति न रूढिपूर्वकतेत्यर्थः॥

ननु पृष्ठैरुपतिष्ठत इत्यत्राभिधानप्रयोजनकसमीपस्थानार्थत्वमुपपूर्वतिष्ठतेरुक्तमिति पूर्वापरविरोध इत्यत्राह—पृष्ठैरिति। तदर्थतयापि तत्र राद्धान्तसिद्धेर्नातीव विवेकः कृतः। वस्तुतस्तु—अभिधानमेवार्थ इति न विरोध इत्यर्थः। श्रीकरस्त्विति। पूर्वपक्षेपि गार्हपत्यपदलक्षितदेशस्य उपस्थाने कर्मता युक्तैव, स्रुघ्नमुपतिष्ठतेऽयं पन्था इतिवदुपस्थीयमानदेशस्योपस्थातृनरप्राप्यत्वादिति। तन्नेति। युक्तं स्रुघ्नमुपतिष्ठत इत्यादौ सकर्मकत्वं प्राप्त्यर्थत्वादुपतिष्ठतेः समीपस्थानार्थस्य तु शाब्दैरकर्मतया अनुज्ञानात्। तत्राधिकरणमेव देशो न विवक्षयापि कर्म शक्यमास्थातुम्। अतो देशस्याकर्मतेत्यर्थः॥

ननु चेह मन्त्रस्य द्वितीयाश्रुत्या कथं गार्हपत्यशेषता, आत्मनेपदादभिधानशेषत्वादित्यत्राह—इह चेति। अभिधानशेषता न ज्ञाप्यापि उत्पत्तित

पूर्वपक्षस्तु—वचनादवघातं कुर्वन् आह्वयतीत्येवमन्वयात् अवघातशेषता मन्त्रस्य। पत्न्याह्वाने लिङ्गाच्छेषत्वे तु अवघ्नन्निति धात्वर्थेन कालो लक्षणीयः स्यात् मुख्यार्थानन्वयात् । अथ पत्न्यर्थत्वेऽपि अवघ्नन्नेव मन्त्रं प्रयुङ्क्ते अतो मुख्यार्थतैव। तन्न। यद्यवघ्नन् मन्त्रं कुर्यादित्येवमाकारेणान्वयः (स्वयं) तदा बलादवघातार्थता। तस्मिन् हि रूपे तदुपायस्यैवान्वयः। अन्यथा उपलक्षणतैव। लक्षणापीयमस्वरसा। अवघ्नन्निति प्रवृत्तहन्तिकालः प्रत्यासन्नः मानान्तरलब्धस्तु प्रवृत्तिपूर्वकालः कार्यकाले

एव शब्दस्य तत्सिद्धेः। किन्तु—द्वितीयाश्रुत्या कथं गार्हपत्यशेषता, आत्मनेपदादभिधानशेषतैव मन्त्रस्य ज्ञाप्या। यद्यपि (तृ)[द्वि]तीयायाः क्रियान्वयपरतैव न कारकान्वयपरता, कारकविभक्तित्वात् तथापि वचनवैय्यर्थ्यापत्तेरनन्यगतिकतया स्वकारकविशिष्टाभिधानक्रियया [यायाः] गार्हपत्यान्वयमङ्गीकृत्य द्वितीयाश्रुत्या तच्छेषतैव मन्त्रस्य ज्ञाप्या, तत्र धातूपात्तमभिधानकिंचित्करम्। अतः श्रुत्या गार्हपत्यशेषतैव मन्त्रस्येत्यर्थः। नन्वभिधेयसम्बन्धोऽपि न मन्त्रस्य ज्ञाप्यः तस्यापि लोकव्युत्पत्तित एव सिद्धेरित्यत्राह—अभिधेयविशेष इति। अर्थविशेषव्युत्पत्तावर्थान्तरे वाक्यतात्पर्यावधृतेस्तस्मिन् मन्त्रस्य वचनज्ञाप्यता युक्तेत्यर्थः॥

नन्वेवमरुणादेरपि सोमशेषतास्त्विवति शङ्कां वैषम्योक्त्या परिहरति—अरुणादिकं त्विति॥

तथाऽऽह्वानमपीति चेत्॥

दर्शपूर्णमासयोः श्रुतम्, हविष्कृदेहीति त्रिरवघ्नन्नाह्वयतीति। तत्र चिन्ता, किमयं मन्त्रो वचनादवघातशेषः, किं वा लिङ्गात्पत्न्याह्वाने बचनं तु त्रित्वविधिपरमिति। तत्र पूर्वनयानन्तरमस्य कः प्रसङ्ग इत्याशंक्य पूर्वनयोक्तोपजीवनेन पूर्वपक्षोत्थानादवान्तरसङ्गतिमाह—गुणादिति। नन्वत्रेतिशब्दात्करणत्वमाह्वयत्यपेक्षमन्त्रस्य प्रतीतमिति कथमवघातशेषतया पूवपक्ष इत्यत्राह—पूर्वपक्षस्त्विति। इतिशब्दावगतं मन्त्रस्य करणत्वमित्य-

सहायान्वेषणेति प्राप्तिदर्शनात्। स च. कालोऽवघ्नन्नित्यनेन विप्रकृष्टः स्वरसाल्लक्ष्यत इति वरमाह्वयतीत्यचेतनेप्यदृष्टार्थम्। एहीति मन्त्रपदप्रयोगप्राप्त्यर्थम्। तदुक्तम्-योहि एहीति ब्रूते स आह्वयतीत्याह्वातृव्यापारस्य तावन्मात्रत्वात्। अचेतनं प्रति दृष्टतत्फलाभावेपि आह्वयतीत्यनुवादः त्रिरिति पक्षप्राप्तानुवादः। शाखान्तरे हविष्कृदेहीति त्रिः [द्विः] पठितं पक्षे यतः। हविष्कृत्पदं गुणार्थं हन्तौ गुणात् पत्नीवद्यज्ञोपयोगात् योगाद्वा हविः करोतीत्येवम्।

वघ्नन् आह्वयतीत्यवघातस्य सन्निधिविशेषात्तदपेक्षमेवेति तदन्वयादवघातशेषता वचनान्मन्त्रस्य। पत्न्याह्वानशेषत्वे तु लक्षणादोषः स्यादित्याह पत्न्याह्वान इति।

ननु पत्न्याह्वानार्थत्वेऽप्यवघ्नन्नेवमन्त्रं प्रयुङ्क्त इति मुख्यार्थतैवावघ्नन्पदस्येति शङ्कते—अथेति। तन्नेति। अवघ्नन् मन्त्रं कुर्यादित्यवघातकर्तृत्वाकारेण यदि मन्त्रान्वयस्तदा गले पादुकया अवघातार्थता। यतस्तस्मिन् रूपे तदुपायस्यैवान्वयः। नान्यस्य। अन्यकर्तुरन्यार्थमन्त्रोच्चारणायोगात्। अन्यथा उपलक्षणतैवावघातस्य स्यात्। तच्च विशेषणत्वसंभवे न युक्तम्। लक्षणापीति। मानान्तरलब्धस्तु प्रवृत्तिपूर्वकालः स विप्रकृष्ट इति तल्लक्षणायां स्वारस्यहानिः।

नन्वचेतने कथमाह्वयतीत्यन्वय इत्यत्राह—इति परमिति। अचेतनेप्याह्वयतीति अदृष्टार्थमनुवादः। त्रिरिति च पक्षप्राप्तानुवादः हविष्कृदेहीत्येकस्यां शाखायां त्रिः पठितम्। अपरस्यां द्विरिति पक्षप्राप्तत्वात् त्रित्वस्य। विनियोज्यमन्त्रगतहविष्कृत्पदं च हन्तौ पत्नीवद्यज्ञोपयोगगुणात् गौणम्। यदि पत्न्यारूढं हविः करोतीत्येवं यौगिकं हविः साधनत्वात् हन्तेरित्यर्थः।

राद्धान्तस्त्विति। हविष्कृदेहीति त्रिरवघ्नन् आह्वयतीत्याह्वानं लिङ्गात्प्राप्तम्। हन्तिश्च वाक्यान्तरात्। तल्लक्षितकालोऽपि कार्यकाले

राद्धान्तस्तु नित्यश्रुतं त्रिरिति पक्षेऽन्वितत्वयुक्तम् । अतः त्रिरिति विधिर्न मन्त्रस्य । तद्वरमवघ्नन्निति लक्षणा अन्वये हि नित्यता लक्षणातो बलीयसीतीदमेवात्र व्युत्पाद्यम्

अथ लक्षणहेत्वोरित्यनुशासनात् लक्षणार्थतैव शतुः । तन्न । न हि लक्षणावृत्तिस्सूत्राभिमता । किन्त्वभिधेय एव धात्वर्थो यत्र कर्तृनिष्ठः तत्र शतुः अनुशासनम् । न तु काललक्षकत्वे तत् । भाष्ये पत्न्येव हविष्कृदिति लिङ्गमुक्तम् । वाक्तुल्यत्व स्तुतिः । स्त्री लिङ्गतया तुल्यत्वं पत्न्या एवैकान्तिकम् । अवघातस्तु क्रिया-

---

सहायान्वेषणमिति न्यायात् । अथाप्राप्तेति [प्तेः] मन्त्रसंबन्धस्य विधिरिति चेन्न । त्रित्वस्याप्राप्तेस्तद्विधौ वाक्यभेदापत्तेः । पक्षप्राप्तानुवादस्त्रित्वमित्यपि न, नित्यश्रुतस्य पक्षे अन्वयायोगात् । अतो वचनादप्राप्तस्त्रिरिति नियमफलं विधेयम् । हन्तिस्तु काललक्षकः । मन्त्रस्तु-पत्न्याह्वाने लिङ्गाच्छेषः । अथ लक्षणैव दोष इति चेन्न । परपक्षे अनन्वयात् लक्षणैव ज्यायसीत्यत्र व्युत्पाद्यत्वात् । अनन्वयस्य लोके व्युत्पत्त्यभावाल्लक्षणा अलौकिकीत्यर्थः । अत्र विवरणे चोदितं तदाह—अथेति । लक्षणहेत्वोः क्रियाया इति शत्रनुशासनात् तच्छत्रन्तमवघ्नन्निति पदं लक्षणापरमेव । तत्कथं पूर्वपक्षेऽपि श्रौतो विनियोगस्तत्रेति । नहि तत्र सूत्रे लक्षणपदेन प्रयोगैदंपर्यावगम्या परत्र परशब्दवृत्तिरूपा लक्षणाऽभिमता । किन्तु—अभिधेय एव धात्वर्थः । यत्र विषये कर्तृनिष्ठः तद्द्वारा क्रियान्तरस्य लक्षणं हेतुः । वाच्यक्रियायाः क्रियान्तरं प्रति साक्षादन्वयाभावात् । तत्र शतुरनुशासनं । न तु लाक्षणिकस्य काललक्षकत्वे तच्छतुरनुशासनमित्यर्थः । भाष्य इति । वाग्वै हविष्कृदिति वाक्तुल्यतास्तुतिःस्त्रीलिङ्गतया तुल्यत्वात् । एतच्च पत्न्यामेव नियतं नावघाते । यद्यपि क्रियाशब्दवाच्यतया तस्यापि स्त्रीत्वम् । तथापि नावघातशब्दवाच्यतयेपि न तुल्यता । अथ क्तिन्नन्ताव-हन्तिशब्दवाच्यतया स्वशब्देन स्त्रीत्वम् । तर्हि क्रियायां लिङ्गं प्रयोगसाधु । पत्न्यां त्वर्थसाधिवति अभ्यर्हितार्थसाधुस्त्रीलिङ्गपत्न्येव वाचस्तुल्या । अथ

त्वेन स्त्रीलिङ्गो नावघातत्वेन । तथा प्रायौगिकं क्रियायां लिङ्गं अर्थत एव पत्न्याम् । नन्वेवं वाक्तुल्यता क्रियाया एव प्रायौगिकत्व सामान्यात् । तन्न, स्तुतिरेवं हि वाचि यत्प्रायौगिकं तत्पत्न्यांतत्वमिति सूत्रम् ।

। ततोत्थानविसर्जने ।

पूर्वन्यायातिदेशादनन्तरसङ्गतिः । पूर्वपक्षाधिक्यादतिदेशः । युक्तं त्रिरिति विधेरन्यत्सर्वमनुवादान्नीतम् । इह तु विधेयान्त-राभावात् काल एव लक्षणया विधेयो वाच्यः । विधौ च न

वाच्यपि प्रयोगाल्लिङ्गसाधुत्वमिति वाचापि तुल्यता क्रियायाः इतिचेन्न । एवं स्तुतिवाचि यत्प्रयोगसाधु लिङ्गं तत् पत्न्यां त्वर्थसाध्विति पत्न्यामेव लिङ्गं स्वारस्यादुक्तमित्यर्थः ।

तथोत्थानविसर्जने

उत्तिष्ठन्नाह अग्नीदग्नीन् विहरेति । तथा व्रतं कृणुतेति वाचं विसृजति इति । तत्र चिन्ता किं मन्त्रस्योत्थानवाग्विसर्जनयोः शेषता वचनात्, किं वा लिङ्गात् प्रेषणे वचनं तु कालविधिपरमिति । तत्रावान्तर-सङ्गतिमाह—पूर्वेति । पूर्वपक्षाधिक्यात्पूर्वनयोऽत्रातिदिश्यते इत्यवान्तर-सङ्गतिरित्यर्थः । आधिक्यमाह—युक्तमिति । त्रिरवघ्नन् आह्वयतीत्यत्र अन्येषां प्राप्तानुवादतया अप्राप्तः त्रिरिति विधिः । इह तु विधेयान्तरा-भावादप्राप्तः काल एव लक्षणया विधेयः । स चायुक्तः विधौ लक्षणा-योगात् ।

ननु तत्र किं विधेयं तत्राह—तद्वरमिति । यद्यपि अचेतने (सैषा) स एवानन्वयः । तथापि गत्यभावाद्वरमुत्थानविसर्गार्थतया मन्त्रविधिरस्तु । विनियोज्यमन्त्रगताग्नीत्पदव्रतपदे च गुणाद्योगाद्वा उत्थानविसर्गार्थे । तत्र यज्ञोपयोगो गुणः । योगोऽप्यग्नीदित्यत्राग्निमिन्धे इत्युत्थानेऽस्ति । तथा व्रतेऽपि व्यक्तौ योगिकत्वम् । व्रतं वर्तनं प्रवर्तनं वागाचरणं वाग्विसर्जनम् ।

परश्शब्दार्थः । तद्वरमुत्थानविसर्गार्थतयैव मन्त्रयोर्विधिरस्तु । ऐन्द्रीवच्च गुणाद्योगाद्वा उत्थानविसर्गार्थता यज्ञोपयोगगुणात् । योगोऽप्यग्निं समिन्धे इत्यग्नीत् इत्युत्थानेऽस्ति व्रतं वर्तनं वागाचरणं वा विसर्गं इति व्यक्तम् ।

राद्धान्तस्तु—मन्त्रगतप्रैषानन्वयोऽत्रापि यथा पूर्वत्र पूर्वपक्षे । अतः तथेत्युक्तम् । विधिवाक्ये हि लक्षणामात्रं विनियोज्यवाक्ये सर्वथैव प्रैषार्थानन्वय इति लक्षणया कालविधिरेवायम् । न हि तत्पदोच्चारणमात्रं प्रैषः, किन्तु तत्पदोच्चारणेन परप्रेरणा । नचाचेतने प्रेरणान्वयः । यत्तु पूर्वोक्तं-यो ह्येहीति ब्रूते स आह्वयति दृष्टफलाभावेपीति तदुपेत्यापि त्रिरिति विधिबलादपि

राद्धान्तस्त्विति । यथापूर्वत्रावघातार्थत्वे मन्त्रस्थप्रैषपदानन्वयः । अचेतनत्वादवघातस्य । तथात्रापि । अत एव तथेत्युक्तम् । यद्यपि विधौ लक्षणाऽयुक्ता । तथापि विनियोज्यमन्त्रवाक्यगत प्रैषपदानां सर्वथा अनन्वयाद्वरं विधिवाक्यपतितैकपदलक्षणामात्रस्वीकारात् तत्सहितसर्वपदानामन्वितत्वमित्युत्थानादिलक्षितकालविधिरेवायम् । अथ चेतनविषयेऽपि प्रैषपदोच्चारणमेव प्रैषः । तच्चाचेतनोत्थानादावपीति चेत्तत्राह—न हीति । प्रैषपदोच्चारणेन परप्रेरणा प्रैषः । न तु तत्पदोच्चारणमात्रम् । सा च प्रवृत्त्यर्हचेतनविषयैवेति लोकसिद्धम् । पूर्वत्र तु यत्प्रैषान्वयस्यान्यथासिद्धिरुक्ता तदुपेत्यापि प्रैषान्वयं त्रित्वविधिबलादपि राद्धान्तसिद्धेः (न) निरस्तम् । इह तु प्रैषानन्वयादेव राद्धान्त इति यत्नात्तन्निरासः । अत एव पूर्वन्यायातिदेशः विधावपि लक्षणा गत्यभावादाश्रिता । व्रतोदाहरणे प्रैषानन्वयो अयत्नलक्ष्यः । तथाहि—वाग्विसर्गस्तावद्याजमानस्तयैव पूर्वं नियतवाक्यत्वात् । तत्र व्रतं कृणुतेति प्रैषः ऋत्विक्कर्तृको यजमानकर्तृको वा । न तावदाद्यः, ऋत्विक् कर्तृकत्वे वाग्विसर्गे यजमान एव प्रेषणीयः स्यात् । व्रतं वाग्विसर्गं कृणुतेति । तत्र प्रैषगतबहुवचनस्य सर्वथा अनन्वयः ।

राद्धान्तसिद्धेर्निरस्तम् । इह तु प्रैषानन्वयादेव राद्धान्तो वाच्यः । अगत्या विधावपि लक्षणाऽऽश्रिता । अत्रावघ्नन्निति वत् उत्तिष्ठन्निति लक्षणा मुख्यार्थानन्वयात् । वाचं विसृजतीत्यत्र व्यक्तैवामुख्यत्वे लक्षणा । ऐन्द्री विधि वाक्ये तु गार्हपत्यपदे देशलक्षणापरेऽपि न विनियोज्यस्यानुरोधः । देशाभिधानेऽप्यमुत्रयत्वादिन्द्रपदस्य ।

। *सूक्तवाके च कालविधिः परार्थत्वात्* ।

कालक्षणयोत्थानादवान्तरसङ्गतिः ।

अतो बहुवचनान्वयार्थं यजमानशब्दो भोजनसंविधातॄन् प्रति व्रतं भोजनं कृणुतेति प्रैषः । व्रतशब्दस्य पयोव्रतमित्यादौ भोजन एव प्रसिद्धेः । अतो व्रतार्थप्रैषोच्चारणकाले यजमानो वाचं विसृजेदिति लक्षितकालविध्यर्थं वचनम् । न द्वितीयः वाग्विसर्गे स्वस्यैव प्रेष्यत्वात् स्वात्मनि स्वकर्तृकप्रैषानन्वयः अथ व्रतं वर्तनं प्रवर्तनं कृणुतेति वाचामेव प्रेष्यता तर्हि सुतरामेवाचेतनत्वात्प्रैषानन्वय इत्यलमतिगिरा । प्रकृतमनुसरामः ।

ननु उत्तिष्ठन्निति मुख्येन उत्थानकर्त्रैवान्वयोऽस्तु । किं लक्षितकालेनेत्यत्राह—अत्रेति । पूर्वत्र यथा अवघाताह्वानयोरङ्गाङ्गिभावान्न तत्कर्तुस्तत्र विधिः । किन्तु—काललक्षणैव । तथाऽत्राप्युत्तिष्ठन्निति काललक्षणा । अयं तु भेदः । तत्र प्राप्तत्वात्काले अनुवादः । इह त्वप्राप्तत्वाद्विधेय इति । वाचं विसृजतीत्यत्र तु व्यक्तैवामुख्यत्वे कालक्षणा । नन्वेवमैन्द्रीवाक्येऽपि विनियोज्यलिङ्गानुरोधात् गार्हपत्यपदेन देशलक्षणा स्यादित्यत्राह—ऐन्द्रीति ।

सूक्तवाके च कालविधिः परार्थत्वात्

दर्शपूर्णमासयोः श्रुतम् । सूक्तवाकेन प्रस्तरं प्रहरतीति । तत्र चिन्ता किं सूक्तवाकलक्षितकाले हरणमात्रं प्रतिपत्तितया विधेयं किं वा मन्त्रहरणसम्बन्धो विधेय इति । अत्र पूर्वाधिकरणोक्तकाललक्षणया पूर्वपक्षोत्थानादवान्तरसङ्गतिमाह—कालेति । ग्रन्थोक्तपूर्वोत्तरपक्षावेव उपपादयितुमाह—

अत्र पूर्वोत्तरपक्षरचना ऋजुविमलायां-सूक्तवाकस्य हरणे करणत्वानुपपत्तेः हरणेन होमात्मको यागो लक्षणीयः। न चेदं युक्तम्। आख्यातार्थेहि प्रधाने लक्षणापत्तेः। तद्वरं सूक्तवाकेन कालो लक्ष्यतामिति।

अत्र राद्धान्तः—न हरणेन होमो लक्षणीयः किन्तु मन्त्रसम्बन्धविधेरेव होमः कल्प्यः। एवं सर्वपदानि श्रुतार्थानि। होमे चोपाधिभूतप्रक्षेपरूपहरणमर्थप्राप्तम्। एवञ्च मन्त्रे 'इदं हविः' 'अयमाशास्त' इत्येतत्समञ्जसम्। विधेयहोमगतहविषः आशीर्वा-

---

अत्रेति। सूक्तवाकेन हरतीति हरणसाधनत्वेन सूक्तवाकोऽवगतः। न च देवताप्रकाशन[क]स्य तस्य हरणमात्रे करणता युक्ता। अतो हरतीति होमात्मको यागो लक्षणीयः। तच्चायुक्तम्। यद्यपि पूर्वपक्षेपि सूक्तवाकपदेन काललक्षणा। तथापि आख्यातार्थे प्रधाने लक्षणातो गुणभूते सूक्तवाके लक्षणा वरमिति पूर्वः पक्षः।

अत्र राद्धान्तः—स्यादेवं यदि हरणेन होमो लक्षणीयः। किन्तु—श्रुतहरणमन्त्रसम्बन्धविधेरेव होमः कल्प्यः। यद्यपि कल्पना लक्षणा च समा। तथाप्येवं सति सर्वपदानि श्रुतार्थानि स्युः। न च होमे कल्प्ये तत्रैव मन्त्रस्य करणत्वाद्धरणे करणत्वश्रुतेर्बाध इति वाच्यम्। यतो होमे प्रक्षेपरूपं हरणमुपाधित्वेनार्थप्राप्तम्। अतो हरणकरणत्वम् होमकरणत्वेनोपपादितमेव। किञ्च—एवं सति विनियोज्यमन्त्रगतं "इदं हविः" "अयमाशास्ते" इत्येतदपि समञ्जसं, कथं? विधेयहोमगतहविषः आशीर्वादस्य च सन्निधेः। अन्यथा हरणमात्रस्य उपयुक्तप्रस्तरप्रतिपत्तितया विधौ वृत्तकर्मानुमन्त्रणतया अन्वये वृत्तकर्मगतहविराशिषोर्निर्देशः स्यात्। स च पुरोवर्तितया वर्तमानतया च न स्यादिति।

नन्वदृष्टार्थतयापि मन्त्रस्य हरणे करणतोपपत्तेः किमिति सूक्तवाकपदेन काललक्षणा। न चादृष्टकल्पनातो लक्षणा न्याय्येति वाच्यम्। यतो

दस्य च सन्निधेः अन्यथा वृत्तकर्मगत निर्देशः । स त्र वर्तमानतया न स्यादिति । अयं भावः । सूक्तवाकस्य प्रकरणाम्नातस्याभिधान शक्त्यनुरोधिशेषत्वं युक्तम् । वचनादप्यभिधानद्वारा ऐन्द्र्यामिव मन्त्रकार्यं जघन्यमस्तु, न त्वदृष्टम् । अतो त्रिधि वाक्यवर्तिसूक्त-वाकपदं काललक्षकम्, न तु विनियोज्याभिधाया एव हानिः, कथमपि हरणबोधनाशक्तेर्हानिरेवोपेया स्यात् । अत्र चेदविनियो-ज्यः तदा प्रधानदेवताद्यभिधाने लिङ्गं विनियोज्यस्य प्रयोगका-लोऽस्तीति तल्लक्षणया शक्या । एवञ्च कृतस्त्रुग्धारणस्य प्रस्तर-

---

विधौ लक्षणातो दृष्टार्थतैव जपमन्त्रवन्न्याय्या । कथं वा सूक्तवाकपदेन कालो लक्ष्यते । तत्सम्बन्धिनः कालस्याप्रतीतेः । कथं वा काललक्षकत्वे तृतीयान्वय इति पूर्वपक्ष इत्यत्राह—अयं भाव इति । प्रकरणादिगतस्य सूक्तवाकस्य स्वाभिधानशक्त्यनुरोधि शेषत्वं विध्यपेक्षितं युक्तम् । न त्वदृष्टद्वारा दृष्टपक्षपातित्वात् नियोगस्य ।

ननु भवत्वेवं केवललिङ्गविनियोज्ये, वचनविनियोज्ये त्वदृष्टार्थता युक्तेत्यत्राह—वचनादपीति । वचनादपि विनियोगे अभिधानद्वारा मन्त्रकार्यं जघन्यम् । ऐन्द्र्यामिव न पुनरदृष्टार्थता ।

ननु कथं कालो लक्ष्यः । तत्सम्बिन्धिकालाप्रतीतेरित्यत्राह—अत्र चेदिति । उक्तरीत्या मन्त्रस्य हरणे विनियोगाभावे लिङ्गादिष्टिप्रधान-देवताद्यभिधाने विनियोगः । ततश्च विध्याक्षिप्तस्तत्कार्यानुष्ठानकाल-सम्बन्धोऽस्तीति तल्लक्षणा शक्या । किञ्च—प्रहरणमात्रस्य प्रतिपत्तितया विधौ स्रुग्धारणेनोपयुक्तस्य प्रस्तरस्य विध्यपेक्षिता प्रतिपत्तिः साक्षात्सि-द्ध्यति । अन्यथा त्वप्रतिपत्तिरूपहोमविधौ न साक्षात्प्रतिपत्तिसिद्धिः । तथा विधेयार्थे प्रधानपदलक्षणा । न च लक्षणापि शक्या हरणहोमयोरंशांशि-तायाः अभावात् । यद्यपि काललक्षकत्वे तस्य सप्तम्या निर्देशः । तथापि तस्यापि साधकतमतां वक्तुं तृतीयानिर्देशः । कालेनागतमितिवदित्थंभूत-तृतीया वा । सर्वथा काललक्षणैव न्याय्येति भावः ।

स्य हरणमात्रादेव साक्षादपेक्षितप्रतिपत्तिसिद्धिः । अन्यथात्वसाक्षात्प्रतिपत्तिरूपहोमविधिः प्रधानपदे लक्षणा च स्यात् । न च हरणमात्रं होमांशः येन सम्बन्धाल्लक्षणा । कालस्यापि साधकतमतां वक्तुं तृतीयानिर्देशः । सप्तम्यर्हस्यापि इत्थंभूत तृतीया वा । राद्धान्ते अयं भावः—अस्ति सप्रकारः येन श्रौतार्थान्येव सर्वाणि च विधिवाक्यपदानि मन्त्रपदानि च भवन्तीति सूक्तवाकप्रहरणयोः क्रियाकारकसम्बन्ध विधिरस्तु । स चैवं-तथा यतेत यथाऽनयोरसंबन्धविधिसिद्धिरिति । सूक्तवाकेन होमात्मके

राद्धान्त इति । यत्प्रकाराङ्गीकारे विधिवाक्यपदानि मन्त्रपदानि च सर्वाणि श्रौतार्थान्येव भवन्ति । न कस्यचिदपि लक्षणास्ति । स प्रकारः । तथा हि—सूक्तवाकहरणयोः क्रियाकारकसंबन्धोऽवगतः स विधेयः । अथानयोः कथं सम्बन्धसिद्धिरिति चेत् सम्बन्धविधिरेवमुपपद्यते । कथमन्यथा अनयोः सम्बन्धसिद्धिः ।

ननु हरणे करणत्वं प्रतीतम् । देवताभिधानद्वारा यागे करणत्वमुच्यते । तत्कथं प्रतीतोपपत्तिरित्यत्राह —होमेति । मन्त्रहरणसम्बन्धोपपत्त्यर्थं होमात्मके यागे प्रक्षेपरूपहरणमुपाधितयाऽन्तर्भूतम् । ततः किं ? ततश्च मन्त्रेण स्मृतां देवतामुद्दिश्य होमात्मको यागः शक्यः कर्तुमिति तत्र करणं मन्त्रः परम्परया हरणेपि करणमिति प्रतीतकरणत्वोपपत्तिः । भवेदेवं यदि होमात्मकयागलाभः स एव कथम् । एवं—यथा यदाग्नेयोऽष्टाकपाल इति द्रव्यदेवतासम्बन्धविधावर्थाद्यागलाभः । तथेहापि मन्त्रहरणसंबन्धविधेर्होमव्यतिरेकेणानुपपत्तेः । कल्पितयागेन श्रुतमन्त्रहरणसम्बन्धोपपत्तेः सर्वपदानां श्रौतार्थता । एवं च भाष्ये हरन्ति त्यजन्ति इति यदुक्तम् तत्फलत एव न तु लक्षणया ।

ननु होमात्मके यागे प्रस्तरस्य हविष्ट्वमिति हविषः तस्य कथं द्वितीयानिर्देश इत्यत्राह—होमेति । हविषोऽपि प्रस्तरस्यार्थात्प्रतिपाद्यतापीति तदपेक्षयेप्सितत्वात् द्वितीयापि घटते । किञ्च "सूक्तवाको याज्या"

यागे देवताप्रकाशन द्वारा क्रियमाणे संबन्धसिद्धिः। होमात्मके ह्युपाधिभूतः प्रक्षेपोऽप्यन्तर्भूतः। मन्त्रेण स्मृतां देवतामुद्दिश्य होमात्मकः शक्यः कर्तुमित्येवं पारंपर्येण हरणे करणं मन्त्रः। अतो यथा द्रव्यदेवतासम्बन्धविधौ अर्थाद्यागो लक्ष्यः। तथेहापि मन्त्रहरणसम्बन्धविधौ। एवञ्च हरतिर्यजतिरिति यदुच्यते तत्फलतः, न लक्षणया। होमात्मके यागे हविषोऽपि प्रस्तरस्य प्रतिपाद्यतयेप्सितत्वात् द्वितीयापि। याज्यात्वेन स्तुतिश्चैवं गौणी घटते। यद्यप्ययाज्या निगदा इति निषेधान्न सूक्तवाकेन देवोद्देशः तथापि तत्स्मारिता इज्यायामुद्देश्या इत्येवं देवता बोधनगुणाद्या-ज्यास्तुतिः। ननु यदि होमात्मकस्यांशान्तरे व्यापारादपि तदु-

---

"प्रस्तर आहुतिः" इति याज्यात्वस्तुतिरप्येवं घटते। यदि होमात्मके यागे मन्त्रस्य करणता। अयाज्या निगदा इति निषेधात्सूक्तवाकेन देवता अनिर्देशेऽपि ततः स्मारितदेवता याज्यायामुद्देश्येति देवताबोधनगुणयोगात् गौणी याज्यात्वेन स्तुतिः। नन्विति। यदि होमात्मकस्यांशान्तरे देवतोद्देशे व्यापारादपि तदुपाधितया अन्तर्गते हरणांशेऽपि करणता। तर्हि सक्तून् जूहोतीत्यत्रापि हरणफलभागितया सक्तूनां होमात्मके अनीप्सितकर्मतयापि द्वितीयोपपत्तेः कथं तृतीया च ह्योच्छन्दसीति व्यत्ययस्वीकार इत्यर्थः। तन्नेति। करणता हि स्वव्यापारापेक्षया। सा च परम्परयापि, ततोऽपि व्यवहितापेक्षया साधकतमत्वात्। क्रियाफलता तु धातूपात्तक्रियात एव साक्षान्निष्पत्तेर्न परम्परयेति लोकसिद्धम्। विष्णुं यजतीति सम्प्रदान-स्यापि विष्णोरगत्या उद्देशांशकर्मतयापि द्वितीया।

श्रीकरस्तु—मन्त्रहरणसम्बन्धोपपादकहोमात्मकयागपरमेवेदं वाक्यम्। न श्रुतमन्त्रहरणसम्बन्धपरं विषभक्षणवाक्यवदित्याह—तन्नेति। श्रुतार्थं ह्युपपादकं कल्प्यते। न तु विपरीतम्। तेन नास्य वाक्यस्याश्रुतयाग-परतेत्यर्थः॥

पाध्यंशे हरणेऽपि करणता तर्हि हरणफलभागितया सक्तूनां होमात्मकेऽनीप्सितानां कथं व्यत्ययस्वीकारः तन्न । करणताहि स्वव्यापारापेक्षया परम्परयापि । क्रियाफलता तु क्रियात एव निष्पत्तेर्न परम्परयेति लोकसिद्धम् । अत्र श्रीकरो मन्त्रहरणसंबन्धोपपादकपरमिदं वाक्यं न श्रुतान्वयपरं विषभक्षणवाक्यवदित्याह । तन्न । उपपादकं हि श्रुतान्वयार्थं कल्प्यते न तु कल्प्यार्थं श्रुतं संबन्धविधेरेवहि हरत्यर्थोऽर्थप्राप्तः । यदि च वाक्यमश्रुतपरं वरमेकपदस्य लक्षणेति न राद्धान्तसिद्धिः । फलचमसस्य तु यागान्वयोऽपि वचोभङ्ग्या श्रुतः । तद्विधावेव भक्षान्वयलाभात्

ननु यथा श्रुतस्य विधानासंभवादुपपादकपरत्वं युक्तम्, अन्यथा हरणे सूक्तवाक्ये च विधेये वाक्यभेदः स्यादित्यत्राह—फलचमसस्य त्विति । तत्र याजयेदित्युपक्रमवचोभंग्या प्रयोजकव्यापारतया यागान्वयोऽपि तत्र श्रुत एवेति मुखान्तरेण तद्विधावेव भक्षणान्वयपरं वाक्यम् । इह तु न तथा । एतच्च वस्तुबलानुसारादुक्तम् । विवरणे त्विति । तत्र द्वयोरन्यार्थयोर्नान्योन्यसम्बन्धः । मन्त्रश्चायं देवताभिधानार्थः, हरणं च प्रस्तरप्रतिपत्त्यर्थम्, अतो मुख्यसूक्तवाकस्य हरणान्वयायोगात् अबघ्नन्निितिवत् काललक्षणैवेति पूर्वपक्षं कृत्वा राद्धान्तितम् । तदाह—राद्धान्त इति । सत्यमन्यान्वितस्य नान्वयः । यद्येकमेवान्वयद्वयेपि प्रमाणम् । इह तु सूक्तवाकेन प्रहरतीति पदद्वयश्रुतिरूपवाक्येन सूक्तवाकस्य श्रुत्यर्थेनान्वयोपपत्तौ न लक्षणाकारणम् । अवघ्नन्निति तु लक्षणा अनुवादे युक्ता । इह तु—कारणान्तराननुरोधादप्रतिहतः श्रौतार्थः ।

ननु देवताप्रकाशनार्थत्वमेव मन्त्रस्य हरणान्वये विघातकमिति चेत्सत्यम् यदि हरणमात्रपर्यवसाय्ययं विनियोगः स्यात् । किन्तु—यज्यर्थपर्यन्त एव हरतिर्यजिलक्षणार्थः ।

ननु निबन्धनमत इव मन्त्रहरणान्वयविधिरेवास्तु हरतिस्त्वर्थप्राप्तानुवादोऽस्तु, किं लाक्षणिकयागपरत्वेनेत्यत्राह—अयमिति । वस्तुबला-

न भक्षान्वयपरमिदं वाक्यम् । अत्र न तथा । विवरणराद्धान्ते हरतिर्यजतिलक्षणार्थ एवायं वस्तुबलात् । वस्तुतश्चेद्धोमात्मक-यागविधिः हरतीति तत्परमेवास्तु । सूक्तवाकेनेति प्रथमावगत तृतीयास्वरसात् । करणत्वेन काललक्षकत्वे चादृष्टार्थः काल-विधिः । प्रधानपदार्थश्च लक्षणायामपि न त्यज्यते । अस्ति च प्रक्षेपसंबन्धो यजेरित्यालोच्य हरतिर्यजतिलक्षणार्थ उक्तः । मन्त्रात् प्रधानदेवतास्मृतिः हरणाच्च प्रस्तरप्रतिपत्तिरनुगुणैव यजिः स्विष्टकृद्वददृष्टार्थिकेति ।

कृत्स्नोपदेशात्

वाक्यात् सूक्तवाकः शेष इत्युक्ते तद्विशेषचिन्तेत्यवान्तर-

द्धात्वर्थस्यैव विधेयत्वे सम्बन्धोपस्थितहोमात्मको योगो विधेयः, विधेयेन च मन्त्रस्य करणतया सम्बन्ध इति, हरतीति पदं लक्षणया तत्परमेवास्तु, लक्षणायां को भेदः इति चेन्न सूक्तवाकेनेति प्रथमावगततृतीयास्वारस्यात् श्रुतस्य करणत्वेनान्वयो युक्तः । अनुपसञ्जातविरोधित्वात् । किञ्चकाल-लक्षकत्वे प्रतिपत्तौ कालविधिरदृष्टार्थः स्यात् । चात्वाल इति देशविधि-वत् । न च दृष्टे सत्यदृष्टकल्पना । चरमावगतत्वेपि प्रधाने न लक्षणा युक्तेति चेन्न, प्रधानपदार्थश्च लक्षणायामपि न त्यज्यते ।।

नन्वसम्बन्धिनि लक्षणाऽयोगात्कथं हरतिर्यजतिलक्षणार्थ उक्त इत्यत्राह—अस्ति चेति, ननु मन्त्रस्य लिङ्गात् इष्टदेवतास्मृत्यर्थत्वं, हरणस्य च द्वितीयाबलाद्या प्रस्तरप्रतिपत्तिता तद्द्वयमपि यागविधौ विरुद्धं यागस्या-पूर्वार्थत्वादित्यत्राह—मन्त्रादिति । सत्यं यजिरदृष्टार्थकारि, तथापि स्विष्ट-कृद्वत्स्वाङ्गमन्त्रादिष्टप्रधानदेवतास्मृतिः स्वाङ्गहरणाच्चापेक्षितोपयुक्त प्रस्तरप्रतिपत्तिरनुगुणैव द्वारभेदादित्यर्थः ।

कृत्स्नोपदेशादुभयत्र सर्ववचनम् ।

सूक्तवाकेन प्रस्तरं प्रहरतीति सूक्तवाकविनियोगो यजिपर्यन्त इत्युक्तम्, सच यागः प्रस्तरहविष्को दर्शे पौर्णमास्यां च प्रयोगभेदेन प्रतिपाद्यप्रस्थर-

सङ्गतिः। पूर्वपक्षस्तु यावतिग्रन्थे पठ्यमानेऽध्येत्रध्यापकश्रोतॄणां सूक्तवाक इत्येकवचनप्रयोगः तावानेकः एकश्च वाक्याच्छेष इति कृत्स्न एव पौर्णमास्याममावास्यायाञ्च प्रयोज्यः। यद्यपि प्रश्लिष्टपठितेऽस्मिन्नर्थैकत्वादेकवाक्यतोक्ता। न चात्र प्रधानदेवतावाचिपदानामर्थ एक अभिमतः। अतोऽत्रैकवचनादेकवाक्यविनियोगः यथा आग्नेय्येत्युक्ते पशुनेति च कृत्स्नस्य उभयत्रविनियोगे मुख्ये कृतार्थोऽपि गौणेपि विनियोज्य इति गौणमुख्यनयहानं, तथापि यावतो विनियोगः तावानेकार्थः स च वाक्यतः कृत्स्नस्ये-

---

भेदात् पृथक्प्रयोज्यः। तत्र चिन्ता किमुभयत्र प्रस्तरयागे कृत्स्नस्य सूक्तवाकस्य शेषता, उत विभागेनेति। तत्रावान्तरसङ्गतिमाह—वाक्यादिति।

ननु सूक्तमनेनोच्यत इति यौगिकेनैकवचनान्तपदेन एकस्यैव सूक्तवाकस्य विनियोगात्कथमुभयत्र कृत्स्नवचनमिति पूर्वपक्ष इत्यत्राह—पूर्वपक्षस्त्विति। सुक्तवाकशब्दो अश्वकर्णादिवद्रूढ एव, न योगात् सूक्ताभिधायिन्येकदेशे, प्रयोगाभावात्समुदाये च प्रयोगात्। ततश्च यावति ग्रन्थे पठ्यमाने अध्येत्रादीनां सूक्तवाक इत्येकवचनप्रयोगः, तावानेकस्ततः किमित्यत्राह—एक इति। सूक्तवाकेनेत्येक एव वाक्याच्छेष इति पौर्णमास्याममावास्यायां च कृत्स्न एव प्रयोज्यः।

नन्वपादबन्धेषु प्रश्लिष्टपठितेषु यजुष्वर्थैकत्वादेकवाक्यतोक्ता, न चात्राग्निरिदमित्यादिप्रधानदेवतावाचिपदानामेकार्थता, अतः परस्परमर्थभेदेन भिन्नवाक्यत्वात्सूक्तवाकेनेत्येकवचनादेकवाक्यस्य विनियोगः, यथ आग्नेय्येत्यत्र एकस्या आग्नेय्यास्तल्लिङ्गवत्याः शेषता। यथा वा पशुनेत्येकपशुव्यक्तिः। किञ्च कृत्स्नस्य सूक्तवाकस्य उभयत्र विनियोगे मुख्ये कृतार्थस्यापि मन्त्रस्य गौणेपि विनियोगात्, गौणमुख्यनयहानमित्याशङ्कामनूद्य परिहरति—यद्यपीति। सत्यं न तथापि मन्त्राणामेकार्थत्वं विनियोगावगम्यम्, ततश्च यावतो विनियोगः तावानेकार्थः। स चात्र वाक्येन कृत्स्नस्य सूक्तवाकस्येति कृत्स्नमेकं वाक्यम्, एवं च गौणमुख्यनयविरोधोपि

त्यचरितार्थे गौणतापि । यथा उत्तमप्रयाजे नानादेवतावाचिपदानामपि एकार्थता एकयागे विनियोगात् ।

राद्धान्तस्तु-सूक्तमनेनोच्यत इति सूक्तवाकः । न च कृत्स्नेन सूक्तमुच्यते । स्वत एव प्रातिस्विकार्थभेदेऽपि एकवचनमेकरूपकारकतापेक्षम् । पदं वाक्यमिति च लोके, वेदेत्वेतदेकवचनम् । यावतो विनियोगादेकार्थत्वं तावति युक्तम् । इह तु वाक्यलिङ्गयोरनुरोधात् यत्प्रधानदेवतावाचिनां यत्रार्थो मुख्यः तावतामेकवाक्यत्वमिति तावत एव विनियोगः ।

न, अचरितार्थत्वात्, भिन्नप्रधानदेवता पदानामेकार्थतया विनियोग एवाशक्य इत्यपि न, यथोत्तमप्रयाजे स्वाहाग्निं स्वाहा सोममित्यादिना देवतावाचिनामपि पदानामेकयागे विनियोगादेकार्थता, तथात्राप्येकप्रस्थरयागे विनियोगाद्भिन्नदेवतापदानामप्येकार्थता । राद्धान्तस्त्विति । स्यादेवं यदि सूक्तवाको रूढः किन्तु—सूक्तं वक्तीति सूक्तवाक इति यौगिक एव । सूक्तमनेन उच्यत इत्यर्थत उक्तम् । न च कृत्स्नेनैव सूक्तमुच्यत इति सूक्तवाक्यान्येव सूक्तवाकः ।

नन्वेवं प्रातिस्विकार्थभेदभिन्नानां वाक्यानां सूक्तवाकत्वे सूक्तवाको वर्तत इति लोके कथमेकवचनप्रयोग इत्यत्राह—स्वत इति । वस्तुतो वाक्यानां भेदेऽप्येकरूपां सूक्तपदानामेकतामपेक्ष्य पदं वाक्यमितिवदेकवचनमुपपन्नम् लोके । वेदेतु—यावतां पदानामेकस्मिन्नर्थे विनियोगस्तावतामेकार्थत्वादेकं वाक्यमित्येकवचनम् । एवं तर्हि समुदायस्य विनियोगात्सूक्तवाकेनेति समुदाय एकवचनं मास्त्वित्यत्राह—इह त्विति । सूक्तवाकेन प्रस्तरं प्रहरतीति लिङ्गानुरोधिवाक्येन यत्प्रधानदेवतावाचिनां पदानां यत्र पौर्णमास्याममावास्यायां वा मुख्यार्थस्तत्र तावतामेकवाक्यत्वमिति तावतामेव विनियोगः । नन्वेवमिति । अग्निरिदमग्नीषोमाविदमित्याद्येकैकप्रधानदेवतान्वितं पदजातमेकैकवाक्यं स्यात् । अर्थभेदात्, ततश्च एकस्मिन् पौर्णमासीप्रयोगे त्रयाणामपि वाक्यानां विकल्पेन प्रयोगः स्यात् । प्रस्तरयागस्यैकत्वात्,

नन्वेकैकप्रधानदेवतान्वितं पदजातमेकैकं वाक्यं प्रस्तरयागश्च प्रस्तरप्रतिपत्त्यर्थः। एकश्च पौर्णमासोप्रयोगः प्रतिपाद्य इत्येकैकवाक्यप्रयोगो विकल्पेनैव स्यात्। अग्न्यादिदेवतात्रयस्मृतिः एकप्रयोगेन स्यात्। मैवम्। उक्तं हि लिङ्गानुरोधि वाक्यं मन्त्रैकताकरं लिङ्गाच्चेष्टप्रधानदेवतागणनार्थता। पौर्णमासोप्रयोगे च तदीय गणनयाऽनुष्ठानोपयोगः। पातपक्षे प्रायश्चित्तमिति पौर्णमासीगत देवतापदानामेकवाक्यतया एकवचनम्। तेन तावतां प्रस्तरयागे विनियोगः। अमावास्यायामप्येवम्। यथोत्तमप्रयाजे नानादेवतावाचिनामेकवाक्यता। नत्वेवं वाच्यम्। एकैकशो-

---

तच्च प्रतिपाद्यप्रस्तरस्यैक्याद्भवतु विकल्पः, का हानिरितिचेन्न, इष्टानामग्न्यादिदेवतानामेकप्रयोगे सर्वाषां स्मृतिरपेक्षिता न स्यात्। मैवमिति। त्रयाणां विनियोगवशादेकवाक्यतेत्युक्तम्। विनियोगश्च लिङ्गानुरोधिवाक्यात्। लिङ्गतश्चेष्टदेवतागणनार्थता मन्त्रस्य। तद्गणने क उपयोग इति चेन्न, यतः पौर्णमासोप्रयोगे तदीयगणनया अनुष्ठानोपयोगः, पातपक्षे प्रायश्चित्तमिति पौर्णमासोगतदेवतापदानां त्रयाणामेकवाक्यतयैकवचनम्। तेन तावतां प्रस्तरयागे विनियोगः, एवममावास्यायामपि।

एवं च कृत्वा लिङ्गानुरोधिवाक्यात्सूक्तवाके वाक्यद्वयतैव। यत्तु पञ्चिकायाम् तस्मात्सर्वेषां सूक्तवाकवचनत्वाविशेषादिति वाक्यबहुत्वमुक्तम्, तत्सर्वथा न समुदायस्य विनियोगः, किन्तु विभज्येत्येत्रं परम्, अत्र दृष्टान्तः—यथोत्तमेति।

अत्र केचित् ग्रन्थविरोधभीत्याऽन्यथा वर्णितवन्तः। तथाहि लिङ्गबलात्सूक्तवाके इष्टदेवतामन्त्राः, तत्र एकैकशः प्रतिमन्त्रं विनियोगेऽपि न विकल्पः। किन्तु समुच्चय एव। तत्र पौर्णमासीप्रयोगे त्रयाणां मन्त्राणामेकस्मिन् प्रयोगे समुच्चयः, दर्शप्रतिपत्तियागे त्रयाणां समुच्चयः॥

नन्वेवमेकयागे वहुमन्त्रप्रयोज्ये सूक्तवाकेनेत्येककरणावगतिविरोध

पि विनियोगे प्रतिपत्तियागैक्यादर्थान्मन्त्रसमाजो भवन्नपि न शास्त्रगम्यामेकैकस्य करणतां निरुणद्धि। दधिपयसोरिव तन्त्राहुतावपि न निरपेक्षसाधनताहानिरिति। यतः तन्त्राहुतौ एकेन्द्रोद्देशेऽपि निरपेक्ष एवेन्द्रान्वयः। यागद्वयं तु सहोत्पन्नं। अत्रैक एव प्रस्तरयागः तत्करणं चेत् बहु कथमेकैककरणता।

श्रीकरस्तु—विकल्पमेवानुमेने। सचोक्तगतिसंभवे नोपेयः। भाष्ये तु समुदायद्वये कृत्स्नविनियोगाद्विभज्यान्वय इति राद्धान्ताभास एवोक्तः। यदुक्तञ्च परैः—

इति चेन्न। यतोऽर्थान्मन्त्रसमाजः एकस्मिन् प्रयोगे युगपत् भवन्नपि न शास्त्रगम्यां एकैकस्य करणतां निरुणद्धि। यथा सम्प्रतिपन्नदेवताकत्वेन तन्त्राहुतावप्यैन्द्रदधिपयसोर्न निरपेक्षकरणताहानिरिति। तद्दूषयति—न त्विति। कुत इत्यत्राह—यत इति। ऐन्द्रं दध्यमावास्यायामैन्द्रं पयोऽमावास्यायामित्यत्र दधिपयसोस्तन्त्राहुतावेकेन्द्रोद्देशे यागद्वयसाधनयोस्तयोर्निरपेक्ष एवैन्द्रान्वयः, यागद्वयं तु सकृदाहुतेस्तत्र सहोत्पन्नम्। अत्र तु प्रस्तरयाग एक एव प्रतिपाद्यैक्यात्। तत्र करणं चेद्बहु कथमेककरणता। अतः पूर्वोक्तैव विधेत्यर्थः॥

श्रीकरस्त्वत्र विकल्पमेवानुमेने, प्रयोगावृत्त्यपेक्षया कृत्स्नेष्टदेवतावृत्तिः, स चोक्तगतिसंभवे नोपेय इत्याह—श्रीकरस्त्विति। भाष्ये तु—यद्राद्धान्तसमये समुदायद्वितये कृत्स्नविनियोगात् विभज्यान्वय इति तद्राद्धान्ताभासतयेत्याह—भाष्येत्विति। अत्राचार्यैः सूक्तवाकशब्द एकदेशे समुदाये वा युक्त इत्येव तदर्थ उक्तः, यथा संसर्गद्रव्यवाचकस्तोयशब्दोविन्दौ समुदाये चेष्यते, तथा सूक्तवाकपदमपीति तदाह—यदुक्तमिति, तन्नेति। यद्यपि शब्दरूपाणां मन्त्राणां द्रव्यता तथापि तेषां संसर्गिता विनियोगाधीनैव, नान्यथा। विनियोगश्च लिङ्गानुरोधिवाक्याद्विभज्यैवेति, पूर्वोक्तैव गतिरित्यर्थः॥

बिन्दौ च समुदाये च तोयशब्दो यथेष्यते।
संसर्गिद्रव्यरूपत्वात्सूक्तवाकपदं तथा ।। (तं. वा. ३.२.६)

तन्न, उक्तं हि विनियोगाधीनाऽत्रसंसर्गितेति ।

लिङ्गक्रमः

अत्रायं विषयः ब्राह्मणग्रन्थे ऐन्द्राग्नं कर्मद्वयं पठित्वा वैश्वानरकर्मद्वयं पठितम् । एवं परापरद्वयं मन्त्रग्रन्थेनारभ्यैन्द्राग्नं ऋग्युगद्वयं पठितम् । (तन्त्र) तत्राद्यर्ग्युगस्य पूर्वा इन्द्राग्नी रोचना दिवं इत्यादिका । अपरा 'प्रचर्षणिभ्य' इत्यादिका । द्वितीयर्ग्युगस्य पूर्वा 'इन्दाग्नी नवति इत्यादिका । अपरा 'श्नथ-

---

लिङ्गक्रमसमाम्नानात्काम्ययुक्तं समाम्नातम् ।।

अत्र भाष्यकारोक्तविषयं पूर्वोत्तरपक्षकथनाय सूत्रयोजनाय लिङ्गक्रमस्वरूपनिरूपणाय च शोधयति—अत्रायमिति । ब्राह्मणग्रन्थे ऐन्द्राग्नं कर्मद्वयं पठित्वा वैश्वानरकर्मदयम् । एवमनारभ्यैव कर्मविशेषं मन्त्रग्रन्थे ऐन्द्राग्नमृग्युगद्वयं पठितम् । तत्र ऋक्स्वरूपं दर्शयति—तत्रेति । ततो वैश्वानरकर्मद्वयस्य ऋक्युगद्वयं पठितम् । ततोऽपरापराणां कर्मणाम् । अपरापराणामिति रूपसिद्धौ यत्नः कार्यः, ततः परापराणामिति तु सम्यक् पाठः, तत्रच काम्ययाज्यानुवाक्याकाण्डमिति समाख्या, तथा लिङ्गक्रमश्चास्ति ।।

ननु लिङ्गस्य क्रम एव नास्ति, कथं लिङ्गक्रम इति तत्राह--यच्चिह्नमिति । लिङ्गशब्दश्चिन्हपरइति भावः । एवं विषयं संशोध्य पूर्वपक्षोत्थितिकथनेन पूर्वनयेनावान्तरसङ्गतिमाह—एवमिति । पूर्वनये प्रकरणबलात्प्रत्येकं कृत्स्नशेषतां बाधित्वा विभज्य विनियोग उक्तः, इह पुनः प्रकरणादपि दुर्बले क्रमसमाख्ये बाधित्वा लिङ्गेनाविशेषेण सर्वैन्द्राग्नसंबन्ध इत्यर्थः, नन्वितः पूर्वं क्रमसमाख्याभ्यां शेषता नोक्तेति नात्र तद्विषयबलाबलचिन्ता युक्तेत्यत्राह—नेयमिति ।।

द्वृत्रं' इत्यादिका। ततो वैश्वानरस्य ऋग्युगद्वयं पठितम्। ततोऽपरापराणाम्। तत्र काम्ययाज्यानुवाक्याकाण्डमिति समाख्या। लिङ्गचिन्हं क्रमश्चास्ति। यच्चिन्हं कर्मयुगं पूर्वं कर्मपाठे तच्चिन्हं मन्त्रयुगद्वयं पूर्वं मन्त्रपाठे। तथा च परमपि यच्चिन्हं कर्मयुगं मन्त्रयुगद्वयमपि तच्चिन्हं अपरमपि। सोयं लिङ्गक्रमः। एवं स्थिते यावदैन्द्राग्नलिङ्गात् ऐन्द्राग्नमन्त्रयुगद्वय विनियोगः न तु तद्विशेषलिङ्गक्रमात् समाख्यानाद्वा। पूर्वाधिकरणेऽपि प्रकरणतः प्रत्येकं कृत्स्नशेषताबाधात् लिङ्गाद्विभागे उक्ते ततो दुर्बलमिदं द्वयं नितरां लिङ्गबाध्यमित्युत्थानादवान्तरसङ्गतिः।

नन्वनेनेदं कर्तव्यमिति सामान्यसम्बन्धापेक्षं तदर्थं क्रमसमाख्यां चापेक्षत इति नापेक्षणीयबाधो युक्त इति कथं पूर्वपक्ष इत्यत्राह—पूर्वपक्षस्त्विति। श्रुतिलिङ्गवाक्येत्यादिसूत्रे तुल्यवदनुक्रमणाल्लिङ्गमप्यनपेक्षमेव विनियोजकम्।

ननु सामान्यसम्बन्धापेक्षाऽस्त्वित्यत्राह—युक्तमिति। मन्त्रस्य हि यदभिधानसामार्थ्यं तत्सम्बन्धो लिङ्गादवगतः। ततस्तन्मुखेन विनियोगसन्निहित तत्सम्बन्ध्यपूर्वार्थः सन् तदीयद्वारार्थः। तत्र दृष्टान्तमाह—अनारभ्याधीतेति। यथा अनारभ्याधीते पर्णमयी जुहूर्भवतीत्यत्र प्रकरणात्सामान्येनापूर्वसम्बन्धाभावेपि पदद्वय श्रुतेरन्योन्यान्वयपूर्वकं विनियोगसन्निहितजूहूमदपूर्वान्वयात् तदीयद्वारार्थता। एवमनारभ्याधीतैन्द्राग्नादिमन्त्रस्याप्यपूर्वसम्बन्धात्पूर्वमेव लिङ्गाभिधेयैन्द्राग्न्यादिसम्बन्धावगतेस्तन्मुखेन तद्वदपूर्वार्थत्वमित्यर्थः। राद्धान्तस्त्विति। स्यादेवं यदि शक्तिमात्रात् शक्यपदार्थार्थता मन्त्रस्य स्यान्न च एतदस्ति। किन्तु तात्पर्याधीन एव तादर्थ्यधीः। तादर्थ्यधीश्च अनेनेदं कर्तव्यमित्येवंरूपा, न शक्तिमात्रात्। किन्तु सामान्येन ग्राहकान्वये सति तद्बलादेव। अन्यथा विधिवाक्यानामपि शक्तिमात्रात्स्वप्रतिपाद्यशक्यार्थता दुर्वारा। अतो लिङ्गविनियोज्यानार-

नेयं बलाबलचिन्ता। किन्तु प्रस्तुता लिङ्गविनियोजकता। इह तु सापेक्षस्येति व्युत्पाद्यम्।

पूर्वपक्षस्तु बलाबलसूत्रे श्रुत्यादीनां तुल्यवदनुक्रमात् लिङ्ग-मपि निरपेक्षमिति भाति। युक्तञ्चेदम्। यदभिधानशक्तो मन्त्रः तन्मुखेन तत्संबन्ध्यपूर्वार्थःसन् तदीयद्वारार्थं इति अनारभ्याधीत पर्णतादेरियमेव विधा।

राद्धान्तस्तु—न हि शक्तिमात्रात् शक्यार्थताधीः। न हि शक्तितस्तात्पर्यधीरिति धीसन्निहितवस्त्वन्तरद्वारा न ग्राहकार्थं-ता। पर्णतादि त्वन्वयपरं योग्यान्वयार्थं ग्राहकार्थं युक्तम्। तदेव

भ्याधीतमन्त्र[णां]सन्निहितवस्त्वन्तरद्वारा विनियोगसन्निहितग्राहकार्थता न युक्ता। तर्हि पर्णतायामपि विनियोगसन्निहितापूर्वान्वियो न स्यादित्य-त्राह—पर्णतादि त्विति। पदद्वयश्रुतेः शब्दरूपतया पदार्थद्वयान्वयपरत्वमिति पर्णतादेर्योग्यान्वयार्थं ग्राहकान्वयात्तदीयजुह्वर्थतेति भेदः। अस्त्वेवं तथापि कथं काम्यैन्द्राग्नादिविशेषार्थतेत्यत्राह—तदेवमिति। यद्यपि स्थानसमाख्ये लिङ्गतो जघन्ये। तथापि सामान्यसम्बन्धार्थं स्थानम् समाख्यामपेक्ष्यैव लिङ्गं विनियुङ्क्ते इत्यपेक्षणीयसमाख्याबलात्काम्यकर्मस्वेव लिङ्गं सङ्कुचितमेव, तत्रैव सम्बन्ध इति। क्रमसमाख्यागम्यसामान्यसम्बन्ध-सापेक्षैव लिङ्गाच्छेषतेत्यत्र व्युत्पाद्यम्। श्रुतिलिङ्गनयव्युत्पाद्यं तु तत्रैव वक्ष्यते। सामान्यसम्बन्धस्तु ग्राहकैदमर्थ्यमेव। भाविन्यपि ग्राहकैदमर्थ्ये पूर्वमेव पर्णतादौ श्रुतितोऽन्वयावगतेः लिङ्गतो भेदः। करणैदमर्थ्यं वा। तत्र सामान्यशब्दस्य कथञ्चिदन्वयः।

नन्वन्यतरेति। क्रमसमाख्ययोरन्यतरोपन्यासेनैव प्रकृतोदाहरणेऽभीष्ट-सिद्धेः उभयोपादानं व्यर्थम्। अन्यतरोपादानादभीष्टसिद्धिमुपपादयितुम-भीष्टस्वरूपं तावदाह—इदं हीति। तत्समाख्यामात्रादपि तत्सिध्यतीत्याह—तत्काम्यमिति। अथेति। समाख्यया काम्यकर्मद्वयान्वयेपि तल्लिङ्गमन्त्रयुग-

जघन्यमपि स्थानं समाख्यां वा अपेक्ष्य लिङ्गं विनियुङ्क्ते। ननु अन्यतरोपन्यासादेव प्रकृतोदाहरणेऽभिमतसिद्धेः किमित्युभयोः क्रमसमाख्ययोरुपन्यासः। इदं ह्यभिमतम्; प्रथमे काम्यैन्द्राग्नेप्रथममन्त्रयुगम्, द्वितीये द्वितीयमिति तत्काम्ययाज्यानुवाक्याकाण्डमिति समाख्ययैव काम्यकर्मान्वये याज्यानुवाक्यात्वे च लिङ्गादैन्द्राग्नान्वये सिद्धम्। यथैककत्र युगद्वयं विकल्पेन, युगद्वयव्यवस्थायामपि अयथाक्रमं स्यादिति चेत्, तन्न। एकैकयुगेनैवैकैकस्य कृतार्थत्वव्यवस्थासंभवे च विकल्पायोगात्। व्यवस्थार्थं नियामकापेक्षायां प्रथमपठितकर्ममन्त्रयोः प्रथमधीस्थयोरन्वयधीः।

द्वयस्य एकैकस्मिन् कर्मणि विकल्पेन अन्वयः स्यात्। व्यवस्थायामपि पूर्वकर्मणि परमन्त्रयुगं परत्र पूर्वमित्ययथाक्रमं स्यात्। एकैकत्र वा युगद्वयमपीत्यर्थः। तन्नेति। एकैककर्मणि एकैकयुगेन कृतार्थत्वान्न समुच्चयः। नापि विकल्पः। व्यवस्थासंभवे तदयोगात् सैव कथमित्यत्राह—व्यवस्थेति। प्रथमपठितमन्त्रकर्मणोः प्रथम एवान्वयधीः। एवं द्वितीययोरपि। न च नामान्तरेण क्रम एवोक्त इति वाच्यम्। यतः प्राथम्यादनुपसंजातविरोधित्वादित्यन्यो नयः। पारिशेष्याच्च द्वितीये द्वितीयमित्यन्यः। एवं तर्हि क्रमस्यैवोच्छेद इति चेन्न। क्रमस्तु स्थानसामान्यम्। तत्र समानस्थानतासाधर्म्याद्धिः सन्निधिः। इहतु स्थानसाधर्म्यमपेक्ष्य न धीसन्निधिः। किन्तु प्राथम्यादनुपसंजातविरोधित्वात्। [न] च नामान्तरेण क्रमः एवोक्त इति वाच्यम्। यतः प्राथम्यादनुपसञ्जातविरोधित्वात् पारिशेष्याच्चेति भेदः।

श्रीकरेणैवं भेदः—उक्तप्रथमपाठात्प्रथमप्रयोगः। अतश्चरमभाविनाप्यनुष्ठानक्रमेण पूर्वभाविविनियोग व्यवस्था कपिञ्जलानितिवदिति क्रमाद्भेद इति। तदाह—प्रकारान्तरं त्विति। दूषयति—हेयमेवेति। तत्र हेतुः—अनुष्ठानेति। अनागमत्वमाह—न चेति। भिन्नाधिकारयोः प्रयोगभेदे पाठक्रमाभावेनानुष्ठानक्रमाभावात् न ततो विनियोग इत्यर्थः। उक्तवक्ष्य-

एवं द्वितीययोरपि । नन्वेवं क्रम एव नामान्तरेण । तन्न, प्राथम्यादनुपजातविरोधत्वादित्यन्यो नयः । परिशेषाच्च द्वितीये द्वितीयमिति क्रमस्तु स्थानसाम्यम् । समानस्थानता साधर्म्याद्धि सन्निधिः इह तु न साधर्म्यात् सन्निधिरिति भिदा ।

प्रकारान्तरं तु श्रीकराद्युक्तं-प्रथमपाठात् प्रथमप्रयोगः तदनुरोधात् कपिञ्जलनयवत् विनियोगव्यवस्थेति क्रमाद्भेद इति हेयमेव । अनुष्ठानक्रमाद् विनियोगनियमोऽनागमः । साध्यश्च । न चात्र प्रयोगभेदेन पाठक्रमः । तदेवं समाख्यामात्रादपि तत्सिद्धिरुक्ता । क्रममात्रादपि तत्सिद्धिः । क्रमेण कर्मविशे-

---

माणयोरसङ्कलनायाह—तदेवमिति । कथं क्रमादपि सिद्धिरित्यत्राह—क्रमेणेति । क्रमेण कर्मविशेषान्वये लिङ्गेन याज्याकार्यान्वयात् । न च सामिधेनीकार्यान्वयः । प्रकृतमन्त्रस्यानाग्नेयत्वेन सामिधेनीत्वानर्हत्वात् । सत्यमिति । सत्यं प्रकृते अन्यतरेणाभिमतसिद्धिः । तथाप्यस्मिन्नेव ब्राह्मणग्रन्थे आग्नेयं कर्मद्वयं पठितम् । तत्र चैकत्राग्नेः पथिकृद्विशेषणं परत्र व्रतपतिः । अत एव भाष्ये उक्तम् । पाथिकृतीयं व्रातपतीयमिति । अतः किमिदं ततः तत्कर्मयुगक्रमे चाग्नेयमन्त्रयुगद्वयम् । तथापि किमुक्तं तस्याग्निप्रकाशनसमर्थतया याज्यात्वे लिङ्गं समानम् । सामिधेनीत्वेपि । किमतो यद्येवं ? एतदतो भवति । तत्र यदि लिङ्गक्रमादित्येवोच्येत । तदा याज्यावत्सामिधेनीकार्यमपि तद्युगं कुर्यात् । यद्यपि प्रधानसम्बन्धिताऽभ्यर्हितेति याज्याकार्यान्वयः । तथापि लिङ्गाविशेषात् । जुह्वा जुहोतीतिवदङ्गप्रधानार्थता युक्तेति भावः ।

समाख्याग्रहणञ्च याज्याकार्य एव सङ्कुचितम् । ननु तर्हि समाख्याग्रहणेनैवालम् । किं क्रमग्रहणेनेत्यत्राह—समाख्येति । सत्यं प्रकृते पूर्वत्र च सिध्यति । तथाप्युदाहरणान्तरे मन्त्रयुगान्तरेण निर्वृत्तिरिति याज्याकार्ये तत्क्रम एव पठितमन्त्रान्तरस्याग्निलिङ्गस्य सामिधेनीकार्ये निवेशो न

षान्वये लिङ्गेन याज्याकार्यान्वयात्। न च सामिधेनीकार्यान्वयः। आग्नेयी हि सामिधेनी नैन्द्राग्नयुगं तथा। सत्यं उदाहरणान्तरार्थमुभयमुक्तम्। अस्मिन्नेव ब्राह्मणग्रन्थे आग्नेयकर्मयुगं पठितं, एकत्राग्नेः पथिकृद्विशेषणम्, अन्यत्र व्रतपतिः तेनोक्तं एकं पाथिकृतीयं अपरं व्रातपतीयमिति। तद्युगक्रमेचाग्नेयमन्त्रयुगद्वयम्। तस्य याज्यात्वेपि लिङ्गं सामिधेनीत्वेपि। तत्र यदि लिङ्गक्रमादित्येतावदुच्येत सामिधेनीकार्यमपि तद्युगं कुर्यात्। समाख्यानादित्युक्ते याज्याकार्य एव तद्युगम्। समाख्यामात्राच्चोदाहरणान्तरे निर्वृत्तेः याज्याकार्ये सामिधेनीकार्ये निवेशो न स्यात्। तस्मि-

---

स्यात्। इष्यते च तदुदाहरणान्तरमाह—तस्मिन्निति। तत्र आग्निवारुणकर्मणि तत्क्रमपठितेनाग्निवारुणमंत्रयुगेन यथास्थितं याज्यानुवाक्याकार्यं सिद्धम्। तदनन्तरं तत्क्रम एवाग्निलिङ्गा मनोर्ऋचः पठिताः। ततः सोमारौद्रमन्त्रयुगपाठः स सोमरौद्रकर्मक्रमः।

नन्वेवमाग्निवारुणिक्रमेऽतीते मनोर्ऋचां पाठ इति भाष्यमयुक्तमित्यत्राह—तेनेति। अतीते। याज्ययातीते। न तु सर्वथा, अनागते सोमारौद्रक्रमे तत्कर्मदेवतालिङ्गयाज्यानूवाक्यायुगेऽनागते तत्क्रमानागमः। एवं विषयशोध्यक्रमग्रहणादभिमतसिद्धिमाह—एवमिति। क्रमग्रहणे सति समाख्यातस्तस्य (?) वलवत्त्वादाग्नेयानामृचां क्रमात्सामिधेनीकार्येऽपि निवेशः। यद्यपि समाख्यामात्रोपादानेऽपि मनोर्ऋचां लिङ्गादेव सामिधेनीनां कार्ये निवेशः। न याज्यानाम्। तथापि मनोतावत् द्विदेवत्येऽपि याज्याकार्ये निवेश इति क्रमग्रहणात्तन्निवृत्तिः। याज्याकार्यस्यान्यतः सिद्धेरिति भावः।

समाख्या च ब्राह्मणग्राम इतिवत्कथंचिन्नेया। किञ्च—सामिधेनीनिवेश एव मनोर्ऋचां तदन्तर्गतपृथुपाजवर्षोर्वेदे मानवीऋचौ धाय्ये कुर्यादिति धाय्यानिर्देशो घटते। कुत इत्यत्राह—सामिधेनित्वे हीति। पाय्यसान्ना-

न्नेव हि ब्राह्मणग्रन्थे आग्निवारुणीष्टिः । ततः सोमारौद्रीष्टिः । तत्राग्नीवरुणमन्त्रयुगेन पठितेन याज्याकार्यं यथास्थितं सिद्धम् । आग्निीवारुणी क्रम एवाग्निलिङ्गा मनोः ऋचः पठिताः ततः सोमारौद्रमन्त्रयुगपाठः स सोमारौद्रकर्मंक्रनः तेनोच्यते । याज्यया-ग्निवारुणीक्रम इति । तेन तु सर्वथाऽनागते सोमारौद्रकर्मंक्रमे एवं स्थिते क्रमस्य समाख्यातो बलवत्त्वात् मनोऋचां सामिधेनी-कार्ये निवेशः । याज्यानुवाक्याकाण्डसमाख्या कथञ्चिन्नेया । सामिधेनीनिवेशे च मनोऋचां तदन्तर्भूतपृथुपाजाद्यृचोर्वेदे धाय्या निर्देशो घटते । सामिधेनीत्वे हि तद्विषयधाय्यानुशासनं, नान्यथा ।

अधिकारे च मन्त्रविधिरतदाख्येषु शिष्टत्वात

लिङ्गं सापेक्षं न श्रुतिः श्रुतेरप्राकरणिक्यपि आग्नेयी विनि-

य्यनिकाय्यधाय्यामानहविर्निवाससामिधेनीष्वित्यनेन धाय्याशब्दनिपातानु-शासनं मानविऋचोः सामिधेनित्वे घटते । नान्यथेत्यर्थः ।

अधिकारे च मन्त्रविधिरतदाख्येषु शिष्टत्वात्

ज्योतिष्टोमे श्रुतं—आग्नेय्याऽऽग्नीध्रमुपतिष्ठत इति । तत्र चिन्ता । किमाग्नेय्येति प्रकृताप्रकृतास्वन्यतमाया विनियोगः, किं वा प्रकृतास्वेवान्य-तमाया इति ।।

ननु समाख्यया लिङ्गसङ्कोच उक्ते अनन्तरं तस्या एव नियामकत्व-चिन्तनमुचितमिति प्रकृताप्रकृतमन्त्रविनियोगचिन्तायाः कः प्रसङ्ग इत्य-त्राह--लिङ्गमिति । लिङ्गं सामान्यसम्बन्धाय समाख्यापेक्षम्, नतु श्रुति-रन्यापेक्षा, अतः शोघ्रभाविन्या श्रुतेरप्राकरणिक्याग्नेयी विनियुज्यतामित्य-वान्तरसङ्गतिमाह । यद्यपि समाख्याप्रसङ्गात्समाख्याविषयैव चिन्तोचिता, तथापि शोघ्रभाविन्याः श्रुतेरेव सङ्कोचोऽभिधीयत इति भावः ।।

नन्वत्र ग्रन्थे यावल्लिङ्गं ग्रहणमित्याग्नेयीशब्दस्याग्निप्रकाशनसमर्थमन्त्र-परत्वात् शक्त्यविशे[षे]ष प्रकृताप्रकृतमन्त्रविनियोग इति पूर्वपक्ष उक्तः,

युज्यतामित्यवान्तरसङ्गतिः । पूर्वपक्षस्तु-आग्नेयी शब्दोऽयं देवतातद्धितादग्नि (सूक्ति) शक्तिमतीमृचमाह। तच्छक्तिचिन्हाभेदात् प्रकृताप्रकृतान्यतमाया विनियोगः। उद्देश्यपदमेव हि प्रकृतापेक्षम्। उपात्तमुद्देश्यं कार्ययोगि (परं) इतरच्चोपात्तकार्ययोगित्वेऽपि सामान्यं अपरिमितं इति नोपादानार्हम्) किन्तु कार्यवद्व्यक्तिलक्षणार्थं तद्वाच्यपि पदम्। विधेयन्त्विदं सपरिमाणं सङ्ख्यादिसहितं शब्दगम्यमेव शब्दश्चाग्नेयीत्वेन वक्तीति तथैव विधिः।

यत्तु सामान्योपाधिप्रवृत्तं सन्निहिते विशेषे तत्रैव वर्तत इति तदिहैव व्युत्पाद्यम्। यद्विधेयेऽपि तथाशब्दप्रवृत्तिः। न चाप्रकृतहानं विनियुक्तविरोधाद्वाच्यम्। धीविरोधोऽयं न वस्तुविरोधः। स च विनियुक्तत्वरूपहानेपि स्वरूपेण प्रकृत विनियोगे नास्त्येव।

सोऽनुपपन्नः, ऐन्द्रीवच्छब्दयोगमात्रादपि तद्धितोपपत्तेर्न देवतातद्धितत्वमित्यत्राह—पूर्वपक्षस्त्विति। अगत्या हि ऐन्द्र्यां शब्दयोगात् तद्धिताश्रयणम्। इह तु आग्नेयीशब्दो ह्यवगतदेवतातद्धितान्तोऽग्निशक्तिमतीमृचमाह। ततश्च तच्छक्तिचिह्नाभेदादाग्नेय्येति प्रकृताप्रकृतान्यतमाया विनियोगः। न चाग्नेयीशब्दस्य व्यक्तिवाचितया प्रकृतपरता वाच्या। यत उद्देश्यपदमेव प्रकृतापेक्षम्, कार्ययोगिन उपात्तस्य उद्देश्यत्वात्। उपात्तत्वं च परिमिताया व्यक्तेरेव, न कार्ययोगिनोऽपि सामान्यस्यापरिमितस्येति, न तदुपादानार्हम्। किन्तु उपात्तकार्ययोगिव्यक्तिलक्षणार्थमेव सामान्यवाच्यपि पदमुद्देश्ये। विधेये तु विशेषमाह—विधेयमिति। विधेयन्तु शब्दगम्यमेव, शब्दश्चाग्नेयीत्वेन वक्तीति तथैव विधिः, अथ विधेयेऽपि सामान्योपाधिप्रवृत्तं पदं सन्निहिते विशेषे सति तत्रैव वर्तत इति चेन्न, यतस्तदिहैव व्युत्पाद्यम् यद्विधेयेपि तथा पदप्रवृत्तिरिति। सा च न युक्तेत्युक्तम्। न चाप्रकृतहानं विनियुक्तविनियोगविरोधादिति वाच्यम्। यतोऽयं धीविरोधः, स च विनियुक्तत्वरूपहानेन स्वरूपेण विनियोगे नास्त्येव॥

ननु श्रुतितोऽपि किमग्रतो विनियोजकमस्ति, यतो विनियुक्त-रूपाशङ्काऽस्ति । यदाग्नेयीर्व्यक्ति पठित्वा कृत्स्नां प्रतीकेन वा वाचनं प्रवृत्तं तदा आग्नेयीत्वोपाधिसामान्यादवयवार्थापेक्षाच्छ्रौ-तादग्रत एव तच्चात्रास्तीत्युक्तम् स्तौतिशंसतिविषये वार्तिक-कृता । न त्वाग्नेयीत्वार्थं लिङ्गतः शेषतापेक्षा श्रुतेरिति समाधिः । ऐन्द्र्यामपि तुल्यत्वात् तच्छब्दस्य तासु वेदव्यवहार-सिद्धस्य विनियोगेऽस्मिन्ननुपयोगः । न तत्प्रवृत्तिनिमित्तस्यास्मि-न्नवसरेऽपेक्षा । परिमिता एव वेदे व्यक्तयः आग्नेयीपदवाच्याः । यत्र ह्यदृष्टेऽपि व्यक्तिविशेषे प्रयोगः योगादिनाऽनुसरणीयः तत्र योगतो व्यक्तिभेदधीः । किञ्च योगपूर्वकेऽप्यर्थबोधे न लिङ्ग-

---

अत्र कश्चिद्विनियुक्तविनियोगविरोधशङ्कैवायुक्तेति चोदयति—नन्विति । अस्तीति प्रतीकश्रुतिः, कृत्स्नोपादानश्रुतिश्चावयवार्थसापेक्षाच्छ्रौ-तादग्रत एव । तेचात्र स्त इति स्तौतिशंसति विषये वार्तिककारैरुक्तम् । अत्र केचित् आग्नेयीत्यस्याः श्रुतेराग्नेयीत्वार्थं लिङ्गतः शेषत्वापेक्षा, लिङ्ग-विनियोगादेव तासामाग्नेयीत्वावगतेरित्यपेक्षणीयाल्लिङ्गात्पूर्वमेव विनि-योगोऽवगत इति विनियुक्तविनियोगशङ्कां समादधति, तन्न युक्तमित्याह—न त्वाग्नेयीति । तत्र हेतुः—तच्छब्दस्येति, आग्नेयीशब्दस्य तासु कासुचिद्-व्यक्तिषु वेदव्यवहारसिद्धस्य विनियोगेऽस्मिन्ननुपयोगः, न तत्प्रवृत्तिनिमित्त-स्याप्यपेक्षा । न च तासां व्यक्तीनामनन्ततया प्रतिव्यक्ति व्युत्पत्त्यशक्ते-स्तदर्थमुपाधितया प्रवृत्तिनिमित्तापेक्षेति वाच्यम्, यतः परिमिता एव वेद-वाक्ये व्यक्तय आग्नेयीपदवाच्याः । न चैवं सर्वत्र यौगिकशब्देषु व्यवहारा-देव व्यक्तिभेदधीः, न योगानुसंधानादिति वाच्यम्, यतो यत्रादृष्टे प्रयोगो व्यक्तिविषये योगादिनाऽनुसरणीयः, तत्र योगधीतो व्यक्तिभेदधीः । अङ्गी-कृत्यापि योगतो धियं तच्छक्तियोगमात्रादेवार्थधीः न लिङ्गविनियोगापेक्षे-त्याह—किञ्चेति ॥

विनियोगापेक्षा, शक्तियोगमात्रादर्थधीरस्तु । भावि वा लैङ्गिकमस्तु । योगमात्रं निमित्तं न कालभेदोपहितम् । राद्धान्तस्तु— विधेयेऽपि प्रकृतधीः । उक्तं हि सामान्योपाधेर्व्यक्तिपरः प्रकृत व्यक्तिपर एव लोके व्युत्पन्नः । नीलोत्पलं गामानयेत्यादि । उत्पलपदं गुणयोगार्हत्वार्थं व्यक्तिपरं गोपदं क्रियान्वयार्हत्वार्थं व्यक्तिपरम् । न्यायगर्भं चेदं व्यक्तेः सन्निधिसंभवे तदवरुद्धैव धीः । असंभवेतु व्यवहितधीः । अपौरुषेयं सन्निधानं वैदिके । अतः स्वर्गकामे तदसंभवात् यावद्वयक्ति धीः । अनुपादेयतया च नाशक्यता ।

ननु यौगिकत्वाच्छब्दस्य पूर्वं योगेन भाव्यम्, अतो लिङ्गविनियोगापेक्षेत्यत्राह—भाविवेति । श्रुतेः शीघ्रतया पूर्वं तया विनियोगे पश्चाल्लैङ्गिकमस्तु, तदधीनं योगं निमित्तीकृत्य शब्दप्रवृत्तिरस्तु, योगमात्रमेव हि निमित्तं न कालभेदोपहितम्, अतो न लिङ्गविनियोगस्य पूर्वतया विनियुक्तविरोधशङ्कासमाधिर्युक्तः ।

राद्धान्तस्त्विति । विधेयविषयेपि व्यक्तिवाचिनः शब्दात्प्रकृतधीरेव, तदुक्तं पञ्चिकायाम्—सामान्योपाधिना व्यक्तिपरशब्दः प्रकृतव्यक्तिपर एव लोके व्युत्पन्नः, नीलमुत्पलं गामानयेत्यादौ । तत्र हेतुः गुणान्वयस्य क्रियान्वयस्य च व्यक्तावेव योग्यत्वात् व्यक्तिपरतैव । एतच्चापर्यवसानावगत्यभिप्रायम् ।

ननु व्यक्तिपरत्वेपि किमिति सन्निहितव्यक्तिपरतैवेत्यत्राह—न्यायेति, यौगिकशब्दाद्विशेषपरात्सन्निहिते हि विशेषे तदवरुद्धैव धीः, एष एवोत्सर्गोन्याय्यः असम्भवे त्वन्यदित्याह—असम्भवेत्विति, ध्यानादिना सर्वस्यापि सन्निधिसम्भवे को भेदः, प्रकृतास्वित्यत्राह—अपौरुषेयं चेति । युक्तं चैतदित्याह—अत्र इति । न चैवंसर्वस्वर्गकामपरत्वे अशक्योपादानतया अनुष्ठानपर्यन्तता शास्त्रस्य न स्यादिति वाच्यम्, यतोऽनुपादेयतया स्वर्गकामस्य

विवरणे तु लब्धसामान्यान्वयस्य विशेषान्वयपरा श्रुतिः तेन लाघवात् प्रकृतस्वीकारः। न चैवं सामान्यान्वयापेक्षा श्रुतिः असत्यपि सामान्यान्वये सा यतः लाघवं च लाभः। शेषं सुगमम्।

लिङ्गसमाख्याभ्याम्

प्रकृततयैव समाख्ययापि लिङ्गविनियोगोत्थानादवान्तर-सङ्गतिः। पूर्वपक्षस्तु—भक्षानुवाकसमाख्या हि कृत्स्नानुवाकस्य। तदपेक्षं लिङ्गं कृत्स्नमेव भक्षे विनियुङ्क्ते। भक्षविशेषणार्थं-तया ग्रहणावेक्षणादि पदानामपि मुख्यार्थतैव विशिष्टतया च तत्स्मृतिदार्ढ्यं दृष्टम्। अशेषभूतग्रहणादिपरत्वे च मन्त्रस्याशेष-द्वारतया शेषताहानिः।

नाशक्यता। विवरणे तु प्रकरणोपपत्तिभ्यामिति निबन्धनमते उपपत्तिरूपा या अभ्युच्चययुक्तिरुक्ता, सैव मूलयुक्तिरुक्ता। तामाह—विवरणेत्विति, अप्रकृतमन्त्रग्रहे सामान्यान्वयपरत्वमपि श्रुतेरिति गौरवम्। तेन लाघवा-त्प्रकृतस्वीकारः, न चैवं श्रुतिरपि सामान्यान्वयापेक्षेति वाच्यम्, यतो-ऽसत्यपि सामान्यान्वये पर्णतादौ श्रुतितो विनियोगः, अत्र तु ग्रहणे श्रुते-र्लाघवं लाभः, भाष्यव्याख्यादि तु सुगममित्याह—शेषमिति॥

। लिङ्गसमाख्याभ्यां भक्ष्यार्थतावाक्यस्य।

अनारभ्य भक्षमन्त्रः श्रुतः भक्षे हि मा विशेत्यादिः उपहूतस्योपहूतो भक्षयामीत्येव मन्त्रम्। तत्र चिन्ता—किमयं कृत्स्नोऽनुवाको भक्षशेषः, किं वा कस्यचिदवयवस्य ग्रहणावेक्षणादावपीति। तत्र पूर्वाधिकरणेनावान्तर-सङ्गतिमाह—प्रकृततयेति॥

ननु लिङ्गबलादेव ग्रहणावेक्षणादिसमर्थस्य भागस्य तत्रैव विनि-योगो युक्तः, तत्तु कृत्स्नस्य भक्षे इति कथं पूर्वपक्ष इत्याह—पूर्वपक्षस्त्विति, भक्षानुवाक इति समाख्या तावत्कृत्स्नानुवाकस्य। लिङ्गं च समाख्यापेक्षमेव विनियोजकमिति तद्बलात्कृत्स्नमेव भक्षे विनियुङ्क्ते। न चैवं ग्रहणा-

राद्धान्तस्तु लिङ्गस्वरसात्तावत् स्वार्थपरतैव ग्रहणादिपदानाम् । न परविशेषणता । अर्थाक्षिप्तमपि ग्रहणादि नियोगीयमनुष्ठानकाले स्मरणीयमिति तत्स्मारकमपि शेष एव । विशिष्टतया स्मृतौ सूक्ष्मं दृष्टम् । स्वार्थस्मृत्यपेक्षया तददृष्टम् । समाख्यापेक्षा चैवम् यत्समाख्याऽवयवार्था भक्षान्वयमुखेन मन्त्रपदयोग्योपदिष्टभक्षवत्क्रत्वपूर्वार्थत्वं ततो लिङ्गाच्छेषता । लिङ्गस्य तु वस्तुतो बलवत्तया समाख्याक्रत्वन्वयपरा भक्षाभक्षेषु दण्डिवल्लक्षणया नेया । लौकिकी हि सा वैदिकानुरोधात् वैदिकीकार्या । आग्नेयीपदं तु प्रकृतपरमेव ।

वेक्षणादिपदानां [न] मुख्यार्थतेति वाच्यम् । यतस्तत्पदानामपि भक्षणविशेषणतया मुख्यार्थतैव । अथ विशिष्टत्वेन स्मार्ये भक्षे नानुष्ठानविशेष इति चेन्न, यतो विशिष्टतया स्मृतानुष्ठाने स्मृतिदार्ढ्यं दृष्टम्, विपक्षे व्याहतिमाह—अशेषभूतेति, राद्धान्तस्त्विति, लिङ्गस्वरसात् तावत् ग्रहणादिपदानां स्वार्थपरतैव, वृद्धव्यवहारे तथैव व्युत्पत्तेर्न परविशेषणता ।

नन्वविहितानां ग्रहणादीनां अननुष्ठेयतया न मन्त्रप्रकाश्यतेति तद्द्वारकत्वे मन्त्रस्य शेषताहानिरित्यत्राह—अर्थेति । एवं [येन] विना न विनियोगसिद्धिः तदपि नियोगः स्वसिद्ध्यर्थमाक्षिपतीत्यर्थाक्षिप्तमपि ग्रहणादि विनियोगीयतया अनुष्ठेयमेवेति तदप्यनुष्ठानकाले स्मरणीयम् । अतस्तद्द्वारको मन्त्रः शेष एव तण्डुलद्वारकपेषणवत् ॥

किञ्च—विशिष्टतया स्मृतौ सूक्ष्मं दृष्टम्, अनुष्ठेयस्वार्थस्मृत्यपेक्षया तददृष्टकल्पकम् । नन्वेवं लिङ्गबलात् विभज्य विनियोगे समाख्या परित्यक्तैव, ततश्च समाख्यापेक्षाऽभावे सामान्यसम्बन्धाभावात् लिंगस्य विनियोजकतैव न स्यादित्यत्राह—समाख्येति । भक्षानुवाक इतीयं समाख्या यस्मादवयवार्था तस्मात्तद्बलान्मन्त्रस्य भक्षान्वयप्रतीतेस्तदन्वयमुखेन मन्त्रपदयोग्योपदिष्टभक्षवत्क्रत्वपूर्वार्थत्वं पर्णतादेरिव जुहूमदपूर्वार्थत्वम्, ततश्च समाख्यालब्धसामान्यसम्बन्धमात्रस्य लिङ्गात् शेषता । यद्यपि

गुणाभिधानान्मन्द्रादिरेकमन्त्रःस्यात्तयोरेकार्थ-संयोगात् ।

पूर्वनयापवादोऽत्रेत्यवान्तरसङ्गतिः । पूर्वपक्षस्तु लिङ्गबलात् तृप्ति प्रकाशनेऽपि मन्त्रस्य शेषताऽर्थप्राप्ता । तृप्त्यर्थत्वे सति न भक्षणविशेषणार्थता ।

राद्धान्तस्तु—अर्थप्राप्तेप्यनुष्ठेये स्मृत्यर्हे लिङ्गाच्छेषता । तृप्तिस्तु फलभूता नानुष्ठेया । न च लिङ्गस्वरसमात्रात् अदृष्टा-र्थतयापि समाख्यास्वरसाधीन भक्षविशेषणतया एकवाक्यता हानार्हा । अदृष्टकल्पनातो हि वरं परविशेषणताकल्पना लघ्वीति समाख्यैवात्र प्रभवति ।

अपेक्षणीयतया कृत्स्नानुवाकस्य भक्षशेषता तथापि लिङ्गस्य वस्तुतो बल-वत्तया तद्बलादनन्यथासिद्धग्रहणावेक्षणयोरपि मन्त्रस्य विनियोगात्समाख्या क्रत्वन्वयपरैव, भक्षाभक्षेषु दण्डिवल्लक्षणया नेया ।।

ननु दण्डिवल्लक्षणया समाख्यावर्णनमेवायुक्तमित्यत्राह—लौकिकी-हीति । समाख्या हि लौकिकी । तस्या वैदिकलिङ्गादि प्रमाणानुरोधाद्वै-दिकत्वं कल्प्यम्, तच्चात्र दण्डवल्लणयैव, आग्नेयीपदन्तु नोभयपर-मित्याह—आग्नीयीपदं त्विति ।।

गुणाभिधानान्मन्द्रादिरेकमन्त्रः स्यात् तयोरेकार्थसंयोगात् ।।

तस्मिन्नेव भक्षानुवाके मन्द्राभिभूतिः केतुर्यज्ञानां वाग्जुषाणा सोमस्य तृप्यत्विति । तत्र चिन्ता । किं तृप्तावप्यस्य विनियोग उत मन्द्राभिभूति-रित्यादि भक्षयामीत्यन्तमेकवाक्यतया भक्ष एव शेष इति । तत्रावान्तर-सङ्गतिमाह—पूर्वनयेति ।।

ननु समाख्याबलाद्भक्षयामीत्यनेन एकवाक्यतया भक्षविशेषणतया भक्षशेषतैव मन्द्रादेर्युक्तेति कथं पूर्वपक्ष इत्यत्राह—पूर्वपक्षस्त्विति । अन्य-

लिंगविशेषः

लिङ्गविशेषनिर्देशात्सर्वेषाञ्चैकमन्त्र्यमिति एतत्सूत्रद्वयेन पूर्वोत्तरपक्षतो मूलचिन्ता। भक्षमन्त्रोऽयं किमैन्द्र सोमशेषभक्षण एव, उत सर्वत्र। दृष्टार्थे हि लिङ्गानुरोधिनी समाख्येति (हि) पूर्वव्यतिरेकतः सिद्धमादाय लिङ्गत एव चिन्तेयमित्यवान्तरसङ्गतिः। यदीन्द्रपीतस्येति तृतीया समासः तदा ऐन्द्रभक्ष एव मन्त्रः; अथ बहुव्रीहिः तदा सर्वत्र। पूर्वपक्षस्तु—उत्तरपदार्थप्रधानता अन्यपदार्थप्रधानतापेक्षया युक्ता तस्यामेकस्य तावत् स्वार्थपरतेति इन्द्रेण पीतस्य शेषं भक्षयामिति मन्त्रार्थः। ऐन्द्राणामेवोपदेशतो

पदार्थप्रधानात् बहुव्रीहेरुत्तरपदार्थप्रधानस्तत्पुरुष एव युक्तः। तस्मिन्नेकस्यापि तावत्पदस्य स्वार्थपरत्वात्। अथ तत्पुरुषत्वे सोमरसपरतैव इन्द्रपीतशब्दस्य तत्कथं षष्ठ्यन्तस्य भक्षयामीत्यनेन अन्वय इति चैत् इत्थमिन्द्रेणपीतस्य शेषं भक्षयामीति मन्त्रार्थः। अथाविशेषेण समाख्यातः सर्वान्वय इति चेन्न। समाख्या तु भाक्षन्वयमात्रपरा मन्त्रलिङ्गानुसारे त्वैन्द्राणामेव भक्ष उपदेशतो मन्त्रः॥

ननु माभूदुपदेशतो मन्त्रः अतिदेशतोऽस्त्विवति चेत् तत्राह—समानेति। ननु वस्तुतो विकृतित्वाभावे कथमुत्तरचिन्तानामवतार इत्यत्राह—किन्त्विवति। अनैन्द्राणामैन्द्रिप्रकृतिकत्वशङ्का षोडशिनि नमनविधेः कथं। नमनं हि विपरिणामः, स च परिणमनीये। स च भवति अतिदेशत एवेति विकृतित्वाशङ्का नमनविशिष्टमन्त्रविधौ गौरवापत्तेर्लिङ्गमिदम् का प्राप्तिरिति चेत्तत्राह—तथाचेति। इन्द्राय त्वा गृह्णामीत्यादि सोमग्रहणमानमन्त्रः ऐन्द्रः। अतः शेषभूतमन्त्रलिङ्गानुरोधाच्छेषिणी ग्रहणमाने कांस्यभोजिनयादैन्द्रस्यैव, यत्र च ग्रहमाने तत्र सोमः। यत्र सोमस्तत्र तत्संस्कार इति द्रव्यसंस्कारशून्यतया साकांक्षप्रदानान्तराण्यैन्द्रप्रकृतिकानीति शङ्का॥

नन्वेकाधिकारविधिसम्बन्धिनां कथं प्रकृतिविकृतितेत्यत्राह—शङ्का-

मन्त्रः । समानविधानानि च सर्वप्रधानान्युपदेशादेव निराकांक्षाणि वस्तुतः । किन्तु ऐन्द्रप्रकृतिकानीति शङ्का षोडशिनि नमनविशेषावगतेः । चोदकावगते हि विपरिणमनीये नमने विशेषविधिः, विशिष्टविधौ गौरवापत्तेः । तथा सोमग्रहणमानमन्त्रः ऐन्द्रः तल्लिङ्गानुरोधात् । ग्रहणमाने तस्यैवेति द्रव्यसंस्कारशून्यतया प्रदानान्तराण्यैन्द्रप्रकृतीनीति शङ्कापि युक्ता । अभ्यासापूर्वभेदात् प्रकृतिविकारभावोपपत्तेः ।

नन्वग्निष्टोमसंस्थावर्ति प्रदानेषु विकृतिशङ्का न षोडशिन्यूहदर्शनाद्युक्ता । संस्थान्तराणां स्थापितविकृतितयैव तत्रोहः । मैवम् । संस्थान्तराणां विकृतित्वेऽपि न ग्रहयज्यभ्यासानां प्रकृतिविकृति भावः । षोडशिन्यतिदिष्टैन्द्रग्रहस्थानापातात् नैन्द्राणां

ऽपीति । एकाधिकारान्वयेऽप्यभ्यासावान्तरापूर्वभेदात् दैक्षसवनीययोरिव प्रकृतिविकृतितोपपत्तेः, अत्र कश्चिच्चोदयति —नन्विति । संस्थानयस्थापित विकृतितयैव तत्र षोड़शिन्यूहोऽन्यथासिद्ध इति कथं तद्दर्शनेनाग्निष्टोमसंस्थावर्तिष्वनैन्द्रेषु विकृतित्वशङ्का । अविकृतिषु विकारदर्शनं विकृतित्वशंकाकारणम् । मैवमिति । संस्थाद्वयेनाग्निष्टोमेतरसंस्थानां विकृतित्वे सिद्धेपि न तदन्तर्गतग्रहयज्यभ्यासानामन्योन्यं प्रकृतिविकृतिभावसिद्धिः ॥

ननु तथापि विकृतिषोड़शिसंस्थावर्त्यनैन्द्राणां प्रकृतेरग्निष्टोमसंस्थाया अतिदिष्टैन्द्रग्रहस्थानपातान्मन्त्रोह अन्यथासिद्ध इति चेत्त्राह—षोडशिनीति । ऐन्द्रग्रहयजेस्तावन्नातिदेशः, प्रधानत्वात्तस्य ग्रहणस्य, संस्काररूपस्यातिदेशेपि न तत्स्थानेऽनैन्द्राणां पात इति न तन्मन्त्रोहोऽन्यथासिद्धः, किन्तु ऐन्द्राधर्मातिदेशादेवानैन्द्राणाम् । स च नमनादिदर्शनादिति सिद्धमूहदर्शनाद्विकृतित्वम् । एवमपि यत्र दर्शनं तत्रैव प्रकृतिविकृतिता नान्यत्रेति चेन्न, प्रकृतिविकृतित्वप्रयोजकापूर्वधर्मोपदेश धर्माकांक्षयोः सत्त्वादेकत्र दर्शनमन्यत्रापि तत्सजातीयविकृतित्वं गमयतीति ध्येयम् ॥

तन्मन्त्रोहः । किन्त्वैन्द्र धर्मातिदेशादनैन्द्राणाम् ।

श्रीकरस्तु संस्थाधिकरणपूर्वपक्षे स्थित्वा संस्थानां समानविधित्वेनाम्नानदर्शनात् ऐन्द्रस्य प्रकृतितामाह । तन्न, पूर्वपक्षावस्थायाः ग्रन्थेऽनुद्भावनात् । अतः पुर्वोक्त एव प्रकारः ।

पुनरभ्युन्नीते

तत्रोहभेदचिन्ता पातृदेवतयोपलक्ष्ये शेषे पुनरभ्युन्नीते पूर्वदेवतयोपलक्षणं उत नेति । पूर्वपक्षस्तु सकृद्धुतांश्चमसान् इति प्रैषलिङ्गादैन्द्रं हुत्वा सशेषेष्वेव पात्रेषु मित्रावरुणार्थं गृहीतं, तदर्थमाश्रावितं पात्रस्थमविशेषेणेति । अतः पूर्वदेवताऽपनीतेति न तयोपलक्षणम् ।

श्रीकरस्तु—संस्थानयपूर्वपक्षावस्थायां स्थित्वा सर्वासां संस्थानां समानविधित्वे संस्थान्तरे षोड़शिनि नमनदर्शनादैन्द्रस्य प्रकृतितेत्याह—तदाह श्रीकरस्त्विति । संस्थानयपूर्वपक्षावस्थायामिति ग्रन्थेऽनुक्तत्वादयुक्तम् । अयुक्तं च तदधिकरणराद्धान्तमङ्गीकृत्य पूर्वोक्त एव परिहारः श्रेयानिति पूर्वपक्षावस्थाङ्गीकारेण परिहारायोगात् । एवं विकृतित्वशङ्कामुपपाद्य तत्पूर्वकोहभेदचिन्तां प्रस्तौति, तत्राह—भेदेति ॥

पुनरभ्युन्नीतेषु सर्वेषामुपलक्षणम् तद्विशेषत्वात्

अत्र विषयसंशयावाह– पातृदेवतयेति । प्रकृताविन्द्रपीतस्येति पातृदेवतयोपलक्ष्ये शेषे विकृताविन्द्रशेषयुक्तेष्वेवं चमसेषु मित्रावरुणाद्यर्थं होत्रकचमसाध्वर्युभिः सोमे पुनरभ्युन्नीते तैस्तेषु [इन्द्र पीतशेषे] षु शेषभक्षण समये मन्त्रे किं पूर्वदेवतयाप्युपलक्षणमुत नेति । पूर्वपक्षस्त्विति । सकृद्धुतांश्चमसानिति प्रैषलिङ्गादिन्द्रं हुत्वा सशेषेष्वेव पात्रेषु मित्रावरुणाद्यर्थं ग्रहीतुं पात्रस्थं सर्वमविशेषेण तदर्थमाश्रावितमिति पूर्वदेवतापायान्न तयोपलक्षणम् ।

राद्धान्तस्तु यद्यदर्थं गृहीतं तत्तद्देवतार्थमाश्रावणार्हम्। अतस्तावन्मात्रविषयं तत्, न पूर्वदेवताशेषविषयमित्यनपनीतयोपलक्षणमयुक्तमुत्तरदेवताया अपि।

पात्नीवते

आग्रयणे द्विदैवत्यशेषः तदपादानके पात्नीवतस्य शेषग्रहणे अनपनीतपूर्वदेवतयोपलक्षणमिति पूर्वपक्षेऽपवादः। आग्रयणस्थरसस्य देवतान्तरार्थत्वं शेषग्रहणाज्जातमित्यपनीता पूर्वं देवता। अन्यार्थत्वेऽपि वस्तुधोर्विरोधयोरभावान्न पूर्वदेवतयोपलक्षणम्।

त्वष्टारंतूपलक्षयेत्पानात्।

मन्त्रवर्णात् त्वष्टुरपि सहत्वेन देवतात्वात् त्वष्ट्रोप-

राद्धान्तस्त्विति। यो रसो यद्देवतार्थं गृहीतः स एव तदर्थमाश्रावणार्हः, न च पूर्वशेषस्य तदर्थं ग्रहणमिति गृहीतविषयमेव देवतान्तराश्रावणं न पूर्वदेवताशेषविषयमित्यनपनीतया पूर्वदेवतया उपलक्षणमुत्तरदेवतापि॥

पात्नीवते तु पूर्ववत्वादवच्छेदः

तत्र पूर्वोत्तरपक्षावाह—आग्रयण इति। पात्नीवतमाग्रयणात् गृह्णातिति पात्नीवतग्रहे ऐन्द्रवायवादि द्विदेवत्यशेषवदाग्रयणापादानके इष्टशिष्टभक्षणमन्त्रे पूर्ववत्पूर्वदेवतयाप्युपलक्षणमिति पूर्वपक्षे राद्धान्तः। आग्रयणस्थस्य द्विदेवत्यशेषस्य ग्रहणात् देवतान्तरार्थत्वं जातम्। अपनीता पूर्वदेवतेति न तयोपलक्षणम्। व्यावृत्तव्यापाराभावान्मुखान्तरानु [द्वयो] द्रव्ययोश्च अन्यार्थत्वेपि न धीवस्तुविरोधावित्यर्थः।

त्वष्टारं तूपलक्षयेत्

तस्मिन्नेव पात्नीवते भक्षमन्त्रे त्वष्ट्रोपलक्षणं नवेति चिन्ता। तत्र पूर्वपक्षमाह—मन्त्रवर्णादिति। यद्यपि पात्नीवतमिति विधिवाक्ये पत्नीवदग्ने-

लक्षणम् । मन्त्रे सजूर्देवेन त्वष्ट्रा सोमं पिबे'त्यत्र सजूश्शब्दः सहार्थः । सहत्वेन च निवेशात् पात्नीवततद्धितविरोधः ।

राद्धान्तस्तु—चोदनातोऽत्र देवतात्वधीः इति मन्त्रवर्णात् स्तुतिमात्रम् । अतस्त्वष्ट्रा नोपलक्षणम् ।

त्रिंशच्च परार्थत्वात्

त्रयस्त्रिंशद्देवताह्वातृता अग्नेः मन्त्रवर्णात् । न पातृतेति त्रयस्त्रिंशद्देवतयोपलक्षणं नाग्निनेति पूर्वस्माद्विशेषाशंका । राद्धान्तस्तु आह्वातृ श्रुतिरेवाग्नेरीशितृत्वमाह । न ह्यनीशानो बिलम्बयतीति त्वष्टृतुल्यतैव त्रयस्त्रिंशत इति नोपलक्षणं त्रयस्त्रिंशताम् ।

अनुवषट्कारश्च तद्वत्

अनुवषट्कारदेवता पातृत्वादुपलक्षणार्हेति शङ्का । राद्धान्तस्तु

रेव देवतात्वम् । तथापि प्रधानमन्त्रवर्णात् त्वष्टुरपि सहत्वेन देवतात्वात्तेनाप्युपलक्षणम् । मन्त्रेण सजूः शब्दात्सहत्वधीरित्याह—मन्त्रेहीति । तद्धितविरोधोऽपि नास्तीत्याह—सहत्वेनेति । राद्धान्त स्त्विति । चोदिता हि देवतेति विधिवाक्यचोदितपत्नीवद्देवतालाभे न मन्त्रदेवताकल्पनमिति मन्त्रवर्णात्स्तुतिमात्रं न त्वष्टुर्देवतात्वमिति न तेन उपलक्षणम् ।

त्रिंशच्च परार्थत्वात्

तस्मिन्नेव पात्नीवतशेषभक्षमन्त्रे किं पत्नीवत् त्रयस्त्रिंशद्देवैरुपलक्षणमुताग्निनेति चिन्ता । तत्र त्वष्टृवैषम्यं कथयन्नेव पूर्वपक्षमाह—त्रयस्त्रिंशदिति । राद्धान्तस्त्विति । अग्नेराह्वातृस्तुतिर्हविः प्रति ईशितृत्वमाह [न हि] अनीशानो विलम्बयतीत्यग्नेरेव देवतात्वम् । त्रयस्त्रिंशतस्तु त्वष्टृतुल्यतैवेति नोपलक्षणं तैः ।

यदुद्दिश्य ग्रहणं तेनैवोपलक्षणं प्रकृतौ नानुवषट्कारदेवता तथेति तया नोपलक्षणम् ।

च्छन्दः प्रतिषेधस्तु

अनैन्द्रे यथा दैवतमूहः ऐन्द्रप्रकृतित्वाशङ्कापूर्वक इति संवेदानीं तत्प्रकृतिता युक्तिभिर्निरस्यते । षोडशिनस्तृतीयसवनस्थस्य मन्त्राम्नानानुसारात् जगतीच्छन्दस्ताप्राप्तौ ननवचनादनुष्टुप्छन्दस्ता । तत्रोहभ्रमः । ऐन्द्रस्य ग्रहणमाने समन्त्रके । नत्वनैन्द्रे सोमाभावश्शङ्क्यः । 'सोमेन यजेते' त्येकस्यैवोत्पन्नस्य यागस्यानेकधाभ्यासात् प्रकृतिविकृतिभावो न शंक्य इति स्थिते ऊहादैन्द्राग्नोपलक्षणं नास्त्येव व्यावृत्त्योपदेशादाशङ्का । तद्धित-

---

अनुवषट्कारश्च तद्वत्

तस्मिन्नेव सूत्रे अनुवषट्कारदेवतया किमुपलक्षणं नेति चिन्तायां पूर्वपक्षमाह—अनुवषट्कारेति । राद्धान्तमाह—यदुद्दिश्येति । प्रकृतौ यदुद्देशेन ग्रहणं तेनोपलक्षणम् । न चानुवषट्कारदेवतोद्देशेन ग्रहणमिति न तयोपलक्षणम् ।

छन्दः प्रतिषेधस्तु सर्वगामित्वात् ॥

नन्वस्मिन् सूत्रे न विषयः नापि व्युत्पाद्यं प्रतीतमिति किमर्थमिदं सूत्रमित्याशंक्य तात्पर्यमाह—अनैन्द्र इति । निरस्यत इत्यत्राह—षोडशिन इति । तृतीयसवनस्थस्य षोड़शिनो मन्त्राम्नानानुसाराज्जगतीछन्दस्त्वप्राप्तौ वचनादनुष्टुप्छन्दस्ता । जगतीछन्दस इति पदान्तरविकारात् तत्रोहभ्रमः । विकृतित्वाभावेनातिदेशाभावात् । अप्राप्तौ विशिष्टविधिरपि न दोषः । तथा ऐन्द्रमन्त्रलिङ्गादपि न ग्रहणमानसङ्कोचः । शेषमन्त्राच्छेषिसंकोचायोगात् । अन्यथा व्रीहिमन्त्रलिङ्गाद्यवपुरोडाशे सदनकरणप्रतिष्ठापने न स्याताम् । अतः सर्वत्र ग्रहणमाने । इयान्भेदः । ऐन्द्रे तु समन्त्रके अनैन्द्रे त्वमन्त्रक इति । न त्वनैन्द्रे सोमाभावः शंक्यः सोमेन यजेतेत्येकस्यैव उत्पन्न-

सामर्थ्यादाग्नेये चतुर्धाकरणं नैन्द्राग्न इति युक्तम् । इहत्विन्द्रपीत-शब्दो लक्षणयेन्द्रोद्देशेन त्यक्तमाह इन्द्रानिन्द्रोद्देशेऽपि प्रत्येकमुद्देश इत्येवमैन्द्राग्नेऽपि मन्त्रो युक्तः ।

राद्धान्तस्तु-वस्तुतः इन्द्रस्य पातृत्वाभावात् देवतात्वमैवेदं युक्तम् । तद्यत्र मिलितस्य न तत्रेन्द्रस्येति नोपलक्षणम् ।

छन्दश्च

नाना छन्दसः सोमस्य 'गायत्रच्छन्दस' इत्येवं निर्देशानर्हत्वं देवतावदिति शङ्का निरस्यते । तदेकच्छन्दसः सोमस्य अभावा-

---

यागस्यानेकाभ्यासमात्रात् प्रकृतिविकाराभावात् साभ्यासस्यैकस्य करण-त्वात् दैक्षसवनीययोस्तु स्वापूर्वंप्रति करणत्वं भिन्नमिति युक्ता तत्र प्रकृतिविकृतिता ।

नन्वत्र भाष्यकारो विकृतित्वाभावमेवमुपपाद्य पुनरैन्द्राग्नग्रह इन्द्राग्निभ्यामुपलक्षणं शङ्कते—तदयुक्तम् । ऊहेनेन्द्राग्न्योरुपलक्षणत्वायो-गादित्याशंक्याह—इति स्थित इति । सत्यमूहान्नोपलक्षणम् । तथापि व्या-वृत्योपदेशादेव मन्त्रान्वयाशङ्का । यथा चतुर्भागकरणमाग्नेय एव न द्विदेवत्ये, तथा ऐन्द्रमन्त्रोऽप्यैन्द्र एव नैन्द्राग्न इत्याशंक्य वैषम्यमाह—तद्धितेति । युक्त-माग्नेये देवतातद्धितत्वेन निरपेक्षाग्नेः प्रतीतिः । इन्द्रे त्विन्द्रपीतशब्दः पीते मुख्यो लक्षणयोद्देशेन त्यक्तमाह—ततश्च इन्द्राग्न्युद्देशे प्रत्येकमुद्देश इत्यै-न्द्रोपि मन्त्र ऐन्द्राग्ने युक्त इति । राद्धान्त इति । इन्द्राग्न्योर्वस्तुतः पातृत्वा-भावात् इन्द्रपीत इतीन्द्रदेवतासंबन्धित्वम् । ततः किमित्यत्राह—तद्यदीति । यत्र मिलितस्य देवतात्वं न तत्रेन्द्रस्येति नेन्द्रपीतमन्त्रः ऐन्द्राग्ने ।

छन्दश्च देवतावत् ।

यदीन्द्रपीतस्येत्येकदेवत्ये तर्हि गायत्रछन्दस इति गायत्र्येव छन्दो यस्येति सोमविशेषणता । सा चान्यव्यावर्तकतयेति नानाछन्दसः सोमस्य गायत्रछन्दस इति निर्देशानर्हत्वात् न तत्र मन्त्र इति पूर्वपक्षाशङ्का निरस्यत

दयोगव्यावृत्त्या रथन्तरसामशब्दवत् गायत्र छन्दस इति निर्देशः। छन्दोयोगस्तु सोमस्य किं प्रकार इत्यनुपयोगान्नोक्तः

संप्रति मूलचिन्ता राद्धान्तः—इन्द्रेणपीतं अस्मिन् सवन इति सवनसामानाधिकरण्यं तेन सवनगतसर्वशेषोपलक्षणम्। इन्द्रपीतमिति भक्षणीये न समञ्जसम्। पीतमिति दत्तस्य गौणवादः। न च यद्दत्तं तद्भक्ष्यते। न च समुदायैकदेशः भक्षणकाले समुदायाभावात्। अतो जघन्यवृत्तिराश्रिता। कृत्वाचि-

---

इत्याह नानेति। कथं निरस्यत इत्यत्राह—तदेकेति। गायत्र्येकछन्दसः सोमस्याभावाद्रथन्तरसोमवदयोगव्यावृत्त्या गायत्रछन्दस इति निर्देश इति समन्त्रः॥

ननु कथं सोमयागस्य छन्दः सम्बन्ध इत्यत्राह—छन्दोयोगस्त्विति। स्वाङ्गस्तोत्रशस्त्रादिसाधनद्वारेति भावः। मूलचिन्ताराद्धान्तं वक्तुमुपक्रमते—सम्प्रति इति। सर्वत्र ऐन्द्राग्नैन्द्र भक्षे इन्द्रपीत इति इन्द्रेण पीतमस्मिन् सवन इति सवनसमानाधिकरणम्। तेन सवनगतसर्वशेषोपलक्षणमिन्द्रपीतमिति भक्षणीयपरमेवेत्यत्राह—इति भक्षणीय इति सर्वमन्त्रः॥

ननु बहुव्रीहेर्जघन्यतया तत्पुरुषेण इन्द्रपीतमिति भक्षणीयपरमेवेत्यत्राह—इति भक्षणीय इति। कथमित्यत्राह—पीतमिति। न च दत्त समुदायैकदेशो भक्ष्यः। भक्षणकाले समुदायाभावात्, अतो जघन्योऽपि बहुव्रीहिराश्रितः।

नन्वेतदधिकरणपूर्वपक्षावस्थायामेवातिदेशतो नैन्द्रेष्वपि मन्त्रसम्बन्धमङ्गीकृत्य अन्तरा चिन्ता प्रवृत्तेः, पूर्वपक्षेऽप्यनैन्द्रेषु मन्त्रसम्बन्धो राद्धान्तेपीति न प्रयोजनसिद्धिरित्यत्राह—कृत्वा चिन्तया चेति। कृत्वाचिन्तारूपान्तराचिन्ताभिर्यदूहान्वयत्वमुक्तं तद्व्यतिरेकतो राद्धान्ते विकृतित्वाभावसाधनेन कृत्वाचिन्तोद्घाटनादनूहेनाविकृतमन्त्रसम्बन्धोऽनैन्द्रेष्वस्तीति राद्धान्ते पृथक्प्रयोजनसिद्धिः। एवं तर्ह्यन्तराचिन्तानां प्रयोजनहानिः।

न्तया यदुक्तं तद्व्यतिरेकतो राद्धान्ते प्रयोजनप्रसिद्धिः । उदाहरणान्तरे राद्धान्त एवायं यत्रतत्र प्रयोजनम् ।

इति नयविवेके तृतीयाध्यायस्य द्वितीयः पादः

नयविवेके तृतीयाध्यायस्य तृतीयः पादः

श्रुतेर्जाताधिकारः स्यात् ।

गत पादद्वये द्वारशेषता श्रुतिलिङ्गाभ्यामुक्ता । इह तु वाक्यात् अधिकारविधावेव शेषताव्युत्पादनादवान्तरोपाधेः पादान्तरता । विधिशेषता च तदङ्गनिवेश निर्वाह्येति जघन्य-

---

एतद्राद्धान्तबलेन तथाननुष्ठानादित्यत्राह—उदाहरणान्तरेचेति । यत्र चोदाहरणान्तरे राद्धान्त एवायं व्यवस्थितस्तत्र प्रयोजनमस्त्वित्यर्थः ।।

इत्यात्रेय सगोत्रस्य श्रीसुदर्शनाचार्यशिष्यस्य श्रीरङ्गनाथ
सूनोर्वरदराजस्य कृतौ
नयविवेकदीपिकायां तृतीयाध्यायस्य द्वितीयः पादः ।।

श्रुतेर्जाताधिकारः स्यात्

ज्योतिष्टोमे "त्रयो वेदा असृज्यन्त । ऋग्वेदः" इत्युपक्रम्य "उच्चैर्ऋचा क्रियते उच्चैः साम्ना उपांशु यजुषा" इति श्रुतम् । तत्र चिन्ता किमुच्चैस्त्वादि वाक्यात् साक्षाद्विधिशेषः किं वा मन्त्रशेष इति ।

नन्ववान्तरार्थभेदोपाधेः पादभेदः । इह तु उच्चैस्त्वादेः पदद्वयश्रुतिरूपवाक्यशेषता । सा च श्रुतिपादे युक्ता स्फ्यादि चिन्तानन्तरमिति न पादभेदो युक्त इत्यत्राह—गतपादेति । गतपादद्वये श्रुतिलिङ्गाभ्यां द्वारशेषतोक्ता । इह तु साक्षादधिकारविधिशेषतैव वाक्यादुच्यते इत्यवान्तरार्थभेदात् पादान्तरता ।

नन्वेवं कथं जघन्यताऽस्य येन पादार्थद्वयपूर्वकता, प्रत्युत प्रधानतया विधिशेषतैव पूर्वमित्यत्राह—विधीति । विधिशेषतायाः श्रुतिलिङ्गाधीनविध्यङ्गनिवेशनिर्वाह्यत्वात् तस्यास्तत्पूर्वकता युक्तेत्यर्थः ।

तया पादद्वयार्थपूर्विका चिन्ता। सन्देहस्तु—किं यदृचा मन्त्रेण क्रियते तदुच्चैः उत यदृग्वेदेन क्रियते तदुच्चैः। ऋक्प्रायशाखा-धोतेन विधायकवाक्यरूपेण वेदेनाधिकारविधिरेव ज्ञेयतया क्रियत इति। अस्मिन् पक्षे वाक्याद्विधिधर्मः, शब्दोच्चारणप्रभेदतया तदङ्गशब्दे निविशते। पूर्वपक्षस्तु—ऋगादिशब्दानां मुख्यवृत्त्या मन्त्रार्थत्वात् मन्त्रधर्मता। वेदोपक्रमता च वाक्यस्याविरुद्धा। ऋगादेरपि वेदत्वात्। वेद्यतेऽनेनेति वेदशब्दः प्रयोगनियमाद-पौरुषेयग्रन्थविषयः। पङ्कजादिवत्। ऋगादावधिकारविधिवाक्ये-ऽपि मुख्यः। वित्तिकरणता तु विधायकवाक्यस्य अनपेक्षा मन्त्राणां विनियोगापेक्षेति भेदः। 'वसन्ताय कपिञ्जलान्' इति

ननु उच्चैर्ऋचेति ऋगन्वयप्रतीतेः कथं वेदधर्मतया सन्देह इत्यत्राह—सन्देहस्त्विति। ऋक्शब्दस्योभयत्र तुल्यत्वादित्यर्थः।

नन्वेवं भवतु यदृग्वेदेन क्रियते तदुच्चैः इति तथापि कथं विधिधर्म-त्वमस्मिन्पक्षे इत्यत्राह—सन्देहस्त्विति। ऋगिति। नन्वेवं विधायकवाक्य-रूपेणापि वेदेन साक्षादध्ययनमेव क्रियते। अत उच्चैस्त्वादि तद्धर्मः स्यात् न त्वधिकारधर्मः तस्य तेनानिष्पाद्यत्वात्। अथाध्ययने वेदस्यानीप्सित-कर्मत्वेन करणत्वाभावे ऋग्वेदेन यत्क्रियते तदुच्चैरित्येवं विधानमशक्य-मिति चेन्मैवम्।

अनीप्सितकर्मणोऽपि साधनत्वेन तृतीयानुवादः शक्यत एव। अन्यथा अधिकारविधौ विधायकवाक्यस्याकरणत्वात् तस्य विधानमशक्य-मेवेत्यत आह—अधिकारेति। विधायकवाक्यरूपेण वेदेनाधिकारविधिरेव ज्ञेयतया क्रियते नत्वध्ययनम्। तस्य स्वाध्यायसाध्यत्वेन ब्राह्मणवाक्य-मात्रसाध्यत्वाभावात्, अथैकदेशद्वारापि समुदायसाध्यमध्ययन मनूद्यता-मिति चेत् तर्हि उच्चैस्त्वादीनामध्ययनमात्रधर्मत्वं ऋक्प्रायशाखादिगत विधायकवाक्यसाध्याध्ययनधर्मत्वं वा ? आद्ये ऋगादिपदवैयर्थ्यम् द्वितीये उद्देश्य विशेषणविवक्षायां वाक्यभेदः। अथ तु विधिकर्मत्वेऽपि समान-

मन्त्रस्या नङ्गत्वान्न तद्धर्मता । विधिधर्मत्वे च तदङ्गशब्दे निवेशे नानाशाखास्थस्य विधेः शब्दरूपाङ्गे धर्मविकल्पः स्यात् ।

राद्धान्तस्तु—स्तुतिपदादपि वेदोपक्रमता वाक्यस्यानुरोध्या प्रथमशीस्थानुपमर्दात् तद्विशेषतया अर्थान्तरान्तर्भावात् तद्वाक्यार्थस्थितिर्युक्ता । न च वेदोपक्रमता मन्त्रस्यापि वेदत्वाद्युक्ता, वेद्यतेऽनेनेत्येवमपि वेदशब्दो निरपेक्षतयाऽधिकारविध्यर्थं वाक्यं प्रथममुपस्थापयति तदनुरोधादृगादिशब्दः ऋगादिप्रायशाखागतविधायकलक्षणापरः । लक्षणैवेह न्याय्या । यतो निरूढा चेयमित्युक्तं ग्रन्थे । एवञ्च साम्नोधर्मविधिः पृथग्युक्तः । अन्यथा ऋच उच्चैष्ट्वात् तदाश्रितत्वाच्च साम्नः उच्चैष्ट्वसिद्धेः

मेतदितिचेत् । सत्यम् । तथापि ऋक्प्रायशाखाधीतविधायकवाक्यानामपि वेदतया साधनत्वं अधिकारविधावेव, नत्वध्ययने, अतो वेदशब्दबलाद्वेद्यतया यत्साध्यं तद्धर्मत्वमेव युक्तम् । न त्वध्ययनधर्मत्वमिति भावः ।

नन्वेवमपि विधायकवाक्यरूपेण वेदनमेव साक्षात्क्रियत इति तद्धर्मत्वमेव स्यात् न तु वेद्यधर्मतेत्यत्राह—अस्मिन् पक्ष इति । उपक्रमवशादृगादिशब्दानां विधायकवाक्यरूपवेदोपलक्षणत्वमिति अस्मिन् पक्षे उच्चैर्ऋचा क्रियत इत्यादिवाक्यात् विधिधर्मः । अन्यथा साक्षात् वाक्यजन्यज्ञानस्य धर्मान्वयानर्हत्वात् वाक्यस्य व्यर्थत्वप्रसंगादिति भावः । नन्वधिकारविधेरपि उच्चैस्त्वमयोग्यमेवेति कथं विधीयत इत्यत्राह—शब्दोच्चारणेति ।—साक्षात्संबन्धायोग्यत्वेऽपि तदङ्गभूतशब्दद्वारा संबन्धो भविष्यति न त्वयोग्यतेत्यर्थः ।

ननु तथापि साक्षाद्विधिप्रतिपादकविधायकवाक्य एव किमिति न निवेशः यावता अङ्गमन्त्रादेः साक्षाद्विधिसंबन्धाभावादित्यत्राह—तदङ्गेति । उच्चैस्त्वादेरप्यङ्गत्वेन प्रयोगमध्य एवानुष्ठेयत्वात् अङ्गमन्त्रद्वारैव विधिसंबन्धो युक्त इति भावः । ननु ऋगादिशब्दानां मन्त्रवाचकत्वेऽप्युपक्रमानुरोधाद्वेदपरतैव युक्तम् । अन्यथा अश्वप्रतिग्रहे दातुरिष्टिर्न स्यादिति कथं

पृथक् विधिर्व्यर्थः। न चानृचिगाने प्रजापतेर्हृदये विधेरर्थवत्ता। मन्त्रधर्मत्वे हि ज्योतिष्टोमे निवेशः प्रकरणात्। न चात्र प्रजापतेर्हृदयाद्यस्ति। यस्त्वनेकवेदोक्तस्वरविकल्पः स च वचनबलाददोषः। नियमफलता च वेदत्रयानुक्तोदाहरणेऽस्तु न्यायव्युत्पत्तिरियं यतः। वाक्येन च प्रकरणबाधात् सर्वत्राधिकारविध्यर्थता। ननु यथा मन्त्रधर्मत्वे प्रकरणानुग्रहः तथा वेदधर्मत्वेपि युक्तः। तन्न, मन्त्रस्याङ्गत्वात् तद्गतो धर्मः प्रकरणिना गृह्यताम्। वेदधर्मत्वेपि अधिकारविध्युपलक्षिते तदङ्गमन्त्रे निवेशः। न चाधिकारविधिरङ्गमिति यावदधिकारविधिधर्मः।

पूर्वपक्ष इत्यत्राह—पूर्वेति। ननु वेदशब्देनाविशेषेण मन्त्रब्राह्मणप्रतीतेः मुख्यग्रहणे च पूर्वतनसकलप्रतीतिर्बाध्येत। अतः ऋक्पदस्यापि लक्षणया मन्त्रब्राह्मणपरत्वमेव युक्तमित्यत्राह—वेद्यतेऽनेनेति। वेदशब्दस्तु वेद्यतेऽनेनेति व्युत्पत्त्या योगादेवापौरुषेयग्रन्थे वर्तते। योगस्यान्यत्र सत्त्वेऽपि पङ्कजादिवत् प्रयोगनियमात्। अतो यौगिकशब्दस्य व्यक्तिवचनत्वात् ऋगादावधिकारविधिवाक्येऽपि प्रत्येकं वेदशब्दो मुख्यः। तथापि यौगिकशब्दस्य सन्निहितविषयत्वात् ऋक्शब्दोपस्थापितविषय एव वृत्तिः स्यात् न तु ब्राह्मणसकलविषय इत्यर्थः।

ननु यौगिकत्वेऽपि वेदशब्दात् निरपेक्ष वित्तिकरणतया शीघ्रं ब्राह्मणवाक्यमवगम्यते तथाचोपक्रमे ब्राह्मणप्रतीत्यनुरोधात् उपसंहारस्थ ऋगादिशब्दानामपि तत्रैव वृत्तिः स्यादित्यत्राह वित्तीति। वित्तिकरणत्वं वेदशब्दप्रवृत्तौ निमित्तं मन्त्र ब्राह्मणयोरविशिष्टमिति शब्दार्थत्वमिति न कोऽपि विशेषः। किन्तु तदेव निमित्तं मन्त्रस्य विनियोगापेक्षं विधायकस्य निरपेक्षमिति भेदस्त्वस्त्येव। स च व्युत्पन्नस्य शब्दादर्थबोधकालेऽनुपयोगीति भावः।

नन्वेवमपि उपक्रमोपसंहारयोरुभयोरनुग्रहाय वसन्ताय कपिञ्जलानित्यादि मन्त्रधर्मताऽस्त्वित्यत्राह—वसन्तायेति। यदृचामन्त्रेण क्रियते

अयं भावः अङ्गाश्रितस्य धर्मस्य परमकार्यान्वयार्थं ग्राहकग्रहणसन्निधानमात्रमाकाङ्क्षायायुक्तम् । यत्र तु वाक्यादेवाधिकारविध्यन्वितं न तत्र सन्निधानादाकाङ्क्षेति वाक्याद्यावदधिकारविध्यन्वय एव युक्तः। नन्वयमपि विध्यन्वयं वाक्यान्नार्हतीति, तदङ्गमन्त्राश्रितः प्रकरणिना ग्राह्योऽस्तु; तन्न, विधिमुद्दिश्यैवायं विधिः। अनुष्ठानं तु योग्याश्रये मन्त्रे। श्रीकरस्तु विधानेद्देशेहि विधेयावस्थाङ्गान्वयः। न च तदवस्थः प्रकरणिनोऽङ्गम्। अङ्गाश्रितं हि प्रकरणिना गृह्यते। मन्त्रधर्मत्वे तु विहितावस्थमन्त्राश्रिततेत्यङ्गाश्रितताामाह। तन्न विधेयावस्थस्य

इत्यनुष्ठेयमन्त्रविशेषप्रतीतेः कर्माङ्गमन्त्रतैव, तस्यैवानुष्ठेयत्वात्। तथा च वसन्तायेत्यादेरनङ्गत्वान्न तद्धर्मतेतिभावः। सिद्धान्ते चानेकशाखाप्रमितविध्यन्ताङ्गमन्त्रेषु स्वरविकल्पश्च स्यात्। तन्निवृत्तिश्चास्मिन् पक्षे लाभ इत्याह—विविध धर्मत्वे चेति।

नन्वर्थवादस्यान्यपरत्वात् विध्युद्देशस्य च स्वपरत्वादेव तस्माद् बलवान् इत्यर्थवादबाध एव युक्तः। तथा च कथं वेदोपक्रमानुरोधात् ऋगादिशब्दानां वेदपरत्वमिति राद्धान्तः तत्राह—राद्धान्तस्त्विति। उपक्रमस्थत्वेनार्थवादस्यैव विध्युद्देशाद्वलवत्त्वात् तदनुरोधेनैवोपसंहारवर्णनं युक्तमित्यर्थः। पौर्वापर्यन्यायविरोधं परिहरति- तद्विशेषेति। यत्र हि परस्परानुकूलकार्ययोः पौर्वापर्येण सन्निपातः तत्र स न्यायः। इह तु तद्विशेषतया पूर्ववेदशब्दात् यत् सामान्येन प्रतिपन्नं ब्राह्मणवाक्यं तद्विशेषतया तदनुकूलतयोपसंहारात् अर्थान्तरान्तर्भावात् पूर्वापरयोर्नविरोध इति न स न्याय इति भावः। वेदोपक्रमता च वाक्यस्याप्यविरुद्धेत्युक्तं परिहरति—न चेति। कथमित्यत्राह—वेद्यतेऽनेनेति।

ननु वेदशब्दस्य निरपेक्षतया अधिकारवाक्योपस्थापकत्वे ऋगादिशब्दानां कथमन्वय इत्यत्राह—तदनुरोधादिति। न च लक्षणैव दोष इति वाच्यम्। यस्मात्सैवेह न्याय्या, यतो निरूढा चेयमित्युक्तं ग्रन्थे। "अथ

विधिसंस्पर्शदशायां सुतरामङ्गत्वात्, न चाविहितमङ्गं भवतीति विधिसंस्पर्शो विवक्षितः। परोक्तं मन्त्र ब्राह्मणसमूहवाचित्वं वेदशब्दस्यायुक्तम्। वेद्यतेऽनेनेति व्युत्पत्त्या वाक्यानां समुदायिनां वाच्यत्वेऽपि समुदाये प्रयोगोपपत्तेः व्यर्थं वार्तिकं—

मन्त्र ब्राह्मणवाक्यानां समूहे काठकादिके।
वेदत्वं वर्तते नित्यमनेकक्रतुगामिनि॥ इति॥

समूहार्थत्वासिद्धेः नेत्थं सर्वक्रत्वर्थता।

यदपरं मन्त्रजातार्थत्वे ब्राह्मणेतरार्थता, तदप्ययुक्तम्। सूत्रे जातशब्देन प्राकरणिकमन्त्रार्थत्वस्योक्तेः। अतो व्यर्थं वार्तिकम्।

ऋग्भिः प्रात"रित्यादिलिङ्गदर्शनभाष्यव्याख्यानावसरे। किञ्च साम्नः पृथगुच्चैस्त्वविधानादपि विधिधर्मतैव। मन्त्रधर्मत्वे तु ऋगाश्रित त्वादेव तदुच्चैस्त्वसिद्धेः पृथग्विधिर्व्यर्थः। तथाह—एवं चेति। न च अनृगाश्रित प्रजापतेर्हृदयादिगाने पृथक् सिद्धेः [द्वये]। यतो मन्त्रधर्मत्वे प्रकरणेन ज्योतिष्टोमे निवेशः न च तत्र प्रजापतेर्हृदयाद्यस्ति। मन्त्रधर्मवाद्युक्तं विकल्पदोषं परिहरति—यस्त्विति। वेदद्वयविधिः समसङ्ख्याङ्गकविषयः इतरथा भूयस्त्वन्यायेनैकत्र विध्यापत्तेः। अथ विकल्पाङ्गीकारे स्वरनियमस्यविफलतेति चेन्न, यतो नियमफलता वेदत्रयानुक्तोदाहरणान्तरेऽस्तु न्यायव्युत्पत्तिपरत्वादस्य सर्वोदाहरणाव्यापित्वेप्यदोषः।

ननु वाक्यगत विध्यर्थमधिकारविध्यर्थत्वं प्रकरणाबाधायज्योतिष्टोम एव सङ्कोच्यतामित्यत्राह—वाक्येन चेति। यत्र वाक्यं द्वारसंबन्धपरं द्वारसंबन्धाय प्रकरणम पेक्षते तत्रैव वाक्यस्य प्रकरणेन सङ्कोचः। अत्र तु वाक्येनैव वारणपात्रवत् ग्राहकसंबन्धात् तत्स्वरसात् सर्वसंबन्धे प्रकरणबाध एव युक्त इत्यर्थः।

ननु जघन्यस्यापि प्रकरणस्य सर्वथा बाधपरिहाराय मन्त्रधर्मत्व इव वेदधर्मत्वेपि प्रकृतनियोगनिवेशो युक्त इति चोदयति—नन्विति। वेदधर्मत्वेपि

समूहास्त्वेकवाक्यानां ये पादपदपर्वणाम् ।
ऋग्यजुस्सामजातानि प्रत्येकं तेषु सन्ति नः ॥

निगदाधिकरणविरोधस्तत्रैव परिहृतः । शेषं सुगमम् ॥

गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः

याजुर्वैदिके प्रधाने सामवैदिकमङ्गमिति कृत्वाचिन्तेयम् । अतः उदाहरणाभावाद्भेदो [खेदो] न कार्यः । कतरवेदधर्मतेति विशेषचिन्तेयमवान्तरसङ्गता । पूर्वपक्षस्तु-सामवैदिकाङ्गविधिधर्म एवाङ्गे युक्तः । अङ्गविधिवाक्येनैव स्वार्थो ज्ञापितः । प्रयुक्त्यर्थमधिकारविधिवाक्येन निवेश्यते, ग्राहकेण च

प्रकरणानुग्रह एव युक्तः । पात्राणां तु सर्वथा प्रकरणेऽसंभवादुत्कर्ष एव युक्त इति भावः । यद्वा ज्योतिष्टोमस्य याजुर्वेदिकतया उच्चैस्त्वमसंभावितमेव । तस्य ऋग्वेदधर्मत्वात् । तथा च तस्य द्वादशोपसत्तावत् उत्कर्षे तत्समभिव्याहारात् उपांशुत्वमप्युत्कृष्येतेत्यत्राह—वेदधर्मत्वेऽपीति । ज्योतिष्टोमस्य याजुर्वैदिकतया उच्चैस्त्वमसंभावितमेव । तथात्वेऽपि तदङ्गभूतधर्मत्वेनापि प्रकरणानुग्रहो युक्त इत्यर्थः । मन्त्रधर्मत्वे अङ्गाश्रितत्वात् प्रकरणिना ग्रहणं युक्तम् अधिकारविधिधर्मत्वे तु तस्यानङ्गत्वात् तद्धर्मस्य प्रकरणग्रहणाभावात् सर्वार्थत्वमेव युक्तमिति परिहरति—तन्नेति । ननु यथा अङ्गगतो धर्मः प्रकरणिना गृह्यते तथा अधिकारविध्याश्रितोऽपि सन्निहिताधिकारविधिना गृह्यताम् । अथ ग्राहकग्रहणस्य द्वारान्वयनिर्वाह्यत्वात् तदभावे कथं तथात्वमिति चेन्न । अधिकारविधेरेव ग्राहकत्वे द्वारत्वे विरोधाभावादित्यत्राह—अयं भाव इति । साधनसंबन्धो हि धर्मः कार्यान्वयाकाङ्क्षीति सन्निधानात् प्रकृतग्राह्यो युक्तः । यत्तु वाक्यादधिकारविध्यन्वितं तस्य कार्यान्वयाकाङ्क्षाभावात् सन्निधानमप्रयोजकमित्यर्थः ।

ननु उच्चैस्त्वादेः साक्षादधिकारसंबन्धानर्हत्वात् वाक्यात् तदङ्गे विधिरस्तु तथा च प्रकरणिना ग्रहणं भविष्यतीति चोदयति—नन्विति ।

गृह्यते, विनियुज्यते च । अतः तन्निर्वाह्यत्वात् तद्विधिविधेयतो-च्यते । सन्निपातिनि सामगानेपि स्तुत्यपूर्वविधेयता न प्रधान विधिविधेयता । सप्तमाद्यादौ च यदुच्यते प्रथमं नाङ्गविधिरिति तदङ्गविधिरूपानिर्वाहाभिप्रायम् । विधिरूपनिर्वाहोऽपि अनुष्ठा-नाक्षेपात् । तदाक्षेपश्च अधिकारविधित एव, तदन्वयात् पूर्वमनु-वादाशङ्का । एतद्राद्धान्तसिद्धौ सप्तमाद्याद्युक्तगतिरियमेव ।

राद्धान्तस्तु-यद्यप्यङ्गविधिवाक्यं स्वार्थज्ञापनार्थं तथापि न तदङ्गताज्ञाने निमित्तता । किन्तु ग्राहकवाक्याधीना प्रयुक्तिरङ्ग-ताचेति [न] तदङ्गविधिवाक्येन क्रियते । अतः स्वविधेरसिद्धेः नाङ्गवेदधर्मः अङ्गे, याजुर्वैदिकप्रधानधर्म एव । एवं चाङ्ग-

---

तन्नेति । स्यादन्वयानर्हता यदि पश्चादप्यन्वयनिर्वाहो न स्यात् । इह तु वाक्यादधिकारविधिमुद्दिश्यैवायं विधिः सचाङ्गभूतमन्त्राश्रितानुष्ठानेन निर्वाहितः । अतो मन्त्र आश्रयमात्रम् न पूर्वं शेषितयाऽवगत इति नाङ्गा-र्थता उच्चैस्त्वादेः इदमभिहितम् । यद्यपि वेदशब्दस्य यौगिकतया व्यक्ति-वाचित्वेन आग्नेयीशब्दवत् सन्निहितव्यक्तिपरतया तदनुरोधेनोद्देश-कञ्चुका क्रियत इति । एतदपि सन्निहितपरता[यां] उद्दिश्य विधिवैयर्थ्या-पत्तेः । तथा स्फ्यश्चेतिवत् उपांशुत्व एव विधिः स्यात् । तथा सन्निहित-विधेर्याजुर्वैदिकतया उपांशुत्वमेव । तत्र निविष्टमुच्चैस्त्वं तु उत्क्रष्टव्यम् तत्समभिव्याहारादिति तदप्युत्क्रष्टव्यम् अन्यथा उद्देशैकदेशस्य वाक्यत्रया-नुषक्तस्य क्रियत इति पदस्य प्रकृतपरत्वाप्रकृतपरत्वाभ्यां वैरूप्यापत्तेः एतेन क्रियत इति पदस्य व्यक्तिवाचितयापि प्रकृतपरत्वं प्रत्युक्तम् । न च वेदेन साक्षात् क्रियमाणा अध्ययनार्थता, तस्य स्वाध्यायसाध्यत्वेन विधायक-वाक्यमात्रसाध्यत्वाभावात् ।

किञ्च तत्किमध्ययनमेकवेदविहितमनेकवेदविधिविहितं वा ? आद्ये धर्मान्तरान्वयानुपपत्तिः । द्वितीये सर्वदा विकल्पापत्तिः । विधि-

विधिरनिरूढः सम्रृतिप्रमोषसमत्वात् प्रथमं न धोस्थ इति सप्तमाद्यादौ व्यवहारः । सम्भूयोपकारार्थमपूर्वान्तिरमपि विधिरूपे कृतकरमित्यनुवादः । एवञ्च न सप्तमाद्युक्तेन पुनरुक्तिः । अङ्गवेदधर्मत्वासिद्धेः न 'अङ्ग गुणविरोधे च तादर्थ्यात्' इत्यनेन गतार्थता । श्रीकरेण उदाहरणं व्युत्पादितम्-आधानं यजुर्वेदे बह्वङ्गवदाम्नातम् । सामवेदे वारवन्तीयाद्यल्पाङ्गवदाम्नातम् । भूयस्त्वेनोभयश्रुतिनयात् यजुर्वेद आधानविधिः । अङ्गार्था सामवेदे तच्छ्रुतिरिति । तन्न । भाष्ये हि 'य एवं विद्वानग्निमाधत्ते 'इत्युदाहृतम् । न च तदाधानविधिपरम् । सम्भारविधिस्तुत्यर्थं हि तदुक्तम् । अतः क्त्वाचिन्ताऽत्र । यत्पुनः प्रतिपद-

---

वैयर्थ्यं च । अतो वाक्यबलात् प्रकरणं बाधित्वा सर्वाधिकारविधिनिवेश एव युक्त इति निरवद्यम् ।

श्रीकरस्त्विति । विधिर्विधानं प्रेरणमिति विधिमुद्दिश्य विधिः विधानोद्देशात् तदुपलक्षितमन्त्रान्वये विधेयावस्थ मन्त्राश्रितता । न च तदवस्थस्य प्रकरण्यङ्गता, विहितावस्थस्यैवाङ्गत्वादिति विधिधर्मपक्षे नाङ्गाश्रितता । अङ्गाश्रितस्य हि प्रकरणिग्राह्यता । मन्त्रधर्मत्वे तु विहितावस्थमन्त्राश्रिततेति युक्ता प्रकरणिग्राह्यतेति ।

तन्नेति । न हि विहितत्वमङ्गत्वे हेतुः किन्तु विधिस्पर्शः । स च विधेयावस्थस्य सुतरामस्तीति तदवस्थस्याप्यङ्गता । न चाविहितमङ्गमित्यत्रापि भूतार्थो न विवक्षित इति । किन्तु विधिस्पर्श एव । अतः पूर्वोक्तैव विधेत्यर्थः ।

अत्राचार्यपादैरुच्चैस्त्वादेः सर्वक्रत्वन्वयार्थं वेदशब्दस्य मन्त्रब्राह्मणसमहवाचित्वमुक्तम् । वेदमधीते इत्यादौ लोके समूह एवप्रयोगात् । समुदायेनैव सर्वक्रतूनां प्रतिपाद्यत्वादिति तदयुक्तमित्याह—परोक्तमिति । वेद्यते

विधानं वेदधर्मतया तत्प्राप्तमेव यदि तदा परिसंख्यार्थं वचनम् । अथ स्वरान्तरार्थं तदा तत्पदवदाहवनीयस्य बाधकं वेदधर्मस्य सामान्यप्राप्तस्येत्युक्तं विवरणे ।

भूयस्त्वेनोभयश्रुति ।

स्थिते प्रधानविधिस्वरेऽनेकवेदे प्रधानाम्नाने, क्व तद्विधिरिति चिन्तेयं स्वरनियमार्थेति सङ्गतिद्वयम् ।

अनेनेति व्युत्पत्त्या वित्तिकरणतया एकैकवाक्यस्यैव वेदता । न समुदायस्येत्युक्तेर्नेत्थं सर्वक्रत्वर्थता । किन्तु पूर्वोक्तविधयैवेति ।

यदपरं तैरेव पूर्वपक्षे ब्राह्मणेतरसर्वमन्त्रार्थता सूत्रस्थ जातशब्देन जातिवाचिनापि प्रवृत्तिनिमित्तसामर्थ्यात् पादबद्धऋगादिमन्त्रपरेण प्राकरणिकमन्त्रजातस्योक्तेः ।

नन्वत्रोच्चैस्त्वादेः विधिधर्मत्वमुच्यते । निगदाधिकरणे तु मन्त्रधर्मतेति विरोध इत्यत्राह - निगदेति । वेदोपक्रमवाक्याद्वाक्यान्तरतया विरोधपरिहारस्तत्रैवोक्त इत्यर्थः ।

नन्वेवं किमस्याश्चिन्तायाः प्रयोजनम् । अथ विधिधर्मत्वे वेदद्वयोक्तविधौ तदीयमन्त्रे धर्मविकल्पः मन्त्रधर्मत्वे नेति चेन्न । अङ्गभूयस्त्वं यत्र तत्र भूयस्त्वनयेन प्रयोग विध्यवगतेस्तद्धर्मतया विकल्पायोगात् अथ समसङ्ख्याङ्गविषये उभयत्र विधिः शाखान्तरनयादेकत्वाद्विकल्प इति चेत् । तथापि निगदनयोक्तवाक्यान्तरे ऋगादिषु धर्मव्यवस्थासिद्धेः अथैवं वेदोपक्रमवाक्यानां व्यर्थतेतिचेन्न, अधिकारसंबन्धापादकत्वात् तेषां, इतरेषामाश्रयान्वयपरत्वात् । अधिकारान्वयोऽपि तद्वाक्यैरेव सिद्ध इति चेन्न। उभयपरत्वे गौरवापत्तेः । अथ विधेय सामर्थ्यादेवाश्रयान्वयसिद्धिरिति चेत् तर्हि धर्मविशेषाणामाश्रयविशेषान्वयपराणि इतरवाक्यानि भवन्तु ।

अत्र ब्रूमः—किमितरवाक्यानि आरभ्याधीतानि अनारभ्याधीतानि वा ? आद्ये विधिविशेषमारभ्योक्तौ विध्यन्तरे वेदद्वयोक्ते धर्मविकल्पो दुर्वारः । अनारभ्यवादे तु ऋगादिद्वारा उपदेशत एव ऋगादिमदपूर्वार्थता,

पूर्वपक्षस्तु-यजुस्सामवेदयोः साधिकारज्योतिष्टोमश्रुतेरुभयत्र तद्विधिः। शाखान्तरनयादेकतेति स्वरविकल्पः।

राद्धान्तस्तु—यजुर्वेदे बह्वङ्गवच्छ्रुतेः तत्रैव तद्विधिः। अङ्ग बहुत्वे हि कृत्स्नप्रयोगे प्रमेयधीः प्रमेयाच्च प्रमाणे प्रयोगविधिरूपे धीः। अयं भावः साधनभूते साङ्गप्रधाने विधेः प्रयुक्तिः। सा प्रयोज्यनिरूप्या। ज्ञानमिव ज्ञेयनिरूप्यम्। अतः

न पुनरतिदेशतः। उपदेश उपदेशमुपोद्वलयतीति न्यायात्। तथा च यत्रोपदेशतः ऋगादिसंबन्धो नास्ति तत्र वेदद्वयोक्ते उपदिष्टेनातिदिष्टबाधो धर्मविकल्पः। अपूर्वार्थता तु यत्र नयविकल्पस्तत्र। अथवा मन्त्रधर्मत्वे ऊहप्रवरनामधेयेषु न स्वरः, विधिधर्मत्वे तु स्वरसत्तेति रहस्यम्। ऋग्भिः प्रातः' इत्यादि लिङ्गदर्शनव्याख्या दीपशिखायामेव सुगमेत्याह—शेषमिति।

गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः

अत्र भाष्यकारः "य एवं विद्वानग्निमाधत्त" इति यजुर्वेदे आधानमाम्नातम् "य एवं विद्वान् वारवन्तीयं गायति" इति सामवेदे आधानाङ्गं वारवन्तीयमाम्नातमिति विषयमुक्त्वा किमङ्गे अङ्गवेदधर्मः उतप्रधानवेदधर्म इति विचारयति। तदनुपपन्नम्। संभारविधिस्तुत्यर्थस्य विद्वद्वाक्यस्य उपादानविधिपरत्वायोगात्। तथा वारवन्तीयस्याधानाङ्गता तत्सन्निधिश्रवणात्। तत्र तयोरेकवेदवेद्यत्वे तत्कथमङ्गप्रधानत्वयोर्भिन्नवेदवेद्यतोक्तिः। अतः उदाहरणाभावात् चिन्तैवायुक्तेत्याशंक्य कृत्वाचिन्तया विषयमाह—याजुर्वेदिक इति। उक्ते वेदधर्मत्वे तद्विशेषचिन्तेत्यवान्तरसङ्गतिमाह— कतरवेदेति। ननु प्रधानविधेरेव विधायकत्वात् तद्धर्मेणैवाङ्गेष्वपि भवितव्यम्। तत्कथं पूर्वपक्ष इत्यत्राह—पूर्वपक्ष इति। अङ्गविधिवाक्येनैवाङ्गानां विहितत्वात् तद्धर्मतैव। तेषामज्ञातज्ञापनं हि विधिः। तच्चाङ्गस्वरूपं स्ववाक्येनैव ज्ञापितमिति तेनैव तद्विधिः। कथं तर्हि तत्र

साङ्गप्रधाने प्रयोगधीः । अल्पाङ्गहीनेऽप्यङ्गग्रामे प्रयोगधीः । अल्पतरुहीने वन इव तद्वनधीः । विधिप्रयोज्यतापर्यन्तैवाङ्गानां प्रमेयता । प्रमेयता परं च तदाम्नातमिति । अङ्गबहुत्वे तत्प्रमाणभूतप्रयोगविधिः प्रयोगविध्यपेक्षातारतम्यात् तदवगमकशब्दात्तद्धीः । एवञ्च धीहेतु तुल्यतामात्रात् राजचिन्हादिव राजधीरिति दर्शितं भाष्ये ।

प्रधानविधिविधेयतोक्तिरिति चेत् अङ्गविधिविधेयस्यापि तस्य निरधिकारतया प्रयुक्त्यर्थमधिकारविधावनुप्रवेशः, साधिकारविधेरेव ग्राहकत्वविनियोजकत्वप्रयोजकत्वरूपत्वात् । अतः प्रयोजकत्वनिर्वाहः प्रधानविध्यधीन इदि तद्विधिविधेयतोक्तिः । अथ गुणकर्मणि सामगाने विध्यभावान्न तद्विधिविधेयतेति चेन्न, अन्तरङ्गस्याङ्गापूर्वस्य विधायकस्य संभवान्न बहिरङ्गप्रधानविधिविधेयता ।

ननु सप्तमाद्यादौ प्रथममङ्गविधिधीरेव नास्तीत्युक्तेः कथमङ्गविधिविधेयतेत्याशङ्क्य तदुक्तिनिर्वाहमाह—सप्तमेति । किमेतदेव सम्यगित्याशङ्क्य ग्रन्थकारोभूत्वा आह—एतद्राद्धान्तेति । राद्धान्तस्त्विति । यद्यपि अङ्गविधिवाक्यं स्वार्थज्ञापनार्थं तद्व्यतिरेकेणाङ्गस्वरूपाप्रतीतेः अङ्गवाक्यस्याप्यङ्गरूपार्थज्ञाने निमित्तत्वात् । तथापि ज्ञातस्वरूपस्य तस्याङ्गत्वमनुष्ठानं च साधिकारग्राहकवाक्याधीनमिति नाङ्गवाक्येन क्रियते । तदनुष्ठानमङ्गत्वज्ञानं च यत्र वेदे क्रियते तद्धर्मतैव स्वरस्येति नाङ्गवेदधर्मोऽङ्गं किन्तु याजुर्वैदिकप्रधानधर्म एव । एवं च सप्तमाद्यादिव्याहारोपपत्तिरपीत्याह—एवं चेति । नन्वपूर्ववाचकस्य सविषयकलिङ्शब्दस्य विद्यमानत्वात् प्रथमत एवापूर्वान्तिरधीः । कथमनुवादतेत्यत्राह—संभूयेति । वाचकशब्दसद्भावेऽपि प्रथममनुवादशङ्काकुण्ठितशक्तिकतया प्रथमं न धीस्थम् संभूयोपकारार्थं पश्चादुपादानेनापादितमपूर्वान्तिरमप्यधिकारविधिविधानोत्तरकालं स्ववाचकबाधितम् विधिरूपे कृतकरमित्यनुवाद उक्तः ।

विवरणे तु-कर्तव्यतारूपो हि विधिरनुष्ठान हेतुस्त्रभावोऽनुष्ठेयनिरूप्य इति, कर्तव्यतापर्यन्ततया [ता च] ऽनुष्ठेयबाहुल्यात् इतिकर्तव्यताधीतो व्यक्ता कर्तव्यताधीः अङ्गाल्पत्वे तु कर्तव्यतोन्नयनं न स्यात्, किञ्चित्साम्यात् बह्ववयवावगम इवावयवी प्रत्यक्षः। अल्पावगमेचानुमेय इव इति दर्शितम्। एवञ्च यथाभाष्यं राद्धान्तभङ्गोऽपि परोक्तो निरस्तः।

नन्वेवं विधार्थस्य सप्तमाद्येप्युक्तत्वात् पौनरुक्त्यमित्यत्राह—एवं चेति। तत्र ग्राहकग्रहणं नास्तीति पूर्वपक्षिते प्रयोजनप्रयोजनिभावेनान्वयरूपं ग्राहकग्रहणमस्तीति राद्धान्तितम्। अत्र तु अङ्गतया विहितस्य पश्चात् तन्निर्वाहाय ग्राहकान्वय इतिशङ्किते स्वरूपमात्रस्य प्रथमं ग्राहकान्वये पश्चात् तदधीनमङ्गत्वं विधित्वं चेति राद्धान्त इत्यपौनरुक्त्यमित्यर्थः।

नन्वेवमङ्गगुणत्यागेन प्रधानगुणस्वीकारे अङ्गगुणनयगतार्थतेत्याशङ्क्य अङ्गधर्मत्वासिद्धेर्न गतार्थतेत्याह—अङ्गेति।

श्रीकरस्तु आधानं यजुर्वेदे बह्वङ्गवदाम्नातं सामवेदे तु अल्पाङ्गवत्। तत्र च भूयस्त्वनयात् यजुर्वेदे तद्विधिः। सामवेदे त्वङ्गार्थं तच्छ्रुतिरिति व्युत्पादितवान्। तद्दूषयति—तन्नेति। भाष्योदाहृत विद्वद्वाक्यस्य संभारविधिस्तुत्यर्थतया आधानविधित्वायोगात् यजुर्वेदे बह्वङ्गकमाधानं सामवेदे त्वल्पाङ्गकमिति कल्पनाप्यप्रामाणिकैव। अतः कृत्वाचिन्तैव पूर्वोक्ता गतिः।

नन्वेवं यदि प्रधानविधिधर्मोऽङ्गे कथं तर्हि उपसदादिषु स्वरविशेष इत्याशंक्य विवरणोक्तं विशेषमाह—यत्पुनरिति। यत्पुनः उपांशूपसत्सु इत्याद्यङ्गविषयं प्रतिपदं विधानं तद्यदि वेदधर्मतया प्राप्तमेव स्वरमङ्गसंबन्धितया विधत्ते स्वरान्तरं वा? आद्ये परिसंख्यार्थं तस्मिन्नेवाङ्गेनाङ्गान्तरेष्विति। द्वितीये यथा पदे जुहोतीति पदं सामान्यप्राप्तस्याहवनीयस्यबाधकम्। तथैतदपि वेदधर्मस्येत्यर्थः।

तदाह—यद्यस्य गमकत्वेन स्वशक्तेरवधारितम् ।
तदल्पं बहुवा तस्य प्रतीतौ न विशिष्यते ।।
नैव हीहाङ्गभूयस्त्वमितिकर्तव्यता मता ।
किं तर्ह्यङ्गं यदेवाहुरितिकर्तव्यतापि सा ।।

उक्तरीत्या प्रत्युक्तेः ।

भूयस्त्वेनोभयश्रुति

साधिकारो ज्योतिष्टोमो यजुर्वेदे बह्वङ्गकः श्रुतः । सामवेदे अल्पाङ्गकः । तत्र चिन्ता—किमुभयधर्मता ज्योतिष्टोमस्य उत याजुर्वैदिक धर्मतेति , तदर्थमियं चिन्ता । किमुभयत्र तद्विधिः किं वा यजुर्वेद एवेति । तत्राध्यायसङ्गतिमवान्तरसंगतिं चाह—स्थित इति । ननु यत्राङ्गबहुत्वं तत्र कर्तव्यताधीः स्फुटेति यजुर्वेद एव तद्विधिर्युक्त इति कथं पूर्वपक्ष इत्यत्राह—पूर्वपक्षस्त्विति । न ह्यङ्गभूयस्त्वं कर्तव्यावगतिहेतुः किन्तु साधिकारश्रुतिरेव, सा चोभयत्राविशिष्टेत्युभयत्रापि वेदे ज्योतिष्टोमविधिः । नन्वभ्यासविधिनयात् कर्मभेदे कथं ग्रन्थे स्वरविकल्पोक्तिरित्यत्राह—शाखान्तरेति ।

राद्धान्तस्त्विति । यत्र यजुर्वेदे बह्वङ्गवतो ज्योतिष्टोमस्य श्रुतिस्तत्रैव तद्विधिरिति तद्वेदधर्मतैव तस्य । ननु साधिकार श्रुतित्वं कर्मविधित्वहेतुः तच्चाङ्गबहुत्वे अल्पत्वे चाविशिष्टमिति कुतो नोभयत्र तद्विधिरित्यत्राह—भङ्गेति । अनुष्ठान पर्यन्तस्वभावं हि विधित्वम् । तच्च प्रयोगविधि रूपतया । सा च प्रमाणरूपा प्रमेयाधीना प्रमेयं च दृष्टादृष्टोभयविधेतिकर्तव्यतानिरूप्यप्रयोग इत्यङ्गबहुत्व एव कृत्स्नप्रयोगे प्रमेयधीः । ततः प्रमाणे प्रयोगविधिरूपे धीः इति यत्र प्रयोगविधिज्ञानं तद्धर्मतैव । प्रयोगविधिधर्मत्वादुच्चैस्त्वादेः ।

नन्वनुष्ठानपर्यन्तविधेः अनुष्ठेयसत्तामात्रमपेक्षितम् न तद्भूयस्त्वमपि । अन्यथा सन्निपातिमात्राङ्गकस्याग्निहोत्रविधेः प्रयोगविधिता न स्यात् ।

असंयुक्तप्रकरणादितिकर्तव्यतार्थित्वात् ॥

श्रुतिलिङ्गवाक्याधीने शेषत्व उक्ते ततो जघन्य प्रकरणाधीनंऽवान्तरसङ्गतम् । प्रश्नश्चैवम्—यदि श्रुतिलिङ्गवाक्यासंयुक्ते प्रकरणं तर्हि नैतत् एतावन्त्येव प्रमाणानि इति । किंशब्दश्चाक्षेपे, श्रुतेरेव प्रयाजादेरपि शेषता सिद्धेः । अधिकारनियोगेन प्रयाजाद्याग्नेयाद्यन्वय इति चतुर्थे स्थास्यति । अतः 'समिधो यजति' इत्येवमादिभिः करणोपकारकावस्थैः

दृष्टादृष्टोभयविधेतिकर्तव्यताभूयस्त्वाभावात् इयत्तया भूयस्त्वमित्यज्ञानाच्च शाखान्तरीयाङ्गाभावे अङ्गसाकल्यानवगमात् । किञ्च साधिकारकत्वादेव उभयत्र युगपद्विधिधीः । यथाविधानं चोत्तरकालमनुष्ठानमिति साधिकारतैव प्रयोगनिरूपिकेति निरूपकसाधिकारता सद्भावात् उभयत्र निरूप्यप्रयोगधीरिति तदधीनप्रयोगविधिबुद्धेरुभयधर्मतैव युक्तेति कथं राद्धान्त इत्यत्राह—अयं भाव इति । अस्यार्थः— साधनविषयिणी हि प्रयोगविधेः प्रयुक्तिः । साधनं च साङ्गप्रधानम् । अङ्ता च लोके दृष्टादृष्टोभयविधस्य दृष्टेति यत्राङ्गसाकल्यं तत्रैव प्रयुक्तिः । अग्निहोत्रादौ तु एककोटिरेव श्रुतेः । कोट्यन्तरस्योपदेशतो निदेशतश्चासंभवादेककोटि युक्तेपि प्रधाने प्रयुक्तिः । इहतु न तथा । एक शाखायां उभयविधस्यापि श्रुतेः । तत्र यद्यपि साधिकारताऽपि प्रयुक्तौ हेतुः । अथापि सा प्रयोज्यनिरूप्या, ज्ञानमिव ज्ञेयनिरूप्यम् । (तथो) अतो यत्र त्वङ्गसाकल्यं तत्रैव साङ्गप्रधाने प्रयुक्तिधीः । न च शाखान्तरोक्तालपाङ्गहीने नाङ्गसाकल्यमिति वाच्यम् । यतोऽल्पाङ्गहीनेऽपि अङ्गग्रामे प्रयोगधीः । अल्पतरुहीने वन इव तद्वनधीः । न चोभयत्र साधिकारतया युगपद्विधिरिति यथाविधानं तदुत्तरकालीना प्रयुक्तिरप्युभयत्रेति वाच्यम् । यतो विधिप्रयोज्यपर्यन्तैवाङ्गानां प्रमेयता विनियोज्यता । प्रमेयतापरं च तदाम्नानमिति प्रयोज्यतया प्रमेयभूताङ्गबहुत्वे धीतः प्रमाणभूतप्रयोगविधिधीः । विपरीतं न कुत इति चेत् ।

परमापूर्वमन्वितमभिधीयत इति श्रौतीयं शेषता न प्रकरणात् । एवं च तद्भूताधिकरणोक्तार्थ एवान्वयोऽन्विताभिधायिभिः शब्दैः सर्वत्र बोध्यत इति स्थितम् । प्रकरणात्तु वाक्यार्थानां प्रयाजाद्यङ्गापूर्वाणां परमापूर्वेण वाक्यार्थेनान्वयः स्यात् पदपदार्थविभागादन्विताभिधानव्युत्पत्तिरित्यशाब्दं प्राकरणिकं स्यात् । स्ववाक्योपात्तकरणावरुद्धे परमापूर्वे प्रकरणान्तरेणान्वयानुपपत्तेः,

---

प्रयोगविध्यपेक्षातारतम्यात् यत्र प्रयोज्यबाहुल्यं तत्र प्रयोगविध्यपेक्षा चोत्कटा । ततो बह्वङ्गे उत्कटापेक्षायां प्रथमभाविन्यां प्रयुक्तौ कल्पितायां शाखान्तरीयाल्पाङ्गानां तत्रानुप्रवेशकल्पने वा न त्वन्या प्रयुक्तिः कल्प्या । प्रयुक्तिकल्पनातः अनुप्रवेशकल्पनाया लघीयस्त्वात् । अतः अङ्गबाहुल्यात् प्रयोगविधिधीः । न च लिङादिशब्दादेव प्रयोगविधिरूपस्यापूर्वस्य धीर्वाच्या, नाङ्गबाहुल्यादिति वाच्यम् । यतोऽङ्गबाहुल्योपबृंहिततदवगमकसाधिकारलिङादिशब्दादेव तद्धीः न केवलाङ्गबाहुल्यादित्यर्थः ।

नन्वत्र भाष्ये व्यजनादि राजचिन्हदृष्टान्तत्वेनोक्तं बाहुल्यविषये तदनुपपन्नम् । न च राजचिन्हादिभूयस्त्वेन राजधीहेतुः किन्तु अव्यभिचारादित्यत्राह—एवं चेति । न सर्वथा साम्यादिति भावः । विवरणे त्विति । कर्तव्यतारूपो हि विधिरनुष्ठानपर्यन्तस्वभावोऽनुष्ठेयनिरूप्यः अनुष्ठेयनिरूप्यस्येतिकर्तव्यताधीरुन्नेयेति यत्र स्फुटविधिधीः तद्धर्मतेत्यर्थः ।

नन्वत्र दीपशिखायां बह्ववयवावगमे अवयवी प्रत्यक्षः अल्पावयवावगमेऽनुमेय इति निदर्शनमुक्तम् । तदयुक्तं, प्रमाणान्तरानवतारादस्मिन् विषये इत्याशङ्क्य स्फुटत्वास्फुटत्वसाम्यान्निदर्शनमित्याह—किञ्चिदिति । विवरणे निबन्धनोक्तरीत्या राद्धान्तस्य स्फुटत्वात् भाष्यादापाततः प्रतीतिमङ्गीकृत्य परोक्त राद्धान्तभङ्गो न युक्त इत्याह—एवं चेति ।

असंयुक्तं प्रकरणादितिकर्तव्यतार्थित्वात्

दर्शपूर्णमासयोरसंयुक्तः प्रयाजादयः समिधो यजतीत्यादयः श्रुताः । तत्र चिन्ता—किं प्रयाजादीनां श्रुत्या शेषता ? किं वा प्रकरणेनेति ।

करणोपकारकतयैवान्वयाच्छ्रौतोऽन्वय इति पूर्वः पक्षः ।

राद्धान्तस्तु-प्रथमं सामान्येनापूर्वेदमर्थ्यमात्रेणान्वयसंभवात् न करणोपकारकतया विशेषान्वय इति विशेषान्वयार्थं मानान्तरं प्रकरणमुपेयम् ।

अयमत्र पूर्वोत्तरपक्षनिर्यासः या सप्तमाद्ये ग्राहकव्युत्पत्तिः सा फलवत्सन्निधावित्यत्र चतुर्थे संव्यवहारार्थमुक्ता । सा चेदृशी । अधिकारवाक्यस्थ लिङ्शब्दः सन्निहित निरधिकारान्वितं स्वार्थं-

---

तत्रावान्तरसङ्गतिमाह –श्रुतीति । मन्त्राणां लिङ्गविनियोगोवत्यैवानुष्ठेयार्थ-समर्पकपदसमभिव्याहृतपदानां समभिव्याहारात्मकवाक्यविनियोगोऽप्य-र्थादुक्त एवेति तदुक्ततोक्तिः । एतच्च लिङ्गवाक्याधिकरणे वक्ष्यते । अत्र भाष्ये किमेतावन्त्येव प्रमाणानीति प्रश्न उक्तः सोऽयुक्तः उत्तराननुगुण-त्वात् । असंयुक्तं प्रकरणाद्विनियुज्यत इत्युत्तरे केन विनियुज्यत इति प्रश्नेन भाव्यम् । अथ प्रकरणप्रमाणाक्षेपाभिप्रायः तथाप्ययुक्तः । किमेता-वन्त्येव प्रमाणानीत्याक्षेपपरे प्रमाणानि एतावन्त्येव न भवन्ति इत्यर्थः स्यात् । ततश्चान्यप्रमाणाभ्युपगुमप्रतीतेः प्रकरणप्रमाणाक्षेपो न स्यात् तत्राह—प्रश्न इति । यदि ते सिद्धान्तः स्यात् असंयुक्तं प्रकरणादिति वदतः श्रुत्याद्यसंयुक्ते प्रकरणं विनियोजकमिति तर्हि तन्न संभवति यतः एताव-न्त्येव त्रीण्येव श्रुत्यादीनि प्रमाणानि सर्वत्र शेषताविषये । एवं च किमेताव-तीति प्रश्नभाष्ये किमिति ग्रन्थच्छेदः किमाक्षेपे तदाह—किं शब्दश्चाक्षेप इति । कथं पुनस्तदसंभव इत्यत्राह—श्रुतेरिति । ननु श्रुतेरेव कथं प्रयाजा-देरपि शेषता सिद्धिः इत्यत्राह—अधिकारेति । फलवत्सन्निधावफलं तदङ्ग-मित्यत्र सन्निधिसमाम्नातानां प्रयाजाद्याग्नेयादीनां सर्वेषां युगपदधिकार विधिनान्वयः स्थास्यति । ततः किं ? इदं ततः स चान्विताभिधानं अफलं तदङ्गमित्यत्र स चान्विताभिधानरूप इति समिधो यजतीत्यादिभिः सन्निहितैः करणोपकारकावस्थैः परमापूर्वमन्वितमभिधेयमिति श्रुतिगम्यैव करणोपकारकतया प्रयाजादिशेषता न प्रकरणगम्या ।

माहेति श्रौतोऽयमन्वयः। अत्रत्यस्तु पूर्वपक्षी ब्रूते-ग्राहकान्वयोऽपि योग्यस्यैव। करणावरुद्धे च योग्यता करणोपकारकतयैवेति तथैवान्वयः; न त्वनिर्धारितविशेषणैदमर्थ्यमात्रेणान्वययोग्यतापि। ऐदमर्थ्यमात्रेणचान्वये प्रकरणादप्यन्वयः करणोपकारकतया न स्यात् वाक्यार्थयोरन्वयाव्युत्पत्तेः। अयं भावः—कर्तव्यस्य हीतिकर्तव्यताकाङ्क्षयाऽन्वयः प्रकरणादिष्यते। कर्तव्यं च करणान्वितं सत् इतिकर्तव्यतापेक्षम्। तेन सकरणकर्तव्यतावस्थातो

एवं चायं लाभ इत्याह—एवं चेति। तद्भूताधिकरणे हि अन्विताभिधायिभिः शब्दैः अन्वयं विनाऽन्वितमभिधातुमशक्तैः अन्वयमन्तर्भाव्यैवान्वितमभिधेयं इत्यर्थादन्वयस्यापि पदावगम्यत्वमुक्तम् तत् प्रयाजादीनां नियोगेन सह करणोपकारकतयैवान्विताभिधाने स्थितं भवतीत्यर्थः।

विपक्षे दोषमाह—प्रकरणात्त्विवति। प्रकरणात् प्रयाजादीनां करणोपकारकतयाऽन्वये वाक्यार्थीभूतानां प्रयाजाद्यपूर्वाणां वाक्यार्थेन परमापूर्वेणान्वयः स्यात्। ततश्च तदन्वयस्य शब्दगम्यता न स्यात् यतः पदपदार्थविभागादन्विताभिधानव्युत्पत्तिः, पदं हि पदार्थान्तरेणान्वितं स्वार्थमभिधत्त इति व्युत्पत्तिः, न वाक्यं वाक्यार्थान्तरेण। अतः प्राकरणिक शेषतयाऽन्वयः शाब्दो न स्यात्।

ननु प्रयाजादीनां नियोगेन सह किमिति प्रथमत एव करणोपकारकतयैवान्वयः यावता एदमर्थ्यमात्रेण प्रथममन्वयोऽस्तु पश्चात् प्रकरणेन करणोपकारकतयाऽन्वय इत्यत्राह—स्ववाक्येति। अन्वयस्य हि आकाङ्क्षादित्रयं कारणम्। तत्र स्ववाक्योपात्तकरणावरुद्धे प्रकारान्तरेणान्वयानुपपत्तेः करणोपकारकतयैवान्वययोग्यता। अतस्तेनैवाकारेण नियोगे प्रथममेवान्वयात् श्रौतोऽयमन्वय इति पूर्वपक्ष इत्यर्थः।

राद्धान्तस्त्विवति। प्रयाजादीनां प्रथममधिकारविधिना सहैदमर्थ्यमात्रेण सामान्येनान्वयसंभवात् न करणोपकारकतया विशेषान्वय इति तदर्थं प्रकरणं प्रमाणमभ्युपेयमित्यर्थः।

भिन्नेतिकर्तव्यतावस्थामाश्रित्यायमन्वयो वाच्यः। एवञ्चान्तरा विरम्य व्यापारादवान्तरवाक्यार्थावस्थयोर्भिन्नस्वस्वविधिविधेययोः परमाङ्गापूर्वयोरन्वयो वाच्यः। वाक्यार्थान्वयश्च व्युत्पत्तिहीनः।

राद्धान्तस्तु—यत एव करणोपकारकतयाऽन्वये वाक्यार्थयोरयमन्वयः स्यात् अत एवैदमर्थ्यमात्रेण सन्निहिताग्नेयादेः

नन्विमौ पूर्वोत्तरपक्षावनुपपन्नौ प्रयाजादीनां करणोकपारकतयाऽन्वयः श्रौत एवेति हि पूर्वपक्षः। स तावदनुपपन्नः तथा विनियोजक वाक्याभावात्। न चाधिकारश्रुतेस्तत्प्रतीतिः, अधिकारश्रुतिरिति किं विवक्षितं किं लिङ्पदमुत यजिपदं उत स्वर्गकामपदं आहोस्वित् समुदायः ? अथवा उपादानम्। नाद्यः कार्यपरत्वात्तस्य। न द्वितीयः, विषयपरत्वात्। न तृतीयः, नियोज्यसमर्पणपरत्वात्, न चतुर्थः, स विषयनियोज्यककार्यपरत्वात्। न पञ्चमः अन्वयद्वयपूर्वकत्वात् औपादानिककरणैदमर्थ्यस्य। तस्मात् करणोपकारकतयाऽन्वयस्य न श्रौतता। तथा राद्धान्ते सामान्येनदमर्थ्यमात्रेणान्वयसंभवादित्युक्तम्। तदप्ययुक्तम्। लोके गामानयेत्यादौ विशेषेणैवान्विताभिधानव्युत्पत्तेः। तथा फलवत्सन्निधावित्यत्र ग्राहकव्युत्पत्तिः स्थास्यतीत्युक्तम्। तदपि न। सप्तमाद्य एव व्युत्पत्तेरित्यत्राह अयमिति। ग्रन्थोक्तोऽयं पूर्वोत्तरपक्षप्रकारो निर्यासितया सारतया संगृह्योक्तः उपपत्तिस्त्वस्माभिर्वक्ष्यत इत्यर्थः।

तत्र तावत् सप्तमाद्य एव ग्राहकव्युत्पत्तिः न चतुर्थ इत्येतत्परिहरति—येति। संव्यवहारार्थोक्तौ दृढ़प्रतीतिरिति तदभिप्रायेण चतुर्थे स्थास्यतीत्युक्तमित्यर्थः। कथं पुनः करणोपकारकतयान्वयस्य श्रौततेत्यत्राह—सा चेति। यद्यपि द्वितीयान्तपदश्रुत्यभावः। यद्यपि स्फ्येनोद्धन्तीतिवत् प्रयाजादिना सकरणकापूर्वं साधयेदिति वचनं नास्ति, तथाप्यधिकारवाक्यस्थलिङ्श्रुतिरेव सन्निहितनिरधिकारप्रयाजाद्यन्वितस्वार्थमाह, अन्विताभिधानव्युत्पत्तेः स्ववाक्यसमभिव्याहृतप्रकृतियजेः स्वर्गकामपदस्य

प्रयाजादेश्च करणेतिकर्तव्यतात्वाविभागत एवाधिकारलिङ् स्वार्थान्वयमाह । तस्यां दशायां अवान्तरवाक्यार्थतां विनैव योग्यतासिद्धेः ऐदमर्थ्यमात्रेणान्वयापर्यवसानात् न्यागतः करणेतिकर्तव्यता विभागमुपकल्प्योपक्रान्तसामान्यान्वयपर्यवसानम् । एवं च यदसन्निधाने वाक्यार्थभेदाहँ तत् पदार्थतां नीतं अधिकारलिङर्थे निवेशात् । सर्वस्य प्रयाजादेरवान्तरवाक्यार्थतायां न च

च प्रतीति विशेषणविषयनियोज्यपरतया लिङर्थधीहेतुत्वेन स्वर्गकामो यजेतेति समुदायस्य पदात्मकतैव, विषयनियोज्यान्वितकार्यस्मृतिहेतुत्वात् समस्तपदवत्, अतः सन्निहितप्रयाजाद्यन्वितं स्वार्थं लिङ् श्रुतिराहेति प्रयाजाद्यन्वयः श्रौत एव। नन्वेतत् ग्राहकग्रहणरूपं अन्विताभिधानं प्रकरणप्रमाणवादिनः सिद्धान्तिनोऽपि सम्मतमेव को विशेषः पूर्वपक्षिण इत्यत्राह —अत्रत्यास्त्विति । सत्यमुभयोरपि सम्मतं तथापि अत्रत्यपूर्वपक्षी एवं ब्रूते ग्राहकग्रहणमपि करणोपकारकतयैवेति तस्यान्वयप्रभेदत्वात् । अन्वयो ह्याकाङ्क्षायोग्यतासन्निधिभिः । योग्यता च करणावरुद्धे करणोपकारकतयैवेति करणोपकारकतयैव ग्राहकग्रहणं न त्वनिर्धारित विशेषेणैदमर्थ्यमात्रेणान्वययोग्यता, विशेषान्वयस्यैव व्युत्पत्तेः। इतोऽपि नैदमर्थ्यमात्रेणान्वय इत्यत्राह—ऐदमर्थ्येति । यद्यैदमर्थ्यमात्रेण प्रथममन्वयः तर्हि पश्चात् प्रकरणादपि करणोपकारकतयाऽन्वयो न स्यात् वाक्यार्थयोरन्वयाव्युत्पत्तेः। ननु प्रकरणादन्वयेऽपि न वाक्यार्थयोरन्वयः प्रकरणस्य सन्निधानरूपत्वात् । अतः पदार्थावस्थानां प्रयाजादीनां पदार्थावस्थेन विधिना सहान्विताभिधाने न वाक्यार्थान्वयदोषः। अतो वाक्यार्थयोरन्वयापत्तिमापादयतः पूर्वपक्षिणः कोऽभिप्रायः इत्यत्राह--अयं भाव इति। न हि सन्निधिमात्रात् प्रयाजादेः करणोपकारकतयाऽन्वयः किन्तु कर्तव्यस्येतिकर्तव्यताकाङ्क्षया। कर्तव्यं च करणान्वितं सत् इतिकर्तव्यतापेक्षम्। तेन न करणान्वयसमये इतिकर्तव्यतान्वयः। ततः किं ? इदं ततः। येन कारणेन करणान्वितस्यैवेतिकर्तव्यताकाङ्क्षा तेन सकरणकर्तव्यतावस्थायाः भिन्नां इतिकर्तव्यतावस्थामाश्रित्यायं करणोपकारकतयैवान्वयो वाच्यः।

तात्पर्यम् । किन्तु अनुष्ठेयकार्याभिधाने तात्पर्यानुरोधिनि पदार्था-न्वयव्युत्पत्तिरिति पदार्थावस्थ एव प्रयाजादौ तात्पर्यम् । अतः तात्पर्यबलादेवापूर्वे व्युत्पत्तितः प्रामाण्यसिद्धिः । अतः इतिकर्त-व्यताकाङ्क्षामाहृत्य विशेषान्वये प्रमाणं सत् प्रकरणं शेषत्वे हेतुः । सप्तमाद्योक्त ग्राहकग्रहणं चेह प्रकरणव्युत्पत्त्यर्थं व्याहृ-तम्, न पुनस्तदत्रापि व्याकार्यमितीयं दिक् ।

ननु पदार्थावस्थानां पदार्थावस्थेनान्वयोऽस्तु इत्युक्तं इत्यत्राह—एवं चेति । करणान्वयेन पर्यवसिताभिधानस्य सकरणककार्यस्य स्वविधिविधे-यस्य वाक्यार्थीभूतस्य परमापूर्वस्येतिकर्तव्यताकाङ्क्षायां पश्चात् स्वविधि विधेयैः वाक्यार्थीभूतैः अङ्गापूर्वैरन्वयः प्रकरणाद्वाच्य इति विरम्यव्यापारा-द्वाक्यार्थयोरन्वयो दुर्वारः । भवत्वाकाङ्क्षावशात् वाक्यार्थयोरन्वय इत्यपि न, यस्माद्वाक्यार्थान्वयो व्युत्पत्तिभिन्नः [हीनः] । अत्र राद्धान्तमुपपादयितु-मुपक्रमते—राद्धान्तस्त्विति । यतः करणोपकारकतयान्वये वाक्यार्थयो-रन्वयो विरम्यव्यापारात् अत एवैदमर्थ्यमात्रेण करणेतिकर्तव्यतात्वा-विभागत एव प्रयाजादेराग्नेयादेश्च अधिकारलिङ् स्वार्थान्वयमाह । यद्यपि विशेषान्वयस्यैव लोके व्युत्पत्तिः तथापि प्रथमं करणोपकारक-तारूपविशेषस्यायोग्यत्वात् प्रयोजनप्रयोजनितारूपविशेषान्वयाभिधानम् । स च खलेकपोतवत् युगपदेव सर्वेषामाग्नेयादिप्रयाजादीनामिति न लोकावगत विशेषान्वयबाधः ।

नन्वाग्नेयादिवाक्ये परमवाक्ये च सविषयकलिङा वाक्यार्थी-भूतकार्यप्रतीतेः कथं वाक्यार्थयोरन्वययोग्यतेत्यत्राह—तस्यां दशायमिति । प्रयोजनप्रयोजनितया अन्विताभिधानदशायां प्रयाजादिकार्याणां अवान्तर-वाक्यार्थतां विनैव पदार्थमात्रतयैवान्वययोग्यतासिद्धिः । नन्वैदमर्थ्य-मात्रेण प्रथममन्विताभिधाने प्रवृत्ते पश्चात् करणोपकारतयाऽन्वयो न स्यात् वाक्यार्थयोरन्वयाव्युत्पत्तेरित्यत्राह—ऐदमर्थ्येति । यत्पुनरिदं प्रथममैदमर्थ्य-मात्रेणान्विताभिधानं सन्निधानात् प्रक्रान्तं तदेव करणेतिकर्तव्यताविभाग-

लोकेपि चेदं शाब्दमेव 'आरोग्यार्थी भेषजं पिबेत् अश्विनौ नमस्कुर्यात्' इत्यादौ। गार्हपत्यमिति श्रुतिः अरुणयेति वाक्यं इति यदुक्तं भाष्ये तत् शेषिकार्यतातः शेषकार्यता तत्कार्यता च द्वितीयातः न तृतीयात इत्यभिसन्धाय।

श्रीकरेण तु क्रयार्थमारुण्यमनिच्छता शेषेऽपि इह न तृतीया श्रुतिरित्युक्त्वा कृत्वाचिन्तयाऽरुणयेत्युदाहृतमित्युक्तम्। तद-

---

मन्तरेण न पर्यवस्यतीति प्रथमप्रवृत्तस्य सामान्यान्वयस्य पर्यवसानमात्रं करणोपकारकतयेति न वाक्यार्थान्वयाव्युत्पत्तिदोषः। करणेतिकर्तव्यता-विभागश्च दर्शपूर्णमासाभ्यामिति प्रवृत्तनामतया तत्परतन्त्रयजिपदेन उत्पत्तिकालयोग्याग्नेयादियागानामेव उपात्तत्वात् तेषामेव कृतिव्याप्यतया प्रथमप्रवृत्तेः करणत्वमप्यौपादानिकम्। तेषामेव तत्प्रच्युतानां प्रयाजा-दीनामितिकर्तव्यतात्वमिति।

ननु समिधो यजतीत्यादि यदाग्नेयोऽष्टाकपाल इति स्ववाक्य एव सविषयक लिङ् श्रुतेः प्रथममेव वाक्यार्थभूतकार्यप्रतीतेः कथं पदार्थतया सामान्यान्वय इत्यत्राह—एवं चेति। सादिकारनियोगासन्निधौ हि निरधि-काराणां पृथक् वाक्यार्थताऽर्हता। तत्र विश्वजिदादिवददिकारकल्पनम्। तत्सन्निधौ तु तदेव पदार्थतां नीतम्। एतदेवोपपादयति—अधिकारेति। यदिदं तात्पर्यबलादेव पदार्थान्वय इति युक्तं चैतदित्याह—अतस्तात्पर्येति।

ननु यथा सामान्यान्वितानामाग्नेयादीनां करणतयाऽन्वय औपा-दानिकः तथा इतिकर्तव्यताकाङ्क्षया प्रयाजादीनां करणोपकारकतया-ऽन्वयोऽप्युपादानादस्तु किं प्रकरणेन प्रमाणान्तरेणेत्यत्राह—अत इति। अस्यार्थः न ह्यु पादानमितिकर्तव्यताकाङ्क्षया प्रवर्तते। किन्तु अनुपपत्त्या। प्रकरणं तु इतिकर्तव्यताकाङ्क्षामाहत्य विशेषान्वये करणोपकारकतया-ऽन्वये प्रमाणम् सत् प्रकरणद्वारभूतकरणंप्रति शेषत्वे हेतुर्भवति। एतेन आकाङ्क्षान्वययोः वैयधिकरण्यं परिहृतम्। स्वान्वितकरणार्थमेव कर्तव्य-स्येतिकर्तव्यतां प्रत्याकाङ्क्षा यत एव।

रुणाधिकरण एव प्रत्युक्तम् । प्रयोजनम् असति प्रकरणे ग्राहकान्वयस्य सप्तमाद्योक्तस्याप्यनिर्वाहवत् तत्पूर्वपक्षवदुद्दिश्य विधानात् सर्वत्र प्रयाजादयः । सति तु प्रकरणे व्यवस्थैव ।

क्रमश्च देशसामान्यात ।

प्रकरणाज्जघन्यक्रमव्युत्पादनं अवान्तरसङ्गतम् । इहापि मानान्तरत्वार्थं असंयुक्तपदमनुवर्तनीयम् । पूर्वचतुष्टयासंयुक्ते

एतदुक्तं भवति—युक्तं करणत्वमुपादानगम्यम् अनन्यप्रमाणकत्वात् । प्रकरणमपीतिकर्तव्यताकाङ्क्षालक्षणम् । यतः इतिकर्तव्यताकाङ्क्षासहकृतेन ग्राहकार्थं प्रथमप्रवृत्तेन सन्निधिनैव प्रयाजादेः करणोपकारकतयाऽन्वयोपपत्तौ विधिव्यापाररूपोपादानकल्पनानुपपत्तिः (त्तेः) अत्यलसत्वाद्विधेः, अनन्यथासिद्धौ तत्कल्पना यतः । न चैवं सन्निपातिनामपि करणोपकारकता प्राकरणिको स्यादिति वाच्यम् यतोऽसंयुक्तं प्रकरणविनियोज्यम् हन्त्यादोनां श्रुतिसंयुक्तानां न प्रकरणविनियोज्यता ।

तथाहि—व्रीहीनवहन्तीति ग्राहकसंबन्धात्पूर्वमेव श्रुतिः द्रव्यसंबन्धमवगमयति । स च प्रयोजनरूपकार्यसंबन्धव्यतिरेकेण परावर्तमानो ग्राहकसंबन्धे सति तदीयान्वयितया सुस्थो भवति । स च करणोपकारकतया विनाऽनुपपन्न इति इतिकर्तव्यताकाङ्क्षया विनापि अनुपपत्तिसहकृतो नियोगः करणोपकारकतां कल्पयति । करणोपकारकतापि तेषां तज्जनितस्य द्रव्यगतातिशयस्य द्रव्यापादानादिना परम्परया करणगततैवेति । इतिकर्तव्यताकाङ्क्षाया अभावेपि करणं इतिकर्तव्यतेति कोटिद्वयव्यतिरेकेण तृतोयप्रकारस्याभावात् करणत्वात्प्रच्युतानां तेषां इतिकर्तव्यतात्वेन प्रवेशः कल्प्यते । अत इतिकर्तव्यताकाङ्क्षया प्रवर्तमानं प्रकरणं, अनुपपत्त्या तु उपादानमिति भेदः । एतत् चतुर्थाद्ये निपुणतरं वक्ष्यते । अतः प्रयाजादीनां करणोपकारकतया विशेषान्वयार्थं प्रकरणं प्रमाणमुपेयम् ।

ननु सप्तमाद्य एव ग्राहकव्युत्पत्तिः कृतेति किमित्यत्र व्याक्रियत इत्यत्राह--सप्तमेति । सप्तमाद्योक्तं ग्राहकग्रहणं प्रकरणव्युत्पत्त्यर्थमत्र

क्रम इत्ययुक्तं इत्येवं प्रश्नः। न हि प्रधानाम्नानानुक्रमेणाङ्गा-नुक्रममात्रात् तुल्यक्रमप्रधानविशेषान्वितोऽङ्गविशेषो युक्तः। ऐदमर्थ्येनान्वयो हि शाब्दः। सोऽविशेषतः सर्वस्य सर्वप्रधानार्थता हेतुः। न तु देशसामान्यमात्रात् अन्वयभेदः शाब्दः। एकस्य सन्निधिरवैशेषिक इति 'दब्धिर्नामासि' इत्यनुमन्त्रणशक्तो

व्यवह्रियते परं, न पुनस्तदत्र व्याक्रियते।

ननु प्रकरणप्रमाणाभावे ग्राहक एव परावर्तत इति प्रकरणव्युत्प-त्त्यापि ग्राहक एव व्युत्पाद्य इति चेत्तत्राह—इयं दिगिति। दिङ्मात्रमिहैतदु-क्तमित्यर्थः। अयमाशयः—यद्यपि एतदधिकरणपूर्वपक्षे ग्राहकोऽप्याक्षिप्तः तथाप्येतदधिकरणं न तदाक्षेपसमाधिपरम् किन्तु प्रकरणव्युत्पत्तिपरम्। सप्तामाद्यं तु तद्व्युत्पत्त्येकपरमिति।

ननु साक्षादन्विताभिधायिशब्दत्रोध्यत्वेप्यन्वयस्य शब्दान्वयपर्यव-सानात् शाब्दत्वं कथमित्यत्राह—लोकेऽपि चेति। अत्र भाष्यकारो गार्हपत्य-मिति श्रुतिः अरुणयेति वाक्यमित्याह—तदयुक्तम्। द्वितोयातृतीयान्तयोः श्रुतित्वे भेदाभावादित्यत्राह—गार्हपत्यमिति। इदमस्य कार्यमित्येवं शेषिकार्यं-तातः शेषकार्यता च द्वितीयान्ते झटित्यवगम्यते न तृतीयान्ते इत्यभिसन्धाय भाष्यकारेण अरुणयेति वाक्यमित्युक्तम्। एतच्च स्फ्याधिकरणे निपुणतर-मुपपादितम्।

श्रीकरेण तु आरुण्यं क्रयार्थमनिच्छता एतद्भाष्यं व्याख्यातम्। परमार्थतः आरुण्यं क्रयशेषो न भवति। भवतु वा क्रयशेषः तथापीहारुण्ये क्रयशेषे तृतीया न श्रुतिः किन्तु वाक्यमित्येवं कृत्वाचिन्तयाऽभ्युपगमवादे-नारुणयेत्युदाहृतम्।

एवं वा। श्रीकरस्तु क्रयार्थमारुण्यमनिच्छन् यद्यपि सर्वत्र शेषपदार्थे तृतीयाश्रवणे पदद्वयश्रुतिरूपवाक्यप्रतीतिः। तथापीहारुण्ये शेषेऽपि श्रुत-तृतीया न श्रुतिः। न पदद्वयश्रुतिरूपं वाक्यं क्रयार्थत्वाभावात् इत्युक्त्वाऽभ्यु-

यावत्प्रधानदेवतानुमन्त्रणार्थो, न तु क्रमादुपांशुयाजनिवेशीति पूर्वः पक्षः ।

राद्धान्तस्तु—नियोगैदंपर्येणान्वयः शाब्दः स एव तु स्थानाख्यसन्निधिभेदाद्व्यवस्थाप्यते । अत्र तु विशेषान्वयाकाङ्क्षा विकल्पादि परिजिहीर्षया । अत एकस्य सन्निधिः वैशेषिक

पगमवादेनारुणयेत्युदाहरणमित्युदाहृतवान् । तदरुणाधिकरण एव प्रत्युक्तम् । वाक्यात् क्रयशेषत्वस्य साधितत्वात् ।

ननु प्रयाजादिशेषत्वं श्रौतं वास्तु प्राकरणिकं वा । उभयथापि नानुष्ठानविशेष इत्यप्रयोजनैवेयं चिन्तास्यादित्यत्राह—प्रयोजनमिति । प्रकरणेन करणैदमर्थ्ये ह्यसति ग्राहकान्वय एव परावर्तते अनिर्वाहात् सन्निहितप्रयाजादेः । प्रथममेव श्रुत्या करणोपकारकतयाऽन्वये आग्नेयादेरपि तथै(दै)व करणतयान्वयः स्यात् । ततश्चाग्नेयादेरपूर्वंप्रति करणतया गुणता, प्रयाजादिप्रति उपकार्यतया प्रधानता इति सन्निहिताग्नेयप्रयाजाद्यन्वितं परमापूर्वमभिदधति परमवाक्ये विरुद्धत्रिकद्वयः स्यात् आभिधानिकान्वय एव विरम्य व्यापारात् । अत एव तद्दोषपरिहाराय सप्तमाद्यपूर्वपक्षवत् उद्दिश्यविधानात् सर्वत्र प्रयाजादीनामुपदेशत एव संबन्धः पूर्वपक्षे ।

राद्धान्ते तु प्रकरणेन करणैदमर्थ्ये सति ग्राहकान्वयनिर्वाहात् प्रतिकरणं व्यवस्थयैवेति प्रयोजनलाभ इत्यर्थः ।

क्रमश्च देशसामान्यात्

दर्शपूर्णमासयोः येन क्रमेण प्रधानाम्नानं तेनैवानुमन्त्रणमन्त्राणामप्याम्नानम् । तत्रोपांशुयाजक्रमे मन्त्रो 'दब्धिरसि' इत्याम्नातः । तत्र चिन्ता-किमस्य प्रकरणानुरोधि लिङ्गात् सर्वप्रधानार्थता' उत क्रमादुपांशुयाजार्थतेति ।

तदर्थमियं चिन्ता—किं क्रमो नाम प्रमाणान्तरं न संभवति उत संभवतीति । तत्रावान्तरसङ्गतिमाह—प्रकरणादिति । अत्रापि पूर्वसूत्रात् प्रमाणान्तरत्वार्थं असंयुक्तपदानुवर्तनात् पूर्वाधिकरणवदाक्षेपाभिप्राय एव

एव। नियोगैदमर्थ्यं च क्वचित् ग्राहकात् क्वचित्समाख्यया काम्य याज्यानुवाक्याकाण्डमित्यनया। भाष्ये तु लिङ्गमित्युप लक्षणम्। लिङ्गमप्यनुमन्त्रणमन्त्र इत्याख्यापेक्षं यतः।

आख्याचैवं तदर्थत्वात्

क्रमादाख्या जघन्येत्यवान्तरसङ्गतिः। अत्राप्याक्षेपार्थः प्रश्न युक्तः। स्थानाद्विशेषे शेषत्वं वैदिकत्वात्। आध्वर्यवादिसमाख्या

भाष्यप्रश्न इत्याह—इहापीति। तत्राक्षेपस्वरूपमाह—न हीति। न हि प्रधानानुक्रमेण अङ्गानुक्रममात्रात् तुल्यक्रमप्रधान विशेषान्वयोऽङ्गविशेषस्य युक्तः। कुतः? सामान्येन नियोगैदमर्थ्यमात्रेणैवान्वय एव शाब्दः, स च यावता विना न पर्यवसितो भवति तावानन्वयः शाब्दः। स चाविशेषतः सर्वप्रधानार्थताहेतुः न विशेषान्वयमाकाङ्क्षतीति न देशसामान्यमात्राद-न्वयभेदः शाब्दः। एकस्य सन्निधेरवैशेषिकतया अवर्जनीयतया पाठमात्रा-र्थतयाप्युपपत्तेः। अतो 'दब्धिरसि' इति मन्त्रस्य असिपदयोगादनुमन्त्रण शक्तस्य अनुमन्त्रणीयाकाङ्क्षायां यावत्प्रधानदेवतानुमन्त्रणार्थता। न क्रमादुपांशुयाजमात्रार्थता येषां तु लिङ्गविरोधस्तेषां तद्वशात् प्रधानविशेषा-र्थताऽस्तु न हानिरिति पूर्वः पक्षः।

राद्धान्तस्त्विति। सत्यं नियोगैदम्पर्येणान्वयः शाब्दः। स च त्वन्वयः स्थानाख्यसन्निधिभेदात् व्यवस्थाप्यते। न च तस्य करणमात्रसम्बन्धि-निर्वाह्यत्वात् न विशेषकरणान्वयाकाङ्क्षेति वाच्यम्। यतो विकल्पादि-परिजिहीर्षया विशेषकरणान्वयाकाङ्क्षो नियोगः। अत आकाङ्क्षाबलादे-कस्य सन्निधिर्वैशेषिक एव, न पाठमात्रार्थः। न च विकल्पादिदोषपरि-हारसहकृतलिङ्गेनैव करणविशेषान्वयोऽस्तु किं क्रमेणेति वाच्यम्। यतः प्रयोजनमात्रं विकल्पपरिहारः न विशेषान्वयापादकमानाभावेन लिङ्ग-सङ्कोचकः। न च पारिशेष्याद्विशेषान्वयः, ग्राहकगृहीतानां मन्त्राणां प्रकरणेन सर्वकरणार्थत्वस्य युगपदापादितत्वात्। ततश्च यत्र लिङ्गाविरोध-स्तत्र माभूत् सर्वार्थता। यत्र तु न विरोधस्तत्र प्रथमावगतसर्वान्वयं को

तु लौकिकी न वेदार्थधीहेतुः। न हि लौकिकं पचतीति वेदार्थाङ्गं पाकं विधत्ते। अथ वैदिकार्थविषयमिदं तद्धिताद्यन्तपदमौत्पत्तिकं यौगिकं कर्मणि वैदिके कर्तृनियमापेक्षायां नियतप्रतिपत्तिनिमित्तं सन्निधिकरं सहायतामन्वये गतं मानान्तरं विवक्षया। तन्न सम्बन्धपूर्वकमिदमभिधानं पूर्वसिद्धे सम्बन्धे (ऽ) सति

वारयितुं क्षमः। विकल्पपरिहारस्तु प्रयोजनमात्रमित्युक्तम्। अतो विशेषसंबन्धापादकं स्थानाख्यं प्रकरणमङ्गीकार्यम्।

ननु ऐन्द्राग्ने याज्यानुवाक्यायुगले कथं नियोगैदमर्थ्यं सन्निध्यभावादित्यत्राह—नियोगेति। ननु भाष्ये लिङ्गादेव सामान्यसंबन्ध इत्युक्तं तद्विरुद्धमित्यत्राह—भाष्ये त्विति। लिङ्गग्रहणं प्राप्तिदर्शनार्थम् न तु लिङ्गस्वरूपमेव विवक्षितम्। यतो लिङ्गमपि सामान्यान्वये अनुमन्त्रण मन्त्र इत्याख्यातमपेक्षते न स्वयं प्रभवति। एतच्च दीपशिखायां व्यक्तम्। अनुमन्त्रणमन्त्र इत्याख्येत्यपि समाख्यामात्रोपलक्षणं द्रष्टव्यम्।

आख्याचैवं तदर्थत्वात्

सन्ति दर्शपूर्णमासयोरध्वर्य्वादय ऋत्विक्पदार्थाः ते च ग्राहकगृहीत द्वारापेक्षाः। तेषु चिन्ता—किं प्रकरणात् सर्वकर्मार्थाः उताध्वर्यवमित्यादि समाख्यातार्थाः। तदर्थमियं चिन्ता—किं समाख्याविशेषनियमाय नालं उत अलमिति। तत्रावान्तरसङ्गतिमाह—क्रमादिति। प्रश्नोऽपि भाष्योक्तः पूर्ववदाक्षेपाभिप्राय इत्यत्राह—अत्रापीति। आक्षेपमाह—युक्तमिति। युक्तं क्रमस्य विशेषशेषता हेतुत्वं वैदिकत्वात्। आध्वर्यवादिसमाख्या तु अवैदिकी न वेदार्थधी हेतुः। न हि लौकिकं पचतीति पदं वेदार्थाङ्गं पाकं विधत्ते। अथेति। लौकिकत्वेपि वैदिकार्थविषयतया प्रवृत्तमिति विशेषान्वयपरम्। न च लौकिकत्वेनानित्यमिति वेदे न नियामकमिति वाच्यम्। यत इदमौत्पत्तिकं नित्यं, कथं ? तद्धितान्तपदत्वात्। न च नित्यत्वेऽपि वैदिकसंबन्धाप्रतीतेः न तत्र नियामकतेति वाच्यम्। यतः आध्वर्यवमित्यादि यौगिकपदं वैदिककर्मण्येव प्रवृत्तम् तस्यैवाध्वर्य्वादिभिः कृतेः।

साधुत्वार्थम् । प्रकृतिप्रत्ययविभागात् न विशेषान्वये सहायभूतमिति पूर्वः पक्षः ।

राद्धान्तस्तु—यदीयमाख्या पुंप्रभवा स्यात् पूर्वप्रमित्यपेक्षा स्यात् इयं चानिदंप्रथमा तत्सचिवाद्भेदादर्थं बोद्धुं सर्वे शक्ता इति यौगिकी । शेषत्वे मानं च युक्तम् ।

ननु कर्मणि प्रवृत्तावप्यपेक्षाभावान्न विशेषोपस्थापकतेति चेन्न, कर्मणोऽनुष्ठेयस्य कर्तृ नियमापेक्षत्वात् । आकाङ्क्षायामपि समाख्यापदस्य न नियतविशेषप्रतिपत्तिशक्तिरित्यपि न, अध्वर्युणा कर्तव्यमाध्वर्यवमिति कर्तृविशेषप्रतिपत्तिसमर्थवात् । न च लौकिकस्य वैदिकान्वयप्रतिपादनायोग्यत्वात् कथं तत्र मानतेति वाच्यम् । यतो वैदिकानुष्ठेय वाचकपदस्यान्वयप्रतिपादकस्यान्वये सन्निधिकरं समाख्यापदं सहायीभवति । अथान्वयाप्रतिपादकस्यान्वयसहायमात्रस्य कथं मानतेति चेन्न, सन्निधिविशेषनिबन्धनत्वात्तदन्वयस्य सन्निधिपदं समाख्यापदविवक्षया मानान्तरं युक्तम् ।

तन्नेनि । आध्वर्यवमित्येवमेतदभिधानं अध्वर्युकर्मणोः सम्बन्धप्रतीतिपूर्वकं तदपि पूर्वसिद्धसंबन्धे सति यौगिकत्वेन साधुत्वार्थं प्रकृतिप्रत्ययविभागात् न विशेषान्वये सहायभूतमिति पूर्वः पक्षः ।

राद्धान्तस्त्विति । यदीयं समाख्या पौरुषेयी स्यात् पूर्वप्रतीत्यपेक्षा स्यात् । इयं त्वनिदंप्रथमा, अतो मानान्तरपूर्वकत्वाभावात् एतत्सचिवाद्भेदात् अनुष्ठेयरूपमर्थं बोद्धुं सर्वे शक्ता इति यौगिकेन समाख्यापदेन शेषत्वविवक्षाया मानभूतेन कर्तृविशेषसंबन्धः कर्मविशेषस्य युक्त इति सिद्धम् ।

श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात

अग्नौ श्रुतम् ऐन्द्र्या गार्हपत्यमुपतिष्ठत इति । किमैन्द्र्याः इन्द्रे गार्हपत्ये च शेषता, उत गार्हपत्य एवेति । तदर्थमियं चिन्ता-किं श्रुतिलिङ्गे तुल्यबले उत श्रुतिर्बलीयसीति । तत्र ग्रन्थोक्तौ पूर्वोत्तर पक्षावनुभाषते —

श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्

ऋजुविमलायां पूर्वोत्तरपक्षसार उक्तः। श्रुत्या तावदैन्द्री गार्हपत्योपस्थापने विनियुज्यते। तथा प्रकरणापादिते कार्यान्वयमात्रे विशेषकार्यनियामकतया लब्धप्रमाणभावेन लिङ्गेनापि इन्द्रोपस्थाने। न च विरोधः। विनियोगद्वयबलेन प्रयोगद्वयादुभयाभिधानोपपत्तिरिति पूर्वः पक्षः।

ऋजुविमलायामिति। इदं तावदुभयसम्मतम्—यत् ऐन्द्रमन्त्रस्य श्रुत्या गार्हपत्ये विनियोग इति। नन्वशब्दरूपस्य लिङ्गस्य कथं श्रुत्या तुल्यबलतेत्यत्राह—तथेति। यद्यशब्दतया लिङ्गं प्रमाणमेव न स्यात् स्यादेतदेवम्। लिङ्गं तु प्रकरणापादिते कार्यमात्रान्वये विशेषकार्यनियामकत्वाय लब्धप्रमाणभावमेवं बर्हिर्देवसदनं दामीतिवत्। यद्यपि श्रुत्या विनियोगो गार्हपत्य एव लिङ्गेन चेन्द्र एव न तदुपस्थाने तथापि किञ्चित्कारभागिशेषिकार्यमिति अभिधानरूपोपस्थाने किञ्चित्कारभागितया उपस्थान इत्युक्तम्। अतस्तेन लिङ्गबलेन इन्द्रोपस्थाने विनियोगः अन्यथा बर्हिर्देवसदनं दामीत्यत्रापि तेन विनियोगो न स्यात्।

ननु सकृच्छ्रुतस्य शब्दस्य कथं श्रुत्या गार्हपत्ये शेषता लिङ्गादिन्द्रे विरोधादित्यत्राह—न चेति। सकृच्छ्रुतस्यापि मन्त्रस्य विनियोगद्वयबलेन प्रयोगद्वयाङ्गीकारेण उभयाभिधानोपपत्तिः।

राद्धान्तस्त्विति। ग्राहकगृहीतस्य श्रुत्या प्रथममेवावगतकार्यविशेषान्वयस्य पश्चादवगत कार्यान्विताभिधानोपपत्त्यर्थं उपादानावगत करणैदमर्थ्यस्य कार्यान्तराकाङ्क्षाभावात् विनियोगान्तरानुपपत्तिः ग्राहकमन्त्राम्नानयोश्चरितार्थत्वात्। अतो न लिङ्गेनापि विनियोगः। न च श्रुतिलिङ्गविनियोगयोस्तुल्यकालतेति वाच्यम् ग्राहकग्रहणे सति शीघ्रभावित्वाच्छ्रौतस्य प्रकरणे विनियोगापेक्षत्वाल्लैङ्गिकस्य।

ननु प्रकरणस्वरूपकथनानन्तरं प्रमाणान्तरमेव वक्तव्यम्। न बलाबले, जिज्ञासाविरहात् अप्रतिज्ञातत्वाच्चेत्यत्राह—अयं भाव इति। शेषत्वे

राद्धान्तस्तु—अधिकारनियोगसन्निधौ श्रुतस्य मन्त्रस्य ग्राहक गृहीतस्य श्रुत्या प्रथममेवावगतकार्यविशेषस्य पश्चादुपादानेनावगतकरणैदमर्थ्यस्य कार्यान्तराकाङ्क्षाऽभावात् विनियोगान्तरानुपपत्तेः न लिङ्गेनापि विनियोगः। न च श्रुतिलिङ्गविनियोगयोः तुल्यकालता: ग्राहकग्रहणे सति शीघ्रभावित्वात् श्रुतिविनियोगस्य, प्रकरणविनियोगापेक्षत्वाच्च लिङ्गविनियोगस्येति।

वैनियोगिके मानानि श्रुत्यादीनि षडेव। तानि चोक्तानि। तदनन्तरं तद्बलाबलचिन्तोचिता। शेषत्वे च बलाबलमिति शेषत्वविशेषावगमकतया प्रतिज्ञातार्थविषयत्वात् बलाबलचिन्तायाः।

ननु श्रुतिलिङ्गयोः किमिति पूर्वं बलाबलमिति चेदुच्यते। यतस्तयोरेव इतरापेक्षया शीघ्रतेति प्रथमं तयोर्बलाबलं वाच्यं इत्याख्याधिकरणेनावान्तरसङ्गतिरित्यर्थः। न चैन्द्रीनयेन पुनरुक्तता, तत्र हि श्रुत्या मन्त्रशेषता न युक्तेति शङ्किते श्रौतमन्त्रशेषतोक्ता इह तु लिङ्गादप्यस्त्विति शङ्का वार्यते।

अत्र भाष्ये का पुनः श्रुतिः किं लिङ्गं किं वाक्यमिति श्रुत्यादिविषयः प्रश्नः कृतः सोऽयुक्तः तद्गम्यविनियोगप्रतिपादनमुखेन तद्विवेकस्याप्युक्तत्वादित्याशङ्क्य प्रश्नाभिप्रायमाह—उक्तेपीति। उत्तरभाष्याभिप्रायमाह—उत्तरमिति। गार्हपत्यमिति द्वितीयान्तं पदमेव श्रुतिः श्रौतशेषत्वस्य हेतुः इतराणि तु पदान्युदासते। इन्द्रपदशक्तिरेव लैङ्गिकपदशेषत्वे हेतुः तत्रापीतरपदानामुदासीनता। अतस्तत्र वाक्यस्योदासीनत्वात् श्रुतिलिङ्गयोरेवेयं बलाबलचिन्ता।

अत्र भाष्यकारेण संशयोपन्यासवेलायां उत लिङ्गं बलीय इति पूर्वपक्षवचनव्यक्तिरुक्ता। सा न युक्ता तुल्यबलेन पूर्वपक्षोक्तेः इत्याशङ्क्य तस्याप्यर्थमाह—यद्यपीति। भाष्ये अपीत्यध्याहारेण उत लिङ्गमपि बलीय इत्यर्थः। ननु श्रुतिलिङ्गाभ्यां मन्त्रस्याभिधेयद्वये विनियोगद्वयस्य द्वारभेदेन क्रतुप्रयोगभेदे समुच्चयात् कथं भाष्ये विकल्पोक्तिरित्यत्राह—विकल्पोक्ति-

अयं भावः। शेषत्वे मानान्युक्तानि। तद्बलाबलं पूर्वं शीघ्रमानयोर्वाच्यमित्यवान्तरसङ्गतिः। ऐन्द्र्यधिकरणे श्रौती मन्त्रशेषता उक्ता। इह तु लिङ्गादप्यस्त्विति शङ्कानिरास इत्यपुनरुक्तिः। उक्तेऽपि श्रुतिलिङ्गवाक्यविवेके वाक्याधीनत्वात् श्रौत लैङ्गिकशेषत्वस्य विधि मन्त्रवाक्यबलाबलमित्यभिसन्धाय श्रुतिलिङ्गवाक्यप्रश्नः। उत्तरं—सत्यमेवम्। तथापि उदासते

स्त्विति। यद्यपि सर्वत्र कार्यैक्ये विलल्पः अत्र तु तन्नास्ति तथापि विकल्पविषये प्रयोगभेदः अत्राप्यभिधेयभेदात् मन्त्रोच्चारणप्रयोगभेदे प्रयोगभेदमात्रसाम्यात् गौणो विकल्पोक्तिरित्यर्थः। ननु कथं श्रुतिलिङ्गयोस्तुल्यबलतेत्यत्राह—श्रुतिलिङ्गेति। उभयोरपि सापेक्षत्वं समानम्। यथा श्रुतिशेषता ग्राहकपूर्विका तथा लिङ्गशेषतापि सामान्यान्वयपूर्विका। आरभ्यानारभ्याधीतसर्वमन्त्रलिङ्गविनियोगव्याप्त्यर्थं सामान्यान्वयपूर्विकेत्युक्तिः सामान्येन विनियोगैदमर्थ्यपूर्वकत्वस्य व्याप्तेः। अनारभ्याधीतेपि समाख्यादिभिः तत्सिद्धेः। अथ करणैदमर्थ्यपूर्वकत्वमपि लैङ्गिकस्येति चेन्न, तत्पूर्वकत्वे कारणाभावात्। अथ ग्राहकगृहीतस्य साक्षाद्ग्राहकानन्वये करणैदमर्थ्यमेव पूर्वमाकाङ्क्षितमिति चेन्न, श्रुतिविनियोज्यस्यापि तस्मिन् करणैदमर्थ्यस्यैव पूर्वमाकाङ्क्षितत्वात्। अथ श्रुति विनियोज्ये करणैदमर्थ्ये पूर्वं मानं नास्ति उपादानस्यान्वयद्वयपूर्वकत्वादिति चेन्न, लिङ्गविनियोज्येऽपि तुल्यत्वात्। प्रकरणात्तत्र करणार्थेतिचेत् तत्र समानं श्रुतिविनियोज्येऽपि।

अथ तत्र श्रुतिसयुक्तत्वात् न प्रकरणावकाशस्तर्हि लिङ्गसंयुक्तत्वात् लिङ्गविनियोज्येऽपि न तदवकाशः। अथ तस्यां दशायां न लिङ्गसंयुक्तता तर्हि श्रुतेरपि न तस्यां दशायां शेषता। आकाङ्क्षातिक्रमेण पूर्वं श्रुतेर्द्वारशेषत्वायोगादिति सर्वं समानम् अन्यत्र पक्षपातादिति श्रुतिलिङ्गयोस्तुल्यतैव। अङ्गीकृत्याद्यतुल्यत्वमाह—यद्यपीति। लिङ्गस्य जघन्यत्वेऽपि न श्रुतेस्तद्बाधकता, भिन्नविषयत्वेन विरोधाभावात् जघन्यादपि लिङ्गात् शेष्यन्तरशेषतास्तु। न च सकृदाम्नातस्य गौणमुख्यार्थताविरोधः। विनियोगद्वयवशेन प्रयोगावृत्त्या तदविरोधात्।

तु पदान्तराणि । गार्हपत्यपदमेव श्रुतिः श्रौतशेषत्वे हेतुः । इन्द्रादि पदशक्तिरेव लैङ्गिके शेषत्वे हेतुः । अतः श्रुतिलिङ्गयोरियं चिन्ता । यद्यपि पूर्वपक्षे न लिङ्गं बलीयः, तथापि श्रुतिवलिलिङ्गमप्युपमर्दकमित्येवं "उत लिङ्गं बलीय" इत्युक्तम् । विकल्पोक्तिस्तु क्रमप्रयोगे समुच्चयेऽप्यभिधेयभेदे प्रयोगभेदात् । श्रुतिलिङ्गतुल्यता चैवं । यथा ग्राहकपूर्विका श्रुतिशेषता

ननु शक्तिमात्रात् शक्यार्थताधीरिति लिङ्गात् अशब्दरूपात् इदमनेन कार्यमित्यन्वयधीः झटिति न जायते । श्रुतेस्तु शब्दरूपायाः शीघ्रं तत्प्रतीतिभ्यां प्रमातुस्तुल्यवत्प्रमित्यनुदयात् शीघ्रभाविश्रुतिविनियोगेन ग्राहकमन्त्राम्नानयोः नैरुत्सुक्यात् कथं पश्चात् लिङ्गविनियोग इत्यत्राह—किञ्चेति । सत्यं तुल्यवदन्वयप्रमित्यनुदयः तथापि ग्राहकमात्राकाङ्क्षावशात् अधिकारलिङ् श्रुतितात्पर्यसहकृतत्वलब्धप्रमाणाभावं लिङ्गं न हानमर्हति । ग्राहकस्य च मन्त्रेण स्वकीयसर्वप्रकाशनमपेक्षितम् । मन्त्रस्यापि यावच्छक्यद्वारत्वम् अन्यथा सम्यक् स्थलेऽपि अन्येन ध्यानादिना प्रकाशसंभवात् लिङ्गमानत्वं मन्त्राधिकरणोक्ततदर्थशास्त्रानुवादकत्वं च दत्तजलाञ्जलि स्यादिति भावः ।

नन्वत्र यदि लिङ्गस्य मानता सिद्धा स्यात् अविरोधे हि लिङ्गस्य मानता । अत्र तु श्रुतिविरोधे हि लिङ्गममानमेव पठितश्रुतिविरोधे स्मृतिरिवेति न वाच्यमित्याह— न चासतीति । तत्र हेतुः—तत्र हीति धर्मश्रुत्यादौ पठितश्रुतिविरोधे अनुमानाभावादनुमेयवेदाभाव एव । इह तु पठितवेद प्रभेद एव लिङ्गम् । तत्र प्रसङ्गात् परपक्षं दूषयितुं तमुपस्तौति—परोक्ते इति । लिङ्गविनियोगविषयेपि लिङ्गानुमितश्रुतिरेव विनियोजिकेत्यस्मिन् पक्षे हि पठितश्रुतिविरोधे लिङ्गाद्विनियोजकश्रुत्यनुमानाभावात् लिङ्गाभाव एव भवति । दूषयति—न चासाविति ।

ननु शब्दैकगम्यवैदिकविषये यच्छब्दोपस्थापितं तदेवोपादेयम् । लिङ्गं तु वस्तुसामर्थ्यरूपं न शब्द इति शाब्दतासिद्ध्यर्थं विनियोजकश्रुति-

तथा सामान्यान्वयपूर्विका लिङ्गशेषता । यद्यपि न तुल्यता, तथापि जघन्याल्लिङ्गादपि शेष्यन्तरे शेषताऽस्तु । गौण-मुख्यार्थता च मन्त्रपदस्य प्रयोगावृत्त्या युक्ता । किञ्च प्रमातुः तुल्यवत् प्रमित्यनुदयेऽपि स्थितप्रमाणत्वं लिङ्गं न हानमर्हति । न चासति श्रुतिविरोधे लिङ्गं मानम् । विरोधे त्वमानमेव यथा-पठित श्रुतिविरोधेऽनुमेयवेद इति वाच्यम् । तत्र हि श्रुति-विरोधे अनुमेयवेदाभाव एव । इह तु पठितवेदप्रभेद एव लिङ्गम् । परोक्ते हि लिङ्गाद्विनियोजकश्रुत्यनुमानपक्षे

रूप शब्दानुमानं लिङ्गाद्युक्तं इति कथमयुक्ततेत्यत्राह—लिङ्श्रुतीति । स्यादेवं यद्यन्यथा शाब्दता न स्यात् इह तु अधिकारलिङ्श्रुतितात्पर्यमूलत-यैव लिङ्गशेषत्वेपि शाब्दतासिद्धेः न लिङ्गविनियोजकश्रुत्यनुमानसंभवः अन्यथा अनुमितेऽपि शब्दे अधिकारलिङर्थानुप्रवेशव्यतिरेकेण विनियोजक-त्वायोगात्, तस्यैव सर्वत्र विनियोजकत्वात् । विरोधाधिकरणपौनरुक्त्या-पत्तेश्च । यद्यपि परमते विरोधाधिकरणसूत्रं स्मृत्यधिकरणशेषभूतं नाधिकरणान्तरं तथापि स्वमताभिप्रायेण विरोधाधिकरणपौनरुक्त्यं ग्रन्थे अभ्युच्चयेनोक्तम् । तदाह—गुरुनीत्या चेति । एतच्च "नैतदुपपद्यते लिङ्गाद्वा प्रकरणाद्वा श्रुत्यनुमानासंभवात्" इत्यादि दीपशिखायां प्रपञ्चितमित्याह—अत इदमिति । राद्धान्तस्त्विति । अस्यार्थः–न तावत् श्रुतिलिङ्गयोस्तुल्यबलत्वम् ग्राहकग्रहणे सति शीघ्रत्वाच्छ्रुतेः । तथाहि—व्रीहीनवहन्तीत्यादिश्रुतेः ग्राहकसंबन्धात्पूर्वमेव क्रियाकारकादिवशेन व्रीह्यादिसंबन्धोऽवघातादेः प्रतीयते । न [स] च शेषशेषितान्वयपर्यवसायी । ततश्च प्रथमं शेषत्व-प्रतीतेः साध्यश्रुतेर्लक्षणया शेषिणः कार्यभावं विना प्रतिबन्धे साधिकारविधि सन्निधिसमाम्नानात् अवघातादेस्तत्परत्वावधृतौ व्रीह्यादिपदैस्तदीयतया स्वार्थेषूपस्थापितेषु स्ववाक्यसन्निहितेनाधिकारविधिना अन्विताभिधान-रूपग्राहकलक्षणान्वये निर्वृत्ते प्रतिबन्धे च गते सति या द्वारान्वये प्रथमं प्रतीतिः सा प्रमाणभावं भजते । अतः श्रुतिः ग्राहकपूर्वकत्वमात्रात् द्वारैदम-

विरोधाल्लिङ्गाभाव एव। न चासौ पक्षः, लिङ्गश्रुतिमूलतयैव लिङ्गशेषत्वसिद्धेः विनियोजकानुमानाभावात्। गुरूक्तनीत्या च विरोधाधिकरणपौनरुक्त्यापत्तेः। इदं प्रपञ्चितं दीपशिखायाम्।

राद्धान्तस्तु श्रुतिः ग्राहकपूर्बिका द्वारैदमर्थ्ये मानम्। लिङ्गं तु ग्राहकान्वयाधीनं सामान्यत इतिकर्तव्यताकोटितापूर्वकं आकाङ्क्षाबलात् द्वारैदमर्थ्ये हेतुः। द्वारार्थत्वे च मानान्येता-

---

र्थ्ये प्रमाणम्। ततश्च तदुभयान्वयोपपत्त्यर्थं उपादानेन पश्चात्तेषां करणैदमर्थ्यम्। लिङ्गं तु शक्तिमात्रम्। न हि शक्तिमात्राच्छक्यार्थान्वयधीः इति न प्रथमं द्वारान्वयधीः। किन्तु प्रकरणपठितमन्त्रस्य स्ववाक्यसन्निध्याख्यप्रकरणात् तत्र ग्राहकान्वये सिद्धे तन्निर्वाहाय कर्तव्यस्य इतिकर्तव्यताकाङ्क्षालक्षणेन प्रकरणेन सामान्यतः इतिकर्तव्यताकोटितया करणैदमर्थ्ये सिद्धे साक्षात् करणोपकाराजनकस्य करणशरीरनिर्वर्तकतयाऽन्वयेऽवधृते द्रव्यदेवतानात्मकस्य साक्षादनिवर्तकत्वे तदीयं किञ्चिदनेनोपकर्तव्यमिति निश्चये जाते किं तदिति विशेषापेक्षायां यच्छक्यं तदिति लिङ्गात् अशाब्दात्मकादपि अधिकारलिङ्श्रुति सहितात् पश्चात् द्वारशेषत्वधीः। अतो लिङ्गं ग्राहकान्वयाधीनं सामान्यत इतिकर्तव्यताकोटिपूर्वकं द्वारैदमर्थ्यहेतुः। अतो द्वारान्वये च बहुतरकक्ष्यान्तरितं श्रुतेर्विलम्बितमिति न तयोस्तुल्यबलता।

ननु भवत्वेवं द्वारान्वयविलम्बः। तथापि किमिति न तुल्यबलतेत्यत्राह—द्वारार्थत्वे चेति। ननु भवत्वेवं विप्रकर्षः तथापि जघन्यादपि लिङ्गादन्यत्र शेषतास्त्वित्यत्राह—चरितेति। यदि ग्राहकमन्त्राकाङ्क्षाविरमेऽपि लिङ्गं मानं स्यात् स्यादेवम्। किन्तु अशब्दरूपस्य लिङ्गस्य तदाकाङ्क्षावशेनैवाधिकारलिङ् श्रुतितात्पर्यपूर्वकं मानत्वमिति शीघ्रतरश्रुत्या तद्द्वारान्वयेनैव निराकाङ्क्षत्वात् तद्बलाधीनं लिङ्गमिह मानमिति न मन्त्रप्रयोगावृत्तिकल्पनया मुख्यगौणार्थतोपगमः। यत एवमावृत्त्यादिकल्पनापेक्षं लिङ्गात्

नीति विप्रकर्षोऽर्थे लिङ्गस्य। चरितार्थयोश्च ग्राहकमन्त्राम्नानयोः द्वाराकाङ्क्षाभावात् न तद्बलाधीनं लिङ्गमिह मानमिति न मन्त्रप्रयोगावृत्तिकल्पनया मुख्यगौणार्थतोपगमः। एवमाश्रयिनयात् कार्यद्वयं प्रत्युक्तम्। तत्र आवृत्त्यादिकल्पनां विना कार्यद्वयम्।

परोक्तं न श्रुतेर्विनियोक्तृत्वं लिङ्गाधीनं प्रतीयते। विज्ञाते विनियोगे तु तद्वशाच्छक्तिनिर्णय इत्यनुपयुक्तम्, लिङ्गस्यापि न तच्छ्रुत्यधीनं विनियोजकत्वम्।

कार्यान्वयित्वं अत एवाश्रयिवदपि कार्यद्वयं न युक्तमित्यत्राह—एवमिति। अत्र परोक्तं राद्धान्तमनुभाषते—परोक्तमिति। दूषयति—अनुपयुक्तमिति। तत्र हेतुः—लिङ्गस्यापीति। श्रुत्यधीनं प्रत्यक्षपठित-श्रुत्यधीनमित्यर्थः।

अत्र भाष्यकारेणैकार्थवृत्तित्वाद्वाचोर्द्वयोर्द्वयोः सम्प्रधारणेत्युक्तम्। तदयुक्तम्। सूत्रकारेणैवात्रैव युगपत् सर्वबलाबलविचारणार्थं सर्वेषां कीर्तनादित्याशङ्क्य तद्भाष्यमनूद्य तदभिप्रायमित्याह—अत्रभाष्यमिति। अत्र प्रवृत्ताया वाचः एकद्वन्द्वबलाबलचिन्ताधिकरणपञ्चकेनेति तत्पञ्चकार्थे तत्सूत्रे सर्वकीर्तनमित्यर्थः। इतरभाष्यादिव्याख्यादि सुगममित्याह—शेषमिति।

लिङ्गवाक्ययोः

दर्शपूर्णमासयोः श्रुतम्। स्योनं ते सदनं करोमि। घृतस्य धारया सुशेवं कल्पयामि। तस्मिन् सीद। अमृते प्रतितिष्ठ। व्रीहीणां मेध सुमनस्यमानः इति। तदर्थमियं चिन्ता—किं कृत्स्नो मन्त्रः सदने आसादने च शेषः। कल्पयाम्यन्तः पूर्वभागः सदने। तस्मिन् सीदेत्युत्तरभाग आसादने इति। तदर्थमियं चिन्ता—किं लिङ्गवाक्ये तुल्यबले उत लिङ्गं बलीय इति।

ननु किमत्राभिमतं वाक्यं यदि ऐन्द्र्या गार्हपत्यमित्यादि विनियोजकं तन्न। तस्य सिद्धान्तेऽपि श्रुतिरूपतया लिङ्गाद्बलवत्त्वात्। नापि लिङ्ग-

अत्र भाष्य एकार्थवृत्तित्वात् वाक्यं द्वयोर्द्वयोः सम्प्रधारणेति । तस्यार्थः—एकदा एकबलाबलशक्तेर्वाचः क्रमशोऽनेकबलाबलचिन्ता । शेषं सुगमम् ।

लिङ्गवाक्यविरोधे—स्योनन्ते-चिन्ता-उक्तेऽप्यर्थ विप्रकर्षाद्बाध्यत्वे दुर्ज्ञान विप्रकर्षसिद्धयर्थं चिन्ताचतुष्टयम्—न हि लिङ्गं वाक्यानपेक्षं, संभूयार्थबोधकता पदानामुच्चारणमात्रात् भवति । ततोऽनुष्ठेयप्रकाशनशक्ततया लिङ्गाद्विनियोगः पश्चाद्भवन्

विनियोज्य मन्त्रे अनुष्ठेयशक्ततदितरपदानां समभिव्याहाररूपम् । तस्य विनियोज्यत्वात् । विनियोजकयोर्हि बलाबलमत्र चिन्त्यमित्यत्राह—लिङ्गेति । स्योनं त इति । स्योनं ते सदनमित्यस्य मन्त्रस्य प्रतीकेनोपादानम् । तस्मिन् मन्त्रे समभिव्याहारात्मकवाक्य लिङ्गस्य च बलाबल चिन्ता । यद्यपि तद्विनियोज्यं तथापि तस्य विनियोजकत्वमप्यस्ति । इदमेव हि वाक्यस्य विनियोजकत्वं यत्तदपेक्षैव लिङ्गं विनियोजकम् । न चैतावता वाक्यस्य मानताहानिः तद्व्यतिरेकेणाननुष्ठेयार्थ स्योनादिपदानां विनियोज्यत्वासिद्धेरित्यर्थः ।

नन्वेतयोरप्यन्यतरबाध्यत्वं विप्रकर्षनिबन्धनम् तच्च श्रुतिलिङ्गयोः एवोक्तमित्यत्राह—उक्तेऽपीति । सत्यमुक्तम् । स एव विप्रकर्षोऽत्रास्ति न वेति विप्रकर्ष सिद्धयर्थेयं चिन्ता । न केवलमियमेव एतत्प्रभृति चिन्ता चतुष्टयमपि विप्रकर्षसिद्धयर्थमित्यर्थः ।

नन्वेवं कथं तुल्यबलतया पूर्वपक्षः समभिव्याहारात्मकवाक्यस्य लिङ्गविनियोगापेक्षत्वात् । लिङ्गस्य न तन्निरपेक्षत्वात् । प्रश्लिष्टपठितानां यजुः पदानां विनियोगादेव एकार्थतावगतेरित्यत्राह—न हीति । यथाविधि पदानामुच्चारणमात्रात् संभूयैकार्थबोधकता तथा प्रश्लिष्टपठित यजुर्मन्त्रपदानामपि उच्चारणमात्रात् संभूयबोधकता भाति । ततः किं तत्राह—तत इति । ततोऽनुष्ठेयप्रकाशनशक्ततया लिङ्गाद्विनियोगः पश्चाद् भवन् प्रतीतान्वितार्थपदजातानुरोधात् भवतीति प्रथमप्रतीतं वाक्यमेवान्-

अन्वितार्थं पदजातानुरोधादिति वाक्यमेवानपेक्षम् । अन्विते च शक्तेरन्वयार्थं प्रतियोग्यपेक्षं लिङ्गं यावदुच्चारितप्रतियोग्यपेक्षं युक्तम् । अन्यथा हि अननुष्ठेयार्थं 'स्योनन्ते' इत्यादि पदान्वयो न स्यात् । वाक्यानुरोधेऽपि न लिङ्गहानम् । भाष्ये च वाक्य-वशं लिङ्गमिति वाक्यं विनियोजकमुक्तम् । अतः कृत्स्नो मन्त्रः सदने आसादने च लिङ्गाद्वाक्यवशाद्विनियुक्तः । श्रुत्या

पेक्षम् । नन्वेवमपि किमिति लिङ्गस्य सापेक्षतेत्यत्राह—अन्विते चेति । अभि-धानशक्तिर्हि लिङ्गम् अन्विते च सेत्यन्वयार्थं प्रतियोग्यपेक्षं लिङ्गं याव-दुच्चरितप्रतियोग्यपेक्षं युक्तम् । अन्यथा हि अननुष्ठेयार्थ-स्योनादिपदानां वाक्येनानन्वयः स्यात् । ननु कृत्स्नमन्त्रस्य सदने आसादने च विनियोगे अन्यलिङ्गमन्यत्र बाधितं स्यादित्यत्राह—वाक्येति । विशेषणतयाऽन्वयात् भक्षमन्त्रे तृप्तिवदिति भावः ।

ननु उभयोस्तुल्यबलत्वे वाक्यविनियोजकत्वोक्तिः भाष्ये विरुद्धे-त्यत्राह—भाष्य इति । अत्र भाष्ये श्रुतिबाधितत्वाल्लिङ्गस्य वाक्येनापि बाधो युक्त इत्युक्तम् । तदयुक्तम् । न हि विप्रकृष्टं सन्निकृष्टेन बाधित-मित्यनेनापि बाधो युक्त इत्याशङ्क्य भाष्यमनुभाष्य तात्पर्यमाह—श्रुत्येति । राद्धान्तस्त्विति । न च विधिवाक्यवत् पाठमात्रात् यजुर्मन्त्रपदानां संभूयबोधकता । निरपेक्षानुष्ठेयैकार्थप्रतिपादकत्वाभावात् । किन्तु अन्यतोऽनुष्ठेयतया अवगतैकार्थधीश्च लिङ्गविनियोगबलादिति लिङ्गपूर्वकं वाक्यं ततो विप्रकृष्टम् ।

ननु अभिधानशक्तिर्लिङ्गम्, अभिधानं चान्वितार्थस्य, अन्वयश्च प्रतियोग्यपेक्ष इति यावदुच्चरितपदान्तरापेक्षित्वेन वाक्यापेक्षमेव लिङ्ग-मित्यत्राह—लिङ्गं चेति । सत्यं प्रतियोग्यपेक्षं लिङ्गम्; तथाप्येकमेव पदं प्रतियोगितयाऽपेक्षते नानुष्ठेयभूतार्थान्तरमपि । एतच्चाङ्गीकृत्योक्तम् प्रकृतिप्रत्ययान्वितेप्यन्विताभिधानोपपत्तेः । नन्वेवं स्योनादिपदानामन्वयो न स्यादित्यत्राह—स्योनादीति । यजुः पदानामेकैकस्य ग्राहकेण संबन्धः

बाधितं लिङ्गं वाक्येनापि बाधितव्यमिति। अस्यायं भावः। पदार्थान्वयो हि श्रुत्येव वाक्येनापि। लिङ्गन्तु शक्तिमात्रं अन्वये विप्रकृष्टम्।

राद्धान्तस्तु---न पाठमात्राद्यजुः पदानां संभूयबोधकता। किन्तु अनुष्ठेयैकार्थतया एकवाक्यता युक्ता। अनुष्ठेयार्थधीश्च लिङ्गादिति लिङ्गपूर्वकं वाक्यम्। लिङ्गं च प्रतियोग्यपेक्षमपि

तत्रानुष्ठेयपदं तावत् प्रकाशकतया। इतराणि तु स्योनादिपदानि स्वाम्नानार्थवत्त्वार्थं अनुष्ठेयार्थपदेन सह विशेषणभूतार्थप्रतिपादनेन एकीभूतार्थान्येवान्वीयन्त इति तेषामन्वयसिद्धिः।

नन्वेवमनुष्ठेयान्तरार्थमपि विशेषणभूतार्थाभिधानेनान्वीयतामित्यत्राह—इत्यनुष्ठेयेति। स्वतोऽनुष्ठेयार्थप्रतिपादनेनान्वये संभवति न परविशेषणतयाऽन्वयो युक्तः तृप्तौ तु न संभवतीत्युक्तम्। अतोऽनुष्ठेयान्तरार्थं वाक्यान्तरमेव।

नन्वेवमैन्द्र्या गार्हपत्यमुपतिष्ठते इत्यत्रापि लिङ्गापेक्षत्वादेकवाक्यतया ऐन्द्र्येति श्रुत्या गार्हपत्ये विनियो(गो)गेऽपि लिङ्गादिन्द्रपदं विभज्य विनियोज्यं अनुष्ठेयभूतमुख्यार्थानुरोधादित्यत्राह—ऋक्ष्विति। ऋचां छन्दसैवैकत्वज्ञानं न तदर्थं लिङ्गापेक्षेति छन्दः परिमितैकमन्त्रान्तर्गतमिन्द्रपदं ऐन्द्र्येति तृतीयाश्रुत्या विनियुक्तम्। न तु लिङ्गात् पुनर्विभज्य विनियोज्यमित्यर्थः।

ननु विनियोगाद्यजुर्विभागे इषेत्वेत्येतावन्मात्रं विभक्तम्। न यजुर्विभागे सति नैराकाङ्क्ष्याभावादिति शङ्कां प्रसङ्गान्निराकरोति—यजुष्विति। विनियोगादर्थाक्षिप्त छिनद्मीत्यादि पदयुक्तं नैराकाङ्क्ष्याद्विभज्यत एव। इन्द्रपदे तु नार्थाक्षिप्तपदयोगाद्विभागः छन्दस्त एव परिमाणात् परिमित मध्यपतितेन्द्र पदस्य तद्विनियोगेनैव विनियुक्तत्वादित्यर्थः।

एकवाक्यतापि लिङ्गमेवेति भाष्यमनुभाषते आक्षेप्तुम्—भाष्य इति। आक्षिपति—तत् प्रक्रियेति। न हि शक्तिमात्रं लिङ्गम्। किन्तु अनुष्ठेयधी-

नानुष्ठेयार्थाभिलसपेक्षम्। अध्योतादि पदानि स्वाम्नानार्थवत्त्वार्थं अनुष्ठेयार्थपदेन सह एकीभूतार्थानि इत्यनुष्ठेयान्तरार्थं वाक्यान्तरमेव। ऋक्षु तु छन्दसैवैकवाक्यत्वात् न लिङ्गापेक्षेति। अत एवैद्ध्या इत्येवं गार्हपत्ये विनियोगेपि लिङ्गान्नेन्द्रपदं विभज्य विनियुज्यते। यजुषि 'इषेत्वा' इत्येवमपि विनियोगे विभज्यत एव अर्थाक्षिप्तपदयुक्तम्। भाष्ये-यदेकवाक्यतापि लिङ्गमेव। अभिधानलिङ्गन्तु बलवदित्युक्तं। तत्प्रक्रियाविरुद्धम्। न हि शक्तिमात्रं लिङ्गम्। किन्तु अनुष्ठेयधीशक्तिः सा च नैकवाक्यतया। अयं भाष्यार्थः—एकवाक्यतायां च सदनसादनयोः

शक्तिः। सा च नैकवाक्यतायां इति कथमेकवाक्यतापि लिङ्गमित्युक्तमित्यर्थः। समाधत्ते—अयमिति। सत्यमनुष्ठेयधीशक्तिर्लिङ्गम्। सा चैकवाक्यतायामप्यस्ति। सदनासादनयोः विशेषणविशेष्यतया एकवाक्यत्वादनुष्ठेयार्थत्वात्। कथं तर्हि तन्निरास इत्यत्राह—विप्रकृष्टं त्विति। ननु एकस्यैव लिङ्गस्य कथं बाध्यत्वं बाधकत्वं चेत्यत्राह—एवं चेति। बाध्यत्वे हेतु विप्रकर्षः न मानान्तरत्वम्। अतो लिङ्गमपि विप्रकृष्टं सन्निकृष्टेन बाध्यं युक्तम्। नन्वेवं मन्त्रभेदे कथं तस्मिन्निति तच्छब्दान्वय इत्यत्राह—वाक्यभेदे स्थित इति।

विवरणे त्विति। सर्वत्र पूर्वदौर्बल्यं पूर्वपक्षः तुल्यबलतोपक्रमात्। तन्मते कथं पूर्वोत्तरपक्षौ इत्यत्राह—तत्रेति। तन्निर्वाहस्तु निबन्धनवदेवेत्याह—वाक्यभेद स्थित इति। यथोक्तमिति। शेषं भाष्यं व्यक्तं न व्याख्येयमित्याह—शेषमिति।

वाक्यप्रकरणयोः

दर्शपूर्णमासयोः सूक्तवाकनिगदे प्रधानदेवतावाचीनि पदानि सन्ति। तेषां यथालिङ्गं विनियोगेन विभाग उक्तः द्वितीयसूक्तवाकनये। तत्रावीवृधेतां इत्यादि वाक्यशेषो भेदेन श्रुतः। स किं पौर्णमास्यां अमावास्यायां च द्विरुच्चारितो विनियोक्तव्यः। उत यस्य येनैकवाक्यता स तत्रैव विनियो-

विशेषणविशेष्यतया एकमनुष्ठेयधीशक्तिः लिङ्गं विप्रकृष्टन्तु तत्साक्षाद्दनुष्ठेयधीशक्तेः । एवं च लिङ्गमपि लिङ्गबाध्यम् । विप्रकर्षो हेतु र्बाध्यत्वे, मानान्तरत्वं च अतन्त्रम् । वाक्यभेदे स्थिते मन्त्रस्थं तस्मिन्निति वाक्यान्तरस्थस्य परामर्शकम् । एतस्यैव रेवतीष्वित्यत्र एतद्धर्मकस्येतिवत् ।

विवरणे तु तुल्यतोपक्रममात्रम् सर्वत्र पूर्वदौर्बल्यं, तत्र वाक्यानुगुणं लिङ्गम् राद्धान्ते लिङ्गानुगुणं वाक्यम् । यथोक्तं निबन्धने । शेषं सुगमम् ।

क्तव्य इति चिन्ता । तदर्थं च किं वाक्यप्रकरणे तुल्यबले उत वाक्यं बलीय इति ।

नन्वत्र टीकाकारोऽधिकरणसूचनाय अथ वाक्यप्रकरणयोः कथमिति भाष्यमेव पठितवान् । तत्र कोऽभिप्रायः अन्यत्र सूत्रेणैव सूचनादित्याशङ्क्य तस्याभिप्रायमाह—अथेति । ननु इतिकर्तव्यतेताकाङ्क्षा प्रकरणमिति प्रकरण स्वरूपं प्रकरणाधिकरण एवोक्तम् । किं पुनरिह पृष्टं भाष्ये किं पुनः प्रकरणं नाम ? इति तत्राह—इतिकर्तव्यतेति ।

ननु वाक्येन पदार्थान्वय प्रतीतेः प्रकरणेन च तदप्रतीतेः कथं तुल्यबलतया पूर्वपक्ष इत्यत्राह—वाक्यादिति । वाक्यात् साक्षादन्वय प्रतीतावपि नियोगाकाङ्क्षावशात् नियोगोयानुष्ठेय देवतास्मरणतात्पर्यव्यतिरेकेण विनियोगासिद्धः उभयनिबन्धनत्वाद्विनियोगस्य उभयोस्तुल्यता । प्रकरणमेव वाऽत्र बलवदित्याह—नियोगेति । कार्यार्थत्वात् पदार्थान्वयस्य तदाकाङ्क्षानुसरणमित्यर्थः ।

ननु यथाविनियोगं नियोग इति वाक्यावगतान्वयो बाध्यो न युक्त इत्यत्राह—सर्वथेति । यद्यपि प्रयाजशेषादौ वाक्यावगतान्वये दृष्टकार्यशून्यतया नियोगबलात् तदन्वयबाधः । इह तु तथा कार्यशून्यता नास्ति । तथापि नियोगाकाङ्क्षावशात् सर्वान्वयेऽपि न वाक्यावगतान्वयस्य सर्वथा बाधः । एतदेवोपपादयति—दर्शेति । ननु लिङ्गसंयुक्तसूक्तवाके तत्पदानां

अथ वाक्य प्रकरणयोः कथमिति भाष्यपाठादधिकरणं सूचितं सूत्रैक्यात् । इतिकर्तव्यतार्थित्वं प्रकरणमित्युक्तेऽपि कस्यार्थित्वमित्यज्ञानात् पुनरिह पृष्टे नियोगस्य न करणस्येत्युत्तरे दत्ते पूर्वपक्षोत्थानम् । वाक्यात् साक्षात्पदार्थान्वयः नियोगाकाङ्क्षावशात् तात्पर्यमिति द्वयोर्विनियोगहेतुता तुल्या । नियोगाकाङ्क्षा वा बलव[तो]ति । तत्परत्वात् पदार्थान्वयस्तदनुगुणः 'प्रयाजशेषेण' इत्यादौ दर्शितः । सर्वथाऽन्वयेबाधः परं नियोगान्नेष्टः सा चेहापि नेष्टः उभय देवतापदशेषत्वेऽपि पदार्थान्वयात् । दर्शदेवतापदसन्निध्याम्नातशेषस्य वाक्यस्वरसात्तदन्वयः । प्रकरणस्वरसादुभयदेवता पदान्वय इति नान्वयबाधः । संयुक्त

कथं प्रकरणविनियोज्यत्वमित्यत्राह—संयुक्त इति । सत्यं प्रकरणमात्राद्विनियोगो नास्ति तथापि लिङ्गाद्विनियोगे सहायभूतं प्रकरणं तस्य च सर्वंकरणान्वयमूलस्य सहायभूतस्य वाक्यात् बलवत्ता युक्तेत्यर्थः ।

राद्धान्तस्त्विति । वाक्यात् दुर्बलं प्रकरणं कुत इत्यत्राह—तदनुरोधाद्धीति । यद्यपीति कर्तव्यताकाङ्क्षो नियोगः प्रकरणं, तस्य च सर्वापेक्षणीयत्वेन प्राबल्यं तथापि श्रुत्यादीनां द्वारपदार्थान्वये प्रामाण्यम् । तत्र यत् सन्निकृष्टं तत् विप्रकृष्टं बाधते । तत्र हि प्रकरणानुरोधाद्वाक्यशेषस्य सर्वकरणदेवतान्वयः कल्प्यः । स च क्लृप्ते वाक्यादाभिधानिकान्वये संभवति बाध्यः शीघ्रभूतेन कार्यान्वयोपपत्तौ ग्राहकपदार्थाम्नानयोः चरितार्थत्वान्न प्रकरणाद् द्वारान्वयः कल्प्यत इत्यर्थः । नन्वेवं विप्रकृष्टबाध्यत्वे श्रुतिलिङ्गनयगतार्थतेति चोदयति – तर्हीति । तन्नेति । ननु अयमर्थः पूर्वाधिकरणेप्युक्तः किमितीहोच्यते । उच्यते । तत्र हि टीकाकारेण लिङ्गवाक्याद्यधिकरणचतुष्टयस्य श्रुतिलिङ्गनयेन पौनरुक्त्यं चोदयित्वा लिङ्गवाक्यविषयमात्रे परिहार उक्तः अत्र पुनस्तदेव चोद्यमनुभाष्य दुर्ज्ञानविप्रकर्षसिद्ध्यर्थोऽयमधिकरणनिचय इति सर्वविषयपरिहार उक्तः । तदनुसाराद्भवनाथेनाप्युक्त इत्यनुसन्धेयम् ।

सूक्तवाके तत्पदानां प्रकरणविनियोज्यत्वाभावेऽपि सहायतया प्रकरणस्य सर्वकरणान्वयहेतोर्बलवत्ताऽभिमता ।

राद्धान्तस्तु—दुर्बलं प्रकरणं, तदनुरोधाद्धि सर्वकरणदेवतान्वयः कल्प्यः । क्लृप्तैर्वाक्यान्वये विप्रकृष्टो बाध्यः । तर्हि श्रुतिलिङ्गनयात् गतार्थता । तन्न, दुर्ज्ञात विप्रकर्षव्युत्पत्तिसिद्ध्यर्थोऽयमधिकरणनिचयः ।

।। प्रकरणस्थानयोः ।।

अत्राप्यधिकरणं भाष्यपाठात्सूचितम् । युक्ता पदार्थान्वये वाक्यबलवत्ता । वाक्यार्थान्वयोऽत्र प्रकरणाद्वास्तु क्रमाद्वा । यावता करणान्वयेऽपि नियोगाकाङ्क्षा, सन्निहितकरणान्वयेऽपि

प्रकरणस्थानयोः

राजसूये अभिषेचनीयक्रमे विदेवनादयः श्रुताः तत्र चिन्ता । किं क्रमादभिषेचनीयमात्रार्थता, प्रकरणाद्वा सर्वकरणार्थतेति विनियोगविकल्पः । उत प्रकरणादेव सर्वकरणार्थतेति । तदर्थं चिन्ता—किं तुल्यबले प्रकरणस्थाने उत प्रकरणं बलीय इति । अत्रापि पूर्ववदेवाधिकरणसूचनमित्याह—अत्रापीति । ननु यथा पूर्वभूतवाक्येन परभूतं प्रकरणं बाध्यं तथेहापि तथाभूतेन प्रकरणेन क्रमो बाध्यो युक्त इति कथं तुल्यबलतेत्याशङ्क्य पूर्ववैषम्येण पूर्वपक्षमाह—युक्तेति । न हि पूर्वत्वं परत्वं बाधकत्वे बाध्यत्वे च तन्त्रम् । किन्तु विप्रकर्षसन्निकर्षौ । ततश्च पूर्वत्र युक्ता प्रकरणाद्वाक्यस्य बलवत्ता । पदार्थान्वये तस्य ततो विप्रकर्षात् । इह तु वाक्यार्थयोरन्वयः । तत्र च क्रमप्रकरणयोः नास्ति विशेष इति तुल्यबलतया क्रमाद्वा प्रकरणाद्वेति विनियोगविकल्प एव ।

ननु विनियोगो न विकल्पेन युक्तः व्युत्पत्तिसिद्धाभिधानस्य पाक्षिकत्वायोगात् । सत्यम् यत्राभिधानिको विनियोगः । इह तु अशब्दात्मकत्वात् क्रमप्रकरणयोः विकल्प एवेति न विनियोगविकल्पेपि व्युत्पत्तिबाधः ।

सा। सर्वान्वये च प्रकरणं स्वरसम्। एकान्वये तत्सन्निधिः स्वरस इति तुल्यता वा। ''क्रमो बलीयानि''ति प्रौढोक्तिः। सन्निध्याकाङ्क्षयोरन्वयहेतुत्वे हि भिन्ने। न सन्निधेराकाङ्क्षोपसंहारः। इदं श्रुतिलिङ्गनयेऽप्युक्तम्। एतद्वस्तुतः आधिक्यासंभवे सर्वत्र द्रष्टव्यम्।

राद्धान्तस्तु—वाक्यार्थान्वयो हि नियोगस्येतिकर्तव्यताकाङ्क्षया। सा सर्वकरणार्थेति ततएव सर्वकरणसन्निधेः सर्वान्वयः। एक[त]स्य सन्निधिराम्नानार्थो नान्वयार्थः। पदार्थेषु कारकादित्वेनान्वयिषु नियोगाकाङ्क्षया न सन्निधिरित्याम्नान-

---

ननु मन्त्राधिकरणपूर्वपक्षव्याघातः किमिति न भवति। उच्यते। युक्तं तत्र व्याघातः लिङ्गतदर्थशास्त्रयोरेकविषयत्वात्। इह तु क्रमप्रकरणयोः भिन्नविषयता क्रमादभिषेचनीयार्थता प्रकरणात् सर्वकरणार्थतेति।

ननु आकाङ्क्षैवान्वये प्रभुः। ततो नियोगाकाङ्क्षारूपप्रकरणात् सर्वार्थतैव युक्तेत्यत्राह—यावदिति। नियोगाकाङ्क्षा उभयत्राविशिष्टेत्यर्थः। तर्हि सन्निधिविशेषादभिषेचनीयान्वय एवेत्यत्राह—सर्वान्वय इति। ननु भाष्ये कथं क्रमस्य बलवत्त्वोक्तिः तत्राह - क्रम इति। ननु किमिति प्रौढोक्तिराश्रीयते सन्निधिबलादाकाङ्क्षोपसंहारोऽस्त्वित्यत्राह—सन्निधीति। उभयोरपि इतरेतरानपेक्षत्वेन समहेतुत्वे सन्निधेर्नाङ्क्षोपसंहारः। एतच्च श्रुतिलिङ्गनयेप्युक्तम्। एतच्च सर्वत्र।

ननु तर्हि कथं पूर्वत्र नियोगाकाङ्क्षा प्राबल्योक्तिः इत्यत्राह—एतद्वस्तुत इति।

राद्धान्तस्त्विति। अस्यार्थः—न हि पदार्थयोरिव वाक्यार्थयोरन्विताभिधानं व्युत्पन्नम्। किन्तु नियोगस्येतिकर्तव्यताकाङ्क्षाबलात् वाक्यार्थयोरन्वयः कल्प्यः। सा च सर्वकरणार्थेति तत एव सर्वकरणसन्निधेः सर्वान्वयः। आकाङ्क्षाया एवान्वयप्रभुत्वात्।

सन्निधिः अन्वये हेतुः । इह तु न तथेति । भार्या राज्ञः पुरुषो-देवदत्तस्य इत्यादितुल्यः । इदं मत्वा भाष्ये परिपूर्णेनाप्येक-वाक्यता इहोक्ता । पदार्थान्वयपूर्णेन विध्याकाङ्क्षया एकवाक्य-ताऽवान्तरवाक्यानां युक्ता ।

दब्धिर्नामासीत्यनुमन्त्रणमन्त्रोऽनुमन्त्रणीयविशेषाकाङ्क्षया करणविशेषान्वयी नेतिकर्तव्यताकाङ्क्षयेति क्रमस्य न प्रमाणता हानिः ।

क्रमसमाख्ये तुल्ये

शुन्धनमन्त्रवाक्यं हि शुन्धनीयार्थं क्रमात् सान्नाय्यपात्रा-न्वयात् तदर्थताधीः । पौरोडाशिककाण्डसमाख्यया पुरोडाशसंबन्ध

ननु क्रमाख्यसन्निधिबलात् नियोगाकाङ्क्षायत्तः सन्निधिरेव सर्वत्रान्वयहेतुः । न पदार्थसन्निधिरित्यत्राह—पदार्थेष्विति । यत्र कारकादि-भावेन संबन्धः अरुणया क्रीणातीत्यादौ तत्राम्नानसन्निधिरेवान्वयहेतुः इह तु न तथेति । भार्या राज्ञः पुरुषो देवदत्तस्येत्यादिवत् सन्निधिरन्वयहेतुर्न भवत्येवेत्यर्थः । अत्र भाष्ये परिपूर्णेनापि एकवाक्यतेत्युक्तम् । तदयुक्तम् । पूर्णेनेत्येतद्विनापि अभिमतसिद्धिरित्याशङ्क्य वाक्यार्थयोरन्वयप्रदर्शनार्थं तदिति तात्पर्यमाह—इदं मत्वेति । नन्वेवं क्रमस्य प्रमाणताहानिः सर्वत्र नियोगाकाङ्क्षया सन्निधेरन्वयादित्यत्राह—दब्धिरिति । नन्वत्र पूर्वोत्तरपक्ष-योरनुष्ठाने को विशेषः ? विदेवनादेरारादुपकारकत्वेन सर्वकरणार्थमेक-करणार्थं वा सकृदेवानुष्ठानात् । उच्यते । सत्यं प्रकृतौ न विशेषः । तथापि राजसूयविकृतिषु विनियोगविकल्पपक्षे अभिषेचनीयादिविकृतिषु विदेवना-देर्नित्यवदतिदेशः । इतर विकृतिषु विकल्पेन । राद्धान्ते तु सर्वत्र नित्यवदति-देशः इतिभेदः ।

क्रमसमाख्ययोः

दर्शपूर्णमासयोः पौरोडाशिकमिति समाख्याते काण्डे सान्नाय्यक्रमे 'शुन्धध्वं दैव्याय' इति शुन्धन मन्त्र आम्नातः । तत्र चिन्ता—किं सान्नाय्य-

निमित्ततया तत्पात्रान्वयात् तदर्थधीरिति तुल्यता । अथ समाख्या पौरुषेयीत्यतुल्यता न तर्हि इयं प्रमाणम् ।

राद्धान्तस्तु—अनिदंप्रथमा समाख्या अन्वयाधीना अन्वये प्रमाणं सन्निध्यादि वैदिकं कल्पयन्ती विप्रकृष्टा प्रमितिहेतुः । क्रमस्तु सन्निधिरेवेति समाख्या बाध्या । समाख्याप्रमाणं च ब्राह्मणग्रामवन्नेया । बलाबलसूत्रं तु बाधार्थमिति बाध शुद्धि भाष्यस्य तच्छेषता । अशुद्धिशङ्का यदप्राप्तं न तद्बाधार्हं अप्रसक्तप्रतिषेधायोगात् । प्राप्तमपि तदर्नहं निश्चिते मिथ्यात्वायोगात् ।

पात्रे पुरोडाश पात्रे च उभयत्र मन्त्रविनियोगः उत सान्नाय्यपात्र एवेति । तदर्थमपरा चिन्ता—किं क्रमसमाख्ये तुल्यबले उत क्रम एव बलवानिति । तत्र पूर्वपक्षमाह—क्रमेति । ननु मन्त्रस्य पात्रसंबन्धित्वे स्यादुभयपात्रान्वयः तदेव तु कुत इत्यत्राह—शुन्धनेति । शुन्धध्वमिति पदयुक्तमन्त्रवाक्यं लिङ्गात् शुन्धनीयपात्रान्वयितया तदन्वयतात्पर्यार्थं सन्निध्यपेक्षायां क्रमात् सान्नाय्य पात्र सन्निधेः तदन्वयात् तदर्थताधीः । पुरोडाशेतरत्वमात्रादुपांशुयाजोक्तिः सान्नाय्यपरा । तथा पौरोडाशिककाण्डसमाख्यया "तस्य व्याख्यान इति व्याख्यातव्यनाम्नः" इत्यधिकारे पौरोडाश पुरोडाशात् ष्ठन् इति ष्ठनन्तत्वेन व्युत्पन्नतया पुरोडाशसंबन्धनिमित्ततया तत्पात्रान्वयात् तदर्थधीरिति क्रमसमाख्ययोस्तुल्यबलत्वात् उभयपात्रान्वयः । ग्रन्थे तु अधिकृत्य कृते ग्रन्थे इत्यधिकार इत्युक्तम् । तत्तस्य व्याख्या न इत्यस्य अधिकृत्येत्यस्य चार्थेनाभेदात् । ननु वैदिकत्वात् क्रमस्य पौरुषेयत्वादाख्यायाः कथं तुल्यतेत्याशङ्क्ते—अथेति+न तर्हीति । आध्वर्यवादिषु कर्तृ नियमो न स्यादिति भावः ।

राद्धान्तस्त्विति । अनिदंप्रथमाहि समाख्या वैदिकविषयत्वात् तत्र तत्र प्रमाणं भविष्यन्ती तद्धितान्ततया अन्वयाधीना अन्वये प्रमाणं वैदिकं सन्निध्यादि कल्पयन्ती विप्रकृष्टा प्रमितिहेतुः । क्रमस्तु स्वयं हेतुरूपो वैदिकसन्निधिरेवेति सन्निकृष्टः । अतः समाख्या तत्र विषये तेन बाध्या । प्रमाणं च सा भूयस्त्वादिना ब्राह्मणग्रामवत् कथञ्चिन्नेयेत्यर्थः ।

ननु प्राप्तबाध उक्तो दशमे; न तत्रापि प्राप्तस्वरूपबाधः किन्तु फलापहारात् बाध इव। इह तु सोऽप्यशक्तः कार्यतो हि प्राप्तौ न कार्यान्तरं कल्प्यम्। अतः कार्यलोपे तु कृतकार्यत्वे वा अनुष्ठानापहारः। इह तु उपदेशे यथोपदेशं कार्यं कल्प्यम्। अतः फलतोऽपि प्राप्तिर्दुर्बाधेति दर्शितं दशमे। अत्रापि श्रुतिलिङ्गयोः प्रामाण्ये प्रतिप्रधानमावर्तन्ते गुणा इति भाष्ये उक्तम् इति शङ्कायामुत्तरं प्राप्तं बाध्यत इति ब्रूमः।

अथ यत्तत्र किं पूर्वोक्तो बाधः संभवत्युत नेत्यत्र भाष्यं "किं तद्बाधविषयं प्राप्तं अप्राप्तं वेत्यादि अस्य भाष्यस्यास्मिन्नवसरे कः प्रसंगः? न हि श्रुतिलिंगसूत्रे किमपि पदमनेन व्याख्यायत इति अत्राह—बलाबलेति। बलाबलसूत्रस्य बाधार्थत्वात् बाधविषयशुद्धिभाष्यं तत्पदव्याख्यानाभावेपि तच्छेषत्वादत्र प्रसक्तमित्यर्थः। कथमशुद्धिरित्यत्राह—अशुद्धीति। कथं तर्हि दशमे प्राप्तबाधोक्तिरिति चोदयति—नन्विति। नेति। तत्रापि दशमे विकृत्यपूर्वार्थतया प्राप्तानां पदार्थानां यदेदमर्थ्यज्ञानात् प्राप्तं न तत् स्वरूपस्य विषयापहारलक्षणो बाधः। किन्तु फलभूतानुष्ठानापहारात् बाध इव। इहापि तर्हि तथास्त्वित्यत्राह—इह त्विति। कथमित्यत्राह—कार्यतो हीति। विकृतौ हि कार्यतः प्राप्तो विकृतिक्लृप्त कार्यस्यैव स्वीकारात् तल्लोपे तस्यान्येन वा सिद्धौ कार्यान्तरकल्पनायोगात्। इह तु प्रकृतित्वादुपदेशो यथोपदेशं कार्यकल्पना। दृष्टकार्याभावे अदृष्टमपि कार्यं कल्प्यम्। अतः फलतोऽपि प्राप्तिर्दुर्बाधा। दर्शितं चैतद्दशमे।

नन्विहोपयुक्तमत्रैव वक्तव्यम्। किमिति सान्यासिकं क्रियत इत्यत्राह—अत्रापीति। शङ्कायामुत्तरमिति। श्रुतिविनियोग[गे]लिङ्गात् विनियोगज्ञानमप्राप्तरूपमेव ग्राहकमन्त्राम्नानयोः अचरितार्थत्वरूपसामग्रीविरहात्। अतो वस्तुतोऽप्राप्तमेव प्राप्तमिव व्यवह्रियते। तद्बाधात् प्राप्तं बाध्यत इति ब्रूमः। कथमप्राप्ते प्राप्तवद्व्यवहारः? केन वा तद्बाध इत्यत्राह—लिङ्गादेरिति। लिङ्गादेरन्यत्र सम्यक्स्थले ग्राहकमन्त्राम्नानयोरचरितार्थ-

वस्तुतस्तु—अप्राप्तमेव । लिङ्गादेरन्यत्र दृष्टं विनियोजकत्वं स्मरता अन्यत्र ग्राहकमन्त्राम्नानयोश्चरितार्थविषयेऽपि स्मृतिप्रमोषाद्विनियोग प्रमिति व्यवहारकारिता प्राप्तिर्भेदग्रहाद्बाध्यते शुक्तिरजतवत् । तर्हि प्रथमपादे एवायमुक्तः प्राप्तबाधः यत्र च मिथ्येति प्रत्ययः इत्यत्र । इदमधिकमागमिकश्रुतिलिङ्गादौ स्वतो न विपर्ययः नेदमित्यदर्शनात् । करणदोषादपि तद्विधबाध एव तत्रोक्तः । इह तु सन्निकृष्ट प्रमाणाच्चरितार्थत्वे ग्राहकमानयोः विप्रकृष्टान्नेति विमर्शोत्थ एव बाधः । विप्रकर्ष-

---

विषये दृष्टमनुभूतं विनियोजकं भ्रान्तिस्थले ग्राहकमन्त्राम्नानयोश्चरितार्थविषयेऽपि साधारणरूपस्य प्रकाश्यशेषभूतमन्त्राधारत्वादेरनुभवादगृहीतविवेकतया स्मरतो दोषवशादवखण्डिततदंशत्वेन स्मृतिप्रमोषात् ग्रहीतिस्मृत्योः गृह्यमाण स्मर्यमाणयोश्च भेदाग्रहाद्विनियोगप्रमिति व्यवहारः ।

भेदग्रहाद्विवेकमुपदर्श्य बाधकज्ञानेन विप्रकर्षात् अविनियोजकत्वज्ञानेन बाध्यते शुक्ति रजतवत् ।

नन्वयं प्राप्तबाधः प्रथमपाद एवोक्तः यत्र च मिथ्येति प्रत्यय इत्यत्रेति चोदयति—तर्हीति । इदमधिकमिति । युक्तं शुक्तिरजतादौ व्यवहारकारितप्राप्तिबाधः नेदं रजतमिति स्वतोविपर्ययज्ञानोदयात् । इह तु आगमिकश्रुतिलिङ्गादौ वैदिक शब्दप्रमाणभेदे श्रुतिलिङ्गादौ विषये नेदंविनियोजकमिति विपर्यबोधकवाक्याभावान्न स्पष्टः बाधकप्रत्ययोदयः । न च करणदोषादपि बाधः । शब्दमानभेदे श्रुतिलिङ्गादौ करणे वक्त्रधीनस्य दोषस्य वक्तुरभावादेवाभावात् । भवतु वा दोषः । तथापि करणदोषात् तद्विधबाध एव तत्रोक्तः बाधकज्ञानोदयनिबन्धनबाध एवेति यावत् इतीदमधिकं शक्यमित्यर्थः । कथं तर्हि श्रुतिलिङ्गादौ बाध इत्यत्राह—इहेति । शीघ्रप्रमाणाच्छ्रुत्यादेः ग्राहकमन्त्राम्नानयोश्चरितार्थत्वात् सामग्रीविरहेण विलम्बान्न विनियोजकमिति विमर्शोत्थ एव बाधः । ननु आग्नेयीनये अवयवार्थापेक्षश्रुतेः प्रतीकादिश्रुतिर्बलीयसीत्युक्तम् । तदयुक्तम् । श्रुतेः

श्चेत् श्रुतेरपि श्रुत्यन्तरात् तस्याः बाधस्तुल्यनयात्सिद्धः । एवञ्च विप्रकृष्टादपि विप्रकृष्टस्य बाधोऽर्थसिद्धः ।

अहीनो वा

एकप्रकरणिशेषत्वे वाक्यस्वरसात् प्रकरणस्वरसबाध उक्तः । इह तु विनियोगीयस्य वाक्यात् या द्वारार्थता सा किं स्वतस्सन्निहित नियोगात् नियोगीयस्य उत तदीयपदार्थान्वय-सन्निहितनियोगादिति चिन्ता । साक्षात्सन्निहितनियोगान्वय-बलवत्तया तन्नियोगीया । अहीनेति नञ् समासार्थे वाक्या-

---

श्रुत्यन्तरबाधकत्वायोगादित्याशङ्क्याह—विप्रकर्षचेदिति । नहि प्रमाण-भेदस्वरूपं तन्त्रं बाध्यबाधकत्वे । किन्तु विप्रकर्षसन्निकर्षावित्युक्तम् । अतः श्रुतेरपि श्रुत्यन्तराद्विप्रकर्षे सति बाधो युक्तः । स तर्हि कुत्र व्युत्पन्न इत्यत्राह—तस्या इति । एवं च विप्रकृष्टादपि विप्रकृष्टस्य वाक्यादेः सन्निकृष्ट श्रुत्यादिबाध्यताप्यर्थसिद्धेत्याह—एवमिति ।

अहीनोवा प्रकरणाद्गौणः

ज्योतिष्टोमे श्रुतम्—तिस्र एव साह्नस्योपसदः द्वादशाहीनस्येति । तत्र चिन्ता—किं द्वादशाहोपसत्त्वस्य प्रकरणाज्ज्योतिष्टोमे निवेशः, किं वा वाक्यादहीने उत्कर्ष इति । ननु वाक्यप्रकरणाधिकरणेनैतद्गतार्थमित्यत्राह—एकेति । सत्यं तत्रैकप्रकरणिशेषत्वे वाक्यस्वरसात् प्रकरणस्वरसबाध उक्तः । उभयथापि ग्राहकरूपप्रकरणिनो बाधाभावात् क्लृप्तवाक्यस्वरसात् कल्प्यविनियोजक प्रकरणस्वरसंबाध उक्तः । इह तु विनियोगीयस्य द्वादशोपसत्तादेः या वाक्यात् नियोगीयद्वारार्थता अहीनपदस्य नियोगीयकर्मवचनत्वात् तत्संबन्ध एव वाक्यात् न नियोगसंबन्धः । उच्चैस्त्वादेस्तु वाक्यान्नियोग-संबन्ध एवं क्रियत इति विनियोगोपस्थितेः । सा किं स्वतस्सन्निहित नियोगान्नियोगीयस्य, द्वादशोपसत्तादेः स्वतः सन्निहितनियोगबलात् तदीय-द्वारार्थतेत्यर्थः । उत तदीय पदार्थान्वयप्रतीतिबलेन सन्निहितो यो नियोगः

च्छेषता । यथा साक्षात्सन्निधिः समाख्याकल्प्यात् बलवानिति क्रमबलवत्तोक्तेति पूर्वपक्षावान्तरसङ्गतिः ।

राद्धान्तस्तु---पदार्थान्वयोत्थ एव बलवानिति तदनुगुणो नियोगान्वयः । पदार्थान्वयपर्यवसानात् कार्यान्वयस्य तदुत्थ एव कार्यान्वयः शीघ्रसन्निधेः । पदार्थ एव हि पदार्थप्रतिपक्षः न विधिः । अन्यथा स्तुतिपदानामननुष्ठेयार्थता स्यात् । मध्योदात्तपदस्य द्वादशाहभेदोऽर्थः । न च वाच्यम्---प्रकृतका-न्वियात् व्रीह्यादिपदे लक्षणा दृष्टेति अहीनेऽपि जघन्यार्थताऽस्त्विति । कार्यान्वयात्तु सा न प्रकृतान्वयार्था । अहीनेऽपि सा इष्यत एव ।

तद्बलात् तदीयद्वारार्थतेति । एत्तदुक्तं भवति—किं नियोगसन्निधिर्बलीयान् उत विनियोगसन्निधिरिति चिन्तेति ।

ननु यथा विनियोगं नियोग इति विनियोगसन्निधिरेव बलवानिति कथं पूर्वः पक्षः । कथं वाक्यान्तरसंगतिरित्यत्राह– साक्षादिति । यथाविनियोगं नियोगः यत्र प्रकृतकार्यान्वियहानिः अत्र प्रबलभूत साक्षात्सन्निहित नियोगान्वयबलवत्तया तन्नियोगीये प्रकृतनियोगीये ज्योतिष्टोमयागे वाक्यात् द्वादशोपसत्त्वस्य शेषता नियोगबलवत्ता च पदार्थान्वयस्य तदर्थत्वात् । प्रकृतनियोगीयान्वये वाक्यस्थाहीनपदस्य कथमन्वय इति चेत् न हीयत इत्यहीन इति नञ् समासार्थेऽहीने प्रकृतनियोगीयतयाऽन्वयात् । कल्प्यसन्निधेः साक्षात्सन्निधिर्बलबानित्यत्र दृष्टान्तमाह—यथेति । अनेनावान्तरसंगतिःप्रकटीकृता । यद्यपि बाधशुद्धिनयोऽनन्तरः तथापि तस्य श्रुतिलिङ्गादिनयपञ्चकशेषतया क्रमसमाख्यानयशेषत्वमपीति न तत् व्यवधायकमित्यर्थः ।

राद्धान्तस्त्विति । वैनियोगिकसन्निधिरेव बलवानिति तदनुगुणो नियोगान्वय इति न प्रकृतनियोगसंबन्धो युज्यत इति अपूर्वान्तर संबन्ध एवेत्युत्कर्ष एव द्वादशोपसत्त्वस्य । कुतः पुनः वैनियोगिकसन्निधिर्बलवानि-

अथ मध्योदात्तत्वासिद्धिः, तदा कृत्वाचिन्ताऽस्तु, रूढिर्वा द्वादशाहभेदे। सत्रेष्वप्रयोगात्। नन्वत्रमते—अन्यत्राप्रयोगेऽपि न रूढिः यथा पङ्कजादेः; मैवम्, क्लृप्ता अवयवयोश्शक्तिस्तत्र, इह तु कल्प्या समुदायस्य। ननु इहाप्यहरवयवस्य क्लृप्ता शक्तिः। अत एवाहर्मितकर्मलक्षणापि क्लृप्ता अहीनावयवस्य लाघवात् गणे शक्तिः कल्प्यताम्। सत्रेष्वप्रयोगः कुमुदादौ पङ्कजादिपदवदस्त्विवति न रूढिः। मैवम्, अहश्शब्दो द्वादशहादिषु यजति चोदनाचोदितेषु अव्यवस्थितकर्तृपरिमाणेषु दृष्ट इति

त्यत्राह—पदार्थान्वियेति। प्रथमभाव्यविकारान्वयः पदार्थान्वियपर्यवसायोति पदार्थान्वियसमुत्थ एव कार्यान्वयोऽङ्गीकार्यः, प्राकरणिकसन्निधेर्वाक्य सन्निधिः शीघ्रभावी यतः।

ननु प्रधानभूतसन्निहितकार्यान्वये प्रतिपक्षे न पदार्थान्वयोत्थ-सन्निधिर्युक्त इत्यत्राह—पदार्थएवेति। विपक्षे वाधकमाह—अन्यथेति। विधेः पदार्थान्वयप्रतिपक्षत्वे स्तुतिपदानां विध्यन्वयाननुगुणस्तुत्यर्थता न स्यात् किन्तु तदनुगुणानुष्ठेयार्थता स्यादित्यर्थः।

ननु वाक्यप्रकरणयोर्विरोधे सति वाक्यबलवत्ता, न चेहविरोधः न हीन इत्यहीन इति नञ् समासाङ्गीकारेण प्रकृतनियोगीयाभिधानादि-त्यत्राह—मध्येति। नञ् समासांगीकारे तत्पुरुषे तुल्यार्थे सप्तम्युपमाना-व्यये'त्यादिना हि उदात्तमहीनपदे स्यात्। मध्योदात्तं चाम्नायते। अतो मध्योदात्तपदस्य द्वादशाहभेद एवार्थः। तदर्थत्वे च कथं मध्योदात्तता। उच्यते। अहन् शब्दात् अन्हः खः क्रतौ इति खस्येनादेशे कृते प्रत्ययाद्युदात्त-तायां ईकारस्योदात्तत्वे मध्योदात्तमहीनपदं भवेदिति।

ननु व्रीह्यादि पदवदहीनपदे प्रकृतान्वयार्थमतद्धितान्ततया जघन्यता-स्त्वित्यत्राह—न चेति। तत्र हेतुः—कार्येति। कार्यान्वयनिर्वाह निबन्धना हि सा लक्षणा न प्रकृतान्वयार्था सा नियोगीयलक्षणाऽहीनेऽपि इष्यत एव। अथेति। मध्योदात्ततयाऽऽम्नानमेवासिद्धम् ततश्च नञ् समासे तद्धितान्त-

तद्रूपप्रवृत्तिनिमित्तक एव । अगत्या चानेकार्थः । यदि सत्रेष्वपि प्रयुज्यते तदा सर्वानुगताहर्मितकर्मणः गणताप्रवृत्तिनिमित्तकः । तदा च अहरवयवस्य क्लृप्तार्थत्वे लाघवादिनाऽवयवशक्तिः गौणे कल्प्येति यौगिकतोपपत्तिः । न तु सत्रे दृश्यते । अतो रूढ एव यथा प्रवीण शब्दो यस्यां व्यक्तौ दृश्यते तस्यां वीणावादन गुणयोगेऽपि निपुणत्वे दृष्टः तत्प्रवृत्तिनिमित्तकस्तत्रैवरूढ इत्युक्तम् । तदाह—"यदि सत्रेऽपि प्रयोगो दृश्यते तदाऽनेकशक्तिकल्पनाभयात् ईन शब्दस्यैव शक्तिः कल्प्येते'ति । नियत

तया योगादुभयत्रापि मुख्यत्वात् कथं विनियोगविरोध इत्यर्थः । उत्तरयति—कृत्वाचिन्तेति । एकत्र मुख्यत्वं इतरत्र जघन्यत्वमिति चिन्तेत्यर्थः । कृत्वाचिन्तामुद्घाटयति—रूढिर्वेति । द्वादशाहभेदे नियतप्रयोगात् सत्रेष्वप्रयोगादहीनपदं द्वादशाहभेदे रूढमित्यर्थः ।

नन्विति । निबन्धनमते हि संभवद्योगानां शब्दानां अन्यत्राप्रयोगेपि न रूढिता । यथा पङ्कजादेः । मैवमिति । युक्तं पङ्कजादौ यौगिकत्वं अवयवयोः क्लृप्तशक्तिकत्वात् । इह तु कल्पया शक्तिः दृष्टप्रयोगानुसारात् समुदायस्यैव कल्पयितुं युक्ता ।

नन्विहापीति । अहीनपदेऽपि अहरवयवस्य दिने शक्तिः क्लृप्तैव । भवत्वेवं किमायातं कर्मणि वृत्तेरित्यत्राह—तत एवेति । दिन क्लृप्तया शक्त्यैव तत्परिमितकर्मलक्षणापि क्लृप्तैवेत्यर्थः । ततः किमिदं ? ततः ऊनावयवस्य गणेशक्तिर्लाघवात् कल्प्यताम् । समुदायशक्तितोऽवयवशक्तिर्लघीयसो यतः ।

नन्वेवमहर्मितकर्मगणत्वाविशेषात् सत्रेष्वप्रयोगो न घटते इत्यत्राह—सत्रेष्विति । पङ्कजादिवत् प्रतिवन्धककल्पनया अन्यत्राप्रयोग इति न रूढिरित्यर्थः मैवमिति । यस्मिन्नर्थे यस्य शब्दस्य प्रयोगान्नियमः स तद्रूपप्रवृत्तिनिमित्तक एव । गत्यन्तराभावे अनेकार्थत्वमपि न दोषः । ननु कथमगतिः अहर्मितकर्मगणता प्रवृत्तिनिमित्तकत्वे शक्तिकल्पना गौरवा-

प्रयोगात् समुदायशक्तिः न विप्रकृष्टाऽवयवे शक्तिरिति तु मन्दम् । असत्यप्यवयवार्थे व्युत्पत्तिमात्रं तद्धितविधिः स्वरार्थश्च ।

विवरणे तु पूर्वबलीयस्त्वे स्थिते विषयव्याप्त्यर्थं विरोध एवाविरोधशङ्का निरस्यते । अत्र जाघन्यां त्वविरोधे विरोधाशङ्केति अवान्तरसङ्गतिरुक्ता । नञ्समासादविरोधाशङ्का स्वरविरोधान्निरस्ता । तन्निर्वाहस्तु निबन्धनवन्नेयः । श्रुतिस्थानीयं चेदं वाक्यं यल्लिङ्गादपि बलीय इति सुतरां बलवत् ।

भावादित्यत्राह—सत्रेष्विति । स्यादेतदेवम् । यदि सत्रेष्विपि प्रयोगः स्यात् नत्वेषोऽस्ति । ननु सत्रेष्वप्रयोगेपि कल्पनालाघवादवयवशक्तिरेव कल्प्येति यौगिकतापत्तिः सत्रेष्वप्रयोगस्तु कुमुदादौ पङ्कजवदित्यत्राह—अत इति । अस्यार्थः—अवयवेष्वक्लृप्तचरा शक्तिः कल्प्या, समुदायेपि सैव । अतो न शक्तिकल्पनायां लाघवम् प्रत्युतावयवशक्तिकल्पनायां प्रतिबन्धोऽप्यदृष्टचरः कल्प्य इति समुदाय एव शक्तिः कल्पयितुं युक्तेति रूढ एवाहीनशब्दः । यथेति । यद्यप्यहर्मितकर्मगणत्वं द्वादशाहभेदेप्यस्ति तथापि न तत्प्रयुक्तिनिमित्तकोऽहीनशब्दः किन्तु यजतिचोदनाचोदितत्वनिमित्तकः । यथा प्रवीणशब्दो यस्यां व्यक्तौ दृश्यते तस्यां वीणावादनगुणयोगेऽसत्यपि निपुणत्वे दृष्टः तत्प्रवृत्तिनिमित्तकस्तत्र रूढ इत्युक्तम् । अत्र साक्षित्वेन ग्रन्थोक्तमाह—तदाहेति । अत्र केचित्-प्रयोग निमित्ता हि शक्तिः यत्र च सः तत्रैव युक्ता कल्पयितुम् । समुदाये च प्रयोगनिगम इति तत्रैव शक्तिः न विप्रकृष्टावयवे शक्तिरित्यूचुः । तन्मन्दमित्याह—नियतेति । अयं भावः—समुदायस्य प्रयोगनियमः सन्निकर्षेऽपि यावत्यंशे शक्तिर्न क्लृप्ता तावत्येव सा कल्प्या नांशान्तरेपि । अतो विप्रकृष्टेप्यकृतशक्तिकैवावयवे शक्तिः कल्प्येतेति कल्पनागौरवलाघवाभ्यां पूर्वोक्तैवावगतिरिति । न च रूढत्वेप्यहीनशब्दस्य योगादन्यत्रवृत्तिरस्त्विति वाच्यम् । रूढिर्योगमपहरतीति न्यायात् । यत्रेयमेकाहादौ प्रबलकारणेन अर्थप्रकरणादिनाऽप्रसिद्धपदार्थप्रतीतिः तत्रागत्या विलंबितोऽपि योगावगमः । इह तु वेदे तथाविधकारणा-

द्वित्वबहुत्वयुक्तं चाचोदनात्तस्य

उक्तेऽपि पदार्थान्वयानुरोधात् प्रकृतकार्यान्वयत्यागे अधिकमिह प्रकृतेपि द्विबहुत्वान्वयोऽस्तु—इत्यवान्तरसङ्गतिः । एककर्तृकेऽपि प्रकृते नित्येऽधिकृतो यथाशक्ति यजमानान्तरसहितोऽङ्गं एककर्तृकत्वं हास्यतीति अनेकयजमानान्वयः । पत्न्यपेक्षया वा अस्तु । यज्ञेऽसहत्वेपि क्रियान्तरे साहित्यात् वसानौ आदधीयातामितिवत् ।

भावात् रूढार्थ एवानुज्ञात इति द्रष्टव्यम् ।

नन्वेवं रूढत्वेनावयवार्थाभावे किमर्थः—'अन्हः खः क्रतौ' इति तद्धितविधिरित्यत्राह—असत्यपीति । विवरणे त्विति । श्रुतिलिङ्गादिषुविरोधे पूर्वबलीयस्त्वे स्थिते वाक्यप्रकरणनयविषयव्याप्त्यर्थमिह विरोध एवाविरोध इति शङ्का निवर्त्यते । द्वयोर्यजमानयोरित्यत्रापि । जाघान्यां त्वविरोध एव विरोध शङ्का निवृत्तेत्यवान्तरसङ्गतिरेव विवरणोक्तेत्यर्थः । कथमत्राविरोधशङ्का कथं वा तन्निरास इत्यत्राह—नञ्समास इति । कुतस्तन्निर्वाह इत्यत्राह—तन्निर्वाहस्त्विति । वाक्यप्रकरणबाधे अभ्युच्चयमाह—श्रुतीति ।

द्वित्व बहुत्वयुक्तं चाचोदनात्तस्य

ज्योतिष्टोमे श्रूयते—युवं हिस्थः स्वः पती इति द्वयोर्यजमानयोः प्रतिपदं कुर्यात् । एते असृग्रमिन्दव इति बहुभ्यो यजमानेभ्य इति । तत्र चिन्ता किमेते प्रतिपदौ प्रकरणे निविशेते । उत द्विबहुयजमानके कुलाययज्ञे बहुयजमानके सत्रे च उत्कृष्येते इति । ननु पूर्वनयादेव पदार्थान्वयानुरोधात् प्रकृतकार्यान्वयत्यागे किमत्राधिकं कथं वा पूर्वपक्ष इत्यत्राह—इहेति । ननु ज्योतिष्टोमेन यजेतेत्येककर्तृकत्व प्रतीतैककर्तृके प्रकृते कर्मणि कथं द्वित्वबहुत्वान्वयः इत्यत्राह—एकेति । यद्यप्येककर्तृकत्वमङ्गं प्रकृतौ श्रुतं तथापि नित्ये प्रयोगेऽधिकृतो यजमानः सर्वशक्तिनयात् यथाशक्ति सम्पादने कृत्स्नसंपादनाशक्त एव सहायतया यजमानान्तरमङ्गीकुर्वन् अङ्गमेककर्तृ-

राद्धान्तस्तु—एककर्तृके एकस्यैवाधिकारात् प्रयोगः। एवमपरस्यापि इति प्रतियजमानं प्रयोगान्यत्वे यदि मिलित्वा एकप्रयोगः स्यात् एकप्रयोगादेकस्याधिकारसिद्धेः एकएव यजमानः स्यात्। अतो यथाशक्ति प्रयोगोऽप्येकस्यैव। अथ शक्त्यभावात् यजमानान्तरनिवेशात् यदि कर्त्रवस्थायामन्यो निवेश्यते। न स यजमानः स्यात्। पत्न्यपेक्षयापि नानेकयजमानता। स्त्रीमात्रस्य नायमेकशेषः। तासामनधिकारात्। पुमांश्चेदेकः एकशेषे

कत्वं हास्यतीति प्रकृतेप्यनेक यजमानान्वयः। प्रकारान्तरेणापि पूर्वपक्षमाह—पत्न्यपेक्षया चेति।

ननु सहत्वेन निविशमानायां पत्न्यां कथं तदपेक्षया द्वित्वं बहुत्वं वा। साहित्ये हि ते भवत इत्यत्राह—यज्ञ इति। ननु क्रियान्तरे साहित्याद्यजमानद्वित्वसमर्थ (नं) कमित्याशङ्क्य दृष्टान्तकथनेनोपपादयति—आदधीयातामिति विधिवदिति। यथा क्षौमे वसानौ अग्निमादधीयातां इति आधाने सहत्वेऽपि पत्न्या अभिधानक्रियापेक्षया साहित्याद् द्वित्वम् तथेहापीत्यर्थः।

राद्धान्तस्त्विति। न तावद्यजमानान्तरानुप्रवेशात् कर्मणि प्रकृते द्वित्वबहुत्वान्वयः। एककर्तृकविषये तदुपसंहारसमर्थ एक एवाधिकारी इत्यधिकारिनिबन्धनप्रयोगोऽपि एकस्यैकः, एवमपरस्याप्यधिकाराधीनं प्रयोगान्तरमिति प्रतियजमानं प्रयोगान्तरत्वे यदि द्वयोर्मिलित्वा एकः प्रयोगः स्यात् तदा एकस्मात् प्रयोगात् एकैकस्याधिकारसिद्धेः एक एव यजमानः स्यात्। तत्र यत्संबन्धितया विहितः प्रयोगोऽनुष्ठितः तस्यैवाधिकारसिद्धेर्यजमानत्वम् नापरस्येति न यजमानद्वित्वसंभवः इत्यर्थः। ननु नित्ये यथाशक्ति प्रयोगादशक्यं एककर्तृकत्वं हास्यतीत्यत्राह—अत इति। एककर्तृकविषये एकस्यैवाधिकारावगतिबलात् नित्ये यथाशक्तिप्रयोगोऽपि एकस्यैवाशक्याङ्ग हानात् न यजमानान्तरानुप्रवेशात्।

ननु न यजमानतयाऽनुप्रवेशः कर्त्रवस्थयात्वनुप्रवेशो ऽस्त्वित्यत्राह—यदीति। पत्न्यपेक्षयापि न द्वित्वबहुत्वान्वय इत्याह—पत्नीति। स्त्री-

परोऽपि स्त्रीपुंससन्देहे धीस्थः पुमानेव । वसानावित्यत्र तु स्ववाक्यस्थाधानान्वयि पुंद्वयाभावादगत्या 'पुमांस्त्रिया' इत्यस्य विषयः । इह प्रकृतान्वयार्थो न तथा । बाह्यक्रियापेक्षया पत्न्या इतरेतरयोगोऽप्यगत्या आधाने । नेह तथा । ननु यजमानपदं आश्रयानपेक्षतयोद्देशकं तद्विशेषणं च द्वयोरित्याद्यविवक्षितं हविरुभयत्ववत् । न चोद्देश्यनिमित्तयोर्विशेषणाविवक्षांप्रति भेदः । विभक्त्यर्थविशेषणाविवक्षापि ग्रहमित्यत्रोक्तेति यजमानमात्र-

---

मात्रस्येति । यागादिकर्मणि पृथक् स्त्रीणामेवानधिकारान्न तासामेवायमेकशेषः । किन्तु पुमधिकारे सहत्वेन निवेशः । ततश्चैकशेषः । कः पुमानिति निश्चयेऽपरोऽपि स्त्रीपुंससन्देहे धीस्थः पुमानेव सरूपैकशेषता, अभ्यर्हितत्वादित्यर्थः ।

नन्वेवं क्षौमेवसानावादधीयातामित्यत्रापि पुंसोरेवैकशेषः स्यादित्यत्राह—वसानावित्यत्रेति । आदधीयातामिति स्ववाक्यस्थप्रकृतान्वयानन्यथासिद्धाधानान्वयिपुंद्वयाभावादगत्या पुमांस्त्रियेति वसानावित्ययं विरूपैकशेषस्य विषयः । नन्वेवमत्रापि प्रकृतयागान्वयि पुंद्वयाभावाद्विरूपैकशेषः स्यादित्यत्राह—इहेति । इह तथा प्रकृतान्वयार्थः पदार्थान्तरान्वयो नास्तीत्यर्थः । इह ज्योतिष्टोमे एकाधिकारे एकप्रयोगे द्वयोर्यजमानयोरित्यस्यानन्वये हेत्वन्तरमाह—बाह्येति । स्ववाक्योपात्तक्रियापेक्षया साहित्यं स्वतः प्राप्तम् । आधाने तु अगत्याऽभिधानक्रियापेक्षया पत्न्या इतरेतरयोगः । इह तु न तथा । कुलाययज्ञादौ संभवात् । नन्विति । अत्र हि यजमानपदस्योद्देश्यसमर्पकत्वमनपेक्षत्वात् द्वयोः बहुभ्य इति च आश्रयापेक्षं तद्विशेषणमेवेत्यविवक्षितम् । हविरुभयत्ववत् उद्देश्यत्वनिमित्तत्वकृतो भेदो विशेषणाविवक्षां प्रति नास्तीत्याह—न चेति । ननु भवतु नाम उपात्तत्वात् द्वित्वादि अविवक्षितम् विभक्त्युपात्ता तु विवक्ष्यतामित्यत्राह—विभक्तीति । द्वित्वाद्यविवक्षायां यजमानमात्रमुद्देश्यम् । तच्च प्रकृतेप्यस्तीति नोत्कर्षः । ग्रन्थोक्तं परिहारमाह—मैवमिति । ननु सापेक्षत्वात् संख्या पदं

मुद्देश्यं प्रकृतेऽप्यस्त्येव। मैवम्। द्वयोः बहुभ्य इति चोद्देशकं यजमानविषयकं तदित्युक्तम्। अयं भावः—सापेक्षमपि सङ्ख्यापदमुद्देशकं अन्यथा सङ्ख्यापदं पक्षेऽप्यनन्वितार्थं स्यात्। यजमानोद्देशे प्रकृतैकयजमानक क्रतुनिवेशात्। हविरार्तौ तूभयत्वं पक्षेऽन्वयीति न सापेक्षमुभयपदं निमित्तार्पकम्। उद्देशके च सङ्ख्यापदे समभिव्याहृतयजमानविषय सङ्ख्यार्थे न विशेषणापेक्षा। अपेक्षायां वा तद्विवक्षायां न क्षतिः। न तूद्देश्ये सङ्ख्योद्देश्या निमित्ते नेति भेदः। न च प्रतिपत्पदादेव यजमानान्वये

नोद्देशकम् अन्यथा उभयपदमपि निमित्तार्पकं स्यादित्यत्राह—अयंभाव इति। सापेक्षत्वेपि सङ्ख्यापदमेवोद्देशकम् अन्यथा तत्पक्षेप्यनन्वितार्थं स्यात्। यजमानपदोद्देशे प्रकृतैकयजमानक्रतुनिवेशात् सर्वथाऽनन्वयाद्वरं सापेक्षस्याप्युद्देशकता प्रयुक्तैकपदानन्वये तद्विना वाक्यमबोधकमनर्थकमेव स्यात्, प्रयुक्ताद्धि प्रतिपत्तिरिति नयात्। हविरार्तावप्येवमेवेति चेत् तत्राह—हविरार्ताविति।

ननु सङ्ख्यापदस्योद्देशकत्वे यजमानपदस्य तद्विशेषणत्वे वाक्यभेदः स्यादित्यत्राह—उद्देशे चेति। विधेयोद्देश्यतद्विशेषणबहिर्भूते न विधिसंस्पर्श इति चेन्न समभिव्याहारमात्रेण उद्देश्यविशेषणत्वेन विधिस्पृष्टार्थता राजसूयवाक्ये राजपदवत्। ननु अगतिका गतिः सा इह न तथा गत्यभावः। अन्यथा सर्वत्र विशेषणत्वेनान्वयोच्छित्तिरित्यत्राह—अपेक्षायां चेति। सापेक्षसंख्यापदस्य समभिव्याहृतयजमानपदव्यतिरेकेणोद्देशापर्यवसानात् तदपेक्षायामपि न काचित् क्षतिः यजमानगतद्वित्वमुद्देश्यमित्यर्थः। उद्देश्ये संख्या उद्देश्या निमित्ते न निमित्तमिति केचिदुभयत्र वैषम्यमूचुः तत् विशेषाभावान्न युक्तमित्याह—न चेति। अपरे तु प्रतिपत्पदं क्रत्वधिकृतकर्तृक प्रथमकर्मभेदवाचीति प्रतिपत्पदादेव यजमानान्वयसिद्धेः यजमानोद्देशवैयर्थ्यापत्तेः सङ्ख्याविशिष्टमुद्देश्यमित्यूचुः तदपि न युक्तमित्याह—न चेति। तत्र हेतुः नार्थवत्त्वमिति। यथाऽन्वयित्वं पदानां व्युत्पत्तिसिद्धं

उद्देशवैयर्थ्यात् सङ्ख्याविशिष्टमुद्देश्यमिति, नार्थवत्त्वं व्युत्पत्तिसिद्धं यथान्वयित्वम्। अतः प्रतिपत्पदं क्रत्वधिकारि प्रथमकर्मभेदवाचीत्यपि व्यर्थम्। न च मन्त्रवर्णतो बहुद्वियजमानान्वयधीरिति। एवं हि न किञ्चिदुद्देशार्थं उद्देशार्थत्वे सति सङ्ख्यापदमुद्देशकमुक्तम्। न च नित्यप्रतिपद्विकल्पहानाय विशेषणविवक्षेति मिथो विकल्पहानायापि सा स्यात्। न च विकल्पभयादुपदेशास्वारस्यमितीयं दिक्। एवं चात्र पूर्वपक्षिपक्षेऽन्वयं प्रकृतेऽपि मत्वा यजमानोद्देशमाह। राद्धान्तिपक्षेऽप्यनन्वयात् सङ्ख्यापदमुद्देशकमुत्कर्षं चाह।

वाक्यस्याबोधकत्वापत्तेः न तथाऽर्थवत्त्वं निरर्थकानुवादानां निर्वपत्यादीनां दर्शनात्। तेषां स्तुत्यर्थतेति चेत् अत्रापि तथात्वमिति भावः। किञ्च प्रतिपत्पदं प्रथमपदार्थमात्रे लोके व्युत्पन्नम्। न यजमान कर्तृककर्मभेदवाचितयेति तदङ्गीकारोऽपि व्यर्थः। इतरेतु युवं हि स्थः स्वपती इति सरूपैकशेषमन्त्रवर्णस्वरसात् द्विबहुयजमानान्वयधीरित्याहुः। तदपि उद्देशार्थत्वे संख्यापदमुद्देशकमिति ग्रन्थोक्तिविरोधात् मन्त्रवर्णावगतद्विबहुत्वबलात् पाशमन्त्रवदुत्कर्षायोगाच्च न युक्तमित्याह—न च मन्त्रेति। अन्येतु यजमानपदस्योद्देशकत्वेऽपि प्रकृते कर्मणि नित्यवद्विहित प्रतिपद्विकल्पहानाय द्वयोरिति विशेषणस्य विवक्षा युक्तेत्याहुः तदपि न युक्तमित्याह—न च नित्येति। कुत इत्यपेक्षायां द्वयोर्बहुभ्य इत्यनयोः व्यवस्था श्रुत्योरन्योन्यविकल्पहानायापि सा विवक्षा स्यात् किमिति नित्यप्रतिपद्विकल्पाहानायेत्युक्तमित्युक्तिदोषमाह—मिथ इति। युक्तिदोषमप्याह—न चेति। न हि प्रयोजनानुसारेण प्रमाणास्वारस्यं युक्तमिति भावः। ननु त्वत्पक्षेपि अन्ययित्वं प्रयोजनमेवेत्याशङ्क्य न तत् प्रयोजनमात्रं किन्तु प्रमाणकोटिः तद्विनाऽभिहिते तद्व्यवहारकारिताप्राप्तिः। ननु संख्यापदमनुद्देशकत्वे सर्वथाऽनन्वयीति कथं पूर्वपक्षोत्थितिरिति मन्दाशंकां निराकरोति एवं चेति।

जाघनी चैकदेशत्वात्

स्थिते वाक्यस्वरसात् प्रकृताप्रकृतकार्यान्वये वाक्यस्वरस चिन्तेहेत्यवान्तरसङ्गतिः। पूर्वपक्षस्तु—जाघन्युद्देशेन पत्नी-संयाजविधिः। एवं विधिपदश्रुतं विधेयम्। जाघनीविधौ हि पदान्तरार्थविधिः। कर्मविधावुद्देश्यतया पदान्तरार्थो विधेय-द्वारा विध्यन्वयि, न साक्षात्। एवं च पशुयागे संपातायाता जाघनी प्रतिपाद्येति न प्रयोज्या न च तत्प्रयुक्त्या पशुप्रयुक्ति-शङ्का प्रतिपत्तेः अप्रयोजकत्वस्थितेः प्रतिपत्तेश्च विध्यपेक्षित-

---

जाघनी चैकदेशत्वात्

दर्शपूर्णमासयोः श्रुतम्-जाघन्या पत्नीः संयाजयन्ति इति। किमेतत् पशावुत्कृष्यते उत प्रकरणे निविशत इतिसंशयः। तदर्थं चिन्ता किं जाघन्युद्देशेन पत्नीसंयाजविधिरुत विपरीतमिति। तत्रावान्तरसंगतिमाह—स्थित इति। प्रकृतकार्यान्वयः सूक्तवाकनिगदसाधारण पदानामप्रकृत कार्यान्वयो द्वादशोपसत्तादेः। ननु जाघन्येति तृतीयया विधेयत्वप्रतीतेः कथं तदुद्देशेन इतरविधिरिति पूर्वपक्षः इत्यत्राह - पूर्वपक्षस्त्विति। पदान्तरार्थ-विधेः विधिसमानपदोपात्तविधेरभ्यर्हितत्वात् जाघन्युद्देशेन पत्नीसंयाज-विधिः। एवं च पदान्तरार्थस्याप्युद्देश्यतया विधेयद्वारा विध्यन्वयोऽस्ति। साक्षात्तु परं नास्ति। किञ्च कर्मविधौ जाघनीप्रवृत्तिरपि [प्रयुक्तिरपि] नास्ति। नापि तत्प्रयुक्त्या पशुप्रयुक्तिशङ्का। कर्मविधौ पशुयागे संपाता-याता जाघन्यस्ति। तत्र प्रतिपत्तितया जाघन्युद्देशेन पत्नीसंयाजविधिः। प्रतिपत्तेश्च प्रतिपाद्याप्रयोजकत्वात्।

ननु प्रतिपत्तिपक्षे कथं तृतीयान्वय इत्यत्राह—प्रतिपत्तेश्चेति नन्विति। कर्मविधावपि पदान्तरार्थस्य पत्नीरित्यस्य विधिस्तुल्यः तस्याप्राप्तेः। तन्नेति। प्रकृतौ पत्नीकर्तृकतया पत्नीसंयाजानामेवावगतेः। चोदकादपि पशौ तथैव सन्निधेः पत्नीकर्तृकमेव धीस्थं विधेयमित्युत्कर्षः।

तया तृतीयान्तमपि संस्कार्यम्, विभक्ति व्यत्यय विधया प्रयाजशेषेणेतिवत् । ननु कर्मविधावपि पत्नीरिति पदान्तरार्थविधिस्तुल्य:; तन्न, पशौ कार्यत: पत्नीसंयाजसन्निधे: पत्नीकर्तृकमेव धीस्थं जाघन्यर्थत्वेनाप्राप्तं विधेयमित्युत्कर्ष: ।

राद्धान्तस्तु—कर्मविधौ पत्न्यर्थविधिर्दुर्वार: । अत: पदान्तरार्थविधि: विशिष्टविधिगौरवं चेति जाघन्येव विधेया । कर्मविधौ प्रकरणान्तरनयात् कर्मान्तरत्वम् । कार्यतो हि न विधायकतया सन्निधि: अतो न प्रत्यभिज्ञेति प्रकरणान्तरमेव । अनुवादे तु पदार्थसन्निध्यपेक्ष: प्राप्तिमात्रादुद्देश: नव प्रयाजा-

---

ननु कार्यत: प्राप्तौ कथं विधिरित्यत्राह—जाघन्यर्थेति । राद्धान्तस्त्विति । जाघनीविधौ पदान्तरार्थविधिमात्रं, कर्मविधौ पत्न्यर्थस्याप्यवश्यं विधेयत्वात् पदार्थान्तरविधि: विशिष्टविधौ गौरवं चेत्यनेकदोषपरिहाराय पत्नीसंयाजोद्देशेन जाघन्येव विधेया ।

ननु कर्मविधौ कथं पत्न्यर्थस्याप्यवश्यं विधेयतेत्यत्राह—कर्मविधाविति । ननु कार्यत: प्राप्तौ पदार्थप्रत्यभिज्ञाने कथं प्रकरणान्तरतेत्यत्राह—कार्यत इति । कार्यत: पदार्थप्राप्तावपि न विधायकतया सन्निधि: विधेरपि विधायकत्वव्यवहारात् । किन्तु करणोपकारजनकत्वरूपेण । अतो न विधित्वरूपेण प्रत्यभिज्ञेति प्रकरणान्तरमेव । नन्वेवं नव प्रयाजान् इति वैकृतविधौ कथं प्रयाजानुवादेन संख्याविधिरित्यत्राह—अनुवादेत्विति । उद्देश्य प्राप्तिमात्रापेक्षित्वात् पदार्थसन्निधिमात्रापेक्षानुवादो युक्त इत्यर्थ: । जाघनीविधिपक्षे उपदेशे विधिविषयत्वात् विधितयैव सन्निधे: प्रत्यभिज्ञा कर्मणो युक्तैवेत्याह—जाघनीविधाविति । ननु नामतया सिद्धत्वेन पत्नीसंयाजविधे: कथं तदनुरक्तजाघनीविधिरिति आह—नामतयापीति । यद्यपि नामता तथापि सविधिकतया विधेयावस्थकर्मोपस्थिते: तदनुरक्तजाघनी विधिर्युक्त इति भाव: ।

निति वत्। जाघनी विधौ तु उपदेशे विधायकतयैव सन्निधेः प्रत्यभिज्ञानामतयापि पत्नीस्संयाजयन्तीति। किञ्चिद्विकृतनामत्वेऽपि प्रत्यभिज्ञयाऽनुवादः। कर्मविधिपक्षे तु न तन्नामतेति पत्न्यर्थवाक्यार्थविध्यापत्तिः। विवरणे त्वेवं—कार्यतः प्राप्ताव-प्रत्यभिज्ञानं, अखण्डजनकवर्गान्तर्गत पत्नीसंयाजादिना प्रातिस्विकरूपेण विधौ तत्तार्हम्! अगत्या नव प्रयाजानित्यादौ स्फुटनाम्ना कार्यप्राप्त्यपेक्षया गुणविधिः। इह तु न तथेति पत्न्यर्थं विध्यापत्तिः विहितजाघन्युपादानं च क्रयादिना युक्तं पशुमनुपादायापि। शेषं सुगमम्।

ननु पत्नीसंयाजानां पत्नीसंयाजपदं नाम न तु पत्नीः संयाजयन्तीति तत्किं तेनानुवादः इत्यत्राह—पत्नीः संयाजयन्तीति। किञ्चिदिति ननु कर्मविधिपक्षे भवतु प्रकरणान्तरनयात् कर्मान्तरता। तथापि कथं पत्न्यर्थविध्यापत्तिरित्यत्राह—कर्मविधीति। पत्नीरित्यस्य विधीयमानकर्मनामत्वायोगात् तस्य च कर्त्रपेक्षायां कर्तृत्वेन पत्न्यर्थविध्यापत्तिः अप्राप्तेः। अतः पदान्तरार्थ विशिष्ट विधिगौरवं तृतीयानाञ्जस्यं च कर्मविधिपक्षे इति कर्मोद्देशेन जाघनी विधेयेति प्रकरण एव निवेश इति भावः।

विवरणेत्विति। चोदकप्राप्तावपि न पत्नीसंयाजानामिह प्रत्यभिज्ञा, न हि पत्नीसंयाजाः स्वरूपेणेह प्राप्यन्ते। किन्तु प्रकरणोपकारकत्वेन। अतोऽखण्डजनकवर्गान्तर्गत पत्नीसंयाजादिना स्वरूपेण विधौ तत्तार्हम्। तेन रूपेण प्राप्त्यभावात्। अतो न जाघनी पत्नीसंयाजसंबन्धविधिः। किन्तु कर्मान्तरविधिरिति पत्न्यर्थविशिष्टविधौ पूर्वोक्तदोषद्वयं दुर्वारमित्यर्थः। नन्वेवं नव प्रयाजान् इत्यत्रापि कार्यतः प्राप्तेः प्रयाजतया सन्निध्यभावात् कथं तदुद्देशेन संख्याविधिरित्यत्राह—अगत्येति। प्रातिस्विकरूपप्राप्त्यभावेऽपि स्फुटनाम्ना कार्यतः प्राप्त्यपेक्षया गुणविधिः इह तु पत्नीः संयाजयन्तीति विकृतत्वान्न स्फुटतेति कर्मविधिपक्षे पत्न्यर्थविध्यापत्तिः। न [नु] प्रकृतिनिवेशे जाघनीप्रयुक्तिः स्यादित्यत्राह—विहितजाघनीति

सन्तर्दनं प्रकृतौ क्रयणवत्

दीर्घसोम इति समानाधिकरण समासोऽयं श्रुतेः। कालतश्च सोमस्य दीर्घता। प्रकृत्यपेक्षया चापेक्षिकी दीर्घता विकृतिभेदे। धृत्यै इति चार्थवादः स्वरसः। आपेक्षिकसोमबहुत्वे विदारणशङ्कोद्भूतेः विकृतिभेद एवोत्कर्ष इत्येकः पक्षः। अपरस्तु आपेक्षिकपर्वदैर्घ्यात्। लतादीर्घतयापि समानाधिकरणता। प्रकरणानुरोधाद्वा व्यधिकरणता दीर्घस्याधिकृतस्य सोम इति एवमप्यनुशासनात्। अर्थवादत्वात् दारणशङ्कामात्रादित्यनुत्कर्षमाह।

यद्यपि प्रकृतौ पशोरभावात् संपातायातजाघनी नास्ति तथापि पशुमनुपादाय विहितजाघनीमात्रोपादानं क्रयादिना युक्तम् व्रीह्यादिवदित्यर्थः। भाष्योक्त संबन्धविधानोपन्यासप्रयोजनं तु सुगममित्याह—शेषमिति।

। सन्तर्दनं प्रकृतौ क्रयणवत्।

ज्योतिष्टोमे अधिषवणफलके प्रकृत्य श्रुतम् दीर्घसोमे सन्तृद्ये धृत्यै इति। तत्र चिन्ता-किं सन्तर्दनं अहर्गणेषूत्कृष्यते किं वा अग्निष्टोम एव निविशते उत संस्थास्विति। तत्र प्रथमपक्षमाह—दीर्घेति। सोमशब्देनात्र निरूढलक्षणया सोमद्रव्यको याग उक्तः ततश्च दीर्घसोम इति दीर्घश्चासौ सोमश्चेति समानाधिकरणतत्पुरुषः मुख्यार्थत्वात्। कथं तस्य क्रियारूपस्य दीर्घतेत्यत्राह—कालत इति। कालतश्च दैर्घ्यं प्रयोगावस्थस्येत्यर्थः। तथापि कथं विकृतिभेदाहर्गणान्वयः इत्यत्राह—प्रकृतीति। स्तुतिपदस्वरसादपि विकृतिभेदान्वय इत्यत्राह—धृत्या इति। विदारणशङ्कायां धृत्या इति धारणस्तुतिः। सा च सोमबहुत्वे। तच्चानेकदिनसाध्यविकृतिभेदएवापेक्षितमिति तत्रैवोत्कर्ष इत्यर्थः। अपरस्त्विति। अग्निष्टोमे एव सन्तर्दननिवेशः अस्मिन्पक्षे सोमशब्दो लतावचनः। लतायाः सर्वत्र दैर्घ्यादापेक्षिकी दीर्घता। अतश्च दीर्घः सोमो यस्येति बहुव्रीहौ समानाधिकरणता।

राद्धान्तस्तु न वैयधिकरण्यं प्रकरणाद्युक्तम् लक्षणापत्तेः खर्वपर्वलता न प्रकृतेति नापेक्षिकं दीर्घत्वं श्रुतिमात्रात्। न चार्थवादः स्वरस इति वरं संस्थास्वेव निवेशः। तत्र हि प्रकृत-नित्यापेक्षं दीर्घकालत्वमर्थवादः। स्वरसश्च। प्रकृतयागा-नुत्कर्षश्चानित्याधिकारार्थत्वेपि प्रकृतयागाधिकारार्थतैव। न च वाच्यं दशमुष्टि त्रिपर्वमितता संस्थास्वपीति न दीर्घता। न चार्थवादः स्वरसः न च नित्यप्रकरणार्थतेति सत्रेष्वेव निवेश इति भङ्गमाहुः।

संस्थास्वपि च तावत्त्वात् सोमस्याभिषवः समः क्रतुपक्षवदेव। अतो धृत्या इति वृथास्तुतिः ॥ तन्निराकरणानर्हमित्यु-पेक्षितम्। सोमयागान्वयाद्धि यावद्यागापूर्वैः प्रकरणिभिः धर्मा-

---

ननु बहुव्रीहित्वे जघन्यतेति पक्षान्तरमाह—प्रकरणेति। षष्ठीतत्पुरुष-स्यानुशासनादित्यर्थः। नन्वेवं प्रकृतौ सोमस्याबहुत्वात् विदारणशङ्कानु-द्भूतेः स्तुतिपदानाञ्जस्यमित्यत्राह—अर्थवादेति। इति यथाकथञ्चित् स्तुतिरित्यर्थः।

राद्धान्तस्त्विति। न प्रकरणमात्रानुरोधात् वैयधिकरण्येनाग्निष्टोमे निवेशः लक्षणापत्तेः। न च दीर्घसोम इति श्रुतिमात्रात् तत्रापेक्षिकं दीर्घत्वं खर्वपर्वलताया अप्रकृतत्वात्। न चार्थवादः स्वरस इति वरमनित्यत्वेपि संस्थासु निवेशः। दीर्घकालत्वं च तासु प्रकृतनित्यापेक्षयाऽस्त्येव। उक्थ्या-दिपर्यायवृद्धेश्च सोमबहुत्वाद्विदारणशङ्कया अर्थवादस्वारस्यं च।

ननु प्रकरणबाधः स्यादित्यत्राह—अनित्येति। यद्यप्यनित्योक्थ्याद्य-धिकारार्थता तथापि प्रकृतसोमयागार्थतेति न सर्वथा प्रकरण बाधः।

ननु संस्थास्वपि दशमुष्टित्रिपर्व परिमितता सोमस्येति न दीर्घता। अत एव नार्थवादः स्वरसः। संस्थानिवेशेपि न नित्यप्रकरणार्थतेति सत्रेष्वेव निवेशो युक्त इति न वाच्यमित्याह—न चेति। एतामेव शङ्कामाश्रित्य परेण भङ्ग आपादितः। सोऽपि निरासानर्ह इत्याह—इति भङ्गमिति। कुत

न्वये प्राप्ते नित्यानित्यसंयोगविरोधात् नित्यसंस्थार्थतोक्ता। इह तु विशेषश्रुतेरनित्यार्थता। तत्रौपदेशिकप्रधान वृद्ध्यनुरोधात् प्राकृतपरिमाणबाधोऽपि युक्तः। इहत्वबाधेनैव विप्रकृष्टपर्वतायामंशुग्रहे वा अनियततया वृद्धिसिद्धेः दीर्घसोमतार्थवादः स्वरसश्चेति न यागान्तररूपसत्राद्यर्थता। सन्तर्दनं दृढबन्धनभेदः। शेषं सुगमम्।

सङ्ख्या युक्तं क्रतोः प्रकरणात् स्यात्

वाक्यादुत्कर्षानुत्कर्षचिन्तागता। इदानीमनुत्कर्षे सिद्ध एव वाक्यार्थचिन्तेति सङ्गतिद्वयम्। प्रवर्ग्याख्यं कर्म याज्ञिकप्रसिद्धम्। तस्य प्रथमयज्ञे निषेधो वाचनिको ज्योतिष्टोमसर्व-

---

इत्यत्राह—सोमयागान्वयाद्धीति। धर्माणां प्रकरणाद्यागान्वये यावद्यागीयापूर्वैः प्रकरणिभिरन्वये प्राप्ते नित्यानित्यसंयोगविरोधात् नित्यसंस्थाग्निष्टोमार्थतोक्ता संस्थानये। इह तु दीर्घसोमे धृत्या इति विशेषश्रुतेरनित्यसंस्थार्थतैव।

यत्तु संस्थास्वपि तावत् सोमस्य कथं दीर्घतेति न दीर्घसोमत्वम् नार्थवादस्वारस्यं चेत्यत्राह—तत्रेति। औपदेशिक प्रधान वृद्ध्यनुरोधात् आतिदेशिकपरिमाणबाध इत्यर्थः। अवाधेनापि परिहारमाह—इहत्विति। सन्तृद्ये इति सन्तर्दनपदार्थमाह—सन्तर्दनमिति।

॥ संख्यायुक्तं क्रतोः प्रकरणात् स्यात् ॥

ज्योतिष्टोमे श्रुतम्—न प्रथमयज्ञे प्रवृञ्ज्यात् इति। तत्र चिन्ता—किमयं प्रवर्ग्यनिषेधः कृत्स्ने क्रतौ निविशते उत प्रथमप्रयोग इति। तत्र पेटिकाभेदपूर्वकं सङ्गतिद्वयमाह—वाक्यादिति। ननु किमिदं प्रवर्ग्यं नाम यन्निषेधस्य वाचनिकस्य ज्योतिष्टोम सर्वप्रयोगान्वयः पूर्वतया उच्यत इत्यत्राह—प्रवर्ग्येति। कुत इत्यत्राह—प्रथमेति। प्रथमयज्ञ इति प्रथमशब्दोऽयं यज्ञसमानाधिकृतः। यज्ञशब्दश्च क्रतुवाची। तथा च सति प्रथमक्रतु संबन्ध एव निषेधस्य। कथं ज्योतिष्टोमस्य प्रथमक्रतुतेत्यत्राह—प्रथमयज्ञतेति। ननु प्रथमत्वादि प्रयोगाश्रितमेव न प्रयोज्याश्रितमित्यत्राह—प्रयोगेति। नन्वत्र

प्रयोगेषु युक्तः। प्रथमपदं हि यज्ञशब्दसमानाधिकरणमत्र। (अत्र) प्रथमयज्ञता च ज्योतिष्टोमस्य 'एष वाव प्रथमो यज्ञ इति वाक्यात् ज्ञातेति तत्रैव निषेधः। प्रयोगावस्थाश्रितमपि प्रथमत्वादि प्रयोज्यस्याप्यवस्थावतोऽवस्थाद्वारा युक्तमेव। एवं च निषेधविधेः कृत्स्नक्रतुवर्तित्वेति प्रकरणानुग्रहः।

राद्धान्तस्तु—यद्यप्येष प्रथमो ज्योतिष्टोम इत्युपक्रमः तथापि य एतेनानिष्ट्वेति प्रयोगपरम् य इति कर्तुः निर्देशात् कर्तुः प्रयोगान्वयात्। वाक्यं च ज्योतिष्टोमस्य प्रथमप्रयोगः कार्य इत्येवं परं न ज्योतिष्टोमः कार्य इत्येवं परम्। प्रयोज्य एव च प्रयोगो भवतीति प्रयोगवाच्यपि पदमन्वयीति एष प्रथम-प्रयोगो यज्ञानां यत् ज्योतिष्टोमप्रयोग इत्यर्थः। एवं निषेधोऽपि

भाष्ये प्रकरणानुग्रहः पूर्वपक्षेऽभ्युच्चय उक्तः। सोऽयुक्तः राद्धान्तेऽपि प्रकरणनिवेशादित्यत्राह—एवंचेति।

राद्धान्तस्त्विति। यद्यप्येषवाव वाक्ये एव प्रथमो ज्योतिष्टोम इत्युपक्रमः तथापि य एतेनानिष्ट्वेतिक्त्वान्तखण्डे यः इति कर्तृ निर्देशात् एष प्रथमो यज्ज्योतिष्टोमः इत्यत्रापि प्रयोगपरतैव। एष प्रथमप्रयोगो यज्ञानां यज्ञप्रयोगाणां यज्ज्योतिष्टोमप्रयोग इत्येवं वाक्यस्यार्थे कर्तृ निर्देशे किमिति प्रयोगपरतेत्यत्राह—वाक्यं चेति। प्रथमप्रयोज्यवाचि यज्ञपदस्य कथमन्वय इत्यत्राह—प्रयोज्य इति। भवत्वेवं एषवाव वाक्ये, निषेधवाक्ये कथमित्यत्राह—एवमिति। प्रथमत्वस्य प्रयोगान्वयान्न प्रथमयज्ञ इति यज्ञपदं प्रयोगपरमित्यर्थः।

ननु अवस्थारूपप्रयोगद्वारा अवस्थावति प्रयोज्येऽपि प्रथमत्वात् किमिति यज्ञपदे जघन्यतेत्यत्राह—प्रयोज्येति। ननु यज्ञपदे वा लक्षणा प्रथम-पदे वेति को विशेषइत्यत्राह—मुख्येति। मुख्यत्वं प्रथमपठितत्वं, कौषीतकि-ब्राह्मणे ज्योतिष्टोमप्रकरणे पुरस्तादुपसदां प्रवर्ग्येण प्रचरन्तीति प्रवर्ग्य-विधानात् तेन सह निषेधस्य विकल्पादपि यज्ञपदं प्रयोगपरं न प्रयोज्यपर-

प्रथमयज्ञे यज्ञप्रयोगे प्रथम इत्यर्थः। प्रयोज्ये स्वतः प्रथमत्वादर्शनात् अवस्थावत्परत्वे प्रथमपदे लक्षणा स्यात्। मुख्य प्रथमपदानुरोधात् यज्ञपदे प्रयोगलक्षणापि न दोषः। किञ्च कौषीतकिब्राह्मणे ज्योतिष्टोमप्रकरणे एव प्रवर्ग्यविधिरस्ति। स निषेधेन विकल्प्येत। प्रयोगे तु निषेधो (न प्रयोज्ये) नैमित्तिको न तथा।

श्रीकरस्तु—प्रवर्ग्यविधेः कृत्स्नप्राप्त्यपेक्षः क्वचिन्निषेधः तद्वैषम्यं माभूदिति पर्युदासमाह तन्नैमित्तिको निषेध इत्येवं निरस्तम्। परैरनारभ्याधीतो विधिरुक्तः श्रोत्रियानूचानस्यापरोऽग्निष्टोमे। यद्यप्येतद्विधिद्वयमस्ति तथापि निमित्तिको निषेधो न दुष्टः।

मित्याह—किञ्चेति। ननु प्रयोगे निषेधेऽपि प्राप्त्यपेक्षत्वात् तस्य विकल्पो दुर्वार इत्यत्राह—प्रयोगेत्विति। प्रयोज्यगता प्राप्तिः, निषेधस्तु प्रथमप्रयोग निमित्तक इति भिन्नविषयत्वान्न विकल्पः। किन्तु प्रथमप्रयोगे बाधएवाङ्गीकार्यः "नैमित्तिको नित्यकृत्यं विप्रकृतये"ति नयात्। अथ सर्वथा बाधाद्विकल्पो न्याय्य इति चेन्न, सर्वस्मिन् प्रयोगे विकल्पादेकस्मिन् प्रयोगे विनियोगानुरोधाद्बाध एव न्याय्यः। विकल्प पक्षेप्येकप्रयोगे सर्वथा बाधात्। ग्रहणाग्रहणयोस्त्वेवंविधगत्यभावात् विकल्पोऽङ्गीकृत इति भावः। एवं च नैमित्तिकनिषेधाङ्गीकारे श्रीकरोक्तः कृत्स्नविषये प्राप्तिः निषेधस्तु क्वचिदिति वैषम्यपरिहाराय पर्युदासो न युक्त इत्याह—श्रीकरस्त्विति। नञः पर्युदासान्निषेधोऽभ्यर्हित इतिभावः। परैरिति। प्रवर्ग्यं प्रवृणक्तीत्यनारभ्याधीतं वाक्यम्। यः श्रोत्रियोऽनूचानः स्यात् सोऽग्निष्टोमे प्रवृणक्तीत्यपरम् अतो वचनद्वयबलात् प्रथमप्रयोगेपि विकल्पोऽस्त्वित्युक्तम् परैरित्यर्थः। दूषयति—यदिति। यद्यप्येतद्विधिद्वयमस्ति तथापि नैमित्तिक तिषेधस्य न काचित् क्षतिः वाक्यत्रयस्यापि कालवर्णविशेष स्वरूपविधायकतयाऽन्यथासिद्धेरित्यर्थः।

पौष्णम्

प्रकरणे पूषा न देवतेत्युत्कर्षः। द्वादशोपसत्तावत् सिद्ध एवात्र स्मारितः। उत्तरविवक्षयाऽधिकरणमपि यद्भाष्ये कृतं परमतं तु तत्।

तत्सर्वार्थमविशेषात्

पौष्णे चरौ पशौ पुरोडाशे च सर्वत्र पेषणं युक्तम्। वाक्यसङ्कोचे हेत्वभावात्। यद्यपि पुरोडाशे नियतमेव प्रकृतिपुरोडाशागतं तथापि पौष्णतया अप्राप्तं विधेयम्। शक्यं च पिष्टं प्रपिष्टं कर्तुं अदृष्टार्थं चेवं चरावपि इत्यनुष्ठानफलको विधिः। पशौ च हृदयाद्याकृतिनाशो वाक्यादस्तु विशसनादिविधेरिव पश्वाकृति नाशः।

पौष्णं पेषणम्

दर्शपूर्णमासयोः "पूषाप्रपिष्टभागोऽदन्तको हि इति पूषसंबन्धितया पेषणं विहितम्। तत्प्रकरणे पूष्णो देवतात्वाभावात् पूषदेवताककर्मण्युत्कृष्यते द्वादशोपसत्तावत्। अहीननयसिद्धमेव उत्तरविवक्षया स्मारितम्। भाष्ये तु पूर्वोत्तरपक्षरचना परमताभिप्रयायेणेत्याह—प्रकरण इति।

तत्सर्वार्थमविशेषात्

उक्तं पौष्णपेषणं विकृतावुत्कृष्यत इति। इदानीमयं संशयः-किं यावत्पौष्णं चरुपुरोडाश पशुरूपं तत्र सर्वत्र पेषणं विधीयते; उत चरावेवेति। तत्रावान्तरसंगतेः स्फुटत्वात् तां विहाय पूर्वपक्षमाह—पौष्ण इति। पूषा प्रपिष्ट भाग इति पौष्ण इति वाक्यात् पूषदेवताक कर्ममात्रप्रतीतेः तत्संकोचे हेत्वभावात् सर्वत्र पेषणं युक्तम्।

ननु पुरोडाशे प्रकृतिपुरोडाशादागतं पेषणं नियतमेवेति कथं तत्र विधिरिति शङ्कामनूद्य पौष्णत्वेनाप्राप्तेः विधिरुपपन्न इत्याह—यद्यपीति। ननु प्रकृतिपेषणेनैव पेषण कार्यसिद्धेः अनुष्ठानफलको विधिर्न स्यादित्याशङ्क्य पिष्टेऽपि पेषणमदृष्टार्थम् कृष्णलपाकवत् राद्धान्तेऽपि पेषणस्य चरावदृष्टार्थत्वादित्यत्राह - शक्यमिति। यथा विशसनादि विधिना पश्वा-

राद्धान्तस्तु—पुरोडाशेऽपि प्रपिष्टतयैव प्राप्तिः। न च फलशून्यं व्यापारमात्रं विधेयम्। अन्यत्र लोकसिद्धसफलव्यापारविधेरेव संभवात्। कृष्णलमात्रे पाकविधिरगत्याऽस्तु। न तथा पेषणं, दृष्टं तु प्राकृतेनैव सिद्धम्। कृष्णले त्वप्रसिद्धं पाकाद् दृष्टं कार्यम्। पौष्णतया च न विधिः किन्तु अपूर्वार्थतया। स च लब्ध एव। अननुष्ठेयमपि यदि विधेयमर्थवादोऽपि विधेयार्थः स्यात्। पशावप्याकृतिविनाशं विना पौष्णान्तरे शक्यत्वात् अयुक्तः। विशसनाद्यगत्या तत्रेति चरावेव विधिः। तत्र हि प्राकृतद्वारलोपाद्बाधितम्। न च चरुताविरोधः, पक्तिभेदसाध्येहि चरु शब्दः। अस्तिचान्तरूष्मानवस्राविंत पाकसिद्धे पिष्टकेऽपि। भाष्ये तु यत् पिष्ट्वापि हृदयादि क्रियायां

कृतिनाशः तथा पेषणविधिवाक्यात् हृदयाद्याकृतिनाशोऽस्त्वित्यर्थः।

राद्धान्तस्त्विति। न तावन् पुरोडाशे पेषण विधिः। हविर्निर्वृत्त्यनुगुणचूर्णताफलकस्यैव पेषणस्य प्रकृतितः प्राप्तेः। प्रपिष्टतयेति। प्रपिष्टत्वफलकतयेत्यर्थः। ननु पिष्टताफलशून्यत्वे तद्धेतुव्यापारमात्रमदृष्टार्थं विधेयं कृष्णलपाकवदित्याह—न च फलेति। अन्यत्र चरौ लोकप्रसिद्ध सफलविधिव्यापारसंभवे तदयोगात्। कृष्णले तु तन्मात्रोद्देशेन पाकविधेरगत्या तत्रादृष्टार्थता। पेषणस्य तु देवतासंबन्धितया विधिः न द्रव्यसंबन्धितयेति भेद इत्यर्थः। दृष्टं तु कार्यं पुरोडाशे प्राकृतेनैव पेषणेनैव सिद्धम्। कृष्णले पाकात् दृष्टंकार्यं लोके न प्रसिद्धम्। तदाह—दृष्टमिति।

ननु पौष्णतया प्राप्त्यभावात् तेन रूपेण विधिरित्युक्तमित्यत्राह—पौष्णतयेति। ननु माभूदष्ठानकल्पकत्वं विधिः किमिति न भवतीत्यत्राह—अननुष्ठेयमिति। पशाविति। आकृतिबाधं विना पौष्णान्तरे विधातुं शक्तेः तद्बाधसव्यपेक्षः पशौविधिर्न युक्त इति। चरावेव। विशसनादि त्वगत्या पशावेवेत्यर्थः। ननु चरावपि पेषणं प्रकृतितः प्राप्तमित्यत्राह—तत्रेति। ननु चरुत्वविरोधात्तत्रापि पेषणमयोग्यमित्यत्राह—न चेति। तत्र हेतुः पङ्क्तीति। अनवस्रावितान्तरूष्मपाकविशेषाभिनिर्वृत्तिरेव चरुशब्दप्रवृत्तिनिमित्तं

पूर्वार्धादि देशबाधापत्तिरुक्ता । प्रौढोक्तिः सा । पारिणामिकं हृदयादि पिष्ट्वा न शक्यम् ।

एकस्मिन्

आग्नेयेन्द्रपीताभ्यामधिकमिह तद्धितसमासयोः सामर्थ्ये सत्युपत्तेः केवलाग्नीन्द्रदैवत्ये विधिः इह न पूष्णस्तथा श्रुतिः । प्रपिष्टभागपदं समासकृदन्तत्वेऽपि पूषपरम् । केवले सद्वितीये च पूष्णि समर्थमिति ऐन्द्रापौष्णेऽपि पेषणं विधिमर्हति । अदन्ततास्तुति सौरस्यं च यावत् पूषान्वये सोमापौष्णचरुविधौ च नेमपिष्टतानुवादसिद्धिः, अन्यथा नेमपिष्टतापि विधेयेति गौरवम् । एवं सोमापौष्णोद्देशेन च तद्विधौ चरुर्न विशेषणमिति सोमापौष्णपशौ पुरोडाशे च तद्विधिः स्यात् । नह्यर्ध-

---

नौदनत्वम् । तत्रैव चरुशब्दप्रयोगात् । भाष्ये त्विति । परमार्थतः पेषणे पशोः कृते पिष्टेन मांसेन हृदयादिना शक्यं पारिणामिकत्वात्तस्य तथापि भाष्ये यत्तदङ्गीकृत्यापि अवदाने देशबाधापत्तिरुक्ता तत्प्रौढवादेनेत्यर्थः ।

॥ एकस्मिन्नेकसंयोगात् ॥

अस्ति राजसूये उत्तरस्मिन् त्र्यहर्युक्ते ऐन्द्रापौष्णचरुः । किं तत्राप्येतत्पेषणं कर्तव्यं उत नेति चिन्ता । ननु आग्नेय-ऐन्द्रपीतनययोः एकदेवत्यान्वयो धर्मो न द्विदेवत्यान्वयीत्युक्तम् । तत्केन विशेषेणात्र पूर्वपक्ष इत्यत्राह— आग्नेयीति । युक्तमाग्नेयैन्द्रपीतयोः एकदेवत्ये विधिरिति तद्धितसमासयोः सामर्थ्ये सत्युत्पत्तेः । इह तु प्रपिष्टभागपदं प्रपिष्टोभागो यस्येति समासेऽपि अन्यपदार्थपूषपरम् । प्रपिष्टं भजतीति प्रपिष्टभाग इति वा सरूपतयाऽणि कृते छन्दस्तया च गत्वे कृदन्तत्वेऽपि पूषपरम् । तत्र केवले सद्वितीये च पूष्णि समर्थमिति द्विदेवत्येऽपि पेषणं विधिमर्हतीत्यर्थः । स्तुतिसौरस्यादपि यावत्पूषान्वय इत्याह—अदन्ततेति । तथा नेमपिष्टताऽनुवादश्च यावत्पूषान्वय इत्याह— सोमेति । सोमापौष्णं नेमपिष्टं चरुं निर्वपेत् पशुकामः इति सोमापौष्णचरुविधाने नेमपिष्टतानुवादश्च पेषणस्य यावत्पूषान्वये

पिष्टतायां हृदयाविनाशः। न चार्धपिष्टता पुरोडाशे प्राप्ता।

राद्धान्तस्तु—कार्यप्रयुक्ता धर्माः। एवं च न पूष्णः प्रपिष्टं किन्तु पूषसंबन्धलक्षिते कार्यसाधनीभूते यागे, पूष्णश्च न देवतात्वादन्यः संबन्धः न च यत्रान्यसहितः पूषादेवता तत्र यथेति न द्विदेवत्ये पिष्टं स्तुतिसौरस्यं तु लिङ्गं नेमपिष्टता विधौ। तद्गुणास्तु विधीयेरन्निति नयेन न सोमापौष्णोद्देश इति चरावेव नेमपिष्टता।

॥ इति श्रीभवनाथमिश्रविरचिते मीमांसानयविवेके तृतीयाऽध्यायस्य तृतीयपादः॥

सिद्ध्यति सर्वपेषणे नेमपेषणमप्यस्तीति। अन्यथा नेमपिष्टता विधेया सोमापौष्णं चेति विधिगौरवम्। नन्वेतत्परिहाराय सोमापौष्णोद्देशेन नेमपिष्टतैव विधेयेत्यत्राह—सोमापौष्णेति। उद्देश्यविशेषणस्य चरोः अविवक्षितत्वात् पशौ पुरोडाशे च तद्विधिः स्यादित्यर्थः।

ननु पशौ पुरोडाशे च हृदयादिनाशात् प्राप्तेश्च न तद्विधिरित्यत्राह—न हीति। राद्धान्तस्त्विति। कार्यप्रयुक्तत्वात् तदन्वयिन एव धर्माः। एवं च पेषणं न पूष्णः किन्तु साक्षात्कार्येण सहान्वयानर्हम्। तत्साधनीभूतस्य पूषसंबन्धलक्षितस्य यागस्य भवति। न च पूष्णो यागेन सह देवतात्वादन्यः संबन्धोऽस्ति। ततः किमित्यत्राह—न चेति। यत्रान्यसहितः पूषा देवता न तत्र पूष्णो देवतात्वमिति केवलपूषसंबन्धिधर्मो न द्विदेवत्ये। स्तुतिसौरस्यं तु लिङ्गमात्रं न प्रापकमित्याह—स्तुतीति। नेमपिष्टतेति। नेमपिष्टताया नानुवादः किन्तु सा विधेया। ततश्च तद्गुणाधिकरणन्यायेन नेमपिष्टता सोमापौष्ण चरुविशिष्ट कर्मान्तरविधिरिति न सौमापौष्णोद्देश इति चरावेव नेमपिष्टता।

इत्यात्रेयसुदर्शनाचार्यशिष्यस्य
श्रीरङ्गनाथसूनोर्वरदराजस्य कृतौ
नयविवेक दीपिकायां तृतीयाध्यायस्य तृतीयः पादः

तृतीये चतुर्थः पादः

निवीतमिति मनुष्यधर्मः शब्दस्य तत्प्रधानत्वात्

ननु विधिवन्निगदोऽपि एकवाक्यताबलात् स्तुत्यर्थ उक्तः। नित्याप्राप्तापि अनृतवादिनी वागिति स्तुतिरुक्ता। प्राचीनावीतं पक्षेऽप्यप्राप्तेर्विधेयम्। अतो वाक्यभेदे आवश्यके निवीतविधिरस्त्विति चेन्न। प्राचीनावीतं वचनान्तरप्राप्तं यतः।

मैवम्। प्रकरणाङ्गतया पक्षेऽप्यप्राप्तेर्विधिरित्यधिकाशङ्का। अयं भावः। प्रायेणार्थवादा न प्रकरणाङ्गयोग्यार्थाः। विधि-

---

वरदराजीये

तृतीयाध्यायस्य चतुर्थः पादः

निवीतं मनुष्यधर्मः। दर्शपूर्णमासयोः श्रुतम्—"निवीतं मनुष्याणां प्राचीनावीतं पितृणामुपवीतं देवानामुपव्ययते देवलक्ष्ममेव तत्कुरुते" इति। निवीतं मनुष्याणामित्यत्र किमयं विधिरुतार्थवादः। यदा विधिस्तदा किं पुरुषधर्मः कर्मधर्मो वा। यदा कर्मधर्मस्तदा किं प्रकरणे सर्वत्र निविशते किं वा मनुष्यप्रधाने कर्मणि। अथवा अन्यत्रातिथिपूजादिके उत्कर्ष इति चिन्ता। पूर्वपादे वाक्याधीनशेषत्वविशेषमुक्तं वाक्यशेषत्व ज्ञापकं नेति पादान्तरम्। अनन्तरं चात्रपादे क्रत्वर्थताचिन्ता, अपवादतः पुरुषार्थताचिन्तापि।

पूर्वपक्षमाक्षिपति—नन्विति। यद्यपि विधिवन्निगदा एते तथापि तेषामप्येकवाक्यताबलादर्थवादपादे स्तुत्यर्थत्वमुक्तम्। तत्कथं विधिशङ्का। ननु नित्यप्राप्त्यभावे कथं स्तुतितेत्यत्राह—नित्येति। शङ्कते—प्राचीनावीतमिति। प्राचीनावीतस्य पक्षेऽप्यप्राप्तेः अवश्यं विधेयता। तद्विधेयत्वे च वाक्यभेद आवश्यकः। ततश्च वाक्यभेदे अन्यतो मध्यस्थात् प्रवृत्ते प्रवृत्तिविशेषकरत्वार्थं निवीतस्यापि विधिरित्यर्थः। नेति। वचनान्तरेण प्राचीना-

वन्निगदा अपि ऊर्जा पशूनाप्नोतीति नाङ्गार्पणयोग्याः, फलान्वयादधिकारार्था एव। एकं वृणीते इत्यादयोऽपि त्रीन् वृणीते इति प्रकरणाङ्गतया प्राप्तमवयुत्यानुवदन्ति। निवीतादिस्तु न तथेत्यङ्गतया ग्राहकाञ्जस्यम्। एकवाक्यतानुरोधि हि ग्राहक इति चेन्न। उक्तं हि विवरणे निवीतोपवीतयो नानोद्देश्यान्वयिनोरेकवाक्यतैव नेति।

राद्धान्तस्तु प्रकरणाङ्गत्वमशक्यं मनुष्यधर्मत्वापत्तेः परं प्रायप्राप्त्याऽर्थवादता। न चातिथ्ये मनुष्यप्रधानेविधिः। मनुष्यस्यैव तद्व्यभिचारात् पुरुषधर्मतैव। आतिथ्यधर्मत्वेऽपि

वीतीत्यनेन प्राचीनावीतस्यापि प्राप्तेर्नतद्विधेयत्वमित्यर्थः। मैवमिति। नियोगाङ्गत्वेन तस्य पक्षेप्यप्राप्ते विधिरित्यधिकाशङ्का ग्रन्थोक्तेत्यर्थः। नन्वेवं ऊर्जा पशूनामिति एकं वृणीते इत्यादयोऽपि प्रकरणाङ्गतया विधेयाः स्युरित्यत्राह—अयं भाव इति। सर्वत्रार्थवादाः प्रायेण न प्रकरणाङ्ग योग्यार्थाः। नाङ्गार्पण योग्याः एकं वृणीते इत्यादयोऽपि त्रीन् वृणीत इति प्रकरणाङ्गतयाप्राप्तं त्रित्वमवयुत्यानुवदन्तीति न तेप्यङ्गार्पणार्हाः। निवीतादिस्तु (अ) न तथाधिकारार्थाः नापि अङ्गतया प्राप्तानुवादः प्राप्तेरभावात्। अतोऽङ्गत्वेन विधेयतया प्राप्तानुवादः विधेयतया ग्राहकाञ्जस्यमित्यर्थः।

ननु प्रतीयमानैकवाक्यत्वानुरोधिग्राहक इति कथं तद्विरोधि निवीतादि विधिताशङ्केति चोदयति—एकेति। विवरणोक्तं परिहारमाह—उक्तं हीति। मनुष्याणां देवानामित्युद्देश्यभेदेन नियोगभेदात् निवीतोपवीतयोरेकवाक्यतैव नास्तीत्यर्थः।

राद्धान्तस्त्विति। यद्यपि विधिस्तथापि प्रकरणाङ्गत्वमशक्यम् मनुष्याणामिति श्रुतेर्मनुष्यधर्मतापत्तेः। ततश्च मनुष्यधर्मत्वे प्रायप्राप्त्या परमर्थवादतैव।

ननु मनुष्याणामिति श्रुतावपि किमिति मनुष्यधर्मता मनुष्यप्रधानके आतिथ्यकर्मणि विधिरस्त्वित्यत्राह—न चेति। तत्र हेतुः मनुष्यस्येति।

प्रकरणबाधान्न मुक्तिः । प्राचीनावीतं पितृयज्ञनिवेशि प्रकरणे न स्यात् । न च प्राकरणिके मनुष्यप्राधानकेऽन्वाहार्ये विशेषे निवेशः । न हि तत्र मनुष्याः प्रधानं, द्वारमात्रं क्रत्वङ्गत्वे । मनुष्यद्वारकत्वं लिङ्गप्राप्तमनुवाद्यं चेति चेन्न, तदा प्रधानत्वधीबाधः । षष्ठी प्राधान्यमाहेति चेन्न, उद्देश्यतया प्राधान्यार्थतैव । अन्यथा लिङ्गलभ्ये मनुष्यश्रुतिर्व्यर्थैवेतीयं दिक् । अन्यनिन्दयापि स्तुत्यैकवाक्यतया प्रकरणे प्रतीत्यन्वयिता युक्ता ।

दिग्विभागश्चतद्वत्

प्रायप्राप्तं निवीतं विध्यन्तरस्तुत्यर्थं युक्तम् । प्रतीच्यभि-

---

आतिथ्यान्वयानवगतेः मनुष्यद्वारा तत्संबन्धोऽपि न, मनुष्यस्य तद्व्यभिचारात् । अतः पुरुषधर्मतैव । प्रकरणबाध इति चेत् आतिथ्यधर्मत्वेपि प्रकरणबाधान्न मुक्तिः । किञ्च विधिपक्षे प्राचीनावीतं पितृयज्ञ निवेशि प्रकरणे न स्यात् । ननु प्रकरण एवान्वाहार्ये मनुष्यप्रधानके निवेशोऽस्तु इत्यत्राह—न चेति । तत्र हेतुः—न हीति । न हि तत्रान्वाहार्यदानं मनुष्यसंस्कारकक्रत्वङ्गतया तत्र द्वारमात्रं मनुष्याः । तर्हि तदेव द्वारत्वं लिङ्गात् प्राप्तं मनुष्याणामनुवाद्यमिति शङ्कते—मनुष्येति । नेति । षष्ठ्यवगत प्राधान्यधीबाध इत्यर्थः । न च [नु] षष्ठी प्राधान्यमाहेति चेन्न, उद्देश्यतया षष्ठी प्राधान्यार्थकर्तृत्वेन [एव] । गुणत्वेन संबन्धपरत्वे मनुष्यश्रुतिर्व्यर्थैव लिङ्गतया प्राप्तेरित्यत्राह—अन्यथेति ।

ननु कथं व्यर्थता अनुवादतैवास्तु इत्यत्राह—इयं दिगिति । तस्यानुवादकत्वे निवीतमित्येतावतैव विधिः स्यात् तत्रोद्देश्यविशेषाश्रवणात् प्रकरणे सर्वत्र निवेशः । ततश्चोपवीतेन विकल्पः । अतः प्रतीतैकवाक्यतार्थं विकल्पहानार्थं च स्तुत्यैकवाक्यतेत्यर्थः । नन्वन्यसंकीर्तनेनैव कथमन्यस्तुतिरित्यत्राह—अन्येति ।

दिग्विभागश्चतद्वत्

ज्योतिष्टोमे प्राचीं देवा दक्षिणां पितरः प्रतीचीं मनुष्या उदीचीं रुद्राः इति श्रुतम् । अत्र प्रतीचीं मनुष्या इत्यत्र पूर्वाधिकरणवत्संशयः । नन

मुखत्वं उदीच्यभिमुखत्वं वा न तथेति अधिकाशङ्का तद्वदिति निरस्ता। प्रातर्मध्यान्हयोः प्रत्यगुदङ्मुखतया पृष्ठतोऽर्के सुखं मनुष्याश्चेष्टन्ते। प्रायेण प्रातर्मध्याह्नयोः कर्मेत्येवमत्रापि प्राप्तिः।

परुषि दितपूर्णघृतविदग्धं च तद्वत्

परुषिदिनादिषु च मूलाग्रान्तरा बर्हिरादि लवनं सौकर्म्यप्राप्तं पूर्णग्रहे मानसौकर्यात्। अश्रृतोऽपि प्रायेण रोगदानाद्रौद्रः रौद्रपदस्य तथा व्युत्पत्त्याश्रयणात्। विदग्धोऽपि मलिनवर्णः तद्वर्णवस्त्रादेर्नैर्ऋत्यर्हत्वात् तद्दैवत्यधीरित्येव स्तुतिः निष्पक्वं तक्रकाञ्जिकादि क्षोदः। निष्पक्वमायुतं विलीनं नवनीतं वा। तच्च पामनमनुष्याणां शिरसि सुखदं प्राप्तमेव, एवमन्यथा अन्यथा प्राप्तेरुदाहरणप्रपञ्चः॥

पूर्वनयेनात्रापि स्तुतित्वे सिद्धे कामधिकांशङ्कां निवर्तयितुं अतिदेशइत्यत्राह—प्रायेति। प्रायप्राप्तिमाह—प्रातरिति। ननु प्रातर्मध्यान्हयोरेवकर्मप्राप्तिः कुत इत्यत्राह—प्रायेणेति।

परुषिदित

दर्शपूर्णमासयोः "यत्परुषिदिनं तद्देवानां यदन्तरा तन्मनुष्याणां यत्समूलं तत्पितृणां इति, तथा यो विदग्धः स नैर्ऋतः योऽश्रृतः स रौद्रः यः श्रृतः स सदेवः इतिश्रुतम्। ज्योतिष्टोमे यत्पूर्णं तन्मनुष्याणां उपर्यर्धो देवानां अर्धः पितृणां इति श्रुतम्। तथाऽमृतं देवानां मस्तु पितृणां निष्पक्वं मनुष्याणां" इति। तत्र रौद्र मनुष्य संबन्धादिषु यत्र कर्माङ्गतया विधिसंभवः तत्र चिन्ता-निवीतवदेव संशयपूर्वोत्तरपक्षाः। तत्र प्रायप्राप्तिमाह—परुषि दिनादिष्विति। पामनः शिरसि विद्यमानपामक इत्यर्थः।

नन्वेष्वप्युदाहरणेषु निवीतनयेनैव स्तुतित्वे सिद्धे किं प्रपञ्चेन, किमिति वा योगविभाग इत्यत्राह—एवमिति। योगविभागस्तु वैचित्र्यार्थः।

अकर्म क्रतुसंयुक्तम्

स्मार्तः पुरुषधर्मः क्रत्वक्रतुगतपुरुषव्यापिनिषेधः। क्रतौ च तत् तुल्यतया निषेधश्रुतिस्तद्विशेषानुवादः। यद्यपि विध्यन्तरैकवाक्यतया निवीतादेः स्तुत्यर्थोऽनुवादः इह न तथा तथापि कथंचित्प्राप्त्या क्रतावनुवादसाम्यादवान्तरसङ्गतिः, पूर्वपक्षोत्थानं च। स्मार्ते हि दानवत् नानृतं वदेत् इत्यत्राधिकारी निषेध्यकर्ता, अत्रापि स एवान्तरङ्ग आवश्यकः। क्रत्वङ्गतापि न साधिकारस्य येनाधिकारभेदादप्रत्यभिज्ञायां नानुवादः स्यात्। न च स्मार्तेऽनर्थहानार्थिनोऽधिकारः अश्रुतेः। निवृत्तेः निषेध्यकर्तुरधिकारतः सिद्धेः अर्थादप्यधिकारो धनार्जननियम-

---

विवरणे वैचित्र्यप्रपञ्चार्थं पृथग्योगकरणमिति। विध्येकवाक्यत्वेनैव स्तुतित्वे सिद्धेपि सर्वत्र प्राप्तिदर्शनमभ्युच्चयेनेति मन्तव्यम्।

अकर्म क्रतुसंयुक्तम्

दर्शपूर्णमासयोः श्रुतम्-नानृतं वदेदिति। तत्र चिन्ता किमनृतवदन निषेधः पुरुषार्थस्मार्तनिषेधानुवादः [उत] किं क्रत्वर्थतया विधिरिति। तत्र पूर्वपक्षोत्थानमवान्तर संङ्गतिं चाह—स्मार्त इति। यद्यपि प्रकरणाधीतं श्रौतं वाक्यं, असन्निहितस्मार्तपुरुषार्थनिषेधानुवादो न युक्तः तथापि पुरुषार्थं स्मार्तनिषेधः क्रतुगतमपि पुरुषं व्याप्नोति अतो नासन्निधिः। न च श्रुतिवैषम्यादपि नानुवादतेति शङ्क्यम्। यतो नानृतं वदेदिति श्रुते क्रतौ श्रुतिः स्मार्तं निषेध श्रुतितुल्या स एव विषयः स एवाधिकारीति ततोऽनुवादतैव।

ननु सर्वपुरुष व्यापी स्मार्तः श्रौतस्तु क्रतुपुरुषव्यापीति कथमनुवाद इत्यत्राह—तद्विशेषेति। अनुवाद्यस्य महाविषयत्वेप्यनुवादस्यैकदेशविषयत्वमदोष इत्यर्थः। ननु निवीतादौ विध्यन्तरैकवाक्यतया स्तुत्यर्थोऽनुवादः इह न तथेति कथमवान्तरसंगतिरिति शङ्कामनूद्य कथञ्चित्प्राप्त्याऽनुवाद साम्यात् तामाह—यद्यपीति। कथं तुल्यश्रुतितेत्यत्राह—स्मार्तेहीति।

वत् । ननु श्रौतो निषेधः क्रत्वर्थप्रसक्तेः प्रकरणाद्भाति । नहि स्वयं क्रतोः साद्गुण्यमकुर्वन् क्रत्वर्थप्रसक्तिं निवारयितुं शक्नोति अतोऽयं निषेधः क्रत्वङ्गं स्मार्तानुवादो न युक्तः, तन्न, क्रत्वङ्गं तावदनृतवदनं नास्त्येव, आक्षिप्तमपि न क्रतुतः पुरुष एवावस्थाभेदेन स्वक्रत्वर्थमाक्षिपति । तां च प्रसक्तिं क्रतुगतामपि वारयतो नाङ्गता ।

नन्वनुवादः स्तुतया विधिपरो विध्येकवाक्यतया, न चायं तथेत्यप्रमाणं तन्न प्रमितविधिपरत्वेऽपि प्रामाण्यात् । ननु स्मार्तं मूलापेक्षमेतन्मूलमस्तु मा भूदनुवादः तन्न स्मार्तं बहि-

---

ननु प्रकरणात्क्रत्वङ्गत्वेनाधिकारभेदादप्रत्यभिज्ञायां कथमनुवाद इत्यत्राह—क्रत्विति । ननु स्मार्तेऽनर्थहानार्थिनोऽधिकारः श्रुतः इह प्रकरणात् क्रत्वङ्गतया निरधिकारतेति कथमनुवाद इत्यत्राह—न चेति । तत्र हेतुः अश्रुतेरिति । न हि स्मार्तनिषेधेऽनर्थहानार्थिनोऽधिकारः श्रुतः न च निषेध्यादनर्थः स्यादित्यत्र प्रमाणमस्ति । ननु निवृत्तिबलादेवानर्थावगतिः । तद्व्यतिरेकेण निवृत्त्यनुपपत्तेः । अतस्तत्परिजिहीर्षोरधिकार इति तत्राह—निवृत्तेरिति । अस्यार्थः-निषेधविषयकनियोगे निषेध्यकर्तुरधिकारतः कर्तव्यतावगमादेव निषेध्यान्निवृत्तिसिद्धिः । लोकेऽभ्युदयकरज्ञान सत्त्वेऽपि यावत्कार्यज्ञानं नोदेति तावन्न प्रवृत्तिरिति कार्यावगतिरेव प्रवृत्तावसाधारणो हेतुः नानर्थावगतिरिति मानान्तरानवगतेऽपि नियोग रूपकार्ये शास्त्रबलादेव कार्यतावगमः । स्वर्गकामादावपि नियोज्य व्यतिरेकेण कार्यानवगतेः तद्विशेषणतयैव फलस्याङ्गीकारः । विश्वजिदादावपि न प्रवृत्त्यर्थं फलकल्पना किन्तु नियोज्यविशेषणतयैव । अत्राप्यज्ञानत्वादधिकारस्य तदर्थमेवानर्थहानं विशेषणतया कल्प्यतामिति चेन्न, निवृत्तिरूपविषयसामर्थ्यादेव निवर्त्यकर्मप्रवृत्तस्य नियोज्यतावगमात् । यत्र विषयस्वभावादधिकारावगतिः न तत्राधिकारान्तरं कल्प्यमित्युक्तं धनार्जननये । यत्र शंय्वादौ शतयातना-

रन्तश्च क्रतोः। श्रौतं तु क्रतावेव। रागप्राप्तविषयमिति न मूलम्। अथ मूलवशत्वात्स्मार्तं क्रतावेव रागप्राप्तविषयम् तन्न स्वतोऽपि हि प्रकरणे श्रुतं क्रत्वर्थमेव भाति। स्मार्तं पुरुषार्थमेव भाति। स्मार्तपुरुषार्थप्रत्यभिज्ञया तदनुवादः, स्वतः क्रत्वर्थं तन्मूलं सत्पुरुषार्थं महाविषयमपि क्रत्वर्थीकुर्यात्। नचोपनयनात्पूर्वं क्रतवः, येनोपनयनोत्तरकालं स्मार्तप्राप्तेर्नानुवादः। यतः क्रतवोऽप्युत्तरकालिका एवोपनयनस्य।

राद्धान्तस्तु—त्वयैव न मूलमिति वदता स्वतः क्रत्वर्थतोक्ता। तां च हित्वा न स्मार्तं पुरुषार्थमसन्निहितमालोच्या-

---

निषेध्ययोः साध्यसाधनता प्रतीतिरर्थवादे तत्र तज्जिहासोरधिकारमनुमन्यामहे। नियोज्यस्तत्रापि प्रवृत्त एवेति न सर्वत्र निवृत्तिबलादनर्थकल्पनेति रहस्यम्।

नन्विति। श्रौतोऽयं निषेधः प्रकरणात् क्रत्वर्थानृतवदनप्रसक्तेर्भाति। अतस्तन्मुखेन क्रत्वङ्गम्। न स्मार्तानुवादो युक्तः। ननु क्रत्वर्थामपि प्रवृत्तिं पुरुषार्थस्मार्तनिषेध एव वारयति। किं तदङ्गतया निषेधविधानेनेत्यत्राह—न हीति। नह्यङ्गतया विधानार्थं पुरुषार्थस्मार्तनिषेधः क्रत्वधीनां प्रसक्तिं बाधितुं शक्तः अन्यथा न हिंस्यादिति पुरुषार्थनिषेधोऽपि क्रत्वधीनामग्नीषोमीयहिंसामपि बाधेत। गोदोहनादौ साक्षादेव अधिकारश्रवणान्न क्रत्वङ्गतेति भावः।

तन्नेति। न हि षोडशिनं गृह्णातीतिवत् अनृतं वदेदिति क्रत्वङ्गमनृतवदनमस्ति येन तन्मुखेन निषेधोऽपि क्रत्वङ्गं स्यात्। ननु माभूदङ्गतया विनियुक्तं आक्षिप्तम् पुनः क्रमवत्क्रतुतोऽस्त्वित्यत्राह—आक्षिप्तमिति। सत्यमाक्षिप्तम् तत्तु न क्रतुराक्षिपति। किन्तु पुरुष एवावस्थाभेदविशिष्टः क्रतावधिकृतः स्वक्रत्वर्थं सर्वमर्थं संपादयितुमशक्त आक्षिपति।

ननु पुरुषरागाधीनत्वेऽपि प्रसक्तेः क्रतुगतत्वात् तां वारयतो निषेधस्याङ्गतैव स्यादित्यत्राह—तां चेति। नन्विति। कार्यपरतया हि वेदस्य

नुवादो युक्तः । न च निषेध्य कर्तुरधिकारात्सर्वत्रनिषेधे क्रत्वर्थताहानिः नहि सोऽधिकारः श्रुतः, किन्तु कल्प्यः । प्रकरणेन च तद्‌गतप्रवृत्तिमुखेन तदधिकारसिद्धेर्न कल्पनावकाशः । बहिर्निषेधस्तु बहिः प्रवृत्तेरेव । अतो निषेध्यकर्तुरेवाधिकार इति नानार्थत्वान्नानुवादः ।

ननु च निषेधः स्ववाक्य एव विषयनियोज्यलाभान्न क्रत्वङ्गं नञर्थो विषयः । निषेध्यकर्ता नियोज्यः । आख्यातार्थतया हि कर्ता प्रधानम् । प्रधानावस्थतया चाधिकृतो यः स नियोज्यत्वेनान्वियात् । आख्यातार्थता च यथाश्रुत-

---

प्रामाण्यम् । तत्र कस्यचिद्विधायकतया कस्यचित् स्तुत्या, अयंत्वनुवादतया न विधायकः नापि स्तुतिपरः विध्येकवाक्यत्वाभावादिति कथं प्रामाण्यमित्यर्थः । तन्नेति । नह्यनधिगतार्थगन्तृ प्रमाणं, किन्त्वनुभूतिः तत्प्रमित विधिपरत्वे च प्रमाणताऽस्त्येव । यथा विद्वद्वाक्ये । न च तत्रानूदितानामधिकारसंबन्धात् सप्रयोजनता । इह नेति वाच्यम् । यतो न सर्वत्र प्रयोजनवत्तया भवितव्यमितिभावः ।

नन्विति । पौरुषेयत्वान्मूलापेक्षं स्मृति वाक्यमेतन्मूलमस्तु माभूदनुवाद इत्यर्थः । तन्नेति । समानविषयत्वे हि मूलमूलिता । इह स्मार्तं बहिरन्तश्च क्रतोः श्रौतं तु क्रतावेव रागप्राप्तविषयमिति न मूलतार्हमित्यर्थः । अथेति । मूलवशत्वान्मूलिनो यथामूलमेव वर्णनमुचितम् । ततश्च मूलिस्मार्तमपि क्रतावेव रागप्राप्तविषयं सङ्कुचितमित्यर्थः तन्नेति । स्वतस्तावत्प्रकरणे श्रुतम् क्रतुगतमेव भाति । स्मार्तमनारभ्याधीतं स्वतः पुरुषार्थमेव । तथापि किमित्यत्राह—स्मार्तेति । क्रतुगतेऽपिवाक्ये विषयाधिकारद्वारा स्मार्तं पुरुषार्थप्रत्यभिज्ञया स्वतस्तावदनुवाद एव युक्तः तद्यदि मूलमङ्गीक्रियते नानुवादः तदा क्रतुगतमेवैतद्वाक्यं स्वतः क्रत्वङ्गनिषेधं विदधत् स्मार्तस्य मूलं सत् स्वतः पुरुषार्थावगतं महाविषयमपि क्रत्वर्थं कुर्यात् तच्च स्वरसावगतबाधान्न युक्तमित्यर्थः ।

पाणिनिस्मृतेः । न चैवं प्रयाजादीनामनङ्गतापत्तिः प्रयाजादयो यदि कर्तृविशेषणं न तर्हि विषयाः । न च निर्विषये नियोगेऽधिकार इति विषयमात्रश्रुतेरङ्गमेव प्रयाजादयः संस्कारश्चाविषयः सुतरामङ्गमेव ।

निषेधे तु कोटिद्वयादनङ्गता । न च नञर्थोऽप्यविशिष्टो निषेध्येन न विषय इति वाच्यम् निषेध्ये हि कर्तुर्नञर्थे नियोगादर्थान्निषेध्यान्निवृत्तिः । न निवृत्ति मात्रे धीः । अनुपादेयं च न साक्षाद्विषयविशेषणं युक्तम् । शब्दाच्चानृतवदनमात्रधीः, न क्रतुगतताधीः । येन तन्मुखेन क्रत्वङ्गता स्यात् । नियोज्यशून्यत्वेहि क्रत्वनृतमुखतापि स्यात् ।

ननु चोपनयनादुत्तरकालं स्मार्तं, क्रतवः पुनः काम्याः तत्पूर्वमपीति कथं तद्गतं श्रौतं वाक्यं स्मार्तानुवादकमित्यत्राह—न चेति । अग्निविद्यासाधनत्वात् क्रतवोऽप्युपनयनोत्तरकाला एव । यद्यपि विद्योपनयनयोर्मध्येऽपि स्मार्तम् तथाप्यनुवाद्यस्य महाविषयत्वमदोषायेत्यर्थः ।

राद्धान्तस्त्विति । स्मार्तस्य न श्रौतं मूलमितिवदता त्वयैव प्रकरणात् स्वतः क्रत्वर्थतोक्ता । अतः प्रकरणे श्रुतस्य स्वतः प्राप्तं क्रत्वङ्गत्वं हित्वा स्मार्तं पुरुषार्थमसन्निहितमालोच्यानुवादो न युक्तः । ननु निषेधे सर्वत्र निषेध्यकर्तुरधिकारात् स्ववाक्य एवाधिकारलाभान्न प्रकृताधिकारानुप्रवेश इति न क्रत्वर्थतेत्यत्राह—न चेति । तत्र हेतुः नहीति । यदि निषेध्यकर्तुरधिकारः श्रुतः स्यात्, क्रत्वर्थताहानिस्तु निवृत्तिबलात् कल्प्यः न च प्रकृताधिकारानुप्रवेशे तद्गतप्रवृत्तिमुखेन क्लृप्ते संभवति कल्पनावकाशः बहिर्निषेधोऽनारभ्याधीतस्मार्तनिषेधश्च बहिः प्रवृत्तेरेव । अतो न तस्य क्रतुगतप्रवृत्तिमुखेन क्रत्वङ्गतेति । तत्र निषेध्यकर्तुरेव निवृत्तिबलात् स्वतन्त्रोऽधिकार इति नानार्थत्वान्नानुवाद इत्यर्थः ।

नन्विति । अश्रुताधिकारत्वे स्यात् प्रकृतानुप्रवेशादङ्गता । इह तु स्ववाक्य एव विषयनियोज्यलाभः नञर्थो निवृत्तिविषयः यथानिवृत्ति-

एवं तावद्विधिः पुरुषार्थश्चेत्युक्तम् । संप्रत्युपेत्यापि क्रत्वर्थानृतवदनप्रसक्तिधियमनुवादोक्तिः । क्रत्वर्थापि हि प्रवृत्तिः परम्परया पुरुषार्थेति तन्निषेधः पुरुषार्थानुवादः ।

समाधिस्तु स्यादेतदेवं, यद्याख्यातवाच्यः कर्ता स्यात्; तत्र हि क्रियाक्षेपलभ्ये न शब्द शक्तिः । चकारादाख्यातं कर्तरीति स्मृतिः कर्तृसंख्याभेदाभिप्राया । कर्तृसंख्यामात्रं आक्षेपादेव । यथाह परः—

वाच्यवाचकभावो हि नाचार्यैरुपदिश्यते ।
अन्यथानुपपत्त्या तु व्यवहारात्स गम्यते ।

विषयता तथा षष्ठे कलञ्जनये वक्ष्यते । निषेध्यकर्ता च नियोज्यः । ननु स न श्रुत इत्यत्राह—आख्यातेति । आख्यातार्थतया कर्ता श्रुतः स च प्रकृतिप्रत्ययौ प्रत्ययार्थं सहब्रूतः तयोस्तुप्रत्ययः प्राधान्येनेति प्रधानं भवतु । एवं किमायातं अधिकारि नियोज्ययोः इत्यत्राह—प्रधानेति । आख्यातार्थतैव कर्तुः कथमित्यत्राह आख्यातेति । पाणिनिस्मृतेर्मुख्यार्थत्वाय कर्तुर्वाच्यत्वमित्यर्थः । एवं तर्हि प्रयाजादीनामप्यनङ्गतापत्तिरिति न शङ्कनीयमित्याह—न चेति । कथमित्यत्राह—प्रयाजेति । तत्र विषयनियोज्ययोरुभयोः श्रुतेः प्रकरणादङ्गतैव । यदि प्रयाजाः कर्तृविशेषणं विषयो वा ? नाद्यः विषयशून्यतापत्तेः । न च निर्विषयेनियोगेऽधिकारोऽस्ति । न द्वितीयः अविशिष्टस्य कर्तुः प्रत्ययार्थत्वेऽपि नियोज्यत्वाधिकारित्वयोरभावान्नस्वतन्त्रप्रतीतिरिति विषयमात्र श्रुतेरङ्गमेव प्रयाजादयः संस्काराणां त्वङ्गत्वं सुतरामित्याह—संस्कारा इति । यद्यपि विशेषणं विषयञ्च पृथगवतौ द्रव्यगतातिशयो हन्त्यादिश्च तथापि तयोः नियोज्यविशेषणत्वनियोगविषयत्वानर्हतया तच्छून्यतया संस्कारः सुतरामङ्गमेवेत्यर्थः । निषेधे तु कथमित्यत्राह—निषेधेत्विति । नन्वत्रापि निषेध्यं किं कर्तृविशेषणं किं वा विषयंविशेषणं ? नाद्यः, अविशिष्टस्य निवृत्तिमात्रस्य प्रवृत्त्यनुपयोगिनो विषयत्वायोगात् । न द्वितीयः । अविशिष्टस्य नियोज्यत्वाभावादिति कोटिद्वयाभावात् क्रत्वङ्ग-

यत्तु आक्षिप्तसङ्ख्याभिधानेऽपि क्वचित् कस्यचित् सङ्ख्याभिधानं तत् प्रयोगनियमात्, तन्मूला च स्मृतिस्तथा। सङ्ख्याभिधानेऽपि कर्त्रादिगततोपाधिः न वाच्य इति लाघवम्। एवं शाब्दिकादि स्मृतिरपि नेया। अतः सिद्धं पुंसः क्रतूपाये प्रवृत्तेर्निषेधः क्रत्वर्थः। क्रत्वाश्रितमात्रान्वयेऽपि पयोव्रतादि क्रत्वर्थमेव। प्रयोजनं निषेधातिक्रमे श्रौतं प्रायश्चित्तम्। अनुवादे स्मार्तम्।

विवरणे तु विधिश्रुतेरर्थवत्त्वाय पुरुषार्थतयाऽनुवादः। क्रत्वर्थत्वे त्वधिकारविधित एव नञर्थानुष्ठानादङ्गविधिर्व्यर्थः।

तेति न वाच्यमित्याह—न चेति। तत्र हेतुः निषेध्येहीति। ननु निवृत्तेर्निवर्त्यनिरूप्यत्वात् साक्षान्निवृत्ति विशेषणमेव तद्युक्तमित्यत्राह अनुपादेयमिति। नन्वेवं ऋतुगतनिवर्त्यमुखेन क्रत्वङ्गतैव किमिति न स्यादित्यत्राह—शब्दादिति। कर्तुरवाच्यत्वे वा कथमङ्गतेत्यत्राह—नियोज्येति। उक्तवक्ष्यमाणयोरसंकरार्थमाह—एवमिति। निवृत्तेः ऋतुगतप्रवृत्ति विषयत्वेऽपि ऋतोरपि परंपरया पुरुषार्थत्वात् पुरुषार्थत्वनिषेधानुवादो युक्त इत्यर्थः।

समाधिरिति। कथमाख्यातस्य कर्ता न वाच्य इत्यत्राह—तत्रेति। अनन्यलभ्ये हि शब्दशक्तिः कर्ता तु क्रियाक्षेपलभ्य इति न तत्राख्यातस्य शक्तिरित्यर्थः। नन्वेवं लः कर्मणि चेति पाणिनि स्मृतेः चकारात् कर्तरि चेति वृत्तिकारोक्तेश्च कागतिरित्यत्राह—चकारादिति। या कर्तरि कर्मणीति सा द्व्येकयोरित्यादिसंख्याभेदविधिपरसूत्रेणैकवाक्यंभूत्वा कर्तृकर्मविशेष[ण] परा नेया। कर्तृसंख्यामात्रस्य च क्रियाक्षेपादेव सिद्धेः अनन्यथासिद्ध प्रतीतिबलात् शब्दशक्तिः नाचार्यवचनमात्रात्। तेन तद्वचनगत कर्तृकर्मशब्दौ लक्षणया संख्याविशेषपरावित्यर्थः। अत्र साक्षित्वेन परोक्तमाह—यदाहेति। ननु आक्षिप्त संख्याभिधाने करणादेरपि क्रियाक्षेप्यत्वात् तत्सङ्ख्यापि किमिति नाभिधेयेत्यत्राह—यत्त्विति। कारक-

संभूयोपकारार्थेऽप्यङ्गापूर्वे विधिता व्यर्थैव। अगत्या हि प्रयाजादौ विधिता। इह निषेध्यकर्तुरधिकारादक्रत्वर्थत्वेन अस्ति गतिः। सङ्कल्पविधौ हि निषेध्यस्यापि विषयकोटिता नाधिकारविशेषणतेत्यगत्या क्रत्वर्थतापत्तिः। न च श्रौतं नञर्थं हित्वा सङ्कल्पविधिः। प्रजापतिव्रते तु व्रताधिकारात्तथा। एवं च स्वतन्त्रे विधौ यदि स्मार्तमहाविषयविधितः प्राप्तार्थतयाऽनुवादः तथापि विधिता हानिर्न स्यात्।

राद्धान्तस्तु प्रकरणात्क्रत्वर्थे नञर्थे विध्यन्तरता नास्त्येव। संभूयोपकारकाधिकारेऽपि हि न तत्सिद्ध्यर्थं विध्यन्तरम्। एवं

मात्रस्य क्रियाक्षेप्यत्वेपि यत्कर्मकर्तृसंख्याभेदवाचितया आख्यातस्मृतिः तदनादेः प्रयोगस्य तथा नियतत्वात् तन्मूलत्वात् स्मृतेरित्यर्थः।

ननु कर्त्रादिसंख्याभिधाने कर्त्रादिगततापि वाच्येति गौरवमित्यत्राह—संख्येति। स्मृत्यन्तरमप्येवमेवेत्याह—एवमिति। नन्वनृतवचनस्य क्रतौ विनियोगाभावात् प्रसक्त्यभावे कथं तन्निषेधः क्रत्वङ्गमित्यत्राह- अत इति।

ननु क्रतुसंबन्धिमात्रान्वयिनोऽनङ्गाश्रितस्य कथं क्रत्वङ्गतेत्याशङ्क्य दृष्टान्तेनोपपादयति—क्रत्विति। ननु क्रतुगतानृतवदन प्रवृत्तेरपि पुरुषरागाधीनत्वात् तन्निवृत्तेः तत्पुरुषार्थनिषेधेनैव सिद्धेः क्रत्वर्थनिषेधो निष्प्रयोजन इत्यत्राह—प्रयोजनमिति।

विवरणे त्विति। नानृतं वदेदिति वाक्ये विधिश्रुत्यर्थवत्त्वाय पुरुषार्थत्वावगमः। तत्क्रत्वर्थत्वे हि विधिश्रुतिर्व्यर्थैव। अधिकारविधित एवाङ्गभूतनञर्थानुष्ठानसिद्धेः। ननु संभूयोपकारार्थमपूर्वाङ्गीकारात् विधिश्रुतिरर्थवत्येवेत्यत्राह—संभूयेति। नन्वेवं प्रयाजादावपि पुरुषार्थता स्यात् इत्यत्राह—अगत्येति। इहेति। नञ् विधौ निवृत्तिबलात् निषेध्यकर्तुरधिकारावगतेः अक्रत्वर्थत्वेनास्ति गतिरित्यर्थः।

ननु नेक्षेतोद्यन्तमादित्यमिति यथा अनीक्षणसङ्कल्पविधिः तथाऽत्रापि क्रियारूपसंकल्पविधिरेवास्तु। ततश्च निषेध्यमपि विषयकोटिरिति

च प्रकृताधिकृत एव निषेध्यप्रवृत्तोऽधिकारी न स्वतन्त्रः भेदनवानिव। अतो न स्मार्तानुवादः। नापि तस्य मूलं नानार्थत्वात्। यद्विधित्वमुपेत्यैव पुरुषार्थत्वं पुरुषप्रयत्नश्रुतेः शङ्कितं, तदुक्तयुक्तेर्निरस्तम्। अङ्गापूर्वाभिधानार्थं पुरुषप्रयत्नरूपकृत्यभिधानमस्त्विति मन्दाशङ्का। समाधिरपि न पूर्वसंबद्धः सर्वाख्यातेषु क्रियानुष्ठानं श्रूयते न कारकं किंचिदिति न हि कारकाभिधानं प्राक्शङ्कितम्। किं च यद्याख्यातानां कर्तृवाचकत्वं

नाधिकारविशेषणतेत्यत्राह—सकल्पेति। इह तु न तथा युक्तमित्यत्राह—न चेति। मुख्यार्थं हित्वा लक्षितस्य सङ्कल्पस्य क्रियात्वेऽपि विधिर्नयुक्तः विधौ लक्षणाऽभावादित्यर्थः। तर्हि प्रजापतिव्रतेऽपि नञर्थविधिरेव स्यादित्यत्राह—प्रजापतीति। तस्य व्रतं इति व्रतोपक्रमात् सङ्कल्पविधिरेव तत्र युक्त इत्यर्थः।

नन्वनुवादेऽपि विधिश्रुतिवैयर्थ्यं समानमित्यत्राह—एवं चेति। एवमुक्तेन प्रकारेण विषयनियोज्यलाभेन वाक्यस्वरसात् स्वतन्त्रविधिपरत्वेऽवधृते यदि स्मार्त महाविषयविधितः प्राप्तार्थतयानुवादता तदा न्यायादागतविधिताहानिर्न दोषाय। न चैतावता क्रत्वर्थतापत्तिः अनुपजातविरोधित्वेन प्रकरणात् प्रबलेन वाक्येन स्वतन्त्रविध्यवगतेः। अतएव प्रकरणबाधसापेक्षतया मन्थरे श्रौते विधौ झटिति प्रवृत्ततया स्मार्त विधेर्न मूलमूलिता। किन्तु अनुवादता।

अथवा अस्मिन् मते मूलमूलितापि पूर्वपक्षेऽभिमतास्तु। अत एव विवरणटीकायां राद्धान्तोपसंहारे "अत एव न तस्यायमनुवादः नापि मूलं अर्थभेदात्" इत्यभिहितम्।

भाष्ये तु यद्यत्नेन मूलितानिरसनं तदस्मिन् मते युक्तिवैभवेनेति भवनाथेनापि तदनूदितम् "नापितस्य मूलं नानार्थत्वादि"त्यनेन।

राद्धान्तस्त्विति। वाक्यात् विध्यन्तरधीनिबन्धनोऽनुवादः। न चात्र प्रकरणात् क्रत्वर्थे नञर्थे विध्यन्तरं प्रकृतविध्यनुवादशङ्काकुण्ठितशक्तिना

सत्यं प्रतिषेधस्य क्रत्वर्थताहानम् । प्रयाजादेरपि तत्स्यात् अस्त्विति चेन्न, कर्तरि वाच्येऽप्यधिकार्यनुक्त एव स्यात् । कर्तृव्यतिरिरिक्तोह्यधिकृत उक्तः । न च प्रयत्नश्रुतेरधिकारार्थता वाच्ये कर्तरीति आक्षिप्येपि प्रयत्नश्रुतेरधिकारार्थताऽसंभवात् । अतः कर्तुर्वाचयत्वसाधनं व्यर्थमेव ।

तन्न, यदि कर्तावाच्यः, तदा नञर्थविशेषणवदनमशक्यं अधिकारिपरमेव स्यात् अर्थाद्विषयकोटिः स्यात्, यथा कर्तृपदं

लिङादिना तदप्रतीतेः । न च विध्यन्तराभावे कथं संभूयोपकारजनकतेति वाच्यम् । यतस्तत्कालेऽपि न विध्यर्थं विध्यन्तरं प्रकृतसाधिकारविधेरेव ग्राहकत्वादि चतुष्टययोगित्वादित्यर्थः । ननु वाक्यात्प्रकरणस्य बाधितत्वात् वाक्यस्वरसतः निषेध्यकर्तुरधिकारावगतेः विषयनियोज्यलाभेन स्वतन्त्र-विध्यन्तरावगतेः कथमङ्गतेत्यत्राह—एवं चेति । विरोधे सति हि वाक्यात् प्रकरणबाधः । इह तु या वाक्यान्निषेध्यकर्तुरधिकारा[रो]र्थः सा प्रकृता-धिकृतस्यैव न स्वतन्त्रस्य प्रकरणाम्नानात् फलवदफलन्यायेन नियोगैक्याव-गमात् भिन्ने जुहोतीतिवत् । ग्रन्थे यद्गोदोहन निदर्शनं तदस्वातन्त्र्यमात्रे-णेति भावः । निगमयति—अत इति । अत्रभाष्यमाह—गृह्णीम एतद्विधि-रिति पुरुषधर्म इति त्ववगच्छामः पुरुषप्रयत्नस्य श्रुतत्वात् इति समाप्ते-ऽधिकरणे परिचोदना कृता । तामनुभाषते—यदिति । आक्षिपति—तदुक्तेति । फलवत्सन्निधावफलं तदङ्गमित्युक्तयुक्तेः प्रकृताधिकारैक्यावगतेः क्रतुधर्म-त्वमेवेति पुरुषधर्मत्वाशङ्का निरस्तैवेति भावः । ननु पुरुषप्रयत्नानर्थक्य-परिहाराय स्वतन्त्र पुरुषार्थत्वमेव युक्तमित्यत्राह—अङ्गेति । कृतिसाध्यमपूर्वं कृत्यभिधानं विनाऽभिधातुमशक्यमित्यङ्गापूर्वाभिधानार्थं पुरुषप्रयत्नरूपकृत्य-भिधानमस्तु । अतोऽङ्गविधानेऽपि पुरुषप्रयत्नश्रवणमर्थवदेव । अङ्गापूर्वं विना क्षणिकानामङ्गाङ्गित्वाभावादित्यर्थः । निगमयति—इति मन्देति ।

यदप्येतत्समाधानार्थमुक्तं तत्र ब्रूमः सर्वेष्वाख्यातेषु क्रियानुष्ठानं श्रूयते न कारकं किञ्चिदिति तदप्यनूद्य पूर्वेणाशङ्कितेनासंबद्धमित्याक्षि-

राजा अर्थादधिकारकोटिः राजसूये। वाच्यो हि प्रत्ययार्थत्वात्प्रधानं, प्रकृत्यर्थस्तु गुणभूतो न विधेयो नाप्यनूद्यत इति न विषयकोटिः। नञर्थे विधेयेऽन्यतः प्रवृत्तो कर्ता विधेयः। तद्विशेषणमप्यविधेयम्। विधेयत्वेनाप्राप्तमनुवाद्यमपि न विषयकोटिः। अवाच्यस्तु न प्रधानं क्रियागुणत्वेनाक्षेपात् न तद्विशेषणं वदिः। किंतु विषयकोटिरेव वाच्यस्तु वदेः कर्ता नञर्थेऽधिकृतः श्रुत एवेति न क्तोः अनूतप्रवृत्तिमर्थलभ्यामाश्रित्य

पति—समाधिरपीति। यतो न कारकाभिधानं प्राक् शङ्कितमित्यर्थः। आक्षेपान्तरमाह—किञ्चेति। नानृतं वदेदितिवत् प्रयाजादिष्वपि आख्यातस्य कर्तृवाचित्वाविशेषादित्यर्थः। उच्छृङ्खलमतेन शङ्कते—अस्त्विति। नेति। कर्त्रधिकारिणोरन्योन्य विलक्षणत्वात् कर्तरिवाच्येऽप्यधिकार्यनुक्त एव। तदनुक्तौ च नानङ्गतेत्यर्थः। तथा कर्तुर्वाच्यत्वावाच्यत्वनिरूपणं विशेषाभावान्निष्प्रयोजनमपीत्याह—न चेति। समाधत्ते—तन्नेति। अयं भावः शङ्कितुरपि कर्तुर्वाच्यत्वाभिप्रायेण शङ्का न प्रयत्न श्रुतिमात्रादिति तादृशसमाधिदर्शनादवसीयते। अतो न पूर्वापरासङ्गतिः नाप्युक्तयुक्त्या निरस्तता। कर्तुर्वाच्यत्वे स्ववाक्य एवाधिकारिलाभात् फलवदफलन्यायेन नियोगैक्यानवगमात्। ग्रन्थे त्वेतन्न पृथगुक्तम् अर्थसिद्धत्वादिति।

यदपरमाक्षेपत्रयमुक्तम्—तत्र निष्प्रयोजनत्वं तावन्नास्तीति विशेषकथनेनाह—यदीति। कर्ता यद्याख्यातार्थः तदा 'नवदेत्' इत्यत्र न नञर्थविशेषणं वदनं, न विषयभूतनिवृत्तिविशेषणम्। किन्त्वधिकारविशेषणतया तत्परमेव स्यादित्यर्थः। नन्वेवं विशेषणता न स्यादित्यत्राह—अर्थादिति। अन्यविशेषणमप्यर्थादन्यविशेषणमित्यत्र दृष्टान्तमाह—यथेति। कथं पुनर्वाच्येऽपि कर्तरि वदनं अधिकारिकोटिरेव न विषयकोटिरित्यत्राह—वाच्य इति। द्विविधो हि विषयकोटिः विधीयमानोऽनूद्यमानश्च। तत्रानृतवदनं प्रकृत्यर्थः प्रत्ययार्थं प्रधानभूतकर्तृगुणभूतो न विधेयो नानुवाद्य इति विषयकोटिः। कथं कर्तृगुणभूतत्वेपि न विधेयतेत्यत्राह—नञर्थ इति।

क्रत्वर्थता विधेः । विधेये पुनः प्रयाजादावन्यतः प्रवृत्तो वाच्योऽपि नाधिकारकोटिः । न च प्रधानतया स एवाङ्गं यजिविशिष्टं, यागस्यैव योग्यतया विधेयत्वेनार्पणात् । तत्र तत्कर्तृताप्राप्तेर-विवक्षितकर्तृकप्रयाजाद्यङ्गपरतासिद्धिः ।

कर्तुरवाच्यत्वे चेयं युक्तिः आख्यातादितरेतरयोगधीः । 'पचतः' 'पचन्ति' इति सङ्ख्याभेदधिया च तद्धीः । तत्र अनन्य-लभ्यः शब्दार्थ इति सङ्ख्याभेद एव वाच्यः । कर्तृसङ्ख्या-

---

निवृत्तिपरे वाक्ये विधिं विनाऽन्यत एव रागादेर्निवर्त्ये प्रवृत्तः कर्ता वाच्यः । तथा चेन्न कर्ता विधेयः । तदविधेयत्वे च समानपदेन यत्तद्विशेषणतया-ऽनृतवदनमन्वितं तदप्यविधेयमेव ।

ननु माभूद्विधेयतया विषयकोटिता । अन्यतः प्राप्तस्यानुवाद्यतया निषेधकोटितास्तु आलंभादिवदित्यत्राह—विधेयेति । विधेयत्वेनाप्राप्तमुपा-देयत्वेनाप्राप्तमनुवाद्यमपि न विधेयकोटिः । आलंभादिरुपादेयमित्यर्थः । अवाच्यत्व पक्षे विशेषमाह—अवाच्य इति । यदा कर्ता न वाच्यस्तदा क्रियया स्वसिद्ध्यर्थं स्वगुणत्वेनैवाक्षिप्यत इति न प्रधानम् । तथा च "गम्यमानस्य चार्थस्य नैव दृष्टं विशेषणम् । शब्दान्तरैर्विभक्त्या वा"—इति न तद्विशेषणंवदिः । किन्तु निवृत्तेर्निवर्त्यं निरूप्यतया तदाकाङ्क्षिण्या विशेषणं इति विषयकोटिरेव । ततश्चानृतवदनान्निवर्त्येतेत्यन्वयः । तथा च स्ववाक्येऽधिकाराभावात् प्रकरणाम्नानात् प्रकृताधिकारानुप्रवेशात् क्रत्वङ्गतैवेति पुरुषप्रयत्नश्रुतिः प्रकृतकार्यानुवादिनीत्यर्थः । यत्तु कर्तुरुक्ता-वप्यधिकार्यनुक्तएवेत्याक्षेपः तस्योत्तरमाह—नान्यस्त्विति । यदा कर्तुर्वाच्य-त्वं स्थितं तदा अनृतवदनकर्ता निवर्तेतेत्यन्वयः । तथा च ततश्चवदेः कर्ता वदनविशिष्टः प्रत्ययार्थत्वेनप्रधानभूतः तदवस्थायां नञर्थे निवृत्तावधिकृतः श्रुत एवेति स्ववाक्य एवाधिकारिलाभात् स्वतन्त्रविध्यवगतेः क्रतोरर्थलभ्य-मनृतवदनमाश्रित्य क्रत्वङ्गता न युक्तेत्यर्थः ।

नन्वेवं प्रयाजादिकर्तुरपि अधिकारित्वात् तेषामप्यङ्गता न स्यात्

सामान्यधीराक्षेपलभ्यैव । अतोऽनन्यलभ्यसङ्ख्या-अपूर्व-कृतय एवाख्यातार्थाः। कर्त्रादिविशिष्टैव हि क्रियेति विशेषणमाक्षेपात् । सङ्ख्याभेदो नाक्षेपलभ्य इत्येका युक्तिः ।

अपरा-कारकसङ्ख्या न कारकं अकारकं च क्रिया नाक्षेप्तुमलम् । कारकोपादानेहि सङ्ख्यापेक्षा न क्रियायाः । उपादानतः क्रियान्वितावस्थकारकान्वयः । तत एव प्रकृत्यर्थान्वयः । सङ्ख्यायुक्तकारकपरत्वात् कारकपदैकार्थ्यम् । न चेतरेतर-

---

इत्याक्षेपान्तरं समाधत्ते—विधेय इति । यद्यपि वाच्यत्वं प्रयाजादिकर्तुः तथापि नासावधिकारकोटिः विधेयप्रयाजादिविशिष्टत्वेनान्यतोऽप्राप्तत्वात् । अनुपादेयविशेषणविशिष्टोऽधिकारीति षष्ठे वक्ष्यामः । ननु प्रत्ययार्थस्य कर्तुः प्रधानतया प्रकृत्यर्थयजिविशिष्टः स एवाङ्गमस्त्वित्यत्राह—न चेति । कृतिसाध्यतया यागस्यैव विधियोग्यत्वात् तस्यैव यजिपदेनार्पणात् तच्छब्दलाभादेव तत्कृता[तत्कर्तृता]प्राप्तेः अविवक्षितकर्तृकप्रयाजादिमात्रमङ्गतया विधेयमित्यर्थः । अस्त्वेवं वाच्यत्वावाच्यत्वयोर्विशेषः कर्तुरवाच्यत्वे कायुक्तिरित्यत्राह—कर्तुरिति । 'पचतः' 'पचन्ति' इत्याख्यातादितरेतरयोगधीः । सा च द्वित्वादिसंख्याभेदधिया । अतो द्वित्वादिसंख्या, इतरेतरयोगः कर्ता च त्रितयमाख्यातपदात् प्रतीतम् । तत्र किमाख्यातार्थं इत्यपेक्षायां अनन्यलभ्यः शब्दार्थं इति संख्याभेद एव वाच्यः। कर्ता किमिति न वाच्य इत्यत्राह—कर्तृसंख्या सामान्येति । नन्वेवं कृत्यपूर्वयोः कथं वाच्यतेत्यत्राह—अत इति । अनन्यलभ्यत्वाविशेषात् कृत्यपूर्वयोरपि संख्यावदाख्यातार्थता । अगत्याचानेकार्थता । एतच्च लिङाद्यभिप्रायम् । कथं पुनः कर्तुराक्षेपो लभ्यत इत्यत्राह—कर्त्रादेरिति । कारकव्यापाररूपत्वात् क्रियायाः कर्त्रादिकारकविशिष्टैव क्रिया प्रतीयत इति विशेषणं कर्त्राद्याक्षेपलभ्यम् । नन्वेवं कृतिसाध्यतया कार्येऽवगते तत एव कृतिप्रतीतिसिद्धेः न कृतेर्वाच्यता । मैवम् । कृत्यपूर्वयोः साध्यसाधनसंबन्धस्य प्रमाणान्तरानवगतेः नापूर्वेण कृतेराक्षेपः । नाप्यवगतसंबन्धक्रियया तदाक्षेपः कृतिविशिष्टतया तदप्रतीतेः अतः कृतिर्वाच्यैव ।

योगोऽपि वाच्यः, सङ्ख्यातस्तल्लाभात् । न च ततः सङ्ख्यालाभशङ्का, एकवचनसाहचर्यात् सङ्ख्याभिधाननिश्चयात् । व्रीहिमयं सङ्कल्प्य न यवमयः कार्य इति । पूर्वसङ्कल्पोऽर्थाक्षिप्तः साभिलापः शास्त्रीयानुष्ठाने व्यवहाराङ्गम् । अतः सवदिकोऽर्थप्राप्तः क्रतौ सन् निषिद्धः क्रत्वङ्गनिषेधात् । तदतिक्रमे च प्रायश्चित्ते विशेषः । शेषं सुगमम् ।

ननु संख्यादियुक्तकारकविशिष्टत्वात् क्रियायाः संख्याप्याक्षेपलभ्येत्यत्राह—सङ्ख्येति । यद्यपि सङ्ख्यामात्रं क्रियाक्षेपलभ्यं तथापि सङ्ख्याभेदो द्वित्वादिः न क्रियाक्षेपलभ्यः अविनाभावाभावात् । सङ्ख्यामात्रमपि नाक्षेप्यमित्याह—अपरेति । कारकं हि क्रियाक्षेप्यम् । न च कारकसङ्ख्या कारकम् अतः सङ्ख्या वाच्येत्यर्थः । नन्वेवमकारकत्वे कथं संख्यापेक्षेत्यत्राह—कारकेति । उपादान एव हि कारकाणां सङ्ख्यापेक्षा न क्रियाया इत्यर्थः । ननु यदि क्रिया संख्यां नाक्षिपति कथं तर्हि तदन्वितावस्थकारकान्वयः सङ्ख्याया इत्यत्राह—उपादानत इति । न हि कारकमात्मार्थमुपादीयते । किन्तु क्रियासिद्ध्यर्थम् कुत उपादानपर्यालोचनया क्रियान्वितावस्थ कारकान्वय इत्यर्थः । नन्वेवं प्रत्ययार्थस्य सङ्ख्यायाः प्रकृत्यर्थेन क्रियया संबन्धो न स्यात् कर्तृगतत्वेनाभिधानादित्यत्राह— तत इति । कर्त्रुपादानस्य क्रियासिद्ध्यर्थत्वात् तत एवोपादानात् क्रियान्वितावस्थकर्त्रन्वयात् प्रकृत्यर्थक्रियान्वयोऽपि सिद्ध इत्यर्थः । ननु यदि कर्ता नाख्यातवाच्यः कथं तर्हि चैत्रः पचतीति कर्तृपदसामानाधिकरण्यमित्यत्राह—सङ्ख्येति । यद्यपि सङ्ख्यामात्रं वाच्यं कर्त्रादिगततोपाधिः तथापि सङ्ख्यायुक्तकर्तृपरत्वादाख्यातस्य कारकपदसामानाधिकरण्यमुपपद्यते यथा षड्धातव इति गम्यमानव्यक्त्यपेक्षया सङ्ख्यापदसामानाधिकरण्यमित्यर्थः ।

ननु सङ्ख्यावत् इतरेतरयोगोऽपि वाच्यः स्यादित्यत्राह—न चेति । विपरीतं न कुत इत्यत्राह—न च तत इति । इतरेतरयोगो हि नैकवचनं अतः एकवचनसाहचर्यात् सङ्ख्याविधेयेति निश्चितमित्यर्थः । अत्र भाष्ये व्रीहिमयं सङ्कल्प्य न यवमयः कार्यं इत्युक्तम् । तदयुक्तम् न हि सङ्कल्पः

अहीनवत्पुरुषधर्मस्तदर्थत्वात्

नेह निवीतवत्प्रकरणे स्तुत्यान्वयः, वाक्यशेषत्वाभावात्। नापि प्रकरणेऽनुवादादन्वयः जृंभावतो मन्त्रवचनस्यान्यतोऽप्राप्तेः। पूर्वं पूर्वपक्षे तु निषेधोऽन्यतः प्राप्तः न चार्थप्राप्तजृम्भावद्विषयोऽयं विधिः, येन क्रतुजृंभावदन्वयात्क्रत्वर्थो मन्त्रविधिः स्यात्। नहि क्रतावर्थप्राप्ता जृंभा अनृतवचनं तु क्रतावेवार्थप्राप्तम्, अतस्तन्निषेधः, क्रत्वर्थो युक्तः।

क्रत्वर्थः अचोदितत्वात् क्रत्वर्थे वा कथं तस्य साभिलाषत्वम् येनानृतवदनप्राप्तेस्तत्रायं निषेधः स्यात् इत्याशङ्क्य भाष्यमनुभाष्य तात्पर्यमाह—व्रीहिमयमिति। यद्यपि सङ्कल्पस्य क्रत्वर्थत्वेन न चोदना तथापि सोऽर्थाक्षिप्तः क्रतौ प्राकृतपदार्था इव विकृतावङ्गम्। स च शास्त्रीयानुष्ठानेसाभिलापो व्यवहाराङ्गम्। ते न वदत्यर्था व्यभिचारात् सवदिकोऽर्थप्राप्तः सन् क्रतौ क्रत्वङ्गनिषेधान्निषिद्धः। यद्यपि पुरुषार्थनिषेधेन सोऽपि निषेद्धुं शक्यः तथापि क्रत्वङ्गनिषेधातिक्रमे श्रौतं प्रायश्चित्तमिति प्रायश्चित्ते विशेष इत्यर्थः। अन्यत् पाणिनीय स्मृतिवर्णनं करणादिकारकान्तरसंख्यावाच्यत्वादि परिहारश्च सुगमत्वान्नात्रोच्यत इत्याह--शेषमिति।

अहीनवत्

दर्शपूर्णमासयोः श्रुतम्—तस्माज्जञ्जभ्यमानो ब्रूयान्मयि दक्षक्रतू इति। तथा ज्योतिष्टोमे—तीर्थे स्नाति तीर्थमेव समानानां भवति इति। तत्र चिन्ता-किं जञ्जभ्यमानस्य मन्त्रवचनं तीर्थस्नानं च पुरुषार्थमुत क्रत्वर्थमिति। ननु निवीतं मनुष्याणां नानृतं वदेत् इत्यादेरस्य को विशेषः? अस्य द्वादशोपसत्तावदुत्कर्षेण पूर्वपक्षे इत्यत्राह—नेहेति। न निवीतेन साम्यं विध्यन्तरैकवाक्यत्वाभावेनान्यप्रकरणस्तुत्याऽन्वयायोगात्। नापि प्रकरणेनानुवादमात्रेणान्वयः जृंभावतो मन्त्रवचनस्यान्यतः प्राप्त्यभावात्। नानृतवदनतुल्यतेत्याह—पूर्वेति। पूर्वाधिकरण पूर्वपक्षे स्मार्तेन निषेधः प्राप्त इत्यर्थः। ननु तदधिकरणराद्धान्तवत् क्रतुगतार्थप्राप्तजृंभावद्विषयतया

इह तु स्ववाक्ये अनुपादेयजृंभाविशिष्टस्याधिकारिणो मन्त्रवचनस्य विषयस्य च लाभान्न क्रत्वर्थता वाक्यबलादधिकारान्तरं न दोषः। द्वादशोपसत्ताया इवोत्कर्षः।

राद्धान्तस्तु—क्रतुकर्तुरपि जृंभा संभवति। न तदन्वये वाक्यबाधः। वाक्यं च पदार्थान्वये प्रमाणं, कार्ये तु विध्यपेक्षा। इह तु जृम्भोत्पन्न व्यळीकशान्त्या क्रतुगतकर्तृसंस्कारो विध्यपेक्षितः तद्बाधान्नाधिकारान्तरं कल्प्यम्। अप्रायत्यं हि जृंभया

क्रत्वर्थोऽयं विधिरस्त्वित्यत्राह—न चेति। न हि यथाऽनृतवदनं क्रतावर्थप्राप्तं तथाजृम्भा। अतस्तद्वतो मन्त्रवचनं न क्रत्वर्थं युक्तम्। ननु प्रकरणात् क्रत्वर्थतैव विषयनियोज्याभावेन विध्यन्तराप्रतीतेरित्यत्राह—इहेति। ननु यदिवाक्ये विषयनियोज्यलाभात् विध्यन्तरता तर्हि अधिकारान्तरकल्पनास्यादित्यत्राह—वाक्येति। द्वादशोपसत्तानिदर्शनं तु अधिकारान्तरसंवन्धितया प्रकृतावनन्वयमात्रात् न त्वधिकारापूर्वान्तरादङ्गतासाम्यात्।

राद्धान्तस्त्विति। जृम्भाहि नाम मुखभेदफलकः वायुविकारः। सा च स्वयमेव भवति न पुरुषोपादेया। तादृशी सा क्रतुकर्तुरपि संभवतीति क्रत्वर्थमेव जृम्भावतो मन्त्रवचनम्। ननु जृंभावत्प्रकृतक्रत्वन्वये वाक्यावगतकार्यबाधः स्यादित्यत्राह—न तदिति। न हि कार्ये वाक्यं प्रमाणम्। किन्तु पदार्थान्वयमात्रे कार्यं तु विध्यपेक्षाधीनम्। इह तु योग्यतया मन्त्रवचनस्य संस्कारकत्वं प्रतीतम्। तच्चकर्मान्तरान्वयापेक्षमिति प्रकृते कर्मणि सति विध्यपेक्षं मन्त्रवचनकार्यं जृम्भोत्थव्यलीकशान्त्या क्रतुकर्तुः संस्कार एव। अतो विध्यपेक्षितकार्यभावान्न वाक्यवलादधिकारान्तरं कल्प्यम्। वाक्यस्य जृम्भावत्कर्त्रन्वयमात्रपरत्वात् तस्य प्रकृत क्रत्वन्वयेऽप्यविरोधात्। किञ्च जञ्जभ्यमान इति व्यक्तिवाचित्वात् सन्निहितपरं प्रकृतक्रतुकर्तृपरमेव नाप्रकृतपरं, न च निमित्ताधिकारितयाऽधिकारान्तरम् सप्तम्याद्यश्रुतेः। ननु अप्रायत्यरूपं व्यलीकं जृंभयाभवतीत्यत्र किं मानमित्यत्राह—अप्रायत्यं हीति। ननु बहिः क्रत्वपि जृम्भया व्यलीकोत्पत्तेः तच्छान्त्यै च

व्यलीकं स्मृतिसिद्धम् । तच्छान्त्यै बहिः क्रतोः कर्णस्पर्शादिः । क्रतावपि, तद्वाऽन्यद्वेत्यपेक्षेति क्रत्वर्थमेव मन्त्रवचनम् । भाष्ये धत्त इति वर्तमान श्रुतेर्न फलतेत्युक्तं न हि विधिश्रुतावपि फलता नहि फलं विधेयं अतो व्याख्यातंसाध्यत्वाश्रुतेर्न फलतेत्यर्थः । तीर्थे स्नाति, तीर्थमेव समानानां भवतीत्युदाहृतम् । भवतीति विध्यश्रुतावपि फलवत्त्वावक्रत्वर्थताशङ्का साध्यत्वाश्रुतेर्न फलतेति निरासः । न तु वचनात्पुरुषान्वयिनोऽपि क्रत्वर्थ-

---

संस्काररूपं मन्त्रवचनमपेक्षितमिति चेत्तत्राह—तच्छान्त्या इति । तत्र स्मृतित एव क(र्ण)स्पर्शादि विहितमित्यर्थः । ननु तेनैव क्रतावपि तच्छान्तिरस्त्वित्यत्राह—क्रताविति । अत्र भाष्ये । ननु प्रत्यक्षं फलमिति चोदयित्वोक्तम् प्राणापानावेवात्मन्धत्ते इति प्राणापानधारणं न फलम् वर्तमाननिर्देशादिति । तदनुभाषते—भाष्य इति । आक्षिपति—न हीति । लिङादिश्रवणेऽपि फलस्याविधेयत्वात् वर्तमानश्रुतिः फलवत्त्वेऽप्रतिपक्ष इत्यर्थः । समाधत्ते—अत इति । व्याख्यातं विवरणटीकायामित्यर्थः । किं तदित्यत्राह—साध्यत्वे हीति । तीर्थोदाहरणेऽपि पूर्वोत्तरपक्षसंभवादुदाहृत इत्याह—तीर्थ इति । संभवमाह—भवतीति । एवं च वचनात् पुरुषान्वयिनो जृम्भावन्मन्त्रवचनस्यापि क्रत्वर्थत्वे सिद्धे नरगतमलनिर्हरणार्थतया लिङ्गात् पुरुषान्वयिनः स्नानस्य क्रत्वर्थता कैमुतिकन्यायसिद्धेति यदन्यैरनुदाहरणत्वमुक्तं तदयुक्तम् । पूर्वपक्षे शङ्कोक्तेरित्याह—न त्विति ।

शंयौ सर्वपरीदानात् । दर्शपूर्णमासयोः श्रुतम्—देवावैशंयुं बार्हस्पत्यमब्रुवन् हव्यं नो वहेतिप्रकृत्य शंयुवरणवचनमिदं भवति किं मे प्रजायाइति । देवा वै वरं ददानास्तमब्रुवन् यो ब्राह्मणायापगुरातै तं शतेन यातयात् इत्यादि । तस्मात् ब्राह्मणाय नावगुरेतेत्यन्तम् । तत्र चिन्ता–किमवगोरणादिनिषेधः क्रत्वर्थ उत पुरुषार्थ इति । तत्र पूर्वपक्षमाह—न ब्राह्मणायेति । आरभ्याधीतत्वादपगोरणनिषेधस्य प्रकरणादङ्गतैव । कदाचिदनानतेष्वृत्विक्षु तदानतये क्रत्वनुगुणतया वधोद्यमादौ प्रसक्ते तन्मुखेन तन्निषेधः अनृतवदननिषेधवत् क्रत्वङ्गमित्यर्थः ।

तासिद्धा लिङ्गात्स्नानस्य पुरुषान्वयिनः क्रत्वर्थता सिद्धेत्यनुदाहरणता ।

शंयौच सर्वपरीदानात्

न ब्राह्मणायावगुरेदिति निषेधः प्रकरणादङ्गं क्रत्वनुगुणतया कदाचिद्दत्विग्वधोद्यमप्रसक्तेः, अनृतवदनवत् । राद्धान्तस्तु स्ववाक्य एव फल श्रुतेः स्ववाक्यस्थ कार्यधीबलवत्तया न क्रतुनिवेशात्कार्यम् । अतः शतयातनाहानमेव कार्यमिति पुरुषधर्मता ।

राद्धान्तस्त्विति युक्तमनृतवदननिषेधस्य क्रत्वर्थता स्ववाक्ये फलाश्रुतेः कार्यान्तिरप्रतीतेरभावात् प्रकृतक्रतुनिवेशात् । कार्यं करणोपकाररूपम् । इह तु स्ववाक्य एव फलश्रुतेरन्तरङ्गस्ववाक्यस्थकार्यधीबलवत्तया शतयातनाहानमेव कार्यम् । न करणोपकाररूपमिति पुरुषार्थतैवेत्यर्थः । नन्वेवं जृम्भावन्मन्त्रवचनस्यापि पुरुषार्थतास्यादित्यत्राह—जृंभेति । नन्वत्रापि यातनाहानवत् प्राणधारणं श्रुतमित्यत्राह—प्राणेति । अनेनापाप श्लोकादेरप्यफलत्वं वर्तमानत्वादुक्तं मन्तव्यम् । ननु यातनाहानेरपि निवृत्तिहेतुकत्वेनाश्रुतेः कथं साध्यतेत्यत्राह—इहेति । यद्यपि लकारस्य वेदे (न) कार्यमर्थः न भविष्यत्ता तथापि कार्यानुगुणतया लिङाऽवगतेरित्यर्थः । नन्विति । नरकापगोरणयोः साध्यसाधनत्वं नावगम्यत इत्यर्थः । तन्नेति । तत्प्रत्यायकार्थवादैकवाक्यभूतविधिवाक्यपर्यालोचनयाऽपगोरण यातनयोः निमित्तनैमित्तिकताप्रतीतेः तन्निवृत्तेर्यातनाहानं फलमवगतमित्यर्थः । नन्वर्थवादस्यस्तुतिपरत्वात् कथमस्मिन्नर्थे प्रमाणतेत्यत्राह—एवं चेति । नन्वेवमपि क्रतुगतापगोरणनिवृत्तेः तत्कर्तृ गतनरकहानमेवास्त्वित्यत्राह—स्वतन्त्रप्रजेति नन्वर्थवादावगतनरकहानस्य विषयजन्यत्वेन नियोगाफलतया कथं निषेधविध्यानुगुण्यमित्यत्राह—विषयेति । विषयानुष्ठानस्य तदधीनत्वादित्यर्थः । ननु यदि नरकहानं फलं तर्हि सर्वत्र निषेधे निषिध्यमानक्रियाकर्तुरधिकार इत्येतद्भज्येतेत्यत्राह—निषेध्येति । नरकहानस्य विषयजन्यत्वेनानियोगफलतया न नियोज्यविशेषणार्हतेति स्वातन्त्र्ये सति निषेध्यकर्तै-

जृंभोत्पन्न व्यळीकशान्तिस्तु क्रत्वपेक्षितं क्रतुगतमेव फलं, यातनाहानं न तथा। प्राणधारणं तु न फलं साध्यत्वाश्रुतेरित्युक्तमेव। इह तु यातयादिति पञ्चमलकारवाच्यापि भविष्यत्ता अनुगुणतया भाति। ननु भविष्यत्वेऽपि न नरकमवगोरणसाध्यमिति धीः। तन्न शंयुं प्रजापतिभेदमधिकृत्यैतदुच्यते। स च प्रजाविनेता हव्यवहनं देवानां कुर्वन् तदाशिषं प्रजा विनेतुं याचते, अवगोरणेन शतयातनास्त्विति। ते आशिषं विनयो-

---

वार्थादत्रापि नियोज्यः। प्रवृत्तिस्तु उत्कटतया फलाधीनेति न किञ्चिदपि हीनम्। नन्वेवं सर्वत्र विषयानुष्ठानार्थं कर्मकल्पना स्यादित्यत्राह—एवं विधेति। ननु क्षणिकस्यापगोरणस्य कालान्तरभाविनो नरकस्य च कथं साध्यसाधनतेत्यत्राह—अनन्तरमिति। तदनुगुणदुरितापूर्वं कल्प्यमित्यर्थः। ननु किमिति तत् कल्प्यतयोच्यते 'अपगुरते' इति पञ्चम लकारार्थता किं न स्यादित्यत्राह—तद्विधस्येति। न हि तन्निरधिकारतया प्रथममवगतम्। शतयातनादेरप्रवृत्तियोग्यतया न तद्विशेषणता। किन्तु अपगोरणनरकयोः अवगतनिमित्तनैमित्तिकभावान्यथानपपत्त्या कल्प्यते तद्विधस्य च न लिङर्थता युक्ता।

ननु प्रथममवगमेऽपि प्रयाजाद्यपूर्वाणां यथापरमनियोगानुगुणतया लिङ्वाच्यता कल्पना तथा निषेधनियोगानुगुणतया दुरितापूर्वमपि वाच्यतया कल्प्यतामित्यत्राह—इतिदिगिति। अयं भावः कार्यं हि लिङर्थं कार्यं च कृतिप्रयोजनम्। तत्प्रयोजनत्वं च तदुद्देश्यतया साचावान्तर कार्याणां परमकार्यार्थितयाऽस्तीति युक्ता वाच्यताकल्पना तेषाम्। दुरितापूर्वं तु निषेधानुगुणत्वेपि न तदर्थं यातनात्वं कृत्युद्देश्यम् तदधीनोपादेयत्वाभावादिति न लिङर्थः। अपगुरते इति पञ्चमलकारत्वेऽपि लिङ्समानार्थतया लिङित्युक्तम्।

प्रागपरोधात्। दर्शपूर्णमासयोः श्रुतम्-तस्मान्मलवद्वाससा न संवदेत इति। तत्र चिन्ता-किमयं प्रतिषेधः क्रत्वर्थः उतपुरुषार्थ इति। ननुग्रहणा-

चितां दधाना अवगोरणयातनयोर्निमित्तनैमित्तिकतां बोधयन्तोऽवगोरणहानेन यातनाहानं नञर्थविषये फलं गमयन्तीत्यभिसंधाय शंयुप्रजापतिमधिकृत्येत्याह। एवं च स्वतन्त्रप्रजाधर्मनिषेधशेषोऽयमर्थवादोऽर्थादनुगुणतया स्वीकृतः। विषयफलोञ्छनिवृत्तिरत्र। निषेध्यकर्तैवात्र स्वातन्त्र्ये सति नियोज्योऽर्थात्। एवंविधविषये फलशून्ये तु विधित एव निवृत्तिः। अनन्तरं नरकानुत्पत्तेरवगोरणादपूर्वकल्पना तद्विधस्य न लिङर्थतेतीयं दिक्।

ग्रहणवत् विधितः प्राप्त्यभावात् संवादस्य कथं तन्निषेधः क्रत्वर्थः इति पूर्वपक्षः इत्यत्राह—प्रकरण इति। यद्यपि न विधितः प्राप्तः तथापि 'पत्नि पत्नि एष ते लोकः, इति मन्त्रोच्चारणादध्वर्योः पत्न्या सह संवादः प्राप्तः लिङ्गात् तदभिमुखीकरणप्रतीतेः। अतस्तन्निषेधोऽनृतवदननिषेधवत् क्रत्वर्थो युक्त इत्यर्थः।

राद्धान्तस्त्विति। न संवादनिषेधः क्रत्वर्थो युक्तः। यस्य व्रत्येऽहन् पत्न्यनालंभुका भवति तामपरुध्य यजेतेत्यनालंभुकापरोधश्रुतेरेव क्रतावसंवादसिद्धेः अवरोधस्यक्रतावुदासीनकरणरूपत्वात्। ननु अनेन प्राप्तेः न तच्छ्रुते रुदासीनीकरणविधायकत्वं स्यादित्यत्राह—तदिति। ननु कर्त्रधिकरणपूर्वपक्षे अनृतवदननिषेधवत् क्रतावेव पुंधर्मतया प्राप्तानुवादोऽस्त्वित्यत्राह—न चेति। ननु "न पृथिव्यामग्निः इत्यादिवन्नित्यानुवादतया प्रकरणान्वयितास्त्वित्यत्राह—अन्वयेति। ननु निषेधस्य प्रयाजादिवत् क्रत्वर्थत्वे क्रतुसंबन्धापेक्षत्वेन क्रतौ या निषेध्यस्य प्रसक्तिः सा चेह प्रकरणान्निवार्येति कथं क्रतौ निषेध्यप्रसक्त्यभावात् पुरुषार्थतोक्तिरित्याह—स्वत इति। ननु न मलवद्वाससेत्युपगमन निषेधः तस्य च क्रतौ प्राप्त्यनर्हत्वात् पूर्वपक्षाभावात् कथमयं विचार इत्यत्राह—संवादेति। ननु कृत्वाचिन्तया संवादनिषेधेऽपि कथं पूर्वपक्षाशङ्का, अनालम्भुकावरोध वचनादेव क्रतावसंवादप्राप्तेरित्यत्राह—संवादेति। कथं तर्हि तन्निरास इत्यत्राह—सर्वथेति। कृत्वा-

प्रागपरोधात्

प्रकरणे संवादः पत्नि पत्नि एष ते लोक इति मन्त्रवचनात्प्राप्तः तस्य निषेधः क्रत्वर्थः अनृतवदननिषेधवत्। राद्धान्तस्तु क्रतावसंवादोऽनालंभुकापरोधश्रुतेः। अपरोधः क्रतावुदासीनीकरणं, तदावश्यकं च वचनं बहुविषयत्वात्। तस्मिन् सति संवादाप्रसक्तेः न क्रत्वर्थता। न च पुंधर्मो निषेधोऽस्ति, यदनु-

---

चिन्तोद्भेदमाह—क्रत्वेति। नन्विति। गच्छेन्नारीं नाकल्यां इत्यादि स्मार्तपुरुषार्थनिषेधेनैवानालंभुकोपगमननिषेधप्राप्तेः कथं पुरुषार्थतया निषेधविधिरित्यर्थः। परिहरति—तर्हीति। नन्वनुवादत्वे प्रकरणात् क्रतुगतकर्तृनिषेधः क्रत्वङ्गतया विधिलाभात् इह तु न तथाविधिः न चेद्विधिः न प्रकरणमात्राद्वाक्यास्वरसहानं युक्तम्। अतः पुरुषार्थताऽनुवाद एव युक्त इत्यर्थः। नन्वत्यन्तविलम्बितमनुमितवेदमूलं स्मार्तं कथमिव शीघ्रप्रत्यक्षश्रुतिरनुवदतीत्यत्राह—प्रौढवाद इति।

॥ अप्रकरणे तु तद्धर्मः ॥ अनारभ्य किञ्चिच्छ्रुतम् "तस्मात् सुवर्णं हिरण्यं भार्यं दुर्वर्णोऽस्य भ्रातृव्यो भवति' इति। तथा "सुवाससा भवितव्यम् रूपमेव बिभर्तीति। तत्र चिन्ता—किं हिरण्यभरणादि क्रत्वर्थमुत पुरुषार्थमिति। ननु सूत्रभाष्ययोः किमिति राद्धान्तोपक्रम इत्याशङ्क्य स्फुटत्वात् तदुपक्रम इत्याह—अनारभ्येति। कथं तर्हि पूर्वपक्ष इत्यत्राह—पूर्वेति। युक्तं पूर्वं पूर्वतरयोः क्रतावप्राप्तिः स्ववाक्याधिकारधीभ्यां पुरुषार्थत्वम्। इह तु वाक्येऽधिकारानवगमात् हिरण्यं भार्यमिति द्वितीयार्थं कृत्यप्रत्ययात् समभिव्याहृतद्रव्यस्य संस्कार्यत्वधीः कार्ययोगि च संस्कार्यमिति संस्कृतस्य क्रतुनिवेशकल्पना युक्तेत्यर्थः।

राद्धान्तस्त्विति। नहि कर्मार्थे कृत्प्रत्ययमात्रात् संस्कार्यत्वधीः क्रियाफलभागितामात्रश्रुतेः न चानारभ्याधीते कार्यान्तरं प्रकृतम्। माभूत्प्रकृतं अत्रैव विधेयमस्त्वित्यत्राह—न चेति। देवताशून्यतया धारणमात्रविधेरित्यर्थः। ननु पुरुषार्थत्वे [कथं] कर्मार्थे कृत्यान्वय इत्यत्राह— अत इति।

वादोऽनृतनिषेधवद्भवेत् । अतः पुंधर्मोऽयं वाक्यादन्यशेषत्वाभावात् । नित्यानुवादतयापि न प्रकरणान्वयिता, स्वतो हि निषेधो निषेध्यकर्तुः तस्य क्रतावभावात् यत्रभावस्तत्र वाक्यान्निषेधः संवादनिषेधे कृत्वाचिन्तयाधिकरणम् । उपगमस्य क्रतौ प्राप्त्यनर्हत्वात् पूर्वपक्षो न स्यात् । संवादनिषेधे त्ववरोधस्यानालंभुकव्यापारौदासीन्यार्थग्रहणात् । संवादस्यान्यव्यापारतया-

---

अध्येतव्य इतिवदनीप्सितकर्मतया पुरुषार्थं धारणमित्यर्थः । नन्विति । अधिकारान्तरकल्पनापत्तेः कथं पुरुषार्थतेत्यत्राह—सत्यमिति । अधिकार्यपरत्वात्सर्वस्य प्रकृताभावात् स्ववाक्ये चाधिकारस्याश्रुतेस्तत्कल्पना न दोषायेत्यर्थः । ननु कल्पनायां तुल्यायां किमिति स्ववाक्यावगतद्रव्यसंस्कारानुगुणः क्रतूपकारो न कल्प्यत इति शङ्कते—कल्पनेति । कल्पनायामपि स्ववाक्यार्थतया अन्तरङ्गमर्थवादस्थं फलमधिकारार्थं कल्प्यम् नतु बहिरङ्ग क्रतूपकारकत्वम् । नन्वेवं पर्णतादावप्यार्थवादिकं फलमधिकारार्थं कल्प्यमिति पुरुषार्थता स्यादित्याशङ्क्य एतदभ्युच्चयमात्रमव्यापित्वात् मूलयुक्तिस्त्वन्येत्याह—एतदिति । कर्तृत्वमिति । अधिकारहेतुकत्वात् कर्तृत्वस्याधिकारकार्यं कर्तृत्वम् । तत्राधिकार्ये कर्तरि क्रियाक्षेपादत्रज्ञाते कारणभूता अधिकारधीः पर्णतायां तु क्रियाकर्तव्यतानवगमात् नाक्षेपात् कार्यकर्तृत्वधीरिति नाधिकारावगतिरित्यर्थः । नन्वेवं किमिति फलकल्पनेत्यत्राह—न चेति । नन्वेवं द्रव्येण क्रियान्वयेऽवगते तस्य कार्यता कल्प्यतामित्यत्राह—न चेति । तत्र हेतुः द्रव्यमिति । ननु पर्णतादिवद्विनियोगसन्निहितापूर्वान्वयोऽस्त्वित्यत्राह—पर्णतावदिति ।

शेषोऽप्रकरणे । अनारभ्य किञ्चिच्छ्रुतम्—येन कर्मणेर्त्सेत् तत्र जयान् जुहुयात् इति । तत्र चिन्ता । किं जयहोमः श्रौतानां स्मार्तानां च सर्वेषां कर्मणामङ्गं उत श्रौतानामेवेति । ननु कर्माङ्गत्वे सिद्धे तद्विशेषचिन्ता । तदेव कुतः अनारभ्याधीतत्वेन हिरण्यभरणवत् पुरुषार्थत्वादित्याशङ्क्य तद्वैषम्येण वाक्यात् कर्मार्थत्वकथनमुखेन पूर्वपक्षमाह—अनारभ्येति ।

पूर्वपक्षाशङ्का। सर्वथोदासीनताऽपरोधार्थः संभाव्यतयापि न स्यात्। अतः कृतावप्रसक्तिसिद्धिः।

कृत्वाचिन्तोद्घाटनं उपगमनिषेधोऽयं वाक्यपौर्वापर्यात्। नन्वनालंभुकोपगमनिषेधः पुंधर्मोऽप्यस्ति स्मार्तः तर्हि तस्य मूलमिदमस्तु; तदनुवादो वाऽस्तु निषेध्यकर्तृमात्रं हित्वा प्रकरणे विध्यर्थः क्रतुकर्तृनिषेधस्तत्रोक्तः। तत्र नचेद्विधिः न स्वरसहानं न्याय्यम् प्रौढिवादोऽनुवादः, तत्वतस्तु स्मृतेर्मूलम्।

ननभाष्ये कृष्याद्यङ्गत्वमप्युक्तम् पूर्वपक्षे, तत्कथमित्यत्राह - भाष्य इति। तत्र हेतुस्तत्रहीति। यद्यपि इष्टदेवतानमस्काराद्यङ्गं कृष्यादावपि द्रष्टव्यं तथापि प्रत्यक्षश्रुतिगम्यं मानान्तरगम्यकर्माङ्गं न युक्तमित्यर्थः। नन्विति। स्मार्तेषु कर्मस्वनाहिताग्नेरप्यधिकारः। जयादिषु होमत्वेनाहवनीयोऽङ्गम् तत्रानाहिताग्निर्जयादिहोमान् आहवनीये कर्तुं न शक्तः। अतो न स्मार्ताङ्गता जयादेरित्यर्थः। न चेति। स्मार्ते कर्मणिजयादीन् साग्निराहवनीये होष्यति अनग्निस्तु नेति न युक्तम् नित्यविनियुक्ताहवनीयबाधापत्तेः। ननु साग्नेः स्मार्ते जयादेरङ्गता नानग्नेरिति न जयादावाहवनीयबाधापत्तिरित्यत्राह—न चेति। तत्र हेतुः एकमिति। वैरूप्यापत्तेरित्यर्थः। ननु वाक्यावगतसङ्कोचः स्यादित्यत्राह—वरमिति। मैवमिति। न हि जयादिहोमाङ्गाहवनीयबाधाहानाय प्रधानस्मार्ताङ्गजयादिहोमो बाध्यः। ननु स्मार्ताङ्गमेव होमः कथमित्यत्राह—होम इति। नन्वाहवनीयस्य श्रौतप्रधानहोमाङ्गत्वात् कथमङ्गगुणतेत्यत्राह—होमस्येति। ननु भवत्वाहवनीयोऽङ्गगुणः, जयादिहोमः प्रधानगुणः। तथापि कुत आहवनीयबाधो न होमबाध इत्यत्राह—यत्रेति।

राद्धान्तस्त्विति। तत्र ह्यङ्गगुणनयः यत्र प्रधानाङ्गत्वं निश्चितं, इह तु जयानां न स्मार्ताङ्गत्वनिश्चयः। नन्वविशेषश्रुतौ कथमनिश्चय इत्यत्राह—शेषादिति। सत्यमविशेषश्रुतिस्तथापि कांस्यभोजिनयादाहवनीययुक्तजयाद्यङ्गानुरोधात् शेषश्रुतिसङ्कोचेन श्रौतमात्राङ्गतानिश्चयः न

अप्रकरणे तु तद्धर्मस्ततो विशेषात्

अनारभ्यवादात्पुंधर्मविधिरिति राद्धान्तोपक्रमः। पूर्वपक्षस्तु द्वितीयान्ततया संस्कार्यत्वधीः, कार्यवच्च संस्कार्यमिति संस्कृतस्य क्रतुनिवेशकल्पना। राद्धान्तस्तु संस्कार्यत्वं न श्रुतं क्रियाफलभागिताश्रुतेः कार्यान्तरदर्शनाद्धि संस्कार्यता, न चात्रकार्यं प्रकृतम्। न चेह तद्विधिः, धारणमात्रविधेः। अतः पुंधर्मोऽयं धारणम्। ननु पुंधर्मत्वे अधिकारान्तरकल्पना, सत्यं

नित्यवच्छ्रुताङ्गाग्निबाध इत्यर्थः। ननु जयादेः ऋद्धिमत्कर्मविनियोगेन प्रयोजनवत्त्वे ज्ञाते पश्चात्तत्राहवनीयविनियोगः। कथं तत एव प्रयोजनविशेषनिश्चय इति शङ्कामनूद्याधिकारिनिदर्शनेनोपपादयति—यद्यपीति।

दोषात्त्विष्टिः। अस्त्यश्वप्रतिग्रहेष्टिः 'प्रजापतिर्वरुणायाश्वमनयत् स स्वां देवतामार्छत् सपर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यत् तन्निरवपत् ततो वै स वरुणपाशादमुच्यत वरुणोवा एतं गृह्णाति योऽश्वं प्रतिगृह्णाति यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुण्याञ्चतुष्कपालान्निर्वपेत् इति। किमयं पुरुषार्थः उत क्रत्वर्थ इति। तदर्थमियं चिन्ता—लौकिके प्रतिग्रहे प्रतिग्रहीतुरिष्टिरुत वैदिकदाने दातुरिति। नन्वत्र भाष्यकारेणेयमिष्टिर्न किञ्चिदारभ्येत्युक्ता। टीकाकृता तु पौण्डरीके श्रुतेति कृत्वाचिन्तोक्ता। तत्र कोऽभिप्राय इत्यत्राह—पौण्डरीक इति। यद्यपि गौश्चाश्वश्चेति ज्योतिष्टोमेऽप्यश्वो दक्षिणा तथापि यावतोऽश्वानिति अश्ववहुत्वयुक्तेयमिष्टिः श्रुतेति बह्वश्वदानवति पौण्डरीके श्रुतिरिति कृत्वाचिन्तोक्तेरित्यर्थः। नन्वन्यथा कथं राद्धान्तासिद्धिरित्यत्राह— इदमिति। नन्वत्र भाष्ये किं लौकिके प्रतिग्रहे इष्टिः उत वैदिक इति सन्देह उक्तः। सोऽयुक्तः। प्रतिग्रहस्यानियोगोयत्वेन इष्टेस्तदर्थत्वायोगात् सर्वस्यापि प्रतिग्रहस्य रागाधीनत्वेन लौकिकवैदिकविभागायोगाच्चेत्याशङ्क्य ग्रन्थोक्तं सन्देहविवरणमाह — सन्देहस्त्विति। नात्र प्रतिग्रहशेषत्वमिष्टेश्चि-

अधिकारापूर्वकार्यपरत्वात्मर्वान्वयानामधिकाराश्रुतेस्तत्कल्पनापि युक्ता। कल्पना चेत् द्रव्यसंस्कारानुगुणः क्रतूपकारः किं न कल्प्यत इति चेन्न; अन्तरङ्गैकवाक्यार्थवादस्थफलमधिकारार्थं कल्प्यम्। एतदभ्युच्चयमात्रं अव्यापित्वात्। मूलयुक्तिस्तु-कर्तृत्वं कार्यमधिकारस्य। अतः कर्तरि विज्ञाते कारणभूताधिकारसिद्धिः। न चाविशिष्टोऽधिकारीति विशेषणभावेन फलकल्पनापि युक्ता। न च क्रियाया द्रव्यान्वये द्रव्यस्य कार्यता

न्त्यते 'किन्तु लौकिकेऽश्वप्रतिग्रहे तन्निमित्तः प्रतिग्रहीतुरिष्टावधिकार उत वैदिके दाने तन्निमित्तो दातुरिति। यदा तु प्रतिग्रहीतुः तदाधिकारान्तरतया पुरुषार्थता। यदा दातुस्तदा प्रकरणात्क्रत्वर्थता। एवं च पादेऽध्याये च सङ्गतिः। युक्ता वाक्यात् कर्मार्थता जयादेः। इह तु वाक्यात् पुरुषार्थतेवेष्टेरित्यवान्तरसङ्गतिः। नन्वत्र लौकिकप्रतिग्रहपदेन किं स्मार्तदानसंवन्धि प्रतिग्रहोऽभिमतः किं वा मैत्रादिदानसंबन्धीत्यत्राह—लौकिकेति। अत्र प्रतिग्रहपदं स्वीकाराभिप्रायम्। अन्यथा न मैत्रादीत्युत्तरग्रन्थेनान्वयः स्यात्। कुत इत्यत्राह—तत्रेति। यद्यपि ग्रहिः स्वीकारमात्रमाह मैत्रादिदानेऽपि तथापि प्रतिपूर्वस्य ग्रहेः वैधदानोपहितस्वीकारविशेषे प्रयोगनियमः पङ्कजादिवदित्यर्थः। ननु उत वैदिकं इति राद्धान्तवचनव्यक्तिभाष्यस्य कथं वैदिकेदाने दातुरिति विवरणं प्रतिग्रहे प्रतिग्रहीतुरिति एतयोरेवानुषङ्गादित्यत्राह—श्रौतेति। भाष्यकृदिति शेषः। कुतः पुनः भाष्यकारस्यैवं सम्मतिरिति ज्ञानमित्यत्राह—अत एवेति। यत एव वैदिकपक्षे दानमेव निमित्तं न प्रतिग्रहः अत एवाप्रतिग्राह्यात् प्रतिग्रहे वैदिकेऽपि दोष इति चोदिते न वैदिकपक्षे प्रतिग्रहीतुरिष्टिः किन्तु दातुरिति भाष्ये परिहृत इत्यर्थः। ननु प्रतिग्रहपक्षेऽपि किमर्थं स्मार्तदानप्रतियोगिनि प्रतिग्रहे इष्टिः श्रौत एव किमिति न सम्भवतीत्यत्राह—इति प्रतिग्रह इति। तस्मिन् पक्षे प्रतिग्रहनिमित्तं इयमिष्टिरधिकारान्तरबलात् स्मार्ते श्रौते वा भवति उभयत्रापि दोषवत्त्वात् श्रौते चेत्यर्थः। न श्रौत एवेत्येतदिति। न वैधोऽश्वप्रतिग्रहः यन्निवृत्त्यर्थमवैधप्रतिग्रहपरतया लौकिकपदं प्रयुज्यत इत्युच्यत इति। अथेति।

कल्पना, द्रव्यं प्रति क्रियायास्तादर्थ्याभावात् सक्तुवत्। पर्ण-तावत्क्रतुनिवेशस्तावन्नास्ति, व्यभिचरितक्रत्वन्वयाद्धिरण्यस्य।

शेषोऽप्रकरणे

अनारभ्याधीतोऽपि जयहोमो वाक्यादृद्धिफलकर्माङ्गमिति सिद्धेः। स्मार्तास्मार्तकर्माङ्गमविशेषात्। भाष्ये तु कृष्याद्यङ्गत्वं शङ्कामात्रं, तत्र ह्यन्वयव्यतिरेकगम्यमङ्गं, न शाब्दम्। ननु जयहोम आहवनीयाङ्गकः स्मार्तः ऋद्धिमदनाहिताग्नेरपि स

अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत् इति वाक्यं वृद्धमातापित्रादि भरणविधिस्तुत्यर्थमेव परमार्थतः न पुनः अकार्यशतं कृत्वेत्यकार्यविधिपरतयाऽश्वप्रतिग्रहपरम्। भवतु वा तत्परम्। तथापि स [न] निवर्त्यः विहितत्वेनादोषत्वात् दोषनिर्घातार्थेयमिष्टिः प्रतिग्रहे भवतीति पक्षः प्रतिग्रहस्य दोषवत्तयैवेति दोषवत्प्रतिग्रहपरेण प्रतिग्रहपदेनैव अदोषविहिताश्वप्रतिग्रहनिवृत्तिसिद्धेरवैधप्रतिग्रहपरतया लौकिकपदं व्यर्थमेवेत्यर्थः।

ननु त्वन्मतेऽपि स्मार्तदानवर्तिप्रतिग्रहपरत्वेन लौकिकपदं व्यर्थमेव। श्रौतदानप्रतिग्रहस्यापि इष्टिनिमित्तत्वेनाभ्युपगतेः तद्व्यावर्त्याभावादित्यत्राह—श्रौतेति। न कस्यापि व्यावृत्त्यर्थं स्मार्तदानपरतोक्ता। किन्तु श्रौत पौण्डरीकीयप्रतिपक्षताभिव्यक्त्यर्थं, न तथाऽवैधतोक्तिः। एवं च सत्येव पूर्वपक्षवचनव्यक्तिः किं श्रौते स्मार्ते च निमित्ते प्रतिग्रहीतुरिति।

अथ यज्ञार्थद्रव्यार्जनरूपवनीवननस्यापि "दीक्षितो द्वादशाहमिति वाक्येन प्रतिग्रहरूपस्य विहितत्वात् तत्र चाश्वस्य प्रतिग्राह्यत्वसंभवात् तत्प्रतिग्रहो वैधः संभवतीति तन्निवृत्तयेऽवैधप्रतिग्रहपरं लौकिकपदमिति चेन्न। वनीवननस्य वैधदानसंबन्धिस्वीकारत्वाभावेनाप्रतिग्रहरूपत्वात्। भवतु वा प्रतिग्रहरूपता विहितत्वेनादोषत्वादेव तन्निवृत्तिः तदाह—वनीवननमिति। नन्वश्वस्वीकारस्य सर्वत्र परि[प्रति]ग्रह रूपतैव नास्ति। न केसरिणो ददातीति अश्वदाननिषेधात् वैधदानोपाधि संबन्धित्वात्प्रतिग्रहत्वस्येति शङ्का दिक्पदनिवर्त्या। निवृत्तिस्तु न केसरिणो ददातीति वाक्यं विश्वजित्प्रकरणाधीतम् अतस्तत्रैवाश्वदानपर्युदासो न सर्वत्रैवेति।

नाहवनीये होतु शक्तः। न च साग्निराहवनीये होष्यति, अनग्निर्नेति युक्तं, नित्यवद्विनियुक्ताहवनीयबाधापत्तेः।

न चानाहिताग्नेः स्मार्ते नाङ्गं जयहोमः, आहिताग्नेः स्मार्तेऽङ्गं युक्तं, एकमेव स्मार्तनियोगं प्रत्यङ्गत्वानङ्गत्वे श्रौतं प्रत्यङ्गत्वमेकोपदेशादयुक्तं, वरं श्रौतमात्राङ्गत्वमस्तु। मैवं न हि होमाङ्गं मा बाधीति प्रधानाङ्गहोम एव बाध्यः होमो ह्यविशेषात्स्मार्तस्याप्यङ्गम्। होमस्याप्याहवनीयोऽङ्गं। यत्र

ननु वेदो वेति नयात् उपक्रमानुरोधेन दातुरेवेयमिष्टिः कथं प्रतिग्रहीतुरिति पूर्वपक्षः इत्यत्राह—पूर्वपक्षस्त्विति। सत्यमुपक्रमे दानप्रतीतिः तथापि तस्मिन्नेवोपक्रमे स वरुणगृहीतः स पर्यदीर्यत चतुष्कपालमपश्यत् तन्निरवपत् ततो वै स वरुणपाशादमुच्यत इति नानावचोभङ्ग्या पापमोकार्थेयमिष्टिः श्रुता ततः किमित्यत्राह—पापमिति। दानस्य विहितत्वेन न ततः पापमित्यर्थः। यत एव दोषनिर्घातार्थत्वेन इष्टेर्दोषवदेव निमित्तम्। ततः उपसंहारस्थत्वेऽपि प्रतिग्रह एव पापवत्त्वेनेष्टेर्निमित्तम्। ननु आच्छिद्य दानादौ दानात्पापमिति दानस्यापि पापत्वात् कथं प्रतिग्रह एव निमित्तं इत्यत्राह—न चेति। अस्यार्थः नहि वरसमर्पणमात्रं दानम् किन्तु परस्वत्वापत्तिपर्यन्तस्वद्रव्यत्यागात्मकम्। न चाच्छिद्यदाने तस्य वस्तुनः स्वत्वम्। अतस्तत्र दानस्यासत्वान्न ततः पापम्। किन्तु आच्छेदादेव। ननु वेदे विश्वजिति न केसरिणो ददाति इति निषेधात् रागादिना निषिद्धाच्च दानात्पापमस्त्येव। तथा लोके पापोद्यतानुग्रहार्थं निषेधात् तदनुग्रहदानात्पापमस्त्येवेति कथं न दानात्पापमिति चेत् तत्राह—न केसरिण इति। अस्तु नाम दानात्पापं तथापि [न]तत् सत्प्रतिग्रहे अवैधत्वात् तस्य। वैधदानोपहितत्वात् प्रतिग्रहत्वस्य परोपकारादिसामान्यशास्त्रस्यापि निषिद्धेतरविषयतया तस्यावैधता। ननु प्रतिग्रहत्वाभावेऽपि कथं न तत्रेष्टिः तत्राह—स्वप्रतिग्रह इति। दात्रधिकारपक्षे हि उपसंहारस्थं प्रतिगृह्णीयादिति पदं विपरिणामेन प्रतिग्राहयेदिति वर्णनीयम्। तद्वर्णना च लक्षणया। सा च प्रतिग्रहदानयोः

यदाऽऽहवनीयो न शक्यः, तत्राङ्गगुणविरोधनयादङ्गाङ्गाहवनीयबाधोऽस्तु।

राद्धान्तस्तु—सिद्धे स्मार्तेऽपि होमस्याङ्गत्वेऽङ्गगुणनयः। अङ्गत्वे होमस्यानिश्चिते स नास्ति। अविशेषाद्द्विमदङ्गत्वश्रुतावप्याहवनीययुक्ताङ्गस्वरूपानुरोधात् श्रौताङ्गतानिश्चयात् शेषिश्रुतिसंकोच एव न नित्याङ्गाग्निबाधः। यद्यपि सप्रयोजनत्वधीपूर्वकमगन्यङ्गत्वं तथापि सप्रयोजनता सामान्यतो धीस्था ततो यथाविनियोगं प्रयोजनविशेषनिश्चयः। अतएव यथाविनियोगमधिकारविशेषनिश्चयः।

संबन्धे सति इति प्रतिग्रहीतुरेवाधिकारः। ननु प्रतिग्रहशून्यत्वेप्युपक्रमावगतिबलात् दातुरिष्टिरस्त्वित्यत्राह—अत इति। उपक्रमोपसंहारोभयसामञ्जस्याय प्रदिग्रहीतुरेवेष्टिः। ननु प्रतिग्रहीत्रधिकारे दातृदोषकीर्तनमनन्वितमित्यत्राह—दातृदोषेति। ननु प्रकरणबलादिष्टेरङ्गत्वे साङ्गे प्रधाने एकस्यैवाधिकार इति दातुरेवाधिकारः। दोषविमोकश्रुतिः पर्णताफलश्रुतिवत् द्रव्यसंस्कारकर्मस्विति नयात् स्तुत्यर्थैवेत्यत्राह—दोषविमोकेति। उपक्रमस्था दोषविमोकश्रुतिरुपसंहारेणोज्जीविता प्रतिग्रहीतुरधिकारमाहेति स्ववाक्य एवाधिकारलाभे न प्रकृताधिकारानुप्रवेश इति न पौण्डरीकान्तेति न फलश्रुतिः क्रत्वर्थस्येति न पर्णताफलश्रुतिवत् स्तुत्यर्था। किन्तु शंयुवाक्यस्थवत् फलपरतया आदेयैवेत्यर्थः। वाक्यविरोधे च प्रकरणं बाध्यमेवेत्याह—एवं चेति। नन्वश्वप्रतिग्रहमात्रात्पापमित्युच्यते भवता। भाष्ये तु शूद्रादन्यस्मात् पापकर्मणः सकाशात्प्रतिग्रहे दोषः इत्युक्तं विरुध्यत इत्याशङ्क्य पापगुरुत्वकथनेन तन्मोकार्थितारतम्यार्थं तथोक्तिरित्याह—भाष्य इति।

राद्धान्तस्त्विति। दात्रुपक्रमात् दातुरेवेष्टिः न चोपक्रमे दोषकीर्तनात् दोषवतो निमित्तताभानं उपसंहारे च प्रतिगृह्णीयादिति मुख्यार्थताभानात् तदुभयानुरोधात् प्रतिग्रहीतुरिति वाच्यम्। यतो वरुणग्रहो नाम जलोदरं,

दोषात्विष्टिः

पौण्डरीके श्रूयत इति भाष्यानुक्तमप्युक्तं, यदि बह्वश्वदानवति क्रतौ श्रुतिर्नस्यात् तदा राद्धान्तासिद्धिः, तद्विधिश्च पौण्डरीक इति तत्र श्रुतिरुक्ता इदं च स्फोर्यम्। सन्देहस्तु किं लौकिकेऽश्वप्रतिग्रहे प्रतिग्रहीतुरिष्टिः। उत वैदिके दाने दातुरिति। स्मार्तदानसंबन्धि प्रतिग्रहो लौकिको मतः, न मैत्रादि दानसंबन्धि तत्र प्रतिग्रहपदस्यामुख्यत्वात्, वैधदानोपाधेः प्रतिग्रहपदप्रयोगात्। श्रौत पौण्डरीकीयं दानं वैदिकं मतम्।

तदेव श्रुतम्। अतो यथाश्रुतजलोदरहेतुपापमश्वप्रतिग्रहाद्भवतीति न मानान्तरसिद्धम्। ननु माभून्मानान्तर सिद्धम् अस्मादेव वचनात् ज्ञाप्यतामित्याशङ्क्य भेदापत्तेर्निरस्यति—न चेति। ननु साध्यद्वयपरत्वे वाक्यभेदः। नात्र साध्यद्वयम् इष्टिविषयैकापूर्वस्यैव साध्यत्वात् तथापि अधिकारिविशेषणतया अनुगुणसाध्यतया न वाक्यभेद इत्यत्राह—अयं भाव इति। न तावत् जलोदरोत्पत्तिशान्त्योः सिद्धवच्छब्देन ज्ञाप्यता। किन्तु साध्यतयाऽधिकारिविशेषणमित्येवम्। नन्वेवमपि कथं वाक्यभेद इत्यत्राह—साध्येति। जलोदरशान्तेः साध्यत्वमश्वप्रतिग्रहे जलोदर हेतौ प्रमिते सति भवति नान्यथा जलोदरहेतुत्वेनाप्रमित इत्यर्थः। न च तत्प्रमितिरस्तीति शेषः।

ननु जलोदरशान्तेः साध्यत्वं प्रतिपादयच्छब्दः तत्साध्यत्वार्थं जलोदरहेतुत्वमश्वप्रतिग्रहस्य प्रमापयतीत्यत्राह—न चेति। तत्रहेतुः उक्तं हीति। न हि फलभूतस्य साध्यतां शब्दः प्रतिपादयति किन्तु मानान्तरतो ममेदं साध्यमिति ज्ञाते तस्य नरस्य यागादिविषयकमपूर्वं साध्यमिति प्रतिपादयति। ततश्च विषयीभूतयागादेः स्वर्गाद्युपायता उपादानादवसीयत इत्यौपादानिकतया तस्याः शाब्दता। न साक्षाच्छब्दप्रतिपाद्यतयेति न जलोदरशान्तिः साध्यतया शब्देन प्रतिपाद्यते। यदुपपत्त्यर्थं शब्दात्प्रतिग्रहस्य जलोदरहेतुता प्रमीयेतेति न शब्दात्तद्धीरित्यर्थः। ननु वचनस्य भङ्ग्या विपरिणामादिना प्रतिग्रहाज्जलोदरं भवति इष्ट्या च तदपनय इति तदेव वचनं बोधयत्वित्यत्राह—यदि परमिति। तथा सति वाक्यभेदः

अत एव यदुक्तं—"अप्रतिग्राह्यात्प्रतिग्रहे वैदिकेऽपि दोषः" इति तत्रोक्तं न वैदिकपक्षे प्रतिग्रहीतुरिष्टिरिति। प्रतिग्रहे हि भवति स्मार्ते श्रौते वा न त्ववैधः, प्रतिग्रहो लौकिको मतः वैधं दानं वैदिकमिति। नहि वैधोऽप्यश्वप्रतिग्रहोऽस्ति यो-निवर्त्यः।

अथ अप्यकार्यशतं कृत्वा भर्तव्या इति वैधसंभवः, तथापि न निवर्त्यः, दोषवत्तयैव प्रतिग्रहस्येष्टिस्तत्रेति पक्षः सा चावैध

स्यादिति भावः। नन्वेवं शंयुवाक्येपि शतयातनाहानस्य कथं साध्यता, अपगोरणस्य शतयातनाहेतुत्वाप्रतीतेरित्याह—शंयौ त्विति। युक्तं शंयौ यातनाहानस्य साध्यत्वं सर्वविधीनामधिकारपरतयाऽधिकारिविशेषणत्वे-नाक्षेपात्। ननु यातनाहानमश्रुतं कथं विधित आक्षिप्यते इत्यत्राह—नञ् विधेरिति। अपगोरणनिमित्तकयातनाश्रुतेः तन्निवृत्तेर्यातनाहानमपि श्रुतमेव। तच्च निवृत्तिविषयनियोगस्य प्रवृत्तिकरत्वोपयोगि। अतो नञ् विधिना श्रुतनिषेध्यजन्ययातनाक्षेपद्वारेण स्वविषयभूतनिवृत्तिसाध्य-यातनाहानाक्षेपो युक्तः। न चैवमिष्टिविधिभ्यो प्रतिग्रहजन्य पापाक्षेप द्वारा इष्टि जन्यतया तन्मोक्षाक्षेपो युक्तः। इष्टेः प्रतिग्रहरूपत्वाभावात्। अतो नञ् विधिवदिष्टिविधिर्नाधिकारविशेषणाक्षेपक इत्यर्थः।

ननु उपक्रमस्थार्थवादपदैः "वरुणो वा एतं गृह्णाति योऽश्वं प्रति-गृह्णाति" इति प्रतिग्रहपापयो र्निमित्त नैमित्तिकतावगतिः। तथा 'तन्निर-वपत् ततो वै स वरुण पाशादमुच्यत' इति इष्टिपापमोक्षयोरपि निमित्त-नैमित्तिकतावगतिबलात् अधिकारिविशेषणतास्त्विति शङ्का दिक्पद-निवर्त्या। निवृत्तिस्तु—एवं च सत्यति गौरवं, पापस्य प्रतिग्रहजन्यताक्षेपः, तन्मोक्षस्येष्टिजन्यताक्षेप इति। शंयुविधौ तु न पृथगाक्षेप्यता। अपगोरणेन यातना भवति इत्याक्षेपादेव तन्निवृत्त्या यातनाहानं भवतीति सिद्धमेव। हेतुनिवृत्त्या हेतुमन्निवृत्तेरर्थसिद्धत्वात् न नञ् विधेरतिगौरवमिति भेद इति। एवं च जलोदरे मुख्यस्य वरुणपदस्य प्रतिग्रहस्य यथाश्रुतजलोदरहेतु-त्वाप्रमितेः रक्षणपोषणादिक्लेशपरतया कथञ्चिद्वर्णनेन स्तुत्या उपक्रमगतं

स्येति नावैधता वाच्या । श्रौतपौण्डरीकीयप्रतिपक्षतया तु स्मार्तदानवर्तितोक्ता । वनविनन यदि प्रतिग्रहो यद्यश्वस्यापि तथाप्यदोषत्वादेव निवृत्तमिति-दिक् ।

पूर्वपक्षस्तु यद्यपि दात्रुपक्रमे वाक्ये प्रतिग्राहयेदित्युपसंहारो युक्तः । वेदो वा प्रायदर्शनादिति नयात् । तथाप्युपक्रम एव नाना वचोभंग्या पापमोकार्थेयमिष्टिः श्रुता पापं च न दानात् । अत उपसंहारस्थ पापवत्प्रतिग्रह एवेष्टिः । न चाच्छिद्य दानादौ दानात्पापं, किंत्वाच्छेदादेव । न केसरिणो ददातीत्यश्वदाना-

---

पदजातं व्याख्येयम् । तद्दातृपक्षेऽपि सममित्याह—एवं चेति । ननु प्रतिग्रहेण प्रतिग्रहीतरि रक्षणादिक्लेशरूपा दोषा दृश्यन्ते कथं दातृपक्षे निर्वाह इत्यत्राह यद्यपीति । टीकोक्तक्रत्वाचिन्तामाक्षिपति—नन्विति । अनारभ्याधीतत्वे-पीष्टेः दात्रुपक्रमोऽप्रतिपक्ष इति दातुरेवेष्टिः । ततश्च श्रौतस्य प्रायश्चित्त-स्य श्रौतमेव दानं निमित्ततया शीघ्रमवगतमिति क्रत्वीय दानसंबन्धावगतेः तन्मुखेनेष्टिः क्रत्वर्था, पर्णतयेति [पर्णता यथेति] वृथा भाष्यानुक्तः पौण्डरीकप्रकरणाम्नातत्वोपगमः टीकाकारस्येत्यर्थः । मैवमिति । अनारभ्या-धीतत्वे त्वन्यतोऽनुष्ठानासिद्धेः अधिकारकल्पनया स्वतन्त्राधिकारः स्यादि-त्यर्थः । नन्वप्रतिपक्षात् दात्रुपक्रमबलात् दानस्य निमित्तत्वे श्रौतस्य श्रौत-मेव निमित्तमिति क्रत्वीयदानस्य निमित्तत्वावगतेः तन्मुखेन क्रत्वङ्गता पर्णतावदित्युक्तमित्यत्राह—दानमिति । न हि श्रौतस्य श्रौतमेव निमित्तमिति नियमः गृहदाहादेरश्रौतस्यापि निमित्तत्वोपगमात् । नापि पर्णतावद्युक्तम् । पर्णतायाः शेषीभूतजुह्वन्वयप्रतीतेः तन्मुखेन तद्वदपूर्वार्थत्वम् । इह तु दानं निमित्तत्वेन श्रुतं न शेषित्वेनाप्यन्वयार्हं एकस्मिन् वाक्ये । निमित्ततयाऽन्वये हि मुख्यार्थतयाऽन्वयः । शेषित्वे तु नियोगीयलक्षणया । नत्व[नतु स]सकृ-दुच्चरितस्य मुख्यार्थत्वं लक्षणार्थत्वं च संभवतीत्यर्थः । भवत्वधिकारान्तर-कल्पना; का हानिरित्यत्राह—अत इति । अधिकारकल्पनायां प्रवृत्तायां रात्रिसत्रवदार्थवादिक पापमोकार्थिनोऽधिकारः कल्प्यः । पापं च नोभयतो-दतः प्रतिगृह्णीयादिति निषेधात् प्रतिग्रहीतुरेवेति प्रतिग्रहस्यैव निमित्ततया

त्पापं तथा पापोद्यतानुग्रहार्थे दानात्पापमस्तु न तु तत्सत्प्रतिग्रहे अवैधत्वात्। सत्प्रतिग्रहे तु प्रतिग्राहयेदित्युपसंहारवर्णनं अत उपक्रमोपसंहारसामञ्जस्याय प्रतिग्रहीतुरिष्टिः। दातृदोष कीर्तनं तु प्रतिग्रहदोषगौरवपरम् दातुरपि यावद्दोषशङ्केत्यर्थः। दोषविमोक श्रुतिश्चेयमुपक्रमस्था अनुप्राणिता चोपसंहारेण प्रतिग्रहीतुरिष्टिः गता न क्रत्वर्थस्थेति, न पर्णताफलश्रुतिवत् स्तुत्यर्थतया नेया, किंतु शंयुवाक्यस्थफलवदादेया। एवं च वाचनिक पापमोकानुरोधात्पौण्डरीकप्रकरणबाधः। भाष्ये शूद्रादन्यस्माद्वा

प्रतिग्रहीतुरिष्टिः। यद्यपि यथाश्रुतं फलमशक्यम्। तथापि अश्रुतकल्पनातो वरमयोग्यांशव्युदासेन पापापनयमात्रं फलत्वेन विवक्षितम्। न च गृहदाहेष्टिवत् दाननिमित्ततयाऽधिकारान्तरं भवत्विति वाच्यम्। निमित्ताधिकारात् कामाधिकारस्योत्कण्ठितत्वात् पापमोक एव वरमिति तदधीनः प्रतिग्रहीतुरेवाधिकार इत्यर्थः। नन्वारभ्याधीतत्वे हि श्रौतदाने दातुरिति कथं राद्धान्तसिद्धिरित्यत्राह—यदा-त्विति।

द्वितीयमधिकरणं संशयपूर्वकमाह—एवमिति। ननु यस्याधिकारस्तस्यैव कर्तृत्वमिति दात्रधिकारे दातैव कर्ता न प्रतिग्रहीतेति कथं प्रतिग्रहीतृकर्तृतया पूर्वपक्ष इत्यत्राह—पूर्वपक्षस्त्विति। दातुरधिकारेऽपि पोषणादिक्लेशरूपदोषस्य ग्रहीतृगतत्वात् तदनुरोधेन प्रतिग्रहीतृकर्तृतैव। तथा च सति सिद्धान्तेऽपि प्रतिग्राहयेदिति विपरिणामस्यावश्यकत्वात् यः प्रतिगृह्णाति तं निर्वापयेत् इत्येव विपरिणामो युक्तः प्रतिगृह्णातितो निर्वपतेर्जघन्यत्वादित्यर्थः। नन्वेवं प्रतिग्रहीतृकर्तृत्वानुरोधात् तस्यैवाधिकारोऽस्त्वित्यत्राह—दात्रुक्रमादिति। यथा यजमानेन स्वाधिकारसिध्यर्थं अङ्गभूतमुपवासमृत्विजः कार्यन्ते एवं यजमान ऋत्विजं निर्वापयेदित्यन्वयः। अतोऽधिकारीदाताकर्ता तु प्रतिग्रहीतेति तद्दात्रुपक्रमात् प्रतिग्रहीतृगतत्वाच्च दोषस्यैवमङ्गीक्रियत इत्यर्थः। दातृदोषकीर्तनं च पूर्वपक्षवदित्याह—दोषकीर्तनमिति।

पापकर्मणः प्रतिग्रहे दोषोऽस्तीति यदुक्तं तत्पापगुरुत्वान्मोकार्थितारतम्यार्थम्। अश्वप्रतिग्रहमात्राद्दोषसिद्धिः। राद्धान्तस्तु यथाश्रुतजलोदरहेतु पापं नाश्वप्रतिग्रहान्मानान्तर सिद्धम्। नचैतद्वचनात् ज्ञाप्यं वाक्यभेदापत्तेः। अश्वप्रतिग्रहेण जलोदरोत्पत्तिः इष्ट्या च तदपनय इत्यर्थभेदाद्वाक्यभेदः स्यात्। अयं भावः—न तावज्ज्वलोदरोत्पत्तिशान्त्योः सिद्धवच्छब्दज्ञाप्यता, किंतु साध्यतया अधिकारिविशेषणत्वमित्येव। साध्यता च जलोदरहेतौ प्रमिते तच्छान्तेः नान्यथा। नच शब्द एव शान्ति साध्यतार्थं जलोदरहेतुतां प्रमिमीते। उक्तं हि वेदैवासौ मयैतत्कर्तव्यमिति। अतो न शाब्दी जलोदरहेतुधीरिति। यदि परं वाक्यान्तराद्वचनस्य भंग्या स्यात्। शंयो तु विधेरधिकारि विशेषणाक्षेपात्। नञ् विधेश्च श्रुतनिषेध्यजन्ययातनाक्षेपद्वारेण स्वविषय-

---

राद्धान्तस्त्विति। उपक्रमस्थार्थवादपदानां दातृपरत्वात् दोषकीर्तनस्यावश्यकर्तव्यतापरत्वेन स्तुतिमात्रपरत्वे प्रथमश्रुतेऽपि प्रतिगृह्णीयादित्यत्र प्रतिग्राहयेदिति विपरिणामं कृत्वा यस्याधिकारस्तस्यैव कर्तृत्वं चेत्यर्थः। नन्वेवमुपक्रमानुरोधेन उपसंहारवर्णने वेदोवेत्यनेन पौनरुक्त्यं स्यादित्यत्राह—एवं चेति। नन्वधिकरणद्वयमेकीकृत्य व्याचक्षाणस्य टीकाकारस्य कोऽभिप्राय इत्यत्राह—अधिकरणेति।

विवरणेस्त्विति। उत्तराधिकरणन्यायेन दात्रुपक्रमबलात् दातुरिष्टिरिति स्थिते अत्र चिन्ता—किं लौकिके दाने दातुरिष्टिः उत वैदिक इति। ननु पौण्डरीकप्रकरणबलात् वैदिकदान एवेयमिष्टिः इति कथं लौकिकदान इति पूर्वपक्षः इत्यत्राह—पूर्वपक्ष इति। स्ववाक्य एवार्थवादे दोषश्रवणाद्दोषवत्तया निर्देश्यमेव दानमिष्टेर्निमित्तं दोषवत्तया निर्देश्यता च सदोषप्रतिग्रहहेतुतया, दानस्य स्वरूपतो दोषाभावात्। सा च लौकिकस्य न पुनर्वैदिकस्य पौण्डरीकीयदक्षिणादानस्य। लोकेऽपि च न मैत्रादिदानस्य, तस्यावैधत्वेन प्रतिग्रहहेतुत्वाभावादित्यर्थः। नन्वेवं यदि लोके दोष-

साध्ययातनाहानाक्षेपो युक्तः। इहत्विष्टिविधौ न तथाऽऽक्षेप इति दिक्।

एवंच मानान्तरगम्याश्वरक्षणपोषणक्लेशहेतुपापालम्बनं कथंचित्स्तुत्योपक्रमगतं पदजातं व्याख्येयम्। यद्यपि प्रतिग्रहीतरि रक्षणादिदोषः, तथापि तद्दोषनिमित्तता दातुरपि यावदित्येव तावद्व्याख्येयम्। नन्वेवं दात्रुपक्रमोऽप्रतिपक्ष इति दातुरिष्टिः श्रौतदानेऽपि शीघ्रावगतेस्तु मुधा पौण्डरीके श्रूयत इत्युपगमः। मैवं, दानं निमित्तं न शेषित्वेनाप्यन्वयमर्हति एकस्मिन् वाक्ये। अतोऽधिकारकल्पनायां रात्रिसत्रवदार्थवादिकं यथाश्रुतमशक्यमिति पापापनयमात्रं विवक्षितव्यमिति पापहेतोः प्रतिग्रहस्यैव निमित्तता स्यात्।

वत्प्रतिग्रहहेतुतया दानस्य दोषवत्ता, तर्हि तुल्यन्यायतया वैदिकेदानेऽपि सदोषता। ततश्च भाष्ये वैदिकेऽपि प्रतिग्रहे सदोषे तद्धेतोर्दानस्यापि निर्देश इति शङ्किते दातुरिष्टिरित्यविशेषेणोत्तरमयुक्तमित्याशङ्क्य तदभिप्रायमाह यत्त्विति। दातुरित्युत्तरं तस्य प्रतिग्रहे हेतुतया सदोषदाने दातुरिति। एवं तथापि किमिति वैदिके दक्षिणादाने न भवति इत्यत्राह—दक्षिणादानं चेति। ननु यद्यपि दोषवत्प्रतिग्रहसंबन्धो दक्षिणादानस्य नास्ति तथापि दोषवदयाज्ययाजनसंबन्धो दोषवत्तास्त्वित्यत्राह—अयाज्येति। न हि दोषवत्संबन्धमात्रात् सदोषता सर्वस्यापि साक्षात् परम्परयावा तत्संबन्धसंभवात्। किन्तु दोष हेतुतया। अयाज्ययाजनं तु न दानाधीनमिति न तेन दानस्य दोषतया निर्देश्यतेत्यर्थः।

राद्धान्तस्त्विति। स्याल्लौकिके यदि पापवन्निमित्तेयमिष्टिः। अथार्थवादे दोषकीर्तनात् दोषवद्दाननिमित्तेयमिष्टिरिति लौकिक एवेति चेन्न, यथाश्रुतं जलोदररूपदोषवद्दानं निमित्तं किं वा पोषणादिक्लेशरूप दोषवत्? न तावदाद्य इत्याह—न तावदिति। न द्वितीय इत्याह—पोषणेति। ननु वैदिकदानस्यैवं कुतो निमित्ततेत्यत्राह—अतइति। द्वितीयचिन्ता तु

यदा तु पौण्डरीके श्रूयते तदा प्रकरणादङ्गत्वे दाननिमित्तता फलश्रुतिः परार्थत्वादर्थवादः। एवं श्रौते दाने दातुरिति राद्धान्तः सिद्धः।

एवं दातुरधिकारे स्थिते किं दातृकर्तृकेष्टिः, उतप्रतिग्रहीतृकर्तृकेति चिन्ता, पूर्वपक्षस्तु पोषणादि दोषस्य प्रतिग्रहीतृगतत्वानुरोधाद्विपरिणामे चावश्यके यो गृह्णाति तं निर्वापयेदिति विपरिणामो युक्तः दात्रुपक्रमाद् दातैवाधिकारी स ऋत्विजं निर्वापयेदित्यन्वयः। दोषकीर्तनं चैवं दातुरपि यावद्दोष इति।

राद्धान्तस्तु-दातृपरत्वादुपक्रमपदानां तद्दोषकीर्तनस्यचावश्यकर्तव्यतापरत्वात्प्रतिग्राहयेदिति युक्तम्। एवं चोपक्रमानुरोधादुपसंहारवर्णने स्थिते प्रतिग्रहीतृगतदोषकीर्तनानुरोधात् विधान्तरेण

किमुपसंहारानुरोधात् प्रतिग्रहीतुरधिकारः किं वोपक्रमानुरोधात् दातुरिति। अत्रपूर्वपक्षमुपक्रमते-द्वितीयेति। ननु वेदो वेति नयादुपक्रमानुरोधेनोपसंहारवर्णस्य युक्तत्वात् कथं पूर्वपक्ष इत्याशङ्क्याह—वेदो वेति। युक्तमुच्चैर्ऋचा क्रियत इत्यत्रोपक्रमानुरोधेनोपसंहारवर्णनम् उपसंहारस्थगदिर्वेदैकदेशत्वेन उपक्रमानुरोधोऽप्युपसंहारस्य, सर्वथा हान्यभावात्। इह तु प्रतिग्रहशब्दो दाने स्यादिति हानिरेव, दानप्रतिग्रहयोरत्यन्तभेदात्। ततः किमित्यत्राह—अत इति। उपक्रमस्यार्थवादात्मकस्य विध्युद्देशोपसंहारार्थत्वात् नोपक्रमादुपसंहारबाध इत्यर्थः।

राद्धान्तस्त्विति। सत्यमुपक्रमोपसंहारौ भिन्नार्थौ तथाप्युपसंहाररूपविध्युद्देशानुरोधात् वरमर्थवादोऽप्युपक्रमोऽनुरोध्यः। इतरथा अधिकारान्तरकल्पनापत्तेः। उपक्रमानुरोधे नु दातुरधिकारात् प्रकरणात् पौण्डरीकाङ्गतासिद्धिरित्यर्थः। ननु दातुरधिकारे प्रतिगृह्णीयादिति निर्देशः कथमित्यत्राह दृष्टश्चेति। लोके पञ्चभिर्हलैः कृषतीति हेतुकर्तरि संविधानमात्रकर्तरि स्वामिनि साक्षादणिजन्तप्रयोगदर्शनात् प्रतिग्राहयेदित्यर्थे प्रतिगृह्णीयादिति सिद्धमित्यर्थः।

वर्णनाशङ्कानिरासाद्वेदो वेत्यपुनरुक्तिः । अधिकरणद्वयावच्छेदश्चैवं अर्थवादोत्थः पूर्वत्र पूर्वपक्षः स तात्विकार्थवादार्थकथननिराकार्यः तात्विकताचोत्तरराद्धान्तायत्ता आवश्यककार्यतापरतया ।

विवरणे तूपक्रमानुरोधाद्दातुरित्युत्तरत्र स्थितेऽत्र चिन्ता । पूर्वपक्षस्तु वैधे दाने स दोषः प्रतिग्रहहेतुतया दोषवत्तया निर्देश्ये लौकिके इष्टिः नतु वैदिके पौण्डरीकीयदक्षिणादाने । यत्तु वैदिकेऽपि प्रतिग्रहे सदोषे तद्धेतोर्दानस्यापि तद्दोषनिर्देश इति शङ्किते दातुरिष्टिरित्युत्तरं तत्प्रतिग्रहहेतुतया सदोषे दाने दातुरिष्टिः । दक्षिणादानं च न प्रतिग्रहहेतुः भृतौ न प्रतिग्रहपदप्रयोगो यतः । अयाज्ययाजनदोषस्तु न दानाधीन इति न तेन दानं सदोषतया निर्देश्यम् ।

। पानव्यापच्च तद्वत् । इदं श्रूयते "सोमेन्द्रं चरुं निर्वपेत् श्यावाकानां सोमवमन" इति । तत्र चिन्ता—किमियमिष्टिः पुरुषार्था उतक्रत्वर्थेति । तदत्रेयं चिन्ता किं लौकिके सोमवमन एवैतत्प्रायश्चित्तं उत वैदिक इति । लौकिकं सोमवमनं धातुसाम्यार्थं वैद्यशास्त्रोक्तम् । तत्र वाक्यात् क्रत्वर्थता प्रसाधनात् अध्याये स्फुटसंगतिः । अवान्तरसङ्गतिं वदन् पूर्वपक्षमाह—दोषादिति । विवाएषइन्द्रियेण वीर्येणर्ध्यते यः सोमंवमिति इति दोषदर्शनेन पूर्ववत्पूर्वपक्षः । तर्हि तद्वदेव राद्धान्त इति तेनैव गतार्थतेत्यत्राह—तन्निरास इति ।

राद्धान्तस्त्वित । न हि लौकिके सोमपानवमने दोषता । धातुसाम्यार्थत्वेनानुकूलवेदनीयत्वेनाङ्गीकृतत्वात् वमनार्थंसोमपानस्य । धातुसाम्यं च शरीरान्तर्गतदोषनिस्सरणेन । तच्च वमनेन । वमनं च अङ्गाङ्ग्यविनाभूतमिति ग्लानिरङ्गीकृता न दोषायेत्यर्थः । ननु शेषभक्षणवमनेऽपि तथा दोषो न स्यादित्यत्राह—क्रतुशेषेति । न हि क्रतुशेषभक्षणं वमनार्थम् । अतस्तत्र ग्लानिर्दोष एव जरणान्तसंस्कारस्यैव क्रतूपकारकत्वात् । वमने च जरणान्तसंस्कारलोपे क्रतुवैगुण्याद्दोषतैवेत्यर्थः । ततः किमित्यत्राह—दोषवतीति ।

राद्धान्तस्तु—न तावद्यथाश्रुतदोषनिर्देश्यता लौकिकेऽपि युक्ता मानाभावात्। पोषणादि क्लेशहेतुता तु पौण्डरीकीय दक्षिणादानस्यापि। अतः पौण्डरीकाङ्गत्वसंभवे अधिकारान्तरमयुक्तम्।

लौकिकाश्रयणेन द्वितीयचिन्तायां पूर्वपक्षः। वेदो वेत्युपक्रमानुरोधेऽपि वेदेपि वेदैकदेशत्वादङ्गादेर्नोपसंहारहानिः। इह तु प्रतिग्रहशब्दो दाने स्यात्। अतो विध्युद्देशार्थपरतया उपक्रमनाम्नान्नोपसंहारो बाधमर्हति।

राद्धान्तस्तु—सत्यमिह नानार्थावुपक्रमोपसंहारौ, विध्युद्देशस्तु प्रतिग्रहीत्रन्वयेऽधिकारकल्पनापत्तेरुपक्रममपरुणद्धि। तदनुरोधे पौण्डरीकाङ्गतासिद्धिः। दृष्टश्च हेतुकर्तर्यप्यणिजन्तः तेन प्रतिगृह्णीयादिति सिद्धम्॥

एवं च दोषवत्त्वबलेन ऋत्वीयवमनान्वयद्वारा ऋत्वन्वयान्नाधिकारान्तरकल्पनापीत्याह—क्रतुगतेति। विवरणेत्विति। य इन्द्रियेण वीर्येण व्यृध्यते पुमान् तस्य चरुः श्रुतः सोमवमन इति पुरुषसंबन्धित्वेन श्रवणात् पुरुषार्थता। लौकिकवमने चरुर्न क्रतुगतवमने ऋत्वन्वयिपुरुषसंबन्धाश्रुतेरित्यर्थः। राद्धान्तस्त्विति। लौकिकपुरुषवमने दोषता नास्तीति ऋत्वीयपुरुषदोषता। नन्वेवमपि कथं ऋत्वर्थतेत्यत्राह—क्रतोरपीति। क्रतुनिवेशे अयमपरो लाभ इत्याह—अधिकारेति।

तत्सर्वत्राविशेषात्। तस्मिन्नेव सोमेन्द्रचरौ चिन्ता—किमार्त्विज्ये याजमाने च सर्वत्र वमने भवति। किं वा स्वामिवमन एवेति। तत्रावान्तरसङ्गतिपूर्वकं पूर्वपक्षमाह—स्थित इति।

राद्धान्तस्त्वितीति। न ह्येकेन वाक्येन स्वामिवमनमृत्विग्वमनं चेष्टेर्निमित्तत्वेन सङ्ग्रहीतुं शक्यम्। कुतस्तत्सङ्ग्रहाशक्तिरित्यत्राह—स्वामिवमन इति। निर्वपेन्निर्वापयेदिति वचनव्यक्तिभेदादित्यर्थः। ननु यस्यर्त्विग्वमनमित्यङ्गीकारे न पूर्वोक्तदोष इत्यत्राह—यस्येति। तथापि वचनव्यक्तिभेदो दुस्तर इत्यर्थः। तर्हि निर्वापयेदिति वचनव्यक्तिरस्त्वित्यत्राह—निर्वपेदित्ये-

पानव्यापच्चतद्वत्

दोषाल्लौकिके वमने चरुः पूर्वपूर्वपक्षवत्तन्निरासो दोषे मानाभावात् इति। इह तु इन्द्रियादि ग्लानिर्मानसिद्धेति न तद्वन्निरासः।

राद्धान्तस्तु न लौकिके पाने ग्लानेर्दोषता। वमनार्थं हि तत्पानं, ग्लान्यविनाभूतं वमनमिति ग्लानिरङ्गीकृता, न दोषः। क्रतुशेषभक्षणं तु न वमनार्थम्। अतः तत्र ग्लानिर्दोषः। दोषवति क्रतुगतवमने चरुः क्रतुगतान्वयद्वारा च क्रत्वङ्गत्वान्नाधिकारान्तर कल्पना।

विवरणेतु य इन्द्रियेण व्यृद्ध्यते पुमान् तस्य चरुः श्रुतः न यस्य क्रतुर्व्यृध्यत इति। अतो न क्रतुनिवेशिता। पुंसो लौकिकवमने चरुः। राद्धान्तस्तु लौकिके दोषो नास्तीति क्रतु-

---

वेति। अविपरिणतैव श्रुतेत्यर्थः। ननु निर्वपेदिति ऋत्विज्येवास्तु नास्ति विपरिणाम इत्यत्राह—यदितर्हीति।

विवरणेत्विति। यः सोमं वमतीत्यत्र क्रतावित्यन्वये निमित्तं वमनं क्रतुविशेषणम्। क्रतौ च वमनं सर्वेषां भवतीति सर्वत्रेष्टिरित्यर्थः।

राद्धान्तस्त्विति। निमित्तमधिकारिविशेषणतयैवान्वेतीति षष्ठे वक्ष्यते। ततश्च वमनस्य स्वामिविशेषणत्वे तद्वमन एवेष्टिः। विपक्षे दोषमाह—ऋत्विगिति। ननु यो वमितीत्येवमृत्विजि स्वामिनि चास्त्विति शङ्कते—अथेति। दूषयति—तदेति। तर्हि ऋत्विगधिकार एवास्त्वित्यत्राह—न चेति। तत्र हेतुः सन्निहितेति सोमपीथेन वा एष व्यृध्यते यः सोमं वमितीति। लिङ्गं भाष्य एव व्यक्तमित्याह—लिङ्गमिति।

सर्वप्रदानम्

दर्शपूर्णमासयोः श्रुतम् यदाग्नेयोऽष्टाकपाल इति। तत्र चिन्ता— किं कृत्स्नं हविरग्नये त्याज्यं उत किञ्चिच्छेषविध्यर्थं स्थाप्यमिति।

पुरुषे दोषता क्रतोरपि पुंस्यन्वयात् क्रतुनिवेशे अधिकारकल्पना परिहृता एवं सति ।

तत्सर्वत्राविशेषात्

स्थिते क्रतुनिवेशे पूर्वपक्षी अविशेषादृत्विग्वमनेपि चरुमाह । राद्धान्ती तु नैकेन वाक्येन स्वाम्यृत्विग्वमनसङ्ग्रहः शक्यः । स्वामिनस्तावत् क्रत्वङ्गोपदेशः स्वामिवमने 'यो वमिति स निर्वपे' दिति । ऋत्विग्वमने 'निर्वापयेदि'ति । यस्यर्त्विग्वमिति स निर्वापयेत्, यो वमिति स निर्वपेत् इति वचनव्यक्तिभेदो दुस्तरः । निर्वपेत्' इत्येव श्रुतम् । अतः स्वामिवमन एव । यदि हि निर्वपेदिति ऋत्विज्येव स्यात् तदा ऋत्विगधिकार कल्पना स्यादिति स्वामिवमन एव ।

विवरणे तु (यस्सोमंवमिति)यस्सोमवामीत्यत्र क्रतावित्यन्वये स्वामिनः ऋत्विजां च वमने । राद्धान्तस्तु निमित्तमधिकारि

तत्रावान्तरसङ्गतिपूर्वकं पूर्वपक्षमाह—अत्रेति । यथा यः सोमं वमिति स निर्वपेदिति श्रुतिबलात् स्वामिवमन एव सोमेन्द्रचरुः तथाऽत्रापि आग्नेय इति श्रुतिमात्रादेव साक्षादग्नि देवतासंबन्धः पुरोडाशोऽवगम्यत इति सर्व एव पुराडोशोऽग्न्युद्देशेन त्याज्यः न द्व्यवदानमात्रमित्यर्थः । ननु द्विर्हविषोऽवद्यति चतुरवत्तं जुहोतीति वाक्यान्तरपर्यालोचनया द्व्यवदानमात्रस्यैव त्यागोऽवगम्यत इत्यत्राह—द्व्यवदानेति । तत्पूर्वकत्वमेवाह—हविष इति । द्व्यवदानादिवाक्यस्याग्नेयवाक्यपूर्वकत्वात् तदविरोधाय द्व्यवदानमपादान-रूपपुरोडाशस्य संस्कारः न कर्मरूपावत्तस्य, आग्नेयचोदनावगत कृत्स्न-पुरोडाशस्यावगतयागसाधनत्वबलात् कर्मणि यागे उपयोक्ष्यमाणत्वा-भावात् । अतो द्व्यवदानहोमोऽपि तस्य प्रतिपत्तिरेव । यद्यपि कृतार्थस्यैव प्रतिपत्तिर्विध्यपेक्षिता । तथापि अपेक्षणीय प्रथमावगतानेयचोदनानुसारेणा-कृतार्थावस्थस्यापि प्रतिपत्तिरङ्गीकृतेत्यर्थः । नन्विति । एवमपि द्व्यवत्तस्य प्रतिपाद्यत्वेऽपि न कृत्स्नद्रव्यं यागसाधनं स्यादित्यर्थः । नैवमिति ।

विशेषणतयैवान्वेति इति स्वामिवमने। ऋत्विग्वमने तु यस्य-वमितीत्यश्रुतं कल्प्यम्। अथ यो वमितीत्येवमृत्विजि स्वामिनि च तदा अधिकारद्वयं कल्प्यं एकः स्वामिनि क्रत्वधिकारः। ऋत्विजि स्वतन्त्रः। न च ऋत्विग्वमन एवास्त्विवतिवाच्यम्। सन्निहिते नियोगे (वेशे) स्वातन्त्र्यमयुक्तम्। लिङ्गमुक्तम्।

सर्वप्रदानम् हविषस्तदर्थत्वात्

अत्राग्नेय श्रुतिमात्रात्साक्षादग्निदेवता संबन्धः पुरोडाशोऽवगत इति सर्व एव त्याज्यो न द्व्यवदानमात्रम्। द्व्यवदान होम चोदने तु तत्पूर्विके हविषो हि द्व्यवदानं, अवत्तस्य च होम इति हवीरूपार्थमाग्नेय चोदनार्थम [अ] पेक्षते इति तदनुरोधात्पुरोडाशात् द्व्यवदानमपादानसंस्कारः, न कर्मरूपावत्तस्य; तस्याप्यनुपयोक्ष्यमाणत्वात्। अतस्तद्धोमोऽपिप्रतिपत्तिरेव। नन्वेव-

---

आग्नेयचोदनया यत्पुरोडाशस्य साक्षाद्यागसाधनत्वं श्रुतं तदकृत्स्नत्वेऽपि नापैति। यद्यपि स्वतः कृत्स्नताधीः तथापि कांस्यभोजिनयात् द्व्यवदान श्रुत्यनुरोधात् कृत्स्नतामात्रत्यागः। नन्विति। उपयुक्तेतरशेषापादानकस्विष्टकृदाद्यप्याग्नेयप्रकृतिद्रव्यविषयमेवेति तदनुष्ठाने श्रुतपुरोडाशनाश एवेत्यर्थः। मैवमिति। पुरोडाशाकृतेरनाशेनैव शेषकार्यस्य परिशेषणं शक्यमेव। तथापि अङ्गीकृत्योच्यते—यदि तदनाशे शेषकार्यं अशक्यं तर्हि त्यक्तेनैव प्रक्षेपमात्रं स्विष्टकृदादौ क्रियते। न च त्यक्ते स्वत्वाभावात् स्वत्वत्यागात्मको यागः कथमिति वाच्यम्। यतः प्रक्षेपमात्रपरतया गौणयागरूपहोमविधानम्। प्रकारान्तरमाह—हविरिति। विवरणोक्ता वा रीतिरस्त्वित्याह—विवरणेति।

राद्धान्तस्त्विति। स्यादेतदेवं यदि अत्र आग्नेय इति तद्धितात् त्याज्यत्वं प्रतीयते। इह तु तद्धितश्रुतेः देवतासंबन्धिता पुरोडाशस्यावगता। सा चैकदेशत्यागेऽपि नापैति। यद्यपि देवता संबन्धिता त्याज्यत्वेनैवेति स्वतः साक्षात् कृत्स्नस्य त्याज्यताधीः। तथापि तदत्यागेऽपि न देवता संबन्धबोध-

मपि न कृत्स्नं त्यक्तं, मैवं, अकृत्स्नत्वेऽपि हि श्रुतपुरोडाश-साधनता नापैति कृत्स्नतामात्रं तु द्व्यवदानश्रुतिविरोधाद्धीयते कांस्यभोजिनयात् । ननु शेषात्स्विष्टकृदाद्यपि तद्विषयमेव, तदनुष्ठाने च श्रुतपुरोडाशनाश एव । मैवं, यदि तदनाशे शेष-कार्यमशक्यं तर्हि त्यक्तस्यैव प्रक्षेपमात्रं गौणम्, यागरूपहोम-विधानम् । हविर्धर्मकशेषधर्मिकमिति वा द्रव्यान्तरविधानम् । विवरणोक्तो वा प्रकारः वचनबलात् त्यक्तेनापि शेषकार्याणीति पूर्वः पक्षः ।

राद्धान्तस्तु—तद्धितश्रुतेर्देवतासंबन्धिता पुरोडाशस्य, सा चैकदेशत्यागादपि नापैति । अतः स्वरसावगतसाक्षात्त्याज्य-त्वहानेऽपि न श्रुतिहानिरिति द्व्यवदानहोमश्रुत्योरनुरोधात्

कतद्धितश्रुतिहानिरिति द्व्यवदानहोमश्रुत्योरनुरोधाय द्व्यवदानत्याग-मात्रोपसंहारः । इतरथा तच्छ्रुत्योः सर्वथा हानिरित्यर्थः । ननु पूर्वपक्षोक्त-गतिसंभवे कथं हानिरित्यत्राह—अत इति । विवरणोक्तप्रकारस्याप्युक्त दूषणान्न युक्ततेत्याह—न चेति । आग्नेय चोदनावगत कृत्स्नत्याज्यता सिद्ध्यर्थं प्रयोगचोदनया द्विरवखण्ड्यावखण्ड्य होतव्यमिति यागावृत्त्या निर्वाहो न वाच्य इत्याह—न चेति । गुणानुरोधेन प्रधानावृत्तेरयुक्तत्वादि-त्यर्थः । कथं तर्हि सोमयागावृत्तिरित्यत्राह—सोमे त्विति । केचित्तु तद्धिताव-गतदेवतासंबन्धो हि साक्षात्परम्परया वा सामान्येनावगतो विशेषश्रुतेरुप-संहृत इत्याहुः । तदयुक्तम्—शब्दाद्धि स्वतः साक्षादेव संबन्धधीः परतस्तु परंपरयेति न तुल्यावगतिरिति न सामान्यविशेषोपसंहारः । तदाह—(इयत्त्वेति) तदयुक्तमिति । अत्र वार्तिककृता भाष्योक्तमिदमधिकरणं राद्धान्ताभावान्निरस्तमित्याह—भाष्येति । ननूक्तप्रकारेण राद्धान्तसिद्धेः कथं तदभाव इत्यत्राह—आग्नेयेति । तद्धितश्रुतिर्हि साक्षाद्देवतासंबन्धितया त्याज्यं हविरेवाह—न पुनः साक्षात्संबन्धापादनं एककपालादौ व्यभिचा-रात् । तेन कृत्स्नस्यैव त्यागो युक्तः । नन्वग्नीषोमीयं पशुमितिवत्

द्व्यवदानत्यागमात्रोपसंहारः । अतो न श्रुतकर्म संस्कारकर्ता विहायापादनसंस्कारकल्पना । न चाकृतार्थावस्थायां होमस्य प्रतिपत्तित्वकल्पना । न च गौणप्रक्षेपकल्पना । न च गौण-हविर्धर्मकल्पना न च गौणयागकल्पना न च त्यक्तेनास्वेन याग-कल्पना वचनशतेनापि शक्या । न च द्व्यवदानावृत्ति कल्पनया यागावृत्तिकल्पना, द्रव्यरूपगुणानुरोधात्प्रधानरूपयागावृत्तेरयुक्त-त्वात् । सोमे तु समुच्चितनानाग्रहश्रुतेर्यथाऽऽवृत्तिस्तथोक्तं, द्वितीये, यत्तूच्यते देवतासंबन्धोऽहि साक्षात्परम्परयावा सामान्यत एवावसीयते । विशेषश्रुतेस्तु सामान्योपसंहार इति, तदयुक्तं तद्धिताद्धि स्वतः साक्षात्संबन्धधीः । परतस्तु परम्परयेति न तुल्यावगतिः । भाष्योक्तमिदमधिकरणं भग्नं वार्तिककृता, राद्धान्ताभावात् । आग्नेय इति साक्षात् देवतासंबन्धे तद्धितः न

साक्षात्संबन्धापादानमेव तद्धितार्थोऽस्तु, चतुरवत्तं जुहोतीति अवदानमात्रा-देव यागसिद्धिः द्विर्हविषोऽवद्यतीत्युपयोक्ष्यमाणद्व्यवदानसंस्कारोऽस्तु इत्यत्राह—यदिति । कथं नास्तीत्यत्राह—अपादानेति । आग्नेयवाक्यस्यापा-दानविध्यर्थत्वे चतुरवत्तवाक्ये प्राप्तयागोद्देशेन विधिः स्यात् । ततश्चोद्दि-श्यानेकगुणविधाने वाक्यभेदप्रसंगात् विकारत्वाभावे नाग्नि विधिरिति देवतान्तरमेव कल्प्यमिति नाग्निर्देवता यागस्य स्यादित्याग्नेयवाक्य एवाग्निपुरोडाश विशिष्टयागविधिरिति कृत्स्नपुरोडाशत्यागः । अग्नीषो-मीय वाक्ये तु गत्यन्तराभावात् साक्षात्संबन्धापादने लक्षणया तद्धित इत्यर्थः ।

नन्वेवं चतुरवत्तं जुहोतीत्यादेर्वचनान्तरस्य का गतिरित्यत्राह—अतः स्वयमिति । आग्नेयवाक्ये स्थित एव कृत्स्नत्यागे द्व्यवदानावृत्त्या होमपर्य-न्ततापि कृत्स्नस्येति पूर्वपक्षिते गुणानुरोधेन प्रधानावृत्तेरयोगात् सकृद् द्व्यवदानस्यैव होम इति द्व्यवदानमात्रस्य होमरूपकर्मसंबन्धार्थं चतुरवत्ता-दिवाक्यमिति राद्धान्त इत्यर्थः । ननु कृत्स्नस्य पुरोडाशस्य यागे त्यक्तत्वात्

साक्षात्संबन्धापादने। तेन कृत्स्नस्यैव त्यागो युक्त इति। यदि चतुरवत्तं जुहोतीति यागचोदना तत्राग्नेयवाक्यमपादानविधानार्थं तदाद्व्यवदानमात्रेणैव यागः स्यात् तच्चनास्ति। अपादानार्थत्वेहि विकारत्वाभावान्नाग्निविधिरिति देवतान्तरं कल्प्यं स्यादित्याग्नेय इत्यत्रैव यागविधिरिति कृत्स्नत्यागहानाद्राद्धान्ताभावः। अतः स्वयमधिकरणं कृतं स्थितएव कृत्स्नत्यागे द्व्यवदानावृत्या होमपर्यन्ततापि कृत्स्नस्यैवेति पूर्वपक्षिते, आवृत्तौ प्रमाणाभावात् सकृत् द्व्यवदानस्यैव होम इति राद्धान्तितम्। एवं च पुरोडाशेन यागो द्व्यवदानेन होम इति कर्मं द्वयम्।

अथवैकं कर्म पूर्वभागेन पुरोडाशत्यागात्मना यागाकारं, अपरभागेन द्व्यवदानप्रक्षेपात्मना होमाकारम्। तदाह—

कथं तदेकदेशस्य होमसंबन्धितोच्यत इत्यत्राह—एवं चेति। अवयवावयविनो र्भेदात् अवयवित्यागेप्यवयवानामत्यक्तत्वात् अवयविना पुरोडाशेन यागः। अवयवेन द्व्यवदानेन होम इति कर्मद्वयमित्यर्थः। ननु देवताभावात् होमः कथं कर्मान्तरम्? अथ प्रकृतत्वादाग्नेययागीयदेवतैवात्रापीति चेत् तर्हि तत्कर्मतया न कर्मान्तरधीरित्यत्राह—अथ वेति। असर्वप्रदानपरस्य सूत्रस्यापि गतिस्तेनैवोक्तेत्याह—कथं तर्हीति।

यागहोमयोरभेदपक्षे होमाभिप्रायेणापि सूत्रं न स्यादित्याह—येत्विति। अपरिहार्यत्वं भङ्गस्येतिशेषः। भङ्गं निरस्यति —अयमिति। विवरण इति। भङ्गत्वेनोपन्यस्य समाधिः 'विनियोगचिन्तेयं' इत्यादिग्रन्थेनोक्त इत्यर्थः। कथं चिन्तेत्यत्राह—चिन्ताचेति। कथं पुनर्यागे पुरोडाशस्य विनियोगः? किं साक्षात् त्याज्यत्वेन किं वा त्याज्यापादानत्वेनेति ग्रन्थे चिन्तोक्तेत्यर्थः। अत्र पूर्वपक्षमाह—आग्नेय इति। राद्धान्तमाह प्रधानेति। स्यादेतदेवं यदि नियोगशून्यो विनियोगः स्यात् किन्तु नियोगाधीन इत्यर्थः। ततः किमित्यत्राह—विनियोगश्चेति नियोगो [गतो] हि यागे पुरोडाशस्य विनियोगः। नियोगो हि सन्निधिसमाम्नातसकलचोदनानुसारेण यागस्य

अथवा नैव भिद्येते, यागहोमौ परस्परम् ।
पूर्वापरौ त्वसदृशौ तद्भागौ नरसिंहवत् ।

कथं तर्ह्यं सर्वप्रदानेन राद्धान्तसूत्रणमित्याशंक्य समर्थितम् होमे, असर्वप्रदानमयुक्तं । ये तु यागहोमयोरेकतां मन्यन्ते, न तेषां होमाभिप्रायं सूत्रं युक्तम् । भेदे तु युक्तं, तदाह—यागहोमावभेदेन यैर्मोहात्परिकल्पितौ । तेषामपरिहार्यत्वं भेदेत्वेषोऽभिधीयते ॥ अयं च भङ्गो निबन्धने संदेहाक्षेपच्छलेनोक्त्वा निरस्तः । विवरणेतु भङ्गत्वेनैव समाधि "विनियोग चिन्तेयमि" त्यारभ्योक्तः । चिन्ताचोक्ता आग्नेय इत्यत्राग्निदेवताके पुरोडाशद्रव्यके च यागे श्रुते साक्षात्प्रदेयतयैव पुरोडाशस्य यागे विनियोग इति पूर्वपक्षिते ।

विनियोगं वदन् चतुरवत्तं जुहोतीति चोदनानुसारेण द्व्यवदाननिर्वर्तकतयैव पुरोडाशस्यविनियोगमाह । द्व्यवदान निर्वर्तकरूपमेव पुरोडाशं प्रतियागस्य कर्तव्यत्वेन शेषत्वेनोपादानेन आपादनादित्यर्थः । ननु तद्धितात् स्वतः साक्षात् त्याज्यत्वावगमात् कथं द्व्यवदानमित्यत्राह-अत इति । नन्वेवमिति । आग्नेयद्व्यवदान चोदनयोरनुरोधात् द्व्यवदानेन समं पुरोडाश एव त्यज्यतामित्यर्थः । मैवमिति । द्विर्हविषोऽवद्यतीति संस्कारबलात् संस्कृतस्य यागे साधनत्वमिति श्रुतिः, सा असंस्कृतेनापादनभूतपुरोडाशेन यागे बाध्येतेति । किञ्चेति । सद्व्यवदान पुरोडाशत्यागे चतुरवत्तं जुहोतीति पुरोडाशद्व्यवदानजन्यपरो वाच्यः । ततः किमित्यत्राह—तत्रेति । यागसंबन्धस्य पूर्वमेवावगतेः पुरोडाशं प्रत्यधिकप्रक्षेपमात्रपरः अवदानं प्रति तु होमपर इति सकृदुच्चरितो जुहोति द्विकरः स्यादित्यर्थः । किञ्चेति । कृत्स्नत्यागे अयमपरो दोषः । देवतायै त्यक्तेन पुरोडाशेन शेषकार्यं वचनशतेनापि कर्तुमशक्यमिति लोपःस्यात् । अतोऽवयवत्याग एव युक्त इत्यर्थः । नन्ववयवत्यागेऽपि शेषकार्यमशक्यमेव कृत्स्नस्याप्यग्नये सङ्कल्पितत्वात् न देवतायै सङ्कल्पितेन स्वेनेव व्यवहरन्ति शिष्टाः इत्याचारविरोधः स्यादित्यत्राह—स्वत्वे सतीति । द्व्यवदानाति-

राद्धान्तितं प्रधाननियोगाधीनकर्तव्यत्वे शेषिभूते यागे द्रव्यविनियोग इत्येवं नियोगतो विनियोगः। नियोगश्च सकलचोदनार्थोपसंहारेण यागस्य कर्तव्यतामाह। तेन द्व्यवदानचोदनानुरोधेन पुरोडाशस्य द्व्यवदान निर्वर्तकतया यागे विनियोगमाह। तथाभूतं प्रत्येव यागस्य कर्तव्यता उपादानात्। अतः स्वतः साक्षात्त्वावगमेऽपि विनियोगालोचनया द्व्यवदान[ने] श्रुतदेवतान्वयाहानात्। नन्वेवमपि सद्व्यवदानः पुरोडाशः सममेव त्यज्यतां, मैवं, संस्कारविधेः संस्कृतस्यैव त्याग इति श्रुतिः। सा चासंस्कृतेन यागे बाध्येत। किं च, एवं सति जुहोतीति पुरोडाशद्व्यवदानजन्यपरो वाच्यः। तत्र पूर्वमेव यागे पुरोडाशोऽवगत इति तं प्रत्यधिकप्रक्षेपमात्रपरः, द्व्यवदानं प्रति होमपर इति सकृदुच्चरितो जुहोतिः द्विः कार्यः स्यात् किंच शेषकार्यं

रिक्तस्यात्यक्तत्वात् स्वत्वं तावत् अनवगतं आचारस्तु प्रत्यक्षश्रुतिविरोधाद् बाध्य एवेत्यर्थः। नन्विति। कृत्स्नस्यात्याज्यत्वे द्व्यवदानमात्रेण च होमे कृते कथमाग्नेयवाक्यचोदितयागसिद्धिरित्यर्थः। मैवमिति। यागस्यैव प्रक्षेपवतो होमत्वात् यागसिद्धिरविरुद्धेत्यर्थः। नन्विति। चतुरवत्तं जुहोतीति प्रकृतस्यैव यागस्य किमिति होमरूपतोच्यते यावता यागादन्य एवायं होमो अङ्गतया विधीयताम् अन्यथा विकृतिष्वतिदेशाभावेन होमत्वं तासां न स्यात्। अतः प्रक्षेपमात्रं यागाङ्गतया विधेयमस्त्वित्यर्थः। मैवमिति। न तावद्धोमान्तरमङ्गत्वेन विधातुं शक्यम् यागार्थद्रव्यस्यैव होमार्थत्वश्रुतेः चतुरवत्तशब्देन प्रकृतद्रव्यैकदेशप्रतीतेः। अनिरूपितदेवतत्वाच्च। अतः प्रकृत एवायं यागो होमरूपश्चोद्यत इत्याहवनीयप्राप्तिः। एवं च प्रकरणे यावन्तोऽङ्गप्रधानरूपा यागास्तावन्त एव चतुरवत्तादिवाक्यालोचनया होमरूपा विहिता भवन्तीत्यर्थः। नन्वङ्गभूतहोमाविधाने कथं विकृतीनां होमतेत्यत्राह—आहवनीयस्येति। प्रकृतावाहवनीयस्य प्रक्षेपद्वारकत्वं प्रतीतम्। क्रमवद्विकृतावादृतमिति प्रक्षेपान्वयात् विकृतीनामपि होमतेत्यर्थः।

त्यक्तेनाशक्यं, वचनशतेनापीत्यवयवत्याग एव। स्वत्वेसतिस्व-व्यवहाराचरणमदोषः श्रुत्या आचारबाधात्।

ननु द्व्यवदानहोमे कथं यागसिद्धिः मैवं, यागस्यैव प्रक्षेप-वतो होमत्वमुक्तं चतुर्थे। ननु यागादन्य एवायं होमोऽङ्गं, अन्यथा तदतिदेशे न स्यात्। मैवम् यागार्थद्रव्यस्य होमार्थत्व-श्रुतेर्होमरूप एवायं यागश्चोदित इत्याहवनीयप्राप्तिः। आहव-नीयस्य प्रक्षेपद्वारस्यैव विकृतावनुष्ठानात्प्रक्षेपान्वयाद्विकृतीना-मपि होमता। न च होमस्याप्यतिदेशः। न च प्रक्षेपस्य। अतो द्व्यवदानहोमे पुरोडाशद्रव्यकाग्निदेवताकयागसिद्धेर्नोभयत्याग इति न कर्मद्वयम्। न च नरसिंहाकारता। ननु च कृत्स्नचोदना-नुरोधेनापि विनियोगे मुख्याग्नेयश्रुत्यवगतसाक्षात्प्रदेयत्वानु-रोधात् जघन्यद्व्यवदानश्रुते र्विभज्योभयसंस्कार इति न संस्कृता-

---

निगमयति—अत इति। नन्विति। यद्यपि कृत्स्नचोदनापेक्षान्नियोगाद्विनियोगः तथापि मुख्याग्नेयश्रुतिस्वरसावगतसाक्षात्प्रदेयत्वबलात् जघन्यद्व्यवदा-नादिश्रुतिवर्णने हविष एकदेशरूपविभागतयाऽवदानस्य विभागजन्याधार-तया विभाज्योभयसंस्कारत्वात् सद्व्यवदानपुरोडाशत्यागेऽपि न संस्कृता-संस्कृतदोष इत्यर्थः। मैवमिति। स्यादेतदेवं यदि हविर्विभजेदिति विभाग-कर्मता द्वयोः श्रुता स्यात्। न चैतदस्ति। किञ्च एकमपादानं अपरं कर्म द्विहंविषोऽवद्यतीति। न हि सकृदुच्चरिते वाक्ये नानाकारकसाध्यता। अतस्तत्रैकसंस्कारे सकर्मकापादानश्रुतिबलात् स्वतः कर्मनिष्ठताप्रतीतेः कर्मसंस्कार एव। तृणापचये त्वगत्याऽपादानाग्निसंस्कारतेति। उभय-त्यागे संस्कृतासंस्कृतता दोषः स्थित एवेत्यर्थः। नन्विति। सूक्तहविषो-र्विहितदेवतातद्धितात् द्रव्यस्य हविष्ट्वं श्रुतम्। हविषश्च साक्षाद्याग-साधनत्वमिति कृत्स्नपुरोडाशत्यागे तद्धितश्रुत्यनुग्रहः इतरथा श्रुतिहान-मेवेत्यर्थः। मैवमिति। न हि साक्षात्साधनत्वमेव हविष्ट्वम्। किन्तु यत् यष्ट-व्यदेवतासंबन्धित्वेनश्रुतं त्यागकाले च सत् तद्धविः संबन्धिशब्दत्वाद्धविः-

संस्कृतता दोषः। मैवं नात्र विभागकर्मता श्रुता द्वयोः, किन्त्वेकमपादानं अपरं कर्म। न च नानाकारकसंस्कार एकस्मिन् वाक्ये तत्रैकसंस्कारे श्रुते कर्मसंस्कार एवेत्युभयत्यागे स्थितो दोषः।

ननु देवतातद्धितात् द्रव्यस्य हविष्ट्वं श्रुतम्। तच्च हविः यत्साक्षात्साधनमिति पुरोडाशस्यैव त्यागे श्रुत्यनुग्रहः। मैवं, यद्देवतासंबन्धित्वेन श्रुतं, तद्धविर्द्रव्यं संबन्धिशब्दोऽयं हविरिति। तत्र स्वतः साक्षात्साधनमितिमतिः। परतस्तु व्यवहित व्यापारमपि हविरेव।

अत्र त्वयमपरो विशेषः साक्षात्साधनमेव पुरोडाशः। यदि परमवयवशो व्याप्रियते। इत्थमपि लोके साक्षात्साधनत्वं दृष्टम्। अत एवाध्वर्य्वादिः करमात्रव्यापृतोऽपि साक्षात् कर्तैव। ननु

शब्दस्य। ननु तथापि साक्षात्साधनत्वमेव स्वतो युक्तमित्यत्राह—तत्रेति। एवं तावत् द्व्यवदानादिचोदनानुरोधात् व्यवहितसाधनत्वेऽपि न दोष इत्युक्तम्। इदानीं साधनत्वे व्यवधिरेव नास्तीत्याह—अत्रत्विति। ननु अवयविनः साक्षात्साधनत्वे व्यापारोऽपि तस्यैव साक्षाद्युक्तः नावयवद्वारेत्यत्राह इत्थमपीति। युक्तंचैतदित्याह—अतएवेति। नन्वविच्छिन्नावयवे अध्वर्य्वादाववयवमात्रव्यापारेऽपि अवयविनः साक्षात् साधनत्वं युक्तम्। इह तु पुरोडाशद्व्यवदानस्य विच्छेदान्न तद्युक्तमिति चोदयति—नन्विति। मैवमिति। अविच्छेदेऽप्यवयवव्यापारव्यतिरेकेणावयविनो व्यापारान्तरं निरूपयितुमशक्यम्। किन्तु तस्य सतो व्यापार एव, सोऽत्र पुरोडाशद्व्यवदानस्य विच्छेदेऽप्यविशिष्टः। अत्र दृष्टान्तः—यथा युक्तं तत्र मरणादुत्तरकालीनपदार्थेषु यजमानस्य संविधानद्वारा साक्षात्कर्तृत्वं जीवदवस्थायामपि संविधानस्यैव तद्व्यापारत्वात् तद्विच्छेदेऽपि देहस्य समानम्। ब्राह्मणः समापयत मे यज्ञं इति संविधायैव देहहानात्। इह तु यागे साक्षाद्व्यापारस्य द्रव्यस्य कथमवयवद्वारोच्यत इत्याशङ्क्य दृष्टान्तान्तरमाह—यथावेति।

तत्राविच्छिन्नावयवोऽवयव्यपि व्यापृतः । मैवम् । अविच्छेदोऽपि नापरोऽवयविव्यापारः । किन्तु तस्य सतः अवयवस्य व्यापारः । सोऽत्र विच्छेदेऽप्यविशिष्टः । यथा सर्वस्वारे दिष्टं गतेऽपि उत्तरेष्वपि पदार्थेषु साक्षात्कर्तृत्वमुक्तम् । देहविच्छेदेऽपि संविधानव्यापारस्य साम्यात् । आत्मनश्चसत्त्वात् । यथा च गृहीतरसस्य अग्रबिन्दुव्यापारमात्रेण साक्षादेव साधनता । लतातु साक्षान्न साधनम् तस्या असत्त्वात् । पशुष्वप्यसत्त्वादेव न साक्षात्साधनम् ।

यत्तु हृदयादेरेव हविष्ट्वमुक्तं तत् अवदानान्वयबलात् न त्व व्यवहितव्यापारादित्युक्तं दशमे । अतः पुरोडाशे व्यापारादेव व्यवधानं, न तु साधनत्वस्य । ग्रन्थगतव्यवधानोक्तिरपीत्थमेव । अतएव व्यापारोपसंहृतिरियमिष्यते । एवं च हविष्ट्वं साक्षाच्छ्रुतं यस्य तत्साधनमङ्गीकृतम् । साक्षात्साधनस्यापि कार्ये

नन्वेवं सोमलतायामपि साक्षात्साधनत्वं स्यादित्यत्राह— लतास्विति । अवयविनोऽसत्त्वात् पशुरप्येवमेवेत्याह—पशुरिति । ननु तद्धितार्थं व्यवहित व्यापारत्वेन हविष्ट्वं वाच्यम् । तच्च हृदयादिषु नास्ति तथापि तत्रापि द्व्यवदानव्यवधानात् तत्कथं हृदयादीनां हविष्ट्वमित्युक्तं तत्राह—यत्त्विति । हृदयादीनामवदानान्वित[त्व]बलादेव हविष्ट्वम्, न पुनरव्यवहितव्यापारत्वादित्युक्तं दशम इत्यर्थः । उपसंहरति—अत इति । ग्रन्थे विरोधं परिहरति—ग्रन्थगतेति । यत एवं साक्षात्साधनस्य द्व्यवदानद्वारा व्यापारः अतएव व्यापारोपसंहृतिरियमिष्यते । न तावत् संहृतिः । एवं च यत्परोक्तं दूषणं सर्वप्रदाने आग्नेयश्रुतेस्सर्वदैव त्याग इति न तत्परिहृतमित्याह—एवं चेति । ननु अस्पष्टश्रुतेरुपसंहारः न तु स्पष्टाया अपि आग्नेयचोदना तु स्पष्टैवेत्यत्राह—जघन्येति । न हि अस्पष्टतादिरुपसंहारे हेतुः । किन्तु अनन्यथासिद्धजघन्यस्य तदनुरोध्यतैव । अत एव कांस्यभोजिनय इत्यर्थः अतः परोक्तमिदमप्ययुक्तमित्याह—एतेनेति ।

कात्स्न्येंनावयवेन वा व्यापारदर्शनात् । जघन्यद्व्यवदानचोदनानुरोधादपि अवयवव्यापारोपसंहारः कांस्यभोजिनयात् । नत्वस्पष्टत्वादुपसंहारः । एतेन परोक्तं निरस्तम्—

सामान्यविधिरस्पष्टः संह्रियेत विशेषतः ।
स्पष्टस्य तु विधेर्नान्यै रुपसंहारसंभवः इति ।

अप्रयोजकत्वात्

एकस्माच्छेषात् शेषसंस्कारे कृते कृतश्शास्त्रार्थं इति न यावच्छेषेषु संस्कारः । न हि शेषतया संस्कार्यता । किन्तु प्रधानोपकाराय । प्रधानं चोपकार्यमेकं परमापूर्वमिति सकृत्संस्कारः । एवं तर्हि ग्रहोऽप्येक एव संमृज्येत । अस्त्वेतत् पूर्वपक्षे । अत्र सर्वग्रहसंस्कारे स्थितेपि एकत्वविवक्षाशङ्का ग्रहाधिकरणे ।

राद्धान्तस्तु प्रधानोपकारो हि शेषसंस्कारद्वारक इति यावद्द्वारं संस्कारो युक्तः । आग्नेये तु न द्रव्यसंस्कारद्वारतेति

अप्रयोजनत्वात् ।। उक्तं किञ्चिच्छेषयितव्यमिति । तस्यैव शेषस्य संस्कारतया स्विष्टकृदादीनि श्रुतानि तेषु चिन्ता-किमेकस्मिन् शेषे शेषसंस्कारविनियोगः किं वा सर्वशेषेष्विति । नन्वगृह्यमाणविशेषत्वात् सर्वत्र शषसंस्कारो युक्त इति कथं पूर्वपक्ष इत्यत्राह एकस्मादिति । स्यात् सर्वस्य संस्कारः यद्येकसंस्कारे शास्त्रार्थसिद्धिर्नस्यात् । इहत्वेकत्रकृतेऽपि कृतः शास्त्रार्थं इति न यावछेषसंस्कारः । ननु शेषस्य संस्कार्यतया प्रधानत्वात् प्रतिप्रधानं गुणावृत्तिरिति न्यायेन सर्वत्र संस्कार इत्यत्राह—न हीति । नन्वेवं संमार्गोऽपि सर्वेषु ग्रहेषु न स्यादिति चोदयति—एवं तर्हीति । परिहरति—अस्त्वेतदिति । तदप्यत्रोदाहरणमित्यर्थः । नन्वेवं ग्रहाधिकरणे किं चिन्त्यमित्याह—अत्रेति ।

राद्धान्तस्त्विति । सत्यं प्रधानोपकाराय शेषकार्यानुष्ठानं उपकारः शेषसंस्कारद्वारकः । शेषश्च नियोगीयतया संस्कार्यः । सा च सर्वशेषाणाम-

सक्तुत्वमेव। भाष्येतु अप्रयोजकत्वाच्छेषाणामिति पूर्वपक्षो न शेषत्वात् संस्कार्यतेति यथार्वाणताभिप्रायः। न शेषस्य गुणत्वाभिप्रायः। गुणत्वे हि शेषाणां शेषनाशे शेषद्रव्यप्रयोजकता सद्भावे च अप्रयोजकता। न चेदं वैरूप्यं युक्तम्। उक्तं च चतुर्थे संस्कार्यशेषे अप्रयोजकत्वम्। अतएवार्थकर्मतया पूर्वपक्षः परोक्तो न युक्तः। एवं च सर्वशेषेषु संस्कारविनियोगात् सङ्गतिः।

एकस्माच्चेत्

पूर्वपूर्वपक्षानुष्ठानचिन्तेयम्। यत्रायमेव राद्धान्तः तत्र चिन्ताफलम्। एकस्माच्चेच्छेषात् यतःकुतश्चिदित्युपक्रम्य, मुख्यादेवेति राद्धान्तः तदतिक्रमे हेत्वभावात्।

विशिष्टेति यावद्द्रव्यसंस्कारो युक्तः। कथं तर्हि आग्नेयपुरोडाशे सकृत् द्व्यवदानेन यागे शास्त्रार्थस्य कृतार्थतेत्यत्राह—आग्नेय इति। नन्वेवं संस्कार्यत्वाङ्गीकारेण पूर्वपक्षभाष्ये त्वप्रयोजकत्वाच्छेषाणामिति गुणभावेन पूर्वपक्षो विरुध्यत इत्यत्राह—भाष्येत्विति। यथाश्रुतभावाङ्गीकारे को विरोध इत्यत्राह—गुणत्व इति। प्रयोजकत्वाप्रयोजकत्वकृतं वैरूप्यं न युक्तम्। अप्रयोजकत्वं च चतुर्थं उक्तमित्यर्थः। एतेन प्रधानकर्मत्वाङ्गीकारेण परोक्तः पूर्वपक्षो न युक्त इत्याह—अत एवेति। विनियोगफलत्वादनुष्ठानस्य विनियोग एव भाष्यस्य तात्पर्यमित्यर्थः।

॥ एकस्माच्चेत् ॥ तस्मिन्नेव शेषसंस्कारे चिन्ता—किं यतः कुतश्चिच्छेषादनियमेन कर्तव्यम्। किं वा प्रथमादिति। ननु पूर्वनयात् सर्वशेषेषु संस्कार इति स्थिते सर्वस्मादेव हविषोऽनुष्ठानम्। तत्किमिह चिन्तेत्यत्राह—पूर्वेति। चिन्तावैफल्यमपि नास्तीत्याह—यत्रेति। पूर्वोत्तरपक्षावाह—एकस्मादिति।

विवरणेत्विति। यद्यत्रमुख्यत्वान्नियमः तर्हि पूर्वराद्धान्तहानिः मुख्यत्वेन विशेषनियोमोक्तेः विशेषाग्रहा(द्वा) द्राद्धान्तानुपपत्तेरिति चोद्यमुक्तमित्यर्थः। मैवमिति। विनियोगे तु विशेषाग्रह उक्तः। अनुष्ठाने त्वत्र

विवरणे तु यदि मुख्यत्वाद्विशेषः तर्हि पूर्वराद्धान्तासिद्धिः विशेषाग्रहात् स उक्तः । मैवम् । पूर्वराद्धान्ते सर्वशेषेषु विनियोग उक्तः । तत्र न मुख्यत्वान्नियमः सर्वेषामपूर्वान्वयात् । अनुष्ठाने तु मुख्यतया नियम इति न पूर्वराद्धान्तासिद्धिः ।

भक्षाश्रवणाद्दानशब्दः परिक्रये

इदं ब्रह्मण इति चतुर्थी श्रुतेः(पि)ब्रह्मादेः शेषदानात् परिक्रयः अन्यार्थत्वं द्व्यवदानोपसंहृतमिति न विनियुक्तविनियोगविरोधः अत एव स्विष्टकृदादि यागान्वयः ।

राद्धान्तस्तु न व्यापारोपसंहृतिः । कुतस्तावत् तादर्थ्योपसंहृतौ मानमस्तीति विनियुक्तविनियोगदोषः । इदं ब्रह्मण इति

मुख्यतया नियमः । विनियोगे मुख्यतया नियमायोगात् । अन्यथा प्रयाजादीनामपि आग्नेयशेषतैव स्यात् । अतो न पूर्वराद्धान्तहानिरित्यर्थः । अनुष्ठानचिन्तापि प्रसङ्गात् सङ्गता ।

भक्षाश्रवणात्

दर्शपूर्णमासयोः "इदं ब्रह्मणः इदं होतुः इदमध्वर्योः इदमग्नीधः" इति श्रुतम् । तत्र चिन्ता—किमयं विभागः परिक्रयार्थं उत भक्षार्थं इति । किमयं ऋत्विग्भ्यो दानचोदना, किं वा दानसंस्कारतया भक्षचोदनेति यावत् । ननु ददातेरश्रुतेः कथं परिक्रयार्थतया पूर्वपक्ष इत्यत्राह—इदमिति । यद्यपि इदं ब्रह्मण इति षष्ठीनिर्देशस्तथापि व्यादेशरूपविभागविधौ चतुर्थ्येव योग्येति चतुर्थ्यर्थे षष्ठी, कृत्वाचिन्ता वा चतुर्थी कृतेति । अतश्चतुर्थी श्रुतिवलात् ब्रह्मादेः शेषदानात् परिक्रय एवेत्यर्थः । ननु यागार्थस्य शेषस्य कथं परिक्रयार्थता(या) विनियुक्तविरोधादित्यत्राह—अन्यार्थत्वमिति । युक्तं चैतदित्याह—अत एवेति ।

राद्धान्तस्त्विति । आग्नेय इति । तद्धितश्रुतिबलात् कृत्स्नस्यैव यागसाधनतया विनियोगः । व्यापारमात्रं तु द्व्यवदानेनोपसंहृतम् । अतस्तादर्थ्योपसंहाराभावात् विनियुक्तविनियोगविरोधो दुर्वार इत्यर्थः ।

तादर्थ्ये न चतुर्थी, उपकारस्य ब्रह्मादितृप्तिमात्रतया दर्शनात् । स्विष्टकृति च शेषस्यैव त्यागः। वचनबलादत्यक्ते स्वत्वानपायात् स्वव्यवहारानाचाराच्च प्रत्यक्षवचनस्य बलवत्त्वात् । इह तु विभागे श्रुतिर्न दानश्रुतिरित्युक्तम् । भक्ष्यता च दृष्टार्थत्वादर्पणस्य अविरोधाच्च विनियुक्तस्य भक्षणसंस्कार्यत्वादिति तत्र तत्रोक्तम् ।

इतिमहोपाध्यायभवनाथमिश्रविरचिते मीमांसा
नयविवेके तृतीयस्य अध्यायस्य चतुर्थः पादः ॥

नन्वेवं चतुर्थी कथं घटत इत्यत्राह—इदमिति । तादर्थ्ये चतुर्थीत्वे ब्रह्मादिगत-उपकारः कीदृश इत्यत्राह—उपकारस्येति । नन्वेवं यागार्थेन द्रव्येण कथं स्विष्टकृदादि क्रियेतेत्यत्राह—स्विष्टकृतेति । नन्वेवमत्रापि वचनबलादेव परिक्रयार्थतेत्यत्राह—इह त्विति । ननु शेषभक्षस्याश्रुतेः कथं शेषस्य भक्ष्यतेत्यत्राह—भक्ष्यता चेति । ब्रह्माद्यर्पणस्य दृष्टार्थत्वाय विनियुक्तरूपशेषस्य प्रतिपत्तिरूपभक्षणसंस्कार्यत्वाच्च भक्ष्यता शेषस्य युक्तेत्यर्थः । प्रयोजनं द्वादशोक्तं वेद्यम् । परिक्रयार्थत्वे हि सोमाङ्गाग्नेयविकृतावेतन्न स्यात् । प्रधानदक्षिणयैवानति सिद्धेः । शेषसंस्कारभक्षार्थत्वे तु न प्रधानदक्षिणया कृतकार्यतेति शेषसंस्कारार्थं कर्तव्यमिति ।

इत्यात्रेयस्य श्रीसुदर्शनाचार्यशिष्यस्य श्रीरङ्गनाथसूनोः
वरदराजस्य कृतौ नयविवेकदीपिकायां
तृतीयाध्यायस्य चतुर्थः पादः ॥

आज्याच्च सर्वसंयोगात्

गतपादान्ते शेषो न परिक्रयार्थः शेषार्था एव संस्कारा इति स्थिते उपांशुयाजे[1]शेषसंस्कार चिन्तेत्यध्याये पादान्तरे अनन्तरं च कृता ।

अत्र पूर्वः पक्षः प्रधानहविस्संस्कारः स्विष्टकृदादिः प्रकरणाच्चेत् उपांशुयाजशेषस्याप्यस्तु । ननु तदीयाज्ये ध्रुवात उद्धृते

वरदराजीये तृतीयाध्यायस्य

पञ्चमः पादः

आज्याच्च सर्वसंयोगात् । दर्शपूर्णमासयोः स्विष्टकृदादि उपांशुयाजाज्यादपि कर्तव्यं किं वा नेति । तदर्थं चिन्ता—किं तत्र शेषता विद्यते शेषकार्यस्य उत नेति । नन्वत्र कथं पादभेदः कथं वा गतपादानन्तर्यम् । किमुपांशुयाजाज्यात् कर्तव्यं न वेति चिन्ताया अनुष्ठानचिन्तारूपाया वा कथमध्याये संगतिरित्यत्राह—गतपादेति । गतपादान्तोक्तं शेषार्थत्वं शेषसंस्काराणामुपजीव्य तेषामेव शेषताविशेषचिन्तेह पाद इत्यर्थः । ननु प्रधानशेषसंस्कारस्य स्विष्टकृदादेः पुरोडाशशेषसंस्कारतया विनियोगोपपत्तेः कथमुपांशुयाजाज्यशेषतया पूर्वपक्ष इत्यत्राह—पूर्वपक्ष इति । प्रधानहविश्शेषान्वयकारणस्य प्रकरणस्य उपांशुयाजाज्यशेषेप्यविशिष्टत्वादित्यर्थः । नन्विति । पश्चादनुष्ठेयस्यानूयाजादेरपि सत्वादकृतकार्यं ध्रुवास्थं शिष्टं न संकारार्हमित्यर्थः । मैवमिति । अनूयाजादौ कृतेऽपि शिष्टमङ्गप्रयाजार्थमपि प्रधानार्थं

---

१. विशेष Adyar.

शिष्टं ध्रुवास्थं प्रयाजादिकतु न शेषसंस्कारार्हम्। तन्न। कृते प्रयाजादौ अङ्गप्रधानशेषः प्रधानस्येति संस्क्रियताम्। उद्धृत्य जुहून्नीतस्य वा शेषः संस्क्रियताम्। तस्य चतुरवत्तस्यांशतो होमोऽस्तु न हि होमार्थं गृहीतं सर्वमेव हूयते चमसेषु अग्रबिन्दु-मात्रहोमात् शिष्टस्यानुवषट्कारादि संस्कारार्थत्वदर्शनात्।

लिङ्गं भाष्योक्तं वृद्धैर्व्याख्यातम्। सोमा ङ्गे[1]ष्विष्टिधर्मक प्रायणीयेष्टिरादित्यचरुरूपा। तत्र स्विष्टकृते समवद्यतीति श्रुतिः हविरन्तरमिश्रत्वे सा; तदिष्ट्यनन्तरं पथ्यास्वस्तिमती-

भवतीति कृतकार्यं संस्कारार्हमित्यर्थः। प्रयाजग्रहणमत्रानूयाजोपलक्षणार्थं प्राच्याङ्गत्वात्प्रयाजानाम्। प्रकारान्तरेण पूर्वपक्षमाह—उद्धृत्येति। ननु जुहूस्थचतुर्गृहीतस्य होमान्वयश्रुतेः कृत्स्नस्य त्यागान्न शेष इत्यत्राह—तस्येति। चतुरवत्तशब्दः चतुर्गृहीतपरः। ननु होमार्थं गृहीतस्य कुतो न कृत्स्नहोम इत्यत्राह—न हीति। अत्र भाष्ये प्रायणीये आदित्यचरौ स्विष्ट-कृते समवद्यतीति श्रुतिलिङ्गमुक्तम्। तत्कथं? विधितयाऽनुपपत्तेरित्य-त्राह—लिङ्गमिति। प्रायणीयेष्टेरैष्टिकविध्यन्तग्राहित्वात् स्विष्टकृत्प्राप्तेर्न विधिता। किन्तु लिङ्गतैव। तत्रापि समवद्यतीति श्रुतिलिङ्गं हविरित्य-त्राह—हविरन्तरेति। देवतासंबन्धिद्रव्यान्तरप्रयुक्तिकल्पनापत्तेर्विध्यनर्हतया लिङ्गतैवेत्यर्थः। कथं लिङ्गतेत्यत्राह—तदिति। पथ्या स्वस्तिमती नामेष्टि-राज्यहविष्का हविस्सामान्यादुपांशुयाजधर्मिका तत्र प्रायणीय इत्यर्थः। ततः किमित्यत्राह—यदीति। यदि प्रकृतावुपांशुयाजशेषे आज्यं स्विष्टकृत्सं-स्कार्यं तदा तद्विकृतावपि पथ्यायां शेषसंस्कारार्थं स्विष्टकृति सति हविर-न्तरमिश्रिता स्यात् नान्यथेत्यर्थः। ननु तथापि कथं मिश्रिता उभयोरपीष्ट योर्भेदेनस्विष्टकृतः प्राप्तेः भेदेनानुष्ठानं (न) स्यादित्यत्राह—संप्रतिपन्नेति अवदायावदायेत्यादिलिङ्गं भाष्य एव व्यक्तमित्याह—लिङ्गान्तरमिति।

राद्धान्तस्त्वित। न तावत् ध्रौवशेषस्य स्विष्टकृदादिसंस्कार्यता(या) तस्याङ्गप्रधानशेषतया संस्कार्यत्वायोगात्। यद्यपि तत्र प्रधानशेषत्वमपि

१. ङ्ग इष्टिर्धर्मिका प्रा-B

नामेष्टिराज्यहविष्का हविस्सामान्यादुपांशुयाजधर्मिका। यदि प्रकृतावाज्यं संस्कार्यं इहापि चरोः पथ्यायाश्च स्विष्टकृति संप्रतिपन्नदैवत्ये तन्त्रत्वाचचर्वाज्यमिश्रिता। लिङ्गान्तरं व्यक्तम्।

राद्धान्तस्तु—नाङ्गप्रधानशेषः प्रधानशेषतया संस्कार्यः। अङ्गीयेऽपि संस्कारस्य दुर्वारत्वात्

ननु अङ्गीयोऽर्थान्नाङ्गीयत्वेन चोदनार्थः मैवम्। प्रधानार्थोऽपि संस्कारो विध्यपेक्षित दृष्टदेशेरेचनाव् चोदनार्थं इत्यङ्गीयतयाऽपि तथा तर्हि अङ्गीयसंस्कारोऽप्यस्तु। तन्न। पुरोडाशादौ प्रधानमात्रार्थता, आज्ये अङ्गप्रधानार्थतेति नेदं वैषम्यं युक्तम्। अवैषम्येणोपपन्नत्वादित्युक्तम्।

तथापि न तत्र संस्कारः संसर्गितयाऽङ्गीयेपि संस्कारान्वयस्य दुर्वारत्वात्। नन्विति। अर्थात् संसर्गितया नान्तरीयकतयाऽन्वयः। नाङ्गीयत्वेन चोदनार्थतयेत्यर्थः। मैवमिति। प्रधानीयत्वेन चोदनार्थत्वे यत्कारणं विध्यपेक्षितदृष्टदेशरेचनार्थत्वं तदङ्गीयतयापि समानमिति तदर्थता संस्कारस्य दुर्वारेत्यर्थः। अस्त्विति शङ्कते—तर्हीति। तन्नेति। पुरोडाशादौ केवलप्रधानार्थत्वं(आज्येत्वङ्गप्रधानार्थतेति नेदं कार्यवैषम्यं) सकृदुच्चरितस्विष्टकृदुपदेशस्यावैषम्येणोपपत्तेर्न युक्तेत्यर्थः। ननु कार्यस्यैव वैषम्यमिदम् न स्विष्टकृदाद्युपदेशस्येति कथमुपदेशस्वारस्यहानिरित्यत्राह—अयं भाव इति। कार्यपर्यन्तत्वादुपदेशस्य एकोपदेशादेकमेव कार्यमिति कार्यवैषम्यमुपदेशवैषम्यपर्यन्तमित्यर्थः। नन्विति। स्विष्टकृदादेः संस्कार्यं द्वारकार्यम्। तच्च शेषतयैकरूपमिति न कार्यवैषम्यमिति। मैवमिति। ननु वैषम्यपरिहारायाङ्गप्रधानमात्रार्थतैवास्तु किं प्रधानमात्रार्थतयेत्यत्राह—इत्याज्येति। प्रकरणात्प्रधानस्येति नयात् प्रकरणस्वारस्यात् प्रधानमात्रार्थपुरोडाशादेः संस्कारः। आदिशब्दात् केवलप्रधानार्थसान्नाय्यस्यापि प्रतिपत्तेः नियोगप्रत्यासत्तौ संभवन्त्यां तद्विप्रकर्षस्यान्याय्यत्वात्। न चैवं सति बर्हिषोऽप्यङ्गप्रधानार्थहविरासदनार्थता न स्यादिति वाच्यम्।

अयं भावः-एकोपदेशकल्प्यमेकमेव कार्यमिति प्रधानमात्रार्थता, अङ्गप्रधानार्थता च द्वयमयुक्तम् । ननु संस्कार्यमस्य द्वारकार्यं तदेकरूपमेव; मैवम्, संस्कार्यमेव द्विधा नैकोपदेशद्वारमित्याज्यमात्रेऽङ्गप्रधानार्थतां हित्वा प्रकरणस्वरसात् प्रधानमात्रार्थतया पुरोडाशादिसंस्कारः । चतुरवत्तस्य कृत्स्नस्यैव होमान्न शेषः । चतुरवत्तं होमावस्थयागान्वयि कुर्यादितिहि वाक्यार्थो दशमे वर्णितः । इतिवचोभङ्ग्या चतुरवत्तमुक्तं उद्देश्यतया कृत्स्नमेव होमान्वयि कार्यम् ।

न च शेषसंस्कारश्रुतेरविषयता माभूदित्यकृत्स्नहोमः पुरोडाशे सविषयत्वात् । चमसे तु अनुवषट्कारश्रुतेः अनन्य-

---

यतः सर्वेषां हविषामासादनं विध्यपेक्षितं, आसादनशेषं बर्हिः तत्र देशान्तरस्याश्रुतेः अपेक्षितदेशत्वेन बर्हिष एव सर्वार्थतया विधिः । न चेहापि प्रतिपत्तेर्विध्यपेक्षिततया सर्वार्थता, समिष्टयजुराख्यस्य प्रतिपत्त्यन्तरस्य ध्रौवाज्य विषयस्य विद्यमानत्वात् । यदि हि समिष्टयजुः प्रतिपत्तिरूपमङ्गमात्रं तथाप्यनवदाय ध्रौवाज्येन समिष्टयजुर्होमविधेः कुंभीहोमवत् सर्वंहोमान्न शेषस्थितिरिति समिष्टयजुषि कृते न स्विष्टकृदवकाशः । प्रकृते तु अकृतप्रयोजनतया आज्यस्य न प्रतिपत्त्यर्हता । आहवनीयस्य यदङ्गप्रधानजुहोत्यर्थत्वं तदनारभ्याधीतस्य प्रकरणतो विशेषाभावात् जुहोतिशब्देन सर्वहोमोपस्थितेः होमस्य चाधारापेक्षायां होमनिर्वृत्तिरूपेण कार्यस्यैकरूपमादाय सर्वत्र तद्विधेरिति ध्येयम् । ननु तर्हि उपांशुयाजार्थगृहीतजुह्वाज्यशेषे स्विष्टकृदन्वयोऽस्त्वित्यत्राह—चतुरवत्तस्येति । कथं कृत्स्नहोम इत्यत्राह—चतुरवत्तमिति । चतुरवत्तं होमावस्थयागान्वयि कुर्यादिति चतुरवत्तवाक्यस्य वचोभङ्ग्या अर्थावधृतेरुद्देश्यतया होमव्याप्यतयाऽवगतेः कृत्स्नहोम इत्यर्थः । न च स्विष्टकृदादिशेषकार्यश्रुतिनिरवकाशतापरिहाराय शेषहोमः, पुरोडाशे सावकाशत्वादित्याह—न चेति । कथं तर्हि चमसेन शेषहोम इत्यत्राह—चमस इति । सोमस्याग्ने वीहीत्यनुवषट्करोति इत्यनु-

विषयत्वात्, चमसे च ग्रहणमात्रं श्रूयते[1] न होमः। अग्रबिन्दुपातादेव होमः। अण्व्या धारया होमे बिन्दूनां क्रमशः पाते अग्रबिन्दुमात्रादेव रसेन होमसिद्धेः बिन्द्वन्तरात् होमावृत्तिरश्रुता स्यादिति भेदः। समवद्यतीति लिङ्गं हविर्भूताज्यावदानाभावात् उपस्तरणाभिघारणाज्यजातिं ओदनजातिं च अपेक्ष्य मिश्रत्वेन। स्विष्टकृतेऽवदाय न प्रत्यभिघारयतीति लिङ्गस्य समाधिः अवदायावदायेति वीप्सायां तृतीयमवदायेत्यन्वयि स्विष्टकृतेन प्रत्यभिघारयतीत्यन्वयः। स्विष्टकृदभावादित्यर्थः। लघ्व्यामधिकं चतुर्थे शेष-कार्याणां शेषाप्रयोक्तृत्वमित्थं

वषट्कार श्रुतेः अनन्यविषयत्वान्न कृत्स्नस्य होमः। किञ्च चमसे ग्रहणमात्रस्य श्रुतिरैन्द्रवायवमिति न होमस्येति न गृहीतकृत्स्नस्य होमव्याप्यधोरित्यत्राह—चमस इति। कथं तर्हि अकृत्स्नहोमोऽपीत्यत्राह—चमस इति। कथं तर्ह्यकृत्स्नहोमोऽपीत्यत्राह—अत्रेति। अण्व्या धारया जुहोतीति धारया होमेऽवगते तत्र बिन्दूनां क्रमशः पाते प्रथमपतितबिन्दुनैव होमसिद्धेः बिन्द्वन्तराद्धोमावृत्तिरश्रुता कल्प्येत्यग्रबिन्दुपातमात्रादेव होमावगतेर्न कृत्स्नहोमः। कृत्स्नहोमव्याप्यत्वाप्रतीतेरितिभेद इत्यर्थः। समवद्यतीति लिङ्गस्यान्यथासिद्धिमाह—समवद्यतीति। लिङ्गान्तरमपि समाधत्ते—स्विष्टकृत इति। विवरणे तु शेषकार्याणां द्रव्याप्रयोज्यत्वे चतुर्थे उक्ते कथमत्रोपांशुयाजाज्यस्य जौहविकस्य शेषकार्यैः शेषप्रयुक्तिशङ्केत्याशङ्क्य चतुर्थोक्ताप्रयोजकत्वस्यान्यथागतिरुक्ता। तामाह—लघ्व्यामिति। कुतः शेषप्रयोक्तृतेत्यत्राह—हव्येति। कथमन्यपरादर्थवादाच्छेषप्रयुक्तिशङ्केत्यत्राह—प्रकरणादिति।

राद्धान्तस्त्वित्वति। बृहत्युक्तरीत्या शेषाभावान्नोपांशुयाजाज्ये स्विष्टकृदादिः। न हि स्तुतिबलाच्छेषप्रयोक्तृत्वम्। पुरोडाशादिहविर्वहननिष्क्रयत्वेनापि स्तुत्युपपत्तेः न च प्रकरणाबाधाय उपांशुयाजाज्यशेषता। स्विष्टकृदादेः सङ्कोचेऽपि प्रकरणाबाधात्। ननु प्रतिपत्तेरपेक्षितत्वादुपांशु-

---

१. श्रुतम्

नेयम् । शेषकार्यार्थमवत्तस्य नाशे न पुनः प्रयोक्तृत्वमिति । इह हव्यवाहननिष्क्रयत्वेन नञ्श्रुतेराज्यादावपि स्विष्टकृत् । तदनुरोधाच्छेषप्रयुक्तिः प्रकरणादपेक्षिततया चाज्यसंस्कारे नयागते निष्क्रयोक्तेः शेषप्रयुक्तिरस्य । राद्धान्तस्तु बृहत्युक्तः—

न च निष्क्रियस्तुतेः शेषप्रयोक्तृत्वं न च संकोचेऽपि प्रकरणबाधः । अपेक्षा च शेषाभावाज्जुह्वां नास्ति, ध्रौवे च साधारण्यान्नप्रधानार्थस्य विशेषतोऽपेक्षा ।

साकंप्रस्थायीये स्विष्टकृदिडं च तद्वत्

गतनयातिदेशात्सङ्गतिः । पूर्वपक्षस्तु युक्तं उपांशुयाजे शेषाभावान्नशेषकार्यंनिश्चय इति सान्नाय्यविकृतौ तु साकं-

---

याजेऽप्यन्वय इत्यत्राह—अपेक्षेति । जुहूस्थ शेषस्याभावादेव न तत्र प्रतिपत्त्यपेक्षा । ध्रुवायां तु अङ्गप्रधानसाधारणत्वान्न प्रधानस्य विशेषतः प्रतिपत्त्यपेक्षेत्यर्थः ।

साकंप्रस्थायीये । दर्शपूर्णमासयोः साकंप्रस्थायीयेन यजेत पशुकामः इति सान्नाय्यविकृतिर्गुणविकार आम्नातः । तत्र चिन्ता किं तत्र स्विष्टकृदादि कार्यं नेति । तत्रावान्तरसङ्गतिमाह गतनयेति । ननु उपांशुयाजवदत्र शेषाभावादक्रियायां सिद्धायां कथं पूर्वपक्ष इत्यत्राह—पूर्वपक्षस्त्विति । युक्तमुपांशुयाजे प्रकृतौ शेषाभावेन शेषकार्यप्रवृत्तेरनिश्चितत्वादक्रिया । इह तु विकृतावखण्डप्रापिणा चोदकेन तस्या निश्चितत्वात् शेषकार्यं कार्यमेव । ननु सह कुम्भीभिरभिक्रामन्नाहेति वचनात् कुम्भीस्थं कृत्स्नमेव हुतमिति कथं शेषसत्तेत्यत्राह—न चेति । कुंभीभिः सहाभिक्रमणमात्रमत्र गम्यते न होम इत्यर्थः ।

राद्धान्तस्त्विति । वाचनिकस्य कुम्भीभिरभिक्रमणस्य दृष्टार्थत्वाय ताभिर्होमे सर्वहोमधीः । ननु कार्यतः प्राप्तेर्निश्चितत्वात् शेषकार्यस्य सत्तेत्यत्राह—वचनमिति । नन्विति । न हि वचनं साक्षात् कुम्भीभिरभिक्रमणस्य दृष्टार्थत्वाय होमः । तच्च दृष्टार्थत्वं कार्यतः प्राप्त्यविरोधि युक्तमिति

प्रस्थायीये प्रकृतिवच्छेषकार्यप्राप्ति-निश्चयाच्छेषः स्थाप्यः।[1] न च सहकुम्भीभिरिति वचनं कुंभीस्थं कृत्स्नं होतव्यमित्याह।

राद्धान्तस्तु-सह कुम्भीभिरभिक्रामन्निति वचने कुम्भीभिरभिक्रमणस्य दृष्टार्थत्वेन सर्वहोमविधिः। वचनं च कार्यतः प्राप्तेर्बलीय इति शेषकार्यबाधः। ननु वचनं न साक्षात्सर्वहोममाह दृष्टार्थत्वन्त्वविरोधि युक्तं कुंभ्या होम इत्येवमपि दृष्टम्। न सर्वहोम एव। मैवं "अग्नीधे स्रुचौ प्रदाये"त्युक्तेर्न स्रुचा होमः। कुंभ्येवाविशिष्टेति तया होमे धाराद्यश्रुतेः सकृत्कृत्स्नपात इति न्यायतोयंवचनार्थं इति प्राकृतबाधः।

ताभिः होममात्रं दृष्टमस्तु न सर्वहोम एवेत्यर्थः। मैवमिति। अग्नीधे स्रुचौ प्रदायेति स्रुग्व्यापारे निवर्तिते चतुरवत्तहोमाभावे कुम्भ्येव होमसाधनमवशिष्टेतितयैव होमः। कुंभीविधेः वैकृतत्वेन प्राकृतस्रुक्कार्यबाधात्। तथा च होमे धार्याद्यश्रुतेः प्रकृतौ च जुह्वा सर्वहोमीयात् सकृत् कृत्स्नपातः। यद्यपि द्रवद्रव्यतया धारार्थः प्राप्तः तथापि कुम्भ्या होमस्य दृष्टार्थत्वाय युगपत् सर्वपात इति शेषरूपद्वारलोपात् प्राकृतशेषकार्यबाध एवेत्यर्थः।

सौत्रामण्यां च ग्रहेषु। सन्ति सौत्रामण्यामाश्विनसारस्वतैन्द्रा ग्रहाः तेषु चिन्ता—किं शेषकार्यं कर्तव्यमुत नेति। तत्रापि पूर्ववत्सङ्गतिरित्याह—पूर्ववदिति। ननूत्तरेऽग्नौ पयोग्रहान् जुहोति। दक्षिणेऽग्नौ सुराग्रहानिति गृहीतकृत्स्नद्रव्यस्य होमव्याप्यताश्रुतेः शेषाभावात् कथं पूर्वपक्ष इत्यत्राह—पूर्वपक्षस्त्विति। सत्यमेवम्। तथापि उच्छिनष्टि न सर्वं जुहोति इति [वचन] बलाच्छेषे सति चोदकप्राप्तस्विष्टकृदादि कार्यमेवेत्यर्थः। ननु तस्यापि शेषस्य "ब्राह्मणं परिक्रीणीयादुच्छेषणस्य पातारं" इति परिक्रीतब्राह्मणपानप्रतिपाद्यत्वात् कथं स्विष्टकृदाद्यन्वय इत्यत्राह—न चेति। परिक्रीतब्राह्मणेन कृत्स्नभक्षणाश्रुतेः तदन्वयेऽपि स्विष्टकृदाद्यन्वयो न विरुद्धः। यद्वा उच्छिनष्टीति श्रुतिरेव तत्रापि शेषान्वयमाहेत्यर्थः।

---

१. न निश्चयाच्छेषो न्याय्यः

सौत्रामण्यांच ग्रहेषु

पूर्ववदिहापि संगतिः। पूर्वपक्षस्तु यद्यप्युत्तरे अग्नौ पयोग्रहान् जुह्वति दक्षिणे सुराग्रहानिति गृहीतकृत्स्नहोमश्रुतेः शेषाभावः। तथाप्युच्छिनष्टि न सर्वं जुहोतीति पुनः श्रुतेः शेषे सति स्विष्टकृदादि कार्यम्। न च तस्य परिक्रीतब्राह्मणेन भक्षणप्रतिपाद्यत्वश्रुतेर्न स्विष्टकृदाद्यन्वयः। तदन्वयेऽपि क्रीतेन ब्राह्मणेन भक्षणान्वयोऽस्तु कृत्स्नभक्षणाश्रुतेः। राद्धान्तस्तु उच्छिनष्टीत्युक्त्वैवोच्छेषणपात्र[1]श्रुतेः सन्निहितोपदेशार्थपर्यवसा-

---

राद्धान्तस्त्वति। उच्छिनष्टीत्युक्त्वैव ब्राह्मणं परिक्रीणीयादिति पात्रश्रुतेः सन्निहितस्योच्छेषोपदेशार्थस्य सन्निहितपात्रश्रुतावेव पर्यवसानमिति न स्विष्टकृदाद्यन्वयः। न च पानेपि शेषणं उच्छिनष्टीत्यनेन तत्पूर्वकत्वात् पात्रश्रुतेरिति होम एवोच्छेषविधिः न पान इति 'न सर्वं जुहोतीति' प्राप्तानुवादसौरस्यमपीत्यर्थः। शतातृण्णायां विक्षारणरूपं प्रतिपत्त्यन्तरमप्यस्तीत्याह—औपदेशिक इति। शतातृण्णा शतच्छिद्रा शर्करा। एवं चातिदेशिकस्विष्टकृदादिप्रतिपत्तेः औपदेशिकविप्रपानादि-प्रतिपत्त्या बाध इत्यर्थः।

द्रव्यैकत्वे। अस्ति सर्वपृष्ठेष्टिः इन्द्राय राथन्तराय इन्द्राय बार्हताय इन्द्राय वैरुपायेन्द्राय वैराजायेन्द्राय शाक्वरायेन्द्राय रैवतायेति। तत्र बहूनां प्रधानानां कर्मणां रथचक्रमात्र एक एव पुरोडाशो द्रव्यम्। तत्र चिन्ता—किं प्रतिप्रधानं शेषकार्यावृत्तिः उत सकृदिति। नन्वत्र शेषकार्यानुष्ठाने सिद्धे तत्सकृत्त्वासकृत्वचिन्तोचिता। तत्सिद्धिरेवाद्यापि नेति कथमन्यसंगतिरित्यत्राह—गतनयैरिति। ननु द्रव्यैकत्वे कथं तत्प्रतिपत्त्यावृत्तिशङ्केत्यत्राह—पूर्वपक्षस्त्विति। सत्यमेव द्रव्यमेकम्। तथापि प्रधानानामनेकत्वात् प्रतिप्रधानमितिकर्तव्यताकांक्षायां कार्यतः स्विष्टकृदादिप्राप्तेः प्रतिपाद्यद्रव्यस्य च विपुलत्वात् प्रतिप्रधानं भेदेन प्रतिपत्त्यनुष्ठानमित्यर्थः। ननु विशेषाग्रहात्तन्त्रता युक्तेत्याह—न चेति। सन्निपातिनामावृत्तेरेकादशोक्तत्वात् शेषकार्याणां सन्निपातित्वादावृत्तिर्युक्ता। यद्यपि संस्कार्यस्यो-

---

१. पातृश्रुतेः।

नर्मिति न स्विष्टकृदाद्यन्वयः। औपदेशिके अन्यत्रापि हि विक्षारणा[1]द्यन्वयोऽस्तु।

द्रव्यैकत्वे

गत नयैः शेषकार्यापवादे अपो (चो) दितादन्यत्र शेषकार्ये तत्सकृत्वासकृत्वचिन्तेति सङ्गतिः। पूर्वपक्षस्तु एकस्मिन्नपि पुरोडाशे बहुत्वात्प्रधानानां प्रतिप्रधानं शेषकार्ये प्राप्ते द्रव्यस्य विपुलत्वात् भाव्यं प्रतिप्रधानं शेषसंस्कारैः। न च विशेषाग्रहणात्तन्त्रता। सन्निपातिष्वावृत्त्युक्तेः। राद्धान्तस्तु-सन्निपातिन्यप्यत्रविशेषाग्रहणम्। एकं द्रव्यं एकश्चोत्तरार्धं इति तन्त्रता।

त्तरार्धादेरत्रैक्यं तथापि अवशिष्टापेक्षया उत्तरार्धानां बहुत्वादेकद्रव्यक प्रधानेषु मध्यार्धादिवत् प्रतिपत्त्यावृत्तिर्युक्तेतिभावः।

राद्धान्तस्त्विति। सत्यं सन्निपतिनामावृत्तिर्युक्ता संस्कार्यभेदे। इह तु संस्कार्यस्यैकत्वादेतत्संबन्धि द्रव्यं संस्कृतं एतत्संबन्धि नेति विशेषाग्रहणात् तन्त्रतैवेत्यर्थः। नन्ववशिष्टापेक्षया द्रव्यभेद उक्त इत्यत्राह—एकमिति। शेषादुत्तरार्धादिति प्रकृतापेक्षत्वात् शेषोत्तरार्धतः प्रधानानन्तरं यावच्छिष्टं तावदपेक्ष्यैव तथैव सन्निधेः। तच्चैकमेव द्रव्यं एकश्चोत्तरार्धं इति तन्त्रतैव। प्रधानेषु त्वगत्याऽवशिष्टापेक्षया मध्यार्धादिग्रहः। नेह तथेत्यर्थः। द्रव्यवैपुल्यादपि नावृत्तिर्युक्तेत्याह—न चेति। प्रधानबहुत्वादपि नावृत्तिर्युक्तेत्याह —न चेति। रथाप्रयाजादेरप्यावृत्तिः स्यादिति भावः। परैरप्येवमेवोक्तमित्याह—तदुक्तमिति। आज्याधिकरणे भाव्यादापातप्रतीतेः साधारण्यमात्राच्छेषक्रियोक्तेति मत्वा चोदयति—नन्विति। मैवमिति। न साधारण्यमात्रमक्रियाहेतुः किन्तु साधारण्ये वैषम्यापत्तिः सर्वकार्ये वा कृते प्रतिपत्त्यर्हता च। इह तु तदुभयं नास्तीत्यर्थः।

ऐन्द्रवायवे तु। अस्ति सोमे ऐन्द्रवायवो ग्रहः तत्र शेषभक्षणं प्रति चिन्ता —किं सकृत् उत द्विरिति। द्वित्वविशिष्टभक्षणविनियोगादध्याये सङ्गतिः। पादावान्तरसङ्गती आह—सामान्यत इति। ननु द्विरैन्द्रवायवमिति द्विर्भक्ष-

---

१. क्षरणा.

न च द्रव्यवैपुल्यमावृत्तिहेतुः। एककर्मार्थत्वेप्यावृत्त्यापत्तेः। न च कर्माश्रयोऽयं संस्कारः येन कर्मभेदादावर्तेतेति। तदुक्तं परैः

न ह्येष कर्मसंस्कारो हूयमानस्य वेष्यते।
हुतशेषसमानत्वात्तन्त्रत्वं तु प्रसज्यते॥

ननु न साधारणेन शेषकार्यमित्युक्तमाज्ये। मैवम्। अङ्ग-प्रधानसाधारण्ये वैषम्यात्तन्नेष्टम्। इह तु प्रधानानामेव साधार-रण्यम्। सर्वाज्यकार्ये चाकृते प्रतिपत्त्यनर्हतोक्ता। इह तु सर्व-प्रधानेषु कृतेष्विति भेदः।

वचने सति कथं पूर्वपक्ष इत्यत्राह—पूर्वपक्षस्त्विति। यद्यपि द्विर्भक्षवचन-मस्ति तथापि भक्षकार्यं सोमसंस्कारः। स च सकृद्भक्षणेन सिद्ध इति न द्विर्भक्षो युक्तः। ननु वचनबलात् द्विर्भक्षणेन सोमसंस्कारः स्यादित्यत्राह—न चेति। अनुवादनरूपत्वाद्वचनस्य प्रयोगद्वयापेक्षयापि द्वित्वानुवादोपपत्तेः न तद्बलात् द्विर्भक्ष इत्यर्थः।

राद्धान्तस्त्विति। यद्यपि सोमसंस्कारता भक्षस्य तथापि वचनबलात् द्विर्भक्षणेन सोमसंस्कार्यता कल्प्या। नन्वनुवादरूपत्वं वचनस्येत्यत्राह—विधिपरत्वादिति। सर्वस्यापि वेदस्य विधिपरत्वात् द्वित्वविशिष्टस्य भक्षस्यापूर्वाङ्गत्वेनाप्राप्तत्वात् भक्षयतीत्यस्य पञ्चमलकारत्वनिश्चयात् वचनानित्वपूर्वत्वादिति नयात् वचनतैवानुवादतेत्यर्थः। अनुवादोऽपि दुर्घट इत्याह—प्रयोगेति। न चैन्द्रवायवं भक्षयतीति भक्षणमात्रकर्मतावगते-र्न द्वित्वविशिष्टभक्षकर्मतेति वाच्यम्। यतो द्विरिति सुजन्ततया क्रियाभ्या-वृत्त्यवगतेः क्रियाविशेषणत्वात् द्वित्वस्य तद्विशिष्टभक्षकर्मतैव सोमस्येति वेद्यम्।

लभ्यामिति। द्विर्ह्येतस्य वषट्करोतीति शेषबलात् वषट्कारनिमित्तो भक्षोऽवगतः। तत्र यद्यपि द्विर्वषट्कारे द्विर्भक्षो युक्तः प्रतिनिमित्तं नैमित्ति-कावृत्तेः तथापि युगपन्निमित्तद्वयपाते नैमित्तिकेन भक्षेणागृह्यमाणविशेष-त्वात् सकृदेव भवितव्यमिति पूर्वपक्षिते-राद्धान्तः-द्विरिति। वचनबलादा-वृत्तिरेव युक्ता अन्यथा द्विरिति श्रवणमनर्थकं स्यात्। अतो वाचनिकोऽयं

ऐन्द्रवायवे तु वचनात् प्रतिकर्मभक्षः स्यात्

सामान्यतः शेषकार्यव्यवस्थामुक्त्वा विशेषतो भक्षे चिन्तेति सङ्गतिः। पूर्वपक्षस्तु द्विर्भक्षवचने सत्यपि सोमसंस्कारो भक्षकार्यं सत् सकृदेव कृतेन सिद्ध इति द्विर्भक्षो न युक्तः। न च वचनबलात् द्विर्भक्षणसंस्कार्यता सोमस्य, अनुवादरूपत्वादस्य। न्यायानुरोधात् प्रयोगद्वयापेक्षयाऽनुवादताऽस्तु।

राद्धान्तस्तु वचनबलात् द्विर्भक्षणसंस्कार्यता कल्प्या, विधिपरत्वाद्वेदस्य पञ्चमलकारनिर्णयाद्वचनतैव। प्रयोगद्वयेहि एकोपाधिविहीने द्विरित्यनुवादोऽपि दुर्घटः।

द्विर्भक्ष इत्यर्थः। ननु द्विर्ह्येतस्येति वाक्यशेषस्य हेतुवन्निगदत्वेन स्तुतिपरत्वान्न निमित्ततया द्विर्वषट्कारपरत्वं इति कथं निमित्तत्वमित्यत्राह वषट्कारेति। अभ्युपगम्यवादोऽयम्। परमार्थतो न द्विर्वषट्कारः प्रकरणे सकृद्वषट्कारश्रुतेरित्यर्थः। एवं पूर्वपक्षस्य मतद्वयेऽप्युक्तत्वात् भट्टपादोक्तं न युक्तमित्याह—एवं चेति। सोमेऽवचनात्। सन्ति ज्योतिष्टोमे ऐन्द्रवायवादयः सोमाः तत्र चिन्ताद्वयं—किं सोमशेषो नास्ति उतास्तीति। यदाऽस्ति तदा किं शेषो न भक्षयितव्य उत भक्षयितव्य इति। अवान्तरसङ्गतिमाह—यदीति। तत्र प्रथमचिन्तापूर्वपक्षमाह—नन्विति। ननु पुरोडाशादाविवेहापि शेषसत्ताऽस्तु इत्यत्राह— पुरोडाशादेरिति। तद्वदिहोपसंहारवचनं नास्तीत्यर्थः। ननु द्विरैन्द्रवायवं सर्वतः परिहारमाश्विनं इत्यादि प्रतिपत्तिरूपभक्षणगुणविधिबलात् शेषसत्ताऽस्त्विति चोदयति—कथमिति। तेषां गुणविशिष्टप्रधान-कर्मभक्षविधिपरतैव। अन्यथा संस्कारकर्मणां संस्कार्यप्रयोजकत्वं स्यादिति परिहरति—सगुणेति। ननु शेषाभावेऽर्थकर्मपरतयापि कथं भक्षविधिरित्यत्राह—शेषेति। ऐन्द्रवायवादिपदं तु धर्मलक्षणार्थम्।

राद्धान्तमाह—मैवमिति। यथा पुरोडाशे द्व्यवदानमात्रेण यागोपसंहारः तथा सोमेऽपि न सर्वहोमे मानम् कथमित्यत्राह—इन्द्रेति। ननु ग्रहणमात्रस्यैव श्रुतेः कथं रसस्य त्यागान्वय इत्यत्राह—रसीभूत इति। ननु

लब्ध्यामेवम्—द्विर्ह्यैतस्य वषट्करोतीति वाक्यशेषबलात् वषट्कारहेतुर्भक्षो द्विर्वषट्कारे द्विर्युक्तोऽपि युगपन्निमित्तद्वये विशेषाग्रहात् तन्त्रं नैमित्तिकमिति। अत्र राद्धान्तः द्विरिति वचनबलात् आवृत्तिः वषट्कारहेतुत्वमुपेत्यैवात्र तन्त्रत्वमुक्तम्। वस्तुतस्तु हेतुवन्निगदः "द्विर्ह्यैतस्य वषट्करोति" इति। "सकृत् वषट्कुर्युः" इति प्रकरणे श्रुतेर्न द्विर्वषट्कारः एवं च यद्भट्टोक्तं-"व्यक्ते तु वचने नेदं सपूर्वपक्षकं चिन्तान्तरं इति पूर्वनयशेषः सूत्रं" इति तन्निरस्तम्।

रसस्य कृत्स्नस्य देवतोद्देशेन ग्रहणात् तद्दृष्टार्थत्वाय तदुद्देशेन त्यागोऽपि कृत्स्नस्यैव स्यादित्यत्राह—स चेति। ननु सोमेनेति करणश्रुतिबलात् कृत्स्नस्यैवेत्यत्राह—न चेति। तत्र हेतुः अंशद्वारतोऽपीति। विपक्षे बाधकमाह—अन्यथेति। ननु ऋजीषादेर्हानिश्रुतिः कृतयागस्यास्त्वित्यत्राह—न चेति। देवतान्वयाश्रुतेः यागसाधनत्वाभावादित्यर्थः। नन्वंशद्वारा कात्स्न्र्येनोभयथापि साधनत्वे तुल्ये किमिति द्विर्हविष इति श्रुतिबलादेवांशत उपसंहार उक्त इति चोदयति—यदिति। अंशत एव न कात्स्न्र्येनेति नियमार्थं उपसंहार इति शङ्कते—अथेति। एवं तर्हि नियमश्रुतौ सत्यां सर्वप्रदानाधिकरणपूर्वपक्षो न स्यादिति दूषयति—तर्हीति। किञ्चोभयथापि साधनत्वे सोमे शेषस्थितिर्नस्यान्नित्या इत्याह—किञ्चेति। मैवमिति। अत्रापि धाराश्रुतिबलात् अग्रबिन्दुपातमात्रेण शास्त्रार्थसिद्धेर्नित्यं शेषस्थितिः। द्व्यवदानश्रुतौ नियमार्थायां सत्यामपि यथा सर्वप्रदानशङ्का यथा वा तन्निरासस्तथा दर्शयति—पुरोडाश इति। यदिदमंशतः साधनत्वमुक्तं युक्तं चैतदित्याह--एवमिति। नन्विति। सोमेनेति साधनत्वश्रुतेः स्वतः कात्स्न्र्येनैव व्यापारः यत्रासंभवस्तत्रांशतः इह तु कात्स्न्र्ये संभवे नांशतो होमः। ननु अण्व्या धारयेति श्रुतिबलादंशत इत्यत्राह—न चेति। स्वतः-प्राप्तकृत्स्नहोमो धाराविधयाऽस्त्वित्यर्थः। पुरोडाशे तु नैवमित्याह—पुरोडाश इति। ननु धाराविधया होमे बिन्दुपातादेव होमसिद्धेः बिन्द्वन्तराद्धोमावृत्तिरश्रुता कल्प्येत्यत्राह—किञ्चेति। चरमभाविनि प्रक्षेप एवाग्रबिन्दुनयः

सोमेऽवचनात् भक्षो न विद्यते

यदि सोमे भक्षोऽस्ति तदा द्विः क्रियेत। स एव तु नेत्युत्थितेः सङ्गतिः। ननु सोमे शेषास्थितेः कस्य भक्षचिन्ता? पुरोडाशादेर्हि श्रुतद्व्यवदानात् यागव्यापारोपसंहृतेः सशेषत्वम्। इह तु न तथा। (ननु) कथं च वचनैर्भक्षणगुणविधयः। सगुणार्थकर्मभक्षणविधय एवैते। शेषाभावेऽप्यर्थकर्म द्रव्यान्तरं प्रयुङ्क्ते। द्रव्यान्तरे चैन्द्रवायवादिपदं धर्मलक्षणयाऽस्तु। न तु

न पूर्वभाविनि त्यागांशे। अतस्त्यागः कृत्स्नस्यैव। नन्वेवं कृत्स्नस्य त्यागेप्यग्र बिन्दुत एव प्रक्षेपात् सोमशेषोऽस्त्वित्यत्राह— त्याग इति। धारया जुहोतीति। त्यागस्यैव प्रक्षेपान्तता श्रुतेः यावत्त्यक्तप्रक्षेप एव युक्त इति न सोमशेषसंभव इत्यर्थः। मैवमिति। न हि सोमेनेति साधनत्वं कात्स्न्र्योल्लेखेन श्रुतम् किन्तु वस्तुस्वरूपोल्लेखेन। तस्य च वस्तुनः साधनत्वं द्विधापि लोके सिद्धमित्यण्व्या धारयेति विधिबलादग्रबिन्दावेव यागोपसंहृतिः। यद्यपि त्यागे नैवाग्रबिन्दुनयः तथापि प्रक्षेपेऽग्रबिन्दुमात्रात् शास्त्रार्थे सिद्धे गुणभूतद्रव्यानुरोधान्न प्रधानस्य यागस्यावृत्तिः। नापि प्रक्षेपस्य प्रमाणाभावात्। अतो यागेऽप्युपसंहृतिरित्यर्थः। ननु चरमभाविप्रक्षेपवर्तिना अग्रबिन्दुनयेन पूर्वभाविनि त्यागे स्वतः प्राप्तकृत्स्नयागहानं न युक्तमिति शङ्का दिक्पदनिवर्त्या। निवृत्तिस्तु-अनुपसञ्जातविरोधिन्यपि त्यागे न कृत्स्नस्यैव व्यापार इति निश्चयः। उभयथापि लोके साधनत्वात्। प्रत्युत चरमभाविनि प्रक्षेपे अग्रबिन्दु-नयात् न कात्स्न्र्यमिति निर्णयः। किञ्च निरवशेषभक्षे भक्षणविधीनामर्थकर्मत्वे धर्मविध्यपेक्षितप्रतिपत्तिहाने द्वितीयाश्रुतिबाधापत्तेश्च सशेषः सोम इति सिद्धमित्यर्थः।

द्वितीयचिन्ता पूर्वपक्षमाह—पूर्वपक्ष इति। सत्यपि शेषे वचनाभावान्न भक्षः। चोदयति—पक्षान्तरमिति। गुणविध्यन्यथानुपपत्तेः भक्षविधिरस्त्वित्यर्थः। तन्नेति। द्विरैन्द्रवायवमित्यादि गुणविधयोऽप्यर्थं प्राप्तपाक्षिकभक्षाश्रयतयाप्युपपद्यन्त इति न नियम इत्यर्थः।

संस्कारकर्मतामास्थाय शेषस्थितिः प्रयोज्या। संस्कारेण संस्कार्या-प्रयुक्तिस्थितेः। मैवम्। न सोमेऽपि सर्वहोमे मानमस्ति। इन्द्र-वाय्वाद्यर्थं हि ग्रहणं श्रुतम्। तदुद्देशेन एकदेशे त्यक्तेऽपि गृहीतं सर्वं तदर्थं भवति। रसीभूते हि सोमे ग्राह्ये देवतोद्देशः। एवं दृष्टे नान्वयी। यदि उद्दिष्टोद्देशेन त्यागः, स च अण्वधारया श्रुतः बिन्दुक्रमेणार्थात् तदग्रबिन्दुपातमात्रे कृते तदुद्देशेन ग्रहणे अर्थवति न सर्वहोमे मानताऽस्तीत्यस्ति शेष :।

राद्धान्तस्त्विति। नित्यवच्छ्रुतक्रत्वर्थगुणविशेष-विधेर्न पक्षप्राप्त-भक्षाश्रयत्वमिति गुणविशिष्टभक्षविषय एवेत्यर्थः।

चमसेषु समाख्यातात्। सन्ति सोमे चमसाः प्रंतु होतुश्चमसः प्रब्रह्मणः प्रोद्गातृणां प्रयजमानस्येति। तत्र चिन्ता—किं तेषु भक्षो नास्ति उता-स्तीति। तत्रावान्तरसङ्गतिमाह— तर्हीति। ननु होतुश्चमस इति वैदिक-समाख्यान्यथानुपपत्तेर्भक्ष विधानात् कथं पूर्वपक्ष इत्यत्राह—पूर्वपक्ष इति। न तावदिदमेव प्रैषवचनं भक्षविधायकम् विध्यश्रुतेः [न] वचनान्तरमस्ति न चमसे भक्षः। नन्विति। होतुश्चमस इति होत्रा चम्यतेऽत्रेति योगादाख्येयम्। योगश्च विधिं विना न संभवतीति विधिपर्यन्ततैवेत्यर्थः। मैवमिति। चमसशब्दावयवयोः प्रकृति-प्रत्यययोः अक्लृप्तशक्तिकत्वेन वाऽत्राकृतिभेदे रूढतैव, अनियतप्रयोगात्। ननु रूढत्वे कथं होतृसंबन्ध इत्यत्राह—रूढ इति। अस्मादेव श्रुतिवलात् यथाकथञ्चित्संबन्धोऽस्त्वित्यर्थः।

राद्धान्तस्त्विति। होतुश्चमस इत्यन्वयश्रुतेः अन्यथासिद्धत्वेन चमसशब्दस्य यौगिकत्वात् विधिपर्यन्तो योगः। होत्रादेश्चमसस्य च न स्वामिलक्षणसंबन्धः यजमानस्यैव यागस्य कार्यत्वात्। नापि होमक्रिया-संबन्धनिमित्तः संबन्धः। तेषां होमकर्तृत्वाभावात्। अतो होत्रा चम्यतेऽत्रेति चमसपदावयवयोगादेव पात्रान्वयः। स च विधिपर्यन्त एवेति चमसस्य भक्षविधिः। ननु नियतप्रयोगत्वात् रूढ एवेत्युक्तमित्यत्राह—आकृतीति। यज्ञपात्रविशेषत्वोपहितो यौगिक एव न रूढः। तामरसत्वोपहितः पङ्कजा-दिरिवेत्यर्थः। ननु यौगिकत्वेऽपि द्रव्यान्तरचमनाद्योगोऽस्तु किं सोमभक्ष-

न च सोमेन यजेत इति श्रुतेः कृत्स्नेनैव यागः अंशद्वारतोऽपि सोमस्य करणत्वसिद्धेः। अन्यथा रसस्य यागकरणा(त्वा)र्थं स्थापनं ऋजीषादेश्च हानं न स्यात्। न च ऋजीषादेः कृतयागस्य हानश्रुतिः तत्र देवतोद्देशाश्रुतेर्न यागसाधनता। यद्यंशतोऽपि साधनत्वं तुल्यं न तर्हि पुरोडाशादेर्द्विर्हविष इति श्रुतिबलादंश एवोपसंहारः। अथांशत एवेति नियमोपसंहारः तर्हि नियमे श्रुते सर्वप्रदानाधिकरणे सर्वप्रदानेन पूर्वपक्षो न स्यात्।

विधिनेत्यत्राह—न चेति। द्रव्यान्तरस्य तत्रासन्निधेरित्यर्थः। द्रव्यान्तरचमने उच्छिष्टदोषापत्तेः तच्छुद्धये पात्रतक्षणादि कल्प्यमित्याह—द्रव्यान्तरेति। सोमे तु न तक्षणादि कल्प्यमित्याह—सोमे त्विति।

उद्गातृचमसमेकस्य। ज्योतिष्टोमे प्रोद्गातॄणां चमस इति श्रुतम्। तंत्र समाख्यानादस्ति भक्ष इति स्थितम्। इदमिदानीं चिन्त्यम्—प्रोद्गातॄणामित्यत्र किमेकस्यैवोद्गातुर्भक्षः उत सर्वेषामृत्विजाम्—किं वा अपसुब्रह्मण्यानां उद्गातृ-प्रस्तोतृ-प्रतिहर्तॄणां छन्दोगानां आहोस्वित् ससुब्रह्मण्यानामिति। तत्रावान्तरसङ्गतिमाह—उक्त इति। ननु प्रोद्गातॄणामिति बहुत्वश्रुतेः कथमेकस्यैवोद्गातुर्भक्ष इति पूर्वपक्ष इत्यत्राह—प्रथम इति। उद्गातृशब्दस्य वरणभरणभेदोत्पाद्य-ऋत्विग्भेदे रूढत्वात् तस्य च प्रथमप्रतीतेः प्राधान्याच्च तदनुरोधेन जघन्यगुणभूतप्रत्ययार्थबहुत्वाविवक्षा पाशानितिवद्युक्ता। न तु वचनव्यत्ययाश्रयणं अस्मरणात्। अत एकस्यैवोद्गातुर्भक्ष इति भावः। पक्षान्तरमिति। सति संभवे सर्वत्र मुख्यार्थान्वयित्वं न्याय्यमिति उत् गायतीत्युद्गातेति गानयोगाद्यौगिकोऽयम्। अपसुब्रह्मण्येष उद्गातृप्रस्तोतृप्रतिहर्तृषु मुख्य उद्गातृशब्दः इति त्रयाणामपि भक्ष इत्यर्थः।

राद्धान्तस्त्विति। अवयवार्थापेक्षाद्योगात् निरपेक्षा रूढिर्बलीयसीति रूढेर्योगापहारित्वात् यौगिकत्वे तयाहते रूढिपूर्वकलक्षणैवाश्रयणीया। यत्राज्यश्येनादौ रूढिं विहाय वाक्यशेषावगतयोगग्रहः तत्र रूढेरनुग्राहकाशक्तेः, तदशक्तिश्च वाक्यशेषं प्रति गुणत्वात् पदार्थानाम् तच्च भावार्थ-

किञ्च अंशतोऽपि साधनत्वं कृत्स्नतोऽपि इति सोमे शेषस्थितिर्नित्या न स्यात्। मैवम्। उक्तमग्रबिन्दुपातेन कृते शास्त्रार्थे नित्यं शेषस्थितिः। पुरोडाशे च श्रुतेऽपि द्व्यवदाननियमे सर्वप्रदानाशङ्का एवम् नियतद्व्यवदानावृत्त्यैव कृत्स्नहोमोऽस्तु-इति। निरासस्तु सकृत् द्व्यवदानात् सिद्धेयागे न द्रव्यास्यगुणानुरोधादावृत्तिः इति। एवमंशतोऽपि देवतार्थत्वाल्लोके देवतोद्देशेन पायसादिकृतमंशतो देवतार्थं कृत्वा यथेष्टमुपभुज्यते। ननु कृत्स्नस्यैव साधनत्वश्रुतेः कात्स्न्येनैव होमव्यापारः

विधिपरत्वमिति तदर्थमपेक्षितनामत्वाय योगएवादेयः न रूढिरिति। नन्वत्रापि बहुत्वानुपपत्तेः कथं रूढ्यनुग्रह इत्यत्राह—इह त्विति। ननु दण्डीवल्लक्षणाया जघन्यतरत्वात् गानयोगाद्यौगिकत्वमेव व्यावृत्त्य युक्तमित्यत्राह—असंभवे चेति। निरपेक्षतया शीघ्रप्रवृत्तरूढार्थप्रतीतेः यत्र जघन्यतमवृत्त्यापि सर्वथाऽसंभवः तत्र व्यावृत्त्ययोगग्रहः। इह तु संभवतीत्युक्तमित्यर्थः। राद्धान्तैकदेशिना उच्छब्दानर्थक्यदोषान्न यौगिकत्वमित्युक्तम्। तन्न युक्तमित्याह—राद्धान्तेति। न हि उपसर्गानर्थक्यदोषः। प्रबल इत्यादौ दर्शनादित्यर्थः। ननूद्गानार्थत्वेनार्थवत्त्वे सति कथमानर्थक्यं न दोष इत्यत्राह—उद्गानेति। गानातिरिक्तस्योद्गानस्याभावादित्यर्थः। ननूत्पूर्वगायतेः उद्गीथसामभागार्थत्वात् कथमतिरिक्ताभाव इत्यत्राह—सोच्छब्द इति। सोच्छब्दो (गायतिः नोद्गीथाख्येसा मभागे रूढः किन्तूद्गीथशब्दोऽश्वकर्णादिवत् सामभागविशेषेऽवयवनिरपेक्षो निरूढः। अन्यथोच्छब्दसहितयोगतस्तत्रापि शक्तिः कल्प्या स्यादित्यर्थः। ननु चोद्गातोद्गायेदिति सोच्छब्दो) गायतिरुद्गीथे प्रयुक्त इति तत्राह—यत्रेति। नन्वेवं यौगिकपक्ष एव स्यादित्याह—एवं चेति। ननु निषद्योद्गातारः स्तुवन्ति इत्यत्र यथा सुब्रह्मण्यहानं तथाऽत्राप्यस्त्वित्यत्राह—न चेति। सुब्रह्मण्यस्य स्तुतिकारित्वाभावात् तद्धानं युक्तम्। तत्र स्तुत्यन्वयश्रुतेः इह न तथा। अनेन व्याहरेयुरुद्गातार उत्तमाया ऋच इत्यत्रापि वैषम्यमुक्तम्। उत्तमायाः स्तोत्रीयत्वादिति वेदितव्यम्। नन्विति। लक्षणायामपि स्तुति-

स्वतः। क्वचिदसंभवेऽशतः। इह कात्स्न्र्येन संभवे नांशतः। न चाण्व्याधारयेत्यनुरोधादग्रबिन्द्वंशतः, स्वतः कृत्स्नहोमो धाराविधया अस्तु। पुरोडाशेकात्स्न्र्यंहानं द्व्यवदानश्रुतेरस्तु।

किं च त्यागांशेनाग्रबिन्दु-नयः त्याग एव प्रक्षेपान्तः क्वचिदसम्भवे अंश-कार्यं इति यावत्यक्तं प्रक्षेपो युक्तः; मैवं, न कात्स्न्र्योल्लेखेन साधनत्वश्रुतिः। किंतु वस्तुस्वरूपोल्लेखेन वस्तुनस्तु द्विधापि तुल्यं लोकसिद्धं साधनत्वमित्यण्व्या धारयेति विधेरग्रबिन्दु-प्रक्षेपान्ते त्यागे सिद्धे प्रक्षेपावृत्यप्रयुक्तेस्त्यागेप्युपसंहृतिरिति दिक्।

पूर्वः पक्षः सत्यपि शेषे वचनाभावान्न भक्षः, पक्षान्तरं भक्षगुणविधिरन्यथा नेत्यस्ति भक्षः। तन्न। 'भक्षणमर्थात् पक्षे' प्राप्तुमाश्रित्य गुणविधिर्न भक्षनियमः। राद्धान्तस्तु नित्यविशेषविधिर्विशिष्टभक्षणविधिविधेयैव।

चमसेषु समाख्यानात् संयोगस्य तन्निमित्तत्वात्

तर्हि चमसेषु वचनाभावान्न भक्ष इत्युत्थितेः संगतिः। पूर्वपक्षः। "होतुश्चमस" इत्यादि वैदिक समाख्यानेऽपि न भक्षविधिः। अतो न चमसेषु भक्षः। ननु होत्रा चम्यतेऽत्रेति योगा-

---

कारित्वतः त्रयाणां लक्षणास्तु किमिति प्रवचनतो लक्षणेत्यर्थः। उच्यत इति। प्रवचनस्य उद्गातृसमाख्या समाख्यातत्वात् तत्समाख्यायाश्च औद्गात्रान्वयाधीनत्वात् उद्गातृशब्देन झटिति औद्गात्रप्रवक्तृधीः न स्तुतिकारित्वधीरिति अन्तरङ्गत्वात्तत्पक्षपात इत्यर्थः। नन्वत्र भाष्ये राद्धान्ते कथमौद्गात्रकर्ता उद्गातेति यौगिकतोक्तिरित्यत्राह—नन्विति। तथाव्युत्पत्त्यशक्तेरित्यर्थः। कथमित्यत्राह—उद्गातृशब्द इति। उद्गातुरिदं प्रवचनमिति तेन प्रोक्तमित्यणि कृते उद्गातृशब्दादौद्गात्रस्य व्युत्पत्तिः शक्या। शाब्द-

---

१. प्रक्षेपात्

वाख्येयम् । न च योगो विधिं विनेति विधिपर्यन्ततैव । मैवं, पात्राकृतिभेदे हि चमसशब्दो रूढः, न तु योगकल्पनया यौगिकः रूढोऽपि होत्रादेर्होतुश्चमस इत्याविश्रुतेरस्तु ।

राद्धान्तस्तु होत्रादेश्चमसान्वयश्रुतिः, न स्वत्वात् अधिकृतस्यैव हि यागः । न च तत्र तेन होमः । न च ते होतार इति चमसपदावयवयोगत एवान्वयो धीस्थः । सचैवं-यदि योगविधिः आकृतिभेदोपहितोऽपि यौगिकः पङ्कजादिरिवेति न रूढिकल्पना । न च द्रव्यान्तरचमनाद्योगः, तद्भेदस्याधीस्थत्वात् । द्रव्यान्तरतच्चोच्छिष्टत्वे पात्रतक्षणादि कल्प्यम् । सोमे न तत् "न सोमेनोच्छिष्टा" इति श्रुतेः सोम चमसमेव ।

उद्गातृचमसमेकस्य श्रुतिसंयोगात्

चमसे उक्ते उद्गातृभक्षे तद्विशेषचिन्तेयमिति सङ्गतिः । प्रथमः[1] पूर्वपक्षः उद्गातृनाम्नः एकर्त्विग्भेदे वरणभरणभेदोत्पाद्ये रूढेः नामार्थप्राधान्यात् पाशानितिवत् बहुत्वाविवक्षयैकस्यैव भक्षः । पक्षान्तरम्-सर्वर्त्विजां भक्षः । नामार्थस्य ऋत्विङ्मात्र लक्षणयाप्यनुग्रहे न विभक्त्यर्थं हानं, कांस्यभोजिनयात् । पाशे

स्मृतिसंगृहीतत्वात् नन्वौद्गात्रयोगादुद्गातुर्यौगिकता । राजशब्दस्येव राज्ययोगात् । लोपाद्यननुशासनादित्यर्थः । अत्र साक्षित्वेनाचार्यैरुक्तमाह—आहुरिति । तदुक्तभङ्गमाह—सुब्रह्मण्या इति । अस्यार्थः यद्यपि प्रवचनयोगित्वं सुब्रह्मण्यस्यापि तथापि न तस्य सदसि सन्निधिः यत्र भक्षणम् । सुब्रह्मण्यामाहूय सदसोऽपसृतत्वात् । ततश्च ससुब्रह्मण्यपक्षे तस्य सदसि सन्निधिर्भक्षणं च विधेयमिति गौरवं स्यात् । किञ्च व्यापारहीनस्य तस्य भक्षणं न विधेयम् । द्रव्यप्रतिपत्तिरूपेऽपि भक्षणे आनुषङ्गिकीप्रीतिरपि विध्यपेक्षिता-

---

१. एकः A

तु बन्धनमात्रलक्षकेपि न बहुत्वं प्रकरणे बन्धनबहुत्वाभावाद्युक्तं बहुत्वहानम् । न च साधनमात्रलक्षकत्वं प्रभुमोक्तित्वत्यनन्वयात् । पक्षान्तरं—त्रयाणामपसुब्रह्मण्यानां भक्षः, गानयोगात् यौगिकस्त्रिषु उद्गातृशब्दो मुख्यः मुख्ये सति न लक्षणा[1] ।

राद्धान्तस्तु-रूढेर्योगापहारित्वात् यौगिकत्वे हृते रूढिपूर्विका लक्षणा । रूढेरित्यमप्यनुग्रहाशक्तौ व्यावृत्त्य यौगिकत्वग्रहः इह तु औद्गात्रसमाख्यातग्रन्थप्रवचनात् उद्गातृशब्देन [दण्डिन्यायेन छन्दोगाश्चत्वारो लक्ष्यन्ताम् ।] असंभवे च गानयोगाद्यौगिकत्वं, राद्धान्तैकदेशिनोच्छब्दाविवक्षादोषादयौगिकतोक्ता । नायं दोषः । उच्छब्दोऽत्र प्रलंबत इति इतिवदनर्थक एव । उद्गानाख्यगाना भावात् । सोच्छब्दो हि गायति रुद्गीथें सोमभागे न रूढः । यत्र चाप्युद्गायेदित्युच्यते । तत्रोच्छब्द-उद्गीथ लक्षकः, उद्गीथं गायेदिति तत्रार्थः । एवं चोद्गानकर्त्ता नोद्गाता, किंतु ऋत्विग्भेदे रूढ एव, प्रवचनकर्तृत्वलक्षकः सुब्रह्मण्यस्यापि ।

ऽस्ति तच्च व्यापारवत्सु दृष्टार्थम् नान्यत्र । न चैकस्यैव भक्षणस्य दृष्टार्थत्वमदृष्टार्थत्वं च युक्तम् । निषद्योद्गातार इत्यादौ दृष्टलक्षणत्वादपि अपसुब्रह्मण्यं प्राप्तम् । अत्र साक्षित्वेन तदुक्तं वार्तिकमाह—तदाहेति । भङ्गं निरस्यति—तन्नेति । भक्षविधान एव भक्षदेशसन्निधानस्यार्थप्राप्तत्वात् सुब्रह्मण्यस्यापि तन्न विधेयमिति विधिगौरवाभावात् [स] सुब्रह्मण्यमेव प्राप्तम् । इतरथा स्तोत्रकाले सदसि स्थितानामपि विहारादेरावश्यकत्वात् भक्षकाले स्थितौ मानाभावे गौरवं दुर्वारं स्यात् । किञ्चाप्रयोगान्तं स्थितेरुक्तत्वात् तत्र कर्तृसन्निधिरावश्यक इत्याह—किञ्चेति । यदपि व्यापार-

---

१. असतिमुख्ये

न च "निवद्योद्गातारः स्तुवीरन्नि"तिवत् सुब्रह्मण्यस्य हानं, तत्र हि स्तुत्यन्वयात् स्तुतिकारिलक्षणा न च स्तुतिकारो सुब्रह्मण्यः ।

नन्विह स्तुत्यश्रुतावपि स्तुतिकारित्वेन त्रयं लक्ष्यतां, क पक्षपातः प्रवचनतो लक्षणायाम् । उच्यते, औद्गात्रमितीयमाख्या उद्गात्रन्वयादिति उद्गातृशब्दादौद्गात्रप्रवक्तृधीः । न तथा स्तुतिकारित्वधीरित्यन्तरङ्गलक्षणायाँ पक्षपातः[1] । न त्वौद्गात्र-कर्ता उद्गातेत्येवं यौगिकोद्गातृग्रहो भाष्ये तत्त्वार्थः । उद्गातृशब्दे हि रूढार्थे तस्येदमित्यण औद्गात्रमिति नोद्गातुर्यौगिकता राजशब्दस्येव । आहुरन्येऽपि उद्गातृपदमौद्गात्रं प्रसूते तद्धिते कृते ।

नत्वौद्गात्रपदादस्य व्युत्पत्तिरुपपद्यते ।
उद्गाता गौण एवायं मुख्योद्गातुरसंभवात् ।
कल्पितोऽयं परावृत्य ब्राह्मणादिषु राजवत् ।। २ ।।

ससुब्रह्मण्या इति भाष्योक्तं राद्धान्तं भङ्क्त्वा भट्टेनापसुब्रह्मण्या इति राद्धान्तितं प्रवचनसाम्येऽपि भक्षकाले सुब्रह्मण्य-

---

हीनत्वं सुब्रह्मण्यस्योक्तं तदपि न, दधिद्रव्यप्राशनादिव्यापारस्य तत्र सत्त्वात् । यत्तु आनुषङ्गिकप्रीत्यर्थभक्षे दृष्टार्थता नास्तीति, तदपि न, भाविप्रीत्यनुसन्धानेनैव तस्य पूर्वं प्रवृत्तिरिति वक्तुं शक्यत्वात् । माध्यन्दिनकाले दक्षिणानुसन्धानेनैव प्राक्पदार्थे प्रवृत्तिः । एतच्चाभ्युपगम्योक्तम् । परमार्थतो द्रव्यप्रतिपत्तिरेव कार्यं भक्षस्य न प्रीतिः । अत एव नान्यसमाधिः कण्ठोक्तो भवनाथेन दृष्टलक्षणत्वं चौद्गात्रप्रवचनमिति ससुब्रह्मण्यमपि त्रयम् । कल्पसूत्रे यदपसुब्रह्मण्यतया तत्पूर्वपक्षन्यायमूलं पितृयज्ञाङ्गसूत्रवदिति ध्येयम् । अपरमिति । यद्गुरुणा निरस्तं भट्टोक्तमपर

---

१. पूर्वपक्ष

सन्निधेर्न लक्ष्यता । स हि सुब्रह्मण्यामाहूयैव सदसीपहूतः तस्य सद आनीयैव भक्षविधौ विधिगौरवं स्यात् । तदाह—अव्यापाराद्भक्षकाले सन्निधानस्य चाश्रुतेः ।

सुब्रह्मण्यस्य चमसे भक्षणं नैव विद्यते ।। तन्न । भक्षविधावर्थप्राप्तः सदः सन्निधिः । यथान्येषामेव भक्षविधाने देशसन्निधिः, तदुन्मुखताद्यर्थप्राप्तमिति न विधिगौरवम् ।

किं च आप्रयोगान्तं कर्तृस्थितिरित्युक्तं, हविष्कृदाह्वाने ।

अपरं भट्टोक्तं गुरुणा निरस्तम् । त्रिष्वेव बहुत्वं कपिञ्जलनयवद्युक्तम् । अलं सुब्रह्मण्येनेति । तन्न, न बहुत्वार्था लक्षणा । प्रवचनान्वयात् सा सुब्रह्मण्येऽपि । कपिञ्जलनयस्तूपादाने लाघवात् । इहोपात्तेषु न सः । लघ्व्यामधिकं उच्छब्दार्थवत्त्वायैव गानकारिहानम् ।

ग्रावस्तुतो भक्षो न विद्यतेऽनाम्नानात्

उक्ते वचनसमाख्याभ्यां भक्षे, वचनार्थनिर्णयायाधिकरणजातमिति संगतिः पूर्वपक्षः । वाक्यशेषे चमसिकीर्तनाच्चमसिष्वेव सर्वं शब्द इति चमसिनामेव हारियोजने भक्षः नाच-

---

तदिदमित्याभाषान्तो ग्रन्थः । तन्नेति । न हि बहुत्वार्था लक्षणा । न बहुत्वान्वयाल्लक्षणेत्यर्थः । किन्तु प्रवचनान्वयात् । सा सुब्रह्मण्येऽपि (समाना, बहुत्वं त्वनुपपद्यमानं प्रातिपदिकस्य लक्षणापरत्वमापद्य कृतार्थम् । सा च लक्षणा संबन्धिनि भवति । संबन्धश्चैकप्रवचनान्वयादिति सुब्रह्मण्येपि) सा । अन्यथा बहुत्वयोगाल्लक्षणायां कपिञ्जलान्यायेन त्रित्वपर्यवसाने सुब्रह्मण्यो निवर्तेत न प्रस्तोतेति न किञ्चन प्रमाणमस्ति । अस्मिन् मतेऽनृत्विजः प्रवचनयोगिनोऽन्ये उभयानुमततया अकृत्वीयतया निरस्ताः । ऋत्विजस्तु प्रवचनानन्वयादिति वेद्यम् उपात्तत्वादेषां कपिञ्जलनयोऽपि नास्तीत्यत्राह—कपिञ्जलनयेति । लघ्व्यामिति । उच्छब्दार्थवत्त्वाय गानकारितया यौगिकत्वं तु न युक्तम् ।

मसिनो ग्रावस्तुतः। राद्धान्तस्तु, षोडशाप्यृत्विजः प्रकरणे लिप्साहर्ाः। स्वतः सर्वशब्दादसंदिग्धार्थादिति न तन्निर्णयो वाक्यशेषात्। न च वाक्यशेषमुख्यार्थत्वाय सङ्कोचः। चमसिनश्चमसेषु भक्षयन्तीति मुख्यार्थमेव पदजातं हारियोजनं महाभाग्यतया स्तौति इति ग्रावस्तुतोऽप्यस्ति भक्षः।

लघ्व्यामेवं—अथशब्दादनन्तरप्रकृतधीः तदनुरोधात् सर्वशब्दोऽपि तत्परः। राद्धान्तस्तु सर्वशब्दात् सर्वर्त्विग्भिः सा। अथ पदान्वयाच्चमसिषु चेत् तदा विधिगौरवम् सर्वेऽपि लिप्सन्ते, ते चमसिन इति। अतः स्तुत्यर्थमेव चमस्यन्वयः।

वषट्काराच्च भक्षयेत्

अत्रापि भक्षवचनार्थचिन्तेति सङ्गतिः।

पूर्वपक्षः—यद्भाष्ये विशिष्टविधिना राद्धान्तितं तदाक्षेपात्। विशिष्टविधिर्हि विशेषणविशेष्यत्वेन। न च प्राथम्यं प्रकारकं क्रियाविशेषणं, कारकाणि हि कारकविभक्त्या क्रियाविशेषणत्वेनोच्यन्ते, न क्रमः। स हि पदार्थगुणः पदार्थनिर्वृत्तावव्यापारात् तदकारकमिति न विशिष्टविधिपरं वचनम्। समाख्याप्राप्ते कथञ्चित् प्राथम्यविधिः।

ग्रावस्तुतो भक्षो न विद्यते। सोमे ग्रावस्तुन्नाम होतृपुरुषः तस्य किं भक्षो नास्ति उतास्तीति चिन्ता। अवान्तरसङ्गतिमाह—उक्त इति। वचनात् समाख्यानाच्च भक्ष इत्युक्ते तद्वचनार्थनिर्णयार्थं वक्ष्यमाणमधिकरणजातमिति सर्वस्यापि प्रघट्टकस्यावान्तरसङ्गतिरित्यर्थः। ननु यथाचमसमन्यांश्चमसांश्चमसिनो भक्षयन्ति अथैतस्यहारियोजनस्य सर्व एव लिप्सन्ते इति पू[स]र्वर्त्विजां हारियोजनस्य भक्षान्वयावगतेः कथमृत्विजो ग्रावस्तुतो न भक्ष इति पूर्वपक्ष इत्यत्राह—पूर्वपक्ष इति। प्रकरणसन्निधितः स्ववाक्यसन्निधेर्बलवत्त्वात् वाक्यशेषे चमसिकीर्तनात् सर्वशब्दः किं

राद्धान्तस्तु प्रथमभक्ष इति समासे पदद्वयेन प्राथम्यविशिष्टभक्षाभिधानादेकार्थविधिः ।

उक्तमन्यैः—समासार्थाद्विनिष्कृष्य न चैकांशो ह्यनूद्यते ।
त्र्यङ्गवत्तेन सर्वोऽयमपूर्वोऽर्थो विधीयते ॥

ननु [कथं] समासपदेऽप्यनेकपदैरेकार्थ उच्यते स्फोटनिराकरणात् । मैवम् । पदद्वयेनैव प्राथम्यभक्षयोर्गुणगुणित्वेनान्वयात् विशिष्ट एकोऽर्थ उक्तोऽर्थान्तरान्वयी । वाक्ये तु अर्थान्तरान्वितयोर्मिथोऽन्वय इति । इह मिथोऽन्वितयोरध्याहृतकरोत्युपात्तविध्यन्वयः । एवं निबन्धनमतेऽभिहितः क्रमो विधेयः । पाञ्चमिकोऽनभिधेयत्वान्न विधेय इति शब्दबलमतम् । वस्तुबलमते तु सर्व एव क्रमोऽनभिधेयः इति पञ्चमाद्यसिद्धम् । लघ्व्यां अविधेये कथं भाष्ये विशिष्टविधिरित्याशङ्क्य समाधिः यद्विधीयते तद्विशिष्टं तत्स्वरूपे लीनः क्रमः अपेक्षया स्वीक्रियत इति विशिष्टश्रुतिरर्थवती ।

होमाभिषवाभ्यां च

इहापि भक्षवचनार्थचिन्तेति सङ्गतिः । पूर्वपक्षः—अभिषुत्य हुत्वेति होमाभिषव (समानकर्तृकभक्षश्रुतेः अङ्गाङ्गित्वधीः ।

चमसिपरः किं वा ऋत्विङ्मात्रपर इति सन्देहे सन्दिग्धे वाक्यशेषान्निर्णय इति चमसिपर एव । चमसिनामेव हारियोजनभक्षो नाचमसिनो ग्रावस्तुत इत्यर्थः ।

राद्धान्तस्त्विति । स्याद्वाक्यशेषान्निर्णयः यदि सन्देहः स्यात् । इह तु असन्दिग्धात् सर्वशब्दार्थात् स्वतः प्रकरणसन्निहितषोडशर्त्विजो हारियोजनेऽप्साहंतया धीस्था इति न वाक्यशेषान्निर्णयः सर्वशब्दस्य प्रकृतविपुलार्थत्वेनासन्दिग्धार्थत्वात् सर्वेषामपि हारियोजने भक्षानुवादशक्तेः । न च स्तुतिवदस्यानर्थक्यम् । परोक्षार्थतापायेन सर्वपदस्य संकुचितवृत्तित्वं स्यात् तदाह—न चेति ।

अभिषव) होमौ वाक्यान्तरविहितौ भक्षाङ्गं, भक्षो वा विहितस्तयोरङ्गम्। [1]एवमप्राप्तान्वयपरत्वान्न भक्षान्तरविधिः।

राद्धान्तस्तु होमोऽपूर्वार्थं उत्पत्तौ[2] ज्ञातः। अभिषवोऽपि तथेति न तयोः संस्काररूपभक्षार्थता। न च भक्षः स्वभावतो द्रव्यसंस्कारोऽन्यार्थं इति अभिषव होमसमानकर्तृकभक्षान्तरविधिरित्यर्थादभिषवहोमनिमित्तकत्वे द्वयं निमित्तमित्युक्तं षष्ठे। लब्ध्यां विधेयान्तरं नास्तीति प्रपञ्चितम्।

प्रत्यक्षोपदेशाच्चमसानामव्यक्तः शेषे

उक्ते होमाभिषवाभ्यां[3] भक्षान्तरे तत् चमसेष्वपीति चिन्तेति—सङ्गतिः। पूर्वः पक्षः। कृत्स्नचमसस्य होत्राद्यन्वयाच्चमसेभ्योऽन्यत्र ग्रहादौ होमाभिषवाभ्यां भक्षः, विशेषेण सामान्यबाधात्। राद्धान्तस्तु—न होतृचमस इति परिसंख्या। प्राप्ते हि [4]पुनरश्रुतेः [न] सा ननु होतुः कृत्स्नचमसान्वयात्कृत्स्नभक्षः; नैवं इह ह्यस्याः समाख्याया वचनं कल्प्यम् कल्पना च वचनान्तराविरोधादंशद्वारैव [न] कृत्स्नान्वय-विधिरिति न

लब्ध्यामिति। अथैतस्येत्यथशब्दादनन्तरप्रकृतधीः तदनुरोधात् सर्वशब्दोऽप्यनन्तरचमसिपर एवेत्यर्थः।

राद्धान्तस्त्विति। असन्दिग्धार्थात् सर्वशब्दात् सर्वर्त्विग्भिः सा, यदि अथ पदान्वयाच्चमसिषु तदा सर्वे लिप्सन्ते ते चमसिन इति विधिगौरवं स्यात्। अतः सर्वर्त्विजां हारियोजने भक्ष इत्यर्थः। न चमसिश्रुतेरानर्थक्यमित्याह—स्तुत्यर्थं इति।

---

१. BR एवमप्राप्तोपदेश-

२. R उत्पन्नो ज्ञातः

३. विभिषवनिमित्तो भक्षः चमसे

४. पुनरङ्गश्रुतेः

कल्प्यविशेषविधेर्बलवत्ता । सोमश्च तिक्तः । कर्तुर्विपुलश्चेति न स्वरसतो होत्रादेः कृत्स्न-भक्षः । अल्पं भक्षयेदिति च श्रुते-रंश-भक्षादेव होतृचमस इत्याख्या । लब्ध्यामेवं चमसे समा-ख्याप्राप्तहोत्रादिबाधापेक्षता, ग्रहादौ बाधानपेक्षतेति न चमसे-ऽध्वर्यं भक्ष इति ।

अत्र राद्धान्तः—न विनियोगे बाधापेक्षा प्रयोगे सा । विधिश्च प्रयोगे अंशाश्रयेण[1] बाधहेतुः । न च विकल्पः, अल्पं भक्षये दित्यादिदर्शनादित्युक्तम् ।

एकपात्रे क्रमादध्वर्युः पूर्वो भक्षयेत्

उक्ते अनेकस्यैकपात्रे भक्षे कः पूर्वं भक्षयेदिति चिन्तय-मवान्तरसंगतया अनुष्ठानात्मिकापि प्रसक्तैव । पूर्वः पक्षः । अध्वर्युः पूर्वं, यस्य हस्ते स जयतीति नयात् । अन्यथा अन्यहस्ते कृत्वा पुनः स्वहस्तेकरणे प्रयत्नगौरवम् । ननु वषट्कर्तुः प्रथम-भक्ष इति वचनाद् अवषट्कर्तुरध्वर्योर्न न्यायतः पूर्वं भक्षः सत्यं वचनान्नप्राथम्यविधिः भक्षमात्रविधिरित्युपेत्य नयव्युत्पत्ति-रित्युक्तं भाष्ये । राद्धान्तस्तु-वषट्कारः पूर्वं पश्चादध्वर्यो-

वषट्काराच्च भक्षयेत् । सोमे "वषट्कर्तुः प्रथमभक्ष" इति श्रुतम् । तत्र चिन्ता—किं वषट्कारनिमित्तो भक्षो नास्ति उतास्तीति । तदर्थं चिन्ता—किं वषट्कर्तुः प्रथमभक्ष इति भक्षानुवादेन प्राथम्यविधिः उत तद्विशिष्ट-भक्षान्तरविधिरिति । तत्रावान्तरसङ्गतिमाह—अत्रापीति । ननु वचन-बलात् विशिष्टभक्षान्तरप्रतीतेः कथं पूर्वपक्ष इत्यत्राह—पूर्वपक्ष इति । कथं विशिष्टविध्याक्षेप इत्यत्राह—विशिष्टेति । कथं विशेषणतेत्यत्राह—न चेति । प्राथम्यात् सर्वोत्तरकालभावित्वात् क्रियानिर्वृत्तावव्यापारात् न कारकतया कारकविभक्त्योच्यत इति न कारकमिति न विशेषणमिति न विशिष्टविधि-

1. B अविनाश्रयेण

र्होमः, भाष्ये निमित्तपौर्वापर्यात्तद्भक्ष पूर्वता न्यायादुक्ता भक्षकाले हि गतनिमित्तानुसन्धेरेव भक्षः, अनुसंधिश्चादित इति तदनुरो धाद्न्यकरे दत्वापुनः स्वकरे करणमस्तु। वचनाच्चेति (सूत्रम्) कृत्वाचिन्तोद्घाटनम्। न चाभिषवस्य वषट्कारादपि पूर्वत्वात्तन्निमित्तको भक्षः, पूर्वं, यत उक्तं, षष्ठे, होमसहितस्य निमित्तत्वं होमः पश्चादिति वषट्कर्तुः पूर्वं भक्षः। लघ्व्यां तु वस्तुतः क्रमस्याविधेयत्वात्, प्राथम्यश्रुतिरध्ययनमात्रार्थेति "यस्य हस्ते स" इति नयादध्वर्युः पूर्वमिति।

अत्र राद्धान्तो भाष्योक्तः। मन्त्रवर्णात् होता पूर्वं, निमित्तपौर्वापर्याच्च। अविधेयमपि प्राथम्यं श्रुतं क्रमापेक्षायां स्वीकार्यमिति हेतुत्रयं तुल्यम्। साक्षादविधिस्त्रयेऽपि। भाष्ये त्वनेकगुणविधेः क्रमाविध्युक्तिर्मुखमालम्। वस्तुत एवाविधेः। लघ्व्यां पञ्चमाद्ये प्रपञ्चनात्। वचनात् दतुलानभक्षणम्। यस्य पूर्वं भक्षः स किं पश्चाद् भयित्रनुमतो भक्षयेत् नेत्युत्तरविवक्षया चिन्तामुखेन प्राप्तिरुक्ता। वचनस्य व्यक्तत्वात्प्राप्तेरुत्तरारंभार्थत्वान्नोत्तरसूत्रेण तदारम्भो भाष्ये। अनुज्ञातेन भक्षणीयमिति स्थिते लोकोक्त्या वेदोक्त्यावेति चिन्तेति संगतिः।

संभव इत्यर्थः। कथं तर्हि भक्षोद्देशेन प्राथम्यविधिरपि। अभावार्थस्याकारकस्य च विधेयत्वायोगादित्यत्राह—परमिति। वचनसमाख्याप्राप्तं भक्षमाश्रित्य कथं तद्विधिरस्तु सान्तत्यविधिवत्। उत्पन्नकर्मगतसङ्ख्यावद्वा। यद्यपि समासार्थैकदेशविधिर्न युक्तः तथापि सप्तदशारत्निरित्यत्र लघ्विमते सङ्ख्यामात्रविधिवदत्राप्यस्त्विति भावः।

राद्धान्तस्त्विति। प्रथमभक्ष इति समासे पदद्वयात् प्राथम्यविशिष्टभक्षाभिधानात् यथाभिधानं विधानस्य युक्तत्वात् विशिष्टैकार्थविधिरेव। नैकदेशविधिः। सप्तदशारत्निरित्यत्र नु समा(न)सविनियोगात् पदद्वयमुख्यार्थविनियोगस्य प्राबल्यात् तदेकदेशविधिरित्युक्तम्। न हि कारकमेव

मन्त्राम्नानाद्वेदशब्देन सिद्धा प्राप्तिरिहाप्युत्तरविवक्षयैवोक्ता । गत नय(सम) सूचितमिदमप्युत्तरार्थमिति नास्यापि । सूत्रं लिखितम् ।

तत्रार्थात् प्रतिवचनम्

प्रतिवचनं तर्हि न मन्त्रेणेत्युत्थितेः संगति । पूर्वपक्षः । अनुज्ञापने अनुज्ञावचनमर्थप्राप्तमस्तु । मन्त्रेण तु न तत् उपहूत इति मन्त्रोऽनुज्ञानार्थः सोऽग्रे श्रुतः । उपह्वयस्वेत्यनुज्ञापनार्थः स पश्चात् । तत्पूर्विका चानुज्ञा नाग्रे प्रकाश्येति कथंचिद-नुज्ञापनशेष उपहूत इति । अनुज्ञां मे देहीत्यनुज्ञापनशेषता ।

राद्धान्तस्तु यथा विनियोगं क्रम इति । लिङ्गात्पाठपूर्वतां तां हित्वा पश्चान्मन्त्रेण प्रतिवचनम् ।

तदेकपात्राणां समवायात्

उक्ते समन्त्रकेऽनुज्ञापने प्रतिवचने च तदेकपात्राणामेव उत नेति संगतिः । पूर्वःपक्षः । नात्रैकपात्राणामिति विशेष-श्रुतिः, अतः सर्वपात्राणाम् इति । राद्धान्तस्तु एकपात्रेऽनुज्ञापन-प्रतिवचनयोर्दृष्टार्थत्वं च भाष्ये प्रपञ्चितमिति न भिन्नपात्रे कार्यकल्पनया द्वयम् ।

विशेषणमिति नियमः नीलोत्पलमित्यत्र गुणस्यापि विशेषणत्वात् । अतः प्राथम्यभक्षयोः धर्मधर्मितयाऽन्वयात् विशिष्टैकार्थत्वमिति प्राथम्यविशिष्ट-भक्षविधिरित्यर्थः । आचार्यैरप्येवमेवोक्तमित्याह—उक्तमिति । नन्विति । समासेऽपि कथमनेकपदैरेकार्थाभिधानं स्फोटनिराकरणादित्यर्थः । मैवमिति । समासे हि पदद्वयेन धर्मधर्मित्वेनान्वयात् विशिष्ट एकोऽर्थ उक्तः अर्थान्तरेण कार्येणान्वयी । वाक्ये तु अर्थान्तरान्वितयोः मिथोऽन्वय इति भेदः उक्तः । न पुनः स्फोटाङ्गीकारेण पदार्थातिरेकेण विशिष्टाङ्गीकार इत्यर्थः । ननु कथमर्थान्तरान्वय इत्यत्राह—इहेति । प्राथम्यविशिष्टभक्षस्याध्याहृतकरो-त्युपात्तविध्यन्वयः । न प्राथम्यमात्रस्य भक्षमात्रोद्देशेन प्राथम्यविधानाशक्तेः वषट्कर्तृ विशिष्टस्य भक्षस्योद्देश्यत्वे विशिष्टानुवादलक्षणो वाक्यभेदः

याज्यापनयेनापनीतो भक्षः प्रवरवत्

ऋत्विजां भक्षणे साङ्ग उक्ते स्वामिनोऽपि भक्षः, उत नेति संगतिः । पूर्वपक्षस्तु-वचनाद्याज्यामात्रं होतुरपनीतं न वषट्कार इति वषट्कारनिमित्तो भक्षो होतुरेव । अनवानविधिः, स्वयं निषद्य यजतीति च याज्यामात्रेऽपि स्वामिकर्तृके घटते । अनवानमविच्छेदो याज्योच्चारण एवास्तु । तथा यजतीति यागकर्तृत्वं तद्यागसिध्यर्थयाज्यामात्रद्वाराऽस्तु । याज्यामात्रकर्तृत्वोपक्रमे च होतुर्यागकर्तृत्वे स्वयं निषद्य यजतीति कर्तृत्वश्रुतेरुपक्रमानुरोधात् याज्यापनय एव ।

राद्धान्तस्तु यत्र होता प्राप्तः तत्रायं स्वामिविनियोगः सवषट्कारे च याज्याव्यापारे होता प्राप्त इति तावत्येव विनियोगो न तद्व्यापारांशे विशेषाश्रुतेः । अतोऽपनीते वषट्कारे होतुर्न तन्निमित्तो भक्षः । प्रवरस्तु यत्र सगुण उपदिष्टः, शक्यः तत्रैव होतरि कार्यः, न स्वामिनि अष्टावसरे अतिदिष्टे हि गुणलोपनयादगुणाक्रियापि । परैरेवमुक्तं यजमानस्य याज्येति श्रुतं हौत्रसमाख्यया याज्या भक्षवषट्काराः होतुः प्राप्ताः । तदुक्तम्—

याज्याभक्षवषट्काराः प्राप्ता होतुः समाख्यया ।
यजमानस्य याज्येति ततोपनयन श्रुतिः ।। इति ।

असामर्थ्यादसमा सापत्तिश्चेतिभावः । ननु क्रमस्याविधेयत्वे पञ्चमसिद्धे कथं प्राथम्यस्य विधिरित्याशङ्क्य निबन्धनशब्दबलात् तार्तीयस्य क्रमस्य विधेयत्वमुक्तम् । विवरणे त्वविधेयतैवेत्याह—एवमिति । नन्वेवं विवरणमते भाष्यस्य विशिष्टविध्युक्तेः का गतिरित्याशङ्कामनूद्य यद्विशिष्ट-भक्षणं तत्स्वरूपविधिः तत्र लीनः क्रमः शब्दावगत इति क्रमापेक्षिणा विधिना स्वीकृत इति विधिस्वीकाराभिप्राया विध्युक्तिरित्याह—लभ्यामिति ।

स्थिते याज्यामात्रापनये अनवानं स्वयं यजतीति च याज्याभिप्रायमिति। अत्र राद्धान्तः—यजमानस्य याज्येत्यनेन होतुर्व्यापारे स्वामिविधिः सवषट्कार एव। तन्न, याज्यामात्रापनयश्रुतेः। अतो गुरूक्तैव विधा।

प्रवरभाष्यभङ्गमाहुः। याज्यार्थं हि वरणं होतृस्वामिनोश्च समाख्यावचनाभ्यां विकल्प्या याज्या, वैकल्पिकं चारंभ एवावधार्यम्। अतो वरणकाल एव स्वामिनो होतुर्वा वरणं स्वकालम्। न च याज्या उरुक्रमविष्णुयागवत् नैमित्तिकी, येन निमित्तानिश्चयादनिश्चितं वरणम्। न च याज्यान्तरार्थं होतुर्वरणमावश्यकं, अतो न तदपनयः शक्य इति। यतोऽनेकयाज्यार्थं होतुर्वरणं तन्त्रम् तदेकयाज्यापनये स्वामिनि भेदे मास्तु। किञ्च यदि अष्टावसरता तदा गुणलोपनयोऽस्तु। प्रकृतावपि नित्यायां सर्वशक्तिनयादस्तु। सूत्रं त्वेवं वैषम्यमाह। याज्यान्तरार्थं वरणानपनयः वषट्कारस्त्वपनेय इति। गुरुनाथयोर्हृद्गतमुच्यते—अनेकयाज्याविशेषार्थं होतृवरणे सत्येव याज्याकाले कथञ्चित् होतुरशक्तौ स्वयं वेति याज्याकर्तृत्वविधिः एवं दृष्टार्थं इति न याज्याकाले वरणं विगुणम्।

होमाभिषवाभ्यां च। सोमेश्रुतम्—"हविर्धाने ग्रावभिरभिषुत्याहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षयन्ति" इति। इदमेव वाक्यं व्याख्यातृभिः अभिषुत्य हुत्वा भक्षयन्तीति लाघवार्थं बद्धम्। तत्र चिन्ता—किं होमाभिषवनिमित्तं भक्षणान्तरं नास्ति उतास्तीति। तदर्थं चिन्ता-किमेतद्वाक्यमन्यतः प्राप्तानां होमाभिषवभक्षाणामङ्गाङ्गितयाऽन्वयविधिपरम् उत होमाभिषवनिमित्तभक्षणान्तर विधिपरमिति। तत्रावान्तरसङ्गतिमाह—इहेति। नन्वभिषुत्य हुत्वा भक्षयन्तीति होमाभिषवसमानकर्तृकं भक्षान्तरमेव विधातुं युक्तमिति कथं पूर्वपक्ष इत्यत्राह—पूर्वपक्ष इति। न तावत् भक्षणं विधेयम्-प्राप्तत्वात्। होमाभिषवावपि तथैव। किन्तु अभिषुत्य हुत्वेति

गुणलोपनयश्च विकृतावेवोक्तः । सर्वशक्तिनयश्चाशक्याङ्ग-हानेन । शक्यं त्विदं होतरि अदृष्टार्थं वरणं स्वामिनि शङ्कित-मिति विधा ।

फलचमसो नैमित्तिको भक्षविकारः श्रुतिसंयोगात्

होतुः सोमभक्षापनयनवत् राजन्यस्यापीति चिन्तेयमिति सङ्गतिः । पूर्वपक्षः फलचमसो भक्षे निविशते न यागे । तमस्मै भक्षनिति भक्षसंबन्धेन विधेः । न चास्य यागे विधिः शक्यः, उत्पत्तिशिष्टे सोमे 'गुणश्चापूर्वसंयोगे' इति नयात् इज्यान्तरा-पत्तेः । भक्षे विकारोऽपि न स्यात् दूरे तस्मिन् यागे [विकारः] तथाहि—सोमेनैवायं याग इति सोमस्यैव भक्षणं प्रतिपत्तिः न द्रव्यान्तरान्वयः सौमिकभक्षस्य ।

राद्धान्तस्तु प्रतिपत्तिभूतभक्षान्वयानुपपत्तेरिज्याशेषतैव फल चमसस्य कल्प्या । न चावरोधदोषः । यदियाग मनूद्या न्यविधिः तदा गुणात्कर्मान्तरं स्यात् । तुल्यवदन्वये धीरोधात् । यागशेष-संस्कार-कार्यकणभक्षेणान्वयाद्यागविशेषे निवेशे मुखान्तरान्ना-वरोधः । फलचमसचमसौ भक्षं कुर्यादिति श्रुतेर्यथा सभक्ष्यो भवति तथा कार्यं यागशेषतया च स भक्ष्यो भवति इत्येवं यागनिवेशः ।

त्वानः समानकर्तृकताधीः समानकर्तृत्वं च[क्र]माङ्गित्वेनैकप्रयोगात् । तत्र च होमाभिषवयोः भक्षणाङ्गत्वेन विधिः भक्षस्य वा तदङ्गत्वेन । एव-मप्यप्राप्तान्वयपरत्वान्न भक्षान्तरविधिरित्यर्थः ।

राद्धान्तस्त्विति । न तावद्धोमाभिषवयोः भक्षाङ्गत्वेन विधिः होमस्य साक्षादेवापूर्वार्थत्वेनोत्पत्तेः । अभिषवस्यापि सोमसंस्कारद्वाराऽपूर्वार्थत्वात् तत्र प्रधानभूतस्य होमस्य स्वगुणलताप्रतिपत्तिरूपभक्षार्थत्वायोगात् अभिषवस्यापि सोमसंस्कारस्य भक्षशेषत्वायोगात् गुणानां च परार्थत्वादिति नयात् । नापि भक्षस्तौ प्रत्यङ्गम् । स्वभावत एव द्रव्यसंस्कारार्थस्यान्यार्थ-

न च भक्षान्तरविधिः प्रकृतप्रत्यभिज्ञानात्, अदृष्टार्थतापत्तेश्चेति स एव द्रव्यान्तरान्वयेनाप्राप्तेर्विधेयः, राजन्यादिनिमित्तके नित्यसोमबाधो न दोषः। भाष्ये यदुपक्रमे याजयेदितिश्रुतेर्यागे भक्षविधिरुक्तः। स न यागानुवादेन द्रव्यविधिमभिप्रेत्य, किंतूपक्रमोपि कार्यतो यागान्वयात् सुस्थो भवतीति, भक्षं कुर्यादित्युपसंहारात् भाष्ये।

लघ्व्यां तु यद्यप्युपक्रमे याजयेदित्युपक्रमतो यागान्वितभक्षान्वयमुखेन यागान्वयिताऽस्य भाति।

इह तु यागान्वयेऽवरोधदोषान्नोपक्रमादरः। राद्धान्तस्तु न कार्यतोऽन्वयेऽयं दोषः इत्येवं बृहत्यैवोक्तः; अधिकं तु, ननु भक्ष्यान्वयार्थो न भक्षविधिः भक्षान्तरापत्तेः। न च द्रव्यमेव भक्षे[1] विधेयं, प्रधानत्वात्। अतो न कार्यतोऽपि यागान्वयः।

मैवं, भक्षान्वयमुखेन यागे विधिः, भक्षान्वयो यागशेषतयैवास्तु, कार्यतोऽपि यागान्वयस्त्वेवं[2] संस्कारकार्यभक्षान्वय निमित्ततो यागेविधिः। भाष्येपि कथं भक्षसंबन्ध इत्यादाविदमुक्तम्।

त्वायोगात्। अतः श्रुत्यर्थविधानार्थं होमाभिषवसमानकर्तृकभक्षान्तरविधिरेवेत्यर्थः। नन्वेवमुभयनिमित्तकभक्षान्तरविधौ वाक्यभेदः स्यात्। प्रतिनिमित्तं नैमित्तिकभेदादित्यत्राह--इत्यर्थादिति। स्यादेतदेवम् यद्युभयोरपि पृथक् सप्तम्या निमित्तत्वं श्रुतं स्यात्। इह तु तत्समानकर्तृकभक्षविधानात् होमाभिषवयोर्निमित्तत्वमिति लाघवान्मिलितं निमित्तमित्युक्तं षष्ठे इत्यर्थः विवरणे तु पक्षान्तरविध्यर्थं विधेयान्तराभावः प्रपञ्चित इत्याह – लघ्व्यामिति। अयं भावः—हविर्धाने ग्रावभिरिति वाक्ये न तावद्विध्यन्तरप्राप्तेऽभिषवे हविर्धानं ग्रावाणो वा विधेयाः वचनान्तरप्राप्तत्वात्।

---

१. A भक्ष्यम्

२. B स्यैवं

अनुप्रसर्पिषु सामान्यात्

उक्ते राजन्यस्वामिनः सोमभक्षानङ्गत्वे फलचमसेऽपि भक्षानङ्गत्वमुत नेति चिन्तेयमिति संगतिः। पूर्वपक्षः। राजसूये राज्ञोऽधिकाराद्यजमानचमसे भक्षे प्राप्ते यदि "शतं ब्राह्मणा" इति विधिः स्यात्तदा ब्राह्मणविधेः राज्ञो निवृत्तिः स्यात्। दश-दशैकैकमिति विधौ संकलनया शतमित्यनुवादः। ब्राह्मणा इत्यपि ब्राह्मणभूम्ना लक्षणयाऽनुवाद इति राज्ञोऽपि भक्षः। अनुवादश्चायम्। अन्यथा चोदकावगतभक्षानुवादेनानेकगुण-विधेर्वाक्यभेदः स्यात्।

भट्टेनानु प्रसर्पेयुरित्येवं पठित्वा वाक्येऽस्मिन्निधिधीबल-मुक्तम्। भाष्ये न तथा पाठ इति गुरोरनादरः। न च दशदशे-त्यत्रापि वाक्यभेदाशङ्का। ये अनुप्रसर्पन्ति ते दशेति विधेः। किमनुप्रसर्पन्तीत्यपेक्षायां चमसमित्युद्देश्यनिविष्टं प्रसर्पणं च चोदकागतभक्षार्थंगतमिति[1] भक्षोऽपि लक्ष्यः। प्रत्युद्देश्यं दश-विधेर्दशदशेति वीप्साया अनुरोधात् नानादशविधिरिति वीप्सो-पपत्तिः। एकैकमित्यपि सवीप्सं प्राप्तमेव। राजन्यचमसे दशत्वम् एकजात्यवच्छेदादिति राजन्यदशत्वम्। भट्टैर्दशदशेत्यत्र वाक्य-

---

न च होमः, ऐन्द्रवायवादिवाक्यप्राप्तेः। नाप्याहवनीयः, अनारभ्य विधि-प्राप्तेः। न च प्रत्यक्परायणं वचनान्तरात् सदसि भक्षविधेरेवार्थप्राप्तेः न च होमाभिषवभक्षाणां क्रमो विधेयः अनेकक्रमविधौ वाक्यभेदापत्तेः अर्थ-प्राप्तत्वाच्च। अतो होमाभिषवसमानकर्तृकं भक्षान्तरमेव विधेयमिति।

प्रत्यक्षोपदेशाच्च। समाख्यानिमित्तं वषट्कारनिमित्तं होमाभिषव-निमित्तं च भक्षत्रयमस्तीत्युक्तम्। तत्रोपरितनं भक्षद्वयं किं चमसेषु नास्ति

---

१. भक्षादर्थंत इति

भेदहानमुक्तम् । चमसमिति द्वितीयान्तं केवलमुद्दिश्य विधिः तन्न दशेति न कर्तुः कर्मणाऽन्वयः येन कर्मोद्देश्यं स्यात् ।

राद्धान्तस्तु शतं ब्राह्मणा इत्यस्यानुवादत्वे ब्राह्मणशब्दे लक्षणा स्यात् । सिद्धे च अनुवादत्वे लक्षणा न दोषः, इह विधेरेव संभवः । ननु शतमित्यत्र विधौ दशदशेति न विधिः, समं स्यादिति नयात् शतविभागे एकैकत्र दशप्राप्तेरिति चोद्यमात्रं न पूर्वपक्षायालम् । अतोऽनुवादोऽप्ययं न लक्षणयेति युक्तः । न तु ब्राह्मणा इति लक्षणापत्तेश्चोद्यसमाधिः । एकैकत्र शतविधेर्नं विभागः ।

न च शतं ब्राह्मणाः सोमानित्यनेकगुणविधेर्वाक्यभेदः । अनेकगुणवतो भक्षान्तरस्य दृष्टार्थतया तत्कार्ये विधेः प्राकृतभक्षबाधोऽस्तु ।

गुरोरभ्युपेत्य वादोऽयम् कर्मान्तरविधानेनापीत्यपि शब्दाज्ज्ञातम् । तावतस्तु दशदशेति विधिपूर्वकः शतं ब्राह्मणा इति ब्राह्मणमात्रविधिः शतमित्यनुवादः संकलनया । ननु सोमानिति प्राप्तभक्षपरतया फलचमसेऽपि लक्षणा स्यात् । तन्न, सोमस्य प्रधानतया भक्षे न विधिरिति सिद्धेऽनुवादे लक्षणास्तु ।

लब्ध्यां शतविधौ समं स्यादिति नयादेकैकत्र दशदशप्राप्तिरिति ।

उतास्तीति चिन्ता । तत्रावान्तरसङ्गतिमाह—उक्तमिति । ननु होतुश्चमस इति होत्रादेश्चमससंबन्धित्वमात्रमवगम्यते । तच्चैकदेशचमसादपि इति तत्रापि होमाभिषवनिमित्तभक्षनिवेशसंभवात् कथं तद्व्यतिरिक्तग्रहादिषु निवेशशङ्केत्यत्राह—पूर्वपक्ष इति । विशेषसमाख्यास्वारस्यात् भक्षस्य भक्षव्याप्यत्वावगतेः कृत्स्नचमसे होत्राद्यन्वयात् चमसेभ्योऽन्यत्र ग्रहादौ सामान्यश्रुतहोमाभिषवनिमित्तको भक्ष । विशेषेण सामान्य(१)बाधनादित्यर्थः ।

अयं भावः—दशदशेति वीप्सा विध्यनर्हा न हि स्वरूपे अप्राप्ते तद्व्याप्तिविधिरिति वीप्सानुवादोपपत्तये शतमितिविधिर्मिलित इति समं स्यादिति नयः। अनेकगुणकभक्षान्तरविधिरयं प्राकृतकार्ये विधिरिति नोपेत्यवादः। एवमस्य मते दशदशेति वाक्यमनुवादः। सर्वपदानां श्रौतार्थतया प्रसर्पणमप्यर्थप्राप्तमिति प्रसर्पन्तीत्यपि श्रौतार्थं शक्यम्। शतं ब्राह्मणा इति न तथेति तत्र विधिरिति दिक्।

भाष्ये राजन्यचमसे राजन्या एव दशदश पूर्वपक्षे। तत्र केचिदाहुरिति परव्याख्योक्ता। यदि विप्रा राजन्यचमसे तदोच्छिष्टं न भक्षयेदिति। तद्भाष्ये दूषितम्। न सोमेनोच्छिष्टा इति श्रुतेः। तत्र चोद्यं ननु राजन्यभक्षः फलचमसः, तेनोच्छिष्टता तन्न सोमस्थानापत्तेः तद्धर्मोऽनुच्छिष्टत्वमत्रापि न च पुरुषधर्मोऽयं न क्रतोरिति न तत्स्थानापत्तिः, यतः क्रतावेव श्रुतेः क्रतुधर्मता। भट्टोक्तं फलकल्पनायां गौरवापत्तेः सोमभक्षविषयानुच्छिष्टत्वश्रुतिः क्रतुधर्म इति। यदि क्रतौ न श्रुतिः, तदेयं विधापि दुष्करा।

इति महोपाध्यायभवनाथमिश्र-
विरचिते मीमांसानयविवेके
तृतीयस्याध्यायस्य
पञ्चमः पादः।

राद्धान्तस्त्विति। होतृचमस इति परिसङ्ख्यात्वायोगात् अन्यनिमित्तकोभक्षश्चमसेऽपीत्यर्थः। नन्विति। भक्षस्य भक्षव्याप्यत्वबलात् कृत्स्नचमसान्वय एव होतुः समाख्याबलादवगम्यत इत्यर्थः। मैवमिति। न ह्यत्र समाख्या भक्षविधायिका किन्तु—

(एतावत्येव मातृका)

तृतीयोऽध्यायः

षष्ठः पादः

तत्सर्वार्थमप्रकरणात्

चिन्तिते आरभ्योक्ताङ्गे ततो जघन्यानारभ्योक्तचिन्ता। पादान्तरमनन्तरं च। पूर्वः पक्षः प्रकृतावारभ्य विहिताङ्गान्येव गृहीत्वोपकारः कल्प्यः न विलम्बितमनारभ्याधीतमपेक्ष्य। (विलम्बितं) अङ्गानुग्रहादङ्गेनान्वेतीति अनङ्गपर्णतादेः विकृताव्प्राप्तिः। स्रुगादेरङ्गतया प्राप्तिरिति जुह्वादिद्वारा पर्णतादेः प्रकृतिविकृत्योर्निवेशः। ननु प्रकृतिश्रुतजुह्वादावाशुधीरिति तद्द्वारा प्रकृत्यन्वये लब्धे न विलम्बितविकृत्यन्यविद्वारता। मैवम्।

वरदराजीये तृतीयाध्यायस्य षष्ठः पादः

तत्सर्वार्थमप्रकरणात्। अनारभ्य पर्णतादि समाम्नातम्। "यस्य पर्णमयी जुहूर्भवति"। "यस्य खादिरः स्रुवो भवति" इत्यादि। तत्र चिन्ता—किं पर्णतादि प्रकृतिविकृत्यर्थम् उत प्रकृत्यर्थमेवेति। तत्रार्थभेदोपाधेः पादभेदमानन्तर्यं चाह—चिन्तित इति। ननु प्रकृत्यर्थत्वे सति चोदकत एव विकृतौ प्राप्तेः कथं विकृत्यर्थतयापि विधिः द्विरुक्तिदोषादिति कथमुभयार्थताशङ्केत्यत्राह—पूर्वेति। स्यादेतदेवम् यदि प्रकृतावनारभ्याधीतमपि विलम्बितमपेक्ष्योपकारक्लृप्तिः स्यात्। सा तु शीघ्रभावीन्यारभ्याधीतान्येवाङ्गान्यपेक्ष्य कृतेत्यङ्गानुग्रहादेव अनारभ्याधीतं प्रकृतावन्वेतीत्यनारभ्य विधेः पूर्वभावित्वाच्चोदकस्य उपदेशानिदेशाभ्यां प्राप्तजुह्वादिद्वारा पर्णतादेरुभयार्थतया विधिर्युक्त इत्यर्थः। नन्विति। प्रकृतावाशुजुह्वादिधीः। विकृतौ तु चोदकापेक्षया विलम्बितेति शीघ्रद्वारेण कृतवन्वये सिद्धे किमिति विलम्बितविकृत्यन्वितद्वारकत्वान्वय इत्यर्थः। मैवमिति। जुहूशब्दस्य जुहू-

जुहूशब्दात् जुहूमात्रधिया यावज्जुहूमन्नियोगनिवेशो न सङ्कोचः ।

भाष्ये चोदकादनारभ्य विधिर्बलीयानिति यथोक्तपूर्वपक्ष-युक्तेरेव सामान्यतो दृष्टेन प्रकृत्यर्थता भाष्ये राद्धान्ताभासः । तन्निरासस्तु—नापूर्वीयरूपान्वयः सिद्धविषयत्वादनुमानादेः । प्रायदर्शनात्तु शब्दार्थनिर्णयः । शब्दमानसहायतयाऽस्य लोकतः सिद्धेः । अनुमा त्विह न निर्णयार्था । निर्णीतेप्युभयार्थत्वे शब्दतः प्रकृतिमात्रार्थतासितये अनैकान्त्याच्च नानुमेति भाष्ये उक्तम् ।

राद्धान्तस्तु विकृतौ स्रुवसंभवार्थं चोदकापेक्षश्चेदनारभ्य-विधिः—तर्हि पूर्वं प्रकृतावुपदेशापेक्षा । तदपेक्षायां हि विकृतौ

मात्रवाचिन उद्देशकत्वात् तन्मुखेन सकलजुहूमन्नियोग एव युक्तः । उद्देशा-विशेषात् उद्देश्यस्वरूपोपस्थापकप्रमाणविलम्बोऽकिञ्चित्कर इत्यर्थः । नन्वेवं कथं तर्हि भाष्ये चोदकादनारभ्य विधिर्बलीयान् सामान्यतो दृष्टेन च प्रकृत्यर्थतेति पक्षद्वयमुपन्यस्तमित्याशङ्क्य तदुपन्यासप्रयोजनं क्रमेणाह—भाष्य इति । कथं राद्धान्ताभासनिरास इत्यत्राह— तन्निरास इति । ननु यथा प्रायदर्शनेन शब्दार्थनिर्णयः तथा सामान्यतो दृष्टेनापि स्यादित्यत्राह—प्रायेति । प्रायदर्शनं तु शब्दमानसहायतया लोकसिद्धम् । अनुमा तु इह शब्दप्रमितविपरीतग्राहिणी निरपेक्षप्रमाणरूपा न सहायतायोग्येत्यर्थः । प्रायदर्शनमप्यत्र न, तिस्र आहुतीः आमनमस्यामनस्येति विकृतावपि संक्षे-पविस्तरोपदेशदर्शनात्; अनैकान्त्यं चानुमानपक्षे इत्याह—अनैकान्त्यादिति ।

राद्धान्तस्त्विति । अनारभ्य विधिर्हि विकृतौ स्रुवसंभवार्थं यदि चोद-कापेक्षस्तर्हि पूर्वं प्रकृतावनारभ्यविधिना उपदेशोऽपेक्ष्यः । प्रकृतावुपदेशे समाप्ते क्लृप्तोपकारग्रहणमुखेन विकृतौ धर्मप्राप्तिर्यत इत्यर्थः । ननु विलम्बितत्वादनारभ्याधीतस्य तद्वर्जमेव प्रकृतावारभ्याधीतैरुपकारकल्प-नेत्यत्राह—न चेति । सर्वैरेक उपकारः कल्प्य इत्येकादशोक्तेः अतिविल-म्बितं शाखान्तरीयमप्यङ्गं प्रतीक्ष्यैवोपकारकल्पना । किन्तु स्वशाखाया-मनारभ्याधीतम् अन्यथा एक प्रकरणेऽप्यतिसन्निहितकतिपयाङ्गैरेवोपकार-

क्लृप्तोपकारग्रहणमुखेन धर्मा इत्युपदेशसमाप्त्यर्थं प्रकृतावनारभ्यविधिनिवेशापेक्षयैव[1] प्रकृतावुपकारकल्पना । न चानारभ्यविध्यनपेक्षयैव प्रकृतावुपकारकल्पना; सर्वैरेकेतिकर्तव्यतेत्युक्तेः विलम्बिताङ्ग[2] प्रतीक्षयैवोपकारक्लृप्तिः । एवे चेदुपदेशेन प्राकृतेन स्वार्थं गृहीतोऽनारभ्य श्रुतः तदा विकृतिनिवेशार्थं स्रुवप्राप्तयेऽतिदेशमपेक्ष्य विधेयः कार्यत एव विकृतौ प्राप्तेर्न पुनर्विध्यवकाश इति द्विरुक्तेरसंभवात् इत्यद्विरुक्तत्वादिति सौत्रो हेतुः स्थितः । भट्टेन द्विरुक्तत्वादिति पाठे तव पक्षः, अद्विरुक्त-

---

कल्पनेति व्यवहितमङ्गान्तरमङ्गानुग्राहकमेव स्यात् । अथ ग्राहकेण न व्यवधिरिति ग्राहकगृहीतैः सर्वैरुपकारः तर्ह्यनारभ्याधीनमपि पदार्थमुखसन्निहितं ग्राहकेण स्वार्थं गृहीतमिति तेन सहैवोपकारकल्पनम् । ततश्च स्वप्रकृतिसंबन्धस्य तस्य विकृतौ कार्यत एव प्राप्तेर्न विकृतिनिवेशार्थं स्रुवप्राप्तयेऽनिदेशमपेक्ष्यानारभ्योपदेशविधिः । त्रिकालाप्राप्तविषयत्वाद्विधेः न पुनर्विध्यवकाशः इति अद्विरुक्तत्वादिति सिद्धः सौत्रो हेतुः । तदाह—एवं चेदिति । आचार्यैस्तु द्विरुक्तत्वादिति च सूत्रे पाठभेदमङ्गीकृत्य निर्वाहद्वयमुक्तम् तद्व्याख्यातृक्षमत्वमात्रेणेत्याह—भट्टेनेति । नन्वत्र भाष्ये यागसंबन्धित्वमेवेतिकर्तव्यता न पात्र संबन्धित्वमित्युक्तम् । तत् किमर्थमित्यत्राह—भाष्य इति । यद्यपि पात्राण्यप्यनारभ्यविधिलब्धप्रकृतिद्रव्यतया निराकाङ्क्षाणि तथापि यागार्थमवश्यं चोदकोऽपेक्ष्यः । ततश्च तेनैव प्राप्ते पर्णतादौ नानारभ्यविधिर्विधत्ते । विहिते विध्ययोगात् । ततश्च विकृतावनुवादस्स्यात् । न चैको विधिरनुवादश्च युक्त इति द्विरुक्तिदोषसाधनार्थं तदुक्तमित्यर्थः । ननु पर्णतोपदेशस्य विकृतिनिवेशार्थं तद्वजं प्राप्तिश्चोदकादस्त्वित्यत्राह—न चेति । चोदकस्याखण्डजनकवर्गप्रापकत्वादुपदेशस्य प्रकृतावपि चरितार्थत्वात् न तद्वानेनातिदेश इत्यर्थः ।

---

१. B R पेक्षा

२. ङ्गापेक्षयैव R B

त्वादिति पाठे मम पक्ष इति योज्यमित्युक्तम्। तत् व्याख्या क्षमत्वमात्रेण।

भाष्ये यागेनेतिकर्तव्यतान्वय इत्यपि द्विरुक्तिप्रसङ्गार्थम्। पात्रैर्यद्यन्वयः तदा पात्राण्य[1]नारभ्यविधिनैव प्रकृतिद्रव्यनिरा-काङ्क्षाणीति न चोदकः स्यात्। वैकृतयागार्थं त्ववश्यं चोदकः। तेन प्राप्तेरनारभ्यविधिः विहितेनेत्यनुवादः स्यात्। न चैको विधिश्चानुवादश्चेति न विकृतिनिवेशः। न च तन्निवेशार्थं पर्णतादिहानं, चोदकस्य स्वतः अखण्डोपकारजनकवर्गप्रापकत्वे विकृतिनिवेशं विनाप्यनारभ्यविध्युपपत्तेर्न हानम्।

लघ्व्यामिति। वस्तुवलात्प्रकृतावनपेक्षजुह्वादितः शीघ्रं निवेशे पुनर्विकृतौ चोदकापेक्षजुह्वादितो निवेशे विरम्य विधेर्व्यापारः स्यात्। स च नैकोपदेशस्य युक्त इत्यनपेक्षद्वारतः प्रकृतावेव निवेश इत्यर्थः। द्विरुक्तिः द्विर्व्यापार इत्यर्थः। एवं तर्हि वस्तुबलमते कथं पूर्वपक्ष इत्यत्राह—उपक्रमेति। नन्वेवं जयादेरपि प्रकृतावेव निवेशः स्यादित्याशङ्क्य मतद्वयसाधारण्य-माह—यस्त्विति। द्वारे चोदकापेक्षाभावादित्यर्थः। प्रयोजनं तु यदोपदेशेनैव प्रकृतिविकृत्यर्थमनारभ्याधीनं पर्णतादि तदा तदाश्रितानां गुणकामानाम् उभयत्र प्रवृत्तिः। उपदिष्टमात्रविषयत्वात्। यदा तु प्रकृत्यर्थमेव तदा तत्रैव गुणकामा इति। यदि पर्णताद्याश्रितगुणकामा न सन्ति तदा क्रत्वा भिन्ना। अथवा वरुणप्रघासे शमीमयतादि श्रुतम्। तत्र यद्युभयार्थं पर्णतादि, विकृतित्वेऽपि वरुणप्रघासे न निवेशः। आरभ्योक्तशमीमयत्वाव-रोधात्। पाञ्चदश्यावरुद्धायां प्रकृतौ साप्तदश्यस्येव। नापि वरुणप्रघास-विकृतौ। तत्रापि शमीमयत्वाद्यवरुद्धजुह्वादिप्राप्तेः पुनराम्नानवर्जित-विकृतिष्विव साप्तदश्यस्य। अतो वरुणप्रघासतद्विकृतिवर्जितविकृतिसुपर्ण-तादेर्निवेशः पूर्वपक्षे। राद्धान्ते तु केवलप्रकृत्यर्थस्य पर्णतादेः वरुणप्रघासे-

---

१. B पात्रान्वयो

लब्ध्यामेवं राद्धान्तः——प्रकृतावनपेक्षजुह्वादितो निवेशे पुनर्विकृतौ चोदकापेक्षजुह्वादितो निवेशे विरम्य द्विर्विधिरिति द्विरुक्तिः स्यादित्युपक्रममात्रं पूर्वः पक्षः । यस्त्वनारभ्याधीतोऽपि धर्मः साक्षाद्द्रव्याद्यागान्वयी जयहोमादिः[1] स प्रकृतिविकृत्योरस्तु ।

प्रकरणं विशेषात्तु विकृतौ विरोधि स्यात्

उक्तप्रकृतिनिवेशापवादात्संगतिः । पूर्वः पक्षः, प्रकृतावपि यत्पदार्थान्वय्यङ्गं तत्पदार्थान्वयमुखेनैवापूर्वेण गृह्यते । सन्निधिमात्रात्तद्ग्रहणे द्वादशोपसत्तापि सोमापूर्वेण गृह्येत । ननु सन्नपात्यपि सन्निधिमात्रादपूर्वार्थमिति नवमे स्थापितं; सत्यं द्वादशोपसत्ता प्रतिबन्धा तदिहाक्षिप्तम् । अतः साप्तदश्यपाञ्चदश्ययोः श्रुत्यैव सामिधेनी शेषत्वे तन्मुखेनापूर्वग्राह्यता न प्रकरणाच्छेदता, येन तदभावात्साप्तदश्यं न शेषः स्यात् ।

ऽतिदिष्टस्योपदिष्टशमीमयत्वादिना केवलमनुष्ठानमात्रं बाधितम् । न शेषत्वम् ततश्च तद्विकृतौ पर्णताशमीमयत्वे उभे अप्यतिदिष्टे विकल्प्यानुष्ठेयेति ।

प्रकरणाविरोधात्

अनारभ्य श्रुतं साप्तदश्यं—सप्तदश सामिधेनीरनुब्रूयात् इति । दर्शपूर्णमासयोः श्रुतम्—पञ्चदशसामिधेनीरनुब्रूयात् इति । तत्र चिन्ता—किं साप्तदश्यं प्रकृतिगामि उत विकृतिगामीति । तत्र चिन्तान्तरम्—किं पदार्थान्वयमुखेन ग्राहकग्रहणम् उत सन्निधिमात्रेणेति । तत्रावान्तरसङ्गतिमाह—उक्तेति । ननु सप्तमाद्ये सन्निधानात् ग्राहकग्रहणस्योक्तेः कथं पूर्वपक्ष इत्यत्राह—पूर्वेति । न हि सन्निधानमात्रात् ग्राहकग्रहणम् । किन्तु प्रकृतावपि येन पदार्थेन यस्याङ्गान्वयः तत्तत्पदार्थान्वयमुखेनैवापूर्वेण

---

१. R B जय होमवात्र

यदपि सप्तमाद्ये प्रकरणापेक्षया श्रुत्यादितः शेषत्वमुक्तम्, तद्ग्राहकाभिप्रायम्। ग्राहकं त्विह सामिधेनीमुखेन द्वयोस्तुल्यमिति द्विरुक्तेर्हानाय प्रकृतावेव साप्तदश्यमपीति विकल्पः।

राद्धान्तस्तु सन्निधेरेवात्रापि ग्रहणमपूर्वार्थस्य। द्वादशोपसत्ता तु विनियोगसन्निधिनाम्न सोमे। सापि ह्यहीनान्वयसन्निहितापूर्वंगृहीतैवापूर्वोयाहीनार्था। अहीनपदार्थान्वयाच्चायं सन्निधिराहतः। तदिह पाञ्चदश्येऽपूर्वसन्निधेरव्यपायादाशुग्रहः। साप्तदश्ये तु सामिधेन्यन्वयनिर्वाहायापूर्वग्रहो विलम्बित इति विरोध्याक्रान्ते शेषिणि न निवेशार्हमिति विकृतौ[1] निवेशने। ननु विकृतावपि सामिधेन्यर्थं चोदकप्रतीक्षा, चोदकतश्च पाञ्चदश्यमपि प्राप्तमिति तदवरोधस्तुल्यः।

मैवं यासु विकृतिषु पुनराम्नानं ग्राहकसन्निध्यर्थं, तास्वेव द्वारान्वयोऽनारभ्याधीतादिति दशमे वक्ष्यते तत्प्रपञ्चितं परैः।

गृह्यते। सप्तमाद्योक्तं च पदार्थानन्वय्यारादुपकारकविषयम्। अन्यथा द्वादशोपसत्ताया अपि सोमापूर्वग्रहः स्यादिति भावः। नन्विति। सन्निपातिष्वपि सन्निधानमात्राद् ग्राहकान्वयो नवमे स्थापित इत्यर्थः। सत्यमिति। सत्यं स्थापितं तदेव द्वादशोपसत्ताप्रतिबन्दी बलादत्राक्षिप्यत इत्यर्थः। निगमयति—अत इति। ननु सप्तमाद्ये प्रकरणसव्यपेक्षश्रुत्यादितः शेषत्वमुक्तम्। तत्कथं प्रकरणाभावे साप्तदश्यस्य शेषत्वमित्यत्राह - यदपीति। सत्यं श्रुत्यादयो ग्राहकलक्षणं प्रकरणमपेक्षन्ते न पुनर्विनियोजकम् असंयुक्तविषयत्वात् तस्य। तच्च ग्राहकलक्षणम् इह सामिधेनीमुखेन पाञ्चदश्यसाप्तदश्ययोस्तुल्यमिति पूर्ववत् द्विरुक्तिहानाय प्रकृतावेव साप्तदश्यमपि विकल्प्यानुष्ठेयमित्यर्थः।

राद्धान्तस्त्विति। सर्वशब्दानां कार्यान्वितस्वार्थाभिधानव्युत्पत्तेः प्रयोजनवत्सन्निधावप्रयोजनं तदर्थमिति प्रथमं सन्निधेरेव साधिकारेण

---

१. A adds

नानारभ्यविधिमाप्त्या सर्वास्वेव भविष्यति ।
पश्वादिव्यतिरिक्तासु पाञ्चदश्येन बाधनात् ॥
स्वाङ्गेन पाञ्चदश्येन व्याप्तास्ताह्यतिदेशतः ।
विहितं सामिधेन्यङ्गं साप्तदश्यं न गृह्यते ॥
सूत्रकारोऽपि विकृतौ विरोधीति यदब्रवीत् ।
प्रकृतौ नैतदस्तीति तदेतावद्विवक्षया ॥
सामिधेनीः प्रतिप्राप्तिस्तुल्या वाक्येन यद्यपि ।
विशेषः पाञ्चदश्यस्य क्रतौ प्रकरणेन तु ॥
अतो यद्यपि दौर्बल्यं वाक्यात्प्रकरणस्य नः ।
तथापि विषयान्यत्वात् क्रतौ तद्विनियोजकम् ॥
समानविषयत्वे हि वाक्यात्तद्दुर्बलं मतम् ।
क्रतौ त्वप्रतिपक्षत्वान्न तद्वाक्येन बाध्यते ॥

निरधिकारस्य ग्रहणम् । पश्चाद्द्वारान्वयः । अतः सन्निधेरेवात्रापि ग्रहणमपूर्वार्थस्य । नन्वेवं द्वादशोपसत्तायामपि प्रसङ्ग इत्यत्राह—द्वादशेति । नियोगसन्निधेर्विनियोगसन्धिर्बलवानित्यर्थः । ननु ग्राहकान्वये सति पश्चात् द्वारान्वय इति कथं तन्मुखेन ग्राहकान्वय इत्यत्राह—सापीति । द्वादशाहीनस्येति वाक्यश्रवणसमनन्तरमहीनान्वयप्रतीतेः अतस्तदन्वयसन्निहितापूर्वगृहीतैव द्वादशोपसत्ताऽपूर्वीया हीनयागार्थप्रमितेति ग्राहकान्वयपूर्वक एव द्वारान्वयः । मध्योदात्ताहीनपदबलादपि विनियोगसन्निधिरेवादृत इत्याह । अहीनेति । नन्वेकस्य सन्निधिः प्रकरणात् । अपरस्य तु विनियोगत इति द्वयोरपि विधिसन्निधिरविशिष्ट इत्यत्राह –तदिहेति । यद्यपि द्वयोरपि सन्निधिः तथापि पाञ्चदश्ये प्रकरणादपूर्वसन्निधेरव्यपायादाशुग्रहः । साप्तदश्ये तु प्रतीतसामिधेन्यन्वयनिर्वाहायापूर्वग्रहो विलम्बित इति न विलम्बितग्रह इत्यर्थः । नन्वेवं पर्णतापि विलम्बिनीति नापूर्वग्रहीता स्यादित्यत्राह—इति विरोधीति । शीघ्रभाविविरोधिधर्माक्रान्ते शेषिणि न विलम्बितविरोधिधर्मग्रहः । पर्णतायां तु न तथेति विलम्बिन्या अप्यपूर्वा-

विशेषश्चायमेवास्य यदसाधारणं क्रतौ ।
सामिधेनीषु तुल्येऽपि शेषत्वे वाक्यकल्पिते ॥
क्रतुं प्रत्यसमानत्वात्साप्तदश्यस्य बाधकम् ।
न श्रुत्याद्युपदेशेन नातिदेशे न तस्य तु ॥
एवं च प्रकृतावेतत्पाञ्चदश्यं प्रतिष्ठितम् ।
विकृतौ च न यत्रास्ति साप्तदश्यपुनःश्रुतिः ॥
प्रपञ्चेऽस्मिन्प्रकरणं विनियोजकमितिगुरुणा निरस्तम् ।
लघ्व्यां पर्णतैव न विकृतौ न प्रकृतौ न साप्तदश्यम् ॥

पर्णता हि सापेक्षतया निरस्ता । विकृतौ साप्तदश्यमपि प्रकृतावाशुनिविष्टपाञ्चदश्यस्य पाक्षिकत्वापेक्षित्वान्नेति[२] सिद्धान्तः ।

नैमित्तिकं तु प्रकृतौ तद्विकारस्संयोगविशेषात्

अस्यापि विकृतौ निवेशोऽस्त्वित्युत्थितेः सङ्गतिः । पूर्वः पक्षः । यद्यपि प्रकृतावाम्नानं प्रकृताविव विकृतावपि क्रत्वर्थ-

---

न्वयः । ग्रहणाग्रहणादौ न सन्निधितारतम्यमित्युभयोः तुल्यवद्ग्रहः । साप्तदश्ये तु प्रकृतेः विरोध्याक्रान्तत्वात् विकृतावेव निवेश इति भेदः । नन्विति । साप्तदश्यस्य विकृतिनिवेशेऽपि सामिधेन्यो मुखम् ताश्च चोदकवशेन पाञ्चदश्यावरुद्धा एव प्राप्ता इति विकृतावप्यवरोधस्तुल्य इत्यर्थः । मैवमिति । सत्यं विकृतावप्यवरोधः यासु तु विकृतिषु पुनराम्नानं ग्राहकसन्निध्यर्थं तासु विकृतिषु पाञ्चदश्ये बाधितेऽनवरोधान्निवेशः । न च वैयर्थ्यम् द्वारान्वयपरत्वादनारभ्यविधेः । यद्यप्युभयत्र द्वारसंबन्धोऽवगतः तथाप्युभयश्रुतावेकं ग्राहकसन्निध्यर्थम् अपरं द्वारान्वयपरमिति दशमे वक्ष्यत इत्यर्थः । अयमेवार्थं आचार्यैः प्रपञ्चित इत्याह—तदिति । अत्र यत्प्रकरणं क्रतौ विनियोजकमुक्तं तन्निरस्तं गुरुणेत्याह—प्रपञ्च इति ।

---

१. तुल्यत्वे
२. Aत्वापेक्षमिति

विरोधिता तथापि विकृतौ निवेशः। प्रकृतावुपदिष्टपोडायां वैगुण्यं स्यात्। यथोपदेशं हि प्रकृतौ कार्यम्। विकृतौ तु कार्य-सिद्धित एव साद्गुण्यं, पुरुषार्थेनापि कार्यसिद्धेः, न च दृष्टकार्य-सिद्धावपि नियमा दृष्टासिद्धेर्वैगुण्यं, तस्य पृथगकार्यत्वात्। विगुण क्रत्वाश्रितं च गोदोहनादीति विगुणस्याप्रयोज्यत्वादना-श्रयत्वं च स्यात् अन्यैरप्युक्तम्—

लघ्व्यामिति। पूर्वनयेन प्रकृतिगामित्वेन पूर्वपक्षयित्वा राद्धान्त उक्तः। यथा विकृतौ पर्णता न निविशते तथा प्रकृतौ साप्तदश्यमपीत्यर्थः। कथं तया साम्यमित्यत आह—पर्णतेति।

नैमित्तिकं तु प्रकृतौ

दर्शपूर्णमासयोः श्रुतम्—गोदोहनेन पशुकामस्य प्रणयेदिति। तथा सोमे राजन्यादिनिमित्तः फलचमसः। तत्र चिन्ता—किं विकृतौ निवेशः उत प्रकृताविति। तत्रावान्तरसङ्गतिमाह—अस्यापीति। न तु प्रकृताविदं श्रुतं, तत्कथं विकृत्यर्थता। अथ उपदिष्टचमसादिबाधहानाय विकृतौ निवेशः तर्हि विकृतावपि क्रत्वर्थबाधः समान इति कथं पूर्वपक्ष इत्यत्राह—पूर्वेति। सत्यमेवम् तथापि विकृतावेव निवेशो युक्त इत्यर्थः प्रकृतावुपदिष्ट-पोडायां वैगुण्यापत्तेः। ननु पोडायां समायामपि कथं वैगुण्यं प्रकृतावित्य-त्राह—यथेति। ननु दृष्टकार्यसिद्धावपि नियमा दृष्टासिद्धेः कथं न वैगुण्य-मित्यत्राह—न चेति। तस्य पृथक्कार्यत्वाभावात् तदसिद्धिर्न वैगुण्यापादि-केत्यर्थः। दोषान्तरमाह—विगुणेति। विगुणत्वे क्रतोः तस्याननुष्ठेयत्वादा-श्रयहीनतया गोदोहनादि न स्यादेवेत्यर्थः। आचार्यैरपीदमुक्तमित्याह—अन्यैरिति। राद्धान्त इति। स्यादेतदेवं यद्येकार्थेन काम्येन प्रकृतौ कार्ये कृते क्रत्वर्थमुपदिष्टं न बाध्यम्। तत्त्वावश्यकेन काम्येन बाध्यमेव। ननु उप-दिष्टबाधे वैगुण्यं स्यादित्यत्राह—बाधित इति। अन्यथा व्रीहिप्रयोगे यवबाधे वैगुण्यं स्यादिति भावः। ननु काम्येन कथं क्रत्वर्थबाध इति शङ्कते—कुत इति। परमतेनाह—काम्यत्वादिति। न तर्हीति। अयमव्याप्यत्वादसमाधिः

गुणाच्च न फलं सिद्ध्येद्विगुणक्रत्वपाश्रयात् ।
आश्रयस्तादृशो ह्रीष्टो यादृशः प्रकृतः क्रतुः ।।
खादिरत्वादिभिर्नित्यैः व्याप्तश्चासौ प्रतीयते ।
ततश्चानवरुद्धत्वात्काम्यस्य विकृतिर्गतिः ।।

राद्धान्तस्तु—प्रकृतावप्युपदिष्ट[1]-कार्ये काम्येन[2] कृते क्रत्वर्थं बाध्यम् । बाधिते चाप्रयुक्तेर्न क्रतोर्वैगुण्यम् । कुतः काम्येन क्रत्वर्थबाधः ? काम्यत्वादेवेति चेत् । काम्ये प्रवृत्तिरुत्कटेति ।

नैमित्तिकफलचमसस्याप्युदाहरणत्वात् तस्यैव च सूत्रे उदाहृतेः । ननु किमिति काम्यं भाष्ये उदाहृतमित्यत्राह—तुल्यतयेति । तदुक्तमाचार्यैरपी-त्यत्राह—परोऽपीति । सूत्रे नैमित्तिके श्रुतेऽपि यद्भाष्ये काम्यमेव विचारित-मिति योजनास्वरूपं परिहरति—व्यापीति । सामान्यविशेषन्यायेन विशेष-विहिते चमसादि बाध्यते पदादिव आहवनीय इति प्रकृतावेव काम्यन् नैमित्तिके । ननु अङ्गेनानित्येन कथमङ्गस्य नित्यस्य बाध इत्यत्राह—ताभ्यामिति । अङ्गभूतचमससोमयोः कार्यमनङ्गेन काम्येन नैमित्तिकेन च कृतमिति न तयोः प्रयुक्तिरित्यङ्गभूतयोरपि नित्ययोः बाध इत्यर्थः । एतदपि आचार्यैरुक्तमित्याह—परैरिति । यदप्यन्यैरुक्तं गोदोहनप्रयोगे चमसोऽनङ्गमेवेति तद्गुरुणाऽनङ्गीकृतमित्याह—यत्परेति । तत्र हेतुरङ्गत्वेति । श्रुत्यादिप्रमाणे सत्यपि कुतो नाङ्गत्वं, प्रमुक्तिस्तु नाङ्गत्वे हेतुरिति बहुधो-क्तेरप्रयुक्तेऽपि अङ्गत्वानपायाद् युक्तं चैतदित्याह—अत एवेति । ननु यदा-हवनीयनयगतार्थत्वात् नात्र व्युत्पाद्याधिक्यमित्यत्राह—न चेति ।

लभ्यामिति । नैमित्तिकमपि गोदोहनादि उपदिष्टचमसादि बाधा-पेक्षत्वहानाय विकृतौ निविष्टमिति पूर्वपक्षिते राद्धान्त उक्तः । निमित्ततो गोदोहनादि विषयान्तरे न चमसादिबाधापेक्षं प्रकृतौ निमित्ततो गोदोहना-देर्विहितत्वात् । तत्र चमसाप्राप्तेर्न तद्बाधापेक्षा, विषयभेदादित्यर्थः । प्रत्युत

---

१. उद्दिष्ट
२. दृष्टे काम्येन

न तर्हि फलचमसेन सोमबाधः। नैमित्तिकमेव सूत्रोदाहृतम्। तुल्यतया तु काम्यनिवेश इति व्याप्तिहेतुर्वक्तव्यः। परोऽप्याह नैमित्तिके श्रुते यच्च काम्यमेव विचारितम्।

तन्नित्यं प्रति तुल्यत्वादविरोधात्परस्परम्। व्याप्त्यु [पीत्यु] च्यने पशुकामराजन्यादिविषयो विशेषोपदेशः सामान्योपदेशादिष्टिसोमाधिकृतविषयात् पदाहवनीयवद्बलीयानितिप्रकृतावेव

विकृतावेव सापेक्षतेत्यत्राह—प्रत्युतेति। प्रणयनाश्रितगोदोहनविधेराश्रयभूतगुणप्रणयनार्थं चोदकापेक्षत्वादित्यर्थः।

इष्ट्यर्थमग्न्याधेयं प्रकरणात्

आधानपवमानेष्ट्यात्मकद्वयमुदाहरणम्—किं द्वयमपि नाग्न्यर्थमुताग्न्यर्थमिति। तत्र सङ्गती आह—यत्प्रकृतीति। ननु अग्नी नादधीतेति द्वितीयाश्रुतिबलादग्न्यर्थमाधानम्। इष्टीनामप्यग्निप्रकरणादग्न्यर्थता। तत्कथं पूर्वपक्ष इत्यत्राह—पूर्वेति। इष्ट्याधानात्मकं द्वयमपि नाग्न्यर्थम्। श्रुत्यादौ सत्यपि किं विनियुक्ताग्न्यर्थता आधानादेः उताविनियुक्ताग्न्यर्थता। न तावदाद्य इत्याह—विनियुक्त इति। पर्णतावदङ्गत्वापत्तेर्ग्रन्थेप्रयाजादिवदुपलक्षणं शङ्कते। अस्त्विति। नेति। अलौकिकस्याहवनीयादेरुत्पत्तेः प्रागबोधान्न विनियुक्तता। न च तद्द्वारा आधानादेरङ्गतापीत्यर्थः। न द्वितीय इत्याह—[अ] विनीति। तथा सत्यग्नीनामकार्यत्वाच्छेषितैवायुक्तेत्यर्थः। नन्वेवं सति कथमनयोः प्रयोजनरूपकार्यावसायितेत्यत्राह—इति स्थित इति। तर्हि द्वयोरप्यधिकारकल्पनेत्यत्राह—एकत्रेति। नन्वेवमपि विशेषाग्रहादुभयत्र स्यादित्यत्राह—तत्रापीति। लाघवादेकत्र कल्प्ये भूयस्त्वन्यायेनेष्टिष्वेव कल्प्येतेत्यर्थः। ननु सन्निपातितया साक्षादुपकारजनकस्य द्रव्यसंस्कारस्याधानस्य कथमिष्ट्यर्थतेत्यत्राह—तात्पर्यमिति। भवतु वा यथाकथञ्चिदङ्गतोपपत्तिः मा वा न तत्रास्यापूर्वपक्षिणः। किन्तु अग्न्यर्थता द्वयोरपि नास्तीति। नन्वत्र भाष्ये प्रकरणादिष्टीनामित्युक्तम्। तत्कथं? निरधिकारत्वात्तासामित्यत्राह—भाष्य इति। राद्धान्त इति। न तावत् द्वयोरप्यधिकारश्रुतिरस्ति। न च तत्कल्पनापि। द्वयोरपि द्वितीया

काम्यनैमित्तिके स्याताम् । ताभ्यामेव कार्यसिद्धौ न स्वाङ्ग नित्ये प्रयुक्तिः । परोऽप्याह—

प्रासङ्गिकीं क्रतोः सिद्धिं काम्योऽपि कुरुते गुणः ।
गृह्णन्ति न च सिद्धार्थाः क्रतवः स्वगुणं तदा ॥
सर्वस्यैव हि कार्यार्थः स्वगुणग्रहणादरः ।
अन्यार्थगुणसिद्धे तु कार्येऽस्य स्वगुणेन किम् ॥

श्रुत्या प्रकरणेन च प्रयोजनरूपाग्न्यर्थतावगतेः । न चानुपपत्तिः अग्नीनां भाविविनियोगप्रतिसन्धेरपि शेषित्वक्लृप्तेः । इष्ट्याधानयोस्तु न तथा भाविप्रतिसन्धिरपीति तयोरग्न्यर्थत्वमिति भावः । ननु वारणनयेऽप्यग्न्यर्थत्वं सन्धितमिति पुनरुक्तिः इत्यत्राह—स्थित इति ।

लब्ध्यामिति । वारणनये द्वयोरप्यग्न्यर्थत्वे सिद्धेऽपि यदत्रेष्ट्यर्थमाधानमिति शङ्कितम् तदिष्टेरग्न्यर्थत्वमेव दृढमिति वक्तुम् । एवं च शङ्कामात्रं पूर्वपक्ष इत्यर्थः । कथमग्न्यर्थत्वदार्ढ्याय शङ्कामात्रमेतदिति ज्ञातमित्यत्राह—भाष्य इति ।

तत्प्रकृत्यर्थं यथान्येऽनारभ्यवादाः

इष्ट्याधानद्वयमग्न्यर्थमुक्तम् तत् प्रकृत्यर्थमुत नेति । ननु प्रकृत्यर्थताचिन्तारूपमिदं पूर्वनयात्पूर्वमेव युक्तमित्यत्राह—उक्त इति । अग्न्यर्थतापेक्षित्वादित्यर्थः । नन्वप्रकरणाधीतस्य कथं प्रकृत्यर्थताशङ्का ? तत्राह—पूर्वेति । अनारभ्याधीतमप्याधानादि पर्णतावत् प्रकृतिक्रत्वर्थाग्न्यन्वयमुखेन प्रकृत्यर्थमेव । नन्वग्नीनां प्रकृत्यर्थत्वे स्यादेवम् तदेव कुत इत्यत्राह—अग्नय इति । यदाहवनीये जुहोतीत्यनारभ्यविहिताग्नयोऽपि होमद्वारा प्रकृत्यर्थाः अद्भिरुक्तेः इत्याधानमप्यग्निद्वारा प्रकृत्यर्थम् । नन्विति । अलौकिकत्वादग्नीनां उत्पादकाधानान्वयपूर्वकमेव क्रतौ विनियोगात् क्रत्वर्थत्वम् । न तु क्रत्वर्थत्वे सति अग्नीनामाधानान्वय इत्यर्थः । मैवमिति । यथा भाविविनियोगप्रतिसन्धेरग्नीनां शेषिता, तथा क्रतावाधाननिवेशद्वारताप्यस्त्वित्यर्थः ।

हविः संयवनार्थानामपां प्रणयनं हि यत् ।
तद्गृहीत्वा गुणः काम्यः प्रयुङ्क्ते न क्रियान्तरम् ॥

यत्परोक्तं गोदोहनप्रयोगे चमसोऽनङ्गमिति न तद्धाने वैगुण्यम् । तदुक्तम्—

ततश्चास्य प्रयोगस्य नैवाङ्गं चमसो मतः ।
तदग्रहे क्रतोर्येन वैगुण्यात्तु क्रियेत सः ॥

इति । न तत् गुरोर्मतम् । अङ्गत्वमाने सत्यप्यप्रयुक्तेः

राद्धान्त इति । आहिताग्नेर्हि क्रतुष्वधिकारः नाधिकृतस्याग्नयः । अतो लोहसुवर्णादिवत् क्रतोर्बहिरेवार्जनम् । न तु हन्त्यादिवत् प्रयोगमध्ये क्रतुविधिना प्रयुक्तिः । ननु शक्तस्यैवाधिकारो नाहिताग्नेरित्यत्राह—आहिताग्नेरिति । शक्तिवदग्निविद्ययोरधिकारिविशेषणत्वमत एव न क्रतुमध्ये विद्याप्रयुक्तिरित्यर्थः । नन्वेवमग्निमतोऽधिकारः तथापि किमित्यत्राह—प्रागिति । आधानादग्न्युत्पत्तेः प्रागधिकारासिद्धेः अनधिकारतया विधेरनुत्कटत्वेनाग्राहकतया न ग्राहकान्वयसिद्धिरिति अग्नीनामपि नाङ्गत्वम् । न च तन्मुखं पर्णतादिवदाधानस्य प्रकृत्यर्थत्वमपि । यूपधर्माणां तु प्रकरणाधीतत्वात् ग्राहकगृहीततया विनियुक्तखदिरसंस्कारतयैव विधिः यूपस्यापि प्रकरणाधीतस्य अपूर्वगृहीतस्यालौकिकत्वेपि क्रतुमध्यप्रयोज्यतया प्रयोगापवर्गितैव ऋत्विक्त्वस्यैवेति अग्निवैषम्यं वेद्यम् । आचार्यैरप्येतदुक्तमित्याह—परोऽपीति । ननु भाव्यङ्गत्वप्रतिसंहि[धि]तः शेषित्ववत् तत एवाग्नीनां ग्राहकापूर्वार्थत्वद्वारताप्यस्त्यत्राह—भावीति । ग्राहकान्वये भावि प्रतिसन्धिरगत्या । इह त्वग्न्यर्थत्वे नास्ति गतिः । अग्नीनां शब्दबलावगत साध्यत्वानामलौकिकार्थतया ग्राहकत्वोपपत्तेः । स्वतः सन्निहितस्य विध्यन्तरस्याभावात् । जुह्वादेस्तु [अ]लौकिकस्य (न) पर्णताग्राहकताप्रतिसन्धिनिरपेक्षमेव पर्णतान्वयात् पूर्वमेव च ग्राहकान्वयादङ्गत्वात् तन्मुखेन पर्णतादेः क्रलङ्गत्वोपपत्तेः । इह तु न तथेत्याधानस्याग्निमात्रार्थतैव । प्रयोजकत्वं तु नाग्नीनां कामश्रुतेरेवाग्निप्रयुक्त्याऽऽधानप्रयोजकत्वमिति चतुर्थे वक्ष्यते । अतो न ग्राहकान्वये प्रतिसन्धिरित्यर्थः ।

नानङ्गत्वम् । 'न प्रयुक्तिरङ्गत्वे हेतुरिति बहुधोक्तम् । अतएव प्रसङ्ग्य[1] प्रयुक्तमपि तदङ्गम् । न च पदाहवनीयनयगतार्थता, क्रतौ हि भेदे सति स नयः । इहैकत्रैव क्रतौ प्रयत्नाधिक्यम् ।

लब्ध्यां—उपदिष्टचमसादिबाधापेक्षत्वहानाय विकृतौ निवेशे; राद्धान्तः निमित्ततो गोदोहनादि विषयान्तरे न चमसादिबाधापेक्षं प्रकृतौ प्रत्युत विकृतौ चोदकतः प्राप्तप्रणयनापेक्षेति प्रकृतावेव निवेशः ।

ननु किमित्याहिताग्नेरेवाधिकार इत्यत्राह—आहिताग्नेरिति । आधाने वसन्तविधेर्विध्यनुवादवैरूप्यापत्तेरपि न क्रत्वङ्गत्वमित्याह—एवमिति । सविस्तरस्य प्रयोगमध्ये प्रयोक्तुमशक्तेरपि सुवर्णादिवत् क्रतोर्बहिरार्जनमित्याह—क्रत्विति । नन्वाधानस्याक्रत्वङ्गत्वे कथं भाष्ये सर्वक्रत्वर्थतोक्तिरित्यत्राह—सर्वेति ।

लब्ध्यामिति । ननु प्रकृतिविकृत्यर्थताचिन्तेयं मन्दफला । तथाहि—आधानं तावत् अग्न्यर्थमिति पूर्वनयसिद्धम् । अथाग्निद्वारा प्रकृतिविकृत्यर्थता चिन्त्येति चेन्न, अग्नयो यदर्थास्तदर्थमाधानमपि (तदर्थमेव) । अग्नेश्चानारभ्याधीतत्वात् प्रकृत्यर्थतैवेति दर्शितं पादाद्ये । तत्किमियं चिन्तेत्याक्षिप्य समाहितम्—सत्यमग्न्यर्थत्वमुक्तम् तदेवाधिकारान्वयमूलकम् नियोगगर्भत्वात् सर्वविनियोगानां साक्षात् कार्ये तदीये वा विनियोगो भवति अग्निस्वरूपान्वये तन्मूलकत्वायोगात् तत्र किं नियोगगर्भमिति युक्तैव चिन्ता । तत्र पूर्वपक्षमाह—इति प्रकृत्यर्थेति । नन्वेवं प्रकृत्यपूर्वार्था अग्नय इत्यधिकृतस्याग्नयः स्युः नाग्निमतोऽधिकार इत्यत्राह—आहिताग्नेरिति ।

राद्धान्त इति । अग्निस्वरूप एवाधानस्य शेषता न क्रत्वीयावस्थे, आधानेनोत्पत्तेः प्राक् क्रतुसंबन्धसिद्धेरिति बृहत्युक्तयुक्तेरित्यर्थः । यदि न क्रत्वीयावस्थाग्न्यर्थताऽऽधानस्य कथं तर्ह्यपूर्वमूलत्वमित्यत्राह—अपूर्वेति । अग्नीनां भाव्यपूर्वान्वयप्रतिसन्धेः तदीयावस्थतयाऽग्न्यर्थत्वात् भाव्यपूर्वार्था-

---

१. A R प्रसंगप्रयुक्तमपि

इष्ट्यर्थमग्न्याधेयं प्रकरणात्

यत् प्रकृतिविकृत्यनिवेशि तच्छेषत्वचिन्तेदानीमिति सङ्गतिः। पूर्वपक्षः इष्ट्याधानात्मकं द्वयमपि नाग्न्यर्थं विनियुक्ताग्न्यर्थत्वे पर्णतादिवदङ्गतापत्तेः। अस्त्विति चेन्न। अलौकिकस्वरूपाहवनीयाद्यर्थानवबोधान्नाङ्गत्वम्। अविनियुक्ताग्नयस्त्वकार्यतया न सक्तुवच्छेषिण इति स्थिते; [1]एकत्राधिकारः कल्प्यः। यदि इष्टिषु ताः प्रधानम्। अथाधाने तत्प्रधानम्। एकत्र च क्लृप्ते अङ्गाङ्गित्वाद् द्वयानुष्ठाने द्वयोर्न कल्प्यः। तत्रापीष्टेरङ्ग-

---

ग्निद्वाराऽपूर्वमूलकं शेषत्वं फलत इत्यर्थः। नन्वस्मिन् मते आधानं नियोगविषयः तत्कथं अग्न्यर्थं नानासाध्यत्वायोगादिति शङ्का दिक्पदनिवर्त्या। निवृत्तिस्तु यद्यपि द्वितीया श्रुतेः प्रथममग्निसाध्यताधीः तथाप्यनारभ्याधीततया क्रत्वीयाग्निनियोगप्रत्यभिज्ञानायोगात् प्रागाधानं नियोगविषयः। ततश्च विधिपर्यवसानायाधिकारापेक्षायां प्रतीताग्निसाध्यता निर्वाहायाग्न्यर्थिन एवाधिकार इति अधिकारिविशेषणतयाऽनुगुणसाध्यत्वान्न साध्यान्तरताऽध्ययनविधावर्थज्ञानवत्। न चात्र नियोज्यापेक्षा कामश्रुतिभिरेवाग्निष्वाधानप्रयुक्तेरिति ध्येयम्।

तासामग्निः प्रकृतितः प्रयाजवत्

तदेवेष्ट्याधानद्वयं किं विकृतावतिदिश्यते नेति चिन्ता। किमुपदेशवद्यावदुपकारकमतिदेशः उत यावदङ्गमिति। तत्रोपदेशातिदेशयोः विशेषकथनात् पूर्वषट्कसङ्गतिरिति स्फोरयिष्यते। अनारभ्याधीतचिन्तात्वादेवाध्यायावान्तरसङ्गती आह—आधानमिति। ननु अङ्गानामेवातिदेशान् कथमनङ्गपवमानेष्ट्यादेरतिदेशाद्विकृत्यर्थताशङ्केत्यत्राह—पूर्वं इति। न हि अङ्गत्वादतिदेशः किन्तूपकारान्वयात्। तदन्वयश्चोपकारकमात्रस्यानङ्गानामपि परंपरयोपकारसंबन्धादिति पवमानेष्टिप्रभृतिषु पवमानेष्टीनामप्यतिदेशात् तत्संस्कृतेऽग्नौ सेष्टिरित्यर्थः। नन्वेकस्या इष्टेः

---

१. A R एकाधिकारकल्पः सः

बाहुल्यादनन्यनिष्ठत्वाच्च प्राधान्यधीः भूयस्त्वेनोभयश्रुतीति नयात् ।

इष्टिष्वेव कल्प्यः तदङ्गमाधानमस्तु । तात्पर्यं त्वग्न्यर्थता द्वयोरपि नेति । भाष्ये तु यदिष्ट्यर्थमाधानं प्रकरणादित्युक्तं तत्कल्प्याधिकारादेव साधिकारत्वेन, [1]न त्विष्टेरधिकारश्रुतेः ।

राद्धान्तस्तु—द्वयोरधिकाराश्रुतेरग्न्यर्थत्वोपपत्तेश्च द्वयोरग्न्यर्थता । यद्यप्यग्रे नाग्नीनां विनियोगधीः तथापि भावितद्वोः प्रतिसन्धेरग्नीनां शेषित्वं (विनियोगात्) क्लृप्तम् । भावि-प्रति

एकमेवाग्निं प्रति कार्यकारणत्वं विरुद्धमित्यत्राह—न चेति । तत्र हेतुः-यत इति । कथं तर्हि पूर्वपक्षे तन्निर्वाह इत्यत्राह—पूर्वेति । विरोधादिष्टौ बाध्यताम् । व्यक्तिभेदाद्वाकार्यकारणतास्तु न तत्रास्थेत्यर्थः । ननु यद्यत्रानास्था क्व तर्हि आस्थेत्यत्राह—किन्त्विति । यथोपदेशाङ्गीकारः तथाऽतिदेशोऽपीत्युपदेशातिदेशमात्रे तात्पर्यम् । ततश्च विकृत्यन्तरे पवमानेष्टीनामप्यतिदेशः फलमित्यर्थः । राद्धान्त इति । अङ्गमात्रमेवातिदिश्यते नानङ्गमपि, कुत इत्यत्राह—अङ्गैरिति । विकृतौ हि प्रकृतिक्लृप्तोपकारक्रमग्रहः । न चानवच्छिन्नस्य कल्पनायोगात् जन्यस्वभावस्य जनकावच्छेद्यतया जनकभूताङ्गावच्छिन्न एव कल्प्यः । ततश्च विकृतावङ्गव्यतिरेकेणोपकारबुद्धययोगात् तद्बुद्धयन्तर्भूतमेवाङ्गजातं जातिप्रतीतौ व्यक्तिरिवेत्युपकारापर्यवसानबलादङ्गजातमेवातिदिष्टं नानङ्गमपीत्यर्थः । उपदेशस्तु नैवमित्याह—उपेति । नन्विति । अनङ्गानामनतिदेशेऽपि आक्षेपात् प्राप्तिरस्तीति विफलेयं चिन्तेत्यर्थः । मैवमिति । अतिदेशे हि अतिदिष्टानामङ्गत्वात् स्वाङ्गेष्टिजन्याग्निषु विकृतय इति तत्प्रयोगापवर्ग्यत्वमग्नीनां स्यादिति सफला चिन्तेत्यर्थः । यत एवोपदेशातिदेशविवेकफलेयं चिन्ता अत एवोपदेशलक्षण इयं चिन्तेत्याह - उपदेशादिति । अन्यथा दोषमाह—यदिति । विवेकपरत्वे वा कथमगतार्थतेत्यत्राह—तत्रेति । नन्वेवं किमिति पवमानेष्टिरुदाहृता भाष्ये तत्राह—अग्नीति ।

---

१. अल्पेष्वनधिकारश्रुतेः

सन्धिरपि न सक्तुष्विति भेदः। स्थिते चात्र द्वयोरग्न्यर्थत्वे श्रुतेर्द्रुतिमाधानमग्न्यर्थमितितदङ्गतयेष्टेरग्न्यर्थत्वशङ्का वारणनयनिरस्तेति गुरुः ! लब्ध्यां स्थिते द्वयोरप्यग्न्यर्थत्वे इष्ट्यर्थमाधानमिति शङ्का यदिष्टेरग्न्यर्थत्वमेव दृढमित्येव वक्तुम्। भाष्ये कथमिष्टेरग्न्यर्थतेति प्रश्नादिष्टीनामग्न्यधिकफलाभावोक्तेश्च।

तत्प्रकृत्यर्थं यथाऽन्येनारभ्यवादाः

उक्ते अग्न्यर्थत्वे किमग्निद्वारा प्रकृत्यर्थमप्याधानम् उत नेति चिन्तेयमिति संगतिः पूर्वःपक्षः-पर्णतादिवत्क्रत्वर्थाग्नीनामाधानं। अग्नयश्चानारभ्याधीताः प्रकृत्यर्था एव। अद्विरुक्तेरित्याधानमप्यग्निद्वारा प्रकृत्यर्थम्। नन्वलौकिकाहवनीयाद्यर्थानवबोधा-

---

लब्ध्यामिति। ननु वारणनयेऽप्यग्न्यर्थत्वमिष्टेरुक्तम्। तत्कथमिष्टाविष्टिप्राप्तिशङ्केति शङ्कित्वा उत्तरम्—सत्यमेवाग्न्यर्थत्वमुक्तम् तच्चोदकागताग्न्यर्थत्वमेव। प्रकृतौ च संस्कृताग्नेरङ्गत्वादिष्टिसंस्कार्याग्नेश्चोदकतः प्राप्तिरिति तत्संस्कारार्थं पवमानेष्टिष्वपि पवमेनेष्टिप्राप्तिर्युक्तेत्यर्थः। नन्वेवमपि इष्टावपीष्टिप्राप्तावनवस्थेत्यत्राह—न चेति। यावत्पौर्णमासीकालमावृत्तिरस्त्वित्यर्थः। पूर्वकालत्वाभावे यथाशक्ति वाच्यव्यवस्था तथा तावदतिदेशो नास्तीति भावः। अङ्गस्यैवातिदेशो नानङ्गस्येति बृहत्युक्त एव राद्धान्त इत्याह—राद्धान्त इति। ननु पवमानेष्टेरपि होमत्वादनारभ्योपदेशत एवाग्निप्राप्तिः नातिदेशादित्यत्राह—न त्विति। निरपेक्षहोमेष्वाहवनीयोपदेशः। न सापेक्ष होमेष्वित्यर्थः। चोदकागताग्नेः कथमिष्टेः संस्कार्यतेत्यत्राह—चोदकेति। उपदेशातिदेशाभ्यां संस्कार्यतेत्यर्थः।

तुल्यः सर्वेषां पशुविधिः

सन्ति सोमे पशवः अग्नीषोमीयसवनीयानुबन्ध्याः। सन्ति च पशुधर्माः पशुं विशास्तीत्यादयः। तत्र चिन्ता—किं ते सर्वपश्वर्थाः किं वा अग्नीषोमीयार्थाः। आहो स्विदग्नीषोमीयार्थाः सवनीयार्थाः उताग्नीषोमीयसवनीयोभयार्थाः।

दुत्पादकाधानाद्यन्वयपूर्वकमग्नीनां क्रत्वर्थत्वं न तु क्रत्वर्थाग्न्यन्वय्याधानम् । मैवं, भाष्यङ्गत्वप्रतिसन्धेः शेषित्ववत् आधाननिवेशद्वारताप्यस्तु । राद्धान्तस्तु, आहिताग्नेः क्रतुष्वधिकारः । न चेह हन्त्यादेरिव[1] क्रतुना प्रयुक्तिरग्नीनाम् । अतो लोहसुवर्णादिवत् बहिरार्जनम् । [2]अर्जिताग्नेः शक्तस्य च क्रतुष्वधिकारः । प्राक् ग्राहकान्वयासिद्धेः नाङ्गत्वमिति न तन्मुखेन पर्णतावदाधानं प्रकृतेः । परोऽप्याह—

स्थितेऽङ्गत्वे ततस्तेषां प्रकृत्यर्थत्वचिन्तनम् ।
न तु कर्माङ्गभावेऽस्य प्रमाणं किञ्चिदस्ति ते ।।

एवेति । ननु कथं पशुधर्मचिन्तायाः पूर्वानन्तरं प्रसङ्ग इत्यत्राह—उक्त इति । तत्र पूर्वोत्तरपक्षोक्तिसौकर्याय विषयस्थितिमाह—इहेयमिति । औपवसथ्यं सौत्यं च पूर्वापरे अहनी स्तः । तत्र पूर्वस्मिन् दक्षस्याग्नीषोमीयस्य क्रमे पशुधर्म्माम्नानं परस्मिन् प्रधानादिकं सवनीयस्य तूभयत्र श्रुतिः । तत्र क्व सवनीयविधिः क्व वा तद्गुणविध्यर्थतेत्यत्रैव चिन्त्यमिति । ननु औपवसथ्ये सवनीयाग्नीषोमीयोभयसन्निधेः तदहश्रुतधर्माणामुभयार्थतैवोचितेति कथं सर्वार्थत्वपक्ष इत्यत्राह—पूर्वपक्ष इति । यद्यप्यौपवसथ्ये धर्माम्नानं तथापि पशूद्देशेन श्रुत्या धर्मविधेः पशुशब्दस्योद्देशकतया व्यक्तिवाचकतया च सन्निहितपरत्वात् सर्वेषां च सोमप्रकरणसन्निहितत्वात् तदुद्देशात् सर्वपशूनां धर्माः । यथेति । सम्मार्गाद्यङ्गजातं प्रातस्सवनश्रुतमपि । यथा सवनत्रयग्रहार्थं तथा पशुधर्मा अपीत्यर्थः । पक्षान्तरमिति । सन्निध्यतिशयात् सवनीयधर्माः पूर्वाह्णे सवनीयस्य धर्माणां च श्रुतेः । ग्रहधर्मवैषम्यमाह—संमार्ग इति । ग्रहधर्माः ग्राहकीयाः तदाकारतया सन्निहितग्रहमात्रार्थाः । पशुधर्मास्तु न ग्राहकीया इति न तथेति भेद इत्यर्थः । विवरणोक्तं ग्रहवैषम्यमाह—किञ्चेति । पक्षान्तरमिति । यदि सन्निधानात् सवनीयमात्रार्थता तर्हि क्रमाख्यसन्निधेर्दक्षार्थतापीत्यर्थः ।

---

१. A न चेहावहन्त्यादीनामिव

२. A आहिताग्नेः

भावि प्रतिसन्धिश्चागत्या। इह त्वग्न्यर्थत्वेऽस्ति गतिः। आहिताग्नेश्च यथाधिकारस्तथा षष्ठे वक्ष्यते। एतं च वसन्तादिविधिराधाने सुस्थः। अङ्गत्वे तु अङ्गानां मुख्यकालत्वे (सोमे) अस्य वसन्तादि श्रुतिरनुवादः सोमे वसन्तविधेः। इष्टेश्च वसन्तेऽनुष्ठानेऽनुवादः कालान्तरानुष्ठाने विधिः न चैको विधिरनुवादश्च वैषम्यापत्तेः। अनङ्गत्वे तु स्वकालप्रयुक्ताधानविधिरेव। क्रतुप्रयोगकाले चाधिकृतेनाधानस्य सविस्तरस्य प्रयोक्तुमशक्तिरिति सुवर्णादिवत् बहिरार्जनमेव युक्तम्। सर्वार्थत्वं चाधानस्य सर्वार्थाग्न्यर्थतया परम्परया सर्वोपकारकत्वात्।

राद्धान्तस्त्विति। क्रमरूपसन्निधेर्दैक्षार्थतैव धर्माणां न सवनीयार्थता। यत्र धर्माम्नानं तत्र सवनीयस्यासन्निधेः यद्यपि पूर्वाह्णे आग्नेयः पशुरग्निष्टोम आलभ्यत इति सवनीयस्य श्रुतिः तथापि न तत्र सवनीयविधिः। किन्तु वपाप्रचारगुणमात्रविध्यर्थमनुवादः। न चानुवादेऽनुवाद्यसन्निधिरिति सामिधेनीषु उपव्यानचिन्तायामुक्तेत्यर्थः। कथमिति। श्वः सवनीयविधिः पूर्वाह्णे वपाप्रचारगुणविधिरिति न युक्तं वाक्यभेदापत्तेरित्यर्थः। कथमित्यत्राह—एवमिति। तस्मिन् पक्षे दैक्षविकृतित्वं सवनीयस्य। ततश्च तत्र कार्यतः परिव्याणं प्राप्तम्। आश्विनं गृहीत्वोपनिष्क्रम्य यूपं परिव्ययतीति वचनान्तराद्वा-तस्याश्विनवाक्येनाश्विनोत्तरकालत्वं विधेयम्। परिवीयोपाकरोतीति उपाकरणस्य परिव्याणोत्तरकालत्वं चाग्नेयसवनीय यागविधिश्चेत्यनेकविधेर्वाक्यभेद इत्यर्थः। नन्वनेकगुणविशिष्टकर्मविधौ कथं वाक्यभेद इत्यत्राह—न चेति। परिव्यणोपाकरणकालयोः प्रयोगाङ्गत्वान्न प्रयोज्यरूपकर्मविध्यनुरञ्जकतेति न तद्विशिष्टकर्मविधिः। यद्यपि यदाग्नेयोऽष्टाकपाल इत्यादौ कालविशिष्टकर्मविधिरपि स। त्वगतितया। इह नु औपवसथ्ये सवनीयविधेराश्विनवाक्ये तदुत्तरकालतामात्रविधेरस्ति गतिरित्यर्थः। नन्वेवमप्यालंभोत्कर्षः कालं चोभयं विधेयमिति वाक्यभेदस्तुल्य इत्यत्राह—वपेति। वचनबलात् वपाप्रचारोत्कर्षे आरम्भोऽप्युपाक-

लब्ध्याम् अधिकारापूर्वान्वयमूलकं हि कार्यता-शेषत्वम् । अग्निस्वरूपार्थत्वे तन्न स्यादिति प्रकृत्यर्थावस्थान्यन्वयात्[1] प्रकृत्यर्थत्वमूलकमन्यर्थत्वं द्विरुक्तिहानाय । आहिताग्नेरधिकारोक्तिरेतद्राद्धान्तस्थितेः ।

राद्धान्तस्तु क्रत्वन्वयावस्थस्य[2] दोषिता बृहत्युक्तयुक्तेः अपूर्वमूलता तु भाव्यपूर्वार्थाग्निद्वारा अग्नेरपूर्वान्वयप्रतिसन्धेस्तदीयावस्थयेति दिक् ।

तासामग्निः प्रकृतितः प्रयाजवत्

आधानं न प्रकृत्यर्थमित्युक्ते अतिदेशतः पवमानेष्ट्याधानयोर्विकृत्यर्थचिन्तेयमवान्तरसङ्गता । पूर्वः पक्षः, यावदुपकार-

---

रणाख्यः संबन्धादुत्कृष्ट एवेति न तदुत्कर्षो विधेय इत्यर्थः । ननु यावद्वचनं वाचनिकमिति वपाप्रचारमात्रोत्कर्षः नत्वालम्भस्यापीत्यत्राह—पूर्वेद्युरिति । पश्वालम्भो वपोद्धरणान्तः अन्यथा वपानाशापत्तेः । तत्र पूर्वेद्युरालम्भे कृते यजमानो मुष्टिना पिधाय वपोद्धरणं आवपाहोमादासीत इति वचनार्थाशक्तिः । मध्येऽवश्यकर्तव्या हाराद्यशक्तेरिति वपाप्रचारोत्कर्षे आलम्भोत्कर्षान्न तद्विधिः । किन्तु आश्विनोत्तरत्वमात्रविधिरित्यर्थः । ननु त्रिवृद्गुणरशनापरिव्याणविधेः पुनरपि वाक्यभेदः स्यादित्यत्राह— त्रिवृतेति । तेषामप्यन्यतः प्राप्तेः व्यस्तान्वयादनुवाद इत्यर्थः । ननु परिव्याणोत्तरत्वं विधेयमिति चेत् तत्राह—अस्ति चेति । विधिपाठक्रमात् दृष्टार्थतया च तत्सिद्धेरित्यर्थः । आश्विनोत्तरतामात्रविधित्वमाचार्यैरप्युक्तमित्याह—पर इति । मैवमिति । नहि आलम्भवपाप्रचारयोरन्योन्यान्वयिता येनैकोत्कर्षे परोत्कर्षः । द्वयोरपि पशुयागार्थतया मिथः संबन्धायोगात् । न चाग्निमारुतादूर्ध्वमितिवत् तदादिनयः । अतदादित्वादालम्भस्य । ननु वचनान्तरार्थाशक्तिरुत्कर्षे इति चेत्तत्राह – इति स्थित इति । मुष्टिशब्दश्च

---

१. B प्रकृत्यर्थान्वयात्

२. R क्रत्वीयावस्थस्य

मतिदेशः उपकारान्वयाद्धि पदार्थातिदेश उपकारकमात्रे युक्त इति पवमानेष्टीनां विकृतिषु पवमानेष्टिप्रभृतिष्वप्यतिदेशात्तद्विष्टिसंस्कृतेऽग्नौ सेष्टिः। न चेष्टेरग्निः कार्यं न स तस्या एव करणमिति यतोऽमुमेव राद्धान्तेऽभ्युच्चयं वक्तुं पवमानेष्टौ पवमानेष्टिरुदाहृता।

पूर्वपक्षे तु यदि कार्यमेव [1]न कारणं तर्हि पवमानेष्टौ बाधः। व्यक्तिभेदाद्वा[2] कार्यकारणत्व, अत्रानास्था किंतु यथोपकारकसाधनाद्युपपदिश्यते, तथातिदिश्यतामिति तात्पर्यम्। राद्धान्तस्तु-अङ्गमात्रमतिदिश्यते, अङ्गैर्विना नोपकारो धीस्थः। तज्जन्य-

---

पर्णतादिमुष्टिपरः परिमाणवचनत्वात्। आस्तिश्चौदासीन्ये, गृहाणि परिगृह्यास्ते इतिवदित्यर्थः। ननु वपाप्रचारादुत्कृष्टः पशुयाग एवालम्भस्योत्कर्ष इति शङ्कां निगमयन्नपनुदति— तेनेति। न हि गुणानुरोधेन प्रधानोत्कर्ष इति यागानुत्कर्षे आलम्भोत्कर्षं आश्विनोत्तरकालता च विधेयेति गुणद्वयविधेर्वाक्यभेदो दुस्तरः। न चाश्विनोत्तरकालताविधौ अर्थादालंभोत्कर्ष इति वाच्यम्। यतो निर्ज्ञातकालान्तर संबन्धस्यालंभस्योत्कर्षमविधाय कालविशेषस्य विधातुमशक्तेरित्यर्थः। एवं चाश्विनवाक्ये यथाश्रुतान्वयलाभ इत्याह—एवं चेति। ननु कालस्य प्रयोगाङ्गतया कर्मविध्यनुरञ्जनायोगात् विधेयनानात्वेन वाक्यभेदः पूर्वपक्ष्युक्तोऽपि दुस्तर इति वाक्यभेदे तुल्ये पूर्वोत्तरपक्षयोः को भेद इत्यत्राह—वाक्यभेद इति। प्रयोगद्वारा कथञ्चित् कालविशिष्टकर्मविधिरिति गौरवमात्रं सिद्धान्तिमतेन भेद इत्यर्थः। औपवसथ्ये विध्यभावोऽप्याग्नेयस्यैव नैन्द्राग्नादेरित्यत्राह—न चेति। तर्हि धर्माणां तदन्वयः किमिति न स्यादित्यत्राह—न तत्रेति। ननु आग्नेयसवनीयपशोः श्वो विधिरित्याचार्यैरप्युक्तमित्याह—परोऽपीति। ननु कथं वार्तिके एषामिति बहुवचनमित्यत्राह—आग्नेयेति। प्रयोजनं तु पूर्व-

---

१. A omits न

२. A द्वित्युप

त्वेनैवोपकारभेदक्लृप्तेः तन्निरूपणीयोपकारबुद्धावन्तर्गतमङ्गजातं जात्यन्तभूर्तेव व्यक्तिरिति तद्‌बहिर्भावे उपकारापर्यवसानमेव न तूपकारजनकपदार्थजनकं तथेतिनातिदिश्यते। उपदेश-स्त्वनङ्ग-भूतोपकारजनकमात्रस्यापि युक्तः। ननु अङ्गभूतपदार्थं जनकाक्षेपोऽरूपेव इति नानतिदेशे फलम्। अतिदिष्टमङ्गमिति विकृतिषु पवमानेष्टीनामङ्गत्वे स्वाङ्गसंस्कृताग्निषु विकृतय इति विकृत्यर्थाहिताग्नयो विकृतिप्रयोगापर्गे अपवृज्येरन्निति सफलम-नतिदेश[1]व्युत्पादनम्। उपदेशावतिदेशस्योक्तविवेकार्थमुपदेशलक्षण इयं चिन्ता। यदि हि नोपदेशा[2]द्विवेकार्था पवमानेष्टौ पवमाने-

---

पक्षे सवनीये पशुपुरोडाशस्याप्राप्तिः अग्नीषोमीयदेवत्वात् तस्य। सिद्धान्ते तु दैक्षविकृतित्वात् सवनीयस्य तत्र कार्यतः प्राप्तपशुपुरोडाश-स्योह इति। अत्र केचित् सूत्रभाष्ययोः प्रकरणशब्दोऽवान्तरप्रकरणपर उक्तः तदाह—नन्विति। तन्नेति। सोमप्रकरणाभिप्रायाभाष्ये प्रकरणो-क्तिः। नावान्तरविधीनामवान्तरप्रकरणाभिप्राया तेषां तदभावादित्यर्थः। सोमप्रकरणाभिप्रायत्वे प्रथमसूत्रव्याख्यापरभाष्यान्तरविरोधं चोदयति—कथमिति। परिहरति—सूत्रमपीति। अवान्तरविधीनां प्रकरणाभावात् तत्रापि प्रकरणशब्दः सन्निधिपरतया व्याख्येय इत्यर्थः। ननु अवान्तर-विधीनामपि स्ववाक्यगत लिङ्वाच्यतया कार्यत्वात् इतिकर्तव्यताकाङ्-क्षित्वेन प्रकरणमस्त्येव, अन्यथा लिङादिवाच्यत्वायोगात्। न च परम-विध्यनुवादशङ्कया प्रथमं कार्यतया नाभिधानमिति वाच्यम् वैपरीत्य-स्यापि संभवादिति कथमवान्तरविधीनां प्रकरणाभाव इत्यत्राह—अधि-कारविधेरिति। अस्यार्थः साधिकारेण प्रधानवाक्येन संपूर्णसामग्रीकेण प्रथममधिकारविधिरेव साध्यतया प्रतीयते। तत्सन्निधौ श्रुतानामवान्तर-लिङां निरधिकारतया शङ्कितानुवादत्वानां न प्रथमं कार्यतयाऽवान्तरा-

---

१. मतिदेश

२. B नोपदेशार्थो

ष्टिप्राप्त्यप्राप्तिपरा तदा आरंभणीयानयगतार्थता स्यात्। तत्र चाक्षेपतः प्राप्तिचिन्ता। इहातिदेशत इति न गतार्थता। अग्न्युत्पादकत्वाच्च पवमानेष्टीनां न पवमानेष्टिसंस्कृताग्निरञ्जसेत्यभ्युच्चयाय पवमानेष्टिमुदाहृत्य उपदेशादतिदेशविवेकयत्नो भाष्ये।

लब्ध्यां वारणनयेन यदिष्टीनामग्न्यर्थत्वमुक्तं, तच्चोदकागताग्न्यर्थत्वमेव। प्रकृतौ संस्कृताग्नेरङ्गत्वात् संस्कार्याग्नेश्चोदकतः प्राप्तिरिति पवमानेष्टिषु पवमानेष्टिप्राप्तिः नचाव्यवस्था, यावदिष्टिकालमिष्ट्यभ्यासोऽस्तु।

पूर्वाभिधायकत्वम्। किन्तु प्रयाजादिस्वरूपोपस्थापकत्वम्। ततश्च विनियुक्तानां संभूयोपकारार्थं साधनत्वेनावान्तरापूर्वाणि कल्प्यन्त इति साध्यस्याधिकारविधेरेवेतिकर्तव्यताकाङ्क्षा न साधनस्य करणेतिकर्तव्यतात्मनोऽवान्तरविधेः। ततश्चावान्तरविधेः ग्राहकरूपं विनियोजकरूपं च प्रकरणं नास्त्येवेति। अवान्तरप्रकरणाङ्गीकारे दोषान्तरमप्याह—अवान्तरेति। साध्यस्य हीतिकर्तव्यताकाङ्क्षा। साध्यता च साधिकारस्येति साधिकारत्वार्थं प्रकृतापूर्वप्रवृत्तोऽधिकारी वाच्यः। ततश्चापूर्वार्थिनोऽधिकारादपूर्वं स्वर्गवत्साध्यतया अधिकारिविशेषणम्। यच्च साध्यतया विनियोज्यविशेषणं तन्नियोगफलम्। ततश्चाङ्गयागानां परमापूर्वकारणीभूतानां स्वापूर्वविषयतेति तेषां परमापूर्वे कारणतैव स्यात्। नेतिकर्तव्यतात्वम्। सा च नेष्टेत्यर्थः। ननु करणान्तरावरोधे कथं करणतेत्यत्राह—न चेति। कार्यतोऽधिकारिविशेषणत्वद्वारके करणत्वे फलचमसवत् नावरोधदोष इत्यर्थः। ननु प्रधानविधेरिति कर्तव्यतापेक्षित्वात् करणत्वेन तदाकाङ्क्षा न शान्तेति इतिकर्तव्यतात्वमेव दीक्षणीयादीनां एवमपि कार्यपरतोपपत्तेरित्यत्राह—न च प्रधानेति। असति प्रमाणे विध्याकाङ्क्षामात्रेणेति कर्तव्यतात्वायोगादित्यर्थः। नन्वाकाङ्क्षैव प्रमाणमिति चेत् तत्राह—ज्ञात इति। तर्हि सामान्यान्वयोऽप्यङ्गीक्रियत इत्यत्राह—यदि चेति। तदा चान्यत

राद्धान्तस्तु यथैव बृहत्यां अनङ्गानतिदेशान्नेष्टेरतिदेशः अग्निमात्रातिदेशः नत्वग्नेरुपदेश एव; इष्टेरस्याः प्राकृतचतुरवत्तहोमप्राप्त्यपेक्षाहोमतेति नानारभ्यविधिराहवनीये जुहोतीति सापेक्षे होमे चोदकागताग्नेश्च वारणनयात्संस्कार्यता।

तुल्यः सर्वेषां पशुविधिः प्रकरणाविशेषात्

उक्तेऽधिकारविध्यनङ्गस्यापि उपदेशे पशुधर्मेष्वपि तथात्वस्थितौ विशेषचिन्तेयमिति संगतिः। इहेयं स्थितिः—सोमे पूर्वमहरौपवसथ्याख्यम्, अपरं सौत्याख्यम्। औपवसथ्यकालकं पशुधर्मादिकमाम्नायते। सौत्यकालकं प्रधानादिकं दैक्षक्रमकं

एवानुष्ठानसिद्धेः नाधिकारकल्पनावकाशः। ततः करणतैव नेतिकर्तव्यतात्वं परमविधेरितिकर्तव्यताकाङ्क्षा लौकिकेनापि पूर्यत इति भावः। किञ्चेति। प्रयाजादावधिकारे कल्प्ये स्ववाक्यसन्निहितार्थवादिकवर्मादिरेवाधिकारिविशेषणं रात्रिसत्रवत्स्यात्। प्रकृतस्वर्गकामादिपदानुषङ्गो वा सोमे, पयोव्रतादौ च प्राङ्मुखतादाविव भुजिप्रवृत्तोऽधिकारी स्यात्। एतदनुष्ठानार्थमधिकारिकल्पने कल्पनातो वरं सप्तमाद्यपूर्वपक्षनयात् प्रयाजादेरुद्दिश्यविधिरेवेत्यर्थः। परमापूर्वप्रवृत्ताधिकारेऽपि अङ्गत्वमङ्गीकृत्य दोषान्तरमाह—यद्यपीति। तत्र हेतुः—प्रत्येकमिति। यथैवान्वयप्रवृत्तिः तथैव तदुपपत्त्यर्थमुपकारकल्पनमिति प्रत्येकमधिकारविध्यन्वयात् प्रत्येकमितिकर्तव्यतात्वमिति न सर्वैरेकेतिकर्तव्यतेति सिद्धिरित्यर्थः। त्वत्पक्षे कथं सिद्धिरित्यत्राह—यदीति। न ह्यन्यस्मिन् मतेऽधिकृताधिकारविधयाङ्गता। किन्तु सन्निधानाद्युगपदैदमर्थ्येनान्वितानामधिकारानुप्रवेश इति सर्वैरेकेतिकर्तव्यतेति सिद्धिरित्यर्थः। सन्निधानादन्वयोऽपि लोके सिद्ध इत्याह—सन्निधीति। सर्वत्र सन्निधानाभावान्नातिप्रसङ्ग इत्यर्थः। किञ्च अधिकृताधिकारविधयाऽङ्गत्वे सन्निपातिनामङ्गता न स्यात्। अथ तत्र पदार्थान्वयमुखेनान्वयो न सन्निहित इति चेत्तत्राह—यदि चेति। सन्निधिमतन्त्रीकृत्य पदार्थान्वय मुखमात्रतन्त्रत्वे पाञ्चदश्यसाप्तदश्ययोस्तुल्यवद-

पशुधर्माम्नानं सवनीयस्याहर्द्वये श्रुतिः सा क्व सवनीयस्य विध्यर्था क्व । तद्गुणविध्यर्थेति इहैव चिन्त्यम् । पूर्वः पक्षः । पशूद्देशेन श्रुत्या धर्मविधेः पशोर्यावत्प्रकरणसन्निहितस्योद्देशात्सर्वपशूनां धर्माः यथा 'ग्रहं संमार्ष्टी'ति । प्रातः सवने श्रुतमपि सवनत्रय-ग्रहार्थम् ।

पक्षान्तरं सवनीयस्य धर्माः श्रतिसन्निधानादौपवसथ्येऽहनि धर्माः ।

सवनीयोऽपि संमार्गे तु ग्राहकीये ग्राहकीयतयैव सन्निहित-ग्रहजातीयमात्रोद्देशः । पशुधर्मास्तु न ग्राहकीयाः । किंच ग्रहशब्दो

न्वयः स्यादित्यर्थः । किञ्चावान्तरप्रकरणे प्रयाजादावपि सौमिकविध्यन्तरं स्यादित्याह—प्रयाजादेरिति । इष्ट्यङ्गसोमविध्यन्तप्राप्तौ परोक्तमन्योन्या-श्रयदोषमाशङ्कते—अथेति तन्नेति । अङ्गैरेवोपकारकल्पनं न पुनरङ्गाङ्गै-रपि । तेन प्रयाजादेर्यान्यातिदेशिकान्यङ्गानि तैर्विना प्रयाजादिभिरेवा-ङ्गैरिष्टावुपकारक्लृप्तिः । तथा सोमेऽपि स्वाङ्गनिरपेक्षैरेव दीक्षणीया-दिभिरङ्गैर्यावदङ्गं चातिदेश इति नेष्टिसोमयोरुपकारक्लृप्तावितरेतरा-श्रयता । अङ्गाङ्गानां तु विकृतावाक्षेपः । स च परमन्योन्याश्रयदोषाद् बाध्यः नन्वेवमनवस्थानादङ्गाङ्गाक्षेपबाधे किं प्रयाजादौ सौमिक धर्मातिदेशफल-मित्यत्राह—इति ध्येयमिति । अयं भावः—यावत्पदार्थप्राप्तावनवस्थादि-दोषो न भवति तावत्प्राप्यानुष्ठानादाक्षेप इति ।

नन्वङ्गविधीनां प्रकरणाभावे कथं दीक्षणीयादेरिष्टिविध्यन्तः । कथं वा तत्र नानवस्था तत्राह—यदा त्विति । सन्निधिलक्षणमेवात्र प्रकरणं युक्तम् । न विनियोजकलक्षणमित्याह— अत एवेति । विपक्षे बाधकमाह—अन्यथेति । श्रुतिविनियोज्येषु पशुधर्मेषु दूरे विनियोजकप्रकरणकथेति भावः । नन्वेकस्याधिकारविधेर्देक्षार्थं यद्धर्माणां कृते उपदेशापेक्षा तेषामेव धर्माणां कृते पशुद्वये सवनीयानुबन्ध्यात्मकेऽतिदेशापेक्षेति विरुद्धमित्यत्राह—न चेति । न हि सोमविधिरतिदेशिकः किन्तु अङ्गविधिरेव । प्रयुक्तिमात्रं

जातिवाची कार्यवत्तज्जातीयोद्देशकोऽस्तु । पशुशब्दस्तु व्यक्ति-वाची सन्निहितव्यक्त्युद्देशकः । पक्षान्तरं यदि सन्निधेः सवनीयस्य धर्माः तर्हि क्रमाख्यसन्निधेः दैक्षस्यापि ।

राद्धान्तस्तु । सवनीयस्यौपवसथ्ये गुणमात्रविधेर्न सन्निधिः । गुणविधौ न सन्निधिरिति सामिधेनीषूपव्यानचिन्तायामुक्तम् । अतः क्रमाख्यसन्निधेर्दैक्ष एव धर्मविधिः कथं गुणमात्रविधिः । न ह्याश्विनं ग्रहं गृहीत्वेत्यनेन सौत्ये सवनीयविधिः औपसथ्ये च वपाप्रचारगुणविधिः । एवं हि सावनीये दैक्षविकृतौ परिव्याण-प्राप्तेर्वचनांतराद्वा आश्विनोत्तरकालत्वं विधेयम् । उपाकरणस्य

प्रधानविधेरिति कृत्स्नविधाननय एव स्थापितमित्यर्थः । नन्वत्रैव किमिति न साध्यत इत्यत्राह—नेहेति । उपदेशाषट्कत्वादित्यर्थः ।

लप्स्यामिति । ननु "तुल्यः सर्वेषाम्" इति सूत्रं किमिति भाष्ये प्रथम-पक्षहानपरतया व्याख्यातम् न पुनः प्रथमपक्षपरतया व्याख्यातमित्याशङ्-क्योक्तम्—एतत्सूत्रं प्रथमपक्षहानपरमेव अन्यथा स्थानाच्चेत्युत्तरसूत्रेणा-नन्वयः स्यात् सवनीयार्थपरत्वे नायं दोष इत्यर्थः । नन्वयं चतुर्धा सन्देहः तत्कथं भाष्यकृता पक्षद्वयमेवोक्तं सन्देहे इत्यत्राह—भाष्य इति । कथमेतद्भा-ष्यमेवं योज्यमित्यत्राह—मिलितेति । सवनीयानां सौत्येऽहनि विधौ वाक्यभेद इत्यादि भाष्यव्याख्यानं लिङ्गदर्शनं च व्यक्तमित्याह—शेषमिति ।

दोहयोः कालभेदादसंयुक्तं श्रुतं स्यात्

दर्शपूर्णमासयोः सायंदोहप्रातर्दोहौ स्तः । तत्र सायंदोहः पूर्वेद्यु-रनुष्ठीयते । तत्रैव शाखाहरणादिदोहधर्माः समाम्नाताः । तत्र चिन्ता—किं ते सायंदोहार्थाः उत दोहद्वयार्था इति । सङ्गतिपूर्वपक्षावाह—यथेति । स्थानात् पशुधर्माणां दैक्षार्थत्ववत् दोहधर्माणामपि सायंदोहार्थतेत्यर्थः । राद्धान्त इति । न हि दोहधर्माणां सायंदोहार्थता । तस्य तत्र सन्निधाना-भावात् । तथाहि—तत्र तस्य किं विधितः सन्निधिः । किं वा स्थान-

च परिव्याणोत्तरकालत्वं, आग्नेयसवनीयविधिश्चेत्यनेकार्थविधिः स्यात् । न च विशिष्टविधिः परिव्याणोपाकरणकालाभ्यां न साक्षाद्विशिष्टोऽयमाग्नेयः । कालश्च प्रयोगाङ्गं न कर्मविध्यनुरञ्जनेन सत्यां गतौ विधेय इत्यौपवसथ्ये सवनीयविधिः । वपाप्रचारे हि सौत्ये उत्कृष्टे तदालंभोऽप्युपाकारणाख्यः संबंधादुत्कृष्टः । पूर्वेद्युरालंभे वपोद्धरणान्ते शमिता मुष्टिना पिधाय वपोद्धरणमासीताऽऽवपाहोमादिति वचनार्थः शक्तेः आहारविहाराद्यावश्यकं मध्ये न स्यादित्युत्कृष्टालंभस्याश्विनोत्तरमात्रकालविधिः त्रिवृता यूपं परिवीयेत्यनुवादो व्यस्तान्वयात् ।

सन्निधिः । न तावदाद्यः । दधिपयसोरुभयोरपि ऐन्द्रं दध्यमावास्यायाम् ऐन्द्रं पयोऽमावस्यायां इत्येकामावास्याकाले विधेः । न द्वितीय इत्याह—किन्त्विति । स्थानसन्निधिर्नामानुष्ठानसादेश्यम् । स च ग्राहकलक्षणप्रकरणात् दुर्बलः । यदि त्रिधितः सन्निधिः स्यात् तदा ग्राहकप्रकरणसंकोचो भवेदपि । न चेह तथेत्यर्थः । ननु कथं प्रकरणादुभयार्थत्वं धर्माणामित्यत्राह—दोहेति । पशुधर्माणां तु नैवमित्याह—पश्विति ।

लभ्व्यामिति । पूर्वपक्षे नाधिकम् । राद्धान्ते तु एक एव दोहरूपपदार्थो दध्यर्थः पयोऽर्थश्च । तस्य कालभेदमात्रं दध्यर्थं पूर्वेद्युरनुष्ठानं पयोर्थमुत्तरेद्युरिति तत्रैवोभयार्थैकदोहद्वारतया धर्माणामुभयार्थतेत्यर्थः । ननु दोहधर्मा न प्रकरणनियोज्याः तत्कथं प्रकरणसाधारणतोक्तिर्भाष्य इत्यत्राह—प्रकरणेति । ननु यदि प्रकृतत्वाभिप्रायं प्रकरणपदं कथं तर्हि तस्य क्रमरूपत्वात् क्रमाच्च प्रकरणं बलवदिति भाष्यमनुपपन्नमित्यत्राह—प्रकरणादिति । दोहे हि एकत्वेन प्रकृते कालतः स्थानभेदमात्रमबलमिति भाष्यार्थः । एतदुक्तं भवति—द्वयमपि हि सन्निधिरूपं तत्र पदार्थसन्निधौ प्रत्यर्थिनि कालभेदमात्रेण सन्निधिरकिञ्चित्कर इति । अपि चेत्यादिभाष्यस्य यथाग्रन्थमभिप्रायमाह—किञ्चेति । दोहकालभेदोऽपि न शास्त्रतः

यत् त्रिवृता यूपं परिवीयोपाकरोति तदाश्विनं गृहीत्वेत्यन्वयः। अस्ति च परिव्याणस्य पूर्वता । परोप्याह—

सवनीयान् पुरोत्पाद्यवपामुत्कृष्य वाक्यतः ।
तत्राप्यनियमे प्राप्ते तद्विशेषो विधीयते ।।

नैवं वपाप्रचारालम्भयोर्यागार्थयोः समत्वान्न मिथोऽन्वयः । न च तदादिनयः, अतदादित्वादालंभस्यानुत्कर्ष इति स्थिते तत्र वचनं तृणमुष्टिना पर्णमुष्टिना वा पिधायोदास्त इत्युक्तं भाष्ये । तेनालम्भोत्कर्षः आश्विनोत्तरकालता च विधेयेति प्राप्ते गुणद्वय-विधेर्वाक्यभेदो दुस्तरः । एवं चाश्विनं गृहीत्वा परिवीयेत्य-

---

किन्त्वर्थात् दध्नो द्व्यहकालसाध्यत्वादित्यशास्त्रार्थत्वादपि दूरे प्रकृतिभेद-कतेत्यर्थः मतद्वयोक्तार्थं भेदेन दर्शयति—एवं चेति ।

तद्वत्सवनान्तरे ग्रहाम्नानम्

सन्ति सोमे ऐन्द्रवायवाद्याग्रहाः प्रातस्सवने श्रुताः । सम्मार्गादि-धर्माश्च तत्रैव श्रुताः । तत्र चिन्ता—किं धर्माः प्रातस्सवनिकग्रहार्था उत सवनत्रयग्रहार्था इति । तत्रावान्तरसङ्गतिमाह—पूर्वेति । ननु ग्रहं संमार्ष्टी-त्यविशेषात् सर्वग्रहार्थतैव युक्ता दोहधर्मवत् को विशेषो नयातिदेश इत्यत्राह—पूर्वपक्ष इति । युक्तं दोहधर्मेषु दोहद्वयार्थत्वं दध्नो विधितः सन्निधानाविशेषात् । इह तु केचिद्ग्रहाः प्रातस्सवन एव विधितः सन्नि-हिता धर्मा अपि तत्रैव तदर्थतैव तेषां युक्तेत्यर्थः । राद्धान्त इति । सत्यं ग्रहाणां केषाञ्चित् प्रातस्सवने विधितः सन्निधिः । धर्माणां तु सुत्याकाल एव विधिः । न सवनविशेषे श्रुतिः वपाप्रचारवदित्यर्थः । कथं तर्हि तत्सवनेऽनुष्ठानमित्यत्राह सुत्येति । यद्यपि धर्मेषु कर्तव्यतामात्रश्रुतिर्न कालभेदोपहिततया तथापि सुत्याहप्रक्रमात् तत्कालता धर्माणामवगता । तत्कालप्रचार एव सवनत्रयविभागेन श्रुतः न प्रातरादेर्भेदेन धर्मविधि-रिति न तेषां विधितः सन्निधिरित्यर्थः । कथं तर्हि प्रातस्सवने धर्मश्रुति-रित्यत्राह—यापीति ।

न्वयः । वाक्यभेद आवश्यके पूर्वपक्ष्युक्तस्तु वाक्यभेदः कथंचिद-नेकगुणविशिष्टकर्मविधेः सुतरः । न चाग्नेयः सवनीय एकोऽत्र वाक्ये, ऐन्द्राग्नादेरौपवसथ्ये विधिरस्तु, न तत्रोक्थ्याद्यनित्यान्वि-तेषु नित्यधर्माः शक्याः ।

परोऽप्याह—गुणार्थौपवसथ्येऽह्नि सवनीयपुनश्श्रुतिः ।

उत्पत्तिप्रक्रिया चैषामाश्विनग्रहणोत्तरा ! आग्नेयमात्र[1]स्या-श्विनोत्तरकालतेत्येषामित्यनास्थावादः ।

नन्वेतेषां प्रक्रिया प्रकरणं भाष्येऽपि प्रकरणाविशेषात् सर्वा-र्थतेत्युक्तेः । तन्न, सापि सोमप्रकरणे पशूनामविशेषादित्येव पशूनां प्रकरणाभावात् । कथं तर्हि सूत्रं भवति तु प्रकरणे विशेष

लघ्व्यामिति । युक्तं पूर्वत्र दोहैक्यात् तद्धर्माणामुभयार्थता । इह तु प्रतिसवनं ग्रहाणां भेदेन प्रातस्सवनाम्नाताधर्माः क्रमात् तदीयग्रहार्था एवेति सङ्गतिपूर्वपक्षावित्यर्थः । राद्धान्त इति । सत्यं कालभेदाम्नानात् सन्निधि-विशेषधीः तथापि ग्रहधर्माणां ग्रहशब्देन ग्रहजात्युपलक्षितप्राकरणिककार्य-वद्व्यक्तिमुपलक्ष्य विधानात् शाब्दसन्निधिः कालभेदाम्नानसन्निधिं पीडयितुं समर्थः इत्यर्थः । नन्वेवं पशुधर्मेष्वपि शाब्दसन्निधेः प्रबलता स्यादित्यत्राह—न चैवमिति । अवान्तरापूर्वप्रतिष्ठितत्वेन च भेदे सत्येव मुखान्तरेण व्यक्तिवाचित्वेन जातिवाचित्वेन च भेदोक्तिरिति भावः । ननु व्यक्तिमात्रवाचित्वे लौकिकव्यक्तावपि स्यादित्यत्राह—प्राकरणिकेति ।

रशना च लिङ्गदर्शनात्

अग्नीषोमीये पशौ "रशनया यूपं परिव्ययति" इति रशना श्रुता । तथा त्रिवृद्भवति दर्भमयीभवतीत्यादयो रशनाधर्माश्च श्रुताः । तत्र चिन्ता-किं रशना तद्धर्माश्चाग्नीषोमीयार्था उत पश्वर्था इति । ननु पशुविषयत्वा-द्रशनादेः । पशुधर्मानन्तर्यमेव युक्तम् कथमत्र प्रसङ्ग इत्यत्राह—अस्त्विति । यद्यपि राद्धान्ते पशुधर्मवैषम्यं तथापि ग्रहधर्मवैषम्येणोत्थानादत्र प्रसंगः ।

---

१ B तत्कथं तन्न मा

इति। नहि सोमप्रकरणवर्तित्वे पशूनां विशेषः। यदि पशूनामेवावान्तरप्रकरणं सौमिकमहाप्रकरणे तदैवं वक्तुं युक्तम् [भवति] अस्ति तु प्रकरणे विशेष इति उच्यते। सूत्रमप्येवम्। अस्ति तु सन्निधौ विशेष इति। इत्थं व्याख्या-अवान्तरविधीनां प्रकरणाभावात्। अधिकारविधेर्हि साध्यस्य करणेतिकर्तव्यताकाङ्क्षा, न साधनस्य करणेतिकर्तव्यतात्मनः स्वत इति कर्तव्यताकाङ्क्षित्वं प्रकरणं विनियोजकरूपं ग्राहकरूपं च। अवान्तर प्रकरणमिच्छता चाङ्गापूर्वाणां साध्यत्वाय साधिकारत्वार्थं

प्रथमभावित्वादुत्थितिवैषम्यं बलवदित्यर्थः। ननु यूपस्य सर्वपशुषु तन्त्रतया तद्द्वारकरशनायाः तद्धर्माणां च सर्वपश्वर्थतैव युक्तेति कथं पूर्वपक्ष इत्यत्राह—पूर्वेति। सत्यमेवं यदि यूपतन्त्रत्वे प्रमाणमस्ति यूपोऽपि यूपे पशुं नियुञ्जीतेति पशुशब्देन सन्निहितवचनेन दैक्षमात्रोद्देशेन विधेस्तन्मात्रार्थं एव। दैक्षार्थबन्धनद्वारा परम्परया वा पश्वर्थत्वमुपेत्य वा चिन्तेयमित्यर्थः। राद्धान्त इति। सर्वपशूनां यूपस्य तन्त्रत्वात् यूपान्वयमुखेन रशना तावत्पश्वर्था। तद्द्वारा तद्धर्माश्च पाठतो दैक्षसन्निधेः शाब्दो यूपान्वयो बलवान्। यूपतन्त्रत्वं च यूपे पशून् बध्नातीति पशुत्रयोद्देशेन यूपविधानात्। इतरपशुधर्माणां तु दैक्षक्रमेऽनुष्ठानसन्निधेः युक्ता दैक्षार्थता। यूपस्य दीक्षासु यूपं छिनत्तीति अपकर्षश्रुतेर्न दैक्षसन्निधिः। बन्धनं तु दैक्षमात्रार्थम्। तस्य तत्सन्निधावनुष्ठानक्रमात् अनुष्ठानसादेश्यं च स्थानम् स्थानाच्च पशुधर्माणां दैक्षार्थता। सा चापकृष्टयूपव्यतिरिक्तपशुधर्माणाम्। यद्यपि बन्धनकारकतया दैक्षसन्निधौ यूपोपदेशः तथापि यूपो [त्प]त्तेः स्वकालत्वेन सर्वपशूनां तन्त्रं यूप इति ध्येयम्। लघ्व्यामिति। पूर्वपक्षे न विशेष इत्यनुपन्यस्तो ग्रन्थे। राद्धान्ते यद्यपि यूपकार्यं नियोजनं प्रतिपशु भिन्नम् तथापि यूपः स्वकालत्वेन सर्वपशुतन्त्रतयोत्पन्न इति तद्द्वारकरशनादेः सर्वार्थता परिव्याणद्वारा यूपान्वय एव रशनायाः शाब्दः न पश्वन्वय इत्यर्थः। नन्विति। दैक्षादपि पशुद्वये कार्यतो रशनादेः प्राप्तेः सर्वपश्वर्थत्वे द्विरुक्ति-

प्रकृतापूर्वप्रवृत्तोऽधिकारी वाच्यः । एवं च साध्यतया स्वर्गवत्परमापूर्वमधिकारिविशेषणमिति परमापूर्वकरणीभूतमङ्गापूर्वं विषय इति परमापूर्वे अङ्गयागानां करणतैव स्यान्नेतिकर्तव्यतात्वम् । न चोत्पत्तिशिष्टकरणावरोधः, अधिकारिविशेषणत्वद्वारके करणत्वे फलयमसवदनवरोधात् । न च प्रधानविधेरिति कर्तव्यता न स्यादिति विना मानमिति कर्तव्यतात्वम् । ज्ञाते हि सामान्यतोऽन्वये कथंभावाकाङ्क्षोपकारकं कल्पयति ।

प्रकरणाख्यं मानम् । यदि च प्रागन्वयाङ्गीकारो न तर्ह्यधिकारिकल्पना प्रधानविधिप्रयुक्त्यैवानुष्ठानसिद्धेः । किं च यद्यङ्गविधिषु अधिकाराकाङ्क्षा तदा स्ववाक्यशेषस्थवर्मादि

दोषः स्यादित्यर्थः । तन्नेति । तन्त्रयूपापेक्षो रशनोपदेशो नातिदेशिकयूपापेक्षः इति यूपद्वारा युगपत्सर्वपशुषु रशनातद्धर्मोपदेशान्न द्विरुक्तिरित्यर्थः ।

अत्राचार्यैरन्यथा चिन्तितम्—दैक्षपरिव्याणमाम्नाय पुनः सवनीयपरिव्याणमाम्नातम् आश्विनं गृहीत्वोपनिष्क्रम्य यूपं परिव्ययतीति तत् निर्गुणपुनःश्रुतेः दैक्षपरिव्याणाद्भिन्नम् । सवनीयविधिवाक्य एवाश्विनोत्तरकालता सिद्धा । उपनिष्क्रमणं चार्थतः प्राप्तम् अतो निर्गुणपुनःश्रुतेः परिव्याणान्तरमेव सवनीये । तत्र रशनासाधनतया लोकवेदसिद्धेति नोभयपरिव्याणेपि सा विधेयेति न तत्रेयं चिन्ता । किन्तु तद्धर्मेषु चिन्ता सवनीयपरिव्याणे या रशना सा किं दैक्षप्रकरणे त्रिवृदादि-श्रुतेः तद्धर्मिका उतोपदेशत एव त्रिवृदादिधर्मिकेतिसंशये दैक्षधर्मिकेति पूर्वपक्षिते लिङ्गदर्शनात् राद्धान्तः—त्रिवृता यूपं परिवीयेति सवनीयपरिव्याणे त्रिवृद्दर्शनं रशना धर्माणां दैक्षसवनीययोः समानविधानत्वे उपपन्नम् । अन्यथा अप्राकृतसवनीयपरिव्याणे त्रिवृदादिदर्शनं न स्यादिति । तदाह—भट्टस्येति । तन्नेति । परिव्याणद्वयं लोके रशनयैव सिद्धेत्यसिद्धम् वाससा परिव्याणदर्शनादिति नियमार्थं रशना विधेयेति ।

---

१. विधित्वेपि A B

रात्रिसत्रवदधिकारिविशेषणमस्तु। स्वर्गकामाद्यनुषङ्गो वाऽस्तु पयोव्रतादौ संस्कारेऽपि भुजिप्रवृत्तोऽधिकारी स्यात्। किं चाधिकारिकल्पनातो वरं सप्तमाद्यपूर्वपक्षनयः।

यद्यपि परमापूर्वप्रवृत्ताधिकारेऽङ्गत्वेनान्वयः। तथापि सर्वैरेकेतिकर्तव्यतेति न स्यात् प्रत्येकमपूर्वस्याधिकारिविशेषणत्वेनान्वयात्प्रत्येकमितिकर्तव्यतात्वं स्यात्। यदि सन्निधिमात्रात् तदर्थत्वे खलु तुल्ये अधिकारिविधौ अङ्गानां कपोतपङ्क्तिवद्युगपत्पातादैक्येनान्वयः तदा द्वारमप्येकमेव कल्प्यमिति सर्वैरेकेतिकर्तव्यतेति मत्पक्षसिद्धिः।

तत्रापीयं चिन्ता—किं सर्वपश्वर्था उत दैक्षार्थेति तन्मते भाष्यविरोधोऽपीत्याह—भाष्य इति। ननु रशनाधर्माणां सर्वपश्वर्थत्वे किमिति सवनीयमात्रमुदाहृतमित्यत्राह—सर्वेति। लिङ्गदर्शनाभ्युच्चयार्थमित्यर्थः।

आराच्छिष्टमसंयुक्तमितः सन्निधानात्

सोमे अनारभ्याधीतो ग्रहो स्तः "अंशुमदाभ्यं गृह्णाती"ति। ग्रहधर्माश्च। तत्र चिन्ता—किं ते अनारभ्याधीतयोरपि उत नेति। ननु ग्रहधर्मचिन्तेयं ग्रहधर्मनयानन्तरमेव युक्ता नेहेत्यत्राह—सर्वेष्विति। आरभ्याधीनशेषिविषयशेषत्वचिन्तानन्तरमनारभ्याधीतविषये शेषत्वचिन्ताऽत्रैव युक्तेत्यर्थः ननु जातिवाचकग्रहशब्दोद्देशाविशेषात् आरभ्यानारभ्याधीत सर्वग्रहार्थता धर्माणां ग्रह-धर्मन्यायेन युक्तेति कथं पूर्वपक्ष इत्यत्राह—पूर्वेति। उद्देशेऽपि ग्रहशब्दः प्रकरण-सन्निहितव्यक्त्युद्देशकः नासन्निहितांशवदाभ्यग्रहो-द्देशकः इति न तदर्थो धर्म इत्यर्थः।

राद्धान्त इति। न सन्निहितमात्रमुद्देश्यं किन्तु प्रयोजनवत्सन्निहितं प्रयोजनवत्त्वं चानारभ्याधीतयोरपि इति तदर्थतापि धर्माणामित्यर्थः। ननु प्रयोजनवत्त्वेऽपि प्रकरणपठितानामेव सन्निधानात् तदर्थतैव, अत्राह—सोमेति। सोमापूर्वगृहीतानां धर्माणां सौमिकमेव ग्रहजातीयं सन्निहित-

[1]सन्निधिमात्रादन्वयश्च लोकवदुपपादितः। यदि च पदार्थान्वयिनां पदार्थमुखेनान्वयः सन्निधिर्न तन्त्रं तर्हि सान्निधेन्यन्वयात् पाञ्चदश्यसाप्तदश्ययोस्तुल्यवदन्वयः स्यात् प्रयाजादेश्च परमापूर्वप्रवृत्ताधिकारयोगादितिकर्तव्यताकाङ्क्षायामव्यक्ततया सौमिकीतिकर्तव्यता स्यात्। अथ प्रयाजादेः सौमिकविध्यन्तेऽन्योन्याश्रयः। तथाहि—सोमाङ्गेष्वैष्टिकविध्यन्ते सति सोमोपकारकल्पनायां प्रयाजादौ तदतिदेशः, तदतिदेशादेवेष्टेरुपकारकल्पनेति। तन्न, स्वाङ्गैरेवोपकारकल्पना, न त्वङ्गाङ्गैरपीति विनाप्रयाजादेरातिदेशिकाङ्गैरिष्टावुपकारः, सोमाङ्गेष्वपि विनाऽऽतिदेशिकाङ्गैः सोमोपकारः। यावदङ्गं चाति-

---

मपूर्वेण कृतमिति नाधिकारविधिसन्निधिः पाठसन्निधितः संकोचयितु युक्त इत्यर्थः। श्रयणवैषम्यमाह—श्रयणं त्विति।

लघ्व्यामिति। यद्यपि नियोगगर्भो विनियोगः तथापि सन्निहिते श्रुत एवाशु विनियोगमाहेति पूर्वपक्षिते राद्धान्तः। नियोगोऽपि पश्चाद्गृहीतानामपि संस्कारापेक्षया यावत्स्वगृहीतार्थत्वमेव धर्माणामाहेत्यर्थः। नन्वेवमनारभ्याधीतानामपि ग्रहाणां धर्मान्वये आरभ्याधीतसर्वार्थता दण्डापूपनयसिद्धेति ग्रहधर्मनयव्यर्थता स्यादित्यत्राह—न चेति। तत्र हेतुः—इहेति। उभयत्र पूर्वपक्षोत्थाने विशेषान्न दण्डापपनयसिद्धतेत्यर्थः।

अग्न्यङ्गप्रकरणे तद्वत्

अग्नौ स्थलरूपचितिविशेषं प्रकृत्य काश्चिदिष्टकाः आम्नाताः। तद्धर्माश्चाखण्डत्वादयः। सन्ति चानारभ्याधीतेष्टकाश्चित्रिण्यादयः चित्रिणोरुपदधातीति। तत्र चिन्ता—किमिष्टकाधर्माः आरभ्याधीतेष्टकार्था उत अनारभ्याधीत-सर्वेष्टकार्था इति। तत्रावान्तर-सङ्गतिमाह—अनारभ्याधीतेति ननु केनाधिक्ये नात्र पूर्वपक्षः येन तद्वदित्यनिदेश इत्यत्राह—पूर्वेति। इदमत्राधिकं स्थलरूपचितिभेदात् यच्चिंतिसन्निधौ धर्मश्रुतिः

---

१. B-स्वसन्निधि

देशो नाङ्गाङ्गानामाक्षेपस्तेषाम्, म एवान्योन्याश्रय-दोषा-दन-वस्थया वा बाध्यत इति ध्येयम् ।

यदा[1] तु लिङ्गदर्शनोत्थापिताङ्गेष्वाकाङ्क्षा तदा सोमा ङ्गानां नेष्ट्यङ्गानामिति नाक्षेपेऽनवस्थादिदोष इति सन्निध्या-ख्यमेव प्रकरणं मतम् । अत एव स्थानाच्चाग्नीषोमीयस्येति सूक्तम् । अन्यथा हीतिकर्तव्यताकाङ्क्षाख्येन प्रकरणेन स्थान-बाधान्नतुल्यता स्थानस्य ।

न च दैक्ष एव धर्मार्थिवत्त्वे धर्माणां पशुद्वये नातिदेशः सोम-विधेः । न हि सोमविधिरातिदेशकः किं त्वङ्गविधिरेव प्रयुक्ति-

---

तच्चितिशेषेष्टकाशेषत्वमेव धर्मस्य सन्निधिविशेषादिति । नन्विति । युक्तं सर्वग्रहार्थत्वं ग्रहधर्माणां प्रयोजनभूतसोमद्रव्यैक्यात् । इह तु प्रतीष्टकं व्यापारभेदः । तत्रैकैकेष्टकाव्यापारादपि धर्मविधयोऽर्थवन्त इति व्यापार-भेदे प्रयोजनभेदान्न विप्रकृष्टेषु धर्मैर्भाव्यमित्येकदेशिमतं न युक्त-मित्यर्थः । यत इति । ग्रहेपि व्यापारभेदस्य समत्वादित्यर्थः । नन्विति । एवं ग्रहसाम्ये सन्निहितचितेरपि धर्मा न स्युरित्यर्थः । मैवमिति । यथा ग्रह-धर्मेषु ग्रह-शब्देनोद्देशः न तथेहेष्टका-शब्देन । किन्तु अखण्डामक्ष्णां कुर्यात् इत्येवमखण्डादिशब्दानां व्यक्तिपरतया प्रकृतापेक्षयैवाखण्डादि-श्रुति-पर्यवसानात् सन्निहित-चितोष्टकाधर्मतैव युक्ता । ये तु धर्मा इष्टको-द्देशेन श्रुताः ते नोदाहरणं, कृत्वा चिन्ता वेत्यर्थः ।

राद्धान्त इति । न तावच्चितिनिष्ठता धर्माणां लौकिकत्वेन तस्या धर्म-संबन्धानर्हत्वात् । किन्तु ते अधिकारापूर्वगृहीताः । अधिकारापूर्वं च धर्मान् प्रति शेषितया स्वसंबन्धिनोरिष्टकाः सन्निधापयति । तत्संबन्धश्च सर्वेष्टकास्वविशिष्टः सर्वचितिष्वेकत्वात् अधिकारापूर्वस्येत्यनारभ्याधी-तेष्टकास्वपि धर्मा इत्यर्थः । अखण्डादिशब्दस्य प्रकृतापेक्षाप्यपूर्वसन्निधा-पिते (ने)ष्ट काभिः पूर्वेत्याह—प्रकृतेति ।

---

१. यदि-B

मात्रं प्रधानविधेरिति स्थापितम् । कृत्स्न विधानन्ये नेहातिदेशस्य संगतिः । लब्ध्यामधिकं तुल्यः सर्वेषामिति सूत्रं प्रथमपक्षहानपरम् । अन्यथा स्थानाच्चेत्युत्तरसूत्रानन्वयः सवनीयार्थपरत्वेन्वयः ।

भाष्ये यत्पक्षद्वयमेवोक्तं[1] किं सर्वेषामुत सवनीयस्याग्नीषोमीयस्य चेति तदेवं योज्यम् । किं सवनीयस्यैवोताग्नीषोमीयस्यैवोतो भयोरपीतिमिलितामिलितावस्थापरत्वात्पक्षत्रयं, सर्वेषामित्यनेन सह पक्षचतुष्टयम् । शेषं व्यक्तम् ।

लब्ध्यामिति । यदि चयननियोगगर्भो धर्म-विनियोगः स्यात् तदा चयननिविष्ट-सर्वेष्टकाधर्मता स्यात्, अनारभ्याधीतानामपि चयननिवेशात् । अधिकारापूर्वगर्भस्तु धर्मविनियोगः ततश्च तत्सन्निहिता(ना)रभ्याधीतेष्टकाधर्मतैवेति पूर्वपक्षे राद्धान्तः चयननिवेशद्वारा सर्वेष्टकानामपूर्वान्वयादपूर्वीयत्वाविशेषात् सर्वासां धर्मा इति । इदमत्राभिहितम्—चयननियोगगर्भत्वाभावोक्तिः पूर्वपक्षे चयन-विषयक-नियोगाभावादग्निं चिनुत इति सोमप्रकरणेऽधीतत्वात् अनुवादशङ्कया प्रथमं कार्याप्रतीतेः गुणकर्मतैव । चयननियोगाङ्गीकारे तु अधिकारनियोगगर्भतया पूर्वपक्षो न स्यात् । तस्याङ्गनियोगत्वेन तदन्वयिपदार्थान्वयिनोऽङ्गस्य दीक्षणीयावाङ्नियमवदङ्गनियोगनिष्ठतैव । अंतश्चयननियोगाभावादधिकारनियोगगर्भतया पूर्वपक्षः ।

नन्वेवमनारभ्याधीतेष्टकानामपि तन्नियोगगर्भतया विनियोगात् तदीयत्वात् तत्रापि धर्मान्वयः स्यात् । तत्र चयनमात्रनिष्ठतैवासां वाक्याच्चित्यन्वयप्रतीतेः । तस्याश्चानेक-नियमातिशयान्वितत्वेन धर्मान्वयार्हत्वादिति पूर्वपक्षिणोऽभिप्रायः । राद्धान्तस्तु लौकिकत्वेन चितेः जुह्वादिवद्धर्मप्रयोजकतायोगात् अनारभ्याधीतेष्टकानामपि चयननिवेश-द्वारा परमापूर्वार्थतेति तासामपि धर्मा इति ।

---

१. मिवोक्तं

दोहयोः

यथा सन्निधेर्दैक्षार्थाः पशुधर्माः तथा सायमाम्नाता दोह-धर्माः सायन्तनदधिदोहार्था[1] इति संगतिः पूर्वपक्षश्च ।

राद्धान्तस्तु दधिपयसोरेकामावास्याकाले विधिः । अतो विशेषतो न दध्नः सन्निधिः । किंतु दध्नो दोहनस्य सायंकाले स्थानसन्निधिः । स च प्रकरणाद् दुर्बलः दोहनिर्वर्त्यद्रव्यद्वारा अधिकारविधिगृहीताः तद्विध्यन्वयश्चेह दधिपयसोरिति प्रकर-णात् द्वयोरपि[2] धर्माः पशुधर्मास्त्ववान्तरापूर्वीयपश्वन्विता न परमापूर्वगृहीता इति स्थानसन्निहितपश्वर्थाः सन्तु ।

लघ्व्यां राद्धान्तः, एक एव दोहो दध्यर्थः पयोर्थश्च काल-भेदमात्रं न दोहभेद इत्युभयार्थदोहद्वारत्वादुभयद्रव्यधर्माः

नैमित्तिकमतुल्यत्वादसमानविधानं स्यात्

नैमित्तिके फलचमसादौ चिन्ता—किमुपदेशत एव सोमादिधर्मान्वय उत नेति । तत्र सङ्गत्यवान्तरसङ्गती आह—नित्येष्विति । नन्वनित्यफल-चमसादौ नित्यधर्मान्वयायोगात् कथं पूर्वपक्ष इत्यत्राह—पूर्वेति । न तावत्फलचमसादेः प्रकरणपाठे विशेषः नापि धर्माणां नियोगसंबन्धद्वार-तानर्हता । अनित्यत्वं तु फलचमसादिपक्षे सोमादेरप्यसत्त्वात् समानम् । ततो नियोगसाधनत्वाविशेषात् फलचमसादेरप्युपदेशत एव धर्मान्वय इत्यर्थः ।

राद्धान्त इति । नित्यवदधिकारगृहीतानां धर्माणां नित्यमेव द्वारं युक्तम् । अन्यथा तेषां नित्यवद्ग्रहणबाधः स्यादित्यर्थः । ननु सोमादेरप्य-नित्यत्वमुक्तमित्यत्राह—पक्ष इति । वस्तुतः सत्यं तस्यापि पक्षेऽसत्त्वम् तथापि न तथा श्रुतिः । निरुपाधिकतया धर्माणामिव सोमादेः नित्यतया श्रुतेः । फलचमसादेस्तु नैमित्तिकत्वेन श्रुतिः । अतो नित्यानित्यसंयोग-

---

१. A सा यन्त न दोहार्था

२. A द्वयोरेव

प्रकरणाविनियोज्येष्वपि प्रकरणसाधारण्योक्तिः प्रकृतत्वाभिप्राया। प्रकरणात् स्थानमबल'-मित्यपि दोहे प्रकृते कालतः स्थान भेदमात्रमबलमिति भाष्यार्थः।

किंच दोहकालभेदोऽप्यर्थाद् द्व्यहसाध्यत्वाद्ध्नो न शास्त्रत इति दूरे भेदकता। एवं च बृहत्यां ग्राहकाख्यप्रकरणात् स्थानाबलतोक्तिः। इह दोहस्य प्रकृतत्वादबलं कालतः स्थानमुक्तम्।

तद्वत्

पूर्वपूर्वपक्षवदिहापि सन्निधेर्विशेषशङ्केति संगतिः। पूर्वः पक्षः। प्रातस्सवनविशेषसन्निहिता धर्मा इति प्रातस्सवनिकग्रहाणामेव, न सर्वसवनवर्तिनाम्। राद्धान्तस्तु सुत्याकाले धर्म-

---

विरोधात् यथाश्रुति नित्यद्वारता धर्माणां युक्ता। असत्त्वं पक्षे व्रीहियवयोरिवेत्यर्थः। कथं तर्हि नैमित्तिके धर्मलाभ इत्यत्राह—नित्येति। नन्वेवं कार्यापत्त्या धर्मप्राप्ताववश्यंभाविन्यां उपदेशे कः प्रद्वेषः इत्यत्राह—उपदेशे चेति। ननु विलम्बिन्या कार्यापत्त्या कथमुपदेशे शीघ्रे द्विरुक्तिरित्यत्राह—त्रिकालेति। सकृदुच्चरितस्य विध्यनुवादत्वेन द्विरुक्तिः स्यादित्यर्थः।

आचार्यैस्तु उपदेशातिदेशाभ्यां न मानान्तरं कार्यापत्तिरित्यतिदेशतो धर्मा उक्ताः। न च द्रव्ये द्रव्यधर्मातिदेशो नास्तीति वाच्यम्। यतो धर्माकाङ्क्षिणि द्रव्ये द्रव्यधर्मातिदेशोऽयं तदाह—भट्ट इति। तन्नेति न हि अननुष्ठेयं लौकिकं वस्तु स्वतो धर्मानाकाङ्क्षति। यदि परं लिङ्गदर्शनादाकाङ्क्षोत्थापनं तच्चेह नास्तीत्यर्थः। अत एवाभ्युदयेष्टौ दधिपयसोः कार्यापत्तित एव प्रणीताधर्मा इत्याह—कार्यापत्तेरिति। ननु तत्राप्यतिदेशत एव प्रणीताधर्मग्रहोऽस्त्वित्यत्राह—तयोर्हीति। अवश्यं तयोः प्रदेयतिधर्मातिदेशः। तत्र प्रणीताधर्माणामप्यतिदेशे अनेकस्माद्धर्मग्रहोऽष्टमाद्यनिरस्तोऽभ्युपगतः स्यादित्यर्थः। ननु कार्यापत्तिर्नाम न मानान्तरमित्यत्राह—कार्येति।

---

१. G J न बलम्

विधिः न सवनः विशेषे श्रुतिः। यथा वपया प्रातः सवन इति सुत्याहप्रचार एव सवनत्रयविभागेन श्रुतः न प्रातरादिकालभेदेन धर्मविधिरिति न विधिसन्निधिर्विशेषत[1] इति सर्वग्रहार्था धर्माः। यापि प्रातस्सवने धर्मश्रुतिः, सापि सुत्याकाले विधातुं तदवयवेनान्तरीयकी।

लब्ध्व्यामेवमुक्तं युक्तं, दोहधर्मा दोहैक्यादुभयार्था इति। इह तु प्रतिसवनं ग्रहभेदात्प्रातस्सवन आम्नाता धर्माः क्रमात्प्रातस्सवनीयग्रहाणामेवेति संगतिः पूर्वः पक्षश्च।

राद्धान्तस्तु ग्रहधर्मा हि ग्रहजात्या प्राकरणिककार्यवद्व्यक्तिमुपलक्ष्य श्रुता इति श्रुतिसन्निधापिताः कालभेदाम्नान-

---

साक्षादुपदेशातिरिक्तमुपदेशकोटितया धर्मान्वये आश्रयाश्रयितयान्वयेन शेषितान्वये मानम्। ऊहनयेनोहसमानन्यायतया सिद्धमित्यर्थः।

इदमत्राकूतम्। राजन्यप्रयोगे फलचमसेन नैमित्तिकेन नित्यसोमबाधे किमाश्रित्य नित्यवद्गृहीताभिषवादिधर्मप्रयोग इत्यपेक्षायां प्रयोगशास्त्रे विवक्षितविवेकप्रवृत्तिः किं सोमोपकाराय धर्मानुष्ठानं किं वा यदीयो धर्मः तदीयहविः प्रकृतिद्रव्योपकारायेति। तत्र यदीया धर्माः तदीयहविः प्रकृतिद्रव्यस्यैव विवक्षितत्वात् तदुपकारायैव धर्मानुष्ठानमिति निश्चिते प्रयोगविधिः फलचमसमप्याश्रित्य धर्मानुष्ठानमाक्षिपति। ननु किमिति नियोगशास्त्रेण विवक्षितविवेकप्रवृत्तिः। उच्यते। नित्यसोमादिद्वारैव ग्राहकान्वयस्य निर्वाहितत्वात् नित्यानित्यसंयोगविरोधेनानित्यद्वारत्वायोगात्। व्रीहिमन्त्रे तु विवक्षितविवेकसहकृतो वैकृतविधिरेव अतिदिष्टमन्त्रस्य नीवारशेषत्वे मानम्। इह न तथा नियोगान्तरम्। यत्रापि गोदोहनादौ नियोगान्तरं निबन्धनमते तत्रापि पशुकामापूर्वीयतारूपे चमसधर्माणां गोदोहनं प्रतिशेषताऽस्त्येव। न तु दर्शपूर्णमासोपकारकत्वरूपे तदर्थत्वस्य चमसद्वारैव निर्वाहितत्वात्। तत्र पशुकामापूर्वमाश्रयार्थं प्रकृतप्रकृत्युप-

---

१. A-सन्निधिविशेषः

सन्निधिं पीडयितुमलम् । न चैवं पशुधर्माः अपि पशौ श्रुताः सर्वपशूनां स्युः । पशु शब्दो हि व्यक्तिवाची सन्निहितव्यक्ति-विषयः । ग्रहशब्दस्तु जातिवाची जात्यन्वितव्यक्तिमात्रपरः प्राकरणिककार्यवद्व्यक्तिमात्रपर इत्यर्थः ।

रशनाचलिङ्गदर्शनात्

अस्तु ग्रहधर्माणां[1] विधेः सवनभेदेन सर्वार्थता । रशना तु दैक्षसन्निधिश्रुता दैक्षार्थैवेत्युत्थितेः संगतिः । पूर्वः पक्षः । रशनया यूपं परिव्ययतीति रशनाश्रुतिः । त्रिवृद्भवतीत्यादि तद्धर्मश्रुतिश्च दैक्षसन्निधाविति रशना तद्धर्माश्च दैक्षस्यैव उपेत्य पश्वङ्गत्वचिन्तेयम् । चतुर्थे यूपाङ्गं रशनेत्युक्तेः यूपद्वारैव वा परम्परया पश्वर्थत्वे चिन्तेयम् ।

जीवनपृथक्प्रयोजकं प्रकृतं च दर्शपूर्णमासापूर्वं पशुकामापूर्वप्रयुक्तगो-दोहनाश्रयतया चमसधर्माणामनुष्ठानमाक्षिपति न शेषत्वमिति दिक् ।

ननूपदेशतः कार्यापत्त्या वा धर्मान्वयो नानुष्ठाने विशेषः इत्या-शङ्क्य भाष्योक्तं प्रयोजनमाह—उपेति । ननु धर्माश्रितत्वात् गुणकामानां कार्यापत्त्या नैमित्तिकेष्वनुष्ठेयत्वात् तदाश्रितगुणकामानां कुतो न प्रवृत्ति-रित्याह—अस्यार्थ इति । धर्माश्रितगुणकामानां प्रकृतक्रत्वर्थधर्माश्रितता वाच्या । यद्यपि नैमित्तिकेऽपि धर्माः तथापि न ते क्रत्वर्थाः ग्राहकाददत्त-द्वारत्वादिति न तत्र गुणकामप्रवृत्तिरित्यर्थः । एतच्चाष्टमे व्यक्तमित्याह—अष्टम इति ।

प्रतिनिधिश्च तद्वत्

नित्ये मुख्यद्रव्यापचारे प्रतिनिधिः षष्ठे उक्तः । तत्र चिन्ता—किं मुख्येन सहासमानविधानम् उत समानविधानमिति । तत्रावान्तरसङ्गति-माह—पूर्वेति । ननु मुख्यसम्पत्त्यर्थत्वात्प्रतिनिधेः समानविधिरेव युक्त इति

---

१. धर्माणामविधेः B

राद्धान्तस्तु सर्वपशूनां यूपस्य तन्त्रत्वादेकयूपान्वयमुखेन सर्वपश्वार्था रशना तन्मुखेन धर्माश्चेति दैक्षसन्निधिः यूपान्वयादबलः ।

लघ्व्यां राद्धान्तः यद्यपि प्रतिपशु यूपकार्यंनियोजनभेदः । तथापि यूपस्य सर्वपशूनां तन्त्रत्वेना[१]-भेदात्तद्द्वारं सर्वार्थत्वम् । रशनया यूपं परिव्ययतीति शाब्दो यूपान्वयः ।

ननु सर्वपश्वर्थत्वे द्विरुक्तिदोषः; दैक्षादपि सवनीये चोदकप्राप्तेः, तन्न । यदि सवनीये चोदकप्राप्तयूपापेक्षया विधिः स्यात्, स्याद्द्विरुक्तिदोषः । तत्र यूपद्वारा त्वेकदैव सर्वपशुषु धर्माः ।

कथं पूर्वपक्ष इत्यत्राह—पूर्वेति । यथाशक्तिसम्पाद्येन नित्यकार्येण मुख्यस्याभावे प्रतिनिधिराक्षिप्यते न भावे इत्यभावनिमित्तत्वात् प्रतिनिधिरपि फलचमसवदनित्य एवेति कार्यापत्तिः । अतएव धर्मा इत्यर्थः ।

राद्धान्त इति । व्रीहिशास्त्रार्थो व्रीह्यवयवपर्यन्त इति षष्ठे वक्ष्यते । ते च व्रीह्यवयवा नीहारेषु सन्तीत्युपदिष्टमुख्यकार्यसम्पत्त्यर्थं एव प्रतिनिधिः न पुनः द्रव्यान्तरतया । किन्तूपदिष्टो व्रीहिशास्त्रार्थं एव किञ्चिद्विकलो-नीवारेषूपादीयत इत्यर्थः । किमिति तर्हि नीवारावयवोपादानमित्यत्राह—नान्तरीयक इति । द्रव्यान्तरावयवान्तर्भावेन विना उपादानाशक्तेरित्यर्थः । अशास्त्रलक्षणत्वादित्यादि भाष्येणैतदेवोक्तमित्याह—तदुक्तमिति । अत्रापि प्रयोजनं पूर्ववद्वेद्यम् ।

नियमार्था पुनः श्रुतिः

"यदि सोमं न विन्देत् पूतीकानभिषुणुयात्" इति श्रुते प्रतिनिधाविदानीं चिन्ता । किं कार्यापत्त्या मुख्यधर्माः उत उपदेशत एवेति । तदर्थमियं चिन्ता—किं द्रव्यान्तरविधिरयमुत प्रतिनिधिनियम इति । तत्रावान्तरसङ्गतिमाह—श्रुत इति । ननु षष्ठे प्रतिनिधिनियमोऽयमिति स्थिते कथमत्र द्रव्यान्तरविधिरिति पूर्वपक्ष इत्यत्राह—पूर्वेति । सत्यमुक्तम्

---

१. A पशुतन्त्रत्वेन

भट्टस्यान्यथा चिन्ता दैक्षे परिव्याणमाम्नाय पुनः सवनीये त्रिवृता यूपं परिव्ययेति परिव्याणमाम्नातम्। तन्निर्गुणपुनः-श्रुतेः परिव्याणान्तरम्। तद्द्रव्यं रशना लोकवेदसिद्धेत्युभयपरि-व्याणे रशना न विधेयेति न तत्र चिन्ता। किंतु किं धर्मिकेत्य-पेक्षायां दैक्षप्रकरणे त्रिवृतादिश्रुतेस्तद्धर्मिकेति पूर्वपक्षिते रशना च लिङ्गदर्शनादिति राद्धान्तः।

तन्न नावश्यं रशनैवार्थप्राप्ता, वाससापि परिव्याणदर्श-नात्। भाष्ये रशनाया अप्युदाहृतेः सर्वपशुषु चेयं चिन्ता लिङ्ग-दर्शनाभ्युच्चयार्था सवनीयोदाहृतिः।

तदिहाक्षिप्यते। सोमाभावे पूतीकानभिषुणोतीति सोमाभावनिमित्तक-द्रव्यान्तरविधिरेवायम्। अन्यथा कार्येणैव प्रतिनिधित्वेन पूतीकस्य प्राप्ते-रनुवादतया विध्यानर्थक्यं स्यादित्यर्थः। ननु यस्मिन् पक्षे न प्राप्तिस्तत्र विधिर्भविष्यतीत्यत्राह—न चेति। नित्यवद्विधिश्रुतिहानं स्यादित्यर्थः। नन्वेवं हन्त्यादेरपि विधिर्न स्यादित्यत्राह—हन्तीति। अपूर्वार्थतया न प्राप्तिरिति हन्त्यादौ विधिः। प्रतिनिधौ तु कार्येण स्वसंबन्धितयाऽऽक्षेपा-त्प्राप्तिरिति भेद इत्यर्थः।

राद्धान्त इति। यदि विध्यानर्थक्यं स्यात् स्यादेतदेवं इह तु प्रतिनिधि-रेव नियम्यत इति विधित्वम् नन्वपूर्वार्थताऽविकलावयवानां प्राप्तैवेति कथं विधिरित्यत्राह—नान्तरीयकेति। बहुव्रीहिरयं द्रव्यान्तराणामवयवा द्रव्या-न्तरावयवाः नान्तरीयका द्रव्यान्तरावयवा येषां सामान्यावयवानां ते तथोक्ताः। तादृशा नापूर्वार्थतया प्राप्ताः सुसदृशावयवान्तरसत्त्वात् लाघवादपेक्षितविधिश्च पूतीकावयवसाहचर्यविधिरित्यर्थः। नन्वेवं कथं नियमविधिरित्यत्राह—नियमस्त्विति। सुसदृशद्रव्यान्तरनिवृत्तिः फलमित्यर्थः। नन्वन्योक्तं श्रुतविकलावयवानामपि विधेयत्वमित्यत्राह—न त्विति। ननु पूतीकश्रुतिबलात् द्रव्यान्तरविधिरेव किमिति न भवतीत्यत्राह—पूतीकेति। लाघवापेक्षितविधिभ्यां साहचर्यविधिपरतैव, न द्रव्यपरतेत्यर्थः। ननु

आराच्छिष्टमसंयुक्तमितरैः सन्निधानात्

सर्वेषु प्रकरणाधीतेषु सकृत् धर्माः अप्रकरणाधीतांश्वदाभ्ययोर्न ग्रहधर्मा इत्येवं संगतिः। पूर्वः पक्षः, ग्रहशब्द उद्देशे व्यक्तिपरतया सन्निहितव्यक्त्युद्देशक इति नासन्निहितां श्वदाभ्ययोर्धर्माः।

राद्धान्तस्तु न सन्निहितमात्रमुद्देश्यं, किंतु प्रयोजनवदपूर्वसन्निहितं, सोमाधिकारा पूर्वगृहीतानां धर्माणां सौमिकमेव ग्रहजातीयं सन्निहितमपूर्वेण कृतमिति न पाठतः सन्निधिना उपसंहृतिः। श्रयणं तु मैत्रावरुणस्यैव श्रुतेः।

लब्ध्वां सन्निधिश्रुतग्रहेष्वेवाशु नियोगगर्भो विनियोग इति पूर्वपक्षे राद्धान्तः। नियोगः पश्चाद्गृहीतानामपि संस्कारा-

---

प्राप्ताप्राप्तविवेकेन पूतीकावयवविधिपरतैव स्यादिति शङ्का दिक्पदनिवर्त्या। निवृत्तिस्तु सोमाभाव इति श्रुतिस्वरसात्तावत् प्रतिनिधिनियमोऽयम्। प्रतिनिध्युपादानं च श्रुतसम्पत्त्यर्थमेव न द्रव्यान्तरतया। तच्च द्रव्यान्तरावयवोपादानं विना न शक्यमिति नान्तरीयकं विध्यनर्हमिति साहचर्यमात्रपरा पूतीकश्रुतिरिति। एतच्चाचार्यैरप्युक्तमित्याह—परोऽपीति।

संस्थास्तु समानविधानाः

सन्ति ज्योतिष्टोमे संस्थाः अग्निष्टोमः उक्थ्यः षोडशी अतिरात्रः अप्तोर्याम इति। सन्ति च दीक्षणीयादयो धर्माः। किमेते सप्तसंस्थेऽपि ज्योतिष्टोमे उपदेशत एव, उत अग्निष्टोमसंस्थ एवेति चिन्ता। तत्रावान्तरसङ्गतिमाह—श्रुतेति। नन्वावृत्तौ सत्यां तत्तत्संस्थता सैव कुतः सप्त सोमे न यजेतेत्येकस्यैव यागस्योत्पत्तेरित्याशङ्क्य पूर्वोत्तरपक्षसौकर्याय विषयं शोधयति—इहेति। सोमेन यजेतेति सोमाभिषवादिश्रुतेः रसभूतो यागसाधनं स चैन्द्रवायवादिश्रुतेरिन्द्रवाय्वाद्युद्देशेन ग्राह्यः। तदुद्देशेन

पेक्षया यावद्गृहीतार्थतां धर्माणामाह न च दण्डापूपनयात्सव-नान्तरीय-ग्रहार्थत्व-साधनव्यर्थता। इहान्यथोत्थितशङ्कानिरासात्।

अन्यङ्गप्रकरणे तद्वत्

अनारभ्याधीतग्रहयोरपि ग्रहधर्मा इत्युक्ते तद्वदिहापीति नयातिदेशात्संगतिः। पूर्वपक्षः, स्थलरूपचितिभेदाद्यच्चिति-सन्निधौ धर्माः श्रुताः तच्चितिशेषभूतेष्टकासु स्युरित्यधिका-शङ्का। न तु पूर्वपक्षैकदेशिशङ्का एकसोमद्रव्यान्वयादविशेषः सर्वग्रहाणाम् इहैकैकेष्टकाव्यापारान्वयादपि धर्म विधयोऽर्थवन्त इति इष्टकाव्यापारभेदे प्रयोजनभेदान्न भाव्यं धर्मैरिति। यत एकैकग्रहव्यापारभेदेऽपि सर्वग्रहाणां धर्माः।

ग्रहणदृष्टार्थत्वाय च तदुद्देशेन त्याज्यः यागीयं द्रव्यं प्रत्युद्देशाद्यागेपि इन्द्रवाय्वादयो देवताः तानि च ग्रहणानि पात्राल्पत्वात् ग्राह्यवैपुल्याच्च समुच्चितानि। तत्समुच्चयश्च यागावृत्तिमन्तरेणानुपपन्नः इति यागावृत्ति-रपि। तथा उक्थ्यादिग्रहणान्यपि कामाय चोद्यन्ते। ननु षोडश्यादिस्तोत्र-वाक्ये कथं ग्रहणचोदना तत्राह—यापीति। ग्रहं वा गृहीत्वेति ग्रहणनिमित्तक-त्वात्स्तोत्रस्येत्यर्थः। ननु उक्थ्यादिवाक्येषु कर्मश्रुतिबलादधिकारान्तर-प्रतीतेर्यागान्तरावगतेः कथं प्रकृतयागपरतेत्यत्राह—काम्यानीति। उक्थ्यं गृह्णातीति श्रुतेः कथं यागपर्यन्ततेत्यत्राह—तेष्विति। नन्वेवमपि कथं पूर्व-पक्षः उक्थ्यादीनां नैमित्तिकत्वात् फलचमसवत् समानविध्ययोगादित्य-त्राह—पूर्वेति। अस्यार्थः। दीक्षणीयादयो हि सोमेन यजेतेत्युत्पन्नयाग-धर्माः उक्थ्यादिष्वपि स एव यागः सन्निधरविशेषात् उत्पत्तेः सर्वार्थत्वात्। अत एव सन्तर्दने संस्थानिवेशेऽपि प्रकरणानुग्रह उक्तः। न चोक्थ्यादिग्रहणै-रेव यागोत्पत्त्याक्षेपः प्रकृतप्रत्यभिज्ञानात् प्रकृतयागीयरसविषयत्वाच्चो-क्थ्यादेः। तस्मादुक्थ्यादिष्वपि उपदेशत एव धर्मादिसंबन्धः। संस्थाव्यप-देशबलादप्युपदेशत एव धर्मसंबन्धः, अन्यथा धर्मरूपैन्द्रवायवादेरप्राप्ता-

नन्वेवं सन्निहितचितेरपि न धर्माः। मैवं, नेष्टकाशब्देनेहोद्देशः, किन्त्वखण्डामक्ष्णां कुर्यादिति प्रकृतापेक्षयैवाखण्डादिश्रुतिपर्यवसानात्, प्रकृतचिताष्टकानां धर्माशङ्का।

राद्धान्तस्तु उक्तमपूर्वेण गृहीतत्वाद्यावदपूर्वीयेष्टकाः सन्निधापिताः। सर्वाचितीषु चैकमपूर्वमिति सर्वत्र धर्माः। प्रकृतापेक्षाप्यखण्डशब्दस्यापूर्वसन्निधापितपूर्वा। लघ्व्यां न चयननियोगगर्भो धर्मविनियोगः। यदि स्यात् यावच्चयननिविष्टेष्टकानां सर्वासां धर्माः स्युः। अविकारापूर्वगर्भत्वे तु तत्सन्निहितेष्टकासु धर्मा इत्येवं शङ्किते चयननिवेशद्वारा सर्वासां चापूर्वान्वयात्सर्वासां धर्मा इति राद्धान्तः।

वुक्थ्यादेः संस्थात्वं न स्यादित्याह—यागेति। ननु पशुकाम उक्थ्यं गृह्णीयादिति ग्रहणचोदनानां नैमित्तिकत्वात् फलचमसवत् नित्यसंबन्धानर्हतेत्यत्राह—उक्थ्यादिति। सत्यं ग्रहणं नैमित्तिकं न तु तत्र धर्मान्वयशङ्का तस्य यागगुणत्वेन समत्वात्। किन्तु याग इत्यर्थः। लिङ्गं चेति। यद्यग्निष्टोम इत्यग्निष्टोमग्रहणं प्रचरणीहोमशेषप्रतिपत्तिधर्मविधौ समानविधान एवार्थवत्। अन्यथाऽग्निष्टोमस्यैव उपदेशना धर्मान्वये तद्विनापि अग्निष्टोमान्वयसिद्धेः तद्ग्रहणं व्यर्थमेवेत्यर्थः। अपरमिति। आग्नेयमजमग्निष्टोम आलभेन ऐन्द्राग्नमुक्थ्ये द्वितीयं ऐन्द्रं वृष्णिं षोडशिनि तृतीयम् इति पशुद्वितीयत्व-दर्शनं सामानविध्ये समञ्जसम्। अन्यथा उपदिष्टैन्द्राग्नेन अतिदिष्टाग्नेयबाधेन द्वितीयत्वं न स्यादित्यर्थः। अयं भावः अग्निष्टोमादयः स्वरूपेणैव पशूनां निमित्तं न संस्थात्वेनेति पशुद्वितीयत्वबलादवगतम्। अन्यथा एकस्मिन्नुक्थ्ये संस्थाद्वयाभावान्न द्वितीयता दृश्येत। अग्निष्टोम इत्येतावन्मात्रश्रुतेः। यद्यप्युक्थ्यादिः पशुकामनिमित्ततया श्रुते न षोडशिनि निवेशहिता तथापि विध्यन्तरादुत्तरोत्तरेषु पूर्वपूर्वनैमित्तिकमपि निविष्टम्। अत एवोक्थ्यादिस्वरूपसत्तया षोडशिनि पशुतृतीया। अथवा पशुद्वितीयत्वमेव लिङ्गं ग्रन्थकारस्याभिमतमिति। नन्विति। न प्रकृतिविकारभावेऽपि प्राकृतपशुबाधः। दशमे प्राजापत्येषु चाम्नानादित्यत्र-

नैमित्तिकमतुल्यत्वादसमानविधानं स्यात्

नित्येषु समानविधिं धर्माणामुक्त्वा नैमित्तिके समानविधि-चिन्तेति संगतिः पूर्वपक्षः। प्रकरणपाठा विशेषादधिकारविध्य-न्वयद्वारत्वार्हत्वाच्च[1] गोदोहनफलचमसादेरप्युपदेशादेव धर्माः। न च नित्यतया सोमचमसयोर्विशेषः, तयोरपि गोदोहनादिपक्षे असत्त्वात्।

राद्धान्तस्तु धर्मा हि नित्यमधिकारविधिगृहीताः तेषां नित्यमेव द्वारं, अनित्यद्वारत्वे नित्यग्रहण[2]-बाधात्। पक्षे नित्य-स्याप्यसत्त्वं वस्तुतः। श्रुतितस्तु धर्माणामिव नित्यतयेति। यथा-श्रुति नित्ययोर्द्वारद्वारिता व्रीहियवयोरिव वस्तुतः। पक्षे असतोः श्रुतितो नित्ययोर्हि नित्यधर्मद्वारता। नित्यकार्यापत्त्यैव नैमि-

---

अदृष्टार्थानां पशुयागानाम् एककार्यत्वानवगतेः समुच्चयस्योक्तत्वा-दित्यर्थः। सत्यमिति। युक्तस्तुल्यकार्यत्वानवगतौ समुच्चयः। इह तु सवनी-यसमाख्यया तुल्यकार्यत्वात् प्राकृतसवनीयकार्ये विधेर्बाध इत्यर्थः।

राद्धान्त इति। न हि सोमेन यजेतेत्यनेन उक्थ्यादिषु यागस्य प्रयोग-चोदना नित्यायाः यागोत्पत्तेर्नित्यभूतक्रत्वर्थाग्निष्टोमान्तग्रहणाख्य संस्कार-पर्यन्तत्वात्। उक्थ्यादिषु तु उक्थ्यादिग्रहा एव यागचोदनाक्षेपकाः। ऐन्द्र-वायवादयो नित्यग्रहा इति यागावृत्त्याक्षेपकाः। ततः किमित्यत्राह—एवं चेति। नैमित्तिकग्रहाक्षिप्तत्वेन यागानुष्ठानचोदनापि नैमित्तिकी। ततश्च नित्यव ग्गृहीतानां नित्यानुष्ठेयानां धर्माणां न अनित्यानुष्ठानोक्थ्यादिगृही-तत्वं, नित्यानित्यसंयोगविरोधात्। ननु प्रकृतैकयागविषयत्वात् उक्थ्या-देरपि कथं न धर्मान्वय इत्यत्राह—एकस्यापीति। यागस्वरूपस्यैकत्वेपि तदुत्पत्तेरुक्थ्यादौ नैमित्तिकग्रहाक्षेप्यत्वेऽनित्यत्वान्न फलचमसवत् नित्य धर्मान्वय इत्यर्थः। नन्वेवमुक्थ्याधिकारविधेरधर्मकस्य कथंकारं करणोप-

---

१. A द्वारत्वाच्च

२. A श्रवण

त्तिके तद्धर्मलाभः नोपदेशात्। उपदेशे च द्विरुक्तिदोषः। त्रिकालाप्राप्तौ हि विधिः स भाविप्राप्तिविषयेऽनुवादः अन्यत्र विधिरिति द्विरुक्तिः।

भट्टस्तु न कार्यापत्तिरुपदेशातिदेशाभ्यां मानान्तरमित्यतिदेशादेव नैमित्तिके धर्मानाह। द्रव्ये द्रव्यधर्मातिदेशोयम्। तन्न। न हि द्रव्यमननुष्ठेयं स्वतो धर्मानाकाङ्क्षति लौकिकम्। कार्यापत्तेरेव दधि-पयसोः प्रणीता धर्मा उक्ताः। तयोर्हि प्रदेयधर्मातिदेशः। यदि प्रणीता धर्मातिदेशोऽपि स्यात् तदा अनेकस्माद्धर्मग्रहोऽष्टमाद्ये निरस्तोऽभ्युपगतः स्यात्। कार्यापत्तिरपि धर्मान्वये मानमूहनयसिद्धम्।

उपदेशतः कार्यतो वा धर्मेषु नानुष्ठानभेद इति मत्वा प्रयोजनं गुणकामानां प्रवृत्तिरप्रवृत्तिर्वेत्युक्तम्।

कारसिद्धिरित्यत्राह—काम्येति। नन्वेवमपि कथं पशुद्वितीयत्वं लिङ्गमित्यत्राह—उपदिष्टेनेति। अग्निष्टोमपदमपि न्यायबलादनुवादकमेवेत्यत्राह—अग्निष्टोमेति। राद्धान्तेति। न जुहोतीत्युक्थ्ये होमाभावानुवादः लिङ्गं राद्धान्ते। तल्लिङ्गं, समर्थयितुं विषयं शोधयति—प्रचरणीति। भवत्वेवं तथापि कथं सामानविध्ये लिङ्गानुपपत्तिरित्यत्राह—न चेदिति। अस्यार्थः उपदेशतो धर्मसंबन्धे हि यथोपदेशं कार्यमिति प्रचरणीहोमशेषप्रतिपत्तिः होमाञ्जनाभ्यामुभाभ्यामपि स्यात्, स्विष्टकृदिडाभक्षणाभ्यामिव शेषप्रतिपत्तिरिति होमाभावदर्शनं न स्यात्। प्रकृतिविकारभावे तु प्राकृतहोमकार्ये वैकृतपरिध्यञ्जनविधेरुक्थ्ये होमाभावानुवाद उपपन्न इति। ननूक्थ्यादीनां यदि कामसंयोगादनित्यत्वात् धर्मानन्वयः तर्हि स्वर्गकामाधिकारस्याग्निष्टोमस्यानित्यतया उपदेशतो धर्मान्वयो न स्यात्। अथ प्रकरणाविशेषात्संबन्ध इति चेत् तुल्यमत्रापि। किञ्च सोमेन यजेतेति उत्पन्नस्य नित्योत्पत्तेरपि स्वर्गकामाधिकारसंबन्धो न स्यात्। ततः कथं नित्यानित्यसंयोगविरोधो धर्मानन्वयहेतुरित्याशङ्क्य राद्धान्तिनो भावमाह—

अस्यार्थः—ये धर्माश्रिता एव गुणकामास्ते प्रकृताधि(ष्ठि)-कृतक्रत्वर्थधर्माश्रिताः, तद्यदि नैमित्तिकेऽपि धर्माः क्रत्वर्थाः तदा तानाश्रित्य गुणकामप्रवृत्तिः कार्यंतस्तु ग्राहका दत्ते द्वारे न क्रत्वर्था इति न गुणकामे प्रवृत्तिरित्यष्टमे व्यक्तम् । आश्रयस्य तु भावाभावौ चिन्त्यावित्युक्तेः ।

प्रतिनिधिश्च तद्वात्

पूर्ववत्प्रतिनिधेरपि कार्यापत्तिशङ्केति संगतिः । पूर्वपक्षः । कार्येण यथाशक्ति संपाद्येन प्रतिनिधेराक्षेपादनित्यता फलचमसवदिति कार्यापत्तित एव धर्माः । राद्धान्तस्तु उपदिष्टेन कार्यसंपत्त्यर्थमेव न स्वातन्त्र्येण द्रव्यान्तरतया प्रतिनिधिः किंतूपदिष्टविकल्पोपादाननान्तरीयको द्रव्यान्तरावयवान्तर्भावः, तदुक्तं भाष्ये—द्रव्यान्तरावयवानाम् अशास्त्रलक्षणत्वमिति समानविधित्वम् ।

अयमिति । सोमेन यजेतेत्युत्पन्नस्य दशधाऽऽवृत्ताग्निष्टोमान्तयागस्य युक्तं जीवनकामोभयार्थत्वं तस्मिन् उक्थ्यादिविकारहीने यथास्थित एव नित्यकाम्यप्रयोगविधिद्वयादन्योन्यनिरपेक्षादेकदा प्रवृत्तादुत्पत्तेः । कामसंयोगात् इति नयेनोभयापूर्वविषये प्रयोगाक्षेपात् । अत उत्पत्तेरधिकारद्वयार्थतया तदन्वयिनां धर्माणामप्युभयार्थता । उक्थ्यादिषु न तथेत्याह—अनेकधेति । दशधाऽऽवृत्त एव प्रकृतयागे उक्थ्याद्यधिकावृत्तियुक्ते स स पश्वादिकामयोग इति तस्य तस्य काम्यविधेरधिकावृत्तिः । अयमर्थः—पशुकाम उक्थ्यं गृह्णीयादिति उक्थ्याद्यधिकावृत्तियुक्तं प्रकृतयागं कुर्यादिति । ततश्चोक्थ्याद्यधिकारविधिभिः नैमित्तिकं अधिकावृत्तिपर्यन्ततया प्रयोगान्तरमाक्षिप्तम् । ततश्च प्रयोगस्य पूर्वप्रकारात् प्रकारान्तरमवगम्यमानं पूर्वप्रकारं बाधित्वैव भवति । तदाह—नैमित्तिक इति । भवत्वेवमुक्थ्यादेरनित्यता । तथापि प्रकृतस्य यागस्यैकत्वात् प्रकरणविशेषात् धर्मान्वयः

नियमार्था पुनः श्रुतिः

श्रुते प्रतिनिधौ द्रव्यान्तरविधिशङ्केति संगतिः। पूर्वपक्षः। स्थितेऽपि षष्ठे प्रतिनिधिनियमेऽत्राक्षेपः। प्रतिनिधित्वेन पूतीकस्य प्राप्तानुवादत्वापत्तेर्विधिरयं द्रव्यान्तरस्य न च यस्मिन् पक्षे न प्राप्तिः तत्र विधिः नित्यविधिश्रुतिहानापत्तेः। हन्त्यादौ त्वपूर्वार्थतया पक्षेऽप्यप्राप्तेर्विधिरस्तु। इह त्वपूर्वार्थता विकलस्यापि प्राप्तेति भेदः। राद्धान्तस्तु प्रतिनिधिरेव नियम्यत इति विधित्वम्। नान्तरीयकद्रव्यान्तरावयवा नापूर्वार्था इति अपूर्वार्थतयाऽत्रापि विधिः। नियमस्तु फलं न तु श्रुतविकलावयवानामपि विधिः पूतीकश्रुतिः पूतीकावयवसाहचर्यपरा न तद्द्रव्यविधिपरेति सामानविध्यमिति दिक्।

परोऽप्याह—यागसाधनतां कुर्यात्पूतीकानां यदि श्रुतिः।
ततः स्यात्कार्यवर्तित्वं न चैवं सा प्रवर्तते ॥

किमिति न भवतीत्यत्राह—इति नित्येति। यद्यपि यागस्यैकत्वात् प्रकरणमविशिष्टं तथापि नित्यश्रुतधर्माणां प्रथमप्रतीतनित्यापूर्वार्थत्वे नित्यावस्थयागद्वारत्वे चोपदेशतोऽवगते पुनरप्युपदेशत एव विलम्बप्रतीतानित्यापूर्वार्थत्वं अनित्यावस्थयाग-द्वारत्वं च विरुद्धमित्यर्थः। नन्वेवं दीक्षणीयादिवत् ऐन्द्रवायवादि ग्रहणानामप्युपदेशत उक्थ्याद्यन्वयो न स्यादित्यत्राह—न चेति। न हि तत्र पूर्वसिद्धे नैमित्तिकयागे ऐन्द्रवायवादि-ग्रहणानामप्यन्वयः। किन्तु तैरेवोत्पन्नस्य यागस्य काम्याधिकावृत्त्यन्वयान्नैमित्तिकता। अतो न तत्र नित्यानित्यसंयोगदोषः। एवं चोक्थ्यादीनां संस्थात्वमपि सिद्धमित्यर्थः। न नु काम्याया अधिकावृत्तेरपि प्रकृतयागीयत्वात् प्रकृतयागान्विताया एवावृत्तेर्नैमित्तिकता न केवलाधिकावृत्तिरिति ना नित्यान्वयदोषः। एवं च सोमद्रव्ये ऐन्द्रवायवग्रहणादेः धर्मस्यानित्याधिकारविध्यन्वितस्यापि धवखदिरादिवत् वाक्याक्षेपाद्वा स्वरूपतो

संस्थास्तु समानविधानाः प्रकरणाविशेषात्

श्रुतप्रतिनिधाविव स्वतन्त्रद्रव्याश्रुतेः[1] समानविधिरित्युत्थितेः संगतिः। इहेयं स्थितिः—सोमेन यजेतेत्युक्त्वा सोमसंस्काराद्यभिषवादिश्रुतेः रसीभूतस्येन्द्रवाय्वाद्युद्देशेन ग्रहणश्रुतेः, तदुद्देशहृष्टार्थत्वाय तदुद्देशेन त्यागः यागीयद्रव्यं प्रत्युद्देशाद्यागेऽपि देवतालाभः। ग्राह्यवैपुल्यादल्पपात्रैग्रहणे ग्राह्यभागानामपि समुच्चयः तद्बलाद्यागावृत्तिः, एवमपराण्यप्युक्थ्यादीनि ग्रहणानि कामाय चोद्यन्ते। यापि कामाय स्तोत्र-श्रुतिः, सापि ग्रहण-निमित्तत्वात्स्तुतेः ग्रहणपर्यन्तैव, कानान्यपि ग्रहणानि प्रकृतयागीयरसविषयाण्येवेति तेषु स एव यागः। तेष्वायैन्द्राग्नाद्युद्देशश्रुतेस्तथैव त्यागः पूर्वः पक्षः।

उक्थ्यादिष्वप्येकत्वाद्यागस्य यागधर्मा उपदेशादेव। यागधर्मत्वेनैन्द्रवायवादिग्रहैरपि भाव्यम्। तेषां क्लृप्तक्रमत्वात् तदन्ते

गुणकामान्वय इत्यनुसन्धेयम्। ननु कथमग्निष्टोमादेः ज्योतिष्टोमसंस्थात्वमित्यत्राह—संस्थेति। वेदे तथा व्यपदेशादित्यर्थः याज्ञिकसमाख्यया वा संस्थात्वमित्यत्राह—याज्ञिकेति। ननु अग्निष्टोमादेर्यागनामत्वात् कथं संस्थात्वमित्यत्राह—अग्निष्टोमेति। स्तोत्ररूपाणां संस्थात्वमिति भावः। ननु स्तोत्राणामपि कथं यागसंस्थात्वं अन्यस्य शस्त्रादेरन्ते विद्यमानत्वादित्यत्राह—संस्थेति। स्तोत्रतः समाप्तिरत्र यागस्य संस्थताऽभिप्रेता। ततश्च ततोऽप्यन्ते शस्त्रादेः सत्त्वेपि स्तोत्रान्तराभावात् संस्थतेत्यर्थः।

लप्स्यामिति। अत्र ह्येवं पूर्वपक्षाक्षेपः नैमित्तिकमतुल्यत्वादित्यत्र गुणकामानां सामानविध्यं नास्तीत्युक्तम्। नित्यानित्यसंयोगविरोधात्। अनित्याश्चोक्थ्यादयः काम्याः तत्कथं तत्र धर्मान्वयशङ्का। किञ्च किमग्निष्टोमादेः शेषित्वेन तत्र धर्मान्वयशङ्का, किं वा निमित्तत्वेन तन्निमित्त-

---

१. A स्वतः द्रव्यान्तराश्रुतेः

काम्यैरपि(रि)इति संस्थाव्यपदेशोऽपि उक्थ्यादिग्रहणस्वरूपं तु धर्मभूतं प्रति नेयं धर्मान्वयाशङ्का समत्वात्। एवं च यदुक्तं नैमित्तिकस्य नोपदेशतो धर्मा इति, तदिहापि नैमित्तिकग्रहे न शङ्कितं। सोमयाग एव शङ्केयम् लिङ्गं च—यद्यग्निष्टोमो जुहोतीत्यत्राग्निष्टोमपदमर्थवत्। यद्यग्निष्टोमसंस्थ एवोपदेशक-स्तदा अनर्थकम्। अपरं लिङ्गं—पशोर्द्वितीयत्वम्। असामान-विध्ये ह्युपदिष्टेनातिदिष्टबाधान्न द्वितीयत्वम्। ननु पशु-यागानामदृष्टार्थतयोक्तः समुच्चयो दशमे सत्यं, इह तु सवनीय-समाख्यया प्राकृतसवनीय कार्यं विधेर्बाधः।

राद्धान्तस्तु इहानैमित्तिकाः क्रत्वर्था येऽग्निष्टोमान्ताः ग्रहणाख्याः संस्काराः तत्पर्यन्तैव सोमेन यजेतेत्यनेन यागस्य प्रयोगचोदना। तत ऊर्ध्वं काम्यत्वेन श्रुता उक्थादिग्रहा एव यागचोदनामाक्षिपन्ति। यथैन्द्रवायवादयो नित्यग्रहा आवृत्तिम्।

कतया क्रत्वन्वयशङ्का? न तावदाद्य इत्याह अग्निष्टोमेति। समत्वान्न मिथोऽन्वय इत्यर्थः। द्वितीयं पक्षमाह—अथेति। तन्नेति। निमित्तित्वं तेषामङ्गीकृत्य विचारे प्रतिनिमित्तं नैमित्तिकधर्मा अन्वीयन्त एव क्रताविति न राद्धान्त सिद्धिरित्यर्थः। पश्विति। अत्र किल पूर्वपक्षे पशुद्वितीयत्वदर्शनं राद्धान्ते नोपपद्यते अतिदिष्टबाधादिति समानविधि-त्वमाह। तत् निमित्तत्वाश्रयणेन विचारे अनुपपन्नम्। उक्थ्यसंस्था (पि)कक्रतावग्निष्टोक्थ्सयोर्निमित्तयोः सत्त्वात् अविरुद्धानेकनिमित्तपाते नैमित्तिकसमुच्चयात् पशुद्वयसमुच्चयोपपत्तेर्न तल्लिङ्गमित्यर्थः। राद्धान्त इति। एवं प्रतिनिमित्तं नैमित्तिकन्यायेन राद्धान्तेऽपि पशुद्वितीयत्वसिद्धेः वचनतः समाधिरप्ययुक्त इत्यर्थः। यदि प्रतिनिमित्तं नैमित्तिकं कथं तर्हि न जुहोतीति होमाभावदर्शनं निमित्तद्वयस्यान्योन्यमनुपमर्दनादित्याशङ्-क्याह—होमाभावेति। नैमित्तिकयोर्होमाञ्जनयोः सत्त्वेपि होमाभावदर्शन-मुपपन्नम् उक्थ्यनिमित्तकस्य होमस्याभावादित्येवं नित्यानुवादत्वादित्यर्थः।

एवं चोक्थादिषु यागस्यानुष्ठानचोदना नैमित्तिकी काम्यग्रहै-नैमित्तिकैराक्षिप्तत्वात् । नित्याश्च यागान्विता धर्मा नित्यानुष्ठानगृहीताः । अनित्यानुष्ठानगृहीतत्वे हि नित्यानित्यसंयोगविरोध इत्यत्रापि फलचमसवन्नोक्थ्य दि ग्रहणाक्षिप्तस्यैकस्यापि यागस्य धर्माः । काम्योक्थ्यादि । ग्रहणाक्षिप्तयागविषयस्याधिकारविधेः उपकारापेक्षायां सन्निहितनित्यसंस्थाधिकारविधेः उपकारग्रहणात् कार्यतो धर्मा इति । उपदिष्टेन बाधे वचनात् समुच्चयोऽस्तु । अग्निष्टोमपदमनु वा वादोऽस्तु । राद्धान्तलिङ्गं—होमाभावानुवादः । प्रचरणिहोमशेषाज्यप्रतिपत्तौ "यद्यग्निष्टोमो जुहोति" इत्यपि होमः । "यद्युक्थ्यः परिधिमनक्ति" इत्यञ्जनम् । न चेत् कार्ये विधिः न बाध इति 'न जुहोति' इत्यनुवादरूपं न स्यात् ।

अयं भावः—सोमेन यजेत इति स्वत एवानेकधा आवृत्तं अग्निष्टोमान्तम् । तस्मिन् यथास्थिते नित्यकाम्यप्रयोगविधि-

---

निमित्तपक्षे अग्निष्टोमग्रहणमपि न समानविधिलिङ्गमित्याह—अग्निष्टोमेति । तथा होमाभावदर्शनं न प्रकृतिविकृतित्वे लिङ्गं निमित्तपक्षे । तथाहि—किमग्निष्टोमादि होमादौ स्वरूपेण निमित्तं उत संस्थात्वेन ? न तावदाद्यः । अविरुद्ध-निमित्त-द्वयसन्निपाते नैमित्तिकसमुच्चयात् राद्धान्तेऽपि न होमाभावः । न द्वितीयः । संस्थात्वेनोक्थ्ये निमित्ते संस्थात्वेन नाग्निष्टोमो निमित्तमिति पूवपक्षेपि होमाभाव इत्यर्थः । दोषान्तरमाह—निमित्तेति । निमित्तत्वेन विचारे सन्देहोपन्यासे किं सर्वसंस्थे ज्योतिष्टोमे धर्मा इति पूर्वपक्षे वचनव्यक्तिरनुपपन्ना, न ह्येकस्य क्रतोरनेकाः संस्थाः अनेकाः समाप्तयः संभवन्तीत्यर्थः । माभूत् प्रयोगापेक्षयाऽनेकसंस्थत्वम् । विनियोगापेक्षया घटत एवेत्यत्राह—न चेति । तत्र हेतुः—नैमित्तिकमिति । प्रयुक्त्यवस्थायामेव नैमित्तिकधर्मान्वयः न विनियोगावस्थायां प्रयुक्तावेव

द्वयात् प्रयोगः । अनेकधा आवृत्त एवाधिकावृत्तियुक्ते स स काम-संयोग इति तस्य तस्य काम्यविधेरधिकावृत्तिः[1] । नैमित्तिकश्च प्रयोगो नित्यप्रयोगं बाधित्वेति नित्यश्रुतधर्माणामनित्यापूर्वार्थत्वम् अनित्यावस्थयागद्वारत्वं च विरुद्धम् । न चैवं दीक्षणीयादिनेव नित्यग्रहैरपि धर्मैः नानित्यान्वयः । तैरेवोत्पन्नस्य यागस्य काम्याधिकप्रक्षेपान्वयात् [2]नैमित्तिकता । न तु नैमित्तिके तेषा-मन्वय इति दिक् ।

संस्थाव्यपदेशश्चेत्थम्—सप्तसंस्थो ज्योतिष्टोम इत्युक्त्वा अग्निष्टोमोक्थ्याद्याः संस्था इत्युक्तम् । वेदे याज्ञिकसमाख्येयं वाऽस्तु । अग्निष्टोमोक्थ्याद्याः शब्दाः याज्ञिकप्रसिद्ध्या स्तोत्रे मुख्याः । ग्रहे यागे च लक्षणया । संस्था समाप्तिः स स्तोत्रतः समाख्यायते ततोऽप्यन्ते शस्त्राद्यस्तु नाम । स्तोत्रान्तराभाव एवान्तेऽन्य-संस्थता ।

निमित्तपातात् । अतोऽग्निष्टोमादेर्निमित्तत्वेन विचारोऽनुपपन्न एवेत्यर्थं । पूर्वपक्षं समर्थयते—नैवमिति । अग्निष्टोमादि-चोदनाभिरपि तत्तत्संस्थज्यो-तिष्टोमक्रतुरेव चोद्यते । अतो निमित्तत्वे नाग्निष्टोमादेर्निमित्तत्वेन चोदना । अतश्चैकस्यापि क्रतोः प्रयोगे नानात्वात् अनेकसंस्थात्वं तावदुप-पन्नमिति "ननु न दृष्टेऽनुपपन्नं नाम द्वाभ्यां चरणाभ्यामि"त्यादिग्रन्थेनेद-मुक्तमित्यर्थः । नन्विति । पशुकाम उक्थ्यं गृह्णीयादिति श्रुतेः तत्संस्थाया एव फलाय चोदना । न तत्संस्थक्रतोरित्यर्थः । तन्नेति । सत्यमेवं श्रूयते । तथापि न तत्संस्थाचोदना । किन्तु तत्संस्थक्रतुचोदनैवेयमित्यर्थः तत्र हेतुः—तत्र हीति । यत्र हि गुणमात्रस्य फलाय विधिः तत्र लोकत एव क्रतोर्गुणान्वयसिद्धिः । यथा गोदोहनेन पशुकामस्य प्रणयेदिति तत्र तत्र

---

१. A धिकारावृत्तिः

२. A प्रक्षेपान्नैमित्ति

लब्ध्यामेवं पूर्वपक्षाक्षेपः—अग्निष्टोमोक्थ्यादयः स्तोत्रभेदाः क्रतुगुणाः। न च गुणा दीक्षणीयादयो गुणार्थतया शङ्क्याः। अथ स्तोत्राणामङ्गि(ङ्ग)त्वमाश्रित्य नेयं चिन्ता, किन्तु नैमित्तिकत्वम्। तन्न। नैमित्तिकाः प्रतिनिमित्तं कार्या एव, न तत्र राद्धान्तः। पशुद्वितीयत्वदर्शनं च न पूर्वपक्षे लिङ्गम्। अविरुद्धानेकनिमित्तपाते नैमित्तिकसमुच्चयात्। राद्धान्ते च न वचनात् समाधिः न्यायादेव प्राप्तेः। होमाभावदर्शनं चोक्थ्यनिमित्तको होमो नेत्येवम्। अग्निष्टोमश्रुतिश्च निमित्तार्थेति न समानविधित्वे लिङ्गम्। तथा होमाभावानुवादो न प्रकृतिविकृतित्वे लिङ्गम्। संस्थात्वेनौक्थ्ये निमित्ते संस्थात्वेन नाग्निष्टोमो निमित्तमिति होमाभावः। निमित्तत्वेन च विचारे किं सप्तसंस्थे ज्योतिष्टोमे धर्माः उताग्निष्टोमसंस्थे इत्येवं न वाच्यम्। न ह्येकस्यानेकाः संस्थाः। न च प्रयोगे नानेकसंस्थत्वं विनियोगावस्थायामस्तु नैमित्तिकं प्रयुक्तावेव, तत्रैव निमितापातात्।

प्रकृताधिकारविधिप्रयुक्तप्रणयनाश्रितगोदोहनस्य फलार्थं विधिरिति गुणपर्यन्तैव क्रतोः प्रयुक्तिः। यत्राग्निष्टोमादौ न शास्त्राहदृते क्रतोर्गुणान्वयः तत्र गुणान्वितक्रतुरेव फलाय विधेय इति गुणफलविधित एव गुणान्वित क्रतुं प्रत्यपि प्रयुक्त्यन्तरमित्यर्थः। दृष्टान्तमाह—यथेति। ननु नित्याधिकारप्रयुक्तौ विद्यमानायामेव किमिति क्रतुपर्यन्तप्रयुक्त्यङ्गीकार इत्यत्राह—नित्येति। उक्थ्याधिकारविधेः काम्यत्वेनोत्कटत्वेन शीघ्रभावित्वात् तत्प्रयुक्तेः नित्याधिकारविधिः स्वविषयमपि प्रयोक्तुं तदोदास्त इत्यर्थः। कथं तर्हि तद्विषयसिद्धिरित्यत्राह—एवं चेति। प्रसंगाद्विषयसिद्धेः नित्याधिकारविधेरपि सिद्धिरित्यर्थः। नन्वेवं नित्यानधिकृतस्यापि संस्थास्वधिकारः स्यादिति चोदयति—नन्विति। नेदमिति। नित्ये जीवनवतोऽधिकारादनधिकृतः पुरुषो नास्तीत्यर्थः। काम्ये तु यद्यस्ति न तच्चिन्त्यमित्याह—काम्य इति। अत इति। यत एव गुणफलाधिकारविधीनामपि तत्तत्संस्थक्रतुप्रयोक्तृ-

मैवम् । प्रयोगानेकत्वादनेकसंस्थत्वमुक्तम् । ननु पशुकाम उक्थ्यं गृह्णीयादिति श्रुतिः नोक्थ्यसंस्थेन यजेतेति ।

तन्न, उक्थ्यसंस्थक्रतुचोदनेयम् । तत्र हि गुणमात्रम् फलाय । यत्र लोकतः क्रतोर्गुणान्वयाद् गुणपर्यन्ता क्रतोः प्रयुक्तिः । यत्र तु शास्त्रादृते न क्रतोर्गुणान्वयः तत्र गुणान्वितः क्रतुरेव, फलाय, क्रतुं प्रत्यपि, तत एव प्रयुक्त्यन्तरम् ।

यथा दाक्षायणयज्ञे आवृत्त्याख्यगुणान्वितक्रतोरेव फलार्थता, प्रयुक्त्यन्तरं च । नित्याधिकारप्रयुक्तिः स्वविषयेऽपि, तदोदास्ते एवं चाग्निष्टोमान्तः उक्थ्याधिकारप्रयोज्योक्थ्यादिमध्यपातात्तत्प्रयुक्त्युपजीवी । नन्वेवं नित्यामधिकृतस्यापि संस्थाधिकारः स्यात् । नेदमनिष्टं, यद्यस्ति तथाविधः, नित्ये जीवतोऽधिकारान्नास्त्यनधिकृतः । काम्ये अग्निष्टोमसंस्थे यद्यस्ति अस्तु, न चिन्त्यमिदम् । अत स्तत्तत्संस्थक्रतुप्रयोक्तृत्वाविशेषात्पूर्वः पक्षः । यथाऽग्निहोत्रधर्मा नित्यकामाधिकारार्थाः, लिङ्गं चाग्नि-

---

त्वं, अत एव तदविशेषात् समानविधितया पूर्वपक्ष इत्यर्थः । यथेति । यथाऽग्निहोत्रप्रकरणाम्नाता धर्मा नित्यकाम्यद्वयार्थाः तथेहापीत्यर्थः । लिङ्गं चेति । यद्यग्निष्टोम इत्यग्निष्टोमपदं सर्वाधिकारविध्यर्थत्वे धर्माणां होमरूपधर्मविशेषस्य केवलाग्निष्टोमसंस्थाधिकारसंबन्धार्थं स्वरसादर्थवत् । अन्यथा सर्वधर्माणां नित्याग्निष्टोमसंस्थाधिकारार्थत्वे होमविधावग्निष्टोमश्रुतिर्व्यर्थेत्यर्थः । पशुद्वितीयत्वमपीति । यद्यप्युक्थ्यसंस्थे आग्नेयं प्रतिनिमित्तभूतोऽग्निष्टोमोऽस्ति तथाप्युक्थ्यसंस्थाधिकारविधौ प्रयोक्तरि नाग्निष्टोमसंस्थाधिकारस्य प्रयोक्तृत्वं प्रसङ्गादेव तत्सिद्धिरिति तन्निमित्तपशव[न]नुष्ठानात् पशुद्वितीयत्वं न स्यादित्यर्थः ननु उत्तरसंस्थाधिकाराप्रयुक्तं यत् पूर्वसंस्थाधिकाराङ्गं तस्यापि प्रयुक्तिरस्त्वित्यत्राह—न चेति । तत्र हेतुः प्रयुक्तीति। यद्यङ्गमात्रोपजीवित्वं स्यात् तदा प्रयुक्त्युपजीवित्वाभावादन्येनाप्रयुक्ताङ्गार्थं प्रयुक्त्यन्तरं स्यादपि । अयं तु प्रयुक्तिप्रसङ्गः ।

ष्टोमपदं स्वरसादर्थवत्। पशुद्वितीयत्वं लिङ्गम्। उक्थ्यसंस्थे अग्निष्टोमसंस्थाधिकारस्याप्रयोक्तृत्वात्तन्निमित्तपश्वनुष्ठानं न स्यात्।

न च पूर्वसंस्थाधिकारप्रयुक्तिरपि, उत्तरसंस्थाधिकारे प्रसङ्गादेव तत्सिद्धेः। न च प्रसङ्गे यदङ्गं न प्रयुक्तं, तत्तत्प्रयोज्यमिति द्वितीयत्वप्रयुक्तिप्रसङ्गोऽयं नाङ्गप्रसङ्गः। न ह्येकस्यां प्रयुक्तौ प्रयुक्त्यन्तरमस्ति न तर्ह्ययं प्रसङ्गः। विद्यमाने स्वके विधाविति हि प्रसङ्गलक्षणमस्त्येव। तन्न, अस्त्येव स्वको विधिः। यदा संस्थान्तराभाव इति नाप्रयोजकत्वं प्रसङ्ग एव।

राद्धान्तस्तु, निमित्तानपेक्षा धर्मा निमित्तानपेक्षसंस्थानान्विताः। अन्यथा सापेक्षनिरपेक्षयोरन्वये विरोध इति। वचोभेदेन बृहत्युक्त एव राद्धान्तः लिङ्गं च न जुहोतीत्यञ्जसा होमकार्येऽञ्जनपाताद्धोम-बाधात्। न तूक्थ्य-निमित्तेन न जुहोतीति। एवं कथंचिदग्निष्टोमशब्दोऽनुवादोऽस्तु, न्यायानुसारात्। भाष्ये

ततः किमित्यत्राह—न हीति। नन्वेवं प्रसङ्गलक्षणविधुरत्वान्न प्रसङ्गोऽयमिति चोदयति—न तर्हीति। तन्नेति। यदा उक्थ्यादिसंस्थान्तराभावः तदा नित्यसंस्थाधिकारविधेः प्रयोजकत्वमिति प्रसङ्गोऽयं नाप्रयोजकत्वमित्यर्थः।

राद्धान्त इति। सत्यं प्रयोक्तृत्वमविशिष्टं तथापि नित्यसंस्थज्योतिष्टोमार्थत्वेव धर्माणां तेषामग्निष्टोमसंस्थस्य च निमित्तानपेक्षत्वात्। उक्थ्यसंस्थस्य तु निमित्तसापेक्षत्वात् सापेक्षनिरपेक्षयोरन्वये विरोध इति नित्यानित्यसंयोगविरोधात् बृहत्युक्त एव राद्धान्तः वचोऽन्तरेणोक्त इत्यर्थः। लिङ्गं चेति। न जुहोतीति होमाभावानुवादो होमकार्येऽञ्जनपाताद्धोमाभावात्। प्रकृतिविकृतित्वेऽञ्जसोपपन्न इत्यर्थः। विपक्षेऽनाञ्जस्यमाह—नन्विति। अग्निष्टोमशब्दश्च राद्धान्तन्यायानुरोधादनुवाद एवेत्याह—अग्निष्टोमेति। अत्र भाष्यं—काम्यो गुणो नित्यमर्थं विकृत्य निविशत इति तदयुक्तम्। न ह्यत्र नित्यस्य कस्यचिदर्थस्य बाधः यथा गोदोहनेन

काम्यो गुणो नित्यं विकृत्य निविशत इति नित्यस्य प्रयोजकत्वं विकृत्य काम्याधिकारः प्रयोजक इत्यर्थः ।

न तु यथा गोदोहनविनियोगो नित्यस्य विनियोगं विकरोतीत्येवं, नित्यस्यान्तर्भावोक्तेः । अपरं भाष्यम्—पशुकाम उक्थ्यं गृह्णीयान्न ज्योतिष्टोमकाम इति । तत्कथं ? न हि क्रत्वङ्गेऽपि क्रतुकामोधिकारि, अधिकृताधिकारनिषेधात् । इत्थं प्रयोगान्तरमिदं न नित्यप्रयोगनिवेशीत्यर्थः । यदि हि नित्यज्योतिष्टोमप्रयोग निवेशिता स्यात्, तदा फलतो नित्यज्योतिष्टोमकामस्य उक्थ्यानुष्ठानं न स्यात् । अपरापरभाष्यं व्याख्यासु व्यक्तम् । प्रयोजनं प्रकृतिविकारपक्षे सोमविकृतिषूद्भिदादिष्वसति विशेषलिङ्गे अग्निष्टोमविध्यन्तः ॥

इति भवनाथमिश्रविरचिते मीमांसा-
नयविवेके तृतीयस्याध्यायस्य
षष्ठः पादः ।

चमसस्येत्याशङ्क्य भाष्यार्थमाह– भाष्य इति । प्रयोजकत्वबाधपरं भाष्यं न गोदोहनादिवत् विनियोगबाधपरमित्यर्थः । अपरमिति । भाष्यानुभाषणमाक्षेप्तुम् । आक्षिपति—तत्कथमिति । अङ्गेप्यधिकृताधिकारनिरासात् क्रतुकामाधिकारो न युक्त इत्यर्थः समाधत्ते—इत्थमिति । यदि ज्योतिष्टोमप्रयोगनिवेशित्वं स्यात् तदाऽर्थात् क्रतावधिकृतस्योक्थ्यानुष्ठानं स्यात् । न चैतदस्ति । प्रयोगान्तरमेवेदं नित्यप्रयोगादित्यर्थः । अत्र सन्निधानात् नित्यस्येति कर्तव्यतेति यद्भाष्यं, यच्च कथं पुनः येयमिति—कर्तव्यतेति भाष्यं, यच्चासाधारणीत्यादि भाष्यं एवमादि सर्वं भाष्यं दीपशिखायामेव व्यक्तमित्याह—अपरेति ।

ननु सामानविध्ये प्रकृतिविकृतित्वे च नानुष्ठाने विशेष इत्यत्राह—प्रयोजनमिति ।

इत्यात्रेय......कृतौ नयविवेकदीपिकायां
तृतीयाध्यायस्य षष्ठः पादः

सप्तमः पादः

प्रकरणविशेषादसंयुक्तं प्रधानस्य

उक्ते एकं प्रतिशेषत्वे अनेकं प्रतिशेषत्वोक्तिरिति पादान्तरमनन्तरं च। पूर्वः पक्षः अधिकारविधिगृहीतस्य साक्षात्तत्साधन एव हविरासादने वेदे बर्हिषस्तद्धर्माणांखननलवनादीनां च शेषता।

राद्धान्तस्तु वाक्यानुरोधाद्ग्राहकोपकारकहविरासादनमात्रशेषता न वाक्य-संकोच इत्यङ्गप्रधानार्थता। भाष्ये उपकारोक्ति-

---

वरदराजीये तृतीयाध्यायस्य

सप्तमः पादः

प्रकरणाविशेषादसंयुक्तं प्रधानस्य

दर्शपूर्णमासयोः बर्हिषि हवींष्यासादयन्ति वेद्यां हवीष्यासादयन्ति इति बर्हिः वेदिश्चाम्नायते। तथा तद्धर्मलवनखननादयः। तत्र चिन्ता—किं ते प्रधानमात्रार्थाः उताङ्गप्रधानमात्रार्थाः इति। ननु केनार्थभेदोपाधिना पादभेदः? कथं वाऽऽनन्तर्यमित्यत्राह—उक्त इति। पूर्वमेकशेषिशेषता-चिन्ता, इह त्वनेकशेषिता पादार्थः एकशेषिषा अन्यनिरपेक्षतया शीघ्रगम्या। अनेकव्यापिशेषशेषता तु सापेक्षतया विलम्बगम्येति तदानन्तर्यमुभयत्रापि तदितरचिन्ता—प्रसङ्गादि नेत्यर्थः। ननु वाक्यादविशेषेण हविरासादनमात्रान्वयप्रतीतेः कथं प्रधानासादनमात्रार्थतया पूर्वपक्ष इत्यत्राह—पूर्वेति। ग्राहकगृहीतस्य बर्हिरादेः साक्षात् तत्साधने प्रधानहविरासादन एव शेषता, प्रधानप्रत्यासत्तेरपेक्षितत्वात्। अन्यथा ग्राहकाङ्गहविरासादनार्थत्वे प्रकरणावगतग्राहकार्थताहानम्। न च वाक्यविरोधः, प्रधानार्थस्यापि

स्तु सत्यपि वाक्ये यद्यङ्गान्वय उपकारेणादृष्टेन स्यात् तदा तत्कल्पनादोषादेव प्रधानमात्रार्थता उपकारसाम्यात् नायमपि दोष इत्यभिप्रेत्य ननु पिण्डपितृयज्ञहविर्व्याप्तित्वे वाक्यबलान्नग्राहकान्वयहानिरित्यतिदेशोपदेशाभ्यां बर्हिर्धर्महीने किं न स्युः । मैवं, अग्राहकीय व्याप्तौ ग्राहकीयनियमहानिरिति वाक्यं तदपेक्षं नान्यत्रापि शक्तम् । लिङ्गं चेत्थम् यद्येवंजातीयकमङ्गप्रधानार्थं तदाऽभिधारणक्रमपरे "स वै ध्रुवामेवाग्रेऽभिधारयति, ततो हि प्रथमावाज्यभागौ यक्ष्यन्" इति वाक्येऽभिधारणस्याज्यभागार्थतादर्शनम् ।

हविरासादनरूपस्त्वात् अतः कार्यवैरूप्यपरिहारार्थं प्रधानार्थतैव बर्हिरादेः तद्धर्माणां च स्विष्टकृदादि शेषकार्यवदित्यर्थः ।

राद्धान्त इति । वाक्यात् हविरासादनमात्रान्वयप्रतीतेः तदनुरोधादङ्गप्रधानासादनयोरुभयोरप्याधारदेशापेक्षित्वात् अपेक्षितविधेर्ग्राहकोपकारत्वेनैकरूपतया हविरासादनमात्रशेषता । न प्रकरणेन वाक्यसङ्कोचः । शेषकार्यं वैषम्यं चाज्यनय एवोक्तम् । न च ग्राहकार्थत्वहानिः अङ्गप्रधानार्थस्यापि ग्राहकसाधनतया तदर्थता निर्वाहादिति स्रुगधिकरण एवोक्तम्—'अथवाऽधिकारनियोगगृहीत'-मित्यादिना । अतोऽङ्गप्रधानार्थतैव बर्हिरादेरित्यर्थः । ननु श्रुत्यादितः शेषत्वं तत्कथं भाष्ये उपकारात्तदुक्तिरित्याशङ्क्य दृष्टादृष्टोपकार-वैषम्य[ात्] वाक्यादप्यङ्गप्रधानार्थता न स्यात् । तदप्यत्र नास्त्यभिप्रेत्योक्तमित्याह—भाष्य इति । नन्विति । यदि वाक्यं प्रकरणासंकोच्यं तह्युपदेशातिदेशाभ्यां बर्हिर्धर्महीनपिण्डपितृयज्ञव्यापित्वेऽपि सर्वथा ग्राहकान्वयाबाधात् तदर्थत्वमपि बर्हिरादेरस्त्वित्यर्थः । मैवमिति । ग्राहकपूर्विकैव वाक्याच्छेषता । तत्राग्राहकीयान्वये ग्राहकान्वयनियमहानिरिति ग्राहकापेक्षं वाक्यं न पिण्डपितृयज्ञहविरासदनान्वयशक्तमित्यर्थः। ननु ध्रुवायाः प्रथमाभिघारणं कथं बर्हिरादेरङ्गप्रधानार्थत्वे लिङ्गमित्यत्राह—लिङ्गमिति ।

फलसंयोगात्तु स्वामियुक्तं प्रधानस्य

पूर्ववदङ्गप्रधानार्थतेत्युत्थितेः संगतिः वपपादेर्यजमानसंस्कारत्वे स्थिते चिन्ता। पूर्वपक्षः द्वितीयाद्यश्रुतावपि वस्तुलिङ्गान्तर संस्कारत्वे कर्त्रवस्थसंस्कारता एवं हि कर्मार्थकर्तृद्वारा कर्मार्था धर्माः अधिकृतावस्थे तु कर्मप्रतिप्रधाने कर्माङ्गद्वारा कर्माङ्गं न स्युः। कर्त्रवस्थधर्मत्वे च कर्तुरङ्गप्रधानार्थत्वात्तद्वाराऽङ्गप्रधानार्थत्वम्। एवं च दैक्षार्थत्वे तद्विकृतिष्वपि स्युः।

राद्धान्तस्तु अधिकृतावस्थार्थैव कर्तृता। अधिकृतत्वं च कर्मजन्यापूर्व भागित्वम् अपूर्ववत्तया साध्ययैवा कांक्षितः करणेतिकर्तव्यतान्वय इतीति कर्तव्यता याः साध्याधिकाराव-

---

फलसंयोगात् स्वामियुक्तं प्रधानं स्यात्

सोमे केशश्मश्रु वपत इति वपनादयः पुरुषसंस्काराः श्रुताः। तत्र चिन्ता—किमेते अङ्गप्रधानार्था उत प्रधानार्था इति। तदर्थं चिन्ता—किं कर्तृसंस्कारा उत अधिकृतसंस्कारा इति। तत्रावान्तरसङ्गतिमाह—पूर्ववदिति। ननु वपनादेः यजमानसंबन्धितैव कुतः येन कर्त्रवस्थायामधिकृतावस्थायां वेति चिन्तेत्यत्राह—वपनादेरिति। ननु द्वितीयाद्यभावे नरसंस्कारतैव वपनादेः कुतः ? येन कर्तृसंस्कारतया पूर्वपक्ष इत्यत्राह - पूर्वेति। यद्यपि द्वितीयाद्यश्रुतिः तथापि वस्तुसामर्थ्यादेव वपनादेः नरसंस्कारता लोकसिद्धा। एतच्च विषयवेलायां वक्तव्यमपि अनास्थयाऽत्रोक्तम्। तच्च नरसंस्काररूपवपनादिकर्त्रवस्थान्वयी कुत इत्यत्राह—एवं हीति। क्रत्वर्थत्वे कुतः कर्मार्थितया तद्द्वाराऽवगतकर्मार्थिता निर्वाहो धर्माणाम्। अन्यथाऽधिकृतार्थत्वे कर्म प्रति प्रधानत्वात् तस्य कर्माण्यधिकृतार्थम्। न चोभयोरन्यार्थयोर्मिथोऽन्वय इत्यवगते कर्मार्थिताहानिरित्यर्थः। ननु भवतु कर्त्रवस्थान्वयिता तथापि कथमङ्गप्रधानार्थतेत्यत्राह—कर्त्रवस्थेति। ननूभयथापि यजमानसंस्कारार्थमनुष्ठेयमिति नानुष्ठाने विशेष इत्यत्राह—एवं चेति।

स्थालाभेन साधनभूतकर्तृत्वावस्थे नान्वयः। करणोपकारिता च करणसाध्याश्रययोग्यत्वोत्पादनानुग्रहात् अधिकृतावस्थार्थत्वे चाधिकृतो नाङ्गार्थं इति न तद्वाराऽङ्गप्रधानार्थता। लब्ध्यां राद्धान्तःअधिकृतावस्थापूर्विका कर्त्रवस्थेति पूर्वावस्थे मुख्यान्वयः॥

चिकीर्षया च संयोगात्

पूर्ववत्प्रधानार्थत्वमित्युत्थितेः संगतिः। पूर्वः पक्षः। शक्ष्यामहे इति श्रुतेः, शक्ष्यामहेऽस्यां कर्तुमित्यर्थः। चिकीर्षितेव च कर्तु-

---

राद्धान्तस्त्विति। साधिकारकार्यान्वयिता हि सर्वपदार्थानाम्। तत्र पुरुषस्य प्रथमं नियोज्यतयान्वयः ततोऽधिकारितया। ततः कर्तृतया। तथापि प्रतीतौ प्राथम्यात् साध्यत्वाच्च अधिकृतावस्थयैवाकाङ्क्षितः करणेतिकर्तव्यतान्वय इति साधिकारकार्यप्रत्यासन्नसाध्यरूपाधिकृतावस्थनरलाभे साधनभूत-कर्त्रवस्थे न धर्मान्वय इत्यर्थः। नन्वेवमधिकृतावस्थान्वये करणोपकारकता न स्यादित्यत्राह—करणोपकारितेति। अधिकृतावस्थान्वयेपि चित्रभित्तिन्यायेन च करणसाध्यनियोगाधिकरणयजमानात्मयोग्यतोत्पादनद्वारा नियोगकरणीभूतकर्मानुग्रहात् कर्मोपकारकता, फलमन्त्राणामिव नियोगीयफलस्मरणादपूर्वद्वारा उपकारजननाभावान्नारादुपकारकता। यद्यपि क्रियाणां कारकगतफलजनकत्वनियमः तथाप्यधिकृतसंस्कारः प्रयोजनं भवत्येवेत्यर्थः। नन्वधिकृतावस्थान्वयेऽपि न कथमुभयत्रार्थतेत्यत्राह—अधिकृतेति। प्रधानस्यैव तत्प्रत्यासत्तेरित्यर्थः।

लब्ध्यामिति। ऋत्वीयेनान्वयादृते न यागान्वय इति पूर्वपक्षे राद्धान्तः प्रधानत्वादधिकृतावस्थायाः पूर्वभावित्वाच्च तदवस्थान्वय इत्यर्थः। यागान्वयनिर्वाहस्तु निबन्धनवदित्यर्थः।

चिकीर्षया च संयोगात्

अस्ति सोमे महावेदिः षट्त्रिंशत्प्रक्रमाप्राची। चतुर्विंशतिरग्रेण विंशतिर्जघनेन इयति शक्ष्याम इति। तत्र चिन्ता—किमेषा प्रधानमात्रार्था

मुद्युक्तिः। चिकीर्षितं च प्रधानमेवापूर्वार्थक्रत्यन्वयादिति। सौमिको वेदिः प्रधानमात्रार्था। व्यक्तचिकीर्षितान्वयादुदाहृता सर्वस्य चिकीर्षितार्थान्विया दैष्टिक्यपि हविरासादनान्वितापि चिकीर्षितार्था सादनार्था इत्यत्राक्षेपः। एवंविधविषयव्याप्त्यर्थं तदर्थान्यङ्गानीति बहुवचनोक्तिः। अभिमर्शनं तु प्रधानवाचिपौर्णमासीशब्दार्थे श्रुतं, तद्धविराश्रित्य प्रधानार्थमिति न्यायाद्वचनाच्च पूर्वपक्षौ सहकृतौ तुल्यं राद्धान्तं सकृद्वक्तुम्।

राद्धान्तस्तु अधिकारविधिसिध्यर्थं साङ्गमेव प्रधानं चिकीर्षितमिति त्रिकीर्षितार्थं साङ्गप्रधानार्थमङ्गप्रधानासादनादिद्वारम्। अभिमर्शनमपि पौर्णमासीमिति द्वितीयया ईप्सित

उताङ्गप्रधानार्थेति। अवान्तरसङ्गतिमाह—पूर्ववदिति। नन्वस्मिन् वाक्ये चिकीर्षाद्यनवगतेः कथं तद्बलात् प्रधानमात्रार्थता वेदेरित्यत्राह—पूर्वेति। शक्ष्यामहे इति श्रुतेरयमर्थः। अस्यां कर्तुं शक्ष्यामहे इति। चिकीर्षिते कर्तुमुद्युक्तिः। चिकीर्षितं च प्रधानमेव। तस्यैवापूर्वार्थक्रत्यन्वयादिति सौमिकी वेदिः प्रधानमात्रार्था। एवं चिकीर्षितान्वयात् प्रधानमात्रार्थत्वेन केवलं सौमिकी विषयः। किन्तु ऐष्टिक्यपि व्यक्तचिकीर्षान्वयात् सौमिक्युदाहृतेति पूर्वतरनयोक्ताक्षेप इत्याह—व्यक्तेति। युक्तं चैतदित्याह—एवमिति। नन्वत्र भाष्ये वेद्यां पूर्वपक्षमुक्त्वा राद्धान्तमनुक्त्वा मध्ये विषयान्तरेऽभिमर्शने पूर्वपक्षितम् तत्र कोऽभिप्राय इत्याशङ्क्य तदनुवादपूर्वकमभिप्रायमाह—अभिमर्शनमिति। चतुर्होत्रा पौर्णमासीमभिमृशेत् पञ्चहोत्राऽमावास्यां इति प्रधानवाचिपौर्णमासीशब्दार्थे श्रुतमभिमर्शनं प्रधानमात्रार्थं वचनाद्युक्तं यद्यपि न साक्षात्प्रधानान्वयार्हं तथापि तद्धविराश्रित्य प्रधानमात्रार्थता तत्र विषयद्वयेऽपि राद्धान्तं सकृद्वक्तुं न्यायाद्वचनाच्च पूर्वपक्षौ सहकृतावित्यर्थः। (अपूर्वार्थक्रत्यन्वयोऽपि) राद्धान्तेति। सत्यं प्रधानं चिकीर्षितं न पुनः केवलं, अधिकाराविधिसाधनस्यैव चिकीर्षितत्वात् साङ्गप्रधानं तत्साधनमिति चिकीर्षितसाङ्गप्रधानार्थतैव वेदेरित्यर्थः।

प्रधानान्वयि। ईप्सितत्वं च साध्यसाधनतया साङ्गस्येति तत्रैव लग्नमिति ईप्सितान्वयितया तुल्यराद्धान्तता लघ्व्यामधिकं वेद्यां चिकीर्षितं प्रधानमेवेत्येतदानुगुण्या दन्तराभिमर्शनेऽपि पूर्वपक्षः पौर्णमास्यामभिमर्शनश्रुतिरेवमर्थवती।

यदि चिकीर्षितेन प्रधानेनैवान्वयः, अङ्गप्रधानार्थत्वे वृथा प्रधानशब्द इति।

राद्धान्तस्तु साधनतया प्रधानस्य चिकीर्षितता साङ्ग एव, पौर्णमासीमिति च संस्कार्यता कार्यान्तरोपयोगात् साङ्गस्यैव।

अपूर्वार्थकृत्यन्वयोऽपि साङ्गस्यैव यद्यपि प्रथमं तत्कृतिसंबन्धः प्रधानस्य तथापि वेदे राधारदेशत्वेन सौमिकमहाप्रयोगार्थतया विध्यपेक्षिततया अपेक्षितविधिबलादङ्गप्रधानार्थतैव युक्ता। उपांशुनयविषयवैषम्यं विषयद्वयेऽपि विकृतौ सर्वार्थ इत्यत्र वक्ष्यामः नन्वभिमर्शने वचनविरोधेन कथं राद्धान्त इत्यत्राह—अभिमर्शनमिति। तत्र हि द्वितीयया ईप्सिततमत्वमभिधीयते। साङ्गं च प्रधानं साधनतया ईप्सितमिति तत्रैव साङ्गप्रधानेऽभिमर्शनशेषतयाऽवगतमित्यर्थः। कथं तुल्यराद्धान्ततेत्यत्राह—ईप्सितेति।

लघ्व्यामिति। चिकीर्षितं प्रधानमेवेत्येतदनुगुणतया तदन्तराभिमर्शने पूर्वपक्षोत्थानम्। एवमादीनां प्रधानार्थतैव युक्ता। अत एव पौर्णमासीमभिमृशदिति पौर्णमास्यामभिमर्शनश्रुतिरर्थवती। अन्यथा अङ्गप्रधानार्थत्वे प्रधानशब्दोऽनर्थकः स्यादिति भावः। राद्धान्त इति। न हि प्रधानं कर्तव्यमिति प्रधानस्य चिकीर्षितता। किन्तु प्रधानेन कार्यं कर्तव्यमिति कार्यकरणतया कर्तव्यता करणस्य चिकीर्षा सेतिकर्तव्यता कस्येति सुसमाधानतया प्रधाने चिकीर्षा साङ्ग एवेत्यर्थः। ननु पौर्णमासीमिति प्रधानशब्दोऽनर्थकः स्यादित्यत्राह—पौर्णमासीमिति। न चेति। पौर्णमासीशब्दोऽपि द्वितीयाबलात् संस्कारतया साङ्गस्यैवोपस्थापकः साङ्गस्यैव साधनतया कार्यान्तरोपयोगादिति।

दीक्षादक्षिणम्

पूर्ववद्दीक्षादक्षिणमङ्गप्रधानार्थमित्युत्थितेः सङ्गतिः । कर्तृत्वे दीक्षा संस्कार इत्युपेत्य चिन्ता स्थापितं हि स्वामिसंस्कारोऽधिकृतार्थत्वेन प्रधानार्थो वपनादिरिवेति पूर्वः पक्षः । साङ्गप्रधानानुष्ठेयाङ्गं कर्तेति तत्संस्कारोऽपि तद्द्वारा साङ्गार्थः । सोमस्येति श्रुतेः साङ्गसोमस्यैवेत्येवमपि मुख्यार्थता । राद्धान्तस्तु सोमशब्दस्य प्रधानस्वरूपमेवार्थ इति वचनात्स्वरूपमात्रान्वयो भवति । अन्यथा व्यर्थः सोमशब्दः । तं विनाप्यङ्गप्रधानार्थत्वं कर्तृद्वारा सिद्धम् । यदि दक्षिणा प्रधानमात्रस्य न तर्हि क्रीतैरङ्गानुष्ठानम् । नैवम् । दीक्षणीयादीष्टिषु चोदकागतदक्षिणाऽस्तु ।

दीक्षादक्षिणं तु वचनात्प्रधानस्य

अस्ति सोमे 'तिस्रो दीक्षाः' इति । दक्षिणा च तस्य द्वादशशतं दक्षिणेति । तत्र चिन्ता — किं दीक्षादक्षिणमङ्ग-प्रधानार्थमुतप्रधानार्थमिति । तत्रावान्तरसङ्गतिमाह—पूर्ववदिति । ननु दीक्षा स्वामिनरसंस्कारतया अधिकृतार्थत्वेन प्रधानमात्रार्थेति पूर्वतरनयसिद्धमिति कथमत्रेयं चिन्तेत्यत्राह—कर्तृत्व इति । ननु दीक्षाः सोमस्य दक्षिणाः सोमस्येतिवचने सति कथं पूर्वपक्ष इत्यत्राह — पूर्वपक्ष इति । कर्तृसंस्कारत्वात् दीक्षादेः कर्तुश्च प्रयोगाङ्गत्वात् तद्द्वारा अङ्गप्रधानार्थतैव युक्ता । प्रधानमात्रस्य स्वयं कर्तृकत्वेन दक्षिणा तावन्न प्रधानार्था । अन्यथा प्रधानार्थत्वे अङ्गानां क्रीतर्त्विक्कर्तृकता न स्यात् । ततः साङ्गार्थवेत्यर्थः । ननु सोमस्येति श्रुतेः सोतमात्रार्थता, कथं साङ्गार्थतेत्यत्राह—सोमस्येति । साङ्गस्यापि सोमस्य सोमत्वान्मुख्यार्थतैवेत्यर्थः ।

राद्धान्त इति । यद्यपि सोमस्येत्यस्यानुवादतयापि संभवः तथापि विधौ संभवति नानुवादमात्रम् । तत्र सोमशब्दस्य प्रधानमेवार्थः । नाङ्गान्वयितापि । तेन वचनात् प्रधानस्वरूपमात्रान्वय इत्यर्थः । नन्वभिमर्शनवत् किमिति नाङ्गप्रधानार्थतेत्यत्राह—अन्यथेति । युक्तमभिमर्शनस्या-

एतच्चोपेत्योक्तम् । वस्तुतस्तु-प्रधानदक्षिणयैव प्रसङ्गादङ्गेष्वा-नतिरित्यङ्गानुष्ठानमुक्तं द्वादशे प्रधानार्थापि दक्षिणा स्वभाव-तस्तत्प्रयोगानतिकरीतिस्थितं तत्प्रयोगे च स्वतोऽङ्गान्तर्गतिरित्य ङ्गेष्वप्यानतिसिद्धिमालोच्य दक्षिणादानसंपादनादि तथैव प्रधानार्थत्वफलं तु सोमाङ्गविकृतिषु सोमदक्षिणानतिदेशः । लिङ्गं निरूढे पशौ षढ्ढोतृहोमेन दीक्षानुग्रहं ब्रुवन् अप्राप्तिमङ्गे दीक्षायाब्रूते । ननु नु प्राप्तस्यान्येन कार्यसिद्धावनुग्रहोक्तिः ।

मैवं, निरूढपशोः प्रकृतौ प्रधानप्रयुक्तदीक्षोपकारोपजीवनं, इह तु तदप्रयुक्तैर्वैगुण्यमाशंक्यान्येदानुग्रह इति वृद्धाः । लिङ्ग-मेव वक्तुमुपेत्य दीक्षोदाहृता ।

ङ्गप्रधानार्थत्वम् । पौर्णमासीपदेन द्वितीयान्तेन कार्यान्तरोपयोगिनः साङ्गस्यैव संस्कार्यतया उपस्थानात् अङ्गप्रधानार्थत्वेपि वाक्यस्य विधायक-त्वेनार्थवत्त्वात् । इह त्वङ्गप्रधानार्थत्वे व्यर्थः सोमशब्दः तं विनापि वस्तु-बलादेव दीक्षादक्षिणस्याङ्गप्रधानार्थत्वसिद्धेः । न च पदद्वयश्रुतिरूपवाक्य-विरोधे लिङ्गं क्रमत इति भावः । ननु प्रधानमात्रार्थत्वे दक्षिणायाः क्रीतर्त्विक्कर्तृकता अङ्गानां न स्यादिति चोदयति—यदीति । मैवमिति । चोदकागतैष्टिकदक्षिणया क्रीतर्त्विक्कर्तृकताऽङ्गानामित्यर्थः । नन्वेतत् द्वादशोक्तविरुद्धम् । प्रधानदक्षिणयैव प्रसङ्गादङ्गे सिद्धा आनतिरित्युक्ते-रित्यत्राह—एतच्चेति । कथं प्रसङ्गादानतिसिद्धिरित्याह—प्रधानेति । प्रयोग-संबन्धि दक्षिणास्वभावात् प्रयोगान्तः पात्यङ्गेष्वप्यानतिसिद्धिरित्यर्थः । नन्वेवं सति किं प्रधानार्थत्वे फलमित्यत्राह—प्रधानेति । अत्र भाष्ये निरूढ-पशौ षड्ढोतृहोमेन दीक्षानुग्रहं ब्रुवन् वेदः अङ्गेऽपि दीक्षां ब्रूत इति लिङ्ग-मुक्तम् तदनुभाषते आक्षेप्तुम्—लिङ्गमिति । आक्षिपति—नन्विति । अप्राप्त-स्यानुग्रहोक्तिनं युक्तेत्यर्थः । मैवमिति । निरूढपशोः प्रकृतौ दैक्षे प्रधानसोम-प्रयुक्तदीक्षोपकारोपजीवनम् इह निरूढपशौ तदभावाद्वैगुण्यमाशङ्क्य वेदोऽन्येनानुग्रहमाहेति सम्प्रदायः इत्यर्थः । दक्षिणाविषयेपि न्यायोपपत्तौ किमिति कृत्स्ना चिन्तया दीक्षोदाहृतेत्यत्राह—लिङ्गमिति ।

लब्ध्यां दीक्षायाः स्वामिसंस्कारत्वेन वपनादिवत्प्रधानार्थंत्वेऽपि न्यायान्तरं वक्तुं कर्तृसंस्कार[1]-तामास्थाय कार्यानुगुणं वचनमाशंक्य वचनतः कार्यमित्येवं राद्धान्तितम् वचोभंग्या बृहत्युक्तविधैवेयम् ।

तथा यूपस्य वेदिः

पूर्वत्रैव च प्रधानार्थंता श्रुतेः । इहापि यूपार्थंता वेदेरित्युत्थितेः संगतिः पूर्वपक्षः । अर्धमन्तर्वेदि मिनोतीति वचनाद्यूपाङ्गं वेदिः यूपार्थंमाने[2] वेद्यन्तर्विधेः । अर्धं बहिर्वेदीति तु प्रायप्राप्ता-

लब्ध्यामिति । दीक्षायां अधिकृतसंस्कारत्वेन वपनादिवत् प्रधानमात्रार्थत्वे सिद्धेपि न्यायान्तरं वक्तुं कर्तृसंस्कारत्वमभ्युपगम्य चिन्ता—किं यथाकार्यं वचनं यथावचनं वा कार्यमिति । कार्यार्थत्वात् कार्यानुगुणमेव वचनं युक्तमिति पूर्वपक्षयित्वा यथावचनमेव कार्यमुपदेशाधीनत्वात्प्रकृतौ कार्यकल्पनाया इति वचोभेदेन बृहत्युक्त एव वचनबलाद्राद्धान्त इत्यर्थः ।

तथा यूपस्य वेदिः

दैक्षे पशौ यूपे श्रुतम्—"वज्रो वै यूपः यदन्तर्वेदि मिनुयात् तन्निदहेत् यद्बहिर्वेदि अवरुद्धः स्यात् अर्धमन्तर्वेदि अर्धं बहिर्वेदि मिनुयात् अनवरुद्धो भवति न च निर्दहति" इति । तत्र चिन्ता—किमन्तर्वेदि-यूपाङ्गत्वेन चोद्यते उत सन्धिदेश इति । तत्रावान्तरसङ्गतिमाह—पूर्वत्रेति । यथा पूर्वत्र श्रुतिबलात्प्रधानार्थंता तथाऽत्रापि श्रुतेः यूपार्थंता वेदेरित्युत्थितेरित्यर्थः । ननु बहिर्वेदिपदैकवाक्यताबलात् सन्धिदेशविधिरेवेति कथं पूर्वपक्ष इत्यत्राह—पूर्वपक्ष इति । अर्धमन्तर्वेदीति श्रुतिबलात् यूपाङ्गतया वेदिविधिः । ननु वाक्ये यूपान्वयानवगतेः कथं तदङ्गतया विधिस्तदाह—यूपेति । अर्धशब्दस्य संबन्धिशब्दत्वात् कस्येत्यपेक्षायां प्रकृतयूपप्रतीतेः तदन्वयधीः यद्यपि

---

१. A संस्कारकार्यकरता
२. यूपाङ्गं

नुवादः। राद्धान्तस्तु वज्रो वै यूप इत्युपक्रमे "न निर्दहती"त्यन्ते वाक्येऽन्तर्गतान्तर्वेदीत्यस्य न श्रुत्यर्थग्रहः; बहिर्वेदिपदैकवाक्यतार्थं देशलक्षणार्थता। अर्धमन्तर्वेद्यर्धं बहिर्वेदिपदाभ्यां लक्षितदेशे यूपमानदेशत्वेनैकार्थविधिः। इतरथान्तर्बाहीरूपेणार्थद्वयं स्यात्। एवं च बहिर्वेदीत्यस्योपलक्ष्यार्थो नित्यान्वयी। विध्यर्थश्च। अन्यथा प्रायप्राप्तानुवादः स्यात्। किं चान्तर्वेद्यर्थे मुख्यविधिः। बहिर्वेद्यर्थे प्राप्तानुवाद इत्यपि दुर्निश्चेयं। वैपरीत्यस्यापि संभवात्।

विधीयमानवेदिः अधिकरणकारकतया क्रियान्वयार्हा तथापि यूपार्थमाने वेद्यन्तर्विधेः तद्द्वारा यूपाङ्गतेत्यर्थः। ननु अर्धं बहिर्वेदीत्यस्यापि विधौ वाक्यभेदः स्यादित्यत्राह—अर्धमिति। यूपार्थमाने वेद्यन्तर्विधेरर्धान्तरे देशानियतिरिति कदाचित् तदर्धं बहिर्वेदिरपि वेदेर्मेयमिति प्रायप्राप्तानुवादः। न च वैपरीत्यम् प्राथम्यादर्धमन्तर्वेदीत्यत्रैव विधेरित्यर्थः।

राद्धान्त इति। वज्रो वै यूप इत्यादे र्न निर्दहतीत्यन्तस्य पदजातस्यैकवाक्यता। तदन्तर्गतमर्धमन्तर्वेद्यर्धं बहिर्वेदीति च। तत्रार्धमन्तर्वेदीत्यस्य न मुख्यार्थता। बहिर्वेदि पदैकवाक्यताहानापत्तेः। अतः प्रतीतैकवाक्यताबलात् मासमग्निहोत्रं जुहोतीतिवल्लक्षणार्थतैव। ततश्च लक्षितसन्धिदेशस्य यूपाङ्गतया विधिरित्यर्थः। ननु लक्षणायामपि बहिर्वेदिपदैकवाक्यताहानिस्तदवस्थेत्यत्राह—अर्धमिति। न केवलमन्तर्वेदीत्यनेन देशलक्षणा। किन्तु अर्धमन्तर्वेद्यर्धं बहिर्वेदिपदाभ्यां लक्षिते सन्धिदेशे यूपमानमनुपपत्त्या पादकार्धसहिताभ्यामर्धमन्तर्वेद्यर्धं बहिर्वेदिपदाभ्यामित्यर्थः। न चैकस्यैव पदस्य लक्षकत्वमिति नियमः। स्तुतिपदेष्वनेकेषामपि लक्षकत्वदर्शनात्। न च तत्राप्यसिद्धिः अर्थवादनये निर्णीतत्वादित्यर्थः। ननु किमिति लक्षितसन्धिदेशत्वेन विधिः। यावताऽन्तर्बहीरूपेण देशविधिरस्त्वित्यत्राह—देशत्वेनेति। वाक्यभेदहानाय तथा विधानमित्यर्थः। ननु प्रायप्राप्तानुवादत्वेनापि बहिर्वेदिपदैकवाक्यतोपपत्तेः किमिति लक्षणाऽऽश्रितेत्यत्राह—

सामिधेनीस्तदन्वाहुरिति हविर्धानयोर्वचनात् सामिधेनीनाम्

पूर्वत्रास्तु बहिर्वेदिपदैकवाक्यतया लक्षणा । इह तु न तथेत्युत्थितेः संगतिः पूर्वःपक्षः । हविर्धानसामिधेन्यन्वयश्रुतेर्हविर्धानाङ्गं सामिधेन्यः । सामिधेन्यङ्गं वा हविर्धानं । न चोभयोरन्यत्र विनियोगादिह अन्यतरनियोगे विरोधः । एका हि दधिजातिः क्रतौ फले च विनियुक्ता दृष्टा । यद्धि न दृष्टं तद् विरुद्धम् । यदाहुः

विज्ञातविपरीतं हि विरुद्धमभिधीयते ।
एतदेवाविरुद्धं तु यद्यथा ज्ञायते तथा ॥

एवं चेति । नित्यश्रुतस्य बहिर्वेदिपदस्य नित्यवदन्वयार्थं लक्षणैव युक्ता । हविष्कृदेहीति नयाद्विधावपि लक्षणा उत्तिष्ठान्नाहेतिवद्युक्ता । न च निवीतादिसाम्यं विध्यर्थत्वे सति युक्तमित्यर्थः किञ्चेति । अन्तर्वेदिपदं विधायकं बहिर्वेदिपदमनुवादकमिति दुर्निश्चेयं वैपरीत्यसंभवात् । न च प्राथम्यान्निश्चयः विनियोगे प्राथम्यस्याकिञ्चित्करत्वादिति भावः ।

सामिधेनीस्तदन्वाहुरिति हविर्धानयोर्वचनात्सामिधेनीनाम्

सोमे दक्षिणोत्तरे हविर्धाने स्तः । तत्र श्रुतं—उत यत् सुन्वन्ति सामिधेनीस्तदन्वाहुरिति । अस्यार्थः । यस्मिन् हविर्धाने सोममभिषुण्वन्ति तत्र सामिधेनीरन्वाहुरिति । तत्र चिन्ता—किं हविर्धानं सामिधेन्यङ्गम् सामिधेन्यो वा हविर्धानाङ्गं विधीयते । उत हविर्धानसमीपदेश एव सामिधेन्यङ्गत्वेन विधीयते । तत्रावान्तरसङ्गतिमाह—पूर्वत्रेति । युक्तं बहिर्वेदि पदैकवाक्यतयाऽन्तर्वेदिपदस्य लक्षकत्वं । इह तथा पदान्तरैकवाक्यत्वाभावान्न लक्षणेत्युत्थितेः सङ्गतिरित्यर्थः । ननु कथं हविर्धानसामिधेन्योरन्यार्थतयाधीस्थयोरन्योन्यमङ्गत्वाशङ्केत्यत्राह—पूर्वेति । यत्सुन्वन्ति तदन्वाहुरिति हविर्धानसामिधेन्योस्तावदन्वयश्रुतिस्तद्बलादन्य-

राद्धान्तः—माभूद्वस्तुविरोधः धीविरोधो दुस्तरः । यदन्यार्थरूपेण धीस्थं न तदन्यार्थतया बोद्धुं शक्यम् । पूर्वैकलीनत्वेन धीस्थत्वबाधनं विना । न तु वस्तुस्वरूपे अन्यालीनतया[1] धीस्थे ऽनेकार्थत्वविधिविरोधो दध्यादावपि इत्यभिसन्धायोक्तं "यद्यथा ज्ञायते तत्तथे"ति । तथेह ज्ञानासिद्धिः । अतोऽयमन्यार्थान्वयो देशलक्षणार्थः । हविर्धानं च सदेश इति तदेव लक्षणा(र्थं)-र्हम् । ननु लक्षणा चेत् किमित्यत्र नाधिष्ठानलक्षणयाऽङ्गत्वम्[2] तन्न । कुत्रेत्यनवधृतेः अदृष्टोपकारकल्पनापत्तेश्च । हविर्धानमित्याख्यया च हविरन्वितावस्थधीः । सामिधेनीत्याख्यया च समिन्धनान्वितावस्थधीः । तयोरन्योन्यान्वितावस्थत्वे आख्यापीडापत्तिः ।

तरस्यान्यतराङ्गता युक्तेत्यर्थः । ननु विनियुक्तविनियोगविरोधात् कथमङ्गतेत्यत्राह—न चेति । न हि विनियुक्तविरोधो नाम वस्तुतो दोषोऽस्ति अतएवैकस्या एव दधिजातेः क्रतौ फले च विनियोगो दृष्टः । भवतु दर्शनं तथापि कथं न विरोध इत्यत्राह - यद्वीति । आचार्यैरप्येतदुक्तमित्याह—यदाहुरिति। । राद्धान्त इति । अन्यत्र विनियुक्तस्यापि स्वरूपेणान्यत्र विनियोगे माभूद्विरोधः । विनियुक्ताकारेणान्यत्र विनियोगे धीविरोधोऽस्तीत्यर्थः । एतदेवोपपादयति—नत्विति । दधिजातेः स्वरूपत एवोभयत्र विनियोगः । तथैव धीस्थितेः नान्यलीनत्वेन धीस्थितेरित्यर्थः । एतदेवाभिप्रेत्याचार्यैरप्युक्तमित्याह— इत्यभीति । ननु हविर्धानसामिधेन्योरन्योन्यान्वयप्रतीतेः अङ्गतेत्युक्तं तत्राह - अत इति । तयोः किं देशलक्षकं तत्राह—हविर्धानमिति । ननु देशलक्षणायामवश्यंभाविन्यामधिष्ठानलक्षणया किमिति नाङ्गत्वमिति चोदयति—नन्विति । तन्नेति । कुत्रैकत्रेत्यनवधृतेर दृष्टकल्पनापत्तेश्च नाधिष्ठानलक्षणा । न च भूतभव्यनयात् हविर्धानेऽधिष्ठानलक्षणानिर्धारणम्, उत यत्सुन्वन्तीति वर्तमानाभिषवव्यापृतस्य सामि-

---

१. A अनन्यलीनतया

२. A लक्षणार्हत्वम्

किञ्च सामान्येन हविर्धानान्वयः। विशेषतश्च यस्मिन् सुन्वन्ति तदन्वय इति अन्वयद्वयविधौ वाक्यभेदः स्यात् यथोक्तम-प्रकृताग्नेय्यन्वये आग्नेयीनये। अथ आक्षेपात् सामान्यान्वयः तथा-प्याक्षेपगौरवम्।

लभ्यामेवं राद्धान्तः—यदि हविर्धानविशेषान्वयविधौ सामान्यान्वयाक्षेपः तदाऽनपेक्षितविशेषविधिः स्यात्। पूर्वं हि सामान्यान्वये विशेषापेक्षया क्रियाक्षेपादेवाग्रदेशमात्रप्राप्तौ अपे-क्षितदेशभेदविधेः अपेक्षितविध्यर्थं लक्षणापि युक्ता विधिपरत्वाद-न्वयस्य। अन्वयहानं परं विध्यपेक्षया नेष्टम्। यद्भाष्ये हविर्धान-सामिधेन्योः कार्यान्तरार्थत्वमुक्तं तत् कार्यान्तरार्थोपात्तं स्वदेशं लक्षयितुमलमित्येवमर्थं, न तु बृहत्युक्तवत् अन्यार्थस्यान्यार्थत्वे-धोविरोधार्थम्।

धेन्यनुवचने व्यापारायोगात् दोषान्तरमप्याह—हविर्धानमिति। आख्यापीडा-पत्तेरपि नान्यतरस्यान्यतराङ्गत्वमित्यर्थः। किञ्चेति। हविर्धान-सामा-न्यान्वयः तद्विशेषान्वयश्च वाक्यविधेय इति वाक्यभेदः स्यात्। यथा आग्नेयीनये अप्रकृतान्वयपक्ष इत्यर्थः। शङ्कते—अथेति। दूषयति—तथा-पीति।

लभ्यामिति। अत्रापि श्रुतितः पूर्वपक्षे राद्धान्तः अप्राप्ते सामान्यान्वये विशेषान्वयश्रुतिरात्मानं न लभत इति। ननु प्रथममेव विशेषविधि-र्भवतु। तद्बलाच्च सामान्यान्वयाक्षेपोऽस्तु तत्राह—यदीति। तथा सत्यन-पेक्षित-विधानं स्यादित्यर्थः। अपेक्षाक्रमं दर्शयति—पूर्वमिति। ननु देश-लक्षणायामपि स एव दोषस्तत्राह—क्रियेति। नन्वेवं विधौ लक्षणास्या-दित्यत्राह—अपेक्षितेति। विध्यपेक्षाबलात् जघन्यवृत्त्या विध्यन्वय इष्टः। अनन्वयस्तु परं विध्यपेक्षया न युक्त इत्यर्थः। ननु सामिधेनीहविर्धानयो-र्भाष्ये अन्यार्थत्वादेव भाष्ये राद्धान्तितं नापेक्षितविधेरित्याशङ्क्याभि-प्रायमाह— यद्भाष्य इति।

शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्
तस्मात्स्वयं प्रयोगे स्यात्

उक्ते सामिधेनीप्रयोगाङ्गे देशे कर्तुः प्रयोगाङ्गस्य सामिधेन्याद्यङ्गेषु चिन्तेति सङ्गतिः । पूर्वः पक्षः—स्वामिकर्तृकं सर्वमधिकारसामर्थ्यात् अधिकारिणः कर्तृत्वश्रुतेः । अस्यार्थः—नियोज्यो हि कार्यं मत्कृतिध्सायमिति ज्ञात्वा साधनाधीनं साध्यमित्यवेत्य मम[1] यदुपयोगि तत्साधनमिति ज्ञात्वा तत्साधने मत्कृत्या मत्कृतिसाध्यता मत्कार्यस्येत्यालोच्य कर्तृतां यातीति अन्यस्मिन् कर्तरि अन्यकृतिसाध्यं कार्यं न स्यादित्युक्तं—

शास्त्रफलं प्रयोक्तरि

दर्शपूर्णमासादिकर्माण्युदाहरणम् । तेषु चिन्ता —किमङ्गप्रधानात्मकं सर्वं यजमानेन स्वयं कर्तव्यं उत उत्सर्गमात्रं स्वयं कार्यम् । अङ्गानि तु स्वयं वा परिक्रीतैर्वा परिक्रीतैरेव वेति । अवान्तरसङ्गतिमाह—उक्त इति । ननु परिक्रयणादिश्रुतिबलात् परिक्रीतकर्तृत्वप्रतीतेः कथं सर्वत्र यजमानकर्तृकतापूर्वपक्ष इत्यत्राह—पूर्वपक्ष इति । अधिकारश्रुतिबलात् सर्वं स्वामिकर्तृकमेवेति पूर्वपक्षो ग्रन्थ एवोक्त इत्यर्थः । ननु स्वर्गकाम इति अधिकारश्रुतिबलात् नियोज्यत्वमेव श्रुतं न कर्तृत्वं, तत्कथमधिकारिणः कर्तृत्वश्रुतिरित्युक्तम् । तच्च नियोज्यत्वमन्यकर्तृत्वेप्यविरुद्धमित्यत्राह—अस्यार्थ इति । सत्यं (वि)नियोज्यत्वेन श्रुतिः । स च नियोज्यः स्वकृतिसाध्यं कार्यमित्यवैति । एवं बुद्ध्वा तत्कार्यं साधनाधीनसिद्धीति तत्कार्यं साधनमपि स्वकार्ये साधनतया स्वोपयोगीत्यवैति । सोऽयमधिकारलक्षण उपादानाधीनान्वयः । सोऽपि श्रुतिमूलत्वात् श्रौत एव । ततश्चैवं ज्ञात्वा स्वकार्यस्य स्वकृतिसाध्यतासाधने स्वकृत्यैवेत्येवमालोचयन् तत्साधने कर्तृतां याति । सापि श्रुतिमूलोपादानगम्येति श्रौत्येव । सा चान्यकर्तृकत्वे न

---

१. A मदुपयोगी

सामर्थ्यादधिकारिणः कर्तृत्वश्रुतेरिति । यजेतेत्यात्मनेपदं प्रकृत्युपात्तकर्तरि फले लिङ्गं न तु सर्वं स्वामिकर्तृकमित्यत्रेति तन्नोक्तम् ।

आधाने आत्मनेपदादप्याधानकर्तुरन्यो न सर्वकर्तुः । एवं च प्रधानचोदनाज्ञात सर्वकर्तृत्वविरोधाद्वरणं परिक्रयार्थम् । दानं चादृष्टार्थम् । परिक्रयोक्तिर्गौणो । मैत्रावरुणादिपदं कथञ्चित् स्वामिन्येव प्रवृत्तमिति स्वामिकर्तृकं प्रैषाख्यमपि । आध्वर्यवाख्यातग्रन्थाधीतत्वात् कर्मण्याध्वर्यवोक्तिः ।

अनियमपक्षस्तु द्रव्यत्यागमात्रं स्वयम् । स्वस्य त्यागात् । कर्मार्थमानतो हि स्वत्यागानर्हं इति शेषमन्यः स्वयं वा कुर्यात् । क्रीतैरपि कृतं प्रयोक्तृत्वेन स्वकृतं प्रयोजकस्यापि कर्तृत्वस्मृतेः ।

स्यादिति । एतत्सर्वमभिसन्धायोक्तम्—सामर्थ्यादधिकारिणः कर्तृत्वश्रुतिरिति ।

अत्रान्यैरात्मनेपदलिङ्गात् सर्वं स्वामिकर्तृकमेवेत्युक्तम् । तन्न युक्तम्—किं यजेतेत्यात्मनेपदं लिङ्गं किं वा आदधीतेत्यात्मनेपदं ? न तावदाद्यः इत्याह—यजेतेति । सर्वस्य स्वामिकर्तृकत्वे तस्याशक्तेस्तन्नोक्तमित्यर्थः । न द्वितीय इत्याह—आधान इति । ननु वरणपरिक्रयविधि-प्रैषमैत्रावरुणविधिहौत्रादिसमाख्याबलात् अन्यस्य कर्तृत्वमेवेत्यत्राह—एवं चेति । अनियमेति । स्वद्रव्यत्यागात्मकत्वात् यागस्य अन्येषां त्यागानर्हत्वात् शेषस्यैव तैरपि करणम् एवं च प्रयोजकस्यापि कर्तृत्वस्मृतेः स्वक्रीतैरपि कृतं प्रयोजकत्वेन स्वकृतमेवेत्यर्थः । नन्वेकदेशे स्वकर्तृत्वमेकदेशे परकर्तृत्वमपीति वैरूप्यपरिहाराय सर्वत्र साक्षादेव कर्तृत्वाक्षेप इत्यत्राह—अधिकारिण इति । प्रयोगलाघवात् कर्तृत्वमाक्षिप्तं नाहत्यैवेत्यर्थः । एवं च परिक्रयादेरन्यथा वर्णनमपि नास्तीत्याह—इति नेति । ननु ग्रन्थ एव समाख्या मुख्येत्यत्राह—न चेति । ननु नित्यश्रुतपरिक्रयादेः शेषमन्यैरेवेति नियम एव युक्त इति चोदयति—नन्विति । तन्नेति । परिक्रयादिविधिर्हि

अधिकारिणो हि कर्तृत्वमाक्षिप्तं नाहत्यैवेति नानियमे विरोध इति न परिक्रयोक्तिर्गौणी। न च वरणादेरदृष्टं कल्प्यम्। न च मैत्रावरुणादौ कथञ्चिद्वृत्तिः। न चाध्वर्य्वाद्याख्या कर्मण्य-मुख्याः[1] ग्रन्थतोऽङ्गीकार्याः। न च ग्रन्थ एवैता मुख्याः अध्ययनकाले अध्वर्युत्वाद्यर्थानुत्पत्तेः। ननु परिक्रयानित्यश्रुतेः शेषमन्यैरेवेति स्यात्। तन्न। दृष्टार्थत्वाय स्वाशक्तावन्यापेक्षायां परिक्रयादिविधिरनित्योऽस्तु।

राद्धान्तस्तु नित्यश्रुतपरिक्रयादि अशक्तिपक्षे न, नित्यानित्यसंयोगविरोधदोषात्। लोके तु मानान्तरादनित्यतास्तु।

सहायार्थमन्यसहायापेक्षया। सहायापेक्षा चाशक्तावेव लोके दृष्टा। अतोऽन्योपादानरूपपरिक्रयादेर्दृष्टार्थत्वाय अशक्तावेव परिक्रयादिविधिरनित्योऽस्त्वित्यर्थः।

राद्धान्त इति। नित्यश्रुतं परिक्रयादि नानित्यपक्षे युक्तं, नित्यानित्यसंयोगदोषात्। लोके तु दृष्टार्थतया मानान्तरादनित्यता युक्ता। इहत्वलौकिकार्थरूपनियोगो नित्यवत्परिक्रयश्रुतेः परिक्रीतपुरुषकर्तृकाङ्गसाध्य एव। अतः प्रधानमात्रं स्वकर्तृकम्। अन्यत्सर्वं विशेषविधिशून्यं परिक्रीतकर्तृकमेवेत्यर्थः। नन्वधिकारश्रुतिबलादवगतं सर्वत्र स्वयंकर्तृत्वं हीयेतेत्यत्राह—एवं चेति। नियोज्यो हि अन्यकृत्यव्यवहितकृतितसाध्यतयैव कार्यं स्वतोऽवैति वरणादिचोदनाबलात्तु अन्यकृत्यन्तर्भावः। एतदुक्तं भवति—स्वामिन एव सर्वत्र साक्षात्कर्तृत्वं, व्यापारमात्रं तु अन्यव्यवधानेन यथा पुरोडाशस्य अवदानद्वारेणेति। नन्वेवमृत्विजां कर्तृत्वे फलभागित्वमपि स्यात् तत्राह—कर्तृत्वेऽपीति। ननु ग्रन्थे स्वामिनः प्रयोजककर्तृत्वमेवोक्तं न साक्षात्कर्तृत्वमित्यत्राह—स्वामिन इति। प्रेरणमात्रविवक्षया तदुक्तिः स्वतन्त्रकर्तृत्वं तु यजमानस्यैव। स एव स्वतन्त्र ऋत्विजोऽपि कर्तॄन् अनुग्राहकान् करोति। तेषामेव याजनम्। यजनं तु स्वामिन एवेत्यर्थः। युक्तं

---

१. A कर्मणां मुख्याः

एवं चान्यकृत्यन्यवहितं स्वकृतिसाध्यं कार्यं स्वतो नियोज्योऽवैति । वरणादिश्रुतेस्तु अन्यकृत्यन्तर्भावः ।

कर्तृत्वेत्यृत्विजां नापूर्वफले विधेरधिकृतगतफलाक्षेपोक्तेः फलंच पुरुषार्थत्वादिति । स्वामिनो यत्प्रयोजककर्तृत्वमुक्तं तदृत्विक्प्रेरणामात्रविवक्षया स्वाम्येव स्वतन्त्रः । ऋत्विजोऽपि कर्तृननुग्राहकान् करोतीति तेषामेव याजनम् । क्रत्वर्थहिंसायां वैधी स्वामिप्रवृत्तिः । ऋत्विक् प्रवृत्त्यन्तेति नर्त्विजां निषेधातिक्रमः ।

लभ्व्यां वचोभेदेन बृहत्युक्त एव राद्धान्तः, अनियमपक्षे युक्तिः परिक्रयत्वेनाश्रुतेरुभयथा च कर्तृत्वादिति । अयं च

चैतदित्याह—क्रत्वर्थेति । यत एवं यजमान एव स्वतन्त्रकर्ता ऋत्विजस्तु याजका एव अत एव क्रत्वर्थहिंसायां वैधी स्वामिप्रवृत्तिः ऋत्विक्प्रवृत्त्यन्तेति न ऋत्विजां निषेधातिक्रम इत्यर्थः ।

लभ्व्यामिति । राद्धान्ते बृहत्युक्तप्रकारान्नातिभेदः अनियमपक्षे युक्तिस्तु अन्यथा । ऋत्विग्भ्यो दक्षिणां ददातीति नायं परिक्रयः परिक्रयत्वेनाश्रुतेः अधिकारतस्तु कर्तृत्वमुभयथा प्रतिपन्नं स्वयं वा परप्रयुक्त्या वा उभयत्रापि लोके दर्शनादित्यर्थः । ननु परप्रयुक्त्यापि कर्तृत्वोपपत्तौ कथमनियमः दुःखं कर्मेति स्वकर्तृत्वायोगादित्यत्राह—अयं चेति । यो गन्धार्थदक्षिणां दातुं न शक्तः स स्वशक्त्यनुरूपदक्षिणानर्त्विक्संभवे परैः कारयेत् । असंभवे च स्वयं इत्यनियमपक्ष इत्यर्थः । यस्मिन् कर्मणि दक्षिणा न श्रुता तत्राप्यनियम इत्यर्थः । नन्विति । दक्षिणाद्यश्रवणे स्वकर्तृत्वनियत्वे नियम एवेत्यर्थः । तन्नेति । दक्षिणाद्यश्रुतावपि यत्राल्पानुष्ठेये स्वतोऽन्यतो वा कुर्यादिति श्रुतिः तत्र सामादिनापि व[न]रानतिसंभवात् तदभिप्राया अनियमपक्षोक्तिरित्यर्थः । कथं तर्हि तन्निरासस्तत्राह—नानियम इति । यद्यपि परिक्रयत्वेन न श्रुतिः तथापि दक्षिणाश्रुतिः परिक्रयश्रुतिरेव ऋत्विग्भ्यो दक्षिणां ददानीति । नन्वदृष्टार्थतयाप्युपपन्ना सेत्यत्राह— दक्षक-

पक्षस्तत्त्वतो दक्षिणानुपसंहारे यत्र च दक्षिणा न श्रुता ।

ननु यत्र दक्षिणाद्यश्रुतिः तत्र स्वकृतिमात्रनियम एव । तन्न । दक्षिणाद्यश्रुतावपि यत्र स्वतोऽन्यतो वा कुर्यादिति श्रुतिः तदभिप्रेत्यानियमोक्तिः । नानियमोऽत्र । दक्षिणाश्रुतिरेव परिक्रयश्रुतिः; दक्षकरी हि दक्षिणेत्युच्यते ।

तत्रार्थात् कर्तृपरिमाणं स्यात्

उक्ते अन्यकर्तृत्वे अन्यकर्तृसंख्या[1] चिन्तेति संगतिः । पूर्वः पक्षः । नात्र कर्तृसंख्यानियमः । कार्यार्थं ह्यन्योपादानम् । अतो यावतोपात्तेन कार्यं शक्यं तावदुपादेयम् । न चाल्पोपादाने

रीति । अस्यार्थः—सोमस्य दक्षिणेति दक्षिणा तावत् सोमाङ्गम् । न चोपकारशून्यमङ्गमिति उपकारापेक्षायां दृष्टे कर्त्रानतिरूपे नादृष्टार्थता युक्तेति कर्त्रानत्यर्थैव, दक्षिणाशब्दस्वारस्याच्च । दक्षकरी हि दक्षिणोच्यत इति । दक्षिणाश्रुतिरेव परिक्रयश्रुतिरित्यर्थः ।

तत्रार्थात् कर्तृपरिमाणं स्यात्

स्थितेऽन्यकर्तृत्वे इदानीं चिन्त्यते—किं यावत्कार्यमनियमसङ्ख्या उपादेया उत यावद्वरणं भिन्ना नियतसङ्ख्या इति । तत्रावान्तरसङ्गतिमाह—उक्त इति । ननु अध्वर्युं वृणीते इत्यादि वरणोत्पत्तिवाक्ये संज्ञाभेदात् नियतसङ्ख्या भिन्ना एवोपादेया इति कथं पूर्वपक्ष इत्यत्राह—पूर्वेति । ऋत्विजो वृणीते इत्यत्र न तावत् सङ्ख्यानियमश्रुतिः । कार्यार्थं हि अन्योपादानं यावता चोपात्तेन कार्यसिद्धिः तावानुपादेय इति एको द्वौ बहवो वेत्यर्थः । ननु अल्पसङ्ख्योपादाने समाख्याभेदो वरणभेदश्च न घटत इत्यत्राह—न चेति । वृक्षतरुवत् एकस्यापि नानानामत्वं तत्तत्कर्मार्थं वरणभेदश्च घटत इत्यर्थः । नन्विति । अन्याय्यश्चानेकशब्दत्वमिति नयात् प्रतिनाम नरभेद एव, मानान्तरान्तु वृक्षाद्यवगत्या नानानामतेत्यर्थः । तन्नेति । उपादानलाघवादेकस्यापि नानानामत्वं युक्तमित्यर्थः ।

---

१. B+R तत्संख्या

आख्यावरणयोर्हानिः । एकस्यापि नानानामत्वं वृक्षतरुवत् । एकस्यापि तत्तत्कर्मार्थतया वरणभेदः । नन्वन्यायोनेकशब्दत्वं वृक्षादौ त्वगत्या । तन्न । तदिहाप्युपादानलाघवादस्तु ।

राद्धान्तस्तु ऋत्विजामलौकिकानां वरणादिभेदेनोत्पत्तौ संज्ञाभेदाः श्रुताः संज्ञिभेदापादकाः । संज्ञा चोत्पत्तिसंयोगादितिनयात् । तत्र कर्मसंज्ञि इह नर इति भेदः । मानान्तरतस्तु संज्ञ्येकत्वे वृक्षादावनेकशब्दत्वं श्रुतसंज्ञिभेदादुपादाने गौरवम् । किंच वरणान्तरावरुद्धे न वरणान्तरनिवेश इति गुणान्तरनयादपि भेदः । भाष्ये एषां वरणे संकीर्तनं न विधिः ।

राद्धान्तस्त्विति । अलौकिकानामृत्विजां अध्वर्युं वृणीते इति वरणादिभेदेन उत्पत्तावध्वर्य्वादिसंज्ञा श्रूयमाणा संज्ञा चोत्पत्तिसंयोगादिति नयात् संज्ञिभेदापादकाः । अतो भेदेन नियतसङ्ख्या एवोपादेया इत्यर्थः । इयांस्तु विशेष इत्याह—तत्रेति । अयं भेदोऽकिञ्चित्कर इत्यर्थः । वृक्षादौ तु मानान्तरादनेकशब्दत्वं युक्तमित्याह—मानेति । ननु उपादानलाघवादत्रापि अनेकशब्दत्वं युक्तमित्यत्राह—श्रुतेति । श्रुतानुरोधेन उपादानलाघवं विधिरनुमन्यते न तद्बाधेनेति श्रुतानुरोधात् गौरवमपि विध्यनुमतमेवेत्यर्थः । किञ्चेति । विधिश्च स्वभावतो विधेयं भिनत्तीति प्रतिविधि वरणभेदः । ततश्च वरणान्तरावरुद्धे न वरणान्तरनिवेश इति वरणरूपगुणभेदात् गुणान्तरनयादपि भेद इत्यर्थः । अत्र भाष्ये अध्वर्युं वृणीत इति वरण सङ्ख्याकीर्तनं न विधिर्नानुवादः । किन्तु षोडशत्वसङ्ख्यार्थमित्युक्तम् । तदयुक्तम् । विधित्वस्योक्तेरित्याशङ्क्य भाष्यमनुभाष्य व्याचष्टे—भाष्यमिति । न केवलं विधिमात्रम् किन्तु वरणीयसङ्ख्याप्राप्त्यर्थमपीत्यर्थः ।

लघ्व्यामिति । कर्मनिमित्तत्वात् ब्रह्मादिसंज्ञायाः एकस्यापि ब्रह्मादिकर्मरूपानेकनिमित्तान्वयादनेकसंज्ञत्वं युक्तमित्यर्थः । ननु अध्वर्युं वृणीत इति विवरणविधानं तदुत्पत्त्यर्थमेव । वरणात्प्रागध्वर्युत्वाभावात् । ततश्चोत्पत्तिभेदेनाध्वर्य्वादीनां भेद इत्यत्राह—वरणेति । वरणविधानमपि ब्रह्मादि-

न चानुवादः । अतः षोडशत्वं सङ्ख्यार्थमिति तदेवं व्याख्येयम् । न वरणविधिमात्रं किंतु यावद्वरणं वरणीयसंख्याप्राप्त्यर्थमपि ।

लब्ध्वयां ब्राह्माद्विकर्मनिमित्ता ब्रह्मादिसंज्ञाः । वरणविधेस्तद्वरणसंस्कृतब्रह्मादिकर्मभिः ब्रह्मत्वाद्युत्पत्ति[1]रेकस्यापीत्यर्थात्कर्तृसंख्येति । अत्र राद्धान्तः—वरणाद्युत्पाद्यं ब्रह्मादि पूर्वसिद्धं ब्रह्मादेः कर्मश्रुतेरित्युत्पादकवरणभेदाद्यावद्वरणं नर भेदः ।

चमसाध्वर्यवश्च तैर्व्यपदेशात्

उक्ते षोडशानामृत्विक्त्वे चमसाध्वर्यवोऽपि त एवेत्युत्थितेः संगतिः पूर्वपक्षः । चमसाध्वर्यून् वृणीत इति वरणभेदादपि न भेदः । योगादध्वर्युपुरुषत्वं च चमसाध्वर्यव इत्येवं,

---

कर्मार्थमेव । ततश्च तत्तद्वरणसंस्कृतब्रह्मादिकर्मभिः ब्रह्मत्वाद्युत्पत्तिरेकस्यापि तत्तत्कर्मयोगादिति यावत्कार्यं कर्तृसंख्येति पूर्वपक्ष इत्यर्थः ।

राद्धान्त इति । ब्रह्मादेः कर्मश्रुतेः पूर्वं वरणाद्युत्पाद्यं ब्रह्मादिसिद्धमिति न कर्मनिमित्तं ब्रह्मादि किन्तु उत्पत्तिनिमित्तमिति उत्पादकवरणभेदात् यावद्वरणं नरभेद इति संख्यानियम इत्यर्थः ।

चमसाध्वर्यवश्च तैर्व्यपदेशात्

सन्ति सोमे चमसाध्वर्यवः । चमसाध्वर्यून् वृणीते इति । किमेते ऋत्विजामन्यतमे उतान्य इति । अवान्तरसङ्गतिमाह—उक्त इति । ननु चमसाध्वर्यून् वृणीत इति उत्पत्तौ संज्ञाभेदात् वरणभेदाच्च ऋत्विग्भ्योऽन्ये चमसाध्वर्यव इति कथं पूर्वपक्ष इत्यत्राह—पूर्वेति । यद्यपि वरणभेदस्तथापि चमसे अध्वर्यव इत्येवं योगात् अध्वर्युपुरुषत्वमेव तेषामिति ऋत्विक्ष्वेवान्यतमे चमसाध्वर्यवः । न च संज्ञातोऽन्यत्वं, योगात् प्रकृतेष्वेव प्रवृत्तेरित्यर्थः । ननु होत्रकाणां चमसाध्वर्यव इति संबन्धश्रुतिबलादन्य एवेत्यत्राह—होत्रकाणामिति । अन्योन्यान्वयादपि संबन्धश्रुतिः कथञ्चिदस्त्वित्यर्थः ।

---

१. B द्व्युत्पत्तिः

नान्ये । न च योगादपि संज्ञातोऽन्यत्वं होतृकाणामित्यादि संबन्धश्रुतिः कथंचिदन्योन्यान्वयादस्तु ।

राद्धान्तस्तु सर्वं एव ऋत्विजः षष्ठ्यन्तनिर्दिष्टाः । न च षष्ठ्यन्तनिर्दिष्टानां मिथोऽन्वयः । समत्वात् । यथा "चैत्रस्य भ्राता मैत्रस्य भ्राता" इति चैत्रमैत्रान्यधीरिति सर्वे षष्ठ्यन्तेभ्योऽन्ये चमसाध्वर्यवः न योगतस्त एव । वरणोत्पाद्यत्वे च संज्ञा भेदात्संज्ञिभेदः । नेयं लौकिकाख्या । येन योगतः[1] स्यात् ।

लब्ध्यामुपक्रममात्रं तत्वम् । वरणभेदादन्यत्वात् । वरणे च संज्ञाभेदात्संज्ञिभेदः । सम्बन्धितया च भेदमुक्त्वा तत्सम्बन्धि-

---

राद्धान्तेति । मध्यतः कारिणामित्यादिवाक्येषु सर्वेषामृत्विजां षष्ठ्यन्तनिर्दिष्टत्वान्न मिथोऽन्वयः, समत्वात् । किन्तु अन्य एव । यथा चैत्रस्य भ्राता मैत्रस्य भ्रातेत्यत्र तयोरन्यधीः एवमत्र सर्वषष्ठ्यन्तेभ्यः अन्ये चमसाध्वर्यवः न योगात्त एवेत्यर्थः । किञ्च वरणोत्पाद्येयमलौकिकी संज्ञा । न पुनर्लौकिकी । येन योगादपि प्रवृत्तिः स्यात् । किन्तु उत्पत्तौ संज्ञाभेदात् संज्ञिभेद इत्याह—वरणेति । एवं रूपाधिकशङ्कानिरासादधिकरणान्तरमिति भावः ।

लब्ध्यामिति । उपक्रममात्रं तत्वरूपः पूर्वपक्षः वरणभेदात् ब्रह्मादिवत् चमसाध्वर्यूणां भिन्नवरणम् । तस्माच्चमसाध्वर्यूनिति वरणोत्पत्तौ ब्रह्मादिसंज्ञातोऽन्यसंज्ञत्वाच्च होत्रकाणां चमसाध्वर्यव इति परिगणितैरेषां व्यपदेशाच्चमसाध्वर्यूणां चमसिभ्योऽन्यत्वमुक्त्वाऽधिकरणस्य प्रयोजनान्तरमुक्तम् होत्रकाणां मध्यतः कारिणामिति तत्तत्सम्बन्धित्वप्रतीतेश्चमसाध्वर्यूणां तेन तेन वरणीयत्वम् न स्वामिनेति ।

आचार्यैस्तु यजमानवरणीयत्वेऽपि तेषां होत्रकाद्याज्ञाकरणार्थं वरणात् संबन्धितया व्यपदेश इत्युक्तम् । तदाह—भट्टस्त्विति । तन्नेति । क्रियागर्भत्वात्संबन्धस्य येनैव स्वामिना वरणं तेनैव तेषां संबन्धः स्यात् नान्यै-

---

१. यौगिकी

त्वात्तेनैव वरणीयत्वं न स्वामिनेत्युक्तम्। प्रयोजनान्तरमुपक्रममात्रस्य। भट्टस्तु यद्यपि स्वामिना व्रियते तत्तदाज्ञाकरणायतु वरणात्तदीयत्वव्यपदेश इत्याह—तन्न तदा हि वरणक्रियागर्भः सम्बन्धः स्वामिनैव स्यादिति। न्यायतो गुरोरनुष्ठानोक्तिः। यदि च वचनादन्यथानुष्ठानं न नयहानिः।

उत्पत्तौ तु बहुश्रुतेः

उक्तेऽन्यत्वे किं बहव उत नेति चिंतेति संगतिः पूर्वपक्षः। चमसाध्वर्यून् वृणीत इति श्रुतमपि बहुत्वमविवक्षितं उद्देश्यगतत्वादित्यनियतसंख्यता। ननूत्पाद्योद्देश्ये उपादानापेक्षायां संख्या-

---

रिति संबन्धिव्यपदेशो न समर्थितः स्यादित्यर्थः। ननु याज्ञिकानुष्ठानविरुद्धा गुरोरनुष्ठानोक्तिरित्यत्राह—न्यायत इति।

उत्पत्तौ तु बहुश्रुतेः

ते च चमसाध्वर्यवः किमनियता उत बहव इति चिन्ता। तत्रावान्तरसङ्गतिमाह—उक्त इति। ननु चमसाध्वर्यून् वृणीते इति बहुत्वे श्रुतेऽपि कथं पूर्वपक्ष इत्यत्राह—पूर्वेति। श्रुतमपि बहुत्वमुद्देश्यगतत्वात् ग्रहैकत्ववदविवक्षितमिति एको द्वौ बहवो वेत्यनियतसङ्ख्येत्यर्थः। नन्विति। युक्ता ग्रहैकत्वाविवक्षा उपात्तोद्देश्यगतत्वात् ग्रहाणां संख्यापेक्षाऽभावात्। इह तु उपात्तोद्देश्याश्चमसाध्वर्यवः। ततश्च वरणे उपादानापेक्षया श्रुतसंख्याविवक्षा युक्तेत्यर्थः। मैबमिति। सत्यमुपादेयाश्चमसाध्वर्यवः ते तु यागं प्रत्युपादेयाः न वरणं प्रतीतिवरणे श्रुता न विवक्षितेत्येवंविधशङ्कानिराकरणार्थमिदमधिकरणमित्यर्थः।

राद्धान्त इति। सत्यं क्रतावुपादेयता, सापि वरणोत्पाद्यतयैवेति यागोपादाने संख्यापेक्षा। तत्र वरणेपि सङ्क्रान्तेति वरणे बहुत्वश्रुतिर्विवक्षितेत्यर्थः।

अत्राचार्यैः ग्रह-पश्वेकत्व-आर्ति-पृष्ठशमनीयोक्तादधिकमत्र व्युत्पाद्यं नास्तीति इदमधिकरणं न कृतम्। तदनादृत्य गुरुणा पूर्वोक्तरीत्या

विवक्षा युक्ता। मैवं, वरणं प्रत्यनुपादेये नवरणे संख्या विवक्षितेति शङ्कानिरासार्थोऽयं योगः। राद्धान्तस्तु क्रत्वर्थोपादेयतापि वरणोत्पाद्य तथैवेति तत्रापेक्षासंक्रान्तेस्तत्रैव विवक्षा। भट्टेनाधिकरणमकृतमपि गुरुणा पूर्वपक्षसंभवात्कृतम्।

दशत्वम्

उक्ते बहुत्वे तद्भेदचिन्तेति संगतिः पूर्वपक्षः। कपिञ्जलनयादेते त्रयः बहुत्वाभेदादनियम इति उपक्रममात्रम्। ननु कारणात्त्रित्वातिक्रमेऽपि कपिञ्जलनय एवोक्तः। इह दश-चमसाध्वर्यव इति वेदे व्यपदेशः कारणमिति। तेन[1] गतार्थता मैवं विकृतौ निर्देशात्र प्रकृतौ न्यायनिश्चितं त्रित्वं हेयम्।

पूर्वपक्षसंभवादिदमधिकरणं कृतमित्याह—भट्टेनेति। अत्र हि उत्पाद्योद्देश्यगतसङ्ख्याऽविवक्षाव्युत्पत्तिः। ग्रहे तु उपात्तोद्देश्यगतसङ्ख्याया अविवक्षा। पश्वेकत्वे उपादेयगतसङ्ख्या विवक्षिता। पृष्ठशमनीये तु उपादेयेप्यविवक्षा। आर्तौ तु निमित्तविशेषणाविवक्षेति तत्र तत्र व्युत्पाद्यभेदः। अथोत्तरत्र दशत्वसाधनाद्बहुत्वं नान्तरीयकसिद्धमिति चेन्न, अत्र बहुत्वे साधित एव दशत्वविशेषविचारबुभुत्सा यतः। किञ्च उत्तरत्र अन्यगतविशेषचिन्ताभिरेव शास्त्रफलं प्रयोक्तुरिति नयो नान्तरीयकसिद्धः स्यादिति गुरुक्तैव विधेत्यर्थः।

दशत्वं लिङ्गदर्शनात्

स्थितेऽपि बहुत्वे किं त्रय एवैते उत दशेति चिन्ता। तत्रावान्तरसङ्गतिमाह—उक्त इति। ननु दशपेये दश चमसाध्वर्यव इति वैदिकव्यपदेशात् दशैव चमसाध्वर्यव इति कथं त्रय इति पूर्वपक्ष इत्यत्राह—पूर्वेति। उपादेयत्वात् चमसाध्वर्यूणामुपादानलाघवात् कपिञ्जलनयात् त्रय एवोपादेया इत्यर्थः। ननु बहुत्वाभेदादनियमो ग्रन्थोक्त इत्यत्राह—बहुत्वेति। कपिञ्जलनय एव कारणान् त्रित्वातिक्रम उक्तः। इह दश चमसाध्वर्यव

---

१. तन्नयोक्ते न

राद्धान्तस्तु न निर्देशे शब्दार्थबाधोन्यायतः प्रकृतावुत्पत्तौ च दशत्वे विकृतौ सिद्धवन्निर्देश इति दशत्वम् ।

लब्ध्यां दशदशैकैकं चमसमनुप्रसर्पन्तीति दशत्वार्थमुक्तं तदेवं सिद्धे । दशत्वे प्रतिचमसं दशविधिः शक्यः । यद्वा उत्तरांशपाठात्पूर्वांशो दश चमसाध्वर्यव इत्युपलक्षितः ।

शमिता च शब्दभेदात्

संज्ञा भेदाच्चमसाध्वर्युवच्छमितापि भिन्न इत्युत्थितेः संगतिः पूर्वपक्षः । एकस्यानेकशब्दत्वमन्याय्यम् "शमितारमुपनयेत्" इति संज्ञान्तरम् । अब्राह्मणशङ्का च लिङ्गं ऋत्विजां

इति वैदिकव्यपदेशः कारणं दशत्वे इति नैव नयेन गतार्थता स्यादित्यर्थः । मैवमिति । विकृतौ निर्देशात् प्रकृतौ न्यायलब्धं त्रित्वं न हानमर्हतीत्यर्थः ।

राद्धेति । विकृतिस्थस्यापि शब्दरूपव्यपदेशस्यार्थं न्यायो बाधितुं नार्हति । अतो दश चमसाध्वर्यव इति व्यपदेशबलात् प्रकृतावपि चमसाध्वर्यूनिति बहुवचनं दशत्वपरं कल्प्यमित्यर्थः । अन्यथा निर्देशानुपपत्तिमाह—उत्पत्ताविति ।

लब्ध्यामिति । तत्र हि व्यपदेशोक्ताभेदः दशत्वार्थं दशदशैकैकमिति वाक्यमुपन्यस्तम् । तत्कथमित्याशङ्क्य व्याचष्टे—तदेवमिति । चमसाध्वर्यूणां दशत्वे सिद्धे तेषां प्रतिचमसं दशविधिः शक्यः अन्यथा प्रतिचमसं संबन्धविधौ दशविधौ च वाक्यभेदादित्यर्थः । नन्वेतद्वाक्यमनुवादकमित्युक्तं अनुप्रसर्पिनये तत्कथमित्याशङ्क्य पक्षान्तरमाह—यद्वेति ।

शमिता च शब्दभेदात्

अस्ति सोमाङ्गे पशौ शमिता शमितारमुपानयेत् इति । स किं ऋत्विग्भ्योऽन्यः उतैषामेवान्यतम इति चिन्ता—तत्रावान्तरसङ्गतिमाह—संज्ञेति । ननु वरणाद्युत्पत्त्यभावात् कथमन्यत्वशङ्केत्यत्राह—पूर्वः पक्ष इति । अध्वर्य्वादिशब्दवत् शमितृशब्दस्यापि संज्ञात्वात् 'अन्यायोऽनेकशब्दत्वं' इति संज्ञान्तरात् संज्ञिभेद इत्यर्थः । अब्राह्मणेति । क्लोमा चार्धं च वैकर्तस्य शमितुः तं स ब्राह्मणाय दद्यात् यद्यब्राह्मणः स्यात् इत्यब्राह्मणत्वशङ्का च

ब्राह्मणत्वात्। किं चाध्वर्य्यादिष्वन्यत्र व्यग्रेषु "शमिता पशुं कण्ठे गृह्णातीति" श्रुतेरप्यन्यता। राद्धान्तस्तु। उत्पत्तौ हि संज्ञा अलौकिकार्थे श्रुता अर्थान्यत्वे हेतुः। अस्य तु वरणाद्य-श्रुतेः उत्पत्त्यश्रुतौ क्लृप्तप्रयोगेन पशुं शमयतीत्येव प्रकृतान्यतमे शब्दोऽयमिति नानेकशब्दत्वदोषः। आध्वर्यवसमाख्यानाच्च शामित्रमध्वर्योरेवेत्यध्वर्युरेव शमितेति स्थिते लिङ्गमेवं यद्यब्राह्मणशङ्का प्रकरणात् स्वामिनि। अन्यव्यग्रत्वं सर्वाध्वर्युपुरुषाणामेकदेत्यसंभवि। यदि ब्राह्मणो हिंसानिच्छुः तर्हि अधिकदानदाक्षिण्यादिना प्रवर्त्यः। यदि त्वसत्येकहेत्वन्तरे याज्ञिका अन्येन पशुहिंसां कारयन्ति तन्मोहादस्तु।

उपगाश्च लिङ्गदर्शनात्

गतनयातिदेशात्संगतिः पूर्वपक्षः। यद्यपि यौगिकत्वोत्पत्त्यश्रुतिश्चोपगातॄणां तथापि गातॄणामुपगा इत्युपगानयोगादुद्गात्रन्वयप्रतीतेः नर्त्विगन्तरस्यर्त्विगित्यृत्विग्भ्योन्ये उपगाश्चमसा-

---

ऋत्विग्भ्योऽन्यत्वे शमितुरुपपन्ना, नान्यथा, ब्राह्मणानामार्त्विज्ये नियमादित्यर्थः। श्रुत्यन्तरादप्यन्यत्वमाह—किञ्चेति।

राद्धान्तस्त्विति। न हि संज्ञामात्रं भेदकं किन्तु उत्पत्तौ अलौकिकार्थे श्रुता। न चास्य वरणाद्युत्पत्तिश्रुतिः। अतः पशुं शमयतीत्येवं क्लृप्तयोगबलात् प्रकृतान्यतमवाचकोऽयं शब्दः इति नानेकशब्दत्वदोषः इत्यर्थः। ननु प्रकृतानां कोऽन्यतमः शमितेत्यत्राह—आध्वर्यवेति। ननु अब्राह्मणशङ्कायाः कथं निर्वाह इत्यत्राह—इति स्थिते इति। उक्तेन न्यायेन प्रकृतपरत्वे शमितृशब्दस्य स्थिते अब्राह्मणशङ्का प्रकरणात् स्वाम्यभिप्रायेत्यर्थः। अध्वर्य्वादिषु चान्यत्र व्यग्रेषु शमिता पशुं कण्ठे गृह्णाति इति श्रुत्यन्तरस्यापि गतिमाह—अन्येति। ननु प्रकृतर्त्विग्ब्राह्मणेषु अन्यतमस्य हिंसावैमुख्ये कथमनुष्ठानप्रवृत्तिरित्यत्राह—यदिति। दक्षिणातोऽधिकदानेनापि प्रवर्त्यत इत्यर्थः। याज्ञिकानामन्यशमित्रुपादाने हेतुमाह—यदि त्विति।

ध्वर्यव इव होतृकाणामित्यादि श्रुतेः ।

राद्धान्तस्तु । इहाप्युत्पत्त्य श्रुतेर्योगसंभवे च ऋत्विक्ष्वेवाय-मुपगशब्दः । उपचितगानकारित्वयोगाच्च न स्वामिकर्मकरत्व-सम्बन्धधीरिति नान्यत्वम् । अध्वर्योः उपगाननिषेधश्च लिङ्गम् । लब्ध्यां योगान्तरं, उत्पत्त्य श्रुतौ योगे च सति न शब्दभेदमात्राद्भेद इति पूर्वोक्तमेव लिङ्गमुक्त्वा दृढीकृतम् ।

विक्रयी

उक्तापवादात्संगतिः पूर्वपक्षः । यद्यपि विक्रयी विनियोगतो

उपगाश्च लिङ्गदर्शनात्

सन्ति सोमे उपगातारः । ते किमृत्विग्भ्योऽन्ये उत तेष्वेवान्यतमा इति चिन्ता । तत्रावान्तरसङ्गतिमाह—गतनयेति । ननु यौगिकत्वेन उत्पत्त्य-श्रुतेश्चोपगातृणां प्रकृतान्यतमत्वमेव । तत्कथमन्यत्वेन पूर्वपक्ष इत्यत्राह—पूर्वपक्ष इति । सत्यमेवम् । तथापि अत्रोद्गातृणां चोपगातृणां च उपगातृ-शब्द सामर्थ्यादन्वयप्रतीतेः । तदन्वयश्च कर्मकरत्व-निबन्धनः । उपगातृ-शब्दस्य सेवायामपि लोके दर्शनात् । न च ऋत्विक् ऋत्विगन्तरस्य कर्मकरः उभयोर्यजमानकर्मकरत्वेन समत्वात् । अतः संबन्धप्रतीतिबलात् चमसाध्व-र्युवदन्य एवोपगातारः । अध्वर्यूपगाननिषेधस्तु नित्यानुवाद इत्यर्थः ।

राद्धान्तस्त्विति । उत्पत्त्यश्रुतेर्योगसंभवात् । प्रकृत ऋत्विज्येवायं शब्दः । संबन्धप्रतीतिस्तु उपचितगानकारित्वयोगदुपचयेप्युपशब्दस्य लोके प्रसिद्धेः न स्वामिकर्मकरत्वनिबन्धना संबन्धप्रतीतिरिति नान्यत्वमुपगातृ-णामित्यर्थः । अध्वर्योरिति । नाध्वर्युरुपगायेदिति प्राप्तिपूर्वकनिषेधे संभ-वति नित्यानुवादत्वायुक्तेरित्यर्थः ।

लब्ध्यामिति । शमितृन्यायेनैव गते किमिति योगान्तरमित्याशङ्क्य उत्पत्तौ संज्ञान्तरश्रुतिरेव न शब्दान्तरमात्रमिति पूर्वमेवोक्तमर्थस्वरूपम् । इह नाध्वर्युरुपगायेदिति लिङ्गमुक्त्वा दृढीकृतमिति दार्ढ्यार्थं योगान्तर-करणमित्यर्थः ।

नाङ्गं नार्त्विजः तथापि क्रयाक्षिप्तो हि ऋत्विक्कर्तृकः न हि विक्रयं विना क्रयसिद्धिः। निषिद्धे च सोमविक्रये स्वतः प्रवृत्तो दुर्लभ इति क्रयोपादानशेषो विक्रयोऽप्यङ्गम्। नित्यक्रयश्रुतेर्विक्रयान्तर्भावपर्यन्तत्वात् श्रुत्युपात्त उपादानशेष इति न विक्रयी अन्यः।

राद्धान्तस्तु। अतिक्रान्तनिषेधो लोभप्रवृत्तो नित्यमस्तीति न क्रयनित्यतार्थो विक्रयान्तर्भाव इति न धनार्जनवदाक्षेपः। किं च शूद्रादेश्च सर्वविक्रयानिषेधादनति क्रमेणापि प्रवृत्तिलाभ

विक्रयीत्वन्यः

अस्ति सोमे सोमविक्रयी। तत्र चिन्ता—किमृत्विजामन्यतमः उतान्य इति। तत्रावान्तरसङ्गतिमाह—उक्तेति। ननु विक्रयो न चोदित इति नाङ्गं अङ्गानुष्ठानार्थमृत्विगुपादानमिति कथं सोम-विक्रयी ऋत्विजामन्यतम इति पूर्वपक्ष इत्यत्राह—पूर्वपक्ष इति। सत्यं विनियोगतो नाङ्गं विक्रयः। तथापि क्रमविध्यन्यथानुपपत्तेः विक्रयोऽपि विध्याक्षिप्तर्त्विक्कर्तृक एव। न हि विक्रयं विना क्रयसिद्धिरिति प्रयोगविधिर्विक्रयमाक्षिपतीत्यर्थः। ननु स्वतः प्रवृत्तिविक्रयसंभवे कथं विध्याक्षेप इत्यत्राह—निषिद्ध इति। ननु विध्याक्षेपेपि कथमङ्गत्वमित्यत्राह इति—क्रयेति। औपादानिकमङ्गत्वमित्यर्थः। ननु शब्दोपात्तस्योपादानादङ्गत्वं, क्रयश्च न शब्दोपात्तः इति कथमङ्गता? किञ्च विक्रयं विना आर्जनान्तरेणापि सोमोपादानसिद्धेः कथं विक्रयस्य नित्यवत् विध्याक्षेप इत्यत्राह—नित्यक्रयेति। नित्यक्रयश्रुतेः नार्जनान्तरमिति नित्यवद्विक्रयाक्षेपः। क्रयश्रुतेश्च विक्रयान्तर्भावपर्यन्तत्वात् श्रुत्युपात्ततापि विक्रयस्येत्युपादानादङ्गतेनि पृथगुत्पत्त्यश्रवणात् ऋत्विजामेवान्यतमो विक्रयी नान्य इत्यर्थः।

राद्धान्तस्त्विति। यद्यपि निषिद्धे स्वतः प्रवृत्तो दुर्लभः तथाप्यतिक्रान्तनिषेधो लोभप्रवृत्तोऽप्यस्तीति तमाश्रित्यापि प्रयोगविधेरुपपत्तेः न

इत्यन्यः सोमविक्रयी । यद्यतिक्रान्त निषेधः ऋत्विगपि सोम-विक्रयी; तदा ऋत्विक् संस्काराद्धीयत इत्यन्य एव ।

कर्मकार्यात् सर्वेषामृत्विक्त्वमविशेषात्

ऋत्विग्भ्यो विक्रय्यन्य इत्युक्ते—के त ऋत्विज इति चिन्तेति संगतिः पूर्वपक्षः राद्धान्ताक्षेपविधया । उत्पत्तिनिमित्ते-ऽप्यृत्विक्शब्दे चमसाध्वर्यूणामप्युत्पत्तिश्रुतेः ऋत्विक्त्वं मा भूदिति सप्तदशर्त्विज इति परिसंख्यैवोपेया । अथ सैवेष्टा, ऋतुयजननिमित्तनिरासो व्यर्थः । तन्निमित्तत्वेऽपि परिसंख्यैव

नित्यक्रयार्थं विक्रयं धनार्जनवदाक्षिपतीति नोपादाना[द]ङ्गतेति अनङ्ग-विक्रयार्थं विक्रय्यन्य एव ऋत्विग्भ्य इत्यर्थः । ननु शास्त्रं हि शास्त्रीय-प्रवृत्तिमुपजीवति न निषेधातिक्रमात् निषेध्ये प्रवृत्तिमित्याशङ्क्य हेत्वन्तर माह—किञ्चेति । ननु ऋत्विक्ष्वेवातिक्रान्तनिषेधः कश्चिल्लोभात् सोम-विक्रयेऽपि प्रवर्तन इत्यार्त्विजोऽपि स्यादित्यत्राह—यदीति । निषिद्धदेशगमने उपनयनादि-संस्कारवन्निषिद्धाचारात् ऋत्विक्संस्कारोऽपि हीयत इति स तदन्य एवेत्यर्थः ।

कर्मकार्यात् सर्वेषाम्

इह सोमे ये पुरुषाः प्रवृत्तास्ते किं सर्व ऋत्विजः उत केचिदेवैषामिति चिन्ता । तत्रावान्तरसङ्गतिमाह—ऋत्विग्भ्य इति । ननु सोम्यस्याध्वरस्य यज्ञक्रतोः सप्तदश ऋत्विजः इति वचने सति कथं सर्वेषामृत्विक्त्वेन पूर्व-पक्ष इत्यत्राह—पूर्वपक्ष इति । अत्र हि ग्रन्थे राद्धान्ताक्षेपप्रकारेण पूर्वपक्ष उक्तः । तथाहि—ऋतौ यजतीति योगनिमित्तो वा ऋत्विजो वृणीत इत्यु-त्पत्तिनिमित्तो वा । तत्र योगपक्षे परिसङ्ख्यापत्तेः तत्पक्षं निरस्य उत्पत्ति-पक्षमङ्गीकृत्य राद्धान्तितं भाष्ये । तदनुपपन्नम् । उत्पत्तिपक्षेऽपि सप्तदशे-त्यस्य परिसङ्ख्यात्वं दुर्वारं, चमसाध्वर्यूणामप्युत्पत्तिश्रुतेः ऋत्विक्त्वप्र-सक्तेः तदाह—उत्पत्तिरिति । शङ्कते—अथेति । उत्तरं—ऋतुयजनेति । ऋतु-यजननिमित्तत्वेऽपि सप्तदशैवेति परिसङ्ख्येति यत्नेन तन्निरसनं व्यर्थमेवे-

सप्तदशेति । नोचेदुत्पत्तितः ऋतुयजनतो वा सर्वे ऋत्विजः । राद्धान्तस्तु कस्यचिद्वर्जनार्था हि परिसङ्ख्या नेह वर्ज्यमस्ति । उत्पत्तिनिमित्ते ऋत्विक्शब्दे चोदनैकगम्यार्थे यत्र वेदे प्रयोगः तेषामेव शब्दार्थतेति न परिसंख्यापेक्षा । ऋतुयजननिमित्ते ऋत्विक्शब्दे सर्वेषां ऋतुयजनाद्वर्ज्यसंभवे परिसंख्यावकाशः । न तु सा शक्या, शब्दप्रवृत्तेः सति निमित्ते वचनावार्यत्वात् । लभ्व्यामधिकं—ऋतुयजननिमित्तत्वे शब्दार्थपरिसंख्याने ऋत्विक्कार्येऽपि श्रुतेः परिसंख्या न युक्ता न चावयुत्यानुवादः महा-

---

त्यर्थः । शङ्कते—नो चेदिति । ऋतुयजन निमित्तत्वं न निरस्यते चेदित्यर्थः । उत्तरं—उत्पत्तित इति । त्रिदोषदुष्टत्वात् परिसङ्ख्या नैव संभवतीति उत्पत्तितः ऋतुयजनतो वा सर्वेषामृत्विक्त्वं सप्तदशेत्यवयुत्यानुवादः । सर्वेषामृत्विक्त्वे चमसाध्वर्यूणामपि उपवासादिऋत्विग्धर्मप्राप्तिः फलमित्यर्थः ।

राद्धान्तस्त्विति । यु]उ]क्तं भाष्ये ऋतुयजननिमित्तत्वे परिसङ्ख्यापत्तिरिति । तद्विहाय उत्पत्तिनिमित्तत्वाश्रयणं तत्र परिसङ्ख्यानवकाकाशात् । साहि यत्र वर्ज्यमस्ति तत्र भवति । न चोत्पत्तिनिमित्तत्वे वर्ज्यमस्ति । उत्पत्तिनिमित्तत्वे हि ऋत्विक्शब्दे तस्याध्वर्य्वादिशब्दवत् अलौकिकार्थत्वात् चोदनैकगम्यार्थ इति वैदिकप्रयोगैरव्युत्पाद्यार्थः । स च यत्रैव वेदे प्रयुक्तः तेषामेव वाचकः नान्येषामिति न परिसङ्ख्यावकाश इत्यर्थः । पक्षान्तरे परिसङ्ख्यापत्तिमाह—ऋतुयजनेति । तर्हि तन्निमित्तत्वमप्यस्तु परिसङ्ख्यया ऋत्विक्त्वव्यवस्थाप्यस्तु इत्यत्राह—न चासाविति । सति प्रवृत्तिनिमित्ते शब्दप्रवृत्तेर्वचनशतेनापि प्रतिषेद्धुमशक्यत्वादित्यर्थः ।

लभ्व्यामिति । ननु सप्तदश ऋत्विज इति वचनं किमित्युपन्यस्तं भाष्ये इत्याशङ्क्य उत्पत्तिनिमित्तेयं ऋत्विक्संज्ञा, न ऋतुयजननिमित्तेति प्रतिपादयितुं, अन्यथा वचनवैफल्यादित्युक्तम् । परिसङ्ख्याशब्दस्तु ग्रन्थे आपाततः परिसङ्ख्यात्वप्रतीतेः न तावत् परिसङ्ख्यात्वेन वचनसाफल्यम् ।

संख्याश्रुतौ ह्यवान्तरसंख्याश्रुतिरवयुत्यानुवादः । नेह महासंख्याश्रुतिः । स्वामिकृतवरणनिमित्ततोपगमाच्च न चमसाध्वर्यूणामृत्विक्त्वापत्तिः इति । उत्पत्ति त एव तावतामृत्विकत्वे सप्तदशोक्तिरनुवादः । षोडशानामृत्विक्त्वे उत्पत्तितो यथा सप्तदशत्वं तथा "स्वामिसप्तदशा" इत्यत्र वक्ष्यते ।

भट्टस्तु न वरणोत्पाद्य[1]मलौकिकमृत्विक्त्वं, किं तु तत्कर्मयोगित्वं लौकिकमेव । ऋत्विक्शब्देन तु कर्मार्थवरणभरणनियमादृत्विक्शब्दो वरणादिमत्युपसंहृत इति । भाष्ये वरणकार्य-

---

शब्दार्थत्वे वा परिसङ्ख्या, कार्ये वा । तत्र शब्दार्थत्वपरिसङ्ख्या वचनशतेनापि [न] शक्येत्युक्तम् । कार्येऽपि न परिसङ्ख्या, श्रुतिमूलत्वात् कार्यस्येत्यर्थः । ननु अवयुत्यानुवादस्तुत्या वचनसाफल्यं, वैश्वानरं द्वादशकपालमित्यत्र 'यदष्टाकपालो भवति' 'यन्नवकपालो भवति' इत्यादिवदित्यत्राह—न चेति । तद्वन्महासङ्ख्या श्रवणाभावादित्यर्थः । ननु उत्पत्तिनिमित्तत्वे चमसाध्वर्यूणां ऋत्विक्त्वापत्तिरित्यत्राह—स्वामिकृतेति । तेषामृत्विग्भिर्व्यपदेशात् ऋत्विग्वृतत्वमेव न स्वामिवृतत्वमित्यर्थः । उत्पत्तिनिमित्तत्वे तु सप्तदशेत्युक्तिः प्राप्तानुवादतयोपपन्नेत्याह—इत्युत्पत्तित इति । एतावतामिति बहुवचनात् अध्वर्य्वादयः प्रत्येकमेव ऋत्विक्शब्दवाच्याः न मिलित्वेत्यर्थः । ननु तथापि कथं सप्तदशोक्तिः षोडशानामेवोत्पत्तेरित्यत्राह— षोडशानामिति । एवं चात्र मते स्वाभिवृतानामध्वर्य्वादीनां षोडशानामेव ऋत्विक्त्वमित्यत्रैव सिद्धम् । उत्तरनयकृत्यं तु तत्रैव स्फोरयिष्यते । निबन्धनमते तु अलौकिकार्थोऽयमृत्विक्शब्दः यत्रैव वेदे प्रयुज्यते त एव ऋत्विजो न सर्वे इत्येतावन्मात्रमिति मन्तव्यम् ।

अत्र भट्टपादैः न वरणाद्युत्पाद्यमलौकिकमृत्विक्त्वं किन्तु तत्तत्कर्मयोगित्वं लौकिकमेव । नन्वेवं लौकिकस्य तस्य सर्वत्र सत्त्वात् सर्वेषामृत्विक्त्वं स्यात् । न, कर्मार्थवरण-भरणनियमात् वरणादिमत्येव ऋत्विक्शब्दो-

---

१. णाद्युत्पाद्यं

तोक्तिर्वरणेनादेयत्वात् आदाने करोतिरित्याह । तन्न । प्राग्वरणादृत्विक्शब्दाप्रयोगाद्वरणे जाते च प्रयोगाद्वरणाभिधेयनियमादृष्टानुविद्धानतिमदर्थं ऋत्विक्शब्दो न लौकिकार्थो यूपादिवदित्यनुसंधेयः ॥

नियमः

पूर्वोक्त ऋत्विक्त्वस्य विशेषावस्थापनमात्रमत्रेति संगतिः । पूर्वपक्षः के त ऋत्विज इत्यज्ञानमेव उत्पाद्यसंज्ञेयमलौकिकी वेदे प्रयोगतो ज्ञेयार्थेति प्राक्प्रयोगादज्ञानमेष, ऋतुयजनमात्रादृत्विक्त्वे सर्वेषामृत्विक्त्वं स्यात् न ज्ञायते वा ।

पसंहारः । भाष्ये च वरणकार्यतोक्तिः आदानाभिप्राया । करोतेरादानेपि लोके प्रयोगादित्युक्तम् तदाह—भट्टस्त्विति । तन्नेति । यदि लौकिकार्थः ऋत्विक्शब्दः स्यात् वरणात्प्रागपि प्रयुज्येत न च तदस्ति । अतो वरणात्प्रागप्रवृत्तेः वरणे जाते प्रवृत्तेः वरणाभिधेयनियमाददृष्टानुविद्धानतिमदर्थं एव ऋत्विक्शब्दः । मानान्तरगम्यस्य तत्तत्कार्ययोगि[त्व]त्वस्य वरणादिनियमेऽनियमे चाभेदात् वरणाद्युत्पाद्यालौकिकादृष्टांशादेव भेद इति यूपादिवदलौकिकार्थ ऋत्विक्शब्दोऽनुसन्धेय इत्यर्थः ।

नियमस्तु दक्षिणाभिः

केचिदेव ऋत्विज इत्युक्ते के ते ऋत्विज इति सन्देहः तत्रावान्तरसङ्गतिमाह—पूर्वोक्तेति । ननु वेदे यद्विषयोऽयमृत्विक्शब्दः त ऋत्विज इति सुज्ञातमेव । तत्कथमज्ञातत्वेन पूर्वपक्ष इत्यत्राह—पूर्वपक्ष इति । सत्यमुत्पाद्यालौकिक-संज्ञायाः वेदे प्रयोगतो ज्ञानम् तथापि तत्प्रयोगदर्शनात् प्रागज्ञानमेव तद्दर्शनं चैतद्राद्धान्त एव । न चैवं पूर्वपक्षस्तुच्छ इति वाच्यम् । यतः प्रदर्शितेऽपि प्रयोगे अध्वर्य्वादीनां वाच्यानामनेकत्वात् एकोपाध्यभावे ऋत्विक्शब्द प्रवृत्त्यनुपपत्तेः इत्यत्राज्ञानमेवेत्यर्थः । ऋतुयजननिमित्ते वा किं सुज्ञानतेत्यत्राह—ऋतुयजनेति । तत्पक्षेऽपि सुज्ञानत्वमस्तीति सर्वेषामृत्विक्त्वं स्यादित्यर्थः ।

राद्धान्तस्तु के त इति सन्देहे "ऋत्विग्भ्यो दक्षिणां दद्यात्" इति प्रक्रम्य यान् दक्षिणाविशेषविधिपरे वाक्ये वेद आह ते षोडश सत्रे यजमानानार्त्विजे विधाय तत्कर्मकरतया यजमानेष्वेव चोदकागतदीक्षाकर्तृभेदविधिपरे वाक्ये यान् शब्दान्प्रयुङ्क्ते तत्तच्छब्दा एवार्त्विज इति अध्वर्य्वादेर्ऋत्विक्त्वम् ।

लब्ध्यां यदुक्तं स्वामिवरणोत्पाद्यमृत्विक्त्वं तदेव । दक्षिणादानेन सत्रे दीक्षाकर्तृविधिपरे वाक्ये च प्रयोगेण साधितमित्येवं गतत्रयशेषो न नयान्तरमित्युक्तम् ।

स्वामि-सप्तदशाः

उक्तं सप्तदशत्वं स्वामिना उतान्येनेति चिन्तेति संगतिः ।

पूर्वः पक्षः, स्वामिनोऽन्ये न भृत्याः । कर्मकर्तृतावान्तरो

राद्धान्तस्त्विति । के त इति सन्देहे ऋत्विग्भ्यो दक्षिणां दद्यादिति प्रक्रम्य दक्षिणापरे वाक्ये यानध्वर्य्वादीन् वेद आह ते षोडशैव ऋत्विजः । एवं च वरणाद्युत्पत्तिमतामनेकत्वे दक्षिणासंप्रदानत्वेन श्रुतत्वमेकोपाधि ऋत्विक्शब्दप्रवृत्तौ विवरणमतानुसारात् स्वामिवृतत्वं वेत्यर्थः । प्रकारान्तरेणापि प्रयोगान्नियमं दर्शयति—सत्रे चेति । ऋत्विक्कार्ये यजमानान् विधाय तेष्वेव यजमानेषु यजमानधर्मदीक्षाकर्तृभेदविधिपरे वाक्ये यानध्वर्य्वादीन् प्रयुङ्क्ते तच्छब्दवाच्यत्वाच्चाध्वर्य्वादय एवर्त्विज इत्यर्थः ।

लब्ध्यामिति । पूर्वनयसिद्धमेव स्वामिवरणोत्पाद्यमृत्विक्त्वम् । इह दक्षिणादानेन सर्वत्र प्रयोगेण च दृढीकृतमिति पूर्वनयशेषोऽयं न नयान्तरमित्यर्थः ।

स्वामिसप्तदशाः

स्थिते षोडशानामेवर्त्विक्त्वे सप्तदश ऋत्विज इति सप्तदशत्वं पुरुषान्तरसंपाद्यम् । ऋत्विक्शब्दश्च भूम्ना लक्षणया वर्णनीय इत्यपि स्थितमेव । इयमिदानीं चिन्ता—किमन्येन केनचित्सप्तदशत्वं उत यजमानेनेति तत्रावान्तरसङ्गतिमाह—उक्तमिति । ननु पुरुषान्तरप्रयुक्तिकल्पनातो

पाधेरवान्तरसंख्येयं न स्वामिनेत्यन्येन । भाष्ये च सदस्येनेत्यन्योपलक्षणपरम् । तस्मिन् हि वरणोत्पाद्यत्वेपि न विशेषतोऽध्वर्य्वादाविवर्त्विक्शब्द इति तेनाप्यन्येन वा लाक्षणिक एव भूम्ना सप्तदशसु ऋत्विक्शब्द इति स वा चमसाध्वर्युष्वेको वाऽन्यः । राद्धान्तस्तु यागकर्तृत्वेनेयं संख्या भूम्ना च लक्षणया सप्तदशसु ऋत्विक् शब्दः । न च कर्मकरत्वे नैकचमसाध्वर्युणा लक्षणेयम् । न हि तुल्येष्वेक एकं विच्छिद्य लक्षणा न च स्वामिवृतत्वेन एकसदस्यान्तर्भावाल्लक्षणा न हि ब्रह्मादिकः सदस्यः दक्षिणा ह्यानतौ प्रधानहेतुः । वरणं तु तदनुग्रहः । वरण-मात्रं तु सदस्यस्य श्रुतं न दक्षिणा, ब्रह्मणो दक्षिणोक्ता न वरणं ब्रह्मशब्दोल्लेखेन

वरं कर्मकर्तृत्वसामान्यात् स्वामिना सप्तदशत्वमिति कथं पूर्वपक्ष इत्यत्राह—पूर्वपक्ष इति । द्वित्वाद्यवान्तरसङ्ख्यानिवेश एकोपाधिना लोके दृष्टः । इह च कर्मकरत्वं नामावान्तरोपाधिः संभवति । कर्मणि भृताविति व्युत्पत्तेः भृत्याकर्मकर्तृत्वमेव कर्मकरत्वम् तच्च यजमानादन्यस्यैवेत्यन्येनैव सप्तदशसंख्येत्यर्थः । ननु भाष्ये सदस्येनेत्युक्तं तत्कथमन्येनेत्युच्यते इत्यत्राह—भाष्य इति । ननु किमिति तदुक्तिरन्यपरतया व्याख्यायत इत्यत्राह—तस्मिन्निति । यद्यपि वरणोत्पाद्यत्वं सदस्यस्यास्ति तथापि न तत्र ऋत्विक्शब्दो मुख्य इति तस्मिन्नन्यस्मिन्नपि ऋत्विक्शब्दो भूम्ना लक्षणया वर्ण्यत इति स वा चमसाध्वर्युषु एको वाऽन्य इत्यर्थः ।

राद्धान्तस्त्विति । यागकर्तृत्वेनावान्तरोपाधिना सप्तदशत्वम् ऋत्विक्शब्दश्च भूम्ना लक्षणया स्वामिसप्तदशेष्वस्तु प्रकारान्तरेण सङ्ख्योपपत्त्ययोगात् । तथाहि—किं चमसाध्वर्युणा सप्तदशत्वं किं वा सदस्येन ? न तावदाद्य इत्याह—न कर्मेति । तत्र हेतुः न हीति । नापि द्वितीय इत्याह—न चेति । तत्र हेतुः न हि ब्रह्मेति । ननु सदस्यं वृणीते इति वरणोत्पाद्यः सदस्यः ब्रह्मणोऽधिक इत्यत्राह—दक्षिणा हीति । दक्षिणैव साक्षात् पुरुषानतिकरी वरणं तु तदनुग्रह इति वक्ष्यते । ननु वरणमात्रादेव

श्रुतम् । सदस्यशब्दः सदसि भव इति योगाद् ब्रह्मणि प्रवृत्त इति प्रधानहेतुः । दक्षिणवतो ब्रह्मण एवेदं वरणम् । स्वामिवृत्तत्वेनापि संख्या न चमसाध्वर्यूणां, स्वाम्यवृत्तत्वात् । अतो नित्यकर्मकर्तृत्वस्यैवोद्भूतेस्तदन्तर्भावादेवेयं लक्षणया संख्या । चमसाध्वर्योरशक्तावेव कर्तृत्वात् । अतः षोडशैव मुख्या ऋत्विजः । लघ्व्यामधिकं भाष्ये यद्यागकर्तृत्वेन सप्तदशत्वमुक्तं तद्वरणोत्पाद्यतयैवर्त्विक्त्वं न ऋतु-यजनादिति स्थित एव लक्षणार्थं यजति कर्तृत्वमेवमुक्तम् ।

भट्टस्तु सदस्यं ब्रह्मणो भिन्नमाह—न त्वसावृत्विगिति न तेन सप्तदशता । वरणोऽप्यृतुयजनादृत्विक्त्वम् । अयं तु प्रत्यवे-

---

चमसाध्वर्युवदधिकसदस्योत्पत्तिरस्त्वित्याशङ्क्याधिकासंभवं वक्तुं विषयमाह—वरणमात्रमिति । भवत्वेवं तथापि कथमधिकसदस्याभाव इत्यत्राह—सदस्येति । सदस्यशब्दश्च योगात् ब्रह्मणि वर्तितुं शक्तः सदसिभव इति । तथा च प्रधानहेतुदक्षिणावतो ब्रह्मणोऽनुग्राहकापेक्षा । अतोऽपेक्षितविधिबलात् सदस्यशब्देन ब्रह्माणमेवोद्दिश्य तस्यैव वरणविधिर्नान्यस्येति ब्रह्माधिकसदस्याभाव इत्यर्थः । स्वामिवृत्तत्वाभावादपि न चमसाध्वर्युणा सङ्ख्येत्याह—स्वामीति । यागकर्तृत्वं यजमानस्य नित्यं चमसाध्वर्योस्त्वशक्तावेव कर्तृत्वमनित्यं, अतोऽपि न चमसाध्वर्युणा नित्यसंख्योपपत्तिरित्यत्राह—अत इति । निगमयति—अतः षोडशेति । अतो मुख्या ऋत्विजः षोडशैव भूम्ना लक्षणया स्वामिसप्तदशेषु ऋत्विक्शब्द इत्यर्थः ।

लघ्व्यामिति । अत्र भाष्ये यागकर्तृत्वेन ऋत्विक्शब्दप्रवृत्तिरित्युक्तम् । तदयुक्तम् । ऋतुयजननिमित्तत्व निराकरणादित्याशङ्क्य भूम्ना लक्षणार्थं यजिकर्तृत्वेन संबन्धित्वे वाच्ये न तु ऋतुयजनमिति निमित्तत्वात् ऋत्विक्शब्दप्रवृत्तिरिति भाष्यव्याख्यानमधिकमित्यर्थः ।

---

१. A शक्त

क्षको न पदार्थद्वारा यजते। स्वामिनस्तु वरणमात्रं नास्ति। अन्यत्सर्वमस्तीति युक्तमृत्विक्त्वम्, तदुक्तं।

ऋत्वङ्गत्वेन नैवेह सदस्यस्य निराक्रिया:।
चमसाध्वर्युवत्त्वेष नर्त्विगित्यभिधीयते ।।

भाष्यकृतस्त्वृत्विङ्निरसनपरस्यातिरभसवचनमुपेक्षणीयमिति भट्टः। तन्न, ऋतौ यजतीत्येव निपातस्मृतिः साधुत्वार्था न यौगिकत्वार्था सत्यपि योगे स्वाम्यवृते अप्रयोगात्[1]। स्वाम्यपि न मुख्य ऋत्विक्। सदस्यो ब्रह्मेति प्रागुक्तं याज्ञिकैरधिक-सदस्यो-पादानं मोहात्।

भट्टस्त्विति। ब्रह्मणोऽधिक एव सदस्यः। न त्वसावृत्विगिति न तेन सप्तदशता। ननु वरणकर्मत्वे कथमस्य न ऋत्विक्त्वमित्यत्राह—वरणेऽपीति। ऋतु-यजनमेव ऋत्विक्त्वे प्रधानहेतुः न वरणमात्रम्। सदस्यस्य तु कृताकृतप्रत्यवेक्षकस्य न यागानुकूलपदार्थद्वारा यजिकर्तृत्वमिति न मुख्य-ऋत्विक्त्वम्। नन्वेवं स्वामिनोऽपि ऋत्विक्त्वाभावात् न तेन सप्तदशत्व-मित्यत्राह—स्वामिन इति। अनुग्राहकवरणमात्राभावेऽपि यजिकर्तृत्वाद्यन्य-त्सर्वं मुख्य-कारणमस्तीति युक्तमृत्विक्त्वं स्वामिन इत्यर्थः। साक्षित्वेना-चार्योक्तं श्लोकमाह—तदुक्तमिति। ननु अधिकसदस्याङ्गीकरणं भाष्य-विरुद्धमित्यत्राह—भाष्यकृत इति। तन्नेति। न ऋत्विक्शब्दो यौगिकः। योगाभावेपि वरणानन्तरं वृतमात्रे प्रयोगादिति भावः। ननु ऋत्विगित्यादि पाणिनिस्मृतिबलात् यौगिकत्वमित्यत्राह—ऋताविति। प्रयोगमूला हि सा स्मृतिः प्रयोगश्च योगाभावेऽपि वृतमात्र इति भूतपूर्वप्रयोगानुरोधान् साधुत्वार्था सा स्मृतिः न यौगिकत्वार्थेत्यर्थः। भवतु वा कथञ्चिद्यौगिकता तथापि स्वामी न मुख्य ऋत्विक् स्वामिवृते ऋत्विक्शब्दप्रयोगात्। तदाह सत्यपीति। ब्रह्माधिकः सदस्य इत्यप्यनुपपन्नम् ब्रह्मण एव सदस्यत्वोक्तेरित्य-

---

१. स्वामिवृते

ते सर्वार्थाः

ऋत्विक्प्रयुक्तेषु तत्कर्मचिन्तेति संगतिः पूर्वपक्षः। प्रकरणे यावद्भृतैः शक्यं तावदनियमात्तैः कार्यम्[1]। यावत्कार्यार्थं सहायत्वेनोपादानाद्वचनसमाख्ययोः पक्षप्राप्तानुवादता।

राद्धान्तस्तु न विधिपरत्वसंभवे नित्यमनुवादतैव पक्षेऽन्यप्राप्तेर्नियमार्थो विधिः। न च नियमेऽपि सहायानां कार्यार्थता-हानिः। अग्नयश्च स्वकालत्वादिति तु भिन्नेन सूत्रेणोक्त-मिति[2]। आहिताग्नेरधिकाराद्बहिः सर्वार्थमग्न्युत्पादनमाक्षिप्य

आह—सदस्य इति। ननु याज्ञिकानुष्ठानविरुद्धं ब्रह्मणः सदस्यत्वमित्यत्राह—याज्ञिकैरिति।

ते सर्वार्थाः

उक्ताः षोडशर्त्विजः। ते च स्वामिना सप्तदशेति। तेषु चिन्ता—किं प्रकरणे यावद्वृतैः शक्यं तत्सर्वं तैरनियमेन कर्तव्यमुत वचनसमाख्याभ्यां व्यवस्थया केनचित् किञ्चिदिति। नन्वनुष्ठानचिन्तेयमत्रासङ्गतेत्याशङ्क्य सावान्तरां सङ्गतिमाह—ऋत्विक्ष्विति। अनुष्ठानमुखेन विनियोग एव चिन्त्यते किं प्रकरणेन, सर्वत्र सर्वेषामनियमेन शेषता उत वचनसमाख्याभ्यां व्यवस्थयेति ऋत्विक्स्वरूपे उक्ते तेषां कर्मसु शेषताविशेषचिन्ता युक्तेत्यर्थः। ननु वचनसमाख्ययोः सत्योरपि कथं पूर्वपक्ष इत्यत्राह—पूर्वपक्ष इति। कार्यसहायार्थमृत्विगुपादानात् यावत्कार्यं सर्वेषामनियमेन शेषता युक्तेत्यर्थः। कथं तर्हि वचनसमाख्ये इत्यत्राह—वचनेति। मैत्रावरुणः प्रेष्यतीत्यादिवचनं आध्वर्यवादिसमाख्या च पक्षप्राप्तानुवादः। न चैवं स्पयादिराद्धान्तहानिः। अत्र ह्यलौकिकत्वादध्वर्य्वादेः उत्पत्तिसापेक्षत्वात् तद्विनियोगस्य उत्पत्तेश्च सहायतया सर्वकार्यार्थत्वात् तदनुरोधेन विनियोग-

---

१. B स्वकार्यतः

२. मकर्तृ B

समर्थ्यते । तत्राक्षेपः यथैवाधिकृतः पुरोडाशाद्युत्पादयति । तथाग्नीनप्यङ्गभूतानिति युक्तम् । समर्थनं तु स्वकालत्वादाधानस्यान्तः प्रयोगेऽस्यानुष्ठानाशक्ते राहिताग्नेरधिकारः । इह किंचिदाक्षिप्य समर्थ्य किंचित्साम्यात् दृष्टान्तीकृतम्—स्वकालतया हि सर्वार्थता सर्वक्रत्वर्थतयैवोत्पत्तिः अग्नीनाम् । ऋत्विजां त्वेकक्रतावेव यावत्कार्यार्थत्वं, तद्वचनान्निरस्तमिति अग्निसर्वार्थत्वसाम्यं न दृष्टान्तः । लब्ध्यामग्निदृष्टान्तसाम्यादृत्विजामपि यावत्क्रत्वर्थता शङ्किता, युक्तिश्च यावत्सहाया-

---

वर्णनायुक्ता । स्फ्यादौ तु लौकिकत्वादुत्पत्तिमनपेक्ष्यापि विनियोगसंभवात् युक्ता विनियोजकवाक्याद्व्यवस्थेत्यर्थः ।

राद्धान्तस्त्विति । नहि विधिपरत्वे संभवति अनुवादता युक्ता । अतो वचनसमाख्याभ्यां व्यवस्थया विनियोग इत्यर्थः । ननु तत्तत्कर्मणि तस्य तस्य सहायतयोपादानादेव प्राप्तेः विधिवैयर्थ्यमित्यत्राह— न नियम इति । सहायतयोपात्तानामेव तत्तद्विशेषकार्यकारकतया विनियोगेन सहायस्यैव निष्ठत्वान्न सहायानां कार्यार्थताहानिरित्यर्थः । अत्र 'ते सर्वार्थाः प्रयुक्तत्वात्' इत्येकं सूत्रम् । अग्नयश्च स्वकालत्वादित्यपरम् । तत्राग्नयश्चेत्यनेन अग्नीनामाहिताग्नेरधिकारबलात् यत्सर्वकर्मार्थत्वमुक्तं तदाक्षिप्य समर्थ्यत इत्याह—अग्नयश्चेति । आक्षेपमाह—तत्रेति । आहिताग्नेरधिकारात् अत्रिनियुक्ताग्न्युद्देशेन आधानविधेर्बहिरेव क्रतोः सर्वार्था अग्नय उत्पाद्या इति यदुक्तं । तदयुक्तम् । साध्याङ्गत्वादग्नीनामधिकारिविशेषणत्वायोगात् यथाऽधिकृतेनोत्पाद्यं पुरोडाशादिकमन्तः-क्रतुप्रयोगमुत्पाद्यते । तथाऽग्नयोऽपि क्रतुमध्य एवोत्पाद्यन्तामित्यर्थः । समर्थनं त्विति । अग्न्युत्पादकाधानस्य स्वकालत्वात् वसन्तादिकालत्वात् न दर्शपूर्णमासादिप्रयोगमध्येऽनुष्ठानशक्तिः अविशेषेणाहवनीयादिविनियोगात् । न चाविशेषविनियोगस्यासंभवः लोहसुवर्णादिवत् बहिः क्रतोरुत्पाद्यत्वसंभवात् । अन्यथा केवलं ज्योतिष्टोमाङ्गत्वे आधाने वसन्तविधिरनर्थकः मुख्यकालत्वे-

धीनकर्मार्थता लिङ्गाद्विध्यपेक्षितेति। प्रकरणबाधाद्यावद्विध्यर्थता। राद्धान्तस्तु प्रकरणेऽपि लिङ्गविध्यपेक्षयोः संभवे न ग्राहकार्थताहानं ग्राहकीयमपि वचनं समाख्यानियतकार्यं। लिङ्गाच्च कार्येषूपकर्तृ नियमे समाख्यापि व्यवस्थाकरी न बाध्या। अग्न्युत्पत्तिस्त्वाधानस्य स्वकालत्वात्सर्वक्रत्वर्था। आधानमपि तन्मुखेन सर्वार्थम् न साक्षात्। न चाग्निसाध्यमात्रार्था अग्नयः। अग्निमुपनिधाय स्तुवन्तीत्येतदर्थत्वनिषेधान्नाग्निसाम्यमृत्विजामित्युक्तम्।

नैव सिद्धेः राजन्यवैश्ययोः कल्पद्वयेन वसन्तविधानात् ज्योतिष्टोमाधिकारो न स्यात्। अतो बहिः क्रतोरग्न्युत्पत्तेः आहिताग्नेरधिकारात् अग्नीनां सर्वार्थत्वं स्थितमेवेत्यर्थः। नन्वेवं किमृत्विक्सर्वार्थत्वपक्षे मध्ये अग्नीनां सर्वार्थत्वाक्षेपसमर्थनमित्यत्राह—इहेति। ऋत्विक्सर्वार्थत्वे दृष्टान्ततया अग्नीनां सर्वार्थत्वं समर्थितमिति तन्मध्यता। अत एवैतत्पूर्वपक्षसूत्रेणैकतया एतत्सूत्रं लिखितमित्यर्थः। कथं तर्हि ऋत्विजामग्निवैषम्य मित्यत्राह—स्वकालतयेति। अग्नीनां सर्वक्रत्वर्थत्वं, ऋत्विजां त्वेकस्मिन्नेव क्रतौ यावत्कार्यार्थत्वमिति विषमो दृष्टान्त इत्यर्थः। ननु [न] सर्वथा साम्यात् दृष्टान्तता। किन्तु किञ्चित्साम्यात्। तच्च सर्वार्थस्वरूपमत्राप्यस्तीत्यत्राह—तद्वचनादिति। तदपि साम्यं वचनसमाख्याभ्यां निरस्तमित्यर्थः।

लभ्यामिति। स्वकालत्वादग्नयः सर्वार्था इति समधिगतमेतदिति भाष्ये दृष्टान्ततयाऽग्नीनामुक्तेः यादृशी सर्वार्थता तेषां प्रकृतिविकृतिरूप सर्वक्रत्वर्थतारूपा तादृश्येवर्त्विजामपि इति यावत्क्रत्वर्थतया पूर्वपक्ष इत्यर्थः ननु प्रकरणाधीनानामृत्विजां कथं सर्वक्रत्वर्थताशङ्केत्यत्राह—युक्तिश्चेति। बलवता लिङ्गेन प्रकरणबाधादपेक्षितविधानाद्यावद्विध्यर्थतया वचनसमाख्ययोरनुवादतैवेत्यर्थः।

राद्धन्तस्त्विति। ग्राहकपूर्वकत्वाल्लिङ्गविनियोगस्य नापेक्षणीयग्राहकार्थत्वबाधः। लिङ्गविध्यपेक्षयोः प्रकरणेऽपि संभवात् इति प्रकृतक्रत्वर्थतैव-

भट्टेन अग्नयस्तु स्वकालत्वादिति सूत्रेण चिन्तान्तरं कृतं, अग्नयः प्रकृत्यर्था अनारभ्याधीतत्वादिति पूर्वपक्षिते प्रकृतिविकृत्यर्था इति राद्धान्तितम्। स्वकालत्वात्=स्वतन्त्रोत्पत्तित्वादित्यर्थः। यस्या विकृतेर्न चोदकापेक्षा होमता तत्राद्विरुक्ते स्तदर्थता। तदाह—

प्राप्नुवन्तीदृशा भावा न स्वतन्त्राः कथञ्चन।
शास्त्रेण चोदिता ये हि दर्विहोमाः स्वरूपतः।
तेष्वेवाहवनीयं स्यात् न यागेष्वप्यचोदनात्।
यस्यास्तु अतिदेशापेक्षा होमता तत्र द्विरुक्तिः। तदाह—
ततश्चाहवनीयेन सहैवास्यातिदेशनात्।
प्रकृतौ वा द्विरुक्तत्वात् इत्ययं निश्चयो भवेत्॥

र्त्विजामित्यर्थः। ननु प्रकृतेऽपि क्रतौ तदीययावत्कार्यर्थतास्त्वित्यत्राह—ग्राहकीयमिति। वचनसमाख्याभ्यां नियतकार्ये शेषतेत्यर्थः। समाख्यातो लिङ्गं बलवदित्यत्राह—लिङ्गादिति विनियोजकस्यैव लिङ्गस्य कांस्यभोजिनयात् समाख्यापि विधित्वे अनुवादत्वायोगाद्व्यवस्थाकरी न बाध्येत्यर्थः कथं तर्हि अग्नीनां सर्वार्थत्वमित्यत्राह—अग्नीति। अग्न्युत्पत्तेः स्वकालत्वेन सर्वार्थत्वात्तन्मुखेनाधानमपि सर्वार्थं न साक्षादित्यर्थः। न चाग्नीनां सर्वार्थत्वेप्यग्निसाध्यवैदिकसर्वार्थता क्वचिन्निषेधादित्याह—न चेति। नन्वेवं कथमग्निवैषम्यमित्याशङ्क्य तदुक्तमेव पूर्वमित्याह—नाग्नीति।

अत्राचार्यैः अग्नयश्च स्वकालत्वादिति सूत्रेण चिन्तान्तरमेव कृतं तदाह—भट्टेनेति। तत्रेदृशी चिन्ता—किमग्नयः प्रकृत्यर्था उत प्रकृतिविकृत्यर्था इति। तत्रानारभ्याधीतत्वात् पर्णतादिवत्प्रकृत्यर्था इति पूर्वपक्षिते स्वतन्त्रोत्पत्तित्वात् प्रकृतिविकृत्यर्था इति सिद्धान्त इत्यर्थः। ननु द्विरुक्तिदोषात् कथं प्रकृतिविकृत्यर्थत्वमित्यत्राह—यद्विकृतेरिति। यत्र विकृतौ नातिदेशापेक्षं होमत्वं तदर्थतास्तु। अतिदेशापेक्षविकृतौ हि द्विरुक्तिदोषः कामं मा भूत्तदर्थतेत्यर्थः। अत्र साक्षित्वेन तदुक्तान् श्लोकानाह—तदाहेति।

[1]अस्त्वेष नयः न तु दृष्टान्तत्वेनान्तरा। न हि अद्विरुक्ते-ॠत्विजां यावत्सहायकार्यार्थता। किन्तु लिङ्गं। अथ किञ्चित्सा-म्यात् दृष्टान्तता। सा च न भट्टोक्तेति टीकयोरेवोक्तेति दिक्।

तस्योपदेशसमाख्यानेन निर्देशः

उक्ते समाख्यातो नियमे अपवादोऽयमिति सङ्गतिः। पूर्व-पक्षः—न वचनात् विशेषसमाख्यया च सामान्यसमाख्याबाधः। सा हि कार्यान्तरार्थमुपेया। बाधिता च न मुख्यार्थेति कार्यान्त-रेऽपि न स्यात्।

अस्त्वेष इति। भवत्वेवं चिन्तान्तरं तथापि ॠत्विक्सर्वार्थत्वतिदर्शनतया न युक्तम्। नर्त्विजामद्विरुक्तेः सर्वार्थता। किन्तु लिङ्गं, अतो विषमतया न दृष्टान्त इत्यर्थः। शङ्कते—अथेति। उत्तरं—सानेति।

तस्योपदेशः समाख्यानेन निर्देशः

यत्र केषुचित् सामान्यतः समाख्यातेषु वचनविशेषसमाख्याभ्यां विशेषान्वयधीः तत्र किमुभयमपि विनियोजकं उत वचनविशेषसमाख्ये एवेति चिन्ता—उदाहरणं तु हौत्रमिति सामान्याख्यावचनं मैत्रावरुणः प्रेष्यति चानु चाहेति। तथा आध्वर्यवमिति सामान्याख्या, नेष्ट्रीयं पोत्रीयमिति विशेषाख्या। तत्रावान्तरसङ्गतिमाह—उक्त इति। न नु सामान्यविशेष-योर्विशेषस्य बलवत्त्वात् कथं पूर्वपक्ष इत्यत्राह -- पूर्वपक्ष इति। न हि वचन-विशेषसमाख्याभ्यां सामान्य-समाख्याबाधः। तस्याः कार्यान्तरार्थत्वेन प्रमाणतयाऽवश्योपेयत्वात् समाख्या हि पदरूपं प्रमाणम् तस्य सकृदुच्च-रितस्य मुख्यत्वममुख्यत्वं च संयुक्तमिति प्रमाणमेवेत्युभयं विनियोजक-मित्यर्थः।

राद्धान्तस्त्विति। वचनविशेषसमाख्ययोः विशेषनिष्ठत्वेनाशुधीहेतुतया अनन्यथासिद्धतया चाशुविनियोजकतेति तद्द्वयेन सामान्याख्याबाधः तस्या विलम्बितत्वात् ब्राह्मणग्रामवदन्यथासिद्धत्वात् कार्यान्तरे सावकाशत्वा-

---

१. अस्त्येष B

राद्धान्तस्तु ब्राह्मणग्रामवद्भूम्ना लक्षणयापि कार्यान्तरार्थास्तु । विशेषसमाख्या आशुधीहेतुः वचनं चेति सामान्यसमाख्याबाधः । लिङ्गं भाष्ये व्यक्तम् । सामान्याख्यायाः एतल्लिङ्गं, विशेषाख्यायाः किञ्चिदन्यद् द्रष्टव्यमिति भट्टेनोक्तम् । तद्यदि सामान्याख्यया निश्चितं स्यात् तदा भट्टोक्तमस्तु ।

प्रैषा

वचनं बलीय इत्युक्ते वचनार्थचिंतेयामिति संगतिः पूर्वंपक्षः । प्रत्युद्देशं वाक्यपरिसमाप्तेः । प्रैषमात्रेऽनुवचनमात्रे च मैत्रावरुणविधिः । न च शब्दात्सहितोद्देश्यता, च शब्दस्य ज्ञातान्वयानुवादत्वात् ।

च्च । सा च पदत्वेन प्रमाणमपि प्रतिविषयं भेदेनैव प्रतीतिहेतुरितिवचनविशेषसमाख्यामात्रबाध्येत्यर्थः । प्रातरनुवाकादौ होत्रादेः समाख्याकृतनियमदर्शनं भाष्ये व्यक्तमित्याह—लिङ्गमिति । अत्राचार्यैः विशेषाख्याविषयेपि सामान्याख्याया विनियोजकता क्वचिदित्युक्ता तत्तथा निश्चिते युक्तमित्याह—सामान्याख्याया इति ।

प्रैषानुवचने

ज्योतिष्टोमे दैक्षपशौ श्रुतम्—तस्मान्मैत्रावरुणः प्रेष्यति चानु चाहेति । तत्र चिन्ता—किं प्रैषमात्रेऽनुवचनमात्रे च मैत्रावरुणस्य शेषता । उत समुच्चित प्रैषानुवचनयोरेवेति । तत्रावान्तरसङ्गतिमाह—वचनमिति । ननु च-शब्दात् समुच्चितयोरेव शेषत्वे कथं पूर्वपक्ष इत्यत्राह—पूर्वपक्ष इति । च-शब्दस्य निपाततया मानान्तरसिद्धार्थद्योतकतया उभयत्र विनियोगधीबललब्धान्वयानुवाद इत्यर्थः ।

राद्धान्तस्त्विवति । प्रैषसहचरितमनुवचनमस्ति अनुवचनसहचरितश्च प्रैषः । केवले च तत्र सहचरितासहचरितयोः सहचरिते सम्प्रत्यय इति सहचरिते एव प्रैषानुवचने धीस्थे उद्देश्ये । एकवाक्यताबलात् सहचरिते एवोद्देश्यत्वंहि । अन्यथा वाक्यभेदापत्तेरित्यर्थः । चशब्दश्चैवमुपपन्नो

राद्धान्तस्तु—सहचरिता सहचरितयोः सहचरिते संप्रत्ययो भवतीति नयात् सहचरितप्रैषानुवचने सन्निहिते उद्देश्ये च शब्द स्त्वेव समुच्चयाऽवस्थाद्योतकः। पूर्वं समुच्चितयोरन्वितयोरपि समुच्चये सुतरां द्योतको भवति। भट्टेन सोमप्रकरण इयं मैत्रावरुणश्रुतिः। भाष्ये तु प्रदर्शनार्थं दैक्षश्रुतिरुक्ता। तत्र हि सर्वे प्रैषा आध्वर्यवाः सर्वानुवचनानां च हौत्रसमाख्यानमित्युक्तम्। यद्येवं न्यायनिष्ठस्य प्रदर्शनमस्तु।

चमसांश्चमसाध्वर्यवस्समाख्यातात्

विशेषाख्या बलीयसीत्युक्तं। तद्वदिहेत्युत्थितेः संगतिः पूर्वपक्षः चमसेध्वर्युवत्त इत्येवं चमसे विशेषसमाख्या। अन्यत्र

भवतीत्याह—च-शब्द इति। द्योतकत्वेऽपि पूर्वसिद्धद्योतकत्वं युक्तम् नैतद्विधिसिद्धद्योतकतेत्यर्थः।

आचार्यैस्तु सोमप्रकरण एवेयं मैत्रावरुण-श्रुतिः न दैक्षप्रकरणे। भाष्ये तु दैक्षश्रुतिः प्रदर्शनार्था दैक्षे तु सर्वे प्रैषा आध्वर्यवा एव सर्वानुवचनानां च हौत्रतेत्युक्तम् तदाह—भट्टेनेति। यद्येवमिति। परमार्थतो दैक्षेपि संयुक्तप्रैषानुवचने मैत्रावरुणकर्तृक एव बर्हिष इव मैत्रावरुणस्याप्यङ्गप्रधानार्थ-संयुक्तप्रैषानुवचनार्थत्वात् अतएव निरूढपशौ तत्प्रदर्शनम् यद्यप्यत्र न भवति तथापि न्यायनिष्ठस्य प्रदर्शनमस्त्वित्यर्थः।

चमसानां होम आध्वर्यवः

सन्ति सोमे चमसाध्वर्यवः। तथा चमसैश्च होमाः। तत्र अध्वर्यवाः होमा इति सामान्याख्या। चमसाध्वर्यव इति विशेषाख्या। यद्यपि चमसाध्वर्युशब्दो वरणोत्पाद्यसंस्कारनिमित्तो न यौगिकः तथाप्यविरोधात् प्रतीयमानो योगोऽङ्गीक्रियते। यौगिकत्वेन वा कृत्वा चिन्ता। एवं स्थिते चिन्ता—किं चमसैः चमसाध्वर्यवो जुह्वति उताध्वर्युरेवेति। तत्रावान्तरसङ्गतिमाह विशेषेति ननु आध्वर्यव इति समाख्यया अध्वर्योरेव होम-कर्तृता

---

१. सन्निहिता

चमसेभ्य आध्वर्यवाख्येति चमसाध्वर्यव एव चमसैर्जुह्वति एवं तेऽध्वर्युवत् अध्वर्योर्ह्यन्यता होमादिकार्यं दृष्टमिति तेनाध्वर्युवत्त्वम् राद्धान्तः वरणभरणभेदोत्पाद्ये अध्वर्युशब्दो मुख्य इति नेहापि तस्य शक्तिरितीह गौणता चमसेऽध्वर्युवदित्येवम् । यदि चाध्वर्युरेव चमसैर्न जुहोतीति तदा न ते चमसेऽध्वर्युवदित्यध्वर्युस्तत्र जुहोतीति विशेषाख्ययैव, अध्वर्यो होमः । अध्वर्याविन्यत्र व्यग्रे अध्वर्युवज्जुहोतीत्येवं विशेषसमाख्योपपत्तिः । न चान्यत्र, यथाध्वर्युस्तथैते चमस इत्येवमन्वयः । अन्यापेक्षत्वापत्तेः, लिङ्गमेवं,

---

कथं चमसाध्वर्युकर्तृतया पूर्वपक्ष इत्यत्राह—पूर्वपक्ष इति । चमसे अध्वर्युवत्ते इत्येत्रं चमसाध्वर्यव एव चमसैर्जुह्वति । एवमध्वर्युवद्भावस्तेषां भविष्यतीत्यर्थः । ननु चमसेष्वध्वर्योः होमकर्तृत्वाभावे कथं तद्वत्ते इत्यत्राह—अध्वर्योरिति ।

राद्धान्तस्त्विवति । न तावदध्वर्युशब्दस्यानेकत्र शक्तिः । किन्तु वरणभरणभेदोत्पाद्ये पुरुषविशेष एव । ततश्चमसाध्वर्युषु अध्वर्युशब्दो गौणः चमसेष्वध्वर्युवत्ते इत्येवम् । ततः किमित्यत्राह—यदीति । तत्र यदि चमसैः अध्वर्युर्न जुहोति तदा तेषां चमसाध्वर्युत्वं न स्यादिति तत्सिद्ध्यर्थं चमसैरध्वर्योर्होम इति सामान्याख्याप्राप्ताध्वर्युहोमापेक्षत्वात् विशेषाख्यायाः न सापेक्षणीयसामान्याख्याबाधकतेति अध्वर्योरेव चमसैर्होम इत्यर्थः का (कथं) तर्हि विशेषाख्याया गतिरित्यत्राह—अध्वर्योरिति । नन्वन्यत्र होमकर्तृत्वादध्वर्योः चमसैर्होमाभावेऽपि तदपेक्षया तद्वत्तया विशेषाख्योपपत्तिरित्यत्राह—न चेति । अन्यापेक्षत्वे सामर्थ्याभावात् चमसाध्वर्यव इति समासानुपपत्तिरित्यर्थः । लिङ्गमिति । चमसांश्चमसाध्वर्यवे प्रयच्छति तांश्च वषट्कर्त्रे हरतीति वषट्कर्त्रे दानं भक्षार्थम् । भवत्वेवं तथापि कथमन्येन होम इत्यत्राह—तदन्येनेति । अन्येनाध्वर्युणा हुते चमसाध्वर्युद्वारावषट्कर्त्रे-भक्षार्थं दानमञ्जसा उपपद्यत इति चमसाध्वर्युतोऽन्येनाध्वर्युणा हुत इति धीः । यद्यपि चमसाध्वर्युहस्तादादाय वषट्कर्त्रे भक्षार्थं प्रयच्छतीत्यविधिः

वषट्कर्त्रे दानं भक्षार्थम् । तदन्येन हुते चमसाध्वर्युद्वारा भक्षार्थं दानमञ्जसेति । चमसाध्वर्युतोऽन्येनाध्वर्युणा हुत इति धीः ।

वेदोपदेशात्

इह तर्हि विशेषसमाख्या बलवतीत्युत्थितेः सङ्गतिः । पूर्वपक्षः । श्येन औद्गात्रसमाख्यातो विशेषसमाख्यया साङ्ग उद्गात्रा कार्यः । तथैव वाजपेयोऽध्वर्युणा चोदकागतनानर्त्विग्बाधो वैकृताख्यया । राद्धान्तः प्राकृतः क्लृप्तो नानर्त्विगन्वयः । विकृतौ लौकिकाख्यातः कल्प्य इति क्लृप्तेन कल्प्यबाधः । समाख्या चोपदिष्टेषु धर्मेष्वस्तु । न चात्र गुणमुख्यव्यतिक्रमनय-

---

तथापि चमसोन्नयनं चमसाध्वर्युकर्तृकमेवेति ततश्चमसाध्वर्यवे दत्त्वा पुनः स्वहस्तकरणे प्रयुक्तिगौरवमदृष्टार्थत्वं चेति नाञ्जसोपपत्तिरित्यर्थः ।

वेदोपदेशात्

अस्त्यौद्गात्र-समाख्यातः श्येनः आध्वर्यवसमाख्यातो वाजपेयश्च । सन्ति तत्रातिदेशिकान्यङ्गानि । तत्र चिन्ता—किन्तान्युद्गातृभिः अध्वर्युभिर्वा कर्तव्यानि उत नानर्त्विग्भिरिति । तत्रावान्तरसङ्गतिमाह—ननु प्राकृताङ्गानां प्रकृतौ नानर्त्विक्कर्तृकतावगतेः कथमुद्गातृकर्तृतयापूर्वपक्षाशङ्केत्यत्राह —पूर्वेति । औद्गात्र-समाख्यया विशेषरूपया साङ्गश्येन उद्गातृकर्तृकः तथा वाजपेयोऽपि साङ्गोऽध्वर्युकर्तृकः औपदेशिक्या वैकृत्याख्यया चोदकागतर्त्विग्बाधात् । अत एव सत्रे ये यजमाना इति प्राकृतर्त्विग्बाध इत्यर्थः ।

राद्धान्तस्त्विति । प्रकृतौ हि प्राकृतानां पदार्थानां नानर्त्विगन्वयः क्लृप्तः । विकृतौ तु लौकिकाख्यातः कल्प्य इति क्लृप्तकल्प्ययोः क्लृप्तं बलवदिति क्लृप्तेन कल्प्यबाधः । सत्रे तु ऋत्विक्कार्ये यजमानविधेः प्राकृतर्त्विग्बाधः। इह तु न तथा कार्ये विधिरित्यर्थः । नन्वेवं विशेषसमाख्यायाः का गतिरित्यत्राह—समाख्येति । वैकृतासपुटहननादौ उपदिष्ट धर्मे समाख्यास्त्वित्यर्थः । नन्वेवं वैकृतसमाख्यावगत मुख्यश्येनादिधर्मो-

विरोधः । तत्र हि प्रधानवेदव्यपदेश्यान्यङ्गानीति प्रधानवेदधर्मोऽङ्गेषूक्तः । इह कल्प्या प्रधानसमाख्या क्लृप्ताङ्गकर्त्रन्वयादबलेत्युक्तम् ।

इति महोपाध्यायभवनाथमिश्रविरचिते
मीमांसानयविवेके तृतीयस्य
अध्यायस्य सप्तमः
पादः ।

द्गात्रादिकर्तृहाने गुणमुख्य-व्यतिक्रम-नयविरोध इत्यत्राह—न चात्रेति । तत्र हेतुः—तत्र हीति । तत्र हि प्रधानवदव्यपदेश्यत्वादङ्गानां न पृथग्वेदवेद्यतेर्ऽत प्रधानवेदधर्मोऽङ्गेषक्तः । इह तु कल्प्या प्रधानाख्या क्लृप्ताङ्गकत्रन्वयादबलेत्युक्तमिति न विरोध इत्यर्थः ।

इत्यात्रेयस्य श्रीरङ्गनाथसूनोः वरदराजस्य कृतौ
नयविवेकदीपिकायां तृतीयस्य
सप्तमः पादः ।

अष्टमः पादः

स्वामिकर्म

इहाव्यक्तविरोधिसमाख्यातः परिक्रयचिन्तेति पादान्तरमनन्तरं च। पूर्वपक्षः, आध्वर्यवसमाख्याते। काण्डे परिक्रयाम्नानादध्वर्युकर्तृकोऽसौ न च स्वाम्यर्थं न कर्मकरस्य धनव्ययः, अधिकधनलोभादल्पव्ययोऽपि लोके दृष्टः। राद्धान्तः। अधिकारश्रुत्या स्वामिनः सर्वत्र कर्तृत्वमुक्तम्। अतः प्रधानार्थविरोधात्समाख्याबाधेन याजमान एव परिक्रयः। अध्वर्युक्रीते तेन तु

वरदराजीये तृतीयाध्यायस्य

अष्टमः पादः

स्वामिकर्मपरिक्रयः

अस्ति सोमे परिक्रयः तस्य द्वादशशतं दक्षिणेति। तत्र चिन्ता—किमसावाध्वर्यव उत याजमान इति। अत्र पादभेदोपाधिभूतार्थं पादानन्तर्यं चाह—इहाव्यक्तेति। पूर्वपादान्ते व्यक्तविरोध समाख्यातः परिक्रयचिन्तेति पादार्थभेदोऽनुक्रमश्चेत्यर्थः। नन्वन्यकर्मार्थमन्यस्याध्वर्योः स्वधनव्ययेन न सहायनरपरिक्रयः संभवतीति कथं पूर्वपक्ष इत्यत्राह—पूर्वपक्ष इति। परिक्रयस्तावत् आध्वर्यवकाण्डे समाम्नातः। तस्य कर्त्रपेक्षायां समाख्याबलात् अध्वर्युकर्तृतैव युक्ता। कर्मकरस्याप्यध्वर्योः स्वामिकर्मार्थं स्वधनव्ययो युक्तः अधिकधनलोभादल्पव्ययस्य लोके दृष्टत्वादित्यर्थः।

राद्धान्तस्त्विति। अधिकारश्रुतेर्हि प्रधानभूतायाः सङ्गिप्रधाने स्वामिन एव कर्तृत्वमापादितम्। अतः प्रधानभूताधिकारश्रुतिविरोधात्

कृतं न स्वामिना कृतं कारितं वा। ननु लौकिकीमध्वर्युप्रयुक्तिमाश्रित्य स्वामिकारितताऽस्तु। तन्न। यावच्छ्रुतेन हि शास्त्रार्थः। न चाध्वर्योः परिक्रयान्तरं समेनाधिकेन वा धनेन श्रुतम्। न च यावच्छ्रुतदक्षिणयाऽन्यपरिक्रयार्थमध्वर्युं प्रतिप्रयोजकता। यदि ह्यृत्विजां परिक्रयो वचनात्स्यात्तदा दक्षिणान्तरमपि कल्प्यम्। समाख्यया तु कल्प्यो विधिः सोऽधिकारश्रुत्यस्वरसाद्बाध्यः। समाख्या ब्राह्मणग्रामवदस्तु।

लघ्व्यामधिकं—परिक्रयान्तरे अध्वर्योः श्रुतपरिक्रयादृष्टार्थता, अनपेक्षेण तेनान्तेरनपेक्षत्वश्रुतिबाधो वा। वचनात्त्वन्येनापि परिक्रयः।

यथाय एतामिष्टकामुपदध्यात्सत्रीन्वरान् दद्यादिति।

समाख्याबाधेन याजमान एव परिक्रय इत्यर्थः। ननु यजमानपरिक्रीतैः पदार्थानुष्ठाने यथा स्वामिकर्तृत्वाविरोधः तथाऽध्वर्युक्रीतैरपि अस्त्वित्यत्राह– अध्वर्य्विति। युक्तं स्वक्रीतकृते कार्ये क्रयद्वारा स्वस्य कर्तृत्वं, अन्यक्रीतकृते तु स्वेन कृतं कारितं वा न भवतीत्यर्थः। नन्विति। चोदितक्रियातिरिक्तां लौकिकीमध्वर्योः क्रयप्रयुक्तिमाश्रित्य परंपरया स्वामिकर्तृकतास्त्वित्यर्थः। तन्नेति। न तावदध्वर्योः परिक्रयान्तरं न्यूनेनाधिकेन वा धनेन श्रुतम्; येन परम्परया स्वामिकारितता स्यात्। नापि लौकिकी प्रयुक्तिराश्रयणीया। श्रुतेन हि शास्त्रार्थसम्पत्तिर्नाश्रुतेनेत्यर्थः। ननु यावच्छ्रुतदक्षिणयैव स्वामिपरिक्रीतोऽध्वर्युरन्यपरिक्रयार्थयैव दक्षिणया स्वामिनाप्रेर्यतामित्यत्राह—न चेति। स्वस्य प्राप्तधनेनान्यपरिक्रये प्रेर्यत्वे स्वामिना च आवश्यके अध्वर्युपरिक्रयेऽङ्गीकृते समाख्याबाधो दुस्तरः स्यादिति भावः। ननु य एतामिष्टकामुपदध्यात् स त्रीन् वरान् दद्यादितिवत् श्रुतिबलाद्दक्षिणान्तरं कल्प्यमित्यत्राह—यदि हीति। ऋत्विक्कर्तृकपरिक्रये श्रुत्यभावादित्यर्थः। ननु समाख्याबलात् विधिकल्पनास्त्वित्यत्राह—

संस्कारास्तु पुरुषसामर्थ्ये कर्मवद्व्यवतिष्ठेरन्

इह समाख्यया नाधिकारश्रुतिविरोध इत्युत्थितेः संगतिः पूर्वपक्षः-क्रीतैर्ऋत्विग्भिः कृता वपनादयः स्वामिनैव कृता इत्याध्वर्यव समाख्यया आध्वर्यवाः। एवं चैतद्राद्धान्ते स्वामि-संस्कारत्वे स्थिते फलसंयोगादित्यत्राधिकृतावस्थसंस्कारत्व-मुक्तम्। तत्रापि स्वामिसंस्कारत्वे स्थिते चिन्तेयमिति।

राद्धान्तः। नृसंस्कारा एते लोकतः। एषामध्वर्युसंस्कारत्वेऽधिकारश्रुतिविरोधः। स्वामिन एष्वकर्तृत्वात्। परिक्रयद्वारा हि कर्तृत्वम्। न च क्रीतसंस्कारार्थः, क्रयः। कर्म कर्तुं हि क्रयात्कर्तुरुपादानम् न संस्कर्तुमिति न क्रयद्वारा क्रीतसंस्कारे

समाख्येति। लौकिक्या समाख्यया वैदिकविषयया कल्प्यो विधिः। सोऽधिकारश्रुतिस्वारस्यहानेन बाध्यः। समाख्या ब्राह्मणग्रामवदन्यथासिद्धेत्यर्थः।

लप्स्यामिति अधिकधनलोभात् स्वामिकर्म सिद्ध्यर्थमप्यध्वर्युः पुरुषान्तरं परिक्रीणाति इति पूर्वपक्षिते राद्धान्ते ऽधिकं—नाध्वर्युपरिक्रीतत्वमृत्विजां संभवति। योऽध्वर्योर्दक्षिणाभागस्तन्मात्रेण शेषर्त्विक्परिक्रये स्वस्य दक्षिणाशून्यतया परिक्रीतत्वाभावात् कथं परिक्रीतोऽध्वर्युः अन्यार्थमनुतिष्ठेत्। अथ श्रुतदक्षिणाभागादतिरिक्तं परिक्रयान्तरं परिकल्प्यत इति चेन्न। श्रुतपरिक्रयस्यादृष्टार्थत्वप्रसङ्गात् अनपेक्षेण परिक्रयान्तरेणैव अध्वर्योरानतत्वात्। न हि दृष्टे संभवति अदृष्टार्थता न्याय्या। अथादृष्टार्थतापरिहारायाध्वर्योः परिक्रयान्तरं एवं तर्हि अनपेक्षश्रुतेर्बाध एव स्यात्। स चायुक्तः अतः प्रयोगाङ्गसर्वकर्तृपरिक्रय एक एवायं याजमानो न नानेत्यर्थः। यत्र तु वचनमस्ति तत्रान्येनापि परिक्रयः कल्प्य इत्याह—वचनादिति।

संस्कारास्तु पुरुषसामर्थ्ये

ज्योतिष्टोमे—केशश्मश्रू वपते नखानि निकृन्तते दतो धावते स्नाति इत्यादि पुरुषसंस्काराः श्रुताः। तत्र चिन्ता—किमेते आध्वर्यवा उत

स्वामी कर्तेत्यधिकारश्रुतिविरोधात्समाख्याबाधः । ननु कर्म कर्तुं योग्यतार्थसंस्कारार्थोऽपि क्रयः । मैवम् । सिद्धे क्रीतसंस्कारे तथा संस्कारमात्रं तु श्रुतं । प्रधानकर्तुरेवेति न योग्यतार्थतापि क्रयस्य कल्प्या । यत्रर्त्विजामेव संस्कारश्रुतिः । तत्र संस्कृतर्त्विक्कर्तृकपदार्थार्थत्वेन[1] क्रयः कल्प्यते । यथोपवासं वक्ष्यति ऋत्विजाम् ।

नन्वधिकारश्रुतिसमाख्ययोरनुग्रहायोभयसंस्कारताऽस्तु । तन्न । साधारण्ये हि नर्त्विक्कृतः स्वामिना कृतः कारितो वेत्यधिकारश्रुतिविरोधः । ऋत्विक्षु तदर्थेऽपि क्रय इत्यपि कल्प्यम् । अकल्पनेन तु न स्वामिनाकारिततेति कल्पनां विनैव स्वामि-

---

याजमाना इति । तत्रावान्तरसङ्गतिमाह—इहेति । ननु साध्यहोनानां वपनाद्यङ्गानां साध्या आसन्नयजमानसंस्कारतैव युक्ता, नान्यसंस्कारतेति कथं पूर्वपक्ष इत्यत्राह—पूर्वेति । सत्यं नियोगासन्नता स्वामिनः तथापि आध्वर्यवसमाख्यया अध्वर्युसंबन्धप्रतीतेः तदन्वयितैव युक्ता । न चाधिकारश्रुतिविरोधः पूर्वनयेन याजमानत्वात्परिक्रयस्य यजमानक्रीतर्त्विग्भिः कृता वपनादयोऽपि स्वामिनैव कृता इति न प्रधानविरोध इत्यर्थः । ननु पूर्वपादे फलसंयोगादित्यत्र वपनादीनुदाहृत्य तस्य स्वामिसंस्कारत्वे उक्ते कथमध्वर्युसंस्कारतेत्यत्राह—एवं चेति । राद्धेति । वपनादयो द्वितीयाद्यश्रुतावपि स्वभावतो नरसंस्कारा इति लोकसिद्धम् । ततः किमेषामिति । ननु परिक्रयद्वारा स्वामिन एव कर्तृत्वान्नाधिकारश्रुतिविरोध इत्यत्राह—परिक्रयेति । तत्र हेतुः न चेति । कर्म कर्तुं हि क्रयात् कर्तुरुत्पादनं परिक्रयरूपं न कर्तृसंस्कारार्थम् । अतो न परिक्रयद्वारा स्वामिकर्तृतेति प्रधानश्रुत्यवगतासन्नविरोध इत्यर्थः । नन्विति । कर्मकरणार्थस्यापि परिक्रयस्य कर्मकर्तृयोग्यतार्थसंस्कारार्थतापि युक्तेत्यर्थः । मैवमिति ।

---

१. र्थं एव

संस्कारकता। नन्विडाभक्षणवत्स्वयं करोतु ऋत्विजः कारयतु। तन्न, भक्षो द्रव्यसंस्कारार्थः। तत्र स्वामिन ऋत्विजां च कर्तृत्वेनान्वय इति क्रयस्तदर्थः, तेन कारितता। इह तु प्राधान्येनान्वयेन कारिततेति भेदः।

किञ्चेडाभक्षे[1]पञ्चानामपि वचनात्साधारण्यम्। इह न तथा वचनम्।

लघ्व्यामधिकं। यद्यप्याध्वर्यवाख्यायां प्रत्ययार्थकर्मप्राधान्यं पाचकवत्। अतः सा गुणभूतकर्तृनियमे शक्ता न संस्कार्यनियमे। तथापि संस्कारे स्वाम्यपि न श्रूयत इति ऋत्विक्स्वामिनोः समानोऽयं विधिरस्त्विति पूर्वपक्षिते बृहत्युक्त एव राद्धान्तः। न

सत्यं तदर्थतापि कल्प्येत यदि क्रीतसंस्कारार्थता दृढा स्यात्। इह तु संस्कारमात्रं श्रुतम्। तत्साध्यप्रत्यासन्नप्रधानकर्त्तुरेव युक्तम् कल्पनानिरपेक्षत्वादिति न परिक्रयस्य योग्यतार्थसंस्कारार्थतापि कल्प्येत्यर्थः। कथं तर्हि ऋत्विक्संस्कारोपवासाद्यर्थता क्रयस्येत्यत्राह—यत्रेति। समाख्याप्रधानश्रुत्योरुभयोरनुग्रहाय उभयसंस्कारतास्त्विति शङ्कते—नन्विति। तन्नेति। संस्कारसाधारण्ये हि ऋत्विक्संस्कारपक्षे स्वामिकृतकारिततानुपपत्तेः अधिकारश्रुतिविरोधो दुर्वार इति तद्धानाय क्रयस्य संस्कारार्थत्वमपि कल्प्यं स्यात्। न चैतद्युक्तम्। अकल्पनेनापि स्वामिसंस्कारतयोपपत्तेः इत्यर्थः। नन्विति। यथा भक्षणे स्वामी भक्षणमृत्विजः कारयति स्वयं च करोति तथेहाप्यस्त्वित्यर्थः। तन्नेति। युक्ता द्रव्यसंस्कारार्थत्वाद्भक्षणस्य ऋत्विक्स्वामिनोः कर्तृत्वात् परिक्रयस्य तादर्थ्यात् स्वामिकारितता। इह तु वपनादिषु न कर्तृतयाऽन्वय इति न स्वामिकारितेति भेद इत्यर्थः। यजमानपञ्चमा इडां भक्षयन्तीति वचनादपि तत्र युक्तं भक्षणमित्याह—किञ्चेति।

---

१. B पञ्चानामेव

च स्वामिसंस्कार एवाध्वर्योः कर्तृत्वशङ्का । न हि वचनं विनाऽऽचारविरुद्धमध्वर्युकर्तृकं स्वामिदन्तधावनम् । न च नित्यं नापितत्कर्तृके केशश्मश्रुवपने आचारविरुद्धमध्वर्योः कर्तृत्वम् । अञ्जनादौ च कर्तृत्वे परस्मैपदादाङ्ः इत्यादि न स्यात् । एतच्च गुरुणा न शङ्कितम् अध्वर्युसंस्कारनिरासार्थेऽस्मिन्ननुपयोगात् भट्टेन प्रपञ्चरुचिनोक्तं स्वामिन एव यथाहं स्वतः परतश्च कर्तृत्वम् । भाष्ये प्रपञ्चो व्यक्तः ।

लघ्व्यामिति । आध्वर्यवमिति तद्धितान्तसमाख्येयम् । तत्र च प्रत्ययार्थकर्मप्राधान्यं कृत्तद्धितविषये प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः प्रत्ययःप्राधान्येनेति यथा पाचकादिषु कर्तृप्राधान्यं, तथेहापि कर्मप्राधान्यमिति अध्वर्योः गुणभावेन प्रतीतिरिति गुणभूतकर्तृनियम एव समाख्यातः न शषिनियम इति कथं पूर्वपक्ष इत्याक्षिप्य समर्थनमधिकम् ।

सत्यमेवं तथापि संस्कारविधिवाक्ये स्वाम्यपि शेषितया न श्रुत इति विशेषाग्रहात् ऋत्विक्स्वाम्युभयसंस्कारतया समानविधित्वमेव समाख्याप्रधानश्रुत्यनुग्रहायेति पूर्वपक्षिते बृहत्युक्त सामानविध्यनिराकरणमेव राद्धान्त इत्यर्थः । ननु स्वामिसंस्कारत्वेऽपि वपनादौ समाख्यया ऋत्विजां कर्तृतास्त्वित्यत्राह—न चेति । तत्र हेतुः—नहीति । लोकाचारविरुद्धं स्वामिवपनदन्तधावनयोः न ऋत्विक्कर्तृकत्वं समाख्यया कल्प्यमित्यर्थः । परस्मैपदविरोधादपि न युक्तमित्याह—अञ्जनेति । नन्विदं कर्तृत्वं टीकाकारेण किमिति न शङ्कितमित्यत्राह—एतदिति । अनुपयुक्तत्वादत्रेत्यर्थः । आचार्यैस्तु सर्वमिदमाशङ्क्य निराकृतमित्याह—भट्टेनेति । ननु वपनादौ स्वामिनः कर्तृत्वं प्रधानश्रुत्यवगतमिति कथं घटते स्वात्मनि क्रियाविरोधादित्यत्राह—स्वामिन इति । सामानविध्यादिभाष्ये व्यक्त इत्याह—भाष्य इति ।

तपश्च फलसिद्धत्वाल्लोकवत्

ज्योतिष्टोमे द्व्यहं नाश्नीयादित्यनशनरूपं तप आम्नातम् । अत्र चिन्ता—किमार्त्विज्यं याजमानं वेति । अवान्तरसङ्गतिमाह—उक्तेति ।

तपश्च

उक्तनयातिदेशात्संगतिः[1] पूर्वपक्षः। क्लेशरूपमनशनादीति लोकसिद्धं, क्लेशापनुत्यर्थत्वे क्रयो दृष्टार्थं इति तत्रर्त्विग्द्वारा कर्तृत्वे नाधिकारश्रुतिविरोध इति न समाख्याबाधः।

राद्धान्तः। क्लेशरूपत्वेऽप्यस्य नृसंस्कारतेत्युक्तं भाष्ये। न च संस्कर्तुं क्रय इति वपनादिवद्याजमानता। यत्तूपवासाद्यृत्विजामेव, वचनात्तत्तेषामस्तु।

लघ्व्यां राद्धान्तः—शंयुनयान्निषिद्धक्रियादुःखहेतुः। सोपवासादिभिर्दुःखैरपैति स्वामिना दुःखं तपोऽनुभवता भोगेन दुःखहेतौ क्षपिते कर्मफलमप्रतिबद्धं सुखं लभ्यत इति तत्संस्कार

ननु का पुनरत्र पूर्वपक्षे अधिकाशङ्का यन्निराकरणाय पूर्वनयातिदेश इत्यत्राह—पूर्वेति। इयमधिका शङ्का—ऋत्विजां परिक्रयो हि स्वामिनः क्लेशानुत्पत्त्यर्थः। क्लेशरूप चानशनं तप इति लोकसिद्धम्। अतः समाख्यया ऋत्विक्कर्तृकं तपः। न चाधिकारश्रुतिविरोधः। क्रीतर्त्विग्द्वारा स्वामिनः कर्तृत्वोपपत्तेःपरिक्रयस्य क्लेशानुत्पत्त्यर्थत्वबलात् तपोर्थताऽपि परिक्रयस्य युक्ता उपवासवदित्यर्थः।

राद्धान्त इति। सत्यं क्लेशरूपं तपः तथाप्यस्य शरीरशुद्धिद्वारा नृसंस्कारतेति तपः शुद्धस्य यागफलं सिद्ध्यतीति भाष्ये व्यक्तमित्यर्थः। ततः किमित्यत्राह—न चेति। पूर्वनयादित्यर्थः। उपवासे तु वचनात् तथा युक्तमित्याह—यत्त्विति।

लघ्व्यामिति। पूर्वपक्षस्य स्फुटत्वात् राद्धान्ते शङ्कोत्तरमधिकमित्यर्थः। इयं शङ्का—न निषिद्धक्रियादुःखहेतुः ब्रह्महननादेः क्षणिकस्य कालान्तरीयदुःखसाधनत्वायोगादिति। तत्रोत्तरं—शंयुनयादिति। शंय्वधिकरणराद्धान्तनयेन दुरितापूर्वव्यवधानविधया निषिद्धक्रिया कालान्तर-

---

१. शोऽत्रेति संगतिः

एवेति स्वामिनैव कार्यम्। समाख्यया कर्तृस्थोऽयं संस्कारो नर्त्विजः। यद्यपि फलप्रतिबन्धहेतुक्षयो न श्रुतः। तथापि योग्यतासन्निध्यपेक्षाभिः प्रतिबन्धहेतुक्षयार्थ एव संस्कारविधिः।

दुःखोत्पत्तिर्हि सामान्यतो दुःखहेतु[क्षये]-क्षययोग्येत्ययमपेक्षितविशेषक्षयहेतुः। पक्षे संभवतोऽपि प्रतिबन्धकस्य क्षयापेक्षा। न चैवमनित्ये संस्कारकार्ये संस्कारानित्यता, कार्यानित्यत्वानिश्चये नित्यसंस्कारानुष्ठानात्। महादुःखहेतोरपि प्रतिबन्धकस्याल्पदुःखाद् क्षयः शास्त्रमानात्। प्रायश्चित्तादिवत्। प्रायश्चित्ते त्वयं विशेषः[1]। साक्षादेव महादुःखहेतुक्षयश्रुतिरिति दिक्।

भाविन्यपि दुःखे हेतुरेव। का पुनरसौ निषिद्धक्रियेति विशेषनिरूपणमनुपयोग्येव कादाचित्कदुःखकारणनिषिद्धक्रिया कदाचिदस्तीति लोकसिद्धमेव। ततः किं तत्राह—सोपवासेति। कर्तृजन्यफलभागित्वं स्वामिनोऽधिकार श्रुत्यवगतम्। तच्च यावज्जन्मकृतपापहेतुकर्मप्रतिबन्धकापायादेवेति स्वामिना दुःखं तपोऽनुभवता फलभोगादेव पापहेतुकर्मणि क्षपिते ज्योतिष्टोमादिकर्मफलं सुखं [अ] प्रतिबद्धं लभ्यत इत्यपेक्षितविधेः स्वामिसंस्कार एव तप इति स्वामिनैव कार्यमित्यर्थः। ननु स्वामिसंस्कारत्वेपि ऋत्विक्कर्तृकत्वमस्त्वित्यत्राह—समेति। कर्तृस्थस्वभावोऽयमनशनरूपं तपः संस्कार इति स्वामिसंस्कारस्य ऋत्विक्कर्तृकतां न समाख्याऽऽपादयितुं क्षमा दण्डिन्यायेन तस्या अन्यथासिद्धत्वादित्यर्थः। ननु तपसः प्रतिबन्धहेतुक्षयार्थताप्यङ्गीक्रियते (इत्यर्थः।) कथमस्य दुःखहेतुक्षययोग्यतेत्यत्राह—दुःखेति। सामान्यतः सिद्धयोग्यतयापि अपेक्षितपापहेतुक्षययोग्यतासिद्धेरित्यर्थः। ननु जन्मान्तरपापहेतुकर्मणोऽनिश्चितत्वात् कथं तत्क्षयापेक्षेत्यत्राह—पक्ष इति। नन्वेवं संस्कारविधेरपि पाक्षिकतापत्त्या संस्कारस्य

---

१. A भेदः

एवं वा

गुणत्वाच्चेत्यादिसूत्रेण नयान्तरम् । वचनादृत्विक्संस्कार इत्युक्ते तद्विशेषचिन्तेति संगतिः । पूर्वपक्षः । उक्तं वाजपेये उपदिष्टमध्वर्युणा कार्यमिति उपदिष्टाश्च हिरण्यस्रगादयः । तेन तेऽप्याध्वर्यवा एव न सर्वर्त्विजाम् ।

राद्धान्तः । आध्वर्यवसमाख्यया हि अध्वर्योर्गुणत्वेन नियमः । पाचकादिवत्प्रत्ययार्थकर्मप्राधान्याद्धिरण्यस्रगादेर्नरं प्रति गुणत्वेनोपदेशः । विशेषणत्वेन श्रुतेः । अलङ्कारस्वभावत्वाच्च प्रतिप्रधानं

नित्यानुष्ठानविधानं न स्यादित्यत्राह—न चेति । कार्यरूपस्य पापहेतुकर्मणो नित्यत्वानिश्चये नित्यमेव संस्कारानुष्ठानादित्यर्थः । ननु महतो ब्रह्महननादेः पापहेतोः कथमल्पानशनरूपतपसः क्षय इत्यत्राह—महेति । रहस्यप्रायश्चित्तादिवत् अल्पादपि शास्त्रप्रामाण्यान्महादुःखहेतुक्षय इत्यर्थः । इयांस्तु विशेषः प्रायश्चित्त इत्याह—प्रायश्चित्ते त्विति । नन्वनेनैव विशेष उक्तः शास्त्रप्रामाण्यात्प्रायश्चित्तश्रुतावल्पादपि महादुःखहेतुक्षयः नेह तथा श्रुतिरिति शङ्का दिक्पदनिवर्त्या । निवृत्तिस्तु—यद्यपि साक्षान्न श्रुतिः तथाप्यपेक्षादिभिः संस्कारश्रुतेः तत्रापि तात्पर्यात् श्रुतिमूलत्वादत्रापि शास्त्रप्रामाण्यादेव तथा कल्पनमित्यर्थः ।

एवं वा । गुणत्वाच्च वेदेन न व्यवस्था स्यात् । अस्त्यौद्गात्रः श्येनः । तत्र श्रुतं लोहितोष्णीषा ऋत्विजः प्रचरन्तीति । तत्र वचनादार्त्विजे सिद्धे चिन्ता—किं हिरण्यमालित्वमध्वर्योरेव, उत सर्वर्त्विजामिति । तत्र एवं वेति भाष्ये कस्य सूत्रस्य नयान्तरपरतया व्याख्यान्तरमित्यत्राह—गुणत्वादिति । तत्रावान्तरसङ्गतिमाह—वचनादिति । ननु हिरण्यमालिन इत्यविशेषश्रुतेः सर्वर्त्विजां हिरण्यस्रगादयो युक्ता बहुवचनादिति कथं पूर्वपक्ष इत्यत्राह—पूर्वं इति । गनपादान्तनये वाजपेये उपदिष्टं अध्वर्युणा कार्यमित्युक्तम् । हिरण्यस्रगादयोऽपि उपदिष्टा एवेति समाख्याबलात् आध्वर्यवा एव युक्ताः न सर्वर्त्विजामित्यर्थः ।

गुणवृत्तिनियात् सर्वर्त्विजां हिरण्यस्रगादिः । प्रधानत्वपूर्वकं च कर्तृत्वम् । यथाप्रधानं न समाख्यया नियम्यं प्राधान्यबाधापत्तेः । यत्र कर्तृतयैव नरान्वयः यथा ग्रासपुटादौ तत्रास्तु समाख्यानियमः ।

लघ्व्यां समाख्यया विशिष्टकर्तृनियमे तदनुरोधाद्विशिष्टकर्तृसंस्कारतेति पूर्वपक्षिते । राद्धान्तः । वचनात्सर्वर्त्विक्संस्कारे न समाख्या सङ्कोचायालमिति नैव ब्राह्मणग्रामवन्तेया परोप्याह—

संस्कारत्वादतिक्रान्ते समाख्यागोचरे सति ।
वचनेमर्त्विजां येन तेनैवान्येष्वपि स्थिताः ।

राद्धान्तेति । न हि समाख्या संस्कारविषये शेषिनियामिका । तत्राध्वर्यवाख्यया अध्वर्योर्गुणत्वेन नियमः पाचक इत्यत्र कर्तुरिव प्रत्ययार्थस्य कर्मणः प्राधान्यात् । भवत्वेवं किमायातं हिरण्यस्रगादावित्यत्राह—हिरण्येति । हिरण्यस्रगादेः पुरुषं प्रति गुणत्वेनैवोपदेशः । बहुव्रीहिसमासतया पुरुषविशेषणतयैव श्रुतेः । अतः श्रुतिबलात् नरसंस्कारत्वप्रतीतेः न शेषिनरनियामकत्वं समाख्याया इत्यर्थः । वस्तुस्वभावादपि नृसंस्कारतेत्याह—अलंकारेति । नन्वलङ्कारेप्यार्थं कर्तृत्वमृत्विजामिति समाख्या नियामिकाऽस्त्वित्यत्राह – प्रधानेति । प्रधानप्रतीतेः प्राधान्यहानापत्तेः न समाख्यया नियम इत्यर्थः । नन्वेवं विशेषसमाख्याया निर्विषयतेत्यत्राह—यत्रेति ।

लघ्व्यामिति । यद्यप्यलङ्कारस्य स्वभावतया नृसंस्कारता । तथापि समाख्याबलात् विशिष्टपुरुषसंस्कारतास्तु । अन्यथा समाख्याया अत्यन्तबाधापत्तेरिति पूर्वपक्षितम् वचनबलात् सर्वर्त्विक्संस्कारे न समाख्या सङ्कोचायालं ब्राह्मणग्रामवदन्यथाप्युपपत्तेरिति राद्धान्त इत्यर्थः । अत्र साक्षित्वेन आचार्योक्तमाह—परोऽपीति ।

तथा कामोऽर्थसंयोगात्

गतनयातिदेशात्संगतिः । पूर्वपक्षः । सदोमानमृत्विक्कर्तृकम् । अतो यदि कामयेत वर्षेत्पर्जन्य इति नीचैः सदो मिनुयादित्युक्ते मातुरेव कामः समानकर्तृत्वश्रुतेरिति गुणकामेष्वप्यृत्विजामेवाधिकारः । राद्धान्तः । साङ्गे कर्मण्यधिकृतस्य स्वामिनः सर्वत्र प्राधान्यमुत्सर्गत इति गुणफलमपि तस्यैव ।

नन्वार्त्विज आश्रयभूतो मानादिरिति न तदाश्रितं फलं स्वामिनः । तन्न । गुणत्वेन कर्तृत्वेनार्त्विजोऽन्वयः । प्राधान्यं तु स्वामिन एवेति स्वाम्यर्थकर्माश्रितं फलं स्वामिन एव । एवं च

तथा कामोऽर्थसंयोगात्

ज्योतिष्टोमे श्रुतम्—"यदि कामयेत वर्षुकः पर्जन्यः स्यात् इति नीचैः सदो मिनुयात्" इति, एतदेव वेदवाक्यम् । नीचैस्सदो मिनुयाद्वृष्टिकामस्य इति व्याख्यातृनिबद्धम् । तत्र चिन्ता—किमाध्वर्यवः काम उत याजमान इति । तत्रावान्तरसङ्गतिमाह—गतेति । तपोऽधिकरणनयातिदेशात् । यद्यप्यनन्तरप्रकृतः श्येनवाजपेयनयः तथापि तस्य गताधिकरणाभ्युच्चयसूत्रवर्णकान्तरतया तपोधिकरणान्तर्गतमिति कृत्वा गतनयातिदेशात् तपोऽधिकरणं परामृष्टमित्यर्थः । ननु अङ्गाश्रितत्वाद्गुणकामानामङ्गेषु च स्वामिनोऽधिकारात् कथमृत्विगधिकारतया पूर्वपक्ष इत्यत्राह—पूर्वेति । सत्यं यदि कामयेत वर्षेत्पर्जन्य इति नीचैः सदो मिनुयादिति काम्यमानयोः समानकर्तृकत्वं श्रुतं सदोमानं च ऋत्विक्कर्तृकं समाख्यातः । अतः समानकर्तृकत्वश्रुतिबलात् गुणकामः ऋत्विगधिकारः, उद्गात्रधिकारवदित्यर्थः ।

राद्धेति । प्रधानश्रुतिबलात् साङ्गकर्मण्यधिकृतस्य स्वामिन एव सर्वत्र प्राधान्यमिति गुणफलमपि स्वामिन एवेत्यर्थः । ननु ऋत्विक्कर्तृकमानाश्रितं गुणफलं शास्त्रफलं प्रयोक्तृरीतिनयात् स्वामिनोऽयुक्तमिति चोदयति—नन्विति । तन्नेति । सत्यमृत्विक्कर्तृकं सदोमानादि तथापि तत्र

भिन्नकर्तृत्वं । यदि कामयेत स्वामी तदर्त्विङ्मिनुयादिति । आत्मनेपदं चैवं सुस्थं ज्योतिष्टोमेन यजेतेति । अन्यथा स्वामिफलाभिप्रायमात्मनेपदमृत्विक्फलाभिप्रायं स्यात् । गुणफलमपि प्रणाड्या प्रधानादिति यजेतेति सुस्थम् । आधान आत्मनेपदं च सुस्थम् । वचनात्त्वन्यदीयपदार्थाश्रितगुणे व्यापृतस्य फलं साधितं भाष्ये ।

लब्ध्यां गुणफलेऽपि स्वामिनो व्यक्ते प्रपञ्चो वचनात्किञ्चिदृत्विग्गततया फलं वक्तुम् । न चर्त्विजोऽधिकारे आश्रयप्रयोक्तृत्वम् । न ह्यृत्विग्लाभः परप्रयुक्तयाजि विनेति

गुणत्वेन कर्तृत्वेन ऋत्विजामन्वयः प्राधान्यं तु सर्वत्र स्वामिन एवेति स्वाम्यर्थकर्माश्रितं स्वामिन एव युक्तम् । सदोमानादावपि प्रधानश्रुत्यवगतं कर्तृत्वं स्वामिन एव । व्यापारमात्रं तु ऋत्विग्द्वारे[ति] गुणकामे स्वामिन एवाधिकार इत्यर्थः । किञ्च प्रधानश्रुत्यनुरोधात् भिन्नकर्तृत्वमपि न दोषायेत्याह—एवं चेति । यदि कामयेत स्वामी ऋत्विक् मिनुयात् इत्यध्याहृतेन वाक्यार्थ इत्यर्थः । किञ्च यजेतेत्यात्मनेपदबलादपि स्वामिनोऽधिकार इत्यत्राह—आत्मन इति । ननु मिनुयादित्यत्र फलश्रवणं कथं तस्य स्वामिफलत्वे ज्योतिष्टोमेन यजेतेत्यात्मनेपदं लिङ्गमित्यत्राह—गुणेति । यत एव प्रधानादेव फलं अत एव प्रधानस्याग्निसाध्यतया आत्मनेपदमपि आधाने सुस्थमित्याह—आधानेति । नन्वेवं कथमुद्गाता आत्मने यजमानाय वा यं कामं कामयेत इति अन्यदीयकर्माश्रितेऽपि गुणे व्यापृतस्योद्गातुः फलमुक्तमित्यत्राह—वचनादिति । अन्यथा वचनवैयर्थ्यापत्तेः तथाऽङ्गीकृतं भाष्य इत्यर्थः ।

लब्ध्यामिति । अकर्तृलक्षणाधिकारे कथमध्वर्योरधिकारशङ्का । अथ कर्तृत्वमधिकाराद‍ृते नेति चेन्न, अनधिकृतस्यापि क्रयात् कर्तृतापीति कथं पूर्वपक्ष इत्याक्षिप्य गुणफलेऽपि स्वामिनोऽधिकारे व्यक्ते वचनात् उद्गात्राद्यन्यगतमपि फलमस्तीति वक्तुमुपक्रममात्रं पूर्वपक्ष इत्युक्तमित्यर्थः । ननु

नाश्रयप्रयोक्तृता । भट्टेन मानफलं स्वामिन इत्यत्र युक्त्यन्तर-मुक्तं—डुमिञ् प्रक्षेपण इत्यस्य धातोर्ञित्वात्कर्त्रभिप्राये क्रियाफले आत्मनेपदापत्तेर्मिनुयादिति न स्यात् तदप्यस्तु ।

मन्त्राश्च

एतेऽपि स्वामिफलाशंसार्था इति संगतिः पूर्वपक्षः । मन्त्रवर्णात्फलाशीः ऋत्विजामेवेति ऋत्विक्कर्तृका मन्त्राः समाख्यया । राद्धान्तः लिङ्गात्स्वामिफलाशंसार्थत्वात्स्वामिकर्तृकाः । समाख्या हि लिङ्गादबला । ननु लिङ्गसमाख्ययोरनुग्रहाय मम स्वामिन इत्यध्याहारादृत्विक्कर्तृकतास्तु ।

वचनादृत्विजोऽधिकारे अनधिकृतस्याधिकाराश्रयप्रयोक्तृता स्यादित्यत्राह न चेति । अनधिकृताधिकारेऽपि अप्रयोजकत्वं सिद्धम् । यस्मादङ्गे ऋत्विजोऽधिकारः । न च परप्रयुक्तयज्ञं विना अङ्गस्य ऋत्विजो वा लाभ इत्यर्थः ।

आचार्यैस्तु मिनुयादिति परस्मैपदबलादपि स्वामिन एव गुणफलमित्युक्तम् । तदप्यस्त्वित्याह—भट्टेनेति ।

मन्त्रश्च प्रकरणात्तद्वत्

सत्याशीर्मन्त्राः आयुर्दा अग्नेस्यायुर्मे देहि वर्चोदा अग्नेसि वर्चो मे देहीत्यादयः । तत्र चिन्ता —किमाध्वर्यवा याजमाना वेति । तत्रावान्तरसङ्गतिमाह एत इति । ननु लिङ्गात् फलप्रकाशनपरा मन्त्राः । फलं च स्वामिन एवेति कथमृत्विक्कर्तृतया पूर्वपक्ष इत्यत्राह—पूर्वेति । लिङ्गावगतमपि फलं ऋत्विजामेवास्त्विति समाख्यया ऋत्विक्कर्तृका एव मन्त्रा इति भावः ।

राद्धेति । समाख्यया हि ऋत्विक्कर्तृकता । लिङ्गात्तु स्वामिफलाशंसार्थत्वात् मन्त्राणां स्वामिकर्तृकता । लिङ्गं च समाख्यातो बलवत् । स्वामिबलवत्त्वं च तस्यैव प्राधान्यादित्यर्थः—नन्विति । यथा सदोमानेऽध्याहारात् स्वामिफलत्वेपि ऋत्विक्कर्तृकता, तथाऽत्रापि लिङ्गसमाख्ययोरुभयोरनुग्रहाय मम स्वामिन इत्यध्याहारात् स्वामिफलत्वेऽपि ऋत्विक्क-

तन्न। अयमेव दोषो यः परिपूर्णेऽपि वाक्येऽध्याहारः। पूर्वत्र युक्तोऽध्याहारः यदि कामयेत स्वामीति। माने ह्यफलार्थेन स्वामी कर्तृत्वार्हः नीचैस्त्वे फलार्थेऽपि न पृथक्कर्तृकता। उत्साहार्थापि फलोक्तिर्मन्त्रे स्वामिन एवेति प्रपञ्चितं भाष्ये। लिङ्गं प्रोषितस्याग्निभ्योऽग्निसंबोधनायोपस्थानमेवंजातीयकमस्ति। प्रोषितश्चाव्यापृतावस्थो नर्त्विक्। स्वामी तु प्रोषितोऽपि स्वाम्येवेति स्वामिकर्तृकमेवेति। इदमपि तथा।

द्व्याम्नानस्यार्थवत्त्वात्

द्व्याम्नातेषूभौ। उक्तैककर्तृकतापवादोऽयं इति संगतिः पूर्वपक्षः। काण्डद्वयाम्नानेप्येकार्थत्वादेककर्तृप्रयोज्यत्वेऽध्वर्यु-

---

तृकतास्त्वित्यर्थः। मैवमिति। अन्यथापि पूर्णे मन्त्रवाक्येऽध्याहार एव दोषः स्यादित्यर्थः। कथं तर्हि सदोमानेऽध्याहार इत्यत्राह—पूर्वेति। युक्तः सदोमानेऽध्याहारः तस्याफलार्थत्वात् गुणफलविधिः प्रयुक्त्युत्तरभावी। तत्र स्वामिकर्तृकतां नाक्षेप्तुं क्षमः प्रयुक्तिकाल एव समाख्यया ऋत्विक्कर्तृकत्वावगमात्। आशीर्मन्त्रेषु तु फलार्थेषु लिङ्गबलात् स्वामिकर्तृकत्वप्रतीतेः नाध्याहारो युक्त इति भेद इत्यर्थः। नन्वेवं नीचैस्त्वे फलार्थे स्वामिकर्तृकताक्षेपोऽस्तु तत्राह—उत्साहेति। लिङ्गमिति। अग्निभ्यः प्रोषितस्य यजमानस्याग्निसंबोधनोपस्थानमन्त्रवाक्यमेवंजातीयकमाम्नातम् "इहैव सं तत्र सतो वो अग्नयइति। तदेवंजातीयकं सर्वं यजमानकर्तृकमिति द्योतयतीत्यर्थः। ननु प्रोषितत्वमृत्विजामेवास्त्वित्यत्राह—प्रोषितेति।

द्व्याम्नातेषूभौ

दर्शपूर्णमासयोः "पञ्चानां त्वा वातानां यन्त्राय धर्त्राय गृह्णामि" इत्यादय आज्यग्रहणमन्त्राः याजमानकाण्डेऽध्वर्युकाण्डे चाम्नाताः। तत्र चिन्ता—किमध्वर्युणैव प्रयोज्या उताध्वर्युयजमानाभ्यामिति। अवान्तरसङ्गतिमाह—उक्तेति। ननु काण्डद्वयाम्नानादुभयप्रयोज्यतैव युक्तेति कथं पूर्वपक्ष इत्यत्राह—पूर्वेति। सत्यं काण्डद्वयाम्नानम्। तथाप्येकार्थत्वा-

कर्तृप्रयोज्यता। तस्य कर्मकरत्वात्प्रकाश्याज्यग्रहणस्य चाध्वर्युकर्तृकत्वाच्च। तस्य च स्मरणार्थं प्रयुक्तेः।

राद्धान्तः। द्वाभ्यामपि प्रयोगः। अध्वर्योः प्रयोगः स्मरणार्थः स्वामिनस्तदप्रमादार्थः। समाख्याद्वयं चैवमनुगृहीतम्। भट्टेन तु मन्त्रेष्वाध्वर्यवाख्या सामान्यं याजमानाख्या विशेष इति विशेषेण सामान्यबाधः। शङ्कितः। सोपयोगो अविरोधात्।

ज्ञाते च वाचनं न ह्यविद्वान् विहितोऽस्ति

उक्ते स्वामिकर्तृके स्वामिविशेषचिन्तेति संगतिः। पूर्वपक्षः। विद्या साध्यकर्मणि विदुषोऽधिकारे स्थितेऽपि विदुषि

मन्त्राणां एकप्रयोज्यत्वे अध्वर्युकर्तृकतैव युक्ता कर्मकरत्वात्तस्य। स्वामिनस्तु प्राधान्यादित्यर्थः। किञ्च मन्त्रप्रकाश्यस्याज्यग्रहणस्याध्वर्यवत्त्वादपि तत्प्रयोज्यता युक्तेत्याह—प्रकाश्येति।

राद्धेति काण्डद्वयाम्नानार्थवत्त्वाय द्वाभ्यामपि प्रयोगः न चैवं वैयर्थ्यम्। अनुष्ठेयस्मृत्यर्थमध्वर्यूच्चारणं सदनुष्ठानोपयोगितदप्रमादार्थं स्वाम्युच्चारणमिति समाख्याद्वयानुग्रहाय उभाभ्यां प्रयोज्या इत्यर्थः। आचार्यैस्तु मन्त्राणां आध्वर्यवाख्या सामान्यं याजमानाख्या विशेष इति विशेषेण सामान्यबाधः शङ्कितः। स विरोधाभावादनुपयोगीत्याह—भट्टेनेति।

ज्ञाते च वाचनम्

वाजपेये "क्लृप्तीर्यजमानं वाचयति" इति क्लृप्तिमन्त्रवाचनं श्रुतम् तत्र चिन्ता—किं विद्वान् अविद्वांश्च वाचयितव्यः उत विद्वानेवेति। तत्रावान्तरसङ्गतिमाह—उक्त इति। ननु विद्वत्साध्ये कर्मणि विदुष एवाधिकारे स्थिते कथं पूर्वपक्ष इत्यत्राह—पूर्वेति। सत्यं विदुषोऽधिकारः स्थितः तथाप्यत्र विहितवाचनाङ्गस्य विदुष्यदृष्टार्थतैवेति दृष्टार्थत्वायाविदुषोऽप्यधिकारः। नन्वेवं वाचनाङ्गोपसंहाराशक्तेः विदुषोऽधिकारो न स्यादित्यत्राह—न चेति। वाचनाङ्गोपसंहारशक्तिस्तावद्विदुषोऽप्यस्ति। यदि परमदृष्टार्थता शक्तस्य विदुषो विद्यासाध्ये कर्मण्यधिकारः। स्वत एव वाच-

वाचनस्यादृष्टार्थतापत्तेः अविदुषोऽप्यधिकारः। न च वाचनाङ्ग-शक्तेरविदुष एवाधिकारः, किं तु द्वयोः अविद्वत्पक्षे दृष्टार्थं वाचनमङ्गम्। विदुषोऽपि विद्यासाध्ये शक्तेरधिकारः। राद्धान्तस्तु—नाविदुषोऽप्यधिकारमापादयितुं शक्तं वाचनम् ब्रुवत एव हि वाचनं प्रवृत्तम्। प्रवर्तने हि णिजिति शब्दाः। दृष्टार्थता च तदनुकूलाचरणादपीति विद्वद्विषयत्वादस्यापि यस्य विदुषोऽधिकारः। तस्यैव वाचनं।

लब्ध्यां न स्वाध्यायविधिज्ञापितोऽधीतवेदस्याधिकारः; धर्मज्ञानं हि तस्य प्रयोजनं। जीवनाद्या एवाधिकारश्रुतय इति

नाङ्गदृष्टार्थत्वायाविद्वदधिकारोऽपि। अतो द्वयोरप्यधिकारः। तत्राविद्वत्पक्षे वाचनं दृष्टार्थमङ्गम्। विद्वत्पक्षे त्वदृष्टार्थमिति भेदः। अथैकस्यैव वाचनस्य दृष्टादृष्टोभयार्थत्वमयुक्तं एवं तर्हि अविद्वत्पक्ष एव वाचनमङ्गमस्त्विति भावः।

राद्धेति। न हि विहितमपि वाचनमविदुषोऽप्यधिकारमापादयितुं क्षमम्। कुत इत्यत्राह—ब्रुवत इति। तदेव कुत इत्यत्राह—प्रवृत्त इति। नन्वेवमदृष्टार्थता स्यादित्यत्राह—दृष्टेति। ननु दृष्टार्थत्वायाविदुषोऽप्यधिकारोऽस्तु। तत्राह—इति विद्वदिति। यत एवमुक्तेन प्रकारेण वाचनमपि विद्वत्प्रवृत्तिविषयकम्। अत एव यस्यैव विदुषोऽधिकारस्तद्विषयमेव वाचनम्। नाविद्वदधिकारापादनक्षममिति विद्वानेव वाचयितव्य इत्यर्थः।

लब्ध्यामिति। तन्मते विदुषोऽधिकार इत्युक्ते कथं पूर्वपक्षाशङ्केत्याक्षिप्य पूर्वपक्षेऽधिकारयुक्तिरुक्ता। विदुष एवाधिकार इति केन ज्ञापितं किमध्ययनविधिना, किं वा जीवनाद्यधिकारश्रुत्या? नाद्य इत्याह—न स्वाध्यायेति। न द्वितीय इत्याह—जीवनेति। जीवनाद्यधिकारश्रुतयस्तु सन्निधिसमाम्नातवाचनश्रुत्याङ्गस्यायाविदुषोऽप्यधिकारमाक्षिपन्तीत्यर्थः।

राद्धेति। सत्यमध्ययनविधेर्धर्मज्ञानं प्रयोजनं जीवनाद्या एवाधिकारश्रुतयः तथाप्याचार्यकविधिप्रयुक्ताध्ययनस्य धर्मज्ञानं प्रयोजनमुक्तं,

वाचयति इति श्रुतेरज्ञस्याधिकार इति पूर्वः पक्षः ।

राद्धान्तस्तु आचार्यविधिप्रयुक्तस्याध्ययनस्य धर्मज्ञानं प्रयोजनमुक्तं। ज्ञानस्यानुष्ठानमिति नाविदुषोऽधिकार इत्युक्तम् । अतोऽधिकृतो ज्ञ एव वाचनीय एव । यो यत्कर्मज्ञः स तत्राधिकारी। भट्टस्त्वाधानवदनारभ्याधीतमध्ययनं न कामश्रुत्यङ्गम् । यदि स्यात् प्रयोगकालेऽप्यध्याप्येत । अध्येतृसिद्धमेव तु वेदं कर्माणि अग्निवद्गृह्णन्ति न शिक्षां प्रयुञ्जते । न चाशिक्षितो वेदो भवतीति प्राक्कर्मणः पठितो मन्त्रोऽङ्गम् । अतो विदुष एवाधिकार इत्याह—तन्न । कामश्रुतिप्रतिप्रयोज्यत्वे हि

ज्ञानस्य चानुष्ठानमिति जीवनाद्या एवाधिकारश्रुतयो नाचार्यकविधिलब्ध विद्वत्त्रैवर्णिकलाभे त्वविदुषोऽप्यधिकारमाक्षिपन्तीति नाविदुषोऽधिकार इत्युक्तमित्यर्थः । ननु विद्वदधिकारे वाचनं व्यर्थमित्यत्राह—अत इति । वाचनस्य वचनप्रवृत्तविषयत्वादेव विद्वानेव वाचनीय इत्यर्थः। यत एव कर्मज्ञानमनुष्ठानहेतुः अत एव प्रतिकर्म भेदेनाधिकार इत्याह—एवं चेति ।

आचार्यैस्तु कामश्रुतिप्रयोज्यमप्यध्ययनं अनारभ्याधीतत्वादाधानवन्न कामश्रुत्यङ्गम् । अतो बहिः क्रतुसिद्धमेवेदं कर्माण्यग्निवदङ्गतया गृह्णन्तीति न पुनः शिक्षामध्ययनं प्रयुज्याङ्गतया गृह्णन्ति । यद्यङ्गता स्यात् क्रतुमध्येऽप्यध्याप्येतेत्युक्तम् । तदाह—भट्टस्त्विति । ननु अनधीतोऽपि वेद एवेति क्रतुमध्ये प्रकारान्तरपठिता अपि मन्त्रा अङ्गमिति कथं विदुषोऽधिकार इत्यत्राह—न चेति। अनधीतो वेद एव न भवति यथाऽनाहितो नाग्निरिति प्राक्कर्मण एव नियमपठिता मन्त्रा अङ्गमिति विदुष एवाधिकार इत्यर्थः । तन्नेति । कामश्रुतिप्रयोज्यत्वे हि यथोपयोगं प्रयोगमध्येऽपि तत्तन्मन्त्राध्ययनप्रयुक्तिः स्यात् । ननु प्रागशिक्षितस्य वेदत्वं नास्ति अग्निवदित्युक्तमित्यत्राह—न चेति । तत्र हेतुः अपौरुषेयेति । न ह्याहवनीयाग्निवत् वेदस्यालौकिकत्वम् येन प्रयोगाद्बहिरेव सम्पाद्येत । किन्तु अपौरुषेयग्रन्थभेदो लौकिक एव वेदः । स च पुरोडाशादिवत् प्रयोगमध्येऽपि सम्पादयितुं शक्य

यथोपयोगं प्रयोगकालेऽपि प्रयुक्तिः स्यात् । न च प्रागशिक्षितो न वेदः अपौरुषेयग्रन्थभेद एव हि लौकिको वेदशब्दार्थः । अग्निस्त्वलौकिक आधानेन प्रयोगात् बहिरेव शक्यत इत्युक्तम् । आचार्यविधिप्रयुक्तिस्तु प्रयोगात्प्रागेव ।

याजमाने समाख्यानात् कर्माणि याजमानं स्युः

वचनादिव क्लृप्त्युक्तिः, स्वामिनः समाख्ययापि द्वन्द्वक्रियास्त्वित्युत्थितेः संगतिः । पूर्वपक्षः । आध्वर्यवाः पदार्थाः—तद्द्वंद्वता, याजमानीसामीत्यं हि द्वन्द्वता सा न पदार्थानुष्ठानात् पृथक् सिद्धा । अतो यत्र पदार्थास्तत्र सेति याजमानाख्याविशेषे-

---

इत्यर्थः । नन्वाचार्यविधिप्रयोज्यत्वेऽपि प्रयोगाद्बहिः सम्पादनं कथमित्यत्राह—आचार्येति । न चाध्ययनविध्यङ्गोपनयनस्य स्वकालत्वेन पृथगुत्पन्नत्वात् तदनुरोधेनाध्ययनस्य कामश्रुतिप्रयोज्यत्वेऽपि प्रयोगात् प्रागेव प्रवृत्तिरिति वाच्यम् । यत उपनयनं माणवकसंस्कारः । अतः प्रयोगात् प्रागेवोपनयनसंस्कृतस्य प्रयोगमध्येऽध्ययनम् । न चोपनयनाध्ययनयोरेककालत्वनियमः उपाकृत्यनन्तरत्वादध्ययनस्य । आधाने तु सर्वमेतद्विपरीतमित्यलमधिकतया ।

याजमाने समाख्यानात्

दर्शपूर्णमासयोराध्वर्यवे काण्डे वत्सापाकरणादिपदार्थानां द्वन्द्वाम्नानं याजमाने काण्डे समाम्नायते—वत्सं चोपावसृजत्युखां चाधिश्रयति इत्यादयः । तत्र चिन्ता—किं द्वन्द्वतापदार्थाश्च याजमाना उताध्वर्यवा इति । तत्रावान्तरसङ्गतिमाह—वचनादिति । ननु पदार्थानामाध्वर्यवत्वात् तद्द्वन्द्वताया अपि तत्कर्तृकतैवेति कथं पूर्वपक्ष इत्यत्राह-पूर्वेति । सत्यमाध्वर्यवाः पदार्थाः द्वन्द्वता तु याजमानी । नन्वेवं पदार्थतद्द्वन्द्वतयोः नानाकर्तृकता स्यादित्यत्राह—सामीप्यमिति । द्वन्द्वता हि सामीप्यं न सा पदार्थानुष्ठानात्पृथक् सिद्धेति यत्कर्तृकाः पदार्थाः तत्कर्तृकतैव युक्ता । न नानाकर्तृकतेत्यर्थः । नन्वेवमप्याध्वर्यवत्वमेवास्तु न याजमानत्वमित्यत्राह—इतीति ।

शाध्वर्यवाख्यासामान्यबाधः । अतो याजमाना एव स द्वन्द्वाः पदार्थाः ।

राद्धान्तः पूर्वभाविनो हि पदार्थाः । ते अनुपजातविरोधादध्वर्युकर्तृकाः । न च तन्नान्तरीयकमासन्नत्वं स्वामिना शक्यमिति तदप्याध्वर्यवम् । विशेषसमाख्या तु द्वन्द्वतां कुर्विति द्वन्द्वतास्मरणात् केषुचिदनुमन्त्रणादस्तु ।

भट्टेन द्वन्द्वाङ्गगुणत्वात्स्वामिनोऽङ्गगुणनयोऽत्रोक्तः । सोप्यस्तु ।

विप्रतिषेधे करणं समवायविशेषादितरमन्यस्तेषां यतो विशेषः स्यात्

ऋत्विक्कर्तृकमेव कस्यर्त्विज इति चिन्तेति संगतिः पूर्वपक्षः । प्रत्यक्षश्रुतेनैककार्येणातिदिष्टबाधः । न च करणक्रिय-

---

विशेषाख्यया सामान्याख्याबाधात् सद्वन्द्वाः पदार्था याजमाना एवेत्यर्थः ।

राद्धेति । पदार्था हि पूर्वभाविनोऽनुपसञ्जात-विरोधित्वात् समाख्ययाऽध्वर्युकर्तृका एव । द्वन्द्वता तु सामीप्यलक्षणा पदार्थानुष्ठाननान्तरीयकी न पृथक् स्वामिना शक्येति साप्यध्वर्युकर्तृकैव । कथं तर्हि विशेषाख्येत्यत्राह —विशेषेति । अनुष्ठानावसरे कुर्विति स्मरणात् । क्वचिदनुष्ठितानुमन्त्रणाच्च तन्निर्वाह इत्यर्थः ।

आचार्यैस्तु द्वन्द्वतादि अङ्गं पदार्थाः प्रधानं द्वन्द्वतागुणः याजमानः पदार्थाः अध्वर्युकर्तृकाः । तत्राङ्गगुणविरोधन्यायेन यजमानकर्तृकता बाध्येत्युक्तम् तदप्यस्त्वित्यत्राह—भट्टेनेति ।

विप्रतिषेधे करणम्

सोमङ्गिदैक्षे पशौ यूपपरिव्याणे अध्वर्योः परिवीरसि इत्यादि करणमन्त्राः श्रुताः । होतुस्तु युवा सुवासा इत्यादिः क्रियमाणानुवादी । तत्र क्रियमाणानुवादिनः स्मृत्यविच्छेदकार्यस्य अनुष्ठेयसङ्कल्पप्रभृति आसमाप्तेर्दीर्घः कालः । करणमन्त्रस्य तु कर्मादिसन्निपातात् तन्मध्यवर्ती कालः । तौ

माणानुवादिनोर्मन्त्रयोरेकं कार्यम् । अथ द्वावेकेनैकदाऽशक्यौ । तर्हि कदाचित्किंचिदेवानुष्ठास्यति इति ।

राद्धान्तस्तु—एककार्यत्वाभावेऽपि विरोधे उपदिष्टमनन्यगति बलीयः अतिदिष्टं प्रकृतावेवार्थवत् ।

लब्ध्यां चोदकतो हौत्रस्य कर्त्रन्तराश्रुतावप्यन्यकर्तृकतास्तु । होतुरध्वर्युकर्तृकोपदेशबलीयस्त्वात् ।

भट्टेन चोद्यं कृत्वा निरस्तं, कालभेदादविरोधात् द्वावपि मन्त्रौ होतृकर्तृकाविति चोद्यं तदाह—

एककालप्रयोगे हि विरोधो मन्त्रयोर्भवेत् ।
कर्मणः प्राक्क्रियातस्तु परतश्चेतरः स्थितः ।

च चोदकपरम्परया कुण्डपायिनामयने प्राप्तौ । तत्र "यो होता सोऽध्वर्युः" इत्यध्वर्युकार्ये होता विहितः । तत्र चिन्ता—किं होता करणं क्रियमाणानुवादिनं च ब्रूयात्, उत करणमेवेति । तत्रावान्तरसङ्गतिमाह—ऋत्विगिति । उक्तं ऋत्विक्कर्तृकं कर्मेति, तदेव कर्म कस्य ऋत्विज इति चिन्ता—किमध्वर्योर्मन्त्रं होतुश्च तत्कार्यंविहितो होता ब्रूयात् उताध्वर्योरेवेत्येवंरूपत्वादवान्तरसङ्गतिरित्यर्थः । नन्वौपदेशिकेनातिदेशिकबाध इति करणमन्त्रमेव होता ब्रूयादिति कथं पूर्वपक्ष इत्यत्राह—पूर्वेति । सत्यमुपदिष्टेनातिदिष्टबाधः न [स] त्वेककार्यत्वे । न चात्र करणक्रियमाणानुवादिनोः एककार्यतेति न बाध इत्यर्थः । ननु एकेनैकदा द्वयानुष्ठानाशक्तिरिति शङ्कते—अथेति । उत्तरं—तर्हीति ।

राद्धेति । सत्यं नैककार्यता तथाप्येकेनैकदाऽनुष्ठानाशक्तेर्विरोधे सति उपदिष्टेनातिदिष्टबाधः । उपदिष्टस्यानन्यगतिकत्वात् अतिदिष्टस्य प्रकृतावप्यर्थवत्त्वात् नित्यस्योपदेशिकस्य पाक्षिकानुष्ठानता न युक्तेत्यर्थः ।

लब्ध्यामिति । अत्रभाष्ये 'अथ हौत्रं विरुद्धं कः कुर्यादिति पृष्टे पुनरन्यो होतृपुरुषो मैत्रावरुणादिः इत्युक्तम् । तदयुक्तम् । चोदकागतहौत्रस्यान्यकर्तृकत्वाश्रुतेः आध्वर्यवयेस्वेत्याशङ्क्य कर्त्रन्तराश्रुतावपि अध्वर्युक-

निरासस्तु क्रियमाणानुवादिनः स्मृत्यविच्छेदकार्यंकस्यानुष्ठेय-संकल्पात्प्रभृत्यासमाप्ते र्दीर्घकालः । करणस्य कर्मादिसन्निपाता-त्तन्मध्यकालता । तेन नैकहोतृशक्यतेत्युक्त्वैतत्प्रपञ्चितम् । गुरुस्तु न्यायनिष्ठो विरोधं सिद्धवदूचे ।

प्रैषेषु पराधिकारात्

वचनाद्धौत्रसमाख्यातं न होतरि । इह तु वचनाभावान्ना-ध्वर्यवसमाख्या प्रैषार्थेऽपि बाध्येत्युत्थितेः संगतिः पूर्वपक्षः । माभूत्स्वयं स्वप्रैषे शक्तः । प्राप्तकालोऽस्तु । अनुष्ठातैवं ब्रूते, अग्निविहरणस्य प्राप्तः काल इति । एवं हि समाख्यया द्वय-मत्याध्वर्यवम् ।

तृ'के कार्ये होतुरुपदेशबलादेव हौत्रस्य कर्त्रन्तरान्वयः एकस्यैव होतुः युग-पदुभयानुष्ठानाशक्तेः इति शङ्कोत्तरमधिकमित्यर्थः ।

भट्टेन त्विति । करणक्रियमाणानुवादिनोः कालभेदेन एकहोतृकर्तृ-कत्वेऽपि अविरोध इति चोद्यमुक्तमित्यर्थः । तदुक्तं श्लोकं साक्षित्वेनाह—तदाहेति । निरासश्चेति । करणक्रियमाणानुवादिनोः कार्यनिरूपणेनार्थादेक-कालतेति नैकहोतुः शक्यमित्युक्त्वा प्रपञ्चित इत्यर्थः । ननु गुरुः किमिति विरोधं नोद्घाटितवानित्यत्राह—गुरुस्त्विति ।

प्रैषेषु च पराधिकारात

अस्ति ज्योतिष्टोमे अग्नीदग्नीन् विहरेति प्रैषः । अग्निविहरणा-दयश्च । तत्र चिन्ता—किं प्रैषप्रैषार्थावाध्वर्यवावेव, उत भिन्नकर्तृका-विति । तत्रावान्तरसङ्गतिमाह—वचनादिति । ननु स्वात्मनि प्रैषाशक्तेः कथं प्रैषप्रैषार्थयोराध्वर्यवत्वेन समाख्यानुग्रह इत्यत्राह—पूर्वेति ।

राद्धेति । लोटः प्राप्तकालार्थत्वेऽपि विहरेति मध्यमपुरुषाविवक्षा-पत्तिरिति प्रैष एवायमिति स्वात्मनि प्रैषाशक्तेः प्रैषलिङ्गबलात् समाख्या-बाधेन प्रैषप्रैषार्थौ भिन्नकर्तृकावित्यर्थः । अनुष्ठेयवस्तुस्मृत्यर्थत्वात्

राद्धान्तस्तु विहरेति मध्यमपुरुषाविवक्षापत्तेः न प्राप्तकाले लोट् । किंतु प्रैष एवायमिति । द्वाभ्यां प्रैषप्रैषार्थमन्त्रलिङ्गेन समाख्याबाधात् ।

लब्ध्यामनुष्ठेयस्मृत्यर्थत्वान्मन्त्राणां युष्मदर्थमध्यमपुरुषाविवक्षेत्येकोद्वयकर्ता । राद्धान्तस्तु युष्मदर्थोऽनुष्ठेयानुगुणो विवक्षित इति द्वयोर्द्वयकर्तृना । किञ्च प्राप्तः कालस्तवानुष्ठानस्येत्येवं दृष्टार्थतेति तत्कल्प्यम् । प्रैषस्तु लोकत एव ।[1] प्रैषसमाख्यया च प्रैषता ।

अध्वर्युस्तु । स्थिते कर्तृद्वये कः प्रैषकः कः प्रेष्य इति चिन्तेति संगतिः । पूर्वपक्षः । अर्थवादवर्शनादग्नीत् प्रैषकः,

---

मन्त्राणां युष्मदर्थमध्यमपुरुषस्याननुष्ठेयत्वादविवक्षेति द्वावप्येककर्तृकाविव त्येवं पूर्वपक्षे विशेष इत्यर्थः ।

राद्धेति । युष्मदर्थस्य साक्षादननुष्ठेयत्वेऽपि अनुगुणत्वान्न तदविवक्षायां प्रमाणमस्तीति द्वयोर्भिन्नकर्तृकतैवेत्यर्थः । किञ्च प्रैषप्राप्तकालयोः लोऽर्थत्वेऽपि परप्रवृत्त्यापादनेन स्वतो दृष्टार्थत्वात् प्रैषार्थता, ईप्सितार्थत्वमिव द्वितीयायाः । प्राप्तकालार्थत्वे अनुष्ठेयस्य कालः प्राप्त इत्येवं दृष्टार्थता कल्प्या । सापि नात्मनि किन्तु तवेत्येवं युष्मदर्थोल्लेखेनेति प्रैषार्थ एव लोडित्याह - किञ्चेति । समाख्याबलाच्च प्रैषतेत्याह—प्रैषेति ।

अध्वर्युस्तु दर्शनात्

प्रैषप्रैषार्थौ भिन्नकर्तृकाविति स्थितम् । इदानीं चिन्त्यते किमाग्नीध्रः प्रैषकः उताध्वर्युरिति । तत्रावान्तरसङ्गतिमाह—स्थित इति । ननु अग्नीदग्नीन् विहरेत्यग्नीदिति संबुद्धिश्रुतेः प्रैषकर्तृत्वमध्वर्योरेव युक्तमिति कथं पूर्वपक्ष इत्यत्राह—पूर्वेति । स्फ्यं तिर्यञ्चं धारयेत् । वज्रो वै स्फ्यः यदन्वञ्चं धारयेत् । वज्रेऽध्वर्युः क्षण्वीत इत्यर्थवाददर्शनात् अग्नीध्रः

---

१. B लोट एव

प्रैष्योऽध्वर्युः। स्फ्यहस्तो हि प्रैषकः। अध्वर्यौ च स्फ्यहस्ते दोषश्रुतिरर्थवादे। मन्त्रे प्रेषाग्निश्रुतिः थाग्नीच्छ्रुतिः कथंचिद- ध्वर्यविव। आध्वर्यवसमाख्यया मुख्ये प्रैषे अध्वर्युरित्यर्थवादानु- गुण्याद्धेयम्।

राद्धान्तः। विनियोज्य मन्त्रलिङ्गादनुष्ठानबोधकात्स्तुत्य- र्थार्थवादात् बलत्वात् समाख्यानुगुण्याच्च अध्वर्युरेव प्रेषक इति, अर्थवादस्थमध्वर्युपदमग्नीधि गौणम्।

लघ्व्यामध्वर्योः प्रेषकत्वे प्रेष्यक्रियायामपि प्रैषद्वारा कर्तृते- त्येवं सर्वमध्वर्युकर्तृकमित्याध्वर्यवाख्यासामञ्जस्यमधिकम्।

स्फ्यहस्तत्वमवगम्यते। सस्फ्यश्च प्रैषकः इत्यग्नीधः प्रैषकत्वमध्वर्योः प्रैष्यत्वमित्यर्थः। नन्वध्वर्योरपि स्फ्यहस्तत्वमित्यत्राह—अध्वर्याविति। ननु प्रैषार्थाग्नीत्पदस्य कथमन्वय इत्यत्राह— मन्त्र इति। अध्वर्या वेवाग्नीच्छब्दो गौण इत्यर्थः। नन्वाध्वर्यवाख्यया प्रैष एवाध्वर्योः कर्तृता युक्ता प्रैष- पूर्वकत्वात्प्रैषार्थस्य तदपेक्षया प्रैषस्य मुख्यत्वात् इत्यत्राह—आध्वर्यवेति। अर्थवादस्य विध्युद्देशकोटितया समाख्यातः प्रबलत्वात् मुख्येऽपि प्रैषे अध्वर्योर्न कर्तृता युक्ता। भाष्ये अनियमपक्ष उपक्रममात्रमित्यर्थः।

राद्धेति। मन्त्रलिङ्गादध्वर्योरेव प्रैषकता, प्रैष्यताऽग्नीधः। यद्यप्यर्थ- वादो विध्युद्देशकोटिः तथापि विनियोज्यमन्त्रलिङ्गं बलवत्। तस्यानुष्ठा- नबोधकत्वात्। अर्थवादस्य स्तुतिपरत्वात् अनुष्ठानपर्यन्तत्वाच्छास्त्रस्येति मन्त्रलिङ्गादर्थवादस्य दुर्बलत्वात् समाख्यानुगुण्याच्चाध्वर्युरेव प्रैषक इति स्तुतिपरमग्नीदिति गौणं युक्तमित्यर्थः।

लघ्व्यामिति। तत्र हि उपक्रममात्रं पूर्वपक्षतया कृत्वा यथाभाष्यं राद्धान्त इत्यर्थः। अध्वर्योः प्रैषकत्वे प्रैषद्वारा प्रैष्यक्रियायामपि कर्तृत्व- मितिप्रैषप्रैषार्थयोरुभयोरपि तत्कर्तृकत्वादुभयत्राध्वर्यवसमाख्या समञ्ज- सा भवतीत्यर्थः। आचार्यैस्तु अर्थवादे अध्वर्युः क्षिणवीत अध्वर्युं क्षिणवीतेति पाठद्वयं कृत्वा अध्वर्युरितिपक्षे स्वामिनमिति पूरयितव्यमित्युक्तम् तदाह—

भट्टेन पाठद्वयमुक्तं—अध्वर्युं क्षिण्वीतेति अध्वर्युः क्षिण्वितेति वा पाठः। अस्मिन् मते स्वामिनं क्षिण्वीतेत्येवमुक्तं। भट्टेनोक्तलिङ्गदर्शनमात्रान्न पूर्वपक्षःप्राप्तिरङ्गगुणनयात् भूयसां नयाच्च। प्रैषकर्तुरङ्गगुणता प्रैषार्थप्राधान्यात्, भूयस्त्वाच्चार्थानां तत्कर्तृता अध्वर्योरिति। तन्न, प्राथम्याद्बलवत्त्वोक्तेरिह च प्राथम्यादेवसिद्धान्तो न युक्तः। गुरुस्त्वर्थवादान्निर्णयमाशंक्य मन्त्रान्निर्णयमाह—न तु लिङ्गदर्शनमात्रात्।

ऋत्विक्फलं करणेष्वर्थवत्वात्

प्रैषवत्समाख्ययाऽध्वर्युकर्तृकत्वचिन्तेति सङ्गतिः। पूर्वपक्षः। अध्वर्युकर्तृकाग्न्यन्वाधाने श्रुत्याकरणमन्त्रस्य विधेः

भट्टेनेति। तथातैरेवं पूर्वोत्तरपक्षावुक्ताविरयाह—भट्टेनेति। न लिङ्गदर्शनमात्रं पूर्वपक्षयुक्तिः किन्तु अङ्गगुणनयः। भूयसां नयश्च मूल इत्युक्तिरित्यर्थः। प्रैषार्थप्रधानत्वात् प्रैषस्य अध्वर्योः प्रैषकर्तृत्वमङ्गगुणः। प्रैषार्थकर्तृत्वं प्रधानगुणः। तथा प्रैषार्था भूयांस इति पूर्वपक्षिते प्राधान्यात् प्रैषकर्तृत्वमेवेति राद्धान्तितमित्यर्थः। तन्नेति। द्वन्द्वता नयेपि अङ्गगुणभूयस्त्वाभ्यां पूर्वपक्षितं भूयसां पदार्थानां द्वन्द्वतागुणो यतः प्राधान्यादेव राद्धान्तितम्। अत्रापि तदेव वक्तुं न युक्तमित्यर्थः। ननु कथमन्यथा चिन्ता। पूर्वपक्षतुच्छत्वप्रसङ्गादित्यत्राह—गुरुस्त्विति। गुरुमते न लिङ्गदर्शनमात्रात्पूर्वपक्षः। किन्तु अर्थवादमात्रान्निर्णयमाशङ्क्य मन्त्रवर्णान्निर्णय इत्युक्तमित्यर्थः।

ऋत्विक्फलं करणेष्वर्थवत्वात्

दर्शपूर्णमासयोः ममाग्ने वर्चो विहवेष्वस्तु इति पूर्वमग्निं परिगृह्णाति इत्यग्न्यन्वाधानमन्त्रः श्रुतः। किमनेनाध्वर्युफलं प्रकाश्यते उत याजमानफलमिति। तत्रावान्तरसङ्गतिमाह—प्रैषवदिति। ननु आयुर्दाद्याशीर्मन्त्रेष्विव यजमानफलस्यैव प्रकाश्यता युक्तेति कथं पूर्वपक्ष इत्यत्राह—पूर्वेति। अयं तु मन्त्रः श्रुत्या अग्न्यन्वाधाने करणमन्त्रत्वेन शेषतया विनि-

प्रधानकर्त्रनुरोधान्मन्त्रोऽप्यध्वर्युकर्तृकः। करणस्यानुष्ठेयसमानकर्तृकत्वादाध्वर्यवे मन्त्रे स्थिते मन्त्रलिङ्गादध्वर्योरेवाशीः। वक्ता हि ममेत्यनेनान्वयी। नन्वकर्मफलयशः प्रकाशनादकर्मार्थो मन्त्रः स्यात्। तन्न, कर्मयुक्तानुषंगिकर्त्विग्यशःप्रकाशनात्कर्मार्थताऽस्तु। एवं च गताशीर्मन्त्रनयान्नेह याजमानत्वम्। राद्धान्तस्तु नाध्वर्युयशः कर्मफलतया चोदनाचोदितं। चोदितफलप्रकाशनाद्धि मन्त्रः कर्माङ्गम्। अतः स्वामिफलमेव वर्चः प्रकाश्यम्। अतो ममेति भक्त्या स्वामिनि मन्त्रपदम्।

लब्ध्वयां उक्तेऽपि ऋत्विक्कर्तृकसदोमानफले स्वामिगतेऽत्र पूर्वःपक्षः—साध्यत्वेन श्रुतेः स्वामिगामिताऽस्तु। इह तु, मन्त्रानु-

---

युक्तः। अन्वाधानं च समाख्ययाऽध्वर्युकर्तृकम्। तत्र प्रधानभूतान्वाधानानुरोधात् मन्त्रोऽप्याध्वर्यवः करणमन्त्रस्यानुष्ठीयमानशेषत्वात्। तथा च अध्वर्युप्रयोज्यतालिङ्गादेवाध्वर्योरेव फलं प्रकाश्यमित्यर्थः। तत्र हेतुः—वक्तेति। यत उच्यमानमन्त्रगतं ममेति पदं वक्तर्येव मुख्यवृत्त्याऽन्वयीत्यर्थः। नन्विति। अध्वर्युयशः प्रकाशकत्वे तस्याकर्मफलत्वात् कर्मार्थत्वान्मन्त्रस्य तन्न स्यादित्यर्थः। तन्नेति। अध्वर्युयशः प्रकाशकत्वेपि कर्मार्थता युक्ता, अध्वर्योः कर्मयुक्तत्वात्। यद्यपि कर्मानुष्ठाननान्तरीयकं यशः तथापि अध्वर्युप्रवृत्त्यनुगुणतया मन्त्रप्रकाश्यं असन्तापनवत् इत्यर्थः। यत एव प्रधानानुरोधादाध्वर्यवो मन्त्रः अत एव गताधिकरणनयात् नेह याजमानतेत्याह—एवं चेति।

राद्धेति। चोदितफलप्रकाशकत्वेन मन्त्रः कर्माङ्गमिति चोदितमेव फलं प्रकाश्यम्। नाध्वर्युयशः कर्मफलतया चोदितं आनुषङ्गिकत्वात्। यश्चार्थादर्थो न स चोदनार्थः। कर्माननुसारित्वाच्च नासन्तापवत् प्रकाश्यता। प्रवृत्त्युत्साहस्तु दक्षिणाशयैवेति साङ्गकर्मप्रधानस्वामिफलमेव प्रकाश्यमित्यर्थः। ननु स्वामिफलस्य स्वर्गादिरूपत्वात् कथं यशःपदप्रकाश्यतेत्यत्राह—अत इति। गौण्या वृत्त्येत्यर्थः। ननु मन्त्रगतस्यास्मच्छब्दस्य कथमन्वय इत्यत्राह—अत इति। प्रयोजनं तु पूर्वपक्षोक्तमेव।

वाद्ये ऋत्विगाततत्ताशङ्का। आध्वर्यवान्वाधानैककर्तृत्वे मन्त्रस्य स्थिते मुख्यार्थे ममेत्यृत्विक्फलमचोदितमप्यनूद्यताम् अनुवादस्य प्राप्तिपरतन्त्रत्वात्।

राद्धान्तस्तु कर्माङ्गमन्त्रेण कर्मफलमनुवाद्यं नर्त्विग्गतमित्यमुख्यार्थं ममेति।

भट्टेन मदीयस्येत्यध्याहारो वेत्युक्तं, गौणो वेति। (अध्याहारे) अत्रैवास्थागुरोः, सति गौणत्वे कल्पना नेति।

भट्टेनोक्तम्—ये तु स्वामिकर्तृकमन्वाधानमाहुः—तेषामित एव मन्त्रलिङ्गाद् भ्रान्तिः। अथ किञ्चिद्वचनमाहुः—

लप्स्यामिति। ऋत्विक्कर्तृकस्यापि नीचैस्सदोमानस्य फलं यथा स्वामिगतमुक्तं तथाऽत्रापि अङ्गभूतमन्त्रप्रकाश्यस्वामिफलमेव युक्तमिति केन विशेषेणायमारंभ इत्याक्षिप्य उक्ते स्वामिगतत्वे अत्र पूर्वपक्षे अधिकयुक्तिरस्तीत्यर्थः का पुनरियमित्यत्राह—साध्यत्वेनेति। युक्तं सदोयाने कर्मिश्रुतिबलात् साध्यत्वप्रतीतेः स्वामिगतत्वम्। इह तु मन्त्रानवाद्यफलं ऋत्विग्गतमप्यनुवदितुं शक्यमित्यर्थः। ननु प्रधानत्वाच्चोदितत्वाच्च स्वामिफलमेवानूद्यनामित्यत्राह—आध्वर्यवेति। अन्वाधानानुरोधेनाध्वर्युकर्तृत्वान्मन्त्रस्य वक्तरि मुख्यार्थत्वात् ममपदस्य अचोदितमप्यध्वर्युफलं मन्त्रानुवाद्यं प्राप्तिपरतन्त्रत्वादनुवादस्येत्यर्थः।

राद्धेति। अनुवादत्वेऽपि कर्माङ्गमन्त्रेण कर्मजन्यस्वामिफलमेवानुवाद्यं इति मन्त्रगतं ममेति पदं मुख्यार्थमेव विनियोगपरतन्त्रत्वादित्यर्थः।

ममेति गौणो वा अध्याहारो वेति अध्याहारकल्पनयापि मन्त्रार्थं उक्तः। स गौणत्वे सति न युक्त इत्याह—भट्टेनेति। तथा यदपरं तैरेवोक्तं ये पुनरग्न्यन्वाधानं स्वामिकर्तृकमाहुः तेषामिदमेव मन्त्रलिङ्गभ्रान्तिहेतुः। तच्च दुर्बलम्। वचनविनियोगबलादध्वर्युकर्तृकत्व-प्रतीतेरिति चिन्ता युक्तैवेति। तदाह—भट्टेनेति। स्वामिकर्तृत्वे वचनान्तरमस्तीति शङ्कते - अथेति। यद्यपि वचनान्तरमस्ति तथापि इयं चिन्तोपपन्ना किम-

तथापीयं चिन्ता—किमध्वर्युयजमानयोर्विकल्पेन फलोक्तिः । उत नित्यस्वामिन एव फलोक्तिरिति । तन्न । स्वामिकर्तृके ह्यन्वाधाने मन्त्रोऽपि तत्कर्तृक इति न विकल्पशङ्का । अथ विकल्पितैककर्तृकमन्वाधानमास्थाय शङ्का । तन्न । मन्त्रस्यैकार्थत्वात्स्वामिफलवाचितैव ।

कर्मार्थं तु फलं तेषाम्

उक्ते स्वामिन एव फलाशीः करणमन्त्रेष्विति तदपवादात्संगतिः । पूर्वपक्षः । उक्तनयात्स्वामिनः कर्मफलमसंतापाख्यं सूक्तवाकमन्त्रलिङ्गादिव कल्प्यम् । राद्धान्तस्तु—प्रागार्थकर्मा-

---

ध्वर्युयजमानयोर्विकल्पेन फलोक्तिः उत नित्यं स्वामिन एवेति । तन्नेति । वचनादाधानस्य स्वामिकर्तृकत्वे मन्त्रोऽपि तत्कर्तृक इति न विकल्पाशङ्का युक्तेत्यर्थः । अथेति । आधानस्य स्वामिकर्तृत्वमेव विकल्पितम् । अतः फलेऽपि मन्त्रप्रकाश्ये विकल्पाशङ्केत्यर्थः । तन्नेति । तथापि तन्मन्त्रप्रकाश्ये न विकल्पः । मन्त्रस्यैकार्थत्वात् प्रधानभूतस्वामिफलवाचितैव युक्तेत्यर्थः ।

कर्मार्थं तु फलं तेषाम्

अस्ति दर्शपूर्णमासयोर्मन्त्रः "अग्नाविष्णू मावामवक्रमिणं विजिहाथां मामासन्ताप्तं" इति । तत्र चिन्ता—किं स्वामिफलं प्रकाश्यमुताध्वर्युफलमिति । तत्रावान्तरसङ्गतिमाह—उक्त इति । करणमन्त्रेषु स्वामिनि कर्मफलाशीरित्युक्ते तदपवादात् सङ्गतिरित्यर्थः । ननु मा मासन्ताप्तं इति अस्मदर्थमुख्यार्थत्वाय वक्तुरध्वर्योः फलं प्रकाश्यमिति कथं पूर्वपक्ष इत्यत्राह—पूर्वेति । उक्तनयात् स्वामिनः कर्मफलं सन्तापाख्यं मन्त्रलिङ्गावगतं सूक्तवाकगतायुरादिवत् अन्वाचयफलतया उपादानशेषतया कल्प्यमिति स्वामिफलमेव प्रकाश्यमित्यर्थः ।

राद्धेति । युक्तं पूर्वत्र गौणतया स्वामिफलप्रकाशनं यशःप्रभृतेरार्थस्य आर्त्विजस्य कर्मानुपकारित्वात् । इहासन्तप्तोऽध्वर्युः कर्म कर्तुं शक्नोती-

नुपकारकफलाभिप्रायं गौणतया[1] स्वामिगामित्वमुक्तम् । इह त्वसन्तप्तः अध्वर्युः कर्म कर्तुं शक्नोतीति कर्मोपकारक फलप्रकाशनान्मन्त्राणां कर्माङ्गत्वे सिद्धे नामुख्यार्थो मन्त्र इत्यार्त्विज्यमेव फलम् । लब्ध्यां स्वामिफलानुगुणमिदमार्त्विजमपि फलमिति मन्त्रप्रकाश्यम् ।

व्यपदेशाच्च । इहापि स्वामिमात्रफलमित्यस्यापवादा- त्संगतिः पूर्वपक्षः । अनुवादव्यपदेशकल्प्यं फलमेकत्र स्वामिन्येवास्तु । यदाऽऽत्मने यजमानाय वेत्यत्र तूभयत्र फलितयैव श्रुतेरस्तूभयफलम् ।

त्यसन्तापाख्यफलं कर्मोपकारकम् । कर्माङ्गमन्त्रप्रकाश्यताहंमिति न मन्त्रपदस्य मुख्यार्थताहानिर्युक्तेत्याध्वर्यवं फलं प्रकाश्यमित्यर्थः ।

लब्ध्यामिति । साङ्गेकर्मभि यजमानस्याधिकारात् अधिकृतफलमेव प्रकाश्यमिति मामासन्ताप्तमिति कथमृत्विक्फलप्रकाशनमिति शङ्किते उत्तरं--ऋत्विग्गतमपि असन्तापाख्यं फलं स्वामिफलानुगुणं असन्तप्तर्त्विङ्मुखेन कर्म समापयन् स्वामिनः फलयोगाय वर्तत इति स्वामिफलशेषं मन्त्रप्रकाश्यमित्यर्थः ।

व्यपदेशाच्च

सोमे दक्षिणस्य हविर्धानस्याधस्तादुपरवाख्यगर्तेषु हस्तौ प्रवेश्याध्वर्युर्यजमानमाह-किमत्रेति तर्हि यजमानं आह—भद्रमिति । तत्राध्वर्युर्मन्त्रं ब्रूते तन्नौ सहेति । तत्र चिन्ता—किं याजमानमेव फलं उताध्वर्यवमपीति । अवान्तरसङ्गतिमाह—इहापीति । यथा पूर्वत्र स्वामिफलापवादः तथेहापि स्वामिमात्रफलमित्यस्यापवादात् सङ्गतिरित्यर्थः ननु तन्नौ सहेति द्विवचनबलादुभयप्रकाश्यतेति कथं पूर्वपक्ष इत्यत्राह—पूर्वेति । न तावत् फलत्वेन भद्रस्य श्रुतिः किन्तु अनुवादव्यपदेशेन फलतया कल्प्यम् तत्र कल्पनालाघ-

---

१. गौणनयात्

राद्धान्तस्तु—तन्नौ सहेति द्विवचनाविवक्षाहेत्वभावे व्यपदेशे च कल्पनाहेतौ तुल्ये द्वयोरेव कल्पना। इदं च स्वामिमात्रे फलमित्यस्यापवादपरमिति गुरोः पूर्वपक्षानुक्तिः। न चोभयफलपरो मन्त्रः उभय प्रयोज्य इति शङ्का। एकप्रयोज्यत्वेऽप्युभयफलपरत्वसिद्धेः।

द्रव्यसंस्कारः उक्तमेव बर्हिर्धर्माश्चाङ्गप्रधानार्था इत्युत्तरविवक्षया स्मार्यते। शक्यं त्वेतत्सूत्रमुत्तरपूर्वपक्षेऽपि योजयितुमिति भट्टः। तन्न। उक्तस्मारितनयादेवार्थात्पूर्वपक्षसिद्धेः।

निर्देशात्तु विकृतापूर्वस्यानधिकारः

यदर्थं स्मरणं तदिदमिति संगतिः। पूर्वपक्षः। प्रकृतावङ्गप्रधानार्थत्वात्तद्वद्विकृतावपि बर्हिर्धर्माः।

वायैकत्र कल्प्ये प्रधाने स्वामिन्येव कल्पना युक्तेति द्विवचनं अविवक्षितमित्यर्थः। नन्वात्मने यजमानाय वेत्युभयगतफलवदत्राप्यस्त्वित्यत्राह—यदिति। फलतयैव श्रुतेस्तत्र तथोक्तमित्यर्थः।

राद्धेति। सत्यं फलत्वमिह कल्प्यम् तथापि द्विवचनाविवक्षायां हेत्वभावात् कल्पनाहेतोर्व्यपदेशस्य तुल्यत्वात् द्वयोरेव ऋत्विक्स्वामिनोरेव फलं कल्प्यमित्यर्थः। नन्वत्र गुरुः किमिति पूर्वपक्षं नोक्तवानित्यत्राह—इदं चेति। ननु उभयफलपरत्वे मन्त्रस्योभयप्रयोज्यता स्यादित्यत्राह—न चेति। समाख्याबलादध्वर्युप्रयोज्यत्वेपि तन्नाविति द्विवचनबलादुभयपरतोपपत्तेर्नोभयप्रयोज्यत्वे मानमस्तीत्यर्थः।

द्रव्यसंस्काराः प्रकरणाविशेषात्

दशपूर्णमासयोर्बर्हिर्धर्माः अङ्गप्रधानार्था इति पूर्वपादाद्ये उक्तमेव। उत्तरविवक्षयाऽनेन सूत्रेण स्मार्यत इत्याह—उक्त इति। आचार्यैस्तु एतत्सूत्रमुत्तरपूर्वपक्षेऽपि योजयितुं शक्यमित्युक्तम् तदुक्तस्मारितनयादेव अर्थादुत्तरपूर्वपक्षसिद्ध रयुक्तमित्याह—शक्यं त्विति। शक्यतापि न प्रकरणाविशेषादिति सूत्रोक्तहेतोः अनन्वयापत्तेः प्रकृताङ्गविषयत्वात्तच्चिन्ताया इति।

राद्धान्तः। उपकारजनकतया हि विकृतौ धर्मप्राप्तिः, यद्द्वारं यस्योपकारकत्वं तद्द्वारकमेव विकृतावपीति नेह कार्यान्तरार्थे बर्हिषि क्रिया कार्या। अनपेक्षित्वेन चोहासिद्धेरूहदर्शनं न स्यात् प्रपञ्चो भाष्ये व्यक्तः।

विरोधे च श्रुतिविशेषादव्यक्तः शेषे

प्रकृतौ चेदङ्गप्रधानार्थता मता तर्हि स्तरणबर्हिषः पवित्र-क्रियेत्युत्थितेः सङ्गतिः। पूर्वपक्षः—स्वरूपतः कार्यान्तरार्थबर्हि-र्ग्रहे न धीविरोधः।

निर्देशात्

सोमाङ्गे दैक्षपशौ श्रुतम्—बर्हिषा यूपावटमवस्तृणाति इति तत्र चिन्ता—किमस्मिन् बर्हिषि बर्हिर्धर्माः कार्या उत नेति तत्रावान्तरसङ्गतिमाह—यदर्थमिति। यद्यपि कार्यचिन्ता नोपदेशषट्के सङ्गता तथाप्युपदेशाति-देशविवेकार्थमत्र कृता। ननु प्राकृतकार्याभावात् कथं तत्र प्राकृताङ्गानुष्ठान-शङ्केत्यत्राह—पूर्वेति। प्रकृतिवद्विकृतावनुष्ठानं कार्यम्। प्रकृतौ च बर्हि-धर्माणां अङ्गप्रधानार्थत्वाद्विकृतौ यूपावटबर्हिष्वपि धर्माः कार्या इत्यर्थः।

राद्धेति। सत्यं प्रकृतावङ्गप्रधानार्थत्वम् तथापि विकृतौ यूपावटबर्हि-ष्वपि न धर्माः कार्याः। विकृतौ प्राकृतधर्माणां करणोपकारकतया प्राप्तेः यद्द्वारं हि यस्योपकारजनकत्वं प्रकृतौ क्लृप्तं तद्द्वारकमेव विकृतावपीति नेह कार्यान्तरार्थे यूपावटबर्हिषि धर्माः कार्याः, हविरासादनकार्यबर्हिरर्थ-त्वाद्धर्माणामित्यर्थः। ननु विकृतौ कार्यमनपेक्ष्यैव धर्मप्राप्तिरस्त्वित्यत्राह—कार्येति। कार्यानपेक्षत्वे ऊहादिदर्शनं न स्यादित्यर्थः। वपया प्रातस्सवने चरन्तीत्यादि प्रपञ्चितं भाष्य इत्यर्थः।

विरोधे च श्रुतिविरोधादव्यक्तः शेषे

दशपूर्णमासयोः श्रुतम्—समावप्रच्छिन्नाग्रौ दर्भौ प्रादेशमात्रौ पवित्रे कुरुते इति। तत्र चिन्ता—किं वेदिस्तरणार्थं एव बर्हिषि आच्छिद्य पवित्रं

राद्धान्तस्तु न विरोधः किन्त्वन्यत्र व्यापृतं यावत्तदेकदेशाच्छेदादन्यत्र कारकत्वे वस्तुविरोध इति परिभोजनीयाबर्हिषः कार्यान्तरानवष्टब्धावाच्छेदः पवित्राद्यर्थम् ।

अपनयस्त्वेकदेशस्य विद्यमानसंयोगात

उक्तापवादात् सङ्गतिः । पूर्वपक्षः उक्तमनेकत्र न शेषत्वं । पुरोडाशादावपि तत् ।

राद्धान्तस्तु नात्र वस्तुविरोधः द्व्यवदानमात्रेण यागव्यापारोपसंहारात् शिष्टस्यात्र ग्रहार्हत्वात्[1] । न च धीविरोधः प्रतिपाद्यस्याविनियोगात् ।

कार्यं उतान्यत इति ।। अवान्तरसङ्गतिमाह—प्रकृताविति । ननु स्तरणे विनियुक्तस्य बर्हिषो न पवित्रे विनियोगो युक्तः विनियुक्तविनियोगविरोधादिति कथं पूर्वपक्ष इत्यत्राह—पूर्वेति । अन्यत्र विनियुक्तस्यापि बर्हिषः स्वरूपतः पवित्रकरणे विनियोगे न विरोधः इत्यर्थः ।

राद्धेति । सत्यं न धीविरोधः तथाप्यन्यत्र त्रिधातु पञ्चधातु वा वेदिं स्तृणातीति यावत्परिमितं बर्हिर्व्यापृतं तदेकदेशाच्छेदादन्यत्र कारकतया व्यापारे वस्तुविरोधो दुर्वार इति परिभोजनीया बर्हिषः कार्यान्तरानवष्टब्धत्वात् साधारणादाच्छिद्य पवित्रं कार्यमित्यर्थः ।

अपनयस्त्वेकदेशस्य

ज्योतिष्टोमे श्रुतं—पुरोडाशशकलमैन्द्रवयवस्य पात्रे निदधाति पयस्यां मैत्रावरुणस्य धाना आश्विनस्य इत्यादि । तत्र चिन्ता—किमन्यत एषा क्रिया उत प्रकृतेभ्य इति । अवान्तरसङ्गतिमाह—उक्त इति । ननु सन्निहितत्वात् प्रकृतपुरोडाशशकलग्रहो युक्त इति कथं पूर्वपक्ष इत्यत्राह—पूर्वं इति । उक्तनयेनानेकशेषत्वं पुरोडाशशकलादेः न युक्तं इत्यन्यत एव ग्रह इत्यर्थः ।

---

१. A. व्यापृतत्वात् ।

विकृतौ च सर्वार्थः शेषः

प्रतिपाद्यस्याविरोधवत् सहैवाङ्गप्रधानार्थतापीत्युत्थितेः सङ्गतिः। पूर्वपक्षः—प्रकृतावेवंविधमुपदिष्टमङ्गप्रधानार्थं विकृतावपि तथा। उपांशुत्वं हि कर्तृद्वाराऽङ्गम् उपांशुवदन्नखिन्नः कर्ता कर्म कर्तुमलमिति लिङ्गात् कर्त्रर्थतया अङ्गप्रधानार्थता।

राद्धान्तस्तु नोपदिष्टेन प्रधानेन अतिदिष्टैश्चाङ्गैरुपांशुत्वोपदेशोऽन्वयी। किन्तु [1]पूर्वमुपदिष्टप्रधानमात्र एवान्वयी। न पाश्चात्यातिदिष्टाङ्गेषु सापेक्षानपेक्षयोरनपेक्षं बलीय इति न्यायविदः। उपदिष्टेनैव तुल्यकालेनोपदेश्यमुपांशुत्वमन्वयार्हम्। न चेदं प्राकृतकार्यपाति। न च प्राकृताश्रयो गुणः येन चोदक-

---

राद्धेति। प्रकृतप्रत्यभिज्ञानात् प्रकृतपुरोडाशशकलादेः ग्रहः। पूर्वत्र विरोधान्न प्रकृतग्रहः। इह तु न तथा विरोधः। कथमिति चेत् तत्र वक्तव्यं किं वस्तुविरोधो धीविरोधो वेति विकल्प्य नाद्य इत्याह—नात्रेति। नापि धीविरोध इत्यत्राह – नचेति। तत्र पुरोडाशादेः कृतकार्यस्य प्रतिपाद्यतया संस्कार्यता नैन्द्रवायवादेः। यद्यपि भाविसंस्कारोऽभ्यर्हितः तथापि पुरोडाशादौ द्वितीयाश्रुतेः देशरेचनस्य विध्यपेक्षिततया च प्रतिपाद्यतया संस्कार्यता ऐन्द्रवायवादेः सप्तमी श्रुतेः प्रतिपत्तिदेशतेति प्रतिपाद्यस्य पुरोडाशादेरन्यत्र विनियोगाभावान्न धीविरोध इत्यर्थः।

विकृतौ सर्वार्थः शेषः

इदमाम्नायते—यज्ञाथर्वणं वै काम्या इष्टयः ता उपांशु चरितव्या इति। तत्र चिन्ता—किमुपांशुत्वमङ्गप्रधानार्थमुत प्रधानार्थमेवेति। अवान्तरसङ्गतिमाह—प्रतिपाद्यस्येति। ननु काम्या इष्टयस्ता उपांशु चरितव्या इति वाक्येन प्रधानसंबन्धित्वावगतेः कथं पूर्वपक्ष इत्यत्राह—पूर्वेति। प्रकृतौ एवंविधं उपदिष्टबर्हिरादि अङ्गप्रधानार्थं दृष्टमिति

---

१. पूर्वज्ञानोपदिष्ट।

प्रतीक्षा । न च कर्तुः साङ्गप्रधानार्थत्वे कर्तृद्वारा अस्याङ्गापेक्षा[1] । न चेदं कर्तुः श्रुतम् । किन्तु लिङ्गात् कर्तृद्वारकम् । यत्र प्रधाने श्रुतं तन्मात्रकर्तृद्वारकं न कर्तुः प्रयोगाङ्गत्वापेक्ष-[2]मिति दिक् ।

भट्टेनेयं विधावस्था दूषिता । सर्वत्र प्रथमतरं चोदकप्रवृत्तेः । अतो वाक्यादेव काम्यान्वयो नाङ्गानि कामसंबंधीनीति न तेषामेष धर्म इति चोक्तम् । तन्न । चोदको हि श्रुताङ्गैरपरिपूर्तिमालोच्य प्रवर्तत इति श्रुतेभ्यः पश्चात् । उपकारजनकत्वधीरेव श्रुतैः पश्चादिति "विकृतावि"त्यत्र स्थाप्यम् । वाक्यात्का-

---

विकृतावुपांशुत्वमुपदिष्टमङ्गप्रधानार्थं युक्तमित्यर्थः । कुत इत्यत्राह—उपांश्विति । यस्मादुपांशुत्वं खेदनिरासद्वारा कर्तृसंस्कारतयाऽङ्गम् । उपांशुवदन् अखिन्नः कर्ता कर्मकलापं कर्तुं समर्थ इति लिङ्गात् । ऋत्वर्थतया कर्मार्थित्वात् । कर्ता च प्रयोगाङ्गमिति तद्द्वारमप्युपांशुत्वमङ्गप्रधानार्थं युक्तमित्यर्थः ।

राद्धेति । उपांशुत्वोपदेशो न उपदिष्टातिदिष्टाभ्यां युगपदन्वयी । किन्तु पूर्वमुपदिष्टमात्रान्वयी पश्चादतिदिष्टान्वयी । सापेक्षनिरपेक्षयोर्निरपेक्षं बलीय इति न्यायविद इत्युपदिष्टेन तुल्यकालेन प्रधानमात्रेणोपदिष्टमुपांशुत्वमन्वयीत्यर्थः । नन्वेवं कथं शमीमय्य इत्यादि वैकृतोपदशोऽतिदिष्टस्रुक्कार्यमात्रे इत्यत्राह—न चेति । युक्तं तत्र कार्ये प्रकृतकार्यपातित्वात् । न चेदं तथेत्यर्थः । ननु प्राकृतकार्यानपेक्षस्यापि नवप्रयाजा इत्यादेः विकृतोपदेशस्यातिदेशापेक्षिता दृष्टेत्यत्राह—न चेति । तत्रापि युक्तं नवादिसङ्ख्यागुणस्य प्राकृताश्रयार्थं चोदकप्रतीक्षणात् । नेह तथेत्यर्थः । ननु कर्तृद्वारत्वात् अङ्गप्रधानार्थतेत्यत्राह—न च कर्तुरिति । स्यादेवं यदि कर्तृ-

---

१. A प्रतीक्षा ।

२. A प्रयोगान्तावस्थापेक्षं

म्यान्वयात्प्रधानार्थता तु लघ्व्यामिष्टा । बृहत्यां तु वाक्यं न्यायप्राप्तेरनुवादः ।

सन्निधानविशेषादसंभवे तदङ्गानाम्

गतनयात्प्रधाने श्येन एव दृतिनवनीतविधिरित्युत्थितेः संगतिः पूर्वपक्षः। उपदिष्टप्रधान एवायं विधिः आज्यमित्यनुवादमात्रं । नवनीतस्याज्यत्वात् । नवनीतं ह्यग्निसंयोगोत्पन्नावस्थान्तरमाज्यमुच्यत इति धीसिद्धम् । विमतावाज्यपदं लक्षणयाऽनुवादोऽस्तु राद्धान्तस्तु आज्यशब्दे विधिपरे सति नानुवादतेत्याज्यशब्दे नोद्दिश्य तद्वा तत्कार्यं वा दृतिनवनीतविधिः । प्रधाने

संबन्धितयोपांशुत्वं श्रुतं स्यात्। नेदं कर्तुः श्रुतम्। किन्तु प्रधानकर्मसंबन्धित्वेन श्रुतस्य लिङ्गात् कर्तृद्वारत्वमात्रम् । तच्च यत्र प्रधाने श्रुतं तत्कर्तृद्वारम् । न कर्तुः प्रयोगाङ्गत्वापेक्षमित्यर्थः। ननु लिङ्गात् कर्तृद्वारत्वबलात् अङ्गप्रधानार्थता उपांशुत्वादेः स्यादिति शङ्का दिक्पदनिवर्त्या। निवृत्तिस्तु सापेक्षनिरपेक्षन्यायोपबृंहितोपदेशबलात् प्रथमावगतप्रधानमात्रान्वयवशात् पश्चाल्लिङ्गावगम्यं कर्तृद्वारत्वं प्रधानप्रयोगमात्रापेक्षमिति ।

आचार्यैस्तु—येयमतिदेशस्य विलम्बिततोक्ता सा दूषिता सर्वत्र प्रथमतरं चोदकात्प्राप्तिरिति तदाह—भट्टेनेति। कथं तर्हि राद्धान्त इत्यत्राह—अत इति । वाक्यात् काम्यान्वयप्रतीतेः कामसंबन्धित्वं प्रधानस्य नाङ्गानामिति तेनैवोक्तमित्यर्थः। तन्नेति । चोदको हि श्रुताङ्गैः अपूर्तिमालोच्य प्रवर्तते । अन्यथा प्रकृतिविकृतिव्यवस्था न स्यादिति श्रुतेभ्यः पश्चादेवातिदेश इत्यर्थः नन्वेवं कथं दशमे विकृतावौपदेशिकाङ्गानां पश्चाद्भावित्वमित्यत्राह—उपकारेति । प्रकृतिक्लृप्तोपकारग्रहात् तस्य प्राकृताङ्गैरेवावच्छिन्नतया प्रथमस्थितेरुपकारजनकधीरेवौपदेशिकाङ्गानां पश्चादित्युक्तम् न तु विकृत्यपूर्वसंबन्धित्वमित्यर्थः। यस्तु वाक्यबलात् राद्धान्त उक्तः स लघ्व्यामिष्ट इत्याह—वाक्यादिति। ननु निबन्धनमते न्यायादेव सिद्धे प्रधानमात्रान्वये वाक्यस्य कागतिरित्यत्राह—बृहत्यामिति।

श्येनेनाज्यमित्यातिदेशिकाङ्गविषयोऽयमुपदेशः । भट्टेन प्रकरणात् श्येने विशिष्टाज्यविधिः पूर्वपक्षे । (कृत्वा) अनेकार्थविध्यसंभवादाज्यमनूद्य विशेषणमात्रविधिरिति सिद्धान्तितम् । तन्न । सति हि कार्ये विधौ विशिष्टविधेर्बहुशो निरासात् । भाष्येपवमानहविराज्ये विधिशङ्कोद्धृता ।

सुत्याकाले

उक्तेऽङ्गधर्मत्वे तद्विशेषचिन्तेति संगतिः पूर्वपक्षः । सुत्याकालाङ्गाज्ये दृतिनवनीतविधिः । अङ्गेऽपि कालतः प्रधानासन्ने

सन्निधानविशेषादसंभवे तदङ्गानाम्

श्येने श्रुतम्—दृतिनवनीतमाज्यं भवतीति । तत्र चिन्ता—किं नवनीतं प्रधानार्थमुताङ्गार्थमिति । तत्रावान्तरसङ्गतिमाह—गतनयादिति । ननु आज्योद्देशेन नवनीतविधेराज्यवदङ्गार्थतैव युक्तेति कथं पूर्वपक्ष इत्यत्राह—पूर्वेति । उपदिष्टं नवनीतं उपदिष्टप्रधानार्थं उपांशुत्ववत् प्रकरणाच्चेति नवनीतविधिः प्रधानार्थं एव युक्त इत्यर्थः । कथं तर्हि आज्यपदमित्यत्राह—आज्यमिति । ननु स्यादनुवादता यदा आज्यं प्राप्तं स्यादित्याशङ्क्य प्रौढवादेन परिहरति—न वेति । धीप्रयोगान्यत्वात् द्रव्यान्यत्वाच्च प्रौढवादता । सम्यक्परिहारमाह— विमताविति । राद्धेति । न हि विधिपरत्वे संभवति अनुवादता युक्तेत्याज्यशब्देन तद्वा तत्कार्यं वोद्दिश्य नवनीतविधिरिति प्रधानश्येने आज्यद्रव्याभावात् आज्यद्रव्यकातिदेशिकाङ्गविषयोऽयमुपदेश इत्यर्थः ।

आचार्यैस्तु आज्यविशेषणत्वात् दृतिनवनीतस्य प्रकरणात् प्रधाने विशिष्टाज्यविधेः पूर्वपक्षे विशिष्टविधिगौरवापत्तेः आज्यमनूद्य विशेषणविधे राद्धान्तितम् तदाह—भट्टेनेति । तन्नेति । सति कार्ये विधौ विशिष्टविधेराज्यादिनयेषु बहुशो निरासादित्यर्थः । उपकारतः शेषत्वमितिभ्रान्तस्य श्येनोपकारकपवमानहविष्षु या नवनीतविध्याशङ्का श्रुत्यादिगम्यमेव शेषत्वमिति सा भाष्यं एव निरस्तेत्याह—भाष्य इति ।

प्रधानापेक्षितो विधिर्युक्तः । किं च साद्यस्क्रे सह पशूनालभत इति सहत्वं । सामान्यतः श्रुतं सुत्याकाल एव दृष्टमिदमपि सामान्यतः श्रुतं तथास्तु ।

राद्धान्तः । आसन्नानामनासन्नानां चाङ्गत्वाविशेषात्सर्वेषामाज्यवत्तया धीस्थानामयं विधिः सङ्कोचहेत्वभावात् । यस्तु सुत्याकाल एवालम्भः । स दीक्षानुबन्ध्ययोरवेंघम्यादि[1]-त्युक्तं भाष्ये । न सामान्यविधित्वात् वचनेन निषेध्यतया वर्जितः क्रमोऽनुग्राह्यः सन्निधिलक्षणः ।

मासं तु सवनीयानां चोदनाविशषात्

आज्यपदमेकमुद्देशकमस्तु । इह पदद्वये किमुद्देशकमिति

तत्काले वा लिङ्गदर्शनात्

तस्मिन्नेव नवनीते चिन्त्यते—किं सुत्यादिकालीनानामङ्गानामुत सर्वेषामिति । अवान्तरसङ्गतिमाह—उक्त इति । ननु दृतिनवनीतमित्याज्योद्देशेन विहितं नवनीतं आज्यवतां सर्वाङ्गानां युक्तमिति कथं पूर्वपक्ष इत्यत्राह—पूर्वेति । सत्यमाज्योद्देशेन नवनीतविधिः । स च श्येनप्रकरणे श्रुतः प्रकरणात्प्रधानार्थो युक्तः । तदसंभवे तत्प्रत्यासन्नाङ्गेषु निवेष्टुं युक्तः । यद्यपि चोदकप्राप्तानां न पाठतः सङ्गतिः तथाप्यनुष्ठानकालतोऽस्तीति प्रधानादपेतो विधिः कालतः प्रत्यासन्नाङ्गानां युक्त इत्यर्थः । किञ्चेति । साद्यस्त्रे सहपशूनालभत इत्यालम्भे पशूनां सहत्वं सामान्यतः श्रुतं सुत्याकाल एव दृष्टं इदमपि नवनीतं सामान्यदः श्रुतं तथैव युक्तमित्यर्थः ।

राद्धेति । चोदकागतानामसन्नानां अनासन्नानां चाङ्गानां प्रधानाङ्गत्वाविशेषात् आज्यवत्तया धीस्थितिश्च सर्वेषामविशिष्टेति सर्वत्र नवनीतविधिरित्यर्थः । ननु कालतः प्रत्यासत्तेः विशेषोऽस्त्वित्यत्राह—संकोच इति । अनुष्ठानकालप्रत्यासत्तिविशेषो न पूर्वभावविनियोगसंकोच-

---

१. तुल्यकालत्वा R

चिन्तेयमिति संगतिः पूर्वपक्षः । वाक्यभेदभयान्नोभयमुद्देशकमिति स्थिते पुरोडाशपदमुद्देशकमिति सवनीयासवनीयपुरोडाशानां तरसत्वं । सवनीयपदं तु तदन्तर्गतसवनीयानुवादमात्रं । सवनीयपदे ह्युद्देशके धानादिनानाद्रव्येषु पुरोडाशपदं द्रव्यान्तरेऽपि लक्षणयाऽनुवादः स्यात् ।

राद्धान्तः—पूर्वं सवनीयपदमुद्देशकम् । एवं हि मुख्यपदं यथार्थं, मुख्यत्वं च सवनीयपदस्य भाष्यकारेणापठितमपि निबन्धात्कृतं राद्धान्तनयव्युत्पत्तये दृष्टोपलक्षणं । नानाद्रव्येषु पुरोडाशपद "पुरोडाशानलं कुर्वि"-त्यत्र पुरोडाशपदे ह्युद्देशकसवनीयपदं

हेतुरित्यर्थः । आलम्भवैषम्यामाह—यस्त्विति । पशूनां सुत्याकाल एव सहालम्भो दैक्षानुबन्ध्ययोः अवैषम्यायेत्युक्तं न सामान्यविधित्वनिबन्धन इत्यर्थः अत्र भाष्ये एवं वचनवर्जितः क्रमोऽनुगृहीतो भवतीत्युक्तम् । किमिदं वचनवर्जितमित्याशङ्क्य व्याचष्टे—वचनेति । अस्यार्थः—ओपवसथ्ये दैक्षानुष्ठानक्रमः सुत्याकाले अनूबन्धानुष्ठानक्रमः । तदुभयमपि स्थानमग्नीषोमीयस्य स्थाने अग्नीषोमीयः पुरोडाशः । अनुबन्ध्यायाः स्थाने मैत्रावरुण्यामिक्षेत्यनुग्रहपरेण वचनेनार्थादसिद्धम् (?) सुत्या काले तु सन्निधिलक्षणोऽनुष्ठानक्रमः तद्वचनेन निषेध्यतया वर्जित इत्यत्र दैक्षानुबन्ध्ययोरवैषम्यात् क्रमानुग्रहाय पशूनां समालम्भ इति ।

मासं तु सवनीयानाम्

अस्ति सत्रं शाक्यानामयनं नाम षट्त्रिंशत्संवत्सरम् । तत्र श्रुतम्—संस्थिते संस्थितेऽहनि गृहपतिर्मृगयां याति स तत्र यान् मृगान् हन्ति तेषां तरसाः सवनीयाः पुरोडाशा भवन्ति इति । तत्र चिन्ता—किं पुरोडाशस्थाने तरसविधिः उत सवनीयस्थान इति । तदर्थं चिन्ता—किं पुरोडाशपदमुद्देशकं उत सवनीयपदमिति । तत्रावान्तरसङ्गतिमाह—आज्येति । नन्वविशेषादुभयमपि उद्देशकं युक्तम् । कथं पुरोडाशपदमुद्देशकमिति पूर्वपक्ष इत्यत्राह—पूर्वेति । न तावदुभयमुद्देशकं वाक्यभेदापत्तेः किन्तु निरपेक्षं पुरोडाशपद-

सर्वपुरोडाशसमानाधिकरणतया सवनीयासवनीयोपलक्षणार्थमेव प्रयुक्तम् । लब्व्यां तु सवनीयपदे उद्देशके साहचर्यात् पुरोडाश-पदं [उपलक्षणं] पुरोडाशानलं कुर्वित्यत्र [यथा] । पुरोडाशपदे तूद्देशके सवनीयपदमसाहचर्यादसवनीयपुरोडाशं नोपलक्षयेदिति सवनीयोद्देशः ।

भट्टेन पुरोडाशानलं कुर्विति प्रकृतौ धानाविलक्षणा दृष्टा । न तु सवनीयपदस्यासवनीयेषु पुरोडाशेषु वृत्तिः साहित्याच्च शक्या पुरोडाशेन धानादिलक्षणा । न ह्यसवनीयपुरोडाशस्य

मुद्देशकं सवनीयस्य विशेष्यापेक्षत्वात् । ननु पुरोडाशपदोद्देशेऽपि तस्य सवनीयपदेन विशेषितत्वात् सवनीयपुरोडाश एव तरसता स्यादित्यत्राह— इति सवनीयेति । उद्देश्यविशेषणविवक्षाऽसंभवात् सवनीयासवनीयपुरोडाशे तरसत्वं, सवनीयपदं तु तदन्तर्गतसवनीयानुवादमात्रम् । सवनीयपदस्योद्देशकत्वे दोषमाह—सवनीयेति । सवनीयपदस्योद्देशकत्वे पुरोडाशपदमनुवादकम् । तस्य च धानादिनानाद्रव्येष्वपि तात्पर्यमिति लक्षणयाऽनुवादः स्यात् । सा च न युक्ता पदद्वयमुख्यार्थत्वे सति । ननु पुरोडाशसवनीययोः को भेदः येनैकत्र लक्षणा अपरत्र मुख्यता स्यात् । उच्यते । सवनीयपदोद्देशे पुरोडाशपदस्यानुवादकस्य धानादिनानाद्रव्येषु तात्पर्यमवधृतम् ततस्तत्र प्रवृत्तिः । सा च लक्षणयोपपन्नेति तस्मिन् पुरोडाशपदं लक्षणयाऽनुवादः । पुरोडाशोद्देशपक्षे तु सवनीयपदस्यानुवादकस्य सवनीयासवनीयतात्पर्यावधृतावपि न तत्र सवनीयपदस्य मुख्यवृत्तिः अशक्तेः नापि लक्षणा, सम्बन्धाभावादिति पुरोडाशपदोपस्थितसवनीयासवनीयपुरोडाशान्तर्गतैकदेशभूतसवनीयपुरोडाशमात्रं मुख्यया वृत्त्या सवनीयपदमनुवदतीति भेदः किञ्च लक्षणायां समानायामपि निरपेक्षं पुरोडाशपदमेव उद्देशकमिति भावः ।

राद्धेति । यद्यपि सवनीयपदं विशेष्यापेक्षं तथापि तदेवोद्देशकं प्रथमपठितस्यानुपसञ्जातविरोधिनः सवनीयपदस्यैव यथार्थत्वन्यायतः । ननु न सवनीयपदस्य प्रथमत्वं, भाष्ये तथा पाठाभावादित्यत्राह—मुख्येति । किञ्च प्रकृतौ दृष्टलक्षणत्वादपि पुरोडाशपदं लक्षकं युक्तमित्यर्थः ।

धानादिसंबन्ध इति न सवनीयपदं साहचर्यात् सवनीयपुरोडाश-लक्षणार्थमित्युक्तम् ।

तन्न । न हि क्वचिल्लक्षकं दृष्टमित्येतावता लक्षकता । किंतु सम्बन्धानुपपत्या लक्षणेति लक्षणाविदः । ते च सवनीयेपि स्तः । पुरोडाशद्वारा ह्यसवनीयेपि सवनीयशब्दो दण्डिवत् स्वार्थापरि-त्यागाच्चेयं लक्षणा ज्यायसीति गुरूक्तैव विधा ।

इति महोपाध्यायभवनाथमिश्रविरचिते

मीमांसानयविवेके तृतीयस्य

अध्यायस्याष्टमः

पादः

॥ समाप्तोऽयं तृतीयोऽध्यायः ॥

लप्स्यामिति । विशिष्टानुवादलक्षणवाक्यभेदापत्तेरन्यतरदनुवादकं युक्तम् । तत्र सवनीयपदे उद्देशके पुरोडाशपदं साहचर्यात् पुरोडाशापुरो-डाशात्मकसवनीयानुवादकं लक्षणया युक्तम् । पुरोडाशपदे तूद्देशके सवनीयपदं न सर्वपुरोडाशानामनुवादक्षमम् । साहचर्याभावे लक्षणानुप-पत्तेरिति सवनीयपदमेवोद्देशकमिति राद्धान्ते विशेष इत्यर्थः ।

आचार्यैस्तु राद्धान्ते दृष्टलक्षणत्वमात्रं मूलयुक्तिमुक्त्वा साहित्याच्च पुरोडाशपदमेव लक्षकम् । तदभासान्न सवनीयपदं लक्षणार्हमिति अभ्युच्चय उक्तः । तदाह—भट्टेनेति । तन्नेति । न हि क्वचित् कस्यचित् पदस्य लक्षणा दृष्टेत्येतावता तस्य लक्षकता किन्तु संबन्धानुपपत्तिभ्याम् । ते च सवनीय-पदेपि संभवतः ननु साहित्याभावात् सवनीयपदं सवनीयलक्षकं न युक्त-मित्यत्राह—पुरोडाशेति । सवनीयशब्दः सवनीयपुरोडाशमुपस्थाप्य तद्-द्वारा-ऽसवनीयमपि पुरोडाशं दण्डीवल्लक्षयितुं शक्तः । लक्षणा चेयं ज्यायसी, स्वार्थस्यापि कार्यान्वयात् ।

इत्यात्रेयदीपिकायां

तृतीयाध्यायस्याष्टमः पादः

राष्ट्रिय संस्कृत संस्थान

(मुख्यालय)

(1) अंकगणितम् बीजगणितम्	2-10
(2) चन्द्रगोल विमर्शः	27-00
(3) मलयमारुतम् भाग 3 तथा भाग 4	प्रत्येक 5-00
(4) मीमांसा नयविवेकः	50-00
(5) प्रोसीडिंग्स आफ फर्स्ट इन्टरनेशनल संस्कृत कान्फेरेन्स खंड-1 से खंड-5 (8 भाग)	प्रत्येक 20-00
(6) संस्कृत विमर्शः खंड 1 से खंड 16	प्रत्येक 15-00
(7) युभातः संस्कृतं प्रति	32-00
(8) भाट्टदीपिका खंड-1 से खंड-4	सैट 285-00
(9) प्रोसिडिंग्स आफ फिफ्थ वर्ल्ड संस्कृत कान्फेरेन्स	166-00
(10) भारतीय सौन्दर्य शास्त्रावतारः	83-00
(11) शारदा लिपि दीपिका	67-00
(12) अनुसंधानप्रविधिप्रक्रिया	16-50
(13) श्लोक वार्तिकम् टीका सहितम्	—
(14) कात्यायन यज्ञपद्धतिविमर्श	145-00
(15) रामचरितामृतम	25-00
(16) निबन्ध रत्नमाला	43-00
(17) संस्कृत साहित्य सुधा (हिन्दी ट्रांसलेशन)	52-00
(18) ,, ,, ,, (अंग्रेजी ट्रांसलेशन)	52-00
(19) वैदिक संकलन (हिन्दी ट्रांसलेशन)	72-00
(20) परिभाषेन्दुशेखरः	154-00
(21) नय विवेकः (भाग II)	

RASHTRIA SANSKRIT SANSTHAN

A—40, VISHAL ENCLAVE

NEW DELHI—27

LIST OF BOOKS PRITED UNDER MINISTRY'S RE-PRINT SCHEME

S. NO.	TITLE	PRICE
		Rs....P
1.	Kumarasmbhavam	34.00
2.	Kosha/Dictionary of Sanskrit Languages	51.00
3.	Bhatriharishataktrayam	45.00
4.	Sloka Index Skand Mahapuran	167.00
5.	Tantra Sammuchaya	72.00
6.	Alankar Kostubha	77.00
7.	Vaiyakaran Sidhanta Laghumanjusha Vol. I & II	112.00 Set
8.	Jaiminiya Nyayamala Vistara	52.00
9.	Vivad Ratnakara	52.00
10.	Tandave - Mahabrahmanam	138. 00
11.	Sankhya Yogdarshana	58.00
12.	Nyayavartika—Tatparya-Tika	67.00
13.	Raskamdhenu	60.00
14.	Siddhantalesh - Samgraha	87.00
15.	Sidhanta—Bindu	57.00
16.	Vachaspatyam (6 Volumes)	701.00 Set
17.	Kautilya Arthashastram (3 Volumes)	110.00 Set
18.	Srimadbhagwatgita (Shankaranandi Comm)	49.00
19.	Padyawali	45.00
10.	Krshnakarnamritam of Lilasuka	46. 00
11.	Ashtadasha Purana Darpana	43.00

Note : No discount is allowed on the above publications